नमो नमो निम्मल दंसणस्स



# आगमसुत्ताणि
## (सटीकं)

भागः - ३०

: संशोधक सम्पादकश्च :

मुनि दीपरत्नसागर

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बालब्रह्मचारी श्री नेमिनाथाय नमः
नमो नमों निम्मल दंसणस्स
श्री आनंद-क्षमा-ललित-सुशील-सुधर्मसागर गुरूभ्यो नमः

# आगम सुत्ताणि (सटीकं)

| भागः ३० | |
|---|---|
| ४४ | नन्दी-चूलिकासूत्रं |
| ४५ | अनुयोगद्वार-चूलिकासूत्रं |

-: संशोधकः सम्पादकश्च :-

## मुनि दीपरत्नसागर

ता. १४-४-२००० रविवार २०५६ चैत्र सुद ११

४५-आगम सुत्ताणि-सटीकं
मूल्य रू. ११०००/-

卐 आगम श्रुत प्रकाशन 卐

-: संपर्क स्थल :-
"आगम आराधना केन्द्र" शीतलनाथ सोसायटी विभाग-१,
फ्लेट नं. - १३, ४-थी मंझिल, व्हायसेन्टर, खानपुर,
अहमदाबाद (गुजरात)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## चूलिकासूत्रस्य विषयानुक्रमः


| नन्दी-चूलिकासूत्रं | | | अनुयोगद्वार-चूलिकासूत्रं | | |
|---|---|---|---|---|---|
| मूलाङ्कः | विषयः | पृष्ठाङ्कः | मूलाङ्कः | विषयः | पृष्ठाङ्कः |
| १-१६३ | नन्दी-सूत्रं | ३ | १-३५० | अनुयोगद्वारसूत्रं | २५६ |
| | -वीरस्तुति | | | -ज्ञान विषयक वर्णनम् | |
| | -सङ्घ स्तुति | | | -आवश्यक - तस्यअध्ययनं | |
| | -जिनवंदना, गणधर वन्दना | | | निक्षेप, भेदः इत्यादि | |
| | -जिनशासन स्तुति | | | -श्रुत-तस्य निक्षेप भेद | |
| | -स्थविरावली | | | इत्यादि | |
| | -श्रोता, पर्पदा | | | -द्रव्य स्कन्धः | |
| | -ज्ञानस्य भेदाः | | | -उपक्रमः तस्य निक्षेपादि | |
| | -अवधिज्ञान-वर्णनम् | | | -आनुपूर्वी | |
| | -मनःपर्यवज्ञान-वर्णनम् | | | -अनुगमं | |
| | -केवलज्ञान-वर्णनम् | | | -नयप्ररुपणा | |
| | -मति श्रुतज्ञान-वर्णनम् | | | -प्रमाण प्ररुपणा | |
| | -अङ्गप्रविष्टसूत्र वर्णनम् | | | -समय आदि व्याख्या | |
| | | | | -वक्तव्यता | |
| १-४ | अनुज्ञानन्दी-परिशिष्टं-१ | | | -निक्षेप व्याख्या | |
| १ | योगनन्दी - परिशिष्टं २ | | | -सप्तनय स्वरुपं | |


Jain Education International For Private & Personal Use Only www.jainelibrary.org

# આર્થિક અનુદાતા

-પ.પૂ. માલવભુષણ તપસ્વી આચાર્યદેવ શ્રી નવરત્નસાગર સૂરીશ્વરજી મ.સા.ની પ્રેરણાથી શ્રી લાલભાઈ દેવચંદ શાહ તરફથી - નકલ એક.

-પ.પૂ. સરળ સ્વભાવી-શ્રીમદ્ ભગવતીસૂત્ર વ્યાખ્યાન પટુ આચાર્યદેવ શ્રી નરદેવસાગરસૂરીશ્વરજી મ.સા. તથા પૂજ્યશ્રીના શિષ્યરત્ન તપસ્વી ગણિવર્યશ્રી ચંદ્રકીર્તિસાગરજી મ.સા.ની પ્રેરણાથી શ્રી પુરુષાદાનીય પાર્શ્વનાથ શ્વે. મૂર્તિ. જૈન સંઘ, દેવકીનંદન સોસાયટી, અમદાવાદ તરફથી નકલ એક.

-પ.પૂ. શાસન પ્રભાવક-ક્રિયારાગી આચાર્યદેવશ્રી વિજય ઋચકચંદ્ર સૂરીશ્વરજી મ.સા.ની પ્રેરણાથી એક સદ્ગૃહસ્થ તરફથી નકલ એક.

-પ.પૂ. સાહિત્યપ્રેમી મુનિરાજ શ્રી સર્વોદય સાગરજી મ.સા.ની પ્રેરણાથી-"અચલગચ્છાધિપતિ પ.પૂ.આ.ભ.શ્રી ગુણસાગરસૂરીશ્વરજી મ.સા.ના શિષ્યરત્ન પ.પૂ. મુનિરાજ શ્રી ચારિત્રરત્નસાગરજી મ. ની ૧૯મી અઠ્ઠાઇ નિમિત્તે-શ્રી ચારિત્રરત્ન ફા.ચે.ટ્રસ્ટ તરફથી નકલ એક.

-પ.પૂ. વૈયાવૃત્ત્યકારિકા સાધ્વી શ્રી મલયાશ્રીજી મ.સા.ના શિષ્યા વ્યવહાર વિચક્ષણા પૂ. સાધ્વી શ્રી હિતજ્ઞાશ્રીજી મ.ની પ્રેરણાથી જૈન આરાધના મંદિર-"જ્ઞાનખાતા" તરફથી નકલ એક.

-પ.પૂ. સૌમ્યમૂર્તિ સાધ્વીશ્રી સૌમ્યગુણાશ્રીજી મ.ની પ્રેરણાથી પ.પૂ. ગુરુમાતા-વાત્સલ્યમૂર્તિ સા.શ્રી રત્નત્રયાશ્રીજી મ.ની પંચમી પુન્યતિથિ નિમિત્તે શ્રીમતી લીલમબેન પ્રાણલાલ પી. દામાણી તરફથી નકલ એક.

-પ.પૂ. સ્વનામધન્યા સા. શ્રી સૌમ્યગુણાશ્રીજી તથા તેઓના શિષ્યા સા.શ્રી સમજ્ઞાશ્રીજીની પ્રેરણાથી-૨૦૫૩ના યશસ્વી ચાતુર્માસ નિમિત્તે શ્રી પાર્શ્વપદ્માવતી જૈન સંઘ, પારૂલનગર, અમદાવાદ તરફથી નકલ બે.

-પ.પૂ. રત્નત્રયારાધક સાધ્વીશ્રી સૌમ્યગુણાશ્રીજી તથા તેઓશ્રીના શિષ્યા સા. શ્રી સમજ્ઞાશ્રીજીની પ્રેરણાથી સંવત ૨૦૫૪ના નિર્મળ આરાધનામય ચાતુર્માસની સ્મૃતિમાં-ઘાટલોડિયા (પાવાપુરી) જૈન શ્વે. મૂર્તિ. સંઘ, અમદાવાદ તરફથી નકલ એક.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

-પ.પૂ. સાધ્વી શ્રી રત્નત્રયાશ્રીજી મ.ના પરમ વિનેયા સા. શ્રી સૌમ્યગુણાશ્રીજીની પ્રેરણાથી તેઓના સંસારીભાઈશ્રી ઇન્દ્રવદનભાઈ દામાણીના અનુમોદનીય પુરુષાર્થથી "આગમ દીપ-સંપુટ"ના બદલામાં પ્રાપ્ત રકમમાંથી-નકલ ચાર.

-પ.પૂ. પ્રશમરસનિમગ્ના સાધ્વીશ્રી પ્રશમશીલાશ્રીજી મ.ની પ્રેરણાથી-સમ્મેતશિખર તિર્થોદ્ધારિકા પ.પૂ. સાધ્વીશ્રી રંજનશ્રીજી મ.સા.ના શિષ્યા અપ્રતિમ વૈયાવૃત્ત્યકારિકા સા. શ્રી મલયાશ્રીજી તત્ શિષ્યા સા. શ્રી નરેન્દ્રશ્રીજી-તત્ શિષ્યા સા. શ્રી પ્રગુણાશ્રીજી મ.ના. આત્મશ્રેયાર્થે-અરિહંત ટાવર, જૈન સંઘ, મુંબઇ તરફથી નકલ એક.

-પ.પૂ. આગમોદ્ધારક આચાર્યદેવશ્રી ના સમુદાયવર્તી પ.પૂજ્ય વૈયાવૃત્ત્યકારિકા સા. શ્રી મલયાશ્રીજી મ.ના શિષ્યા પૂ.સા. શ્રી કૈવલ્યશ્રીજી મ.ના શિષ્યા પૂ.સા. શ્રી ભવ્યાનંદશ્રીજી મ.સા.ના સુશિષ્યા મિષ્ટભાષી સાધ્વીશ્રી પૂર્ણપ્રજ્ઞાશ્રીજી મ.સા. તથા તેમના વિનિત શિષ્યા સા. શ્રી પૂર્ણદર્શિતાશ્રીજી તથા સા. પૂર્ણનંદીતાશ્રીજીની પ્રેરણાથી-સર્વોદય પાર્શ્વનાથ ચેરીટેબલ ટ્રસ્ટ, મુલુન્ડ મુંબઈ તરફથી નકલ એક.

-પ.પૂ. વૈયાવૃત્ત્યકારિકા સાધ્વીશ્રી મલયાશ્રીજી મ.ના પ્રશિષ્યા સા. શ્રી ભવ્યાનંદશ્રીજીમ.ના સુવિનિતા સા. શ્રી કલ્પપ્રજ્ઞાશ્રીજી તથા કોકીલકંઠી સા. શ્રી કૈરવપ્રજ્ઞાશ્રજી ની પ્રેરણાથી -મેહુલ સોસાયટી, આરાધનાભવન, સુભાષનગર, વડોદરાની બહેનો તરફથી નકલ એક

-શ્રી વિશાશ્રીમાળી તપગચ્છજ્ઞાતિ-જ્ઞાનખાતું, જૈન પાઠશાળા, જામનગર તરફથી નકલ બે.

-શ્રી મંગળ પારેખનો ખાંચો-જૈન શ્વે. મૂર્તિ. સંઘ, અમદાવાદ. તરફથી ૨૦૫૪ના ચાતુર્માસ નિમિત્તે નકલ બે.

- શ્રી આકોટા જૈન સંઘ, વડોદરાની બહેનો તરફથી નકલ એક.

-શ્રીમતી નયનાબેન રમેશચંદ્ર શાહ, વડોદરાની પ્રેરણાથી આગમોના સેટના બદલામાં પ્રાપ્ત રકમમાંથી નકલ પાંચ.

**શેષ સર્વે રકમ "અમારા"આજ પર્યન્ત પ્રકાશનોના બદલામાં પ્રાપ્ત થયેલી છે.**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नमो नमो निम्मल दंसणस्स

पंचम गणधर श्री सुधर्मा स्वामिने नमः

# ४४ | नन्दीसूत्रम्-

## सटीकं

[ चूलिका सूत्रं-१ ]

[ देववाचक गणि विरचितं मूलं+मलयगिरि आचार्य विरचिता वृत्तिः ]

जयतिः भुवनैकभानुः सर्वत्रविहतकेवलालोकः।
नित्योदितः स्थिरस्तापवर्जितो वर्धमानजिनः ॥१॥
जयति जगदेकमङ्गलमपहतनिःशेपदुरितधनतिमिरम्।
रविबिम्बमिव यथास्थितवस्तुविकाशं जिनेशवचः

**वृ.**इह सर्वेणैव संसारमध्यमध्यासीने जन्तुना नारकतिर्यग्नरामरगतिनिबन्धनाविविधशारीर-मानसानेकदुःखोपनिपातपीडितेन पीडानिर्वेदतः संसारपरिजिहीर्षया जन्मजरामरणरोगशोका-द्यशेषोपद्रवासंस्पृश्यपरमानन्दरूपानिः श्रेयसपदमधीरोढुकामेन तदवाप्तये स्वपरसममानसीभूय स्वपरोपकाराय यतितव्यम्, तत्रापि महत्यामाशयविशुद्धौ परोपकृतिः कर्तुं शक्यते इत्याशय-विशुद्धिप्रकर्षसम्पादनाय विशेषतः परोपकारे यत्न आस्थेयः, परोपकाश्च द्विधा-द्रव्यतो भावतश्च, तत्र द्रव्यतो विविधान्नपानकाञ्चनादिप्रदानजनितः, स च नैकान्तिकः, कदाचित्ततो विसूचिकादि-दोपसम्भवतः उपकारसम्भवात्, नाप्यात्यन्तिकः, कियत्कालमात्रभावित्वात्, भावतो जिनप्रणीत-धर्मसम्पादनजनितः, स चैकान्तिकः, कदाचिदपि ततो दोषासम्भवात्, आत्यन्तिकश्च, परम्परया शाश्वतिकमोक्षसौख्यसम्पादकत्वात्, जिनप्रणीतोऽपि च धर्मो द्विधा-श्रुतधर्म्मश्चारित्रधर्म्मश्च, तत्र श्रुतधर्म्मः स्वाध्यायः, चारित्रधर्म्मः क्षान्त्यादिरूपो दशधा श्रमणधर्म्मः, उक्तं च -

'सुयधम्मो सज्झायो चरित्तधम्मो समणधम्मो'

तत्र श्रुतधर्म्मसम्पत्समन्विता एव प्रायश्चारित्रधर्म्माभ्युगमयथावत्परिपालसमर्था भवन्तीति प्रथमतस्तत्प्रदानमेव न्याय्यं, तत्र परमार्हन्त्यमहिमोपशोभितभगवद्वर्द्धमानस्वामिनिवेदित-मर्थमवधार्य गणभृत्सुधर्म्मस्वामिना तत्सन्तानवर्त्तिभिश्चान्यैरपि सूत्रप्रदानमकारि, न च सूत्रा-दविज्ञातार्थादभिलषितार्थावाप्तिरुपजायते ततः प्रारम्भणीयः प्रवचनानुयोगः, स च परमपदप्राप्ति-हेतत्वाच्छ्रेयोभूतः, श्रेयांसि बहुविघ्नाति भवन्ति, यत उक्तम्-

"श्रेयांसि बहुविघ्नानि, भवन्ति महतामपि।
अश्रेयसि प्रवृत्तानां, क्वापि यान्ति विनायकाः ॥" इति,

ततोऽस्य प्रारम्भ एव सकलप्रत्युहोपशमनाय मङ्गलाधिकारे नन्दिर्वक्तव्यः।

अथ नन्दिरिति कः शब्दार्थः?, उच्यते, 'टुनदु समृद्धा' वित्यस्य 'घातोरुदितो न' मिति नमि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विहिते नन्दनं नन्दिः प्रमोदो हर्ष इत्यर्थः, नन्दिहेतुत्वात्, ज्ञानपञ्चकाभिधायकमध्ययनमपि नन्दिः, नन्दन्ति प्राणिनोऽनेनास्मिवेति वा नन्दिः -इदमेव प्रस्तुतमध्ययनम्, आविष्टलिङ्गत्वाच्चाध्ययनेऽपि प्रवर्त्तमानस्य नन्दिशब्दस्य पुंस्त्वम्, 'इः सर्वधातुभ्यः' इत्यौणादिक इप्रत्यतः, अपरे तु नन्दीति पठन्ति, ते च 'इक् कृष्यादिभ्य' इति सूत्रादिक्प्रत्ययं समानीय स्त्रीत्येऽपि वर्त्तयन्ति, ततश्च 'इतोऽक्त्यर्थादि' तिङीप्रत्ययः।

स च नन्दिश्चतुर्धा-तद्यथा-नामनन्दिः स्थापनानन्दिः द्रव्यनन्दिः भावनन्दिश्च, तत्र नामनन्दि-र्यस्य कस्य चिज्जीवस्याजीवस्य वा नन्दिशब्दार्थरहितस्य नन्दिरिति नाम क्रियते स नाम्ना नन्दिर्नामनन्दिः, यद्वा नामनामवतोरभेदोपचारान्नाम चासौ नन्दिश्च नामनन्दिः, नन्दिरिति नामवान्ना-मनन्दिः, तथा सद्भावमाश्रित्य लेप्यकर्म्मादिष्वसद्भावं चाश्रित्वाक्षवराटकादिषु भावनन्दिमतः साध्वादेर्या स्थापना स स्थापनानन्दिः, अथवा द्वादशविधतूर्यरूपद्रव्यनन्दिस्थापना स्थापनानन्दिः, द्रव्यनन्दिर्द्विधा-आगमतो नोआगमतश्च, तत्रागमतो नन्दिपदार्थस्य ज्ञाता तत्र चानुपयुक्तः, 'अनुपयोगो द्रव्य'मिति वचनात्, नोआगमतस्तु त्रिधा, तद्यथा-ज्ञशरीरद्रव्यनन्दिर्भव्यशरीरद्रव्य-नन्दिर्ज्ञशरीरभव्यशरीरव्यतिरिक्तद्रव्यनन्दिश्च, तत्र यन्नन्दिपदार्थज्ञस्य व्यपगतजीवितस्य शरीरं सिद्धशिलातलादिगतं तद् भूतभावतया ज्ञशरीरद्रव्यनन्दिः, यस्तु बालको नेदानीं नन्दिशब्दार्थमव-बुध्यते अथ चावश्यमायत्यां तेनैव शरीरसमुच्छ्रेयण भोत्स्यते स भाविभावनिबन्धनत्वाद्भव्य-शरीरद्रव्यनन्दिः, इह हि यद् भूतभावं भाविभावं वा वस्तु तद्यथाक्रमं विवक्षितभूतभाविभावा-पेक्षया द्रव्यमिति तत्त्ववेदिनां प्रसिद्धिमुपागतम्, उक्तं च -

"भूतस्य भाविनो वा भावस्य हि कारणं तु यल्लोके।
तद्द्रव्यं तत्त्वज्ञैः सचेतना चेतनं कथितम्॥"

ज्ञशरीरभव्यशरीरव्यतिरिक्तस्तु द्रव्यनन्दिः क्रियाऽऽविष्टो द्वादशविधतूर्यसमुदायः, उक्तं

"दव्वे तूरसमुदओ" तानि च द्वादश तूर्याण्यमूनि -

"भभा मुकुंद मद्दल कडंब झल्लेरि हुडुक्क कंसाला।
काहल तलिमा वंसो संखो पणवो य बारसमो॥"

भावनन्दिर्द्विधा-आगमतो नोआगतश्च, तत्रागमतो नन्दिपदार्थस्य् ज्ञाता तत्र चोपयुक्तः, 'उपयोगो भावनिक्षेप' इति वचनात्, नोआगमतः पञ्चप्रकारज्ञानसमुदवः, 'भावम्मि पञ्चनाणाइं' इति वचनात्, अथवा पञ्चप्रकारज्ञानस्वरूपमात्रप्रतिपादकोऽध्ययनविशेपो भावनन्दिः, नोशब्दस्यैकदेशवचनत्वात्, अस्य चाध्ययनस्य सर्वश्रुतैकदेशत्वात्, तथाहि-अयमध्ययनविशेषः सर्वश्रुताभ्यन्तरभूतो वर्त्तते, तत एकदेशः, अत एव चायं सर्व्वश्रुतस्कन्धाम्भेषु सकलप्रत्यूहनिवृत्तये मङ्गलार्थमादौ तत्त्ववेदिभिरभिधीयते। अस्य च मङ्गलस्थानप्राप्तस्य व्याख्याप्रक्रमे पूर्वसूरयो विनेयानां सूत्रार्थगौरवोत्पादनार्थमविच्छेदेन तीर्थकराद्यावलिका आचक्षते। तत आचार्योऽपि देववाचकनामा ज्ञानपञ्चकं व्याचिख्यासुः प्रथमत आवलिका अभिधित्सुरविघ्नेन अध्यापक-श्रावकपाठकचिन्तकानामभिलषितार्थसिद्धये 'अनादिमन्तस्तीर्थकरा' इति ज्ञापनार्थं सामान्यतो भगवत्तीर्थकृतस्तुतिमभिधातुमाह-

**मू. (१)** *जयइ जगजीवजोणीवियाणओ जगगुरू जगानंदो।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*जगनाहो जगबंधू जयइ जयप्पियामहो भवयं ॥*

वृ. इह स्तुतिर्द्विधा-प्रणामरूपा असाधारणगुणोत्कीर्त्तनरूपा च, तत्र प्रणामरूपा सामर्थ्यगम्या, यथा च सामर्थ्यगम्या तथाऽनन्तरमेव वक्ष्यते, असाधारणगुणोत्कीर्त्तनरूपा च द्विधा-स्वार्थसम्पद-भिधानयिनी परार्थसम्पदभिधायिनी च, तत्र स्वार्थसम्पन्नः परार्थं प्रति समर्थो भवतीति प्रथमतः स्वार्थसम्पदमाह-'जयति' इन्द्रियविषयकषायघातिकर्म्मपरिषहोपसर्गादिशत्रुगणपरिजयात् सर्वानप्यतिशेते, इत्थं सर्वातिशायी च भगवान् प्रेक्षावतामश्यं प्रणामार्हः ततो जयतीति, किमुक्तं भवति ? -तं प्रति प्रणतोऽस्मीति, किंविशिष्टो जयतीत्याह-'जगज्जीवयोनिविज्ञायकः' जगद्-धर्म्माधर्म्माकाशपुद्गलास्तिकायरूपं 'जगद् ज्ञेयं चराचर'मिति वचनात् 'जीवा' इति जीवन्ति-प्राणान् धारयन्तीति जीवाः, कः प्राणान् धारयतीति ? चेत्, उच्यते, यो मिथ्यात्वादिकलुषिततया वेदनीयादिकर्म्मणामभिनिर्वर्त्तकस्तत्फलस्य च सुखदुःखादेरुपभोक्ता नारकादिभवेषु च यथाकर्म्मविपाकोदयं संसर्त्ता सम्यग्दर्शनादिरत्नत्रयाभ्यासप्रकर्षवशाच्चाशेषकर्म्मांशापगमतः परिनिर्वाता स प्राणान् धारयति स एव चात्मेत्यभिधीयते उक्तं च -

"यः कर्त्ता कर्म्मभेदानां, भोक्ता कर्म्मफलस्य च।
संसर्त्ता परिनिर्वाता, स ह्यात्मा नान्यलक्षणः ॥

कथमेतत्सिद्धिरिति चेत् ?, उच्यते, प्रतिप्राणि स्वसंवेदनप्रमाणसिद्धचैतन्यान्यथाऽनुपपत्तिः, तथाहि-न चैतन्यमिदं भूतानां धर्म्मः, तद्धर्म्मत्वे सति पृथिव्याः काठिन्यत्येव सर्वत्र सर्वदा चोप-लम्भप्रसङ्गात्, न च सर्वत्र सर्वदा चोपलभ्यते, लोष्ठादौ मृतावस्थायां चानुपलम्भात्, अथात्रापि चैतन्यमस्ति केवलं शक्तिरूपेण ततो नोपलभ्यते, तदयुक्तं, विकल्पद्वयनातिक्रमात्, तथाहि-सा शक्तिश्चैतन्याद्विलक्षणा उत चैतन्यमेव ?, यदि विलक्षणा तर्हि कथमारट्यते शक्तिरूपेण चैतन्यमस्ति ?, न हि घटे विद्यमाने पटरूपेण घटस्तिष्ठितीति वक्तुं शक्यम्, आह च-

"रूपान्तरेण यदि तत्तदेवास्तीति मा रटीः।
चैतन्यादन्यरूपस्य, भावे तद्विद्यते कथम् ॥"

अथ द्वितीयः पक्षस्तर्हिचैतन्यमेव सा कथमनुपलम्भः ?, आवृतत्त्वादनुपलम्भ इति चेत्, नन्वावृतिरावरणं, तच्चावरणं किं विवक्षितपरिणामाभावः उत परिणामान्तरम् आहोस्विदन्यदेव भूतातिरिक्तं किञ्चित् ?, तत्र न तावद्विवक्षितपरिणामाभावः, एकान्ततुच्छतया तस्यावारकत्वा-योगात्, अन्यथा तस्याप्यतुच्छरूपतया भावरूपताऽऽपत्तिः, भावत्वे च पृथिव्यादीनामन्यतमो भावो भवेत्, 'पृथिव्यादीन्येव भूतानि तत्त्व'मिति वचनात्, पृथिव्यादीनि च भूतानि चैतन्यस्य व्यञ्जकानि नावारकाणीति कथमावारकत्वं तस्योपपत्तिमत् ?, अथ परिणामान्तरम्, तदप्ययुक्तं, परिणामान्तरस्यापि भूतस्वभावतया भूतवद्व्यञ्जकत्वस्यैवोपपत्तेर्नावारकत्त्वस्य, अथान्यदेव भूतातिरिक्तं किञ्चित्, तदतीवासमीचीनं, भूतातिरिक्ताभ्युपगमे चत्वार्येत्र पृथिव्यादीनि भूतानि तत्त्वमिति तत्त्वसङ्ख्याव्याघाप्रसङ्गात्,

अपि चेदं चैतन्यं प्रत्येकं वा भूतानां धर्म्मः समुदायस्य वा ?, न तावत्प्रेकमनुपलभ्यात्, न हि प्रतिपरमाणु संवेदनमुपलभ्यते, यदि च प्रतिपरमाणु भवेत्तर्हि पुरुषसहस्रचैतन्यवृन्दमिव परस्परं विभिन्नस्वभावमिति नैकरूपं भवेत, अथ चैकरूपमुपलभ्यते, अहं पश्यामि अहं करोमित्येवं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सकलशरीराधिष्ठातृकैकरूपतयाऽनुभवात्, अथ समुदायस्य धर्म्मः, तदप्यसत्, प्रत्येकमभवात्, प्रत्येकं हि यदसत्तत्समुदायेऽपि न भवति, यथा रेणुषु तैलं, स्यादेतत्-मद्याङ्गेषु प्रत्येकं मदशक्तिरदृष्टाऽपि समुदाये भवतीति दृश्यते तद्वचैतन्यमपि भविष्यमि को दोषः ?, तदयुक्तं, प्रत्येकमपि मद्याङ्गेषु प्रत्येकं मदशक्त्यनुयायिमाधुर्यादिगुणदर्शनात्, तथाहि-दृश्यते माधुर्यमिक्षुरसे धातकीपुष्पेषु च मनाक् विकलतोत्पादकतेत्यादि, न चैवं चैतन्यं सामान्यतो भूतेषु प्रत्येकमुपलभ्यते, ततः कथं समुदाये तद् भवितुमर्हति ?, मा प्रापत् सर्वस्य सर्वत्र भावप्रसक्त्याऽतिप्रसङ्गः।

किञ्च-यदि चैतन्यं धर्म्मत्वेन प्रतिपन्नं ततोऽवश्यमस्यानुरूपो धर्म्मी प्रतिपत्तव्यः, आनुरूप्याभावे जलकाठिन्ययोरिव धर्मिधर्म्मभावानुपपत्तेः, न च भूतान्यनुरूपो धर्मी, वैलक्षण्यात्, तथाहि-चैतन्यं बोधस्वरूपममूर्तं च, भूतानि च तद्विलक्षणानि, तत्कथमेतेषां परस्परं धर्म्मधर्म्मिभावः ? नापि चैतन्यमिदं भूतानां कार्यम्, अत्यन्तवैलक्षण्यादेव कार्यकारणभावस्याप्ययोगात्, उक्तं च -

"काठिन्योबोधरूपाणि, भूतान्यध्यक्षसिद्धितः।
चेतना च न तद्रूपा, सा कथं तत्फलं भवेत् ?॥"

अपि च-यदि भूतकार्यं चेतना तर्हि किं न सकलमपि जगत्प्राणिमयं भवति ?, परिणतिविशेषसद्भावाभावादिति चेत् ननु सोऽपि परिणतिविशेषसद्भावः सर्वत्रापि कस्मान्न भवति ?, सोऽपि हि भूतमात्रानिमित्तक एव, ततः कथं तस्यापि क्वचित्कदाचिद्भावः ? अन्यच्च स किंरूपः परिणतिविशेष इति वाच्यम्, कठिनत्वादिरूप इति चेत्, तथाहि-काष्ठादिषु दृश्यन्ते घुणादिजन्तवो जायमानाततो यत्र कठिनत्वादिविशेषस्तत्प्राणिमयं न शेष इति, तदप्यसत्, व्यभिचारदर्शनात्, तथाहि-अविशिष्टेऽपि कठिनत्वादिविशेषे क्वचिद्भवन्ति क्वचिन्न क्वचिच्च कठिनत्वादिविशेषमन्तरेणापि संस्वेदजा नभसि च संमूर्च्छिमा जायन्ते, किञ्च-समानयोनिका अपि विचित्रवर्ण्णसंस्थाना दृश्यन्ते प्राणिनः, तथाहि-गोमयाद्येकयोनिसम्भविनोऽपि केचिन्नीलतनवोऽरे पीतकाया अन्ये विचित्रवर्ण्णाः, संस्थानमप्येतेषां परस्परं विभिन्नमेव, तद्यदि भूतमात्रनिमित्तं चैतन्यं तत एकयोनिकाः सर्वेऽप्येकवर्ण्णसंस्थाना भवेयुः, न व भवन्ति, तस्मादात्मान एव तत्तत्कर्म्मवशात्तथोत्पद्यन्ते इति प्रतिपत्तव्यं।

स्यादेतत्-तदागच्छन् गच्छन् वा नात्मोपलभ्यते, केवलं देहे सति संवेदनमुपलभ्यते, देहाभावे च भस्मावस्थायां न, तस्मान्नास्त्यात्मा, किन्तु संवेदनमात्रमेवैकमस्ति, तच्च देहकार्यं, देहे एव च समाश्रितं, कुड्य चित्रवत्, न चित्रं कुड्यविरहितमवतिष्ठति, नापि कुड्यन्तरं संक्रामति, नागतं वा कुड्यन्तरात्, किन्तु कुड्य एव उत्पन्नं कुड्य एव च विलीयते, एवं संवेदनमपि, तदप्यसत्, आत्मा हि स्वरूपेणामूर्त्तः आन्तरमपि शरीरमतिसूक्ष्मत्वान्न चक्षुर्विषयः, तदुक्तम्-

"अन्तरा भवदेहोऽपि, सूक्ष्मत्वान्नोपलभ्यते।
निष्क्रामन् प्रविशन्नात्मा, नाभावोऽनीक्षणादपि॥"

तत आन्तरशरीरयुक्तोऽप्यात्मा आगच्छन् गच्छन् वा नोपलभ्यते, लिङ्गतस्तूपलभ्यते एव, तथाहि-कृमेरपि जन्तोस्तत्कालोत्पन्नस्याप्यस्ति निजशरीरविषयः प्रतिबन्धः, उपघातकमुपलभ्य पलायनदर्शनात्, यश्च यद्विषयः प्रतिबन्धः स तद्विषयपरिशीलनाभ्यासपूर्वकः, तथादर्शनात्, न खल्वन्यन्तापरिज्ञातगुणदोषवस्तुविषये कस्याप्याग्रह उपजायते, ततो जन्मादौ शरीराग्रहः शरीर-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परिशीलनाभ्यासजनितसंस्कारनिबन्धन इति सिद्धमात्मनो जन्मान्तरादागमनम् उक्तं च -

"शरीराग्रहरूपस्य, चेतसः सम्भवो यदा।
जन्मादौ देहिनां दृष्टः, किं न जन्मान्तरागतिः ? ॥"

अथागतिः प्रत्यक्षतो नोपलभ्यते ततः कथमनुमानादवसीयते ?, नैष दोषः, अनुमेयविषये प्रत्यक्षवृत्तेरनभ्युपगमात्, परस्परविषयपरिहारेण हि प्रत्यक्षानुमानयोः प्रवर्त्तनमिष्यते ततः कथं स एव दोषः ?, आह च -

"अनुमेयऽस्ति नाध्यक्षमिति कैवात्र दुष्टता ?
अध्यक्षस्यानुमानस्य, विषयो विषयो न हि॥"

अथ तज्जातीयेऽपि प्रत्यक्षवृत्तिमन्तरेण कथमनुमानमुदयितुमुत्सहते ?, न खलु यस्याग्निविषया प्रत्यक्षवृत्तिर्महानसेऽपि नासीत् तस्यान्यत्र क्षितिधरादौ धूमाद्धूमध्वजानुमानं, तदप्ययुक्तम्, अत्रापि तज्जातीये प्रत्यक्षवृत्तिभावात्, तथाहि-आग्रहोऽन्यत्र परिशीलनाभ्यासाप्रवृत्तः प्रत्यक्षत एवोपलब्धः, तदुपष्टम्भेनेहाप्यनुमानं प्रवर्त्तते, उक्तं च -

"आग्रहस्तावदभ्यासात्, प्रवृत्त उपलभ्यते।
अन्यत्राध्यक्षतः साक्षात्ततो देहेऽनुमा न किम् ? ॥"

योऽपि चित्रदृष्टान्तः प्रागुपन्यस्तः सोऽप्ययुक्तो, वैधर्म्यात्, तथाहि-चित्रमचेतनं गमनस्वभावरहितं च, आत्मा च चेतनः कर्म्मवशाद् गत्यागती च कुरुते, ततः कथं दृष्टान्तदार्ष्टान्तिकयोः साम्यम् ?, ततो यथा कश्चिद् देवदत्तो विवक्षिते ग्रामे कतिपयदिनानि गृही भूत्वा ग्रामान्तरे गृहान्तरमास्थायावतिष्ठते, तद्वद् आत्माऽपि विवक्षिते भवे देहं परिहाय भवान्तरे देहान्तरमारचय्यावतिष्ठते, यच्चोक्तं- 'संवेदन देहकार्य'मिति, तत्र चाक्षुपादिकं संवेदनं देहाश्रितमपि कथञ्चिद् भवतु, चक्षुरादीन्द्रियद्वारेण तस्योत्पत्तिसम्भवात्, यत्तु मानसं तत्कथम् ?, न हि तद्देहकार्यं घटते, युक्त्ययोगात्, तथाहि-

तन्मानसं ज्ञानं देहादुत्पद्यमानमिन्द्रियरूपादा समुत्पद्ये अनिन्द्रियरूपाद्वा केशनस्वादिलक्षणात् ?, तत्र न तावदाद्यः पक्षः, इन्द्रियरूपात् तदुत्पत्ताविन्द्रियबुद्धिवद् वर्त्तमानार्थग्रहणप्रसक्तेः, इन्द्रियं हि वार्त्तमानिक एवार्थे व्याप्रियते, ततस्तत्सामर्थ्यादुपजायमानं मानसमपि ज्ञानमिन्द्रियज्ञानमिव वर्त्तमानार्थग्रहणपर्यवसितसत्ताकमेव भवेत्, अथ यदा चक्षू रूपविषये व्याप्रियते तदा रूपविज्ञानमुत्पादयति न शेषकालं, ततः तद्रूपविज्ञानं वर्तमानार्थविषयं, वर्त्तमाने एवार्थे चक्षुषो व्यापारात्, रूपविषयव्यावृत्त्यभावे च मनोज्ञानं, ततो न तत्प्रतिनियतकालविषयं, एवं शेषेष्वपीन्द्रियेषु वाच्यं, ततः कथमिव मनोज्ञानस्य वर्त्तमानार्थग्रहणप्रसक्तिः ? तदसाधीयो, यत इन्द्रियाश्रितं तदुच्यते यदिन्द्रियव्यापारमनुसृत्योपजायते, इन्द्रियाणां च व्यापारः प्रतिनियत एव वार्त्तमानिके स्वस्वविषये, ततो मनोज्ञानमपि यदिन्द्रियव्यापाराश्रितं तत ऐन्द्रियज्ञानमिव वार्त्तमानिकार्थग्राहकमेव भवेद्, अन्यथा इन्द्रियाश्रितमेव तद् न स्यात्, उक्तं च-

"अक्षव्यापारमाश्रित्य, भवदक्षजमिष्यते।
तद्व्यापारो न तत्रेति, कथमक्षभवं भवेत् ? ॥"

अथानिन्द्रियरूपादिति पक्षः, तदप्ययुक्तं, तस्याचेतनत्वात्, नन्वचेतनत्वादिति कोऽर्थः ?,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यदि इन्द्रियविज्ञानविरहादिति तदिष्यत एव, यदि नामेन्द्रियविज्ञानं ततो न भवति मनोज्ञानं तु कस्मात् न भवति ?, अथ मनोविज्ञानं नोत्पादयतीति अचेतनत्वं, तदा तदेव विचार्यमाणं इति प्रतिज्ञार्थैकदेशासिद्धो हेतुः, तदप्यसत्, अचेतनत्वादिति किमुक्तं भवति ?-स्वनिमित्तविज्ञानैः स्फुरच्चिद्रूपतयाऽनुपलब्धेः, स्पर्शादयो हि स्वस्वनिमित्तविज्ञानैः स्फुरच्चिद्रूपा उपलभ्यन्ते ततस्तेभ्यो ज्ञानमुत्पद्यते इति युक्तम्, केशनखादयस्तु न मनोज्ञानेन तथा स्फुरच्चिद्रूपा उपलभ्यते ततः कथं तेभ्यो मनोज्ञानं भवतीति प्रतीमः ?, आह च-

"चेतयन्तो न दृश्यन्ते, केशश्मश्रुनखादयः
ततस्तेभ्यो मनोज्ञानं, भवतीत्यतिसाहसम्॥"

अपि च-यदि केशनखादिप्रतिबद्धं मनोज्ञानं ततः तदुच्छेदे मूलत एव न स्यात्, तदुपघाते चोपहतं भवेत्, न च भवति, तस्मात् नायमपि पक्षः क्षोदक्षमः, किञ्च-मनोज्ञानस्य सूक्ष्मार्थमे(वे)-तृत्वस्मृतिपाटवादयो विशेषा अन्वयव्यतिरेकाभ्यामभ्यासपूर्वका दृष्टाः, तथाहि-तदेव शास्त्रमूहापोहादिप्रकारेण यदि पुनः पुनः परिभाव्यते ततः सूक्ष्मसूक्ष्मतरार्थावबोध उल्लसति स्मृति-पाटवं चापूर्वमुज्जृम्भते, एवं चैकत्र शास्त्रेऽभ्यासतः सूक्ष्मार्थमे(वे)तृत्वशक्तौ स्मृतिपाटवशक्तौ चोपजातायामन्येष्वपि शास्त्रान्तरेष्वनायासनैव सूक्ष्मार्थावबोधः स्मृतिपाटवं चोल्लसति, तदेवमभ्यासहेतुकाः सूक्ष्मार्थमे(वे)तृत्वादयो मनोज्ञानस्य विशेषा दृष्टाः, अथ कस्यचिदिहजन्मा-भ्यासव्यतिरेकेणापि दृश्यन्ते, ततोऽवश्यं ते पारलौकिकाभ्यासहेतुका इति प्रतिपत्तव्यम्, कारणेन सह कार्यस्यान्थाऽनुपपन्नत्वप्रतिबन्धतोऽदृष्टतत्कारणस्यापि तत्कार्यत्वविनिश्चितेः, ततः सिद्धः परलोकवायी जीवः, सिद्धे च तस्मिन् परलोकवायिनि यदि कथञ्चिदुपकारी चाक्षुपादेर्विज्ञानस्य देहो भवेत् भवतु न कश्चिद् दोषः,

क्षयोपशम हेतुतया देहस्यापि कथञ्चिदुपकारित्वाभ्युगमात्, न चैतावता तन्निवृत्तो सर्वथा तन्निर्वृत्तिः न हि वह्नेरासादितविशेषो घटो वह्निनिवृत्तौ समूलोच्छेदं निवर्तते, केवलं विशेष एव कश्चनापि, यथा सुवर्णस्य द्रवता, एवमिहापि देहनिवृत्तौ ज्ञानविशेष एव कोऽपि तत्प्रतिबद्धो निवर्त्ततां, न पुनः समूलं ज्ञानमपि, यदि पुनर्देहमात्रनिमित्तकमेवविज्ञानमिष्येत देहनिवृत्तौ च निवृत्तिमत् तर्हि देहस्य भस्मावस्थायां मा भूत्, देहे तु तथाभूते एवावतिष्ठमाने मृतावस्थायां कस्मात् न भवति ?, प्राणा-पानयोरपि हेतुत्वात् तदभावान्न भवतीति चेत्, न प्राणापानयोर्ज्ञाना-हेतुत्वायोगात्, ज्ञानादेव तयोरपि प्रवृत्तेः, तथाहि मन्दौ प्राणापानौ निःस्रमिष्यते ततो मन्दौ भवतः दीर्घौ चेत्तर्हि दीर्घाविति, यदि पुनर्देहमात्रनिमित्तौ प्राणापानौ प्राणापाननिमित्तं च विज्ञानं तर्हि नेत्थमिच्छावशात् प्राणापानप्रवर्तनं भवेत्,

न हि देहमात्रनिमित्ता गौरता श्यामता वा इच्छावशात् प्रवर्त्तमाना दृष्टा, प्राणापाननिमित्तं च यदि विज्ञानं ततः प्राणापाननिर्ह्रासातिशयसम्भवे विज्ञानस्यापि निर्ह्रासातिशयौ स्याताम्, अवश्यं हि कारणे परिहीयमानेऽभिवर्द्धमाने च कार्यस्यापि हानिरुपचयश्च भवति, यथा महति मृत्पिण्डे महान् घटोऽल्पे चाल्पीयन्, अन्यथा कारणमेव तद् न स्याद्, न च भवतः प्राणापाननिर्ह्रासातिशय-सम्भवे विज्ञानस्यापि निर्ह्यासातिशयौ, विपर्ययस्यापि भावात्, मरणावस्थायां प्राणापानातिशय-सम्भवेऽपि विज्ञानस्य निर्ह्यासदर्शनात्, स्यादेतत्-तदानीं वातपित्तादिभिर्दोषैर्देहस्य विगुणी-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कृतत्वात् न प्राणापानातिशयसम्भवेऽपि चैतन्यस्यातिशयसम्भवः, अत एव मृतावस्थायामपि न चैतन्यं, देहस्य विगुणीभूतत्वात्, तदसमीचीनतरम्, एवं सति मृतस्यापि पुनरुज्जीवनप्रसक्तेः,

तथाहि-मृतस्य दोषाः समीभवन्ति, समीभवनं च दोषाणामवसीयते ज्वरादिविकारादर्शनात्, समत्वं चारोग्यं, 'तेषां समत्वमारोग्यं, क्षय, वृद्धी विपर्यये इति वचनात्, आरोग्यलाभात्, स्वदेहस्य पुनरुज्जीवनं भवेत्, अन्यथा देहः कारणमेव न स्यात्, चेतसः तद्विकारभावाभावननुविधानात्, एवं हि देहकारणता विज्ञानस्य श्रद्धेया स्यात् यदि पुनरुज्जीवनं भवेत्, स्यादेतदअयुक्तमिदं पुनरुज्जीवनप्रसङ्गापादनं, यतो यद्यपि देहस्य वैगुण्यमाधाय निवृत्ताः तथापि न तत्कृतस्य वैगुण्यस्य निवृत्तिः, न हि दहनकृतो विकारः काष्ठे दहननिवृत्तौ निवर्त्तमानो दृष्टः, तदयुक्तम्, इह हि किञ्चित् क्वचिदनिवर्त्यविकारारम्भकं यथा वह्निः काष्ठे, न हि श्यामतामात्रमपि वह्निना कृतं काष्ठे वह्निनिवृत्तौ निवर्त्तते, किञ्चित्पुनः कचित् निवर्त्यविकाररम्भकं यथा स एवाग्निः सुवर्णे, तथाहि-अग्निकृता सुवर्णे द्रवताऽग्निनिवृत्तो निरर्त्तते, तथा वाय्वादयो दोषा निवर्त्यविकाररम्भकाः, चिकित्सा-प्रयोगदर्शनाद्, यदि पुनरविर्त्यविकारारम्भका भवेयुः तर्हि न तद्विकारनिवर्त्तनाय चिकित्सा विधीयते, वैफल्यप्रसङ्गात्, न च वाच्यम्-मरणात् प्राग् दोषा निवर्त्यविकाररम्भका मरणकाले त्वनिवर्त्यविकारारम्भका इति,

एकस्यैकत्रैव निवर्त्यानिवर्त्यविकाररम्भाकत्वायोगात्, न हि एकमेव तत्रैव निवर्त्यविकारारम्भकमनिवर्त्यविकारारम्भकं च भवितुमर्हति, तथाऽदर्शनात्, ननु द्विविधो हि व्याधिः-साध्योऽसाध्यश्च, तत्र साध्यो निवर्त्त्यस्वभावः, तमेवाधिकृत्य चिकित्सा फलवती, असाध्योऽनिवर्त्तनीयः, न च साध्यासाध्यभेदेन व्याधिद्वैविध्यमप्रतीतम्, सकललोकप्रसिद्धत्वाद्, व्याधिश्च दोषवैषम्यकृतः, ततः कथं दोषाणां निवर्त्यानिवर्त्यविकारारम्भकत्वमनुपपन्नमिति, तदप्यसत्, भवन्मतेनासाध्यव्याधेरेवानुपपत्तेः, तथाहि-असाध्यता व्याधेः क्वचिदायुःक्षयात्, यतः तस्मिन्नेव व्याधौ समानौषधवैद्यसम्पर्केऽपि कश्चिन्म्रियते, कश्चित् न क्वचित्पुनः प्रतिकूलकर्म्मोदयात्, प्रतिकूलकर्मोदयजनितो हि श्वित्रादिव्याधिरौषधसहस्रैरपि कश्चिदसाध्यो भवति, एतच्च द्विविधमप्यसाध्यत्वं व्याधेः परमेश्वप्रवचनवेदिनामेव मते सङ्गच्छते, न भवतो भूतमात्रतत्त्ववादिनः, कच्चित्पुनरसाध्यो व्याधिर्दोषकृतविकारनिवर्त्तनार्थमिष्यते न पुनरत्यन्तासतश्चैतन्यस्योत्पादनार्थं, तथाऽनभ्युपगमात्, दोषकृताश्च विकारा मृतावस्थानां स्वयमेव निवृत्ताः, ज्वरादेरदर्शनात्, ततः किं वैद्यौषधान्वेषणेनेति तदवस्थ एव पुनरुज्जीवनप्रसङ्गः। अपि च-कश्चिद् दोषाणामुपशमेऽप्यकस्मादेव म्रियते, कश्चिच्चातिदोषदुष्टत्वेऽपि जीवति, तदेतद् भवन्मते कथं व्यवतिष्ठते ?, आह च-

"दोषस्योपशमेऽप्यस्ति, मरणं कस्यचित्पुनः।
जीवनं दोषदुष्टत्वेऽप्येतन्न स्याद् भवन्मते॥"

अस्माकं तु मतेन यावदायुःकर्म विजृम्भते तावद् दोषैरतिपीडितोऽपि जीवति, आयुःकर्म्मक्षये च दोषाणामविकृतावपि म्रियते, तन्न देहमात्रनिमित्तं संवेदनम्।

अन्यच्च-देहः कारणं संवेदनस्य सहकारिभूतं भवेदुपादानभूतं वा ?, यदि सहकारिभूतं तदिष्यत एव, देहस्यापि क्षयोपशमहेतुतया कथञ्चिद् विज्ञानहेतुत्वाभ्युपगमात्, अथोपादानभूतं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तदयुक्तम्, उपादानं हि तत् तस्य यद्विकारेणैव यस्य विकारो, यथा मृद् घटस्य, न च देहविकारेणैव विकारः संवेदनस्य, देहविकाराभावेऽपि भयशोकादिना तद्विकारदर्शनात्, तन्न देह उपादानं संवेदनस्य, उक्तं च-

"अविकृत्य हि यद्वस्तु, यः पदार्थो विकार्यते।
उपादानं न तत्तस्य, युक्तं गोगवयादिवत्॥"

एतेन यदुच्यते- 'मातापितृचैतन्यं सुतचैतन्यस्योपादान' मिति, तदपि प्रतिक्षिप्तवगन्तव्यं, तत्रापि तद्विकारे विकारित्वं तदविकारे चाविकारित्वमिति नियमादर्शनात, अन्यच्च-यद्यस्योपादानं तत्तस्मादभेदेन व्यवस्थितं, यथा मृदो घटः, मातापितृचैतन्यं च चेत्सुतचैतन्यस्योपादानं ततः सुतचैतन्यं मातापितृचैतन्यादभेदेन व्यवतिष्ठेत्, तस्माद् यत्किञ्चिदेतत्, तन्न भूतधर्मो भूतकार्यं वा चैतन्यम्, अथ चास्ति प्रतिप्राणि स्वसंवेदनप्रमाणसिद्धमतो यस्येदं स यथोक्तलक्षणो जीवः॥

'योनय' इति 'युक् मिश्रणे' युवन्ति-तैजसकार्म्मणशरीरवन्तः सन्त औदारिकशरीरेण वैक्रियशरीरेण वाऽऽस्विति योनयो-जीवानामेवोत्पत्तिस्थानानि ताश्च सचित्तादिभेदभिन्ना अनेकप्रकाराः, उक्तं च- 'सचित्तशीतसंवृत्तत्तेतरमिश्रास्तद्योनयः' इति, जगच्च जीवाश्च योनयश्च जगज्जीवयोनयः तासां विविधम्-अनेकप्रकारमुत्पादाद्यनन्तधर्म्मात्मकतया जानातीति विज्ञायको जगज्जीवयोनिविज्ञायकः, अनेन केवलज्ञानप्रतिपादनात् स्वार्थसम्पदमाह। तथा जगद् गृणाति-यथावस्थितं प्रतिपादयति शिष्येभ्य इति जगद्गुरुः, यथावस्थिसकलपदार्थप्रतिपादक इत्यर्थः, एतेन यत्कैश्चित् बहिरर्थं प्रति प्रामाण्यमपाक्रियते तदपास्तं द्रष्टव्यं, तथाहि ते एवमाहुः -प्रमेयं वस्तु परिच्छिन्नं प्रापयत्प्रमाणमुच्यते, प्रमेयं च विषयः प्रमाणस्येति प्रामाण्यं विषयवत्तया व्याप्तं, ततो यद्विषयवन्न भवति न तत्प्रमाणं, यथा गगनेन्दीवरज्ञानं, न भवति च विषयवत् शाब्दं ज्ञानमिति, न चायमसिद्धो हेतुः, यतो द्विविधो विषयः-प्रत्यक्षः परोक्षश्च, तत्र न प्रत्यक्षः शाब्दज्ञानस्य विषयो, यस्य हि ज्ञानस्य प्रतिभासेन स्फुटाभीनीलाद्याकाररूपेण योऽर्थोऽनुकृतान्वयव्यतिरेकः स तस्य प्रत्यक्षः, तस्य च प्रत्यक्षस्यार्थस्यायमेव प्रतिपत्तिप्रकारः सम्भवदशामश्रुते, नापरः, तद्विषयं च तदन्वयव्यतिरेकानुविधायि स्फुटप्रतिभासं ज्ञानं प्रत्यक्षं, प्रत्यक्षज्ञेयत्वात्, तद् न प्रत्यक्षोऽर्थोऽनेकप्रकारप्रतिपत्तिविषयो यः शाब्दप्रमाणस्यापि विषयो भवेत्, नापि परोक्षः, तस्यापि हि निश्चिततदन्वयव्यतिरेकनान्तरीयकदर्शनात् प्रतिपत्तिः यथा धूमदर्शनाद्वह्नेः, अन्यथाऽतिप्रङ्गात्, न च शब्दस्यार्थेन सह निश्चितान्वयव्यतिरेकता, प्रतिबन्धाभावात्, तादात्म्यतदुत्पत्त्यनुपपत्तेः, तथाहि-न बाह्योऽर्थो रूपं शब्दानां नापि शब्दो रूपमर्थानां, तथाप्रतीतेरभावात्, तत्कथमेषां तादाम्त्यं? येन व्यावृत्तिकृतव्यवस्थाभेदेऽपि नान्तरीयकता स्यात्, कृतकत्वानित्यत्ववद्,

अपि च-यदि तादात्म्यमेषां भवेत् ततोऽनलाचलक्षुरिकादिशब्दोच्चारणे वदनदहनपूरणपाटनादिदोषः प्रसज्येत, न चैवमस्ति, तद् न तादात्म्यं, नापि तदुत्पत्तिः, तत्रापि विकल्पद्वयप्रसक्तेः, तथाहि-वस्तुनः किं शब्दस्योत्पत्तिरुत शब्दाद्वस्तुनः?, तत्र वस्तुनः शब्दोत्पत्तावकृतसङ्केतस्यापि पुंसः प्रथमपनसदर्शने तच्छशब्दोच्चारणप्रसङ्गः, शब्दाद्वस्तूत्पत्तौ विश्वस्यादरिद्रताप्रसक्तिः, तत एव कटककुण्डलाद्युत्पतेः, तदेवं प्रतिबन्धाभावात् न शब्दस्यार्थेन सह नान्तरी-

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

यकतानिश्चयः, तदभावाच्च न शब्दाद् निश्चितस्यार्थस्य प्रतिपत्तिः, अपि त्वनिवर्त्तितशङ्कतयाऽस्ति न वेति विकल्पितस्य, न च विकल्पितमुभयरूपं वस्त्वस्ति यत्प्राप्यं सद्विषयः स्यात्, प्रवर्त्तमानस्य तु पुरुषस्य तस्य तस्यार्थस्य पृथिव्याममज्जनादवश्यमन्द् ज्ञानान्तरं प्राप्तिनिमित्तमुपजायते यतः किञ्चिदवाप्यत इति शाब्दज्ञानस्य विषयवत्त्वाभावः, तदसत्, विषयवत्त्वाभावासिद्धेः, परोक्षस्य तद्विषयत्वाभ्युपगमात्, यत्पुनरुक्तं-'न शब्दस्यार्थेन सह निश्चितान्वयव्यतिरेकता, प्रतिबन्धाभावादिति,' तदसमीचीनं, वाच्यवाचकभावलक्षणेन प्रतिबन्धान्तरेण नान्तरीयकतानिश्चयात्, शब्दो हि बाह्यवस्तुवाचकस्वभावतया तन्नान्तरीयकः, ततस्तन्नान्तरीयकतायां निश्चितायां शब्दाद् निश्चितस्यैवार्थस्य प्रतिपत्तिर्न विकल्पितरूपस्य, निश्चितं च प्रापयत् विषयवदेव शाब्दं ज्ञानमिति। स्यादेतद्-यदि वास्तवसंबन्धपरिकरितमूर्त्तयः शब्दाः तर्हि समाश्रयतु निरर्थकतामिदानीं सङ्केतः, स खलु संबन्धो यतोऽर्थप्रतीतिः, स चेद् वास्तवो निरर्थकः सङ्केतः, तत एवार्थप्रतीतिसिद्धेः, तदेतदत्यन्तप्रमाणमार्गानभिज्ञत्वसूचकं, यतो न विद्यमान इत्येव सम्बन्धोऽर्थप्रतीतिनिबन्धनं, किन्तु स्वात्मज्ञानसहकारी, यथा प्रदीपः, तथाहि-प्रदीपो रूपप्रकाशनस्वभावोऽपि यदि स्वात्मज्ञानसहकारिकृतसाहायकः ततो रूपं प्रकाशयति, नान्यथा, ज्ञापकत्वात्, न खलु धूमादिकमपि लिङ्गं वस्तुवृत्त्या वह्नयादिप्रतिबद्धमपि सत्तामात्रेण वह्नयादेर्गमकमुपजायते, यदुक्तमन्यैरपि-

"ज्ञापकत्वाद्धि सम्बन्धः, स्वात्मज्ञानमपेक्षते।<br>
तेनासौ विद्यमानोऽपि, नागृहीतः प्रकाशकः ॥"

सम्बन्धस्य च परिज्ञानं तदावरणकर्म्मक्षयक्षयोपशमानां शब्दादर्थाच्च केवलादप्यवैपरीत्येन वाच्यावाचकभावलक्षणः सम्बन्धोऽवगमपथमृच्छति, तथाहि-सर्वे एव सर्ववेदिनः सुमेरुजम्बूद्वीपादीनर्थानगृहीतसङ्केता अपि तत्तच्छब्दवाच्यानेव प्रतिपद्यन्ते, तैरेव तथाप्ररूपणात्, कल्पान्तरवर्त्तिभिरन्यैरेवं प्ररूपिता इति तैरपि तथा प्ररूपिता इति चेत्, ननु तेषामपि कल्पान्तरवर्त्तिनां तथाप्ररूपणे को हेतुरिति वाच्यम्, तदन्यैरेवं प्ररूपणादिति चेत् अत्रापि स एव प्रसङ्गः, समाधिरपि स एवेति चेत्, ननु तर्हि सिद्धः सुमेर्वाद्यर्थानां तदभिधायकानां च वास्तवः सम्बन्धः,

सर्वकल्पवर्त्तिभिरपि सर्ववेदिभिस्तेषां सुमेर्वादिशब्दवाच्यतथा प्ररूपणात्, अनादित्वात्संसारस्य कदाचित्कैश्चिदन्यथापि सा प्ररूपणा कृता भविष्यतीति चेत्, न अतीन्द्रियत्वेनात्र प्रमाणाभावात्, सर्वैरपि तथैव सा प्ररूपणा कृतेत्यत्रापि न प्रमाणमिति चेत्, न, अत्र प्रमाणोपपत्तेः, तथाहि-शाक्यमुनिना सम्प्रति सुमेर्वादिकोऽर्थः सुमेर्वादिशब्देन प्ररूपितः, स च सुमेर्वादौ सुमेर्वादिशब्दप्रयोगः सङ्केतद्वारेणाप्यतत्स्वभावतायां तयोर्नोपपद्यते, तत्स्वभावत्वाभ्युपगमे च सिद्धं नः समीहितम्, अनादावपि काले तयोः तत्स्वभावत्वात्, तत्समानपरिणामस्य प्रवाहतो नित्यत्वात् तत्र सम्बन्धाभ्युपगमाद्, इत्थं चैतदङ्गीकर्त्तव्यमन्यथाऽनादित्वात्संसारस्य कदाचिदन्यतोऽपि धूमादेर्भावो भविष्यतीत्येवं व्यभिचारशङ्का धूमधूमध्वजादिषु प्रसरन्ती दुर्निवारेत्यलं दुर्मतिविस्पन्दितेषु प्रयासेन, ननु यदि पारमार्थिकसम्बन्धनिबद्धस्वरूपत्वादिमे शब्दाः तात्त्विकार्थाभिधानप्रभविष्णवः तर्हि दर्शनान्तरनिवेशिपुरुषपरिकल्पितेषु वाच्येष्वेतेषां प्रवृत्तिर्नोपपद्येत, परस्परविरुद्धत्वेन तेषामर्थानां स्वरूपतोऽभावात्, यदपि च विनष्टमनुत्पन्नं वा तदपि स्वरूपेण

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न समस्तीति तत्रापि वाचो न प्रवर्त्तेरन्,

अपि च–यदि वाचां सद्भूतार्थमन्तरेण न प्रवृत्तिः तर्हि न कस्याश्चिदपि वाचोऽलीकता भवेत्, न चैतत् दृश्यते, तसमात्सर्वमपि पूर्वोक्तं मिथ्या, तदप्युक्तम्, इह द्विधा शब्दाः–मृषाभाषा-वर्गणोपादानाः सत्यभाषावर्गणोपादानाश्च, तत्र ये मृषाभाषावर्गणोपादानास्ते तु तीर्थान्तरीयपरि-कल्पिताः कुशास्त्रसम्पर्कवशसमुत्थवासनासम्पादितसत्ताकाः प्रधानरूपं जगत् ईश्वरकृतं विश्वम् इत्येवमाकाराः तेऽनर्थका एवाभ्युपगम्यन्ते, ते हि वन्ध्याऽबला इव तदर्थप्राप्तयादिप्रसवविकलाः, केवलं तथा विधसंवेदनभोगफला इति न तैर्व्यभिचारः, अथ तेऽपि सत्याभिमतशब्दा इव प्रतिभासन्ते तत्थकमयं सत्यासत्यविवेको निर्द्धारणीयः ?, ननु प्रत्यक्षाभासमपि प्रत्यक्षमिवाभासते ततः तत्रापि कथं सत्यासत्यप्रत्यक्षविवेकनिर्द्धारणम् ?, स्वरूपविषयपर्यालोचनयेति चेत्, तथाहि-

अभ्यासदशामापन्नाः स्वरूपदर्शनमात्रादेव प्रत्यक्षस्य सत्यासत्यत्वमवधारयन्ति, यथा मणिपरिक्षका मणेः, अनभ्यासदशामापन्नास्तु विषयपर्यालोचनया, यथा–किमयं विषयः सत्य उताहो नेति, तत्रार्थक्रियासंवाददर्शनतः तद्गतस्वभावलिङ्गदर्शनतो वा सत्यत्वमवगच्छन्ति अन्यथा त्वसत्यत्वमिति, तदेतत्स्वरूपविषयपर्यालोचनया सत्यासत्यत्वविवेकनिर्द्धारणमिहापि समानं, तथाहि–दृश्यन्त एव केचित् प्रज्ञातिशयसमन्विताः शब्दश्रवणमात्रादेव पुरुषाणां मिथ्याभाषित्वम-मिथ्याभाषित्वं वा सम्यगवधारयन्तः, विषयसत्यासत्यत्वपर्यालोचनायां तु किमेष वक्ता यथावदास उत नेति ?, तत्र यदि यथावदाप्त इति निश्चितं ततो विषयसत्यत्वमितरथा त्वसत्यत्वम्, आप्तेतर-विवेकोऽपि परिशीलनेन लिङ्गतो वा कुतश्चिदवसेयो, निपुणेन हि प्रतिपन्त्रा भवितव्यं, यदप्युक्तं 'यदपि च विनष्टमनुत्पन्नं वा तदपि न स्वरूपेण समस्तीत्यादि' तत्रापि यदि विनष्टानुत्पन्नयोर्वा-र्त्तमानिकविद्यमानरूपाभिधायकः शब्दः प्रवर्त्तते तर्हि स निरर्थकोऽभ्युपगम्यत एव, ततो न तेन व्यभिचारः, यदा तु ते अपि विष्टानुत्पन्ने विनष्टानुत्पन्नतयाऽभिधत्ते शब्दः तदा तद्विषयसार्वज्ञज्ञानमिव सद्भूतार्थविषयत्वात्स प्रमाणम्, इत्थं चैतदङ्गीकर्तव्यम्, अन्यथाऽतीतकल्पान्तरवर्त्तिपार्श्वादि-सर्वज्ञदेशना भविष्यच्छङ्खचक्रवर्त्यादिदेशना च सर्वथा नोपपद्येत, तद्विषयज्ञाने शब्दप्रवृत्त्यभावात्, अथोच्येत–अनलेऽनलशब्दः तदभिधानस्वभावतया यमभिधेयपरिणाममाश्रित्य प्रवर्त्तते स जले नास्ति, जलानलयोरभेदप्रसङ्गाद्, अथ च प्रवर्तते सङ्केतवशाज्जलेऽप्यनलशब्दः तत्कथं शब्दार्थ-योर्वास्तवः सम्बन्धः ?, तदसत्, शब्दस्यानेकशक्तिसमन्वितत्वेनोक्तदोषानुपपत्तेः,

तथाहि-नानलशब्दस्यानलवस्तुगताभिधेयपरिणामापेक्षी तदभिधानविषय एवैकः स्वभावः, अपि तु समयाधानतत्स्मरणपूर्वकतया विलम्बितादिप्रतीतिनिबन्धनत्वेन जलवस्तुगताभिधेय-परिणामापेक्षी तदभिधानस्वभावोऽपि, तथा तस्यापि प्रतीतेः, अन्यथा निर्हेतुकत्वेन तत्प्रतीत्यभाव-प्रसङ्गात्, ननु कथमेते शब्दा वस्तुविषयाः प्रतिज्ञायन्ते ?, चक्षुरादीन्द्रियसमुत्थबुद्धाविव शाब्दे ज्ञाने वस्तुनोऽप्रतिभासनात्, यदेव चक्षुरादीन्द्रियबुद्धौ प्रतिभासते व्यक्त्यन्तराननुयायि प्रतिनियतदेशकालं तदेव वस्तु, तस्यैवार्थक्रियासमर्थत्वात्, नेतरत्परपरिकल्पितं सामान्यं, विपर्ययवात्, न च तदर्थक्रियासमर्थं वस्तु शाब्दे ज्ञाने प्रतिभासते, तस्मादवस्तुविषया एते शब्दाः, तथा चात्र प्रमाणं-योऽर्थः शाब्दे ज्ञाने येन शब्देन सह संस्पृष्टो नावभासते न स तस्य शब्दस्य विषयः, यथा गोशब्दस्याश्वः, नावभासते चेन्द्रियगम्योऽर्थः शाब्दे ज्ञाने शब्देन संस्पृष्ट इति, यो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हि यस्य शब्दस्वार्थः स तेन सह संस्पृष्टः शाब्दे ज्ञाने प्रतिभासते, यथा गोशब्देन गोपिण्डः, एतावन्मात्रनिबन्धनत्वाद् वाच्यत्वस्येति, तदेतदसमीचीनम्, इन्द्रियगम्यार्थस्य शाब्दे ज्ञाने शब्देन सहानवभासासिद्धेः, तथाहि-कृष्णं महान्तमखण्डमसृणमपूर्वमपवरकात् घटमानयेत्युक्तः कश्चित् तज्ज्ञानावरणक्षयोपशमयुक्तः तमर्थं तथैव प्रत्यक्षमिव शाब्दे ज्ञाने वस्तुनः प्रतिभासोऽनुभूयते, स्फुटाभं च प्रत्यक्षं, तत्कथं प्रत्यक्षगम्यं वस्तु शाब्दज्ञानस्य विषयः ?, नैष दोषः, स्फुटास्फुटरूपप्रतिभासभेदमात्रेण वस्तुभेदायोगात्,

तथाहि-एकस्मिन्नैव नीलवस्तुनि दूरासन्नवर्त्तिप्रतिपत्तृज्ञाने स्फुटास्फुटप्रतिभासे उपलभ्येते, न च तत्र वस्तुभेदाभ्युपगमः, द्वयोरपि प्रत्यक्षप्रमाणतयाऽभ्युपगमात्, तथेहाप्येकस्मिन्नपि वस्तुनीन्द्रियजशाब्दज्ञाने स्फुटास्फुटप्रतिभासे भविष्यतो, न च तद्गोचरवस्तुभेदः, अथ वस्त्वभावेऽपि शाब्दज्ञानप्रतिभासाविशेषात् सत्यपि वस्तुनि शाब्दज्ञानं न तद्याथात्म्यसंस्पर्शि, तद्भावाभावयोरननुविधानात्, यस्य हि ज्ञानस्य प्रतिभासो यस्य भावभावावनुविधत्ते तत्तस्य परिच्छेदकं, न च शाब्दज्ञानप्रतिभासो वस्तुनो भावभावावनुविधत्ते, वस्त्वभावेऽपि तदविशेषात्, तन्न वस्तुनः परिच्छेदकं शाब्दज्ञानं रसज्ञानमिव गन्धस्य, प्रमाणं चात-यज्ज्ञानं यदन्वयव्यतिरेकानुविधायि न भवति न तत्तद्विषयं, यथा रूपज्ञानं रसविषयं, न भवति चेन्द्रियगम्यार्थान्वयव्यतिरेकानुविधायि शाब्दं ज्ञानमिति व्यापकानुपलब्धेः प्रतिनियतवस्तुविषयकत्वं हि ज्ञानस्य निमित्तवत्तया व्याप्तं, अन्वयव्यतिरेकानुविधानभावे च निमित्तवत्त्वाभावः स्यात्, निमित्तान्तरासम्भवात्, तेन तद्विषयवत्त्वं निमित्तवत्त्वाभावाद्विपक्षाव्यापकानुपलब्ध्या व्यावर्त्तमानमन्वयव्यतिरेकानुविधानेन व्याप्यते इति प्रतिबन्धसिद्धेः, तदयुक्मत्, प्रत्यक्षज्ञानेऽप्येवमविषयत्वप्रसक्तेः,

तथाहि-यथा जलवस्तुनि जलोल्लेखि प्रत्यक्षमुदयपदवीमासादयति तथा जलाभावेऽपि मरौ मध्याह्नमार्त्तण्डमरीचिकास्वक्षूणजलप्रतिभासमुदयमानमुपलभ्यते ततो जलाभावेऽपि जलज्ञानप्रतिभासाविशेषात् सत्यपि जले जलप्रत्यक्षं प्रादुर्भवन्न तद्याथात्म्यसंस्पर्शि, तद्भावाभावयोरननुकारादित्यादि सर्वं समानमेव, अत्र देशकालस्वरूपपर्यालोचनया तत्प्राप्त्यभावादिना च मरुमरीचिकासु जलोल्लेखिनः प्रत्यक्षस्य भ्रान्तत्वमवसीयते, भ्रान्तं चाप्रमाणं, ततो न तेन व्यभिचारः, प्रमाणभूतस्य च वस्त्वन्वयव्यतिरेकानुविधायित्वाद् व्यभिचार एव, तदेतदन्यत्रापि समानं, तथाहि-यथार्थदर्शनादिगुणयुक्तः पुरुष आप्तः, तत्प्रणीतशब्दसमुत्थं च ज्ञानं प्रमाणं, न च तस्य वस्त्वन्वयव्यतिरेकानुविधायित्वव्यभिचारसम्भवः, यत्पुनरनाप्तप्रणीतशब्दसमुत्थं ज्ञानं तदप्रमाणं, अप्रमाणत्वाच्च न तेन व्यभिचारः,

यदपि च प्रमाणमुपन्यस्तं तदपि हेतोरसिद्धत्वान्न साध्यसाधनायालं, असिद्धता च हेतोराप्तप्रणीतशब्दस्य वस्तुव्यतिरेकेण प्रवृत्त्यसम्भवात्, यत्पुनरिदमुच्यते-शब्दः श्रूयमाणो वक्त्रभिप्रायविषयं विकल्पप्रतिबिम्बं तत्कार्यतया धूम इव वह्निमनुमापयति, तत्र स एव वक्ता विशिष्टार्थाभिप्रायशब्दयोराश्रयो धर्मी, अभिप्रायाविशेषः साध्यः, शब्दः साधनमिति, तदाह-'वक्तुरभिप्रेतं तु सूचयेयु'रिति स एव तथा प्रतिपद्यमान आश्रयोऽस्त्विति, तत्पापात्पापीयः, तथाप्रतीतेरभावाद्, न खलु कश्चिदिह धूमादिव वह्निंतत्कार्यतया शब्दादभिप्रायविषयं विकल्पप्रतिबिम्बमनुमिमीते, अपि तु वाचकत्वेन बाह्यमर्थं प्रत्येति, देशान्तरे कालान्तरे च तथाप्रवृत्त्यादिदर्शनात्, न च

Jain Education International For Private & Personal Use Only www.jainelibrary.org

देशान्तरादावपि तथा प्रतीतावन्यथा परिकल्पनं श्रेयः, अतिप्रसङ्गप्राप्तेः, नाग्निर्धूमं जनयति किन्त्वदृष्टः पिशाचादिरित्यस्या अपि कल्पनायाः प्रसङ्गात्, अपि च-

अर्थक्रियार्थी प्रेक्षावान् प्रमाणमन्वेषयति, न चाभिप्रायविषयं विकल्पप्रतिबिम्बं विवक्षितार्थक्रियासमर्थं, किन्तु बाह्यमेव वस्तु, न च वाच्यम्-अभिप्रायविषयं विकल्पप्रतिबिम्बं ज्ञात्वा बाह्ये वस्तुनि प्रवर्त्तिष्यते तेनायमदोष इति, अन्यस्मिन् ज्ञाते अन्यत्र प्रवृत्त्यनुपपत्तेः, न हि घटे परिच्छिन्ने पटे प्रवृत्तिर्युक्ता, एतेन विकल्पप्रतिबिम्बकं शब्दवाच्यमिति यत्प्रतिपन्नं तदपि प्रतिक्षिप्तमवसेयं, तत्रापि विकल्पप्रतिबिम्बके शब्देन प्रतिपन्ने वस्तुनि प्रवृत्त्यनुपपत्तेः दृश्यविकल्पावर्थावेकीकृत्य वस्तुनि प्रवर्त्तते इति चेत्, तथाहि-तदेव विकल्पप्रतिबिम्बकं बहीरूपतयाऽध्यवस्यति ततो बहिः प्रवर्त्तते तेनायमदोष इति, न, तयोरेकीकरणासिद्धेः, अत्यन्तवैलक्षण्येन साधर्म्यायोगात्, साधर्म्यं चैकीकरणनिमित्तम्, अन्यथाऽतिप्रसङ्गात्, अपि च-कश्चैतावेकीकरोतीति वाच्यम्, स एव विकल्प इति चेत्, तद् न, तत्र बाह्यस्वरूपलक्षणानवभासात्, अन्यथा विकल्पत्वायोगाद्, अनवभासितेन चैकीकरणासम्भवाद्, अतिप्रसक्तेः, अथ विकल्पादन एव कश्चिद्विकल्प्यमेवार्थं दृश्यमित्यध्यवस्यति, हन्त तर्हि स्वदर्शनपरित्यागप्रसङ्गः, एवमभ्युपगमे सति बलादात्मास्तित्वप्रसक्तेः तथाहि-निर्विकल्पकं न विकल्प्यमर्थं साक्षात्करोति, तदगोचरत्वात्, ततो न तत् दृश्यमर्थं विकल्पेन सहैकीकर्त्तुमलं, न च देशकालस्वभावव्यवहितार्थविषयेषु शाब्दविकल्पषु तद्विषये निर्विकल्पकसम्भवः, तत्कथं तत्र तेन दृश्यविकल्पार्थैकीकरणम्, ततो विकल्पादन्यः सर्वत्र दृश्यविकल्पावर्थावेकीकुर्वन्, बलादात्मैवोपपद्यते, न च सोऽभ्युपगम्यते, तस्माच्छब्दो बाह्यस्यार्थस्य वाचक इत्यकामेनापि प्रतिपत्तव्यम्, इतश्च प्रतिपत्तव्यम्, अन्यथा सङ्केतस्यापि कर्त्तुमशक्यत्वात्,

तथाहि-येन शब्देन इदं तदित्यादिना सङ्केतो विधेयः तेन किं सङ्केतितेन उतासङ्केतितेन ?, न तावत्सङ्केतितेन, अनवस्थाप्रसङ्गात्, तस्यापि हि येन शब्देन सङ्केतः कार्यः तेन किं सङ्केतितेन उतासङ्केतितेनेत्यादि तदेवावर्त्तते, अथासङ्केतितेन सिद्धः तर्हि शब्दार्थयोर्वास्तवः सम्बन्ध इति।

तथा 'जगदानन्दः' इह जगच्छब्देन संज्ञिपञ्चेन्द्रियपरिग्रहः तेषामेव भगवद्दर्शनदेशनादित आनन्दसम्भवात्, ततश्च जगतां-संज्ञिपञ्चेन्द्रियाणाममृतस्यन्दिमूर्त्तिदर्शनमात्रतो निःश्रेयसाभ्युदयसाधकधर्म्मोपदेशद्वारेण चानन्दहेतुत्वादैहिकामुष्मिकप्रमोदकारणत्वाज्जगदानन्दः, अनेन परार्थसम्पदमाह। तथा 'जगन्नाथ' इह जगच्छब्देन सकलचराचरपरिग्रहः, नाथशब्देन च योगक्षेमकृदभिधीयते, 'योगक्षेमकृत नाथ' इति विद्वत्प्रवादात्, ततश्च जगतः-सकलचराचररूपस्य यथावस्थितस्वरूपप्ररूपणद्वारेण वितथप्ररूपणापायेभ्यः पालनाच्च नाथ इव नाथो जगन्नाथः अनेनापि परार्थसम्पदमाह-

तथा 'जगद्बन्धुः' इह जगच्छब्देन सकलप्राणिगणपरिग्रहः, प्राणिन एवाधिकृत्य बन्धुत्वोपपत्तेः, ततश्च जगतः-सकलप्राणिसमुदायरूपस्याव्यापादनोपदेशप्रणयनेन सुखस्थापकत्वाद्बन्धुरिव बन्धुर्जगद्बन्धुः, सकलजगदव्यापादनोपदेशप्रणयनं च भगवतः सुप्रतीतम्, तथा चाचारसूत्रं-"सव्वे पाणा सव्वे भूया सव्वे जीवा सव्वे सत्ता न हंतव्वा न अज्जावेयव्वा न परिधेत्तव्वा न उवद्दवेयव्वा, एस धम्मे सुद्धे धुवे नीए सासए समेच्च लोयं खेयन्नेहिं पवेइए"

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्यादि, एतेन संसारमोचकानां व्यापाद्योपकृतये दुःखितसत्त्वव्यापादनमुपदिशतामकुशलमार्गप्रवृत्तत्वमावेदितं द्रष्टव्यं, यतस्ते एवमाहुः-

यत्परिणामसुन्दरं तदापातकटुकमपि परेषामाधेयं, यथा रोगोपशमनमौषधं, परिणामसुन्दरं च दुःखितसत्त्वानां व्यापादनमिति, तथाहि-कृमिकीटपतङ्गमशकलावकचटककुष्टिमहादरिद्रान्धपंग्वादयो दुःखितजन्तवः पापकर्म्मोदयवशात्संसारसागरमभिप्लुवन्ते, ततस्तेऽवश्यं तत्पापक्षपणाय परोपकरणैकरसिकमानसेन व्यापादनीयाः, तेषां हि व्यापदने महादुःखमतीवोपजायते, तीव्रदुःखवेदनाभिभववशाच्च प्राग्बद्धं पापकर्मोदीर्योदीर्यानुभवन्तः प्रतिक्षिपन्ति, स्यादेतत्-किमत्र प्रमाणं यत्ते व्यापाद्यमानाः तीव्रवेदनाऽनुभवतः प्राग्बद्धं पापकर्मोदीर्योदीर्य परिक्षिपन्ति न पुनरार्त्तरौद्रध्यानोपगमतः प्रभूततरं पापमावर्जयन्तीति ?, उच्यते, युष्मत्सिद्धान्तानुगतमेव नारकस्वरूपोपदर्शकं वचः, तथाहि-नारका निरन्तरं परमाधार्मिकसुरैः ताडनभेदनोत्कर्त्तनशूल्यारोपणाद्यनेकप्रकारमुपहन्यमानाः परमाधार्मिकसुराभावे परस्परोदीरिततीव्रवेदना रौद्रध्यानोपगता अपि प्राग्बद्धमेव कर्म क्षपयन्ति, नापूर्वं पापमधिकतरमुपार्जयन्ति, नारकायुर्बन्धासम्भवात्, तदसम्भवश्चानन्तरं भूयः तत्रैवोत्पादाभावाद्।

अपि च-यत एव रौद्रध्यानोपगता अत एव तेषां प्रभूततरप्राग्बद्धपापकर्मपरिक्षयः, तीव्रसङ्क्लेशभावात्, न खलु तीव्रसङ्क्लेशाभावे परमाधार्मिकसुरा अपि तेषां कर्म्म क्षपयितुं शक्ताः, ततो रौद्रादिध्यानमुपजनयन्तोऽपि व्यापदका व्यापाद्यानामुपकारका एव, इत्थं च व्यापादनतः तेषामुपकारसम्भवे ये तद्व्यापादनमुपेक्षन्ते प्रतिषेधन्ति वा ते महापापकारिणः, ये पुनः प्रागुपात्तपुण्यकर्मोदयवशतः सुखासिकामनुभवन्तोऽवतिष्ठन्ते न ते व्यापादनीयाः, तेषां व्यापादने सुखानुभववियोगभावतोऽपकारसम्भवात्, न च परहितनिरताः परापकृतये संरम्भमातन्वन्ते, तदेतदयुक्तम्, परोपकारो हि स सुधिया विधेयो य आत्मन उपकारको, न च परेषां व्यापादनेनोपकृतिकरणे भवतः कमप्युपकारमीक्षामहे, तथाहि-

परेषां व्यापादने को भवतः उपकारः ?, किं पुण्यबन्धः उत कर्मक्षयः ?, तत्र न तावत्पुण्यबन्धः, परेषामन्तरायकरणात्, ते हि परे यदि भवता न व्यापाद्येरंस्ततः ते परान् सत्त्वान् व्यापाद्य पुण्यमुपार्जयेयुः, व्यापादिताश्च परवधे अप्रसक्ता इति व्यापादनं पुण्योपार्जनान्तरायकरणं, न च पुण्योपार्जनान्तरायकृत् पुण्यमुपार्जयति, विरोधात्, सर्वस्य पुण्यबन्धप्रसक्तेश्च, एतेन यदुक्तं-

'परिणामसुन्दरं च दुःखितसत्त्वानां व्यापादन'मिति तदसिद्धं द्रष्टव्यम्, पुण्योपार्जनान्तरायकरणेन परिणामसुन्दरत्वायोगात्, अथ कर्मक्षय इति पक्षः, ननु तत्कर्म किं सहेतुकमुताहेतुकं ?, सहेतुकमपि किमज्ञानहेतुकमुताहिंसाजन्यमुताहो वधजन्यं ?, तत्र न तावदज्ञानहेतुकम्, अज्ञानहेतुकतायां हिंसातो निवृत्त्यसम्भवात्, यो हि यन्निमित्तो दोषः स तत्प्रतिपक्षस्यैवासेवायां निवर्त्तते, यथा हिमजनितं शीतमनलासेवनेन, न चाज्ञानस्य हिंसा प्रतिपक्षभूता, किन्तु सम्यग्ज्ञानं, तत्कथमज्ञानहेतुकं कर्म हिंसातो विनिवर्त्तते ?, अथाहिंसाजन्यमिति वदेत्, तदपि न युक्तम्, एवं सति मुक्तानामपि कर्मबन्धप्रसक्तेः, तेषामहिंसकत्वात्, अथ हिंसाजन्यं, यद्येवं तर्हि कथं हिंसात एव तस्य निवृत्तिः, न हि यत एव यस्य प्रादुर्भावः तत एव तस्य निवृत्तिर्भवितुमर्हति, विरोधात्, न खल्वजीर्णप्रभवो रोगो मुहुरजीर्णकरणात् निवर्त्तते, ततः प्राणिहिंसोत्पा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दितकर्मनिवृत्त्यमर्थमवश्यमहिंसाऽऽसेवनीया, उक्तं च-

"तम्हा पाणिवहो वज्जियस्स कम्मस्स खवणहेऊओ।
वहविरई कायवा संवरूवत्ति नियमेणं॥"

अथाहेतुकं न तर्हि तदस्ति, स्वरविषाणवत्, तत्कथं तदपगमाय प्राणिवधोद्यमो भवतः ?, अथाहेतुकमप्यस्ति यथाऽऽकाशं, तर्ह्याकाशस्येव तस्यापि न कथञ्चन विनाश इत्यफलत्वात् न कार्यः प्राणिवधः, यदुप्युक्तं-'ये तु प्रागुपात्तपुण्यकर्मवशतः सुखासिकामनुभवन्तोऽतिष्ठन्ते न ते व्यापदनीया' इत्यादि, तदप्ययुक्तं, यतः पुण्यपापक्षयान्मुक्तिः, ततो यथा परेषां पापक्षपणाय व्यापादने भवतः प्रवृत्तिः तथा पुण्यपणायापि भवति, अथ पापं दुःखानुभवफलं ततो व्यापादनेन दुःखोत्पादनतः पापं क्षपयितुंशक्यं, पुण्यं तु सातानुभवफलं तत्कथं दुःखोत्पादनेन क्षपियतुं शक्यम् ?, सातानुभवफलं हि कर्म सातानुभवोत्पादनेनैव क्षपयितुं शक्यम्, नान्यथा, तदपि न समीचीनं, यतो यत्पुण्यं विशिष्टं देवभवे वेदनीयं तन्मनुष्यादिभवव्यापादनेन प्रत्यासन्नीक्रियते, प्रत्यासन्नीकृतं च प्रायः स्वल्पकालवेद्यं भवति, तत एवं पुण्यक्षपणस्यापि सम्भवात् कथं न व्यापादनेन पुण्यपरिक्षयः ?, अथ व्यापादनानन्तरं विशिष्टदेवभववेदनीयः पुण्योदयः सन्दिग्धः, कस्यचित्पापोदयस्यापि सम्भवात्, ततो न व्यापादनं पुण्यमनुभवतः कर्त्तुमुचितम्, यद्येवमितरत्र कथं निश्चयः ?,

इतरत्रापि हि संदेह एव, तथाविदुःखितोऽपि यदि मार्यते तर्हि नरकदुःखानुभवभागी भवति, अमारितश्च सन् कदाचनापि प्रभूतसत्त्वव्यापादनेन पुण्यमुपार्ज्य विशिष्टदेवादिभवभागी भवेत्, ततो दुःखितानामपि व्यापादानं न भवतो युक्तम्, एवं च सति सन्दिग्धानैकान्तिकोऽपि हेतुः, व्यापादनस्य परिणामसुन्दरत्वसन्देहात्, यदप्युक्तं- 'युष्मत्सिद्धान्तानुगतं नारकस्वरूपोपदर्शकं वचः' इत्यादि, तदप्यसमीक्षिताभिधानं, सम्यगस्मत्सिद्धान्तापरिज्ञानाद्, अस्मत्सिद्धान्ते ह्येवं नारकस्वरूपव्यावर्णना-नारकाणां परमाधार्मिकसुरोदीरितदुःखानां परस्परोदीरितदुःखानां वा वेदनातिशयभावतः सम्मोहमुपागतानां नातीव परत्र संक्लेशो यथाऽत्रैव केषाञ्चिन्मानवानां सम्मूढानां, यथा हि मानवा लकुटादिप्रहारजर्जरीकृतशिरःप्रभृत्यवयवा वेदनातिशयभावतः सम्मूढचेतना नातीव परत्र संक्लिश्यमाना उपलभ्यन्ते, तथा नारका अपि सदैव द्रष्टव्याः, ततः तथाविधतीव्र-संक्लेशाभावात् नारकाणां नाभिनवप्रभूततरपापोपचयः, यद्येवं तर्हि सम्मोहो महोपकारी, तथाहि-सम्मोहवशान्न परत्रातीव संक्लेशः, तीव्रवेदनाभावतश्च प्राग्बद्धपापकर्मपरिक्षयः, सम्मोहश्च हिंस्रव्यापारादुपजायते, ततो हिंसका महोपकारिण इति सिद्धमस्मत्समीहितं, तदयुक्तम्, हिंसकानां परपीडोत्पादनतः क्लिष्टकर्मबन्धप्रसक्तेः, न खलु पापस्य परपीडामतिरिच्यान्यन्निबन्धनमीक्षामहे, यदि स्यात्तर्हि मुक्तानामपि पापबन्धप्रसङ्गः, तेषामहिंसत्वात्, ततः कथमिव सचेतनो मनसाऽपि परं व्यापादयितुमुत्सहते ? इत्यलं पापचेतोभिः सह प्रसङ्गेन।

तथा 'जयति जगत्पितामहः' इति इह जगच्छब्देन सकलसत्त्वपरिग्रहः, ततश्च जगतां-सकलसत्त्वानां नरकादिकुगतिविनिपातभयापायरक्षणात् पितेव पिता-सम्यग्दर्शनमूलोत्तर-गुणसंहतिस्वरूपो धर्मः, स हि दुर्गतौ प्रपततो जन्तून् रक्षति शुभे च निःश्रेयसदौ स्थाने स्थापयति, तथा चोक्तं निरुक्तिशास्त्रवेदिभिः-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"दुर्गतिप्रसृतान् जन्तून्, यस्माद्धारयते ततः।
धत्ते चैतान् शुभे स्थाने, तस्माद्धर्म इति स्मृतः॥"

ततः सकलस्यापि प्राणिगणस्य पितृतुल्यः, तस्यापि च पिता भगवान्, अर्थात्: तेन प्रणीतत्वात्, ततो भगवान् जगत्पितामहः, जयतीति पुनः क्रियाभिधानं स्तवाधिकारददुष्टम्, उक्तं च-

"सज्झायझाणतव ओसहेसु उवएसथुइपयाणेसुं।
संतगुणकित्तणेसु य न होंति पुनरुत्तदोसा उ॥"

अनेनापि परार्थसम्पदमाह, 'भगवानिति' भगः-समग्रैश्वर्यादिलक्षणः, आह च-

"ऐश्वर्यस्य समग्रस्य, रूपस्य यशसः श्रियः।
धर्मस्याथ प्रयत्नस्य, षण्णां भग इतीङ्गना॥"

भगोऽस्यास्तीति भगवान्, अनेन स्वपरार्थसम्पदमाह, स्वपरोपकारित्वादैश्वर्यादेः। तदेवमनादिमन्तोऽनन्तास्तीर्थकृत इति ज्ञापनार्थं सामान्यतस्तीर्थकृन्नमस्कारमभिधाय साम्प्रतं सकलसांसारिकदुःखातंकसमुच्छेदाप्रतिहतशक्तिपरमौषधकल्पप्रवचनप्रतिपादकतयाऽऽसन्नोपकारित्वाद्वर्त्तमानतीर्थाधिपतेर्भगवद्वर्द्धमानस्वामिनो नमस्कारमभिधित्सुराह-

*मू. (२) जयइ सुआणं पभवो तित्थराणं अपच्छिमो जयइ।*
*जयइ गुरू लोगाणं जयइ महप्पा महावीरो॥*

**वृ.** जयतीति पूर्ववत्, श्रुतानां-स्वदर्शनानुगतसकलशास्त्राणां प्रभवन्ति सर्वाणि शास्त्राण्यस्मादिति प्रभवः-प्रथममुत्पत्तिकारणं, तदुपदिष्टमर्थमुपजीव्य सर्वेषां शास्त्राणां प्रवर्त्तनात्, परदर्शनशास्त्रेष्वपि हि यः कश्चित्समीचीनोऽर्थः संसारसारतास्वर्गापवर्गादिहेतुः प्राण्यहिंसादिरूपः स भगवत्प्रणीतशास्त्रेभ्य एव समुद्धृतो वेदितव्यो, न खल्वतीन्द्रियार्थपरिज्ञानमन्तरेणातीन्द्रियः प्रमाणाबाधितोऽर्थः पुरुषमात्रेणोपदेष्टुं शक्यते, अविषयत्वात्, न चातीन्द्रियार्थपरिज्ञानं परतीर्थिकानामस्तीत्येतदग्रे वक्ष्यामः, ततस्ते भगवत्प्रणीतशास्त्रेभ्यो मौलं समीचीनमर्थलेशमुपादाय पश्चादभिनिवेशवशतः स्वस्वमत्युनसारेण तास्ताः स्वस्वप्रक्रियाः प्रपञ्चितवन्तः,

उक्तं च स्तुतिकारेण-

"सुनिश्चितं नः परतन्त्रयुक्तिषु, स्फुरन्ति याः काश्चन सूक्तिसम्पदः।
तवैव ताः पूर्वमहार्णवोत्थिता, जगत्प्रमाणं जिनवाक्यविप्रुषः॥१॥"

शाकटायनोऽपि यापनीययतिग्रामाग्रणीः स्वोपज्ञशब्दानुशासनवृत्तावादौ भगतवः स्तुतिमेवमाह-'श्रीवीरममृतं ज्योतिर्नत्वाऽऽदिं सर्ववेदसाम्' अत्र च न्यासकृता व्याख्या-'सर्ववेदसां' सर्वज्ञानानां स्वपरदर्शनसम्बन्धिसकलशास्त्रानुगतपरिज्ञाननाम् 'आदिं' प्रभवं प्रथममुत्पत्तिकारणमिति। अत एव चेह श्रुतानामित्यत्र बहुवचनम्, अन्यथैकवचनमेव प्रयुज्यते, प्रायः श्रुतशब्दस्य केवलद्वादशाङ्गमात्रवाचिनः सर्वत्रापि सिद्धान्ते एकवचनान्ततया प्रयोगदर्शनात्, सर्वश्रुतकारणत्वेन च भगवतः स्तुतिप्रतिपादने इदमप्यावेदितं द्रष्टव्यम्-सर्वाण्यपि श्रुतानि पौरुषपाण्येव, न किमप्यपौरुषयमस्ति, असम्भवात्, तथाहि- शास्त्र वचनात्मकं, वचनं ताल्वोष्ठपुटपरिस्पन्दादिरूपपुरुषव्यापारान्वयव्यतिरेकानुविधायि, ततस्तदभावे कथं भवति ?, न खलु



Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुरुषव्यापारमन्तरेण वचनमाकाशे ध्वनदुपलभ्यते, अपि च-तदपौरुषेयं वचनमकारणत्वान्नित्यमभ्युपगम्यते, 'सदकारणवन्नित्य'मिति वचनप्रामाण्यात्, ततश्च अत्र विकल्पयुगलमवतेतीर्यते, तदपौरुषेयं वचः किमुपलभ्यस्वभावभुतानुपलभ्यस्वभावं ?, तत्र यद्यनुपलभ्यस्वभावं तर्हि तस्य नित्य-त्वेनाभ्युपगमात् कदाचिदपि स्वभावाप्रच्युतेः सर्वदैवोपलम्भाभावप्रसङ्गः, अथोपलम्भस्वभावं तर्हि सर्वदानुपरमेनोपलभ्येत, अन्यथा तत्स्वभावताहानिप्रसङ्गाद्, अथोपलभ्यस्वभावमपि सहकारिप्रत्ययमपेक्षयोपलम्भमुपजनयति तेन न सर्वदोपलम्भप्रसङ्गः, तदयुक्तम्, एकान्तनित्य-स्य सहकार्यपेक्षाया अयोगात्,

ततो विशेषप्रतिलम्भलक्षणा हि तस्य तत्रापेक्षा, यदाह धर्मकीर्त्तिः-'अपेक्षाया विशेष-प्रतिलम्भलक्षणत्वादि'ति, न च नित्यस्य विशेषप्रतिलम्भोऽसि, अनित्यत्वापत्तेः, तथाहि-स विशेषप्रतिलम्भः तस्यात्मभूतः, ततो विशेषे जायमाने स एव पदार्थः तेन रूपेण जातो भवति, प्राक्तनं विशिष्टावस्थालक्षणं रूपं विनष्टमित्यनित्यत्वापत्तिः, अथोच्येत-स विशेषप्रतिलम्भो न तस्यात्मभूतः किन्तु व्यतिरिक्तः कथमनित्यत्वापत्तिः ?, यद्येवं तर्हि कथं स तस्य सहकारी ?, न हि तेन सहकारिणा तस्य वचनस्य किमप्युपक्रियते, भिन्नविशेषकरणात्, अथ भिन्नोऽपि विशेषः तस्य सम्बन्धी तेन तत्सम्बन्धिविशेषकरणात् तस्याप्युपकारी द्रष्टव्य इति सहकारी व्यपदिश्यते, ननु विशेषेणापि सह तस्य वचनस्य कः सम्बन्धो ?, न तावत्तादात्म्यं, भिन्नत्वेना-भ्युपगमात्, नापि तदुत्पत्तिः, विकल्पद्वयानतिक्रमात्, तथाहि-किं वचनेन विशेषो जन्यते ? उत विशेषेण वचनम् ?, तत्र न तावदाद्यः पक्षो, विशेषस्य सहकारिणोऽभावात्, नापि द्वितीयो, वचनस्य नित्यतया कर्त्तुमशक्यावाद्, अथ मा भूद् वचनविशेषयोर्जन्यजनकभावः, आधार-धेयभावो भविष्यति, तदप्यसमीचीनम्, आधाराधेयभावस्यापि परस्परोपकार्योपकारकभावो-पेक्षत्वात् तथा-वदरं पतनधर्मकं सत् कुंडेन स्वानंतरदेशस्थायितया परिणामि जन्यते, तस्यान्य-तोऽभावात्, ततः कथमनयोराधाराधेयभावः ?, अथ तेन विशेषेण वचनस्योपकारः कश्चित्क्रियते ततः स तस्य सम्बन्धी, ननु स उपकारः ततो भिन्नोऽभिन्नो वेत्यादि तदेवावर्त्तते इत्यनवस्था।

अपि च-कुतः प्रमाणाद्वचनस्यापौरुषेयत्वाभ्युपगमः ?, कर्तुरस्मरणादिति चेत्, न, तस्याप्य-सिद्धत्वात्, तथाहि-स्मरन्ति जिनप्रणीतागमतत्त्ववेदिनो वेदस्य कर्तॄन पिप्पलादप्रभृतीन्, स कर्तृस्मरणवादः तेषां मिथ्यारूप इति चेत्, क इदानीमेवं सति पौरुषयः, सर्व्वस्याप्यपौरुषेय-त्वप्रसक्तेः, तथाहि-कालिदासादयोऽपि कुमारसम्भवादिष्वात्मानमन्यं वा प्रणेतारमुपदिशन्त एवं प्रतिक्षेप्तुं शक्यन्ते, मिथ्या त्वमान्तमानमन्यं वा कुमारसम्भवादिषु प्रणेतारमुपदिशसीति, ततः कुमारसम्भवादयोऽपि ग्रन्थाः सर्वेऽप्यपौरुषेयाः भवेयुः, तथा च कः प्रतिविशेषो वेदे ? येन स एव प्रमाण तयाऽभ्युपगम्यते न शेषागामाः, अपि च-यौष्माकीणैरपि पूर्वमहर्षिभिः सकर्तृत्वं वेदस्याभ्युपगतमेव, तथा च तद्ग्रन्थः-'ऋग्गिरावृचश्चक्रुः सामानि सामगिरा'विति, अथ तत्र करोतिः स्मरणे वर्त्तते न निष्पादने, दृष्टश्च करोतिर्थान्तरेऽपि वर्त्तमानो, यथा संस्कारे, तथा च लोके वक्तारः-पृष्ठं मे कुरु पादौ मे कुर्व्विति, अत्र हि संस्कारे एव करोतिर्वर्त्तते, नापूर्वनिर्वर्त्तने सम्भवति, अशक्यक्रियत्वात्, ततोऽन्यथानुपपत्त्या संस्कारे एव करोतिर्वर्त्तते, वेदविषये तु नान्यथाऽनुपपन्नं किमपि निबन्धनमस्ति, ततः कथं तत्र स्मरणे वर्त्तयितुं शक्तये ?

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्यादेतद्-यदि वेदविषये करोतिः स्मरणेन वर्त्येत तर्हि वेदस्य प्रामाण्यं न स्याद्, अथ च प्रामाण्यमभ्युपगम्यते, तच्चापौरुषपेयत्वादेव, अन्यथा सर्वागमानामपि प्रामाण्यप्रसक्तेः, ततोऽत्रापि करोतिः प्रामाण्यान्यथानुपपत्त्या स्मरणे वर्त्य इति, तदेतदसत्, इतरेतराश्रयदोषप्रसङ्गात्, तथाहि-प्रामाण्ये सिद्धे सति तदन्यथानुपपत्त्या करोते, स्मरणे वर्त्तनं, करोतेः स्मरणे वृत्तौ चापौरुषेयत्वसिद्धितः प्रामाण्यमित्येकासिद्धावन्यतरासिद्धिः, अनैकान्तिकं च कर्त्तुरस्मरणं, 'वटे वटे वैश्रणव' इत्यादिशब्दानां पौरुषेयाणामपि कर्त्तुरस्मृतेः, यत्वान् तत्कर्त्तारमुपलभते एवेति चेत्, न अवश्यं तदुपलम्भसम्भवः, नियमाभावात् किंच-

अपौरुपेयत्वेनाभ्युपगतस्य वेदस्य कर्त्ता नैवास्ति कश्चित् पौरुपेयत्वेनाभ्युपगतस्य च वटे वटे वैश्रवण इत्यादेरस्तीति न प्रमाणात् कृतश्चिद्विनिश्चयः, किन्तु परोपदेशात्, स च भवतो न प्रमाणं, परस्य रागादिपरीतत्वेन यथावद्वस्तुतत्त्वापरिज्ञानात्, ततः कर्त्तुभावसन्देह इति सन्दिग्धासिद्धोऽप्यं हेतुः, एतेन यदन्यदपि साधनमवादीद्, वेदवादी- 'वेदाध्ययनं सर्व्वं गुर्व्वध्ययनपूर्वकं, वेदाध्ययनत्वाद्. अधुनातनवेदाध्ययनवदिति, तदपि निरस्तमवसेयं, एवमपौरुषेयत्वसाधने सर्वस्याप्यपौरुषेयत्वप्रसक्तेः, तथाहि-कुमारसम्भवाध्ययनं सर्वं गुर्वध्ययनपूर्वकं, कुमारसम्भवाध्ययनत्वाद्, इदानीन्तनकुमारसम्भवाध्ययनवदिति कुमारसम्भवादीनामध्ययनानादितासिद्धेरपौरुषेयत्वं दुर्निवारं, न च तेषामपौरुषयत्वं, स्वयंकरणपूर्वकत्वेनापि तदध्ययनस्य भावाद्. एवं वेदाध्ययनमपि किञ्चित्स्वयंकरणपूर्वकमपि भविष्यतीति वेदाध्ययनत्वादिति व्यभिचारी हेतुः स्यादेतत्-वेदाध्ययनं स्वयंकरणपूर्वकं न भवति, वेदानां स्वयं कर्त्तुमशक्तेः, तथा चात्र प्रयोगः-पूर्वेषां वेदरचनायामशक्तिः, पुरुषत्वाद्, इदानीन्तपुरुषवदितीति, तदप्युक्तम्, अत्रापि हेतोर्व्यभिचारात्, तथाहि- भारतादिष्विदानीन्तनपुरुषाणामशक्तावपि कस्यचित्पुरुषस्य व्यासादेः शक्तिः श्रूयते, एवं वेदविपयेऽपि सम्प्रति पुरुषाणां कर्त्तुमशक्तावपि कस्यचित्प्राक्तनस्य पुरुषविशेषस्य शक्तिर्भविष्यतीति।

अपि च-यथाऽग्निसामान्यस्य ज्वालाप्रभवत्वमरणिनिर्मथनप्रभवत्वं च परस्परमबाध्यबाधकत्वान्न विरुध्यते, को ह्यत्र विरोधः अग्निश्च स्यात् कदाचिदरणिनिर्म्मथनपूर्वकः पथिकाग्नित्याद्, आद्यानन्तराग्निवदित्ययं हेतर्व्यभिचारी, विपक्षे वृत्तिसम्भवात्, तथा वेदाध्ययनमपि विपक्षे वृत्तिसम्भवात् व्यभिचार्येव, तथाहि-वेदाध्ययने स्वयंकरणपूर्वकमपीति, यदा त्वेवं विशिष्यते-यस्तु तथाविधः स्वयंकृत्वाऽध्येतुमसमर्थः तस्य वेदध्ययनमध्ययनान्तरपूर्वकमिति, तदा न कश्चिद्दोषः, यथा यादृशोऽग्निर्ज्वालाप्रभवो दृष्टः तादृशः सर्वोऽपि ज्वालाप्रभव इति, अस्तु वा सर्वं वेदाध्ययनमध्ययनान्तरपूर्वकं, तथाऽप्येवमानदिता सिद्धेद् वेदस्य, नापौरुषेत्वं, अथात एवानादितामात्रादपौरुषेयत्वसिद्धिरिष्यते तर्हि डिम्भकपांशुक्रीडादेरपि पुरुषव्यवहारस्यापौरुषेयतापत्तिः, तस्यापि पूर्वपूर्वदर्शनप्रवृत्तित्वेनानादित्यात्, अपि च-

स्युरपौरुपेया वेदा यदि पुरुषाणामादिः स्याद् वेदाध्ययनं चानादि, तदाप्याद्यपुरुषस्याध्ययनमध्ययनान्तरपूर्वकं न सिद्धयति, अध्यापतुरभावात्, न च पुरुषस्य ताल्वादिकरणग्रामव्यापाराभावात् स्वयं शब्दा ध्वनन्ति, ततो वेदस्य प्रथमोऽवात् स्वयं शब्दा ध्वनन्ति, ततो वेदस्य प्रथमोऽध्येता कर्त्तैव वेदितव्यः, अपि च-यद्वस्तु यद्धेतुकमन्वयव्यतिरेकाभ्यां प्रसिद्धं तज्जाती-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यमन्यदप्यदृष्टहेतुकं ततो हेतोर्भवतीति सम्प्रीतये, यथेन्बधनादेको वह्निर्दृष्टः ततः तत्समान-स्वभावोऽपरोऽप्यदृष्टहेतुक : तत्समानहेतुकः सम्प्रीतये, लौकिकेन च शब्देन समानधर्मा सर्वोऽपि वैदिकः शब्दराशिः, ततो लौकिकवद्वैदिकोऽपि शब्दाराशिः पौरुषेयः सम्प्रतीयतां, स्यादेतद्-वैदिकेषु शब्देषु यद्यपि न पुरुषो हेतुः, तथापि पौरुषेयाभिमतशब्दसमानाविशिष्टपदवाक्या-रचना भविष्यति ततः कथं तत्समानधर्म्मतामवलोक्य पुरुषहेतुकथा तथामनुमीयते, तदेतद्बालिश-जल्पितं, पदवाक्यरचना हि यदि हेतुमन्तरेणापीष्यते तत आकस्मिकी सा भवेत्, ततश्चाकाशादा-वपि सा सर्वत्र सम्भवेत, अहेतुकस्य देशादिनियमायोगात्, न च सा सर्वत्रापि सम्भवति, तस्मात्पुरुष एव तस्या हेतुरित्यवश्यं प्रतिपत्तव्यम्।

अन्यच्च-पुरुषस्य रागादिपरीतत्वेन यथावद्वस्तुपरिज्ञानाभावात्, तत्प्रणीतं वाक्यमयथार्थमपि सम्भाव्यते इति संशयहेतुः पुरुषोपकीर्ण्णः, स च संशयोऽपौरुषेयत्वाभ्युगमेऽपि वेदवाक्यानां तदवस्थ एव, तथाहि- स्वयं तावत्पुरुषो वेदस्यार्थं नावबुध्यते, रागादिपरीतत्वात्, नाप्यन्यतः पुरुषान्तरात्, तस्यापि रागादिपरीतत्वेन यथातत्त्वमपरिज्ञानाद्, अथ जैमनिश्चिरतरपूर्वकालभावी पटुयज्ञः सम्यग्वेदार्थस्य परिज्ञाताऽऽसीत् ततः परिज्ञानमभूदिति, न हि सर्वेऽपि पुरुषाः समान-प्रज्ञामेधादिगुणा इति वक्तुं शक्यम्, सम्प्रयपि प्रतिपुरुषं प्रज्ञादेस्तारतम्यस्य दर्शनात्, ननु स जैमनिः पुरुषो वेदस्यार्थं यथावस्थितमवगच्छति स्मेति कुतो निश्चयः ?, प्रमाणेन संवाददिति चेत् नन्वतीन्द्रियेष्वर्थेषु न प्रमाणस्यावतारो, यथा अग्निहोत्रहवनस्य स्वर्गसाधनत्वे, बहवश्चातीन्द्रिया अर्था वेदे व्यावर्ण्यन्ते, तत्कथं तत्र संवादः ?, अथ येष्वर्थेष्वस्मादृशं प्रमाण-सम्भवः तद्विषये प्रमाणसंवाददर्शनादतीन्द्रियाणामप्यर्थानां स सम्यक् परिज्ञाताऽभ्युपगम्यते, तदप्ययुक्तम्, रागादिकलुषिततया तस्यातीन्द्रियार्थपरिज्ञानासम्भवाद्, अन्यथा सर्वेषाम-प्यतीन्द्रियार्थप्रदर्शित्वप्रसक्तिस्ततः तत्कृतातीन्द्रियार्थव्याख्या मिथ्यैव, अपि च-आगमोऽर्थतः परिज्ञातः सन् प्रेक्षावतामुपयोगविषयो भवति, नापरिज्ञातार्थं शब्दगडुमात्रं, ततोऽर्थः प्रधानः, स चेत्पुरुषप्रणीतः किं शब्दमात्रस्यापौरुषेयत्वपरिकल्पनेन ?, निरर्थकत्वात्, तत्रान्यतोऽपि वेदार्थस्य सम्यगवगमः, नापि वेदः स्वकीयमर्थमुपदेशमन्तरेण स्वयमेव साक्षादुपदर्शयति, ततो वेदस्येष्टार्थ-प्रतिपत्त्युपायाभावाद् 'अग्निहोत्रं जुहुयात्स्वर्ग्गकाम' इति श्रुतौ यथा वेदप्रामाणिकैरयमर्थः परिकल्प्यते-धृताद्याहुतिं परिक्षिपेत् स्वर्गकाम इति, तथाऽयमप्यर्थः तैः किं न कल्पते ?-खादेत्स्वमांसं स्वर्गकाम इति, नियामकाभावाद्, उक्तं च-

"स्वयं रागादिमान्नार्थं, वेत्ति वेदस्य नान्यतः।
न वेदयति वेदोऽपि, वेदार्थस्य कुतो गतिः ? ॥१॥
तेनाग्निहोत्रं जुहुयात् स्वर्गकाम इति श्रुतौ।
खादेत्स्वमांसमित्येष, नार्थ इत्यत्र का प्रभा ? ॥२॥"

अथ य एव शाब्दो व्यवहार लोके प्रसिद्धः स एव वेदवाक्यार्थनिश्चयनिबन्धनं, न च लोकेऽ-ग्निहोत्रशब्दस्य स्वमांसं वाच्यम्, नापि जुहुयादित्यस्य भक्षणं, तत्कथमयमर्थः परिकल्प्यते ?, तदयुक्तम्, नानार्था हि लोके शब्दा रूढाः, यथा गोशब्दः, अपि च सर्वे शब्दाः प्रायः सर्वार्थानां वाचकाः, देशादिभेदतो द्रुतविलम्बितादिभेदेन तथाप्रतीतिदर्शनात्, तथाहि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्रविडस्यार्यदेशमुपागतस्य मारिशब्दात्, झटिति वर्षविषया प्रतीतिरुपजायते, विलम्बिता चोपसर्गविषया, यद्वा आर्यदेशोत्पन्नस्य द्रविडदेशमधिगतस्य शीघ्रमुपसर्गविषया प्रतीतिः विलम्बिता च वर्षविषया, एवमनया दिशा सर्वेषामपि शब्दानां सर्वार्थवाचकत्वं परिभावनीयं, न च वाच्यम्-एवं सति घटशब्दमात्रश्रवणादखिलार्थप्रतीतिप्रसङ्गो, यथा क्षयोपशममवबोध-प्रवृत्तेः, क्षयोपशमश्च सङ्केताद्यपेक्ष इति तदभावे न भवति, ततोऽग्निहोत्रादिशब्दस्य स्वमांसादिवाचकत्वेऽप्यविरोध इति लौकिकशाब्दव्यवहारानुसरणेऽपि न वैदिकवाक्यानाम-भिलषितनियतार्थप्रतिपत्तिः । किंच-

लोकप्रसिद्धे नैव शाब्देन व्यवहारेण वयं वेदवाक्यानां प्रतिनियतमर्थं निश्चेतुमुद्युक्ता, लौकिकश्च शाब्दो व्यवहारोऽनेकधा परिप्लवमानो दृष्टः, सङ्केतवशतः प्रायः सर्वेषामपि शब्दानां सर्वार्थप्रतिपादनशक्तिसम्भवात्, ततो लौकिकेनैव शाब्देन व्यवहारेणास्माकमाशङ्कोदपादि-कोऽत्रार्थः स्यात् ?, किं घृताहुतिं प्रक्षिपेत् स्वर्गकाम इति उताहो स्वमांसं स्वादेदिति ?, तत्कथं तत एव निश्चयः कर्तुं बुध्यते ?, न हि यो यत्र संशयहेतुः स तत्र निश्चयमुत्पादयितुं शक्त इति, अपि च-नैकान्तेन वेदे लौकिकशाब्दव्यवहारानुसरणं, स्वर्गोर्वश्यादिशब्दा-नामरूढार्थानामपि तत्र व्याख्यानात्, यथा स्वर्गः-सुखविशेषः उर्वशी तु-अरणिरिति, तथा शब्दान्तरेष्वप्यरूढार्थकल्पना किं न सम्भविनि ?, उक्तं च-

"स्वर्गोर्वश्यादिशब्दस्य, दृष्टोऽरूढार्थवाचकः ।
शब्दान्तरेषु तादृक्षु, तादृश्येवास्तु कल्पना ॥१॥"

स्यादेतद्-अग्निहोत्रादेर्वाक्यस्य स्वमांसभक्षणप्रसङ्गो न युक्तो, वेदेनैवान्यत्र तस्यान्यथा व्याख्यानात्, तदयुक्तम्, तत्रापि वाक्यार्थस्य निर्णयाभावात्, यथोक्तं प्राक्-न हि अप्रसिद्धार्थस्य वाक्यस्य अप्रसिद्धार्थमेव वाक्यान्तरं नियतार्थप्रसाधनायालं, तुल्यदोषत्वात्, अथेत्थमाचक्षीथाः-यत्रार्थे न काचित्प्रमाणबाधा सोऽर्थो ग्राह्यो, न चाग्निहोत्रादिवाक्यस्य धृताहुतिप्रक्षेपरूपेऽर्थे प्रमाणबाधामुत्पश्यामः, तत्कथं तमर्थं न गृह्णीमः ?, तदेतत् स्वमांसभक्षणलक्षणेऽप्यर्थे समानं, न हि तत्रापि कांचित्प्रमाणबाधामीक्षामहे, अपि च-यदि प्रमाणबलात्प्रवृत्तिमीहसे तर्हि पौरुषेयमेव वचस्त्वयोपादेयं, तस्य लोकप्रतीत्यनुसारितया सम्प्रदायतोऽधिगतार्थतया च प्रायो युक्तिविषयत्वात्, नापौरुषेयं, विपरीततया तत्र युक्तेरसम्भवात्, तथाहि-

काऽत्र युक्तिः ? यया स्वमांसभक्षणात् स्वर्गप्राप्तिर्बाध्यते, न धृताहुतिप्रक्षेपादिति ?, धृताद्याहुतिप्रक्षेपादीनां स्वर्गप्रापणादिशक्तेरतीन्द्रियत्वेन प्रत्यक्षाद्यगोचरत्वात्, सम्प्रदायस्य चार्थनैयत्यकारिणोऽसम्भवाद्, एतच्चानन्तरमेव वक्ष्यामः, अथागमार्थाश्रया युक्तिः स्वमांस-भक्षणतः स्वर्गप्राप्तेर्बाधिका भविष्यति, तदयुक्तम्, आगमार्थस्याद्याप्यनिश्चयात् अनिश्चितार्थस्य च बाधकत्वायोगात्, अथ सम्प्रदायादर्थनिश्चयो भविष्यति, तथाहि-प्रथमतो वेदेन जैमनये स्वार्थ उपदर्शितः पश्चात्तेनास्मभ्यमुपदिष्ट इति, तदप्यसत्, वेदस्य हि यदि स्वार्थोपदर्शने शक्तिः ततोऽस्मभ्यमपि स्वार्थं किं नोपदर्शयति ?, तस्माज्जैमनयेऽपि न तेन स्वार्थो दर्शितः, किन्तु स वेदमुखेनात्मानमेवार्थनियमस्रष्टारमुपदर्शितवान्, यथा कश्चित्केनचित्पृष्टः-को मार्गः पाटलि-पुत्रस्य ?, स प्राह-एष स्थाणुर्दृश्यमाणो वक्ति-अयं मार्गः पाटलिपुत्रस्य, तत्र न स्थाणोर्वचन-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शक्तिः, केवलं स्थाणुमुखेन स एवात्मानं मार्गोपदेष्टारं कथयति, एवं वेदस्यापि न स्वार्थोपदर्शनशक्तिः, ततस्तन्मुखेन जैमनिरात्मानमेवार्थनियमस्त्रष्टारमुपदर्शितवान्, तत्र लौकिकशब्दव्यवहारानुसरणान्नापि युक्तेर्नापि च सम्प्रदायाद् वेदस्यार्थनिश्चयो, नापि तस्यापौरुषेयत्वसाधकं किनपि प्रमाणमित्यसम्भव्यपौरुषेयम्, उक्तं च-

"बान्ध्येयखरविषाणतुल्यमपौरुषेय"मिति, ननु यदि बान्ध्येयखरविषाणतुल्यमपौरुषेयं भवेत् तर्हि न वेदवचोऽपौरुषेयतया शिष्टाः प्रतिगृह्णीयुः, अथ च सर्वेष्वपि देशेषु शिष्टाः प्रतिगृह्णन्तो दृश्यन्ते, तस्मान्नासम्भव्यपौरुषेयम्, तदत्र पृच्छामः-के शिष्याः ?, ननु किमत्र प्रष्टव्यम् ?, ये ब्राह्मणीयोनिसम्भविनो वेदोक्तविधिसंस्कृता वेदप्रणीताचारपारिपालनैकनिषण्णचेतसः ते शिष्टाः, तदेतयुक्तं, विचाराक्षमत्वात्, तथाहि- किमिदं नाम ब्राह्मणत्वं यद्योनिसम्भवाच्छिष्टत्वं भवेत् ?, ब्रह्मणोऽपत्यत्वमिति चेत् तथाहि-ब्रह्मणोऽपत्यं ब्राह्मण इति व्यपदिशन्ति पूर्वर्षयः, न, एवं सति चाण्डालस्यापि ब्राह्मणत्वप्रसक्तिः तस्यापि ब्रह्मतनोरुत्पन्नत्वात्, उक्तं च-

"ब्रह्मणोऽपत्यतामात्राद्, ब्राह्मणोऽतिप्रसज्यते।
न कश्चिदब्रह्मतनोरुत्पन्नः कश्चिदिष्यते॥"

यदप्युक्तम्-'वेदोक्तविधिसंस्कृता वेदप्रणीताचारपरिपालनैकनिषण्णचेतसः' इति तदप्ययुक्तम्, इतरेतराश्रयदोपप्रसङ्गात्, तथाहि-वेदस्य प्रामाण्ये सिद्धे सति तदुक्तविधिसंस्कृताः तदर्थसमाचारणाच्छिष्टा भवेयुः, शिष्टत्वे च तेषां सिद्धे सति तत्परिग्रहाद्वेदप्रामाण्यमित्येकाभावेऽन्यतरस्याप्यभावः, आह च-

"शिष्टैः परिगृहीतत्वाच्चेदन्योऽन्यसमाश्रयः।
वेदार्थाचरणाच्छिष्टास्तदाचाराच्च स प्रभा॥"

स्यादेतत्-भवतोऽपि तत्त्वतोऽपौरुषेयं वचनमिष्टमेव, तथाहि-सर्वोऽपि सर्वज्ञो वचनपूर्वक एवेच्यते, "तप्पुव्विया अरिहया" इति वचनप्रामाण्यात्, ततोऽनादित्वात् सिद्धं वचनस्यापौरुषेयत्वमिति, तदयुक्तमा, अनादितायामप्यपौरुषेयत्वायोगात्, तथाहि-सर्वज्ञपरम्पराऽप्येषाऽनादिरिष्यते, ततः पूर्वः पूर्वः सर्वज्ञः प्राक्तनसर्वज्ञप्रणीतवचनपूर्वको भवन्न विरुध्यते, किं च-वचनं द्विधा-शब्दरूपमर्थरूपं च, तत्र शब्दरूपवचनापेक्षया नायमस्माकं सङ्गरो, यदुत-सर्वोऽपि सर्वज्ञो वचनपूर्वक इति, मरुदेव्यादीनां तदन्तरेणापि सर्वज्ञत्वश्रुतेः, किन्त्वर्थरूपापेक्षया, ततः कथं शब्दापौरुषेयत्वाभ्युपगमप्रसङ्गः ?, नन्वर्थपरिज्ञानमपि शब्दमन्तरेण नोपपद्यते, तत्कथं न शब्दरूपापेक्षयाऽपि सङ्गरः, तदसत्, शब्दमन्तरेणापि विशिष्टक्षयोपशमादिभावतोऽर्थपरिज्ञानसम्भवात्, तथाहि-दृश्यन्ते तथाविधक्षयोपशमभावतो मार्ग्गानुसारिबुद्धेर्वचनमन्तरेणापि तदर्थप्रतिपत्तिरिति कृतं प्रसङ्गेन, प्रकृतं प्रस्तुमः।

तत्र सर्वज्ञश्रुतप्रभवा ऋषभादयोऽप्यासीरन् न च ते सम्प्रति स्तोतुं प्रस्तुता इति तद्यवच्छेदार्थं विशेषणान्तरमाह-तीर्थकराणामपश्चिमो जयति, तत्र जन्मजरामरणसलिलसम्भृतं मिथ्यादर्शनाविरतिगम्भीरं महाभीमकषायपातालं दुरवगाहमहामोहावर्त्तभीषणं रागद्वेषपवनविक्षोभितं विविधानिष्टसंयोगवियोगवीचीनिचयसंकुलं उच्चैस्तरमनोरथसहस्रवेलाकलितं संसारसागरं तरन्ति येन तत्तीर्थं, तच्च सकलजीवाजीवादिपदार्थसार्थप्ररूपकं अत्यान्तानवद्यं शेषतीर्थान्तरी-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यथाविज्ञातचरणकरणक्रियाधारं सकलत्रैलोक्यान्तर्गतविशुद्धधर्मसम्पत्समन्वितमहापुरुषाश्रयमविसंवादिप्रवचनं तत्करणशीलाः तीर्थकराः तेषां-तीर्थकराणाम् अस्मिन् भारते वर्षेऽधिकृतायामवसर्पिण्यां न विद्यते पश्चिमोऽस्मादित्यपश्चिमः-सर्वान्तिमः, पश्चिम इति नोक्तम्, अधिक्षेपसूचकत्वात्पश्चिमशब्दस्य, ननु सर्वोऽपि प्रेक्षावान् फलार्थी प्रवर्त्तते, अन्यथा प्रेक्षावत्ताक्षितिप्रसङ्गात्, ततोऽसौ तीर्थं कुर्वन्नवश्यं फलमपेक्षते, फलं चापेक्षमाणोऽस्मादृश इव व्यक्तमवीतरागः, तदयुक्तम्, यतः तीर्थकरनामकर्मोदयसमन्विताः सर्वेऽपि भगवन्तो वीतरागाः तीर्थप्रवर्त्तनाय प्रवर्त्तन्ते, तीर्थकरनामकर्म्म च तीर्थप्रवर्त्तनफलं, ततो भगवान् वीतरागोऽपि तीर्थकरनामकर्मोदयतः तीर्थप्रवर्त्तनस्वभावः सवितेव प्रकाशमुपकार्योपकारानपेक्षं तीर्थं प्रवर्त्तयतीति न कश्चिद्दोषः, उक्तं च-

"तीर्थप्रवर्त्तनफलं यत्प्रोक्तं कर्म्म तीर्थकरनाम।
तस्योदयात् कृतार्थोऽप्यर्हंस्तीर्थं प्रवर्त्तयति ॥१॥"
तत्स्वाभाव्यादेव प्रकाशयति भास्करो यथा लोकम्।
तीर्थप्रवर्त्तनाय प्रवर्त्तते तीर्थकर एवम् ॥२॥"

ननु तीर्थप्रवर्त्तनं नाम प्रवचनार्थप्रतिपादनं, प्रवचनार्थं चेद्भगवान् प्रतिपादयति तर्हि नियमादसर्वज्ञः, सर्वस्यापि वक्तुरसर्वज्ञतयोपलम्भात्, तथा चात्र प्रयोगः-विवक्षितः पुरुषः सर्वज्ञो न भवति, वक्तृत्वाद्, रथ्यापुरुषवदिति, तदसत्, सन्दिग्धव्यतिरेकतया हेतोरनैकान्तिकत्वात्, तथाहि-न वचनं सर्ववेदनेन सह विरुध्यते, अतीन्द्रियेण सह विरोधानिश्चयात्, द्विविधो हि विरोधः-परस्परपरिहारलक्षणः सहानवस्थालक्षणश्च, तत्र परस्परपरिहारलक्षणः तादात्म्यप्रतिषेधे यथा घटपटयोः, न खलु घटः पटात्मको भवति नापि पटो घटात्मकः, 'न सत्ता सदन्तरमुपैती'ति वचनात्, ततोऽनयोः परस्परपरिहारलक्षणो विरोधः, एवं सर्वेषामपि वस्तूनां भावनीयम्, अन्यथा वस्तुसाङ्कर्य्यप्रसक्तेः, यस्तु सहानवस्थानलक्षणो विरोधः स परस्परं बाध्यबाधकभावसिद्धौ सिद्ध्यति, नान्यथा, यथा वह्निशीतयोः, तथाहि-विवक्षिते प्रदेशे मन्दं मन्दमभिज्वलितवति वह्नौ शीतस्यापि मन्दं मन्दं भावः, यदा पुनरत्यर्थमभिज्वाला विमुञ्चति वह्निः तदा सर्वथा शीतस्याभाव इती भवत्यनयोर्विरोधः, उक्तं च-

"अविकलकारणमेकं तदपरभावे यदा भवन्न भवेत्।
भवति विरोधः स तयोः शीतहुताशात्मनोर्दृष्टः ॥"

न चैवं वचनसंवेदनयोः परस्परं बाध्यबाधकभावो, न हि संवेदने तारतम्येनोत्कर्षमासादयति वचस्वितायाः तारतम्येनापकर्ष उपलभ्यते, तत्कथमनयोः सहानवस्थालक्षणो विरोधः ?, अथ सर्ववेदीवक्ता नोपलब्ध इति विरोध उद्धुष्यते, तदयुक्तम्, अत्यन्तपरोक्षो हि भगवान्, ततः कथमनुपलम्भमात्रेण तस्याभावनिश्चयः ?, अदृश्यविषयस्यानुपलम्भस्याभावनिश्चयकत्वायोगात्, आह च प्रज्ञाकरगुप्तः-

"बाध्यबाधकभावः कः, स्यातां यद्युक्तिसंविदौ।
तादृशोऽनुपलब्धिश्चेदुच्यतां सैव साधनम् ॥१॥"
अनिश्चयकरं प्रोक्तमीदृक्षानुपलम्भनम्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तन्नात्यन्तपरोक्षेषु, सदसत्ताविनिश्चयौ ॥२॥"

अथ वचनं विवक्षाधीनं विवक्षा च वक्तुकामता सा च रागो रागादिमतश्च सर्वज्ञत्वभावो, वीतरागस्य सर्वज्ञत्वाभ्युपगमात्, ततः कथमिव वक्तृत्वात् नासर्वज्ञत्वानुमानमिति ?, तदसद्, वक्तुकामताया रागत्वायोगाद्, अभिष्वङ्गलक्षणो हि रागो, न च भगवतः कापि अभिष्वङ्गः, किमर्थं तर्हि देशनेति चेत् ननूक्तं तीर्थकरनामकर्मोदयात्, अमूढलक्षो हि भगवान् ततो यत्कर्म यथा वेद्यं तत्तथैवाभिष्वङ्गाद्यभावेऽपि वेदयते, तथा चाद्यापि दृश्यन्ते परमौचित्यवेदिनः, क्वचित्प्रयोजनेऽवश्यकर्त्तव्यतामवेत्याभिष्वङ्गाद्यभावेऽपि प्रवर्त्तमानः, तीर्थकरनामकर्म च देशनाविधानेन वेद्यम्, "तं च कहं वेइज्जइ ?, अगिलाए धम्मदेसणाईहि" इति वचनात्, ततो न कश्चिद्दोषः, स्यादेतत्, मा भूद्रागादिकार्यतया वचनादसर्वज्ञतासिद्धिः, रागादिसहचरिततया तु भविष्यति, तथाहि-

रागादिसहचरितं सदैव वचनमुपलभ्यते, ततो वचनाद्रागादिप्रतीतावसर्वज्ञत्वसिद्धिः, तदयुक्तम्, सहदर्शनमात्रस्यागमकत्वाद्, अन्यथा क्वचिद्वक्तरि गौरत्वेन सह वचनमुपलब्धमिति गौरत्वाभावे कृष्णे वक्तरि न स्यात्, अथ च तत्राप्युपलभ्यते, तन्न सहदर्शनमात्रं गमकं, ततो विपक्षेव्यावृत्तिसन्देहाद्वक्तृत्वादिति सन्दिग्धानैकान्तिको हेतूफ अथवा विरुद्धोऽपि, विपक्षेण सह प्रतिबन्धनिश्चयात्, तथाहि-वचनं संवेदनादेवोपजायते, अन्वयव्यतिरेकाभ्यां तथानिश्चयात्, कथमन्वयव्यतिरेकौ प्रतीताविति चेत् ?, उच्यते, इह यथा यथा संवेदनमुत्कर्षमासादयति तथा तथा वचस्विताया अप्युत्कर्ष उपलभ्यते, संवेदनोत्कर्षाभावे च वचस्विताया अपकर्षो, मूर्खाणां स्थलभाषितयोपलम्भात्, ततो यथा वृष्टितारतम्येन गिरिनदीपूरस्य तारतम्यदर्शनात् सर्वोत्कृष्टपूरदर्शने सर्वोत्कृष्टवृष्ट्यनुमानं तथेहापि भगवतः सर्वोत्कृष्टवक्तृत्वदर्शनात् सर्वोत्कृष्टं संवेदनमनुमीयते, अपरस्त्वाह-वचनं वितर्कविचारपुरस्परं, तथोपलम्भात्, वितर्कविचारौ च विकल्पात्मकौ, विकल्पस्त्वस्पष्टप्रतिभासः, ततो भगवतोऽपि देशनां कुर्वतोऽस्पष्टप्रतिभासं वैकल्पिकं ज्ञानं प्रसक्तं, तच्च भ्रान्तमिति कथमभ्रान्तः सर्ववेदी ?, तदसद्, यतो वितर्कविचारावन्तरेणापि केवलज्ञानेन यथावस्थितं वस्तूपलभ्य भगवान् वचनं परावबोधाय प्रयुङ्क्ते, यथा शब्दव्यवहारनिष्णातः प्रत्यक्षतः स्तम्भमुपलभ्य स्तम्भशब्दं, न च तस्य तथा स्तम्भशब्दं प्रयुञ्जानस्य वितर्कविचारौ, नापि ज्ञानस्यास्पष्टप्रतिभासता, तथाऽननुभवाद्, एवं भगवतोऽपि द्रष्टव्यम्, उक्तं चान्यैरपि-

" चास्पष्टावभासित्वादेव शब्दः प्रवर्त्तते ।
प्रत्यक्षदृष्टे स्तम्भादावपि शब्दप्रवर्त्तनात् ॥१॥"
अयं स्तम्भ इति प्राप्तमन्यथाऽस्याप्रवर्त्तनम् ।
न चास्पष्टावभासित्वमत्र ज्ञानस्य लक्ष्यते ॥२॥

तथाऽन्यत्रापि शब्दानां, प्रवृत्तिर्न विरुध्यते ॥" इति तदेवं यतो भगवान् सर्वश्रुतानां प्रभवः सर्वतीर्थकृतां चापश्चिमस्तीर्थकरः ततः सकलसत्त्वानां गुरुः, तथा चाह- 'जयति गुरुर्लोकाना'-मिति लोकानां-सत्त्वानां गृणाति प्रवचनार्थमिति गुरुः, प्रवचनार्थप्रतिपादकतया पूज्य इत्यर्थः ।

तथा 'जयति महात्मा महावीरः' महान्-अविचिन्त्यशक्त्युपेत आत्मास्वभावो यस्य स महात्मा, 'शूर वीर विक्रान्तौ' वीरयति स्मेति वीरो-विक्रान्तः, महान्-कषायोपसर्गपरिषहेन्द्रियादिशत्रुगण-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जयादतिशायी विक्रान्तो महावीरः अथवा 'ईर गतिप्रेरणयोः' विशेषेण ईरयति-गमयति स्फेटयति कर्म्म प्रापयति वा शिवमिति वीरः, अथवा 'ईरि गतौ' विशेषेण-अपुनर्भावेन इयर्ति स्म-याति स्म शिवमिति वीरः, महांश्चासौ वीरश्च महावीरः यजतीति पूर्ववद्, भूयोऽस्याभिधानं च स्तवाधिकाराददुष्टम्॥ पुनरप्यस्यैव भगवतो महावीरस्यातिशयद्वारेण स्तुतिमभिधित्सुराह-

*मू. (३)* *भद्दं सव्वं जगुज्जोयगस्स भद्दं जिनस्स वीरस्स।*
*भद्दं सुरासुरनमंसियस्स भद्दं धुयरयस्स॥*

वृ. 'भद्रं' कल्याणं भवतु, कस्य ?, 'सर्वजगदुद्योतकस्य' सर्व-समस्तं जगत्-लोकालोकात्मकमुद्योतयति-प्रकाशयति केवलज्ञानदर्शनाभ्यामिति सर्वजगदुद्योतकः, तस्य 'भद्रायुष्यक्षेमसुखहितार्थहितैराशिषी'ति विकल्पेन चतुर्थीविधानात् षष्ठ्यपि भवति, यथा आयुष्यं देवदत्ताय आयुष्यं देवदत्तस्य, अनेन ज्ञानातिशयमाह।

ननु विशेषणं तदुपादीयते यत्सम्भवति, 'सम्भवे व्यभिचारे च विशेषण'मिति वचनात्, न च सर्वजगतदुद्योतकत्वं सम्भवति, प्रमाणेनाग्रहणात्, तथाहि-सर्वजगदुद्योतकत्वं भगवतः किं प्रत्यक्षेण प्रतीयते ? उतानुमानेन आहोश्विदागमेन उताहो उपमानेन अथवा अर्थापत्त्या ?, तत्र न तावत्प्रत्यक्षेण, भगवतश्चिरातीतत्वात्, अपिच-परविज्ञानं सदैव प्रत्यक्षाविषयः, अतीन्द्रियत्वात्, ततस्तदात्वेऽपि न प्रत्यक्षेण उतानुमानेन ?, तद्धि लिङ्गलिङ्गिसम्बन्धग्रहणपुरस्सरमेव प्रवर्त्तते, लिङ्गलिङ्गिसम्बन्धग्रहणं च किं प्रत्यक्षेणानुमानेन वा ?, तत्र न प्रत्यक्षेण, सर्ववेदनस्यात्यन्तपरोक्षतया प्रत्यक्षेण तस्मिन्नगृहीते तेन सह लिङ्गस्याविनाभावनिश्चयायोगात्, न चानिश्चिताविनाभावं लिङ्गं लिङ्गिनो गमकम्, अतिप्रसङ्गात्, यतः कुतश्चिद्यस्य तस्य वा प्रतिपत्तिप्रसक्तेः, नाप्यनुमानेन लिङ्गलिङ्गसम्बन्धग्रहणम्, अनवस्थाप्रसङ्गात्, तथाहि-

तदप्यनुमानं लिङ्गलिङ्गिसम्बन्धग्रहणतो भवेत्, ततस्तत्रापि लिङ्गलिङ्गिसम्बन्धग्रहणमनुमानान्तरात्कर्त्तव्यम्, तत्रापि चेयमेव वार्त्तेत्यनवस्था, नाप्यागमतः सर्ववेदनविनिश्चयः, स हि पौरुषेयो वा स्यादपौरुषेयो वा ?, पौरुषेयोऽपि सर्वज्ञकृतो रथ्यापुरुषकृतो वा ?, तत्र न तावत् सर्वज्ञकृतः, सर्वज्ञासिद्धौ सर्वज्ञकृतत्वस्यैवाविनिश्चयात्, अपि च-एवमभ्युपगमे सतीतरेतराश्रयदोषप्रसङ्गः, तथाहि-सर्वज्ञसिद्धौ तत्कृतागमसिद्धिः, तत्कृतागमसिद्धौ च सर्वज्ञसिद्धिः, अथ रथ्यापुरुषप्रणीत इति पक्षस्तर्हि न स प्रमाणमुन्मत्तकप्रणीतशास्त्रवत्, अप्रमाणाच्च तस्मान्न सुनिश्चितसर्वज्ञसिद्धिः, अप्रमाणात्प्रमेयासिद्धेः, अन्यथा प्रमाणपर्येषणं विशीर्येत, अथापौरुषेय इति पक्षस्तर्हि ऋषभः सर्वज्ञो वर्द्धमानस्वामी सर्वज्ञ इत्यादिरर्थवादः प्राप्नोति, ऋषभाद्यभावेऽपि भावात्, तथाहि-सर्व्वकल्पस्थायी आगमः, ऋषभादयस्त्वधुनातनकल्पवर्त्तिनः, तत ऋषभाद्यभावेऽपि पूर्व्वमप्यस्यागमस्यैवमेव भावात्कथमेतेषामृषभादीनामभिधानं तत्र परमार्थसत् ?, तस्मादर्थवाद एषः, न सर्व्वज्ञप्रतिपादनमिति।

अपि च-यद्यपौरुषेयागमाभ्युपगमस्तर्हि किमिदानीं सर्वज्ञेन ?, आगमादेव धर्म्माधर्म्मादिव्यवस्थासिद्धेः, तस्मात् नागमगम्यः सर्ववेदी, नाप्युपमानगम्यः, तस्य प्रत्यक्षपूर्वकत्वात्, तथाहि-प्रत्यक्षप्रसिद्धगोपिण्डस्य यथा गौः तथा गवय इत्यागमाहितसंस्कारस्याटव्यां पर्यटतो गवयदर्शनानन्तरं तत्रामप्रतिपत्तिरुपमानं प्रमाणं वर्ण्यते, न चैकोऽपि सर्वज्ञः प्रत्यक्षसिद्धो येन तत्सादृश्या-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वष्टम्भेनान्यस्य विवक्षितपुरुषस्योपमानप्रमाणतः सर्वज्ञ इति प्रतीतिर्भवेत्, नाप्यर्थापत्तिगम्यः, सा हि प्रत्यक्षादिप्रमाणगोचरीकृतार्थान्यथानुपपत्त्या प्रवर्त्तते, न च कोऽप्यर्थः सर्वज्ञमन्तरेण नोपपद्यते, तत्कथमर्थापत्तिगम्यः ?, तदेवं प्रमाणपञ्चकावृत्तेरभावप्रमाणमेव सर्वज्ञं क्रोडीकरोति,

"प्रमाणपञ्चकं यत्र, वस्तुरूपे न जायते।
वस्त्वसत्तावबोधार्थं, तत्राभावप्रमाणता ॥"

अपि च-सर्वं वस्तु जानाति भगवान् केन प्रमाणेन ?, किं प्रत्यक्षेण उत यथासम्भवं सर्वैरेव प्रमाणैः, तत्र न तावत्प्रत्यक्षेण, देशकालविप्रकृष्टेषु सूक्ष्मेष्वमूर्तेषु च तस्याप्रवृत्तेः, इन्द्रियाणा-मगोचरत्वात्, यदि पुनस्तत्रापिन्द्रियं व्याप्रियेत तर्हि सर्व्वः सर्वज्ञो भवेत्, अथेन्द्रियप्रत्यक्षा-दन्यदतीन्द्रियं प्रत्यक्षं तस्यास्ति तेन सर्व्वं जानातीति मन्येथाः, तदप्ययुक्तम्, तस्यास्तित्वे प्रमाणा-भावात्, न च प्रमाणमन्तरेण प्रमेयसिद्धिः, सर्वस्य सर्वेष्टार्थसिद्धिप्रसक्तेः, अथवा अस्तु तदपि तथापि सर्वमेतावदेव जगति वस्तु इति न निश्चयः, न खल्वतीन्द्रियमप्यवधिज्ञानं सर्ववस्तुविषयं सिद्धं, तदपरिच्छिन्नानामपि धर्म्माधर्मास्तिकायादीनां सम्भवाद्, एवं केवलज्ञानापरिच्छिन्नमपि किमपि वस्तु भविष्यतीत्याशङ्काऽनतिवृत्तेर्न सर्वविषयं केवलज्ञानं वक्तुं शक्यं, तथा च कुतः सर्वज्ञस्यापि स्वयमात्मनः सर्वज्ञत्वविनिश्चयः ?, अथ यथायथं सर्वैरेव प्रमाणैः सर्वं वस्तु जानातीति पक्षः, नन्वेवं सति य एवागमे कृतपरिश्रमः स एव सर्वज्ञत्वं प्राप्नोति, आगमस्य प्रायः सर्वार्थविषय-त्वात्, तथा च कः प्रतिविशेषो वर्द्धमानस्वाम्यादौ ? येन स एव प्रमाणभिष्यते न जैमिनिरिति। अन्यच्च-यथाऽवस्थितसकलवस्तुवेदी सर्वज्ञ इष्यते, ततोऽशुच्यादिरसानामपि यथावस्थिततया संवेदनादशुच्यादिरसास्वादप्रसङ्गः, आह च-

"अशुच्यादिरसास्वादप्रसङ्गश्चानिवारितः" किं च-कालतोऽनाद्यनन्तः संसारो, जगति च सर्वदा विद्यमानान्यपि वस्तून्यनन्तानि, ततः संसारं वस्तूनि च क्रमेण विदन् कथमनन्तेनापी कालेन, सर्ववेदी भविष्यति ?, उक्तं च-'क्रमेण वेदनं कथ'मिति, अत्र प्रतिविधीयते-तत्र यत्तावदुक्तं 'सर्वजगदुद्योतकत्वं भगवतः केन प्रमाणेन प्रतीयते ? इत्यादि' तत्रागमप्रमाणादिति ब्रूमः स चागमः कथञ्चिन्नित्यः प्रवाहतोऽनादित्वात्, तथाहि-

यामेव द्वादशाङ्गी कल्पलताकल्पां भगवान् ऋषभस्वामी पूर्वभवेऽधीतवान्, अधीत्य च पूर्वभवे इहभवे च यथावत्पर्युपास्य फलभूतं केवलज्ञानमवाप्तवान् तामेवोत्पन्नकेवलज्ञानः सन् शिष्येभ्य उपदिशति, एवं सर्वतीर्थकरेष्वपि द्रष्टव्यम्, ततोऽसावागमोऽर्थरूपापेक्षया नित्यः, तथा च वक्ष्यति-"एसा दुवालसङ्गी न कयावि नासी न कयावि न भवइ न कयावि न भविस्सइ, धुवा नीया सासया अक्खया अव्वया अव्वाबाहा अवट्ठिया निच्चा" इति, अस्मिंश्चागमे यथा संसारी संसारं पर्यटति यथा कर्म्मणामभिसमागमो यथा च तपःसंयमादिना कर्मणामपगमे केवलाभिव्यक्तिः तथा सर्वं प्रतिपाद्यते, इति सिद्ध आगमात्सर्वज्ञः।

यदप्युक्तम्-'स पौरुषेयो वा' इत्यादि, तत्रार्थतोऽपौरुषेयः, स च न सर्वज्ञप्रकाशितत्वादेव प्रमाणं, किन्तु कथञ्चित् स्वतोऽपि, निश्चिताविपरीतप्रत्ययोत्पादकत्वात्, ततो नेतरेतराश्रय-दोषप्रसङ्गः, सर्वज्ञप्रणीतत्वावगमाभावोऽपि निश्चिताविपरीतप्रत्ययोत्पादकतया तस्य प्रामाण्य-निश्चयात्, ततः सर्वज्ञसिद्धिः, अथैवमागमात् सर्व्वज्ञः सामान्यतः सिद्धति न विशेषनिर्देशेन

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यथाऽयं सर्वज्ञ इति, ततः कथं सर्वज्ञकालेऽपि सर्व्वज्ञोऽयमिति व्यवहारः ?, उच्यते, पृष्टचिन्तित-सकलपदार्थप्रकाशनात्, तथाहि-यद् यद् भगवान् पृच्छ्यते यच्च यच्च स्वचेतसि प्रष्टा चिन्तयति तत्तत्सर्व्वं प्रत्ययपूर्व्वमुपदिशति, ततोऽसौ ज्ञायते यथा सर्वज्ञ इति, तेन यदुच्यते भट्टेन-

'सर्व्वज्ञोऽसाविति ह्येतत्, तत्कालेऽपि बुभुत्सुभिः।
तज्ज्ञानज्ञेयविज्ञानरहितैर्गम्यते कथम् ॥१॥ इति,

तदपास्तं द्रष्टव्यम्, पृष्टचिन्तितसकलपदार्थप्रकाशनेन तस्य सर्व्वज्ञत्वनिश्चयात्, नन्वेवं व्यवहारतो निश्चयो न निश्चयतो, निश्चयतो हि तदा सर्व्ववेदी विदितो भवति यदा तद्ज्ञेयं सर्व्वं विदित्वा सर्वत्र संवादो गृह्यते, न चैतत्कर्तुं शक्यम्, अथैकत्र संवाददर्शनादन्यत्रापि संवादो द्रष्टव्यः, एवं तर्हि मायावी बहुजल्पाकः सर्वोऽपि सर्वज्ञः प्राप्नोति, तस्याप्येकदेशसंवाददर्शनाद्, आह-

"एकदेशपरिज्ञानं, कस्य नाम न विद्यते ?।
न ह्येकं नास्ति सत्यार्थं, पुरुषे बहुजल्पिनि॥"

तदयुक्तम्, व्यवहारतोऽपि निश्चयस्य सम्यग्निश्चयत्वात्, वैयाकरणादिनिश्चयवत्, तथाहि-वैयाकरणः कतिपयपृष्टशब्दव्याकरणादयं सम्यग्वैयाकरण इति निश्चीयते, एवं पृष्टचिन्तितार्थप्रकाशनात् सर्वज्ञोऽपि, न चैवं मायाविनोऽपि सर्वज्ञत्वप्रसङ्गः, मायाविनि सर्वेषु पृष्टेषु चिन्तितेषु चार्थेषु संवादायोगात्, निपुणेन च प्रतिपत्त्रा भवितव्यम्, अथ वैयाकरणोऽन्येन वैयाकरणेन सकलव्याकरणशास्त्रार्थसंवादनिश्चयतोऽपि ज्ञातुं शक्यते, ननु सर्व्वज्ञोऽप्यन्येन सर्वज्ञेन यथावत् ज्ञातुं शक्यत एवेति समानम्, अथ तदानीमन्येन सर्वज्ञेन निश्चयतो विज्ञायताम् इदानीं तु स कथं ज्ञायते ?, उच्यते, इदानीं तु सम्प्रदायादव्याहतप्रवचनार्थप्रकाशनाच्च, यदप्यवादीत्- 'ऋषभः सर्वज्ञो वर्द्धमानस्वामी सर्वज्ञ इत्यादिरर्थवादः प्राप्नोतीत्यादि' तदप्यसारम्, आगमे ह्ययं कल्पो यो यः सर्वज्ञ उत्पद्यते तेन तेन तत्तत्कल्पवर्तिनां तीर्थकृतां सर्वेषामप्यवश्यं चरितानि वक्तव्यानि, ततो न ऋषभाद्यभिधानमर्थवादः, यदप्यभिहितं- 'नाप्युपमानप्रमाणगम्य इत्यादि,' तदप्ययुक्तम्, एकं सर्वज्ञं यदा व्यवहारतो यथावद्विनिश्चित्यान्यमपि सर्वज्ञं व्यवहारतः परिज्ञाय एषोऽपि सर्वज्ञ इति व्यवहरति तदा कथं नोपमानप्रमाणविषयः ?, अर्थापत्तिगम्योऽपि भगवान्, अन्यथाऽऽगमार्थस्य परिज्ञानासम्भवात्, न खल्वतीन्द्रियार्थदर्शनमन्तरेणागमस्यार्थोऽतीन्द्रियः, पुरुषमात्रेण यथावदवगन्तुं शक्यते, तत आगमार्थपरिज्ञानान्यथानुपपत्त्या सर्वज्ञोऽवश्यमभ्युपगन्तव्यः एतेन यदुक्तं प्राक्- 'किमदानीं सर्वज्ञेन ?, आगमादेव धर्म्माधर्म्मव्यवस्थासिद्धे'रिति, तत्प्रतिक्षिप्तमवसेयं, सर्वज्ञमन्तरेणागमार्थस्यैव सम्यक् परिज्ञानासम्भवात्,

यच्चोक्तम् -'सर्वं वस्तु जानाति भगवान् केन प्रमाणेने'त्यादि, तत्र प्रत्यक्षेणेति पक्षः, तदपि च प्रत्यक्षमतीन्द्रियमवसेयम्, ननु तत्राप्युक्तम्- 'तस्यास्तित्वे प्रमाणाभावादि'ति, उक्तमिदमयुक्तं तूक्तम्, तदस्तित्वेऽनुमानप्रमाणसद्भावाद्, तच्चानुमानमिदं- यत्तारतम्यवत् तत्सर्वान्तिमप्रकर्षभाक्, यथा परिमाणं, तारतम्यवच्चेदं ज्ञानमिति, न चायमसिद्धो हेतुः, तथाहि- दृश्यते प्रतिप्राणि प्रज्ञामेधादिगुणपाटवतारतम्यं ज्ञानस्य, ततोऽवश्यमस्य सर्वान्तिमप्रकर्षेण भवितव्यम्, यथा परिमाणस्याकाशे, सर्वान्तिमप्रकर्षश्च ज्ञानस्य सकलवस्तुस्तोमप्रकाशत्वं, अथ यद्विषयः तरमभावः सर्वान्तिमप्रकर्षोऽपि तद्विषय एव युक्तः, तरतमभावश्चेन्द्रियाश्रितस्य ज्ञानस्योपलब्धः, ततः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सर्वान्तिमप्रकर्षोऽपि तस्यैवेति कथमतीन्द्रियज्ञानसम्भवः ?, इन्द्रियाश्रितस्य च ज्ञानस्य प्रकर्ष-भावेऽपि न सर्वविषयता, तस्य सूक्ष्मादावप्रवृत्तेः, अथोच्यते-मनोज्ञानमप्यतीन्द्रियज्ञानमुच्यते, तस्य च तरतमभावः शास्त्रादौ दृष्ट एव, तथाहि-तदेव शास्त्रं कश्चित् झटित्येव पठति अवधारयति च, अपरस्तु मन्दं, बोधतोऽपि कश्चिन्मुकुलितार्थावबोधमपरो विशिष्टावबोधः, एवमन्यास्वपि कलासु यथायोगं मनोविज्ञानस्य तारतम्यं परिभाव्ये, ततः तस्य सर्वान्तिमः, प्रकर्षः सर्वविषयो भविष्यति, तदसद्, यतो मनोविज्ञानस्यापि तरतमभावः शास्त्राद्यालम्बन एवोपलब्धः, ततः प्रकर्ष-भावोऽपि तस्य शास्त्राद्यालम्बन एव युक्त्योपपद्यते, न सर्वविषयः, न खल्वन्यविषयोऽभ्या-सोऽन्यविषयं प्रकर्षभावमुपजनयति, तथाऽनुपलब्धेः उक्तं च-

"शास्त्राद्यभयासतः शास्त्रप्रभृत्येवावगच्छतः ।
साकल्यवेदनं तस्य, कुत एवागमिष्यति ? ॥"

अत्रोच्यते, इह तावदिन्द्रियज्ञानाश्रितः तरतमभावो न ग्राह्यः, अतीन्द्रियप्रत्यक्षसाधनाय हेतोरुपन्यासात्, तथाहि-सकलवस्तुविषयमतीन्द्रियप्रत्यक्षमिदानीं साधयितुमिष्टं, ततः तरतमभावोऽपि हेतुत्वेनोपन्यस्तोऽतीन्द्रियज्ञानस्यैव वेदितव्यः, अन्यथा भिन्नाधिकरणस्य हेतोः पक्षधर्म्मत्वायोगात्, साक्षाच्चातीन्द्रियग्रहणं न कृतं, प्रस्तावादेव लब्धत्वात्, अतीन्द्रियं च ज्ञान-मिन्द्रियानाश्रितं सामान्येन द्रष्टव्यम्, तेन मनोज्ञानमपि गृह्यते, यदप्युक्तम्-'मनोज्ञानस्यापि तरतम-भावः शास्त्राद्यालम्बन एवेति प्रकर्षभावोऽपि तद्विषय एव युक्त' इति, तदप्यसमीचीनं, शास्त्राद्य-तिक्रान्तस्यापि तरतमभावस्य सम्भवात्, तथाहि-

योगिनः परमयोगमिच्छन्तः प्रथमतः शस्त्रमभ्यसितुमुद्यतन्ते, यथाशक्ति च शास्त्रानुसारेण सकलमप्यनुष्ठानमनुतिष्ठन्ति, मा भूत्किमपि क्रियावैगुण्यं प्रमादाद्योगाभ्यासयोग्यताहानिर्वेति-कृत्वा, ततो निरन्तरमेव यथोक्तानुष्ठानपुरस्सरं शास्त्रमभ्यस्यतां शुद्धचेतसां प्रतिदिवसमभिवर्द्धन्ते प्रज्ञामेधादिगुणाः, ते चाभ्यासादभिवर्द्धमाना अद्यापि स्वसंवेदनप्रमाणेनानुभूयन्ते ततो नासिद्धाः, ततः शनैः शनैरभ्यासप्रकर्षे जायामाने शास्त्रसन्दर्शितोपायाः वचनगोचरातीताः शेषप्राणिगण-संवेदनागम्याः सिद्धिपदसम्पद्धेतवः सूक्ष्मसूक्ष्मतरार्थविषया मनाक् समुल्लसत्स्फुटप्रतिभासा ज्ञानविशेषा उत्पद्यन्ते, ततः किञ्चिदूनात्यन्तप्रकर्षसम्भवे मनसोऽपि निरपेक्षमत्यादिज्ञानाप्रकर्ष-पर्यन्तोत्तरकालभावि केवलज्ञानादर्वाक्तनं सवितुरुदयात् प्राक् तदालोककल्पमशेषरूपादि-वस्तुविषयं प्रातिभं ज्ञानमुदयते, तच्च स्पष्टाभतयेन्द्रियप्रत्यक्षादधिकतरं, न चेदमसिद्धं, सर्व-दर्शनेष्वप्यध्यात्मशास्त्रष् तस्याभिधानात्, अथ प्रथमतो मनः-सापेक्षमभ्यासमारब्धवान्, अभ्यास-प्रकर्षे तूपजायमाने कथं मनोऽपि नालम्बते ?, उच्यते, अत्यन्ताभ्यासप्रकर्षवशतो मनोनिरपेक्षमपि शक्तत्वात्, तथाहि-

तरणं शिक्षितुकामः प्रथमं तरण्डमपेक्षते, ततोऽभ्यासप्रकर्षयोगतः तरणनिष्णातस्तरण्डमपि परित्यजति, एवं योग्यपि वेदितव्यः, ततः सर्वोत्कृष्टप्रकर्षसम्भवेऽतीव स्फुटप्रतिभासं सकल-लोकालोकविषयमनुपममबाध्यं केवलज्ञानमुदयते, ततो यदुक्तं 'शास्त्रद्यभ्यासतः शास्त्रप्रभृत्येवा-वगच्छत' इत्यादि, तदत्यन्तमध्यात्मशास्त्रयाथात्म्यवेदिगुरुसम्पर्कबहिर्भूतत्वसूचकमवसेयं, स्यादेतत्, तारतम्यदर्शनादस्तु ज्ञानस्य प्रकर्षसम्भवानुमानं, स तु प्रकर्षः सकलवस्तुविषय इति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कथं श्रद्धेयम्?, न खलु लङ्घनमभ्यासतः तारतम्यवदप्युपलभ्यमानं सकललोकविषयमुपलभ्यते, तदसद्, दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यात्, तथाहि-न लङ्घनमभ्यासादुपजायते, किन्तु बलविशेषतः, तथाहि-समानेऽपि गरुत्मच्छाखामृगशावकयोरभ्यासे न समानं लङ्घनम्, उक्तं च-

"गरुत्मच्छाखामृगयोर्लङ्घनाभ्याससम्भवे।
समानेऽपि समानत्वं, लङ्घनस्य न विद्यते॥"

अपि च-पुरुषयोरपि द्वयोः समानप्रथमयौवनयोरपि समानेऽप्यभ्यासे एकः प्रभूतं लङ्घयितुं शक्नोति अपरस्तु स्तोकं, तस्माद्बलसापेक्षं लङ्घनं नाभ्यासमात्रहेतुकम्, अभ्यासस्तु केवलं देह-वैगुण्यमात्रमपनयति, तच्च बलं वीर्यान्तरायकर्मक्षयोपशमात्, क्षयोपशमश्च जातिभेदापेक्षी द्रव्यक्षेत्राद्यपेक्षी च, ततो यस्य यावद्बलं तस्य तावदेव लङ्घनमिति तन्न सकललोकविषयं, जीवस्तु शशाङ्क इव स्वरूपेण सकलजगत्प्रकाशनस्वभावः, केवलमावरणघनपटलतिरस्कृतप्रभावत्वात् न तथा प्रकाशते, उक्तं च-

"स्थितः शीतांशुवज्जीवः, प्रकृत्या भावशुद्धया।
चन्द्रिकावच्च विज्ञानं, तदावरणमभ्रवत्॥"

ततो यथा प्रचण्डनैर्ऋतपवनप्रहता घनपटलपरमाणवः शनैः शनैर्निःस्नेहीभूयापगच्छन्ति, तदपगमनानुसारेण च चन्द्रस्य प्रकाशो जगति वितनुते, तथा जीवस्यापि रागादिभ्यः चित्तं विनिवर्त्य कायावाक्चेष्टासु संयतस्य सम्यक्शास्त्रानुसारेण च यथावस्थितं वस्तु परिभावयतो ज्ञानादिभावनाप्रभावतो ज्ञानावरणीयादिकर्म्मपरमाणवः शनैः शनैर्निःस्नेहीभूयात्मनः प्रच्यवन्ते, कथमेतत्प्रत्येयमिति चेत्?, उच्यते, इहाज्ञानादिनिमित्तकं ज्ञानावरणीयादि कर्म्म, ततः तत्प्रतिपक्ष-ज्ञानाद्यासेवनेऽवश्यं तदात्मनः प्रच्यवते, उक्तं च-

"बंधइ जहेव कम्मं अन्नाणाईहिं कलुसियमणो उ।
तह चेव तव्विवक्खे सहावओ मुच्चइ जेणं॥"

ज्ञानावरणीयकर्म्मपरमाणुप्रच्यवनानुसारेण चात्मनः शनैः शनैर्ज्ञानमधिकमधिकतरमुल्लसति, यदा तु ज्ञानादिभावनाप्रकर्षवशेनाशेषज्ञानावरणीयादिकर्मपरमाण्वपगमः तदा सकलाभ्रपटल-विनिर्मुक्तशशाङ्क इव आत्मा लब्धयथावस्थितात्मस्वरूपः सकलस्यापि जगतोऽवभासकः, ततो ज्ञानस्य प्रकर्षः सकललोकविषयः, अथवा सर्वं वस्तु सामान्येन शास्त्रेऽपि प्रतिपाद्यते यथा पञ्चास्तिकायात्मको लोकः आकाशास्तिकायात्मकश्चालोकः, किञ्चिद्विशेषतश्च ऊर्ध्वाधि-स्तिर्यग्लोकाकाशानां सविस्तरं तत्राभिधानात्, शास्त्रानुसारेण च ज्ञानाभ्यासः ततः तरतमभावोऽपि ज्ञानस्य सकलवस्तुविषय एवेति प्रकर्षभावः तद्विषयो न विरुध्यते, लङ्घनं तु सामान्यतोऽपि न सकललोकविषयमिति कथमभ्यासतः, तत्प्रकर्षः सकललोकविषयो भवेत्?, स्यादेतद्-यद्यपि सामान्यतः शास्त्रानुसारेण सकलवस्तुविषयं ज्ञानमुपजायते तथाऽप्यभ्यासातः तत्प्रकर्षः सकलवस्तुगताशेषविशेषविषय इति कथं ज्ञायते?, न ह्यत्र किञ्चित् प्रमाणमस्ति, न चाप्रमाणकं वचो विपश्चितः प्रतिपद्यन्ते विपश्चित्ताक्षितिप्रसङ्गात्, तदसत्, अनुमानप्रमाणसद्भावात्, तच्चानुमानमिदं-जलधिजलपलप्रमाणादयो विशेषाः कस्यचित्प्रत्यक्षाः, ज्ञेयत्वात्, घटादिगत-रूपादिविशेषवत्, ज्ञेयत्वं हि ज्ञानविषयतया व्याप्तं, न च जलधिजलपलप्रमाणादिरूपेषु विशेषेषु

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रत्यक्षमन्तरेण शेषानुमानादिज्ञानसम्भवः, तथाहि-न ते विशेषा अनुमानप्रमाणगम्याः, लिङ्गाभावात्, नाप्यागमगम्याः, तस्य विधिप्रतिषेधमात्रविषयत्वात्, नाप्युपमानगम्याः, तस्य प्रत्यक्षपुरस्सरत्वाद्,

"न चागमेन यदसौ, विध्यादिप्रतिपादकः ।
अप्रत्यक्षत्वतो नैवोपमानस्यापि सम्भवः ॥"

नाप्यर्थापत्तिविषयाः, सा हि दृष्टः श्रुतो वाऽर्थो यदन्तरेण नोपपद्यते यथा काष्ठस्य भस्मविकारोऽग्नेर्दाहकशक्तिमन्तरेण तद्विषया वर्ण्यते, न च दृष्टाः श्रुतो वा कोऽप्यर्थः तान् विशेषानन्तरेण नोपपद्यते, ततो नार्थापात्तिगम्याः, न चैते विशेषाः, स्वरूपेण न सन्ति, विशेषान् विना सामान्यस्यैवासम्भवात्, न च वाच्यमत एव सामान्यस्यान्यथानुपपत्तेरर्थापत्तिगम्याः, नियतरूपतयाऽनवगमात्, प्रातिनैयत्यमेव च विशेषाणां स्वस्वरूपं, अन्यथा विशेषहानेः सामान्यरूपताप्रसङ्गात्, न च तेषां ज्ञेयत्वमेवासिद्धमिति वाच्यम्, अभावप्रमाणव्यभिचारप्रसङ्गात्, तथाहि-यदि केनापि प्रमाणेन न ज्ञायन्ते तर्हि-

"प्रमाणपञ्चकं यत्र, वस्तुरूपे न जायते ।
वस्त्वसत्तावबोधार्थं, तत्राभावप्रमाणता ॥"

इति वचनादभावप्रमाणविषयाः स्युः, अभावाख्यं च प्रमाणमभावसाधनमिष्यते, अथ च ते विशेषाः स्वरूपेणैवावतिष्ठन्ते, ततोऽभावप्रमाणव्यभिचारप्रसङ्गः, तस्माद्विपक्षव्यापकानुपलब्ध्या विशेषाणां ज्ञेयत्वं प्रत्यक्षविषयतया व्याप्यत इति प्रतिबन्धसिद्धिः, स्यादेतत्-ज्ञेयत्वादिति हेतुर्विशेषविरुद्धः, तथाहि-घटादिगता रूपादिविशेषा इन्द्रियप्रत्यक्षेण प्रत्यक्षा उपलब्धाः, ततः तज्ज्ञेयत्वमिन्द्रियप्रत्यक्षविषयतया प्रत्यक्षत्वेन व्याप्तं निश्चितं सत् जलधिजलपलप्रमाणादिष्वपि विशेषेषु प्रत्यक्षत्वमिन्द्रियप्रत्यक्षविषयतां साधयति, तच्चानिष्टमित्ति, तदयुक्तम्, विरुद्धलक्षणासम्भवात्, तथाहि-

विरुद्धो हेतुः सदा भवति यदा बाधकं नोपजायते 'विरुद्धोऽसति बाधके' इति वचनाद्, अत्र च बाधकं विद्यते, यदि हि इन्द्रियप्रत्यक्षविषयतया प्रत्यक्षत्वं भवेत् ततोऽस्मादृशामपि ते प्रत्यक्षा भवेयुः, न च भवन्ति, तस्मादस्मादृशैः प्रत्यक्षत्वेनासंवेदनमेव तेषामिन्द्रियप्रत्यक्षविषयत्वसाधने बाधकमिति न विशेषविरुद्धः, अन्यः प्राह-न विशेषविरुद्धता हेतोर्दूषणम्, अन्यथा सकलानुमानोच्छेदप्रसङ्गात्, तथाहि-यथा धूमोऽग्निं साधयति, अग्निप्रतिबद्धतया महानसे निश्चितत्वात्, तथा तस्मिन् साध्यधर्मिण्यग्न्यभावमपि साधयति, तेनापि सह महानसे प्रतिबन्धनिश्चयात्, तद्यथा-नात्रत्येनाग्निना अग्निमान् पर्वतो, धूमवत्त्वात्, महानसवत्, ततश्चैवं न कश्चिदपि हेतुः स्यात्, तस्मात् न विशेषविरुद्धता हेतोर्दोषः, आह च प्रज्ञाकरगुप्तोऽपि -

"यदि विशेषविरुद्धतया क्षितिर्ननु न हेतुरिहास्ति न दूषितः ।
निखिलहेतुपराक्रमरोधिनी, न हि न सा सकलेन विरुद्धता ॥"

यच्चोक्तम्-'अथवा अस्तु तदपि तथापि, सर्वमेतावदेव जगति वस्त्विति न निश्चय इत्यादि' तदप्यसारं, यतोऽवधिज्ञानं तदावरणकर्म्मदेशक्षयोत्थं ततोऽतीन्द्रियमपि तन्न सकलवस्तुविषयं, केवलज्ञानं तु निर्मूलसकलज्ञानावरणकर्मपरमाण्वपगमसमुत्थं ततः कथमिव तन्न सकलवस्तुविषयं भवेत्?, न ह्यतीन्द्रियस्य देशादिविप्रकर्षाः प्रतिबन्धकाः, न च केवलप्रादुर्भावे आवरण-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

देशस्यापि सम्भवः, ततो यद्वस्तु तत्सर्वं भगवतः प्रत्यक्षमेवेति भवति सर्वज्ञस्यैवमात्मनो निश्चयः- एतावदेव जगति वस्त्विति, यदप्युक्तम्-'अशुच्यादिरसास्वादप्रसङ्ग' इति, तदपि दुरन्तदीर्घ-पापोदयविजृम्भितम्, अज्ञानतो भगवत्यधिक्षेपकरणात्, यो हि यादृग्भूतोऽशुच्यादिरसो येषां च प्राणिनां यादृग्भूतां प्रीतिमुत्पादयति येषां च विद्विषं तत्सर्व्वं तदवस्थतया भगवान् वेत्ति, ततः कथमशुच्यादिरसास्वादप्रसङ्गः ?, अथ यदि तटस्थतया वेत्ति तर्हि न सम्यक्, सम्यक् चेत् यथास्वरूपं वेत्ता तर्हि नियमात् तदास्वादप्रसक्तिः, उक्तं च-

"तटस्थत्वेन वेद्यत्वे, तत्त्वेनाऽवेदनं भवेत्।
तदात्मना तु वेद्यत्वेऽशुच्यास्वादः प्रसज्यते॥"

तदसत्, भवान् हि सकर्म्मा करणाधीनज्ञानः ततो रसं यथावस्थितमवश्यं जिह्वेन्द्रिय-व्यापारपुरस्सरमास्वादत एव जानाति, भगवांस्तु करणव्यापारनिरपेक्षोऽतीन्द्रियज्ञानी ततो जिह्वे-न्द्रियव्यापारसम्पाद्यास्वादमन्तरेणैव रसं यथावस्थितं तटस्थतया सम्यग् वेत्तीति न कश्चिद्दोषः।

एतेन परागादिवेदने रागित्वादिप्रसङ्गापादनमप्यपास्तमवसेयं, परागादीनामपि यथावस्थित-तया तटस्थेन सत्तावेदनात्, यदप्युक्तं-'कालतोऽनादिरनन्तः संसार इत्यादि' तदप्यसम्यग्, युग-पत्सर्व्ववेदनाद्, न च युगपद् सर्ववेदनमसम्भवि, दृष्टत्वात्, तथाहि-सम्यग्जिनागमाभ्यासप्रवृत्त-स्य बहुशो विचारितधर्म्माधर्म्मास्तिकायादिस्वरूपस्य् सामान्यतः पञ्चास्तिकायविज्ञानं युगपदपि जायमानमुपलभ्यते, एवमशेषविशेषकलितपञ्चास्तिकायविज्ञानमपि भविष्यति, तथा चायम-र्थोऽन्यैरप्युक्तो-

"यथा सकलशास्त्रार्थः, स्वभ्यस्तः प्रतिभासते।
मनस्येकक्षणेनैव, तथाऽनन्तादिवेदनम्॥"

यदप्युच्यते-'कथमतीतंभावि वा वेत्ति ?, विनष्टानुत्पन्नत्वेन तयोरभावादि, ति, तदपि न सम्यक्, यतो यद्यपीदानिन्तनकालापेक्षया ते असती, तथापि यथाऽतीतमतीते कालेऽवर्तिष्ट यथा च भावी (वर्त्स्यति) वर्त्तिष्यते तथा ते साक्षात्करोति ततो न कश्चिद्दोषः, स्यादेतत्-यथा भवद्भिर्ज्ञानस्य तारतम्यदर्शनात्प्रकर्षसम्भवोऽनुमीयते तथा तीर्थान्तरीयैरपि, ततो यथा भवत्सम्मततीर्थकरोपदर्शिताः पदार्थराशयः सत्यतामश्नुवते तथा तीर्थान्तरीयसम्मत-तीर्थकरोपदर्शिता अपि सत्यतामश्नुवीरन्, विशेषाभावाद्, अन्यथा भवत्सम्मततीर्थकरोपदर्शिता अपि असत्यतामश्नुवीरन्, अथ तीर्थान्तरीयसम्मतीर्थकरोपदिष्टाः पदार्थराशयोऽनुमानप्रमाणेन बाध्यन्ते ततो न ते सत्याः, तदयुक्तम्, अनुमानप्रमाणेनातीन्द्रियज्ञानस्य बाधितुमशक्यत्वात्, -

"अतीन्द्रियानंसेवद्यान्, पश्यन्त्यार्षेण चक्षुषा।
ये भावान् वचनं तेषां, नानुमानेन बाध्यते॥"

अथ सम्भवति जगति प्रज्ञालवोन्मेषदुर्विदग्धाः कुतर्कशास्त्राभ्याससम्पर्कतो वाचालाः तथाविधाद्भुतेन्द्रजालकौशलवशेन दर्शितदेवागमनभोयानचामरादिविभूतयः कीर्त्तिपूजा-दिलब्धुकामाः स्वयमसर्वज्ञा अपि सर्वज्ञा वयमिति ब्रुवाणाः, तत एतावदेव न ज्ञायते यदुत-तेषां सर्वोत्तमप्रकर्षरूपमतीन्द्रियज्ञानमभूत्, यदि पुनर्यथोक्तस्वरूपमतीन्द्रियज्ञानमभविष्यत् तर्हि वचनमपि तेषां नाबाधिष्यत, अथ च दृश्यते बाधा ततस्ते कैतवभूमयो न सर्वज्ञा इति प्रतिपत्तव्यम्,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तदेतदर्हत्यपि समानं, न समानम्, अर्हद्वचसि प्रमासंवाददर्शनात्, उक्तं च-

"जैनेश्वरे हि वचसि, प्रमासंवाद इष्यते।
प्रमाणबाधा त्वन्येषामतो द्रष्टा जिनेश्वरः॥"

अथ पुरुषमात्रसमुत्थं प्रमाणमतीन्द्रियविषये न साधकं नापि बाधकमविषयत्वात्, समानकक्षतायां हि बाध्यबाधकभावः, तथा चोक्तम् -

"समानविषया यस्माद्बाध्यबाधकसंस्थितिः।
अतीन्द्रिये च संसारिप्रमाणं न प्रवर्त्तते॥"

ततः कथमुच्यते-अर्हतो वचसि प्रमासंवाददर्शन प्रमाणबाध्यत्वमन्येषामिति ?, तदपि न सम्यक्, यतो न भगवान् केवलमतीन्द्रियमस्मादृशामशक्यपरिच्छेदमेवोपदिशति, यदि पुनः तथाभूतमुपदिशेत् तर्हि न कोऽपि तद्वचनतः प्रवर्तेत, अतीन्द्रियार्थं वचः सर्वेषामेव विद्यते परस्परविरुद्धं च, ततः कथं तद्वचनतः प्रेक्षावतां प्रवृत्तिः ?, ततोऽवश्यं परान् प्रतिपादयता भगवता परैः शक्यपरिच्छेदमप्युपदेष्टव्यं शक्यपरिच्छेदेषु चार्थेषु भगवदुक्तेषु यत्तथाप्रमाणेन संवेदनं तत्तद्विषयं साधकं प्रमाणमुच्यते, विपरीतं त बाधकं, अस्ति त भगवदुक्तेषु शक्यपरिच्छेदेष्वर्थेषु प्रमासंवादः, तथाहि-घटादयः पदार्था अनेकान्तात्मका उक्ताः, ते च तथैव प्रत्यक्षतोऽनुमानतो वा निश्चीयन्ते, मोक्षोऽपि च परमानन्दरूपशाश्वतिकसौख्यात्मक उक्तः, ततः सोऽपि युक्त्या सङ्गतिमुपपद्यते, यतः संसारप्रतिपक्षभूतो मोक्षः संसारे जन्मजरामरणादिदुःखहेतवो रागादयः ते च निर्मूलमपगता मोक्षावस्थायामिति न मोक्षे दुःखलेशस्यापि सम्भवः, न च निर्मूलमपगता रागादयो भूयोऽपि जायन्ते, ततः तत्सौख्यं शाश्वतिकमुपवर्ण्यते, ननु यदि न तत्र रागादयस्तर्हि न तत्र मत्तकामिनीगाढालिङ्गनपीनस्तनापीडनवदनचुम्बनकराघातादिप्रभवं रागनिबन्धनं सुखं नापि द्वेषनिबन्धनं प्रबलवैरितिरस्कारापादनप्रभवं नापि मोहनिबन्धनमहङ्कारसमुत्थमात्मीयविनीतपुत्रभ्रातृप्रभृतिबन्धुवर्गसहवाससम्भवं च, ततः कथमिव स मोक्षो जन्मिनामुपादेयो भवति ?,

"वीतरागस्य न सुखं, योषिदालिङ्गनादिजम्।
वीतद्वेषम् च कुतः, शत्रुसेनाविमर्दजम् ?॥"
वीतमोहस्य न सुखमात्मीयाभिनिवेशजम्।
ततः किं तादृशा तेन, कृत्यं मोक्षेण जन्मिनाम् ?॥

अपि च-क्षुदादयोऽपि तत्र सर्वथा निवृत्ता इष्यन्ते, ततोऽत्यन्तबुभुक्षाक्षामकुक्षेर्यद् विशिष्टाहारभोजनेन यद्वा ग्रीष्मादौ पिपासापीडितस्य पाटलाकुसुमादिवासितसुगन्धिशीतसलिलपानेनोपजायते सुखं तदपि तत्र दूरतोऽपास्तप्रसरमिति न कार्यं तेन, तदेतदतीवासमीचीनं, यतो यद्यपि रागादयः, प्रथमतः क्षणमात्रसुखदायितया रमणीयाः प्रतिभासन्ते तथापि ते परिणामपरम्परयाऽनन्तदुःखसहनरकादिदुःखसम्पातहेतवः, ततः पर्यन्तदारुणतया विषान्नभोजनसमुत्थमिव न रागादिप्रभवं सुखमुपादेयं प्रेक्षावतां भवति, प्रेक्षावन्तो हि बहुदुःखमपहाय यदेव बहुसुखं तदेव प्रतिपद्यन्ते, यस्तु स्तोकसुखनिमित्तं बहुदुःखमाद्रियते स प्रेक्षावानेव न भवति, किन्तु कुबुद्धिः, रागादिप्रभवमपि च सुखमुक्तनीत्या बहुदुःखहेतुकम्, अपवर्गसुखं चैकान्तिकात्यन्तिकपरमानन्दरूपं, ततः तदेव तत्त्ववेदिनामुपादेय, न रागादिप्रभवमिति, यदि पुनर्यदपि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तदपि सुखमभिलषणीयं भवतः तर्हि पानशौण्डानां यत् मद्यपानप्रभवं यच्च गर्त्ताशूकराणां पुरीष-भक्षणसमुत्थं यच्च रक्षसां मानुषमांसाभ्यवहारसम्भवं यच्च दासस्य सतः स्वामिप्रसादादिहेतुकं यदपि च पारसीकदेशवासिनो मात्रादिश्रोणीसङ्गमनिबन्धनं तत्सर्वं भवतो द्विजातिभवे सति न सम्पद्यते इति पानशौण्डाद्यप्यभिलषणीयम्, अपि च-नरकदुःखमप्राप्तस्य न तद्वियोगसम्भवं सुखमुपजायते ततो नरकदुःखमप्यभिलपणीयं, अथ विशिष्टमेव सुखमभिलषणीयं न यत्किञ्चित् तर्हि विशिष्टमेकान्तेन सुखं मोक्ष एव विद्यते न रागादौ क्षुदादौ वा तस्मात्तदेवाभिलषणीयं न शेषमिति।

योऽपि च सम्यग्दर्शनज्ञानचारित्ररूपो मोक्षमार्ग उक्तः सोऽपि युक्त्या विचार्यमाणः प्रेक्षावतामुपादेयतामश्नुते, तथाहि-सकलमपि कर्मजालं मिथ्यात्वाज्ञानप्राणिहिंसादिहेतुकं ततः सकलकर्म्मनिर्म्मूलनाय सम्यग्दर्शनाद्यभ्यास एव घटते, नान्यत्, तदेवं भगवदुपदिष्टेषु शक्य-परिच्छेदेष्वनुमेयेषु च यथाक्रमं प्रत्यक्षानुमान संवाददर्शनात् मोक्षादिषु च युक्त्योप-पद्यमानत्वाद्भगवानेव सर्वज्ञो न सुगतादिरिति स्थितम्।

तथा 'भद्रं जिनस्य वीरस्य' जयति रागादिशत्रुगणमिति जिनः, औणादिको नक्प्रत्ययः, तस्य भद्रं भवतु, अनेनापायातिशयमाह, अपायो-विश्लेषः तस्यातिशयः-प्रकर्षभावोऽपा-यातिशयो, रागादिभिः सहात्यन्तिको वियोग इत्यर्थः, ननु रागादिभिः सहात्यन्तिको वियोगोऽस-म्भवी, प्रमाणबाधनात्, तच्च प्रमाणमिदं-यदनादिमत् न तद्विनाशमाविशति, यथाऽऽकाशं अनादिमन्तश्च रागादय इति, किञ्च-रागादयो धर्माः, ते च धर्मिणो भिन्ना अभिन्ना वा ?, यदि भिन्नाः तर्हि सर्वेषामविशेषेण वीतरागत्वप्रसङ्गः, रागादिभ्यो भिन्नत्वाद, विवक्षितपुरुषवत्, अथा-भिन्नाः तर्हि तत्क्षये धर्मिणोऽप्यात्मनः क्षयः, तदभिन्नत्वात्, तत्स्वरूपवत्, तथा च कुतस्तस्य वीतरागत्वं ?, तस्यैवाभावादिति, अत्रोच्यते, इह यद्यपि रागादयो दोषा जन्तोरनादिमन्तः तथापि कस्यचित् स्त्रीशरीरादिषु यथावस्थितवस्तुतत्त्वावगमेन तेषां रागादीना प्रतिपक्षभावनातः प्रतिक्षणमपचयो दृश्यते, ततः सम्भाव्यते विशिष्टकालदिसामग्रीसद्भावे भावनाप्रकर्षविशेषभावतो निर्मूलमपि क्षयः, अथ यद्यपि प्रतिपक्षभावनातः दृष्टस्तथापि तेषामात्यन्तिकोऽपि क्षयः सम्भवती-ति कथमवसेयम् ?, उच्यते, अन्यत्र तथाविधप्रतिबन्धग्रहणात्, तथाहि-

शीतस्पर्शसम्पाद्या रोमहर्षादयः शीतप्रतिपक्षस्य वह्नेर्मन्दतायां मन्दाऽउपलब्धाः उत्कर्षे च निरन्वयविनाशधर्माणः, ततोऽन्यत्रापि बाधकस्य मन्दतायां बाध्यस्य मनदतादर्शनाद् बाधको-त्कर्षेऽवश्यं बाध्यस्य निरन्वयविनाशो वेदितव्यः, अन्यथा बाधकमन्दतायां मन्दताऽपि न स्यात्, अथास्ति ज्ञानस्य ज्ञानावरणीयं कर्म बाधकं, ज्ञानावरणीयकर्ममन्दातायां च ज्ञानस्यापि मनाक् मन्दता, अथ च प्रबलज्ञानावरणीयकर्मोदयोत्कर्षेऽपि न ज्ञानस्य निरन्वयो विनाशः, एवं प्रतिपक्षभावनोत्कर्षेऽपि न रागादीनामत्यन्ततयोच्छेदो भविष्यतीति, तदयुक्तम्, द्विविधं हि बाध्यं-सहभूस्वभावभूतं सहकारिसम्पाद्यस्वभावभूतं च, तत्र यत्सहभूस्वभावभूतं तन्न कदाचिदपि निर-न्वयं विनाशमाविशति, ज्ञानं चात्मनः सहभूखभावभूतम्, आत्मा च परिणामिनित्यः ततोऽत्यन्त-प्रकर्षवत्यपि ज्ञानावरणीयकर्म्मोदये न निरन्वयविनाशो ज्ञानस्य, रागादयस्तु लोभादिककर्म-



Jain Education International For Private & Personal Use Only www.jainelibrary.org

विपाकोदयसम्पादितासत्ताका:,

ततः कर्मणो निर्मूलापगमे तेऽपि निर्मूलमपगच्छन्ति, नन्वासतां कर्मसम्पाद्या रागादयः तथापि कर्मनिवृत्तौ ते निवर्त्तन्ते इति नावश्यं नियमो, न हि दहननिवृत्तौ तत्कृता काष्ठेऽङ्गारता निवर्त्तते, तदसत्, यत इह किञ्चित् कचिन्निवर्त्त्यं विकारामापादयति, यथाऽग्निः सुवर्णे द्रवतां, तथाहि-अग्निनिवृत्तौ तत्कृता सुवर्णे द्रवता निवर्त्तते, किञ्चित्पुनः कचिदनिवर्त्त्यविकारारम्भकं, यथा स एवाग्निः काष्ठे, न खलु श्यामतामात्रमपि काष्ठे दहनकृतं तन्निवृत्तौ निवर्त्तते, कर्म चात्मनि निवर्त्त्यविकारारम्भकं, यदि पुनरनिवर्त्त्यविकारारम्भकं भवेत्तर्हि यदपि तदपि कर्म्मणा कृतं न कर्मनिवृत्तौ निवर्त्तेत, यथाऽग्निना श्यामतामात्रमपि काष्ठकृतमग्निनिवृत्तौ, ततश्च यदेकदा कर्म्मणाऽऽपादितं मनुष्यत्वममरत्वं कृमिकीटत्वं अज्ञत्वं शिरोवेदनादि तत्सर्व्वकालं तथैवावतिष्ठेत, न चैतद्दृश्यते, तस्मान्निवर्त्त्यविकारारम्भकं कर्म्म, ततः कर्म्मनिवृत्तौ रागादीनामपि निवृत्तिः।

अत्राहु-बार्हस्पत्या-नैते रागादयो लोभादिकर्म्मविपाकोदयनिबन्धनाः, किन्तु कफादिप्रकृतिहेतुकाः तथाहि-कफहेतुको रागः पित्तहेतुको द्वेषो वातहेतुकश्च मोहः, कफादयश्च सदैव संनिहिताः, शरीरस्य तदात्मकत्वात्, ततो न वीतरागत्वसम्भवः, तदयुक्तम्, रागादीनां कफादिहेतुकत्वायोगात्, तथाहि-स तद्धेतुको यो यं न व्यभिचरति, यथा धूमोऽग्निम्, अन्यथा प्रतिनियतकार्यकारणभावव्यवस्थानुपपत्तेः, न च रागादयः कफादीन् न व्यभिचरन्ति, व्यभिचार-दर्शनात्, तथाहि-वातप्रकृतेरपि दृश्यते रागद्वेषौ कफप्रकृतेरपि द्वेषमोहौ पित्तप्रकृतेरपि मोहरागौ, ततः कथं रागादयः कफादिहेतुकाः?, अथ मन्येथाः-एकैकापि प्रकृतिः सर्वेषामपि दोषाणां पृथक् पृथग्जनिका तेनायमदोष इति, तदयुक्तम्, एवं सति सर्वेषामपि जन्तूनां समरागादि-दोषप्रसक्तेः, अवश्यं हि प्राणिनामेकतमया कयाचित्प्रकृत्या भवितव्यम्, सा चाविशेषेण रागदिदोषाणामुत्पादिकेति सर्वेषामपि समानारागदितापसक्तिः, अथास्ति प्रतिप्राणी पृथक् पृथगवान्तरः कफादीनां परिणतिविशेषः तेन न सर्व्वेषां समरागादितापसङ्गः, तदपि न साधीयो, विकल्पयुगलानतिक्रमात्, तथाहि-

सोऽप्यवान्तरः कफादीनां परिणतिविशेषः सर्वेषामपि रागादीनामुत्पादक आहोस्विदेकत-मस्यैव कस्यचित्त?, तत्र यद्याद्यः पक्षस्तर्हि यावत् स परिणतिविशेषस्तावदेककालं सर्वेषामपि रागादीनामुत्पादप्रसङ्गः, न चैककालमुत्पद्यमाना रागादयः संवेद्यन्ते, क्रमेण तेषां संवेदनात्, न खलु रागाध्यवसायकाले द्वेषाध्यवसायो मोहाध्यवसायो वा संवेद्यते, अथ द्वितीयपक्षः तत्रापि यावत् स कफादि परिणतिविशेषः तावदेक एव कश्चिद्दोषः प्राप्नोति, अथ च तदवस्थ एव कफादिपरिणतिविशेषे सर्वेऽपि दोषाः क्रमेण परावृत्त्य परावृत्त्योपजायमाना उपलभ्यन्ते, अथादृश्यमान एव केवलकार्यविशेषदर्शनोन्नीयमानसत्ताकः तदा तदा तत्तद्रागादिदोषहेतुः कफादिपरिणतिविशेषो जायते तेन न पूर्वोक्तदोषावकाशः, ननु यदि स परिणतिविशेषः सर्वथाऽननुभूयमानस्वरूपोऽपि परिकल्प्यते तर्हि कर्म्मैव किं नाभ्युपगम्यते?, एवं हि लोकशास्त्र-मार्गोऽप्याराधितो भवति, अपि च-स कफादिपरिणतिविशेषः कुतः तदा तदाऽन्योऽन्यरूपेणो-पजायते इति वक्तव्यम्?, देहादिति चेत् ननु तदवस्थेऽपि देहे भवद्भिः, कार्यविशेषदर्शनतः तस्यान्यथाऽन्यथा भवनमिष्यते, तत्कथं तदं देहनिमित्तं, न हि यदविशेषेऽपि यद्विक्रियते स

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विकारः तद्धेतुक इति वक्तुं शक्यम्, नाप्यन्यो हेतुरुपलभ्यते, तस्मात्तदप्यन्थान्यथाभवनं कर्म्म-हेतुकमेष्टव्यम्, तथा च सति कर्म्मैवैकमभ्युपगम्यतां किमन्तर्गड्डुना तद्धेतुतया कफादिपरिणति-विशेषाभ्युपगमेन ?।

किञ्च-अभ्यासजनितप्रसराः प्रायो रागादयः, तथाहि यथा यथा रागादयः सेव्यन्ते तथा तथाऽभिवृद्धिरेव तेषामुपजायते, न प्रहाणिः, तेन समानेऽपि कफादिपरिणतिविशेषे तदवस्थेऽपि च देहे यस्येह जन्मनि परत्र वा यस्मिन् दोषेऽभ्यासः स तस्य प्राचुर्येण प्रवर्त्तते, शेषस्तु मन्दतया, ततोऽभ्याससम्पाद्यकर्मोपचयहेतुका एव रागादयो न कफादिहेतुका इति प्रतिपत्तव्यम्। अन्यच्च-यदि कफहेतुको रागः स्यात् ततः कफवृद्धौ रागवृद्धिर्भवेत्, पित्तप्रकर्षे तापप्रकर्षवत्, न च भवति तदुत्कर्पोत्थपीडाबाधिततया द्वेषस्यैव दर्शनात्, अथ पक्षान्तरकगृह्णीथा यदुत न कफहेतुको रागः किन्तु कफादिदोषसाम्यहेतुकः, तथाहि-कफादिदोषसाम्ये विरुद्धव्याध्यभावतो रागोद्भवो दृश्यते इति, तदपि न समीचीनं, व्यभिचारदर्शनात्, न हि यावत् कफादिदोषसाम्यं तावत् सर्वदैव रागोद्भवोऽनुभूयते, द्वेषाद्युद्भवस्याप्यनुभवात्, न च यद्भावेऽपि यन्न भवति तत्तद्धेतुकं सचेतसा वक्तु शक्यम्।

अपि च-एवमभ्युपगमे ये विषमदोषास्ते रागिणो न प्राप्नुवन्ति, अथ च तेऽपि रागिणो दृश्यन्ते। स्यादेतद्-अलं चसूर्या, तत्त्वं निर्वच्मि-शुक्रोपचयहेतुको रागा नान्यहेतुक इति तदपि न युक्तम्, एवं ह्यत्यन्तस्त्रीसेवापरतया शुक्रक्षयतः क्षरत्क्षतजानां रागिता न स्याद्, अथ चैतेऽपि तस्यामप्यवस्थायां निकामं रागिणो दृश्यन्ते, किञ्च-यदि शुक्रस्य रागहेतुता तर्हि तस्य सर्वस्त्रीषु साधारणत्वान्नैकस्त्रीनियतो रागः कस्यापि भवेत्, दृश्यते च कस्याप्येकस्त्रीनियतो रागः, अथोच्येत-रूपस्यापि कारणत्वाद्रूपातिशयलुब्धः तस्यामेव रूपवत्यामभिरज्यते, न योषिदन्तरे,-

"रूपातिशयपाशेन, विवशीकृतमानसाः।
स्वां योषितं परित्यज्य, रमन्ते योषिदन्तरे॥"

तदपि न मनोरमं, रूपरहितायामपि क्वापि रागदर्शनात्, अथ तत्रोपचारविशेषः समीचीनो भविष्यति तेन तत्राभिरज्यते, उपचाराऽपि च रागहेतुर्न रूपमेव केवलं तेनायमदोष इति, तदपि व्यभिचारे, द्वयेनापि विमुक्तायां कचिद्रागदर्शनात्, तस्मादभ्यासजनितोपचयपरिपाकं कर्म्मैव विचित्रस्वभावतया तदा तदा तत्तत्कारणापेक्षं तत्र तत्र रागादिहेतुरिति कर्महेतुका रागादयः।

एतेन यदपि कश्चिदाह-पृथिव्यादिभूतानां धर्म्मा एते रागादयः, तथाहि-पृथिव्यम्बुभूयस्त्वे रागः तेजोवायुभूयस्त्वे द्वेषो जलवायुभूयस्त्वे मोह इति, तदपि निराकृतमवसेयं, व्यभिचारात्, तथाहि-यस्यामेवावस्थायां रागः सम्मतः तस्यामेवावस्थायां द्वेषो मोहोऽपि च दृश्यते, तत एतदपि यत्किञ्चित्, तस्मात् कर्म्महेतुका रागादयस्तत्कर्मनिवृत्तौ निवर्त्तन्ते, प्रयोगश्चात्र-ये सहकारिसम्पाद्या यदुपधानादपकर्षिणः ते तदत्यन्तवृद्धौ निरन्वयविनाशधर्माणो, यथा रोमहर्षादयो वह्निवृद्धौ, भावनोपधानादपकर्षिणश्च सहकारिसम्पाद्या रागादय इति, अत्र सहकारिसम्पाद्या इति विशेषणं सहभूस्वभावबोधादिव्यवच्छेदार्थं, यदपि च प्रागुपन्यस्तं प्रमाणं-यदनादिमत् न तद्विनाशमाविशति यथाऽऽकाशमिति, तदप्यप्रमाणं, हेतोरनैकान्तिकत्वात्, प्रागभावेन व्यभिचारात्, तथाहि-प्रागभा-वोऽनादिमानपि विनाशमाविशति, अन्यथा कार्यानुत्पत्तेः, भावनाधिकारी च सम्यग्दर्शनादि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रत्नत्रयसम्पत्समन्वितो वेदितव्यः, इतरस्य तदनुष्ठानप्रवृत्त्यभावेन तस्य मिथ्यारूपत्वात्, आह च- "नाणी नवंमि निरओ चारित्ती भावणाए जोगोत्ति" सा च रागादिदोषनिदानस्वरूपविषय-फलगोचरा यथाऽऽगममेवमवसेया-

"जं कुच्छियानुयोगो पयइविसुद्धस्स होइ जीवस्स।
एएसि मो नियाणं बुहाण न य सुंदरं एयं ॥१॥
रूवंपि संकिलेसोऽभिस्संगो पीइमाइलिङ्गो उ।
परमसुहपच्चणीओ एयंपि असोहणं चेव ॥२॥"
विसओ य भंगुरो खलु गुणरहिओ तह य तहतहारूवो।
संपत्ति निप्फलो केवलं तु मूलं अनत्थाणं ॥३॥
जम्मजरामरणाईविचित्तरूवो फलं तु संसारो।
बुहजननिव्वेयकरो एसोऽसि तहाविहो चेव ॥४॥

अपि च सूत्रानुसारेण ज्ञानादिषु यो नैरन्तर्येणाभ्यासः तद्रूपाऽपि भावना वेदितव्या, तस्यापि रागादिप्रतिपक्षभूतत्वात्, न हि तत्त्ववृत्त्या सम्यग्ज्ञानाद्यभ्यासे व्यापृतमनस्कस्य स्त्रीशरीर-रामणीयकादिविषय चेतः प्रवृत्तिमातनोति, तथाऽनुपलम्भात्।

शौद्धौदनीयाः पुनरेवमाहुः-नैरात्म्यादिभावना रागादिक्लेशप्रहाणिहेतुः, नैरात्म्यादिभावनायाः सकलरागादिविपक्षभूतत्वात्, तथाहि-नैरात्म्यावगतौ नात्माभिनिवेशः, आत्मनोऽवगमाभावाद्, आत्माभिनिवेशाभावाच्च न पुत्रभ्रातृकलत्रादिष्वात्मीयाभिनिवेशः, आत्मनो हि य उपकारी स आत्मीयो, यश्च प्रतिघातकः स द्वेष्यः, यदा त्वात्मैव न विद्यते किन्तु पूर्वापरक्षणत्रुटितानुसन्धानाः पूर्वपूर्वहेतुप्रतिबद्धा ज्ञानक्षणा एव तथा तथोत्पद्यते तदा कः कस्योपकर्त्ता उपघातको वा ?, ज्ञानक्षणाना च क्षणमात्रावस्थायितया परमार्थत उपकर्तुमपकर्तुं वा अशक्यत्वात्, तत्र तत्त्ववेदिनः पुत्रादिष्वात्मीयाभिनिवेशो नापि वैरिषु द्वेषो, यस्तु लोकानामात्मात्मीयाद्यभिनिवेशः सोऽना-दिवासनापरिपाकोपनीतो वेदितव्यः, अतत्त्वमूलत्वात्, ननु यदि न परमार्थतः कश्चिदुपकार्योप-कारकभावः तर्हि कथमुच्यते-भगवान् सुगतः करुणया सकलसत्त्वोपकाराय देशनां कृतवानिति, क्षणिकत्वमपि च यद्येकान्तेन तर्हि तत्त्ववेदी क्षणानन्तरं विनष्टः सन् न कदाचनाप्येवं भूयो भविष्या-मीति जानानः किमर्थं मोक्षाय यत्नमारभते ?, तदयुक्तम्, अभिप्रायापरिज्ञानात्, भगवान् हि प्राचीनायामवस्थायामवस्थितः सकलमपि जगद् रागद्वेषादिदुःखसंकुलमभिजानानः कथमिदं सकलमपि जगत् मया दुःखादुद्धर्त्तव्यमिति समुत्पन्नकृपाविशेषो नैरात्म्यक्षणिकत्वादिकम-वगच्छन्नपि तेषामुपकार्यसत्त्वानां निःक्लेशक्षणोत्पादनाय प्रजाहितो राजेव स्वसन्ततिशुद्धै सकल-जगत्साक्षात्करणसमर्थः स्वसन्ततिगतविशिष्यक्षणोत्पत्तये यत्नमारभते, सकलजगत्साक्षात्कार-मन्तरेण सर्वेषामक्षूणविधानमुपकर्त्तुमशक्यत्वात्, ततः समुत्पन्नकेवलज्ञानः पूर्वाहितकृपाविशेष-संस्कारवशात् कृतार्थोऽपि देशनायां प्रवर्त्तते इति,

तदेवं श्रुतमप्यात्मप्रज्ञया निर्दोषं नैरात्म्यादि वस्तुतत्त्वं परिभाव्य भावतः तथैव भावयतो जन्तोर्भावनाप्रकर्षविशेषतो वैराग्यमुपजायते, ततो मुक्तिलाभः यस्त्वात्मानमभिमन्यते न तस्य मुक्तिसम्भवो, यत आत्मनि परमार्थतया विद्यमाने तत्र स्नेहः प्रवर्त्तते, तत्स्नेहवशाच्च तत्सुखेषु

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परिविर्पवान् भवति, तृष्णावशाच्च सुखसाधनेषु दोषान् सतोऽपि तिरस्कुरुते, गुणांस्त्वभूतानपि पश्यति, ततो गुणदर्शी सन् तानि ममत्वविषयीकरोति, तस्माद्यवदात्माभिनिवेशः तावत् संसारः,

"यः पश्यत्यात्मानं तत्रास्याहमिति शाश्वतः स्नेहः।
स्नेहात् सुखेषु तृष्यति तृष्णा दोषांस्तिरस्कुरुते॥१॥"
गुणदर्शी परितृष्यन् ममेति तत्साधनान्युपादत्ते।
तेनात्माभिनिवेशो यावत् तावत्स संसारे॥२॥"

तदेतत् सर्वमन्तःकरणकृतावासमहामोहमहीयस्ताविलसितम्, आत्माभावे बन्धमोक्षाद्येकाधिकरणत्वायोगात्, तथाहि–यदि नात्माभ्युपगम्यते किन्तु पूर्वापरक्षणत्रुटितानुसन्धाना ज्ञानक्षणा एव, तथा सत्यन्यस्य बन्धोऽन्यस्य मुक्तिः अन्यस्य क्षुद् अन्यस्य तृप्तिरन्योऽनुभविता अन्यः स्मर्त्ता अन्यश्चिकित्सादुःखमनुभवति अन्यो व्याधिरहितो जायते अन्यस्तपःपरिक्लेशमधिसहते अपरः स्वर्गसुखमनुभवति अपरः शास्त्रमभ्यसितुमारभते अन्योऽधिगतशास्त्रार्थो भवति, न चैतद्युक्तम्, अतिप्रसङ्गात्, सन्तानापेक्षया बन्धमोक्षादेरेकाधिकरण्यमिति चेत्, न, सन्तानस्यापि भवन्मतेनानुपपद्यमानत्वात्, सन्तानो हि सन्तानिभ्यो भिन्नो वा स्यादभिन्नो वा?, यदि भिन्नः तर्हि पुनरपि विकल्पयुगलमुपढौकते, स किं नित्यः क्षणिको वा?, यदि नित्यस्ततो न तस्य बन्धमोक्षादिसम्भवः, आकालमेकस्वभावतया तस्यावस्थावैचित्र्यानुपपत्तेः, न च नित्यं किमप्यभ्युपगम्यते, 'सर्वं क्षणिक'मिति वचनात्, अथ क्षणिकः तर्हि तदेव प्राचीनं बन्धमोक्षादिवैयधिकरण्यं प्रसक्तम्, अथाभिन्न इति पक्षस्तर्हि सन्तानिन एव न सन्तानाः, तदभिन्नत्वात्, तत्स्वरूपवत्, तथा च सति तदवस्थमेव प्राक्तनं दूषणमिति।

स्यादेतत्–न कश्चिदन्यः क्षणेभ्यः सन्तानः, किन्तु य एव कार्यकारणभावप्रबन्धेन क्षणानां भावः स एव सन्तानः, ततो न कश्चिद्दोषः, तदप्ययुक्तम्, भवन्मते कार्यकारणभावस्याप्यघटमानत्वात्, तथाहि–प्रतीत्य समुत्पादमात्रं कार्यकारणभावः, ततो यथा विवक्षितघटक्षणानन्तरं घटक्षणः तथा पटादिक्षणोऽपि, यथा च घटक्षणात् प्रागनन्तरो विवक्षितो घटक्षणः तथा पटादिक्षणा अपि, ततः कथं प्रतिनियतकार्यकारणभावावगमः?, किञ्च–

कारणादुपजायमानं कार्यं सतो वा जायेत असतो वा?, यदि सतः तर्हि कार्योत्पत्तिकालेऽपि कारणं सदिति कार्यकारणयोः समकालताप्रसङ्गः, न च समकालयोः कार्यकारणभाव इष्यते, मात्रपत्याद्यविशेषाद्, घटपटादीनामपि परस्परं कार्यकारणभावप्रसङ्गः, अथासत इति पक्षः, तदप्ययुक्तम्, असतः कार्योत्पादायोगाद्, अन्यथा खरविषाणादपि तदुत्पत्तिप्रसक्तेः, न चात्यन्ताभावप्रध्वंसाभावयोः कोऽपि विशेषः, उभयत्रापि वस्तुसत्त्वाभावात्, प्रध्वंसाभावे वस्त्वासीत् तेन हेतुरिति चेत् यदाऽऽसीत् तदा न हेतुः अन्यदा च हेतुरिति साध्वी तत्त्वव्यवस्थितिः, अन्यच्च–तद्भावे भाव इत्यवगमे कार्यकारणभावावगमः, स च तद्भावे भावः किं प्रत्यक्षेण प्रतीयते उतानुमानेन?, न तावत्प्रत्यक्षेण, पूर्ववस्तुगतेन हि प्रत्यक्षेण पूर्वं वस्तु परिच्छिन्नमुत्तरवस्तुगतेन तूत्तरं, न चैते परस्परस्वरूपमवगच्छतो, नाप्यन्योऽनुसन्धाता कश्चिदेकोऽभ्युपगम्यते, तत एतदनन्तरमेतस्य भाव इति कथमवगमः?, नाप्यनुमानेन, तस्य प्रत्यक्षपूर्वकत्वात्, तद्धि लिङ्गलिङ्गिसम्बन्धग्रहणपूर्वकं प्रवर्त्तते, लिङ्गलिङ्गिसम्बन्धश्च प्रत्यक्षेण ग्राह्यो नानुमानेन, अनुमानेन

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ग्रहणेऽनवस्थाप्रसक्तेः, न च कार्यकारणभावविषये प्रत्यक्षं प्रावर्त्तिष्ट, ततः कथं तत्रानुमानप्रवृत्तिः ?, एवं ज्ञानक्षणयोरपि परस्परं कार्यकारणभावावगमः प्रत्यस्तो वेदितव्यः, तत्रापि स्वेन स्वेन संवेदनेन स्वस्य स्वस्य रूपस्य ग्रहणे परस्परस्वरूपानवधारणादेतदनन्तरमहमुत्पन्नमेतस्य चाहं जनकमित्यनवगतेः, तन्न भवन्मतेन कार्यकारणभावो, नापि तदवगमः, ततो याचितकमण्डनमेतद्-एकसन्ततिपतितत्वादेकाधिकरणं बन्धमोक्षादिकमिति।

एतेन यदुच्यते-उपादेयोपादानक्षणानां परस्परं वास्यवासकभावादुत्तरोत्तरविशिष्टविशिष्टतरक्षणोत्पत्तेः मुक्तिसम्भव इति, तदपि प्रतिक्षिप्तमवसेयम्, उपादानोपादेयभावस्यैवोक्तनीत्याऽनुपपद्यमानत्वात्, योऽपि च वास्यवासकभाव उक्तः सोऽपि युगपद्भाविनामेवोपलभ्यते, यथा तिलकुसुमानां, उक्तं चान्यैरपि-"अवस्थिता हि वास्यन्ते, भावा भावैरवस्थितैः" तत् कथमुपादेयोपादानक्षणयोर्वास्यवासकभावः ?, परस्परमसाहित्यात्, उक्तं च-

"वास्यवासकयोश्चैवमसाहित्यान्न वासना।
पूर्वक्षणैरनुत्पन्नो, वास्यते नोत्तरः क्षणः॥"

उत्तरेण विनष्टत्वान्न च पूर्वस्य वासना॥" अपि च-वासना वासकाद्भिन्ना वा स्यादभिन्ना वा ?, यदि भिन्ना तर्हि तया शून्यत्वात् नैवान्यं वासयति, वस्त्वन्तरवद्, अथाभिन्ना तर्हि न वास्ये वासनायाः सङ्क्रान्तिः, तदभिन्नत्वात्, तत्स्वरूपवत्, संक्रान्तिश्चेत्तर्हि अन्वयप्रसङ्ग इति यत्किञ्चिदेतत् । यदप्युक्तं-सकलमपि जगद्रागद्वेषादिदुःखसंकुलमभिजानानाः कथमिदं सकलमपि जगत् मया दुःखादुद्धर्तव्यमित्यादि, तदपि पूर्वापरासम्बद्धबन्धकीभाषितमिव केवलधाष्टर्यसूचकं, यतो भवन्मतेन क्षणा एव पूर्वापरक्षणत्रुटितानुगमाः परमार्थसन्तः, क्षणानां चावस्थानकालमानमेकपरमाणुव्यतिक्रममात्रम्, अत एवोत्पत्तिव्यतिरेकेण नान्या तेषां क्रिया सङ्गतिमुपपद्यते, 'भूतिर्येषां क्रिया सैव, कारकं सैव चोच्यते' इतिवचनात्, ततो ज्ञानक्षणानुमुत्पत्त्यनन्तरं न मनागप्यवस्थानं, नापि पूर्वापरक्षणाभ्यामनुगमः, तस्मान्न तेषां परस्परस्वरूपावधारणं, नाप्युत्पत्त्यनन्तरं कोऽपि व्यापारः, ततः कथमर्थोऽयं मे पुरः साक्षात्प्रतिभासते इत्येवमर्थनिश्चयमात्रमप्यनेकक्षणसम्भवि अनुस्यूतमुपपद्यते ?, तदभावाच्च कुतः सकलजगतो रागद्वेषादिदुःखसंकुलतया परिभावनं ?, कुतो वा दीर्घतरकालानुसन्धानेन शास्त्रार्थचिन्तनं ?, यत्प्रभावतः सम्यगुपायमभिज्ञाय कृपाविशेषात् मोक्षाय घटनं भवेदिति।

ननु सर्वोऽयं व्यवहारो ज्ञानक्षणसन्तत्यपेक्षया, नैकक्षणमधिकृत्य, तत्केयमनुपपत्तिरुद्भाव्यते ?, उच्यते, सुकुमारप्रज्ञो देवानांप्रिय, सदैव सप्तघटिकामध्यमिष्टान्नभोजनमनोज्ञशयनीयशयनाभ्यासेन सुखैधितो न वस्तुयाथात्म्यावगमे चित्तपरिक्लेशमधिसहते, तेनास्माभिरुक्तमपि न सम्यगवधारयसि, ननु ज्ञानक्षणसन्ततावपि तदवस्थैवानुपपत्तिः, तथाहि-वैकल्पिका अवैकल्पिका वा ज्ञानक्षणाः परस्परमनुगमाभावादविदितपरस्परस्वरूपाः, न च क्षणादूर्द्धमवतिष्ठन्ते, ततः कथमेष पूर्वापरानुसन्धानरूपो दीर्घकालिकः सकलजगद्दुःखितापरिभावनशास्त्रविमर्शादिरूपो व्यवहार उपपद्यते ?, अक्षिणी निमील्य परिभाव्यतामेतत्, यदप्युच्यते स्वग्रन्थेषु-निर्विकल्पकमर्थाकारमुत्पन्नं पूर्वदर्शनाहितवासनाप्रबोधात्तं विकल्पं जनयति येन पूर्वापरानुसन्धानात्मकोऽर्थनिश्चयादिव्यवहारः प्रवर्त्तते, तदप्येतेनापाकृतमवसेयं, यतो विकल्पोऽप्यने-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कक्षणात्मकः, ततो विकल्पेऽपि यत्पूर्वक्षणे वृत्तं तदपरक्षणो न वेत्ति, यच्चापरक्षणे वृत्तं न तत्पूर्वक्षणः, ततः कथमेष दीर्घकालिकोऽनुस्यूतैकरूपतया प्रतीयमानोऽर्थनिश्चयादिव्यवहारो घटते ?,

अपि च-भवन्मतेन ज्ञानस्यार्थपरिच्छेदव्यवस्थाऽपि नोपपद्यते, अर्थाभावे ज्ञानस्योत्पादाद् अर्थकार्यतया तस्याभ्युपगमात्, 'नाकारणं विषय' इति वचनात्, न च वाच्यं तत उत्पन्नमिति तस्य परिच्छेदकम्, इन्द्रियस्याप्यर्थवत्परिच्छेदप्रसक्तेः, ततोऽप्युत्पादात्, तदभावेऽभावात्, नापि सारूप्यात्, तस्यापि सर्वदेशविकल्पाभ्यामयोगात्, तथाहि-न सर्वात्मनाऽर्थेन सह सारूप्यं, सर्वात्मनाऽर्थेन सह सारूप्ये ज्ञानस्य जडरूपताप्रसक्तेः, अन्यथा सर्वात्मना सारूप्यायोगात्, नाप्येकदेशेन, सर्वस्य सर्वार्थपरिच्छेदकत्वप्रसङ्गात्, सर्वस्यापि ज्ञानस्य सर्वैरपि वस्तुभिः सह केनचिदंशेनान्ततः प्रमेयत्वादिना सारूप्यसम्भवात्, आह च भवदाचार्योऽपि धर्म्मकीर्त्ति-र्ज्ञाननयप्रस्थाने-

"सर्वात्मना हि सारूप्ये, ज्ञानमज्ञानतां व्रजेत्।
साम्ये केनचिदंशेन, सर्वं सर्वस्य वेदनम्॥"

न च सारूप्यादर्थपरिच्छेदव्यवस्थितावर्थसाक्षात्कारो भवति, परमार्थतोऽर्थस्य परोक्षत्वात्, ततो योऽयं प्रतिप्राणि प्रसिद्धः सकलैरपीन्द्रियैर्यथायोगमर्थसाक्षात्कारो यच्च गुरूपदेशश्रवणं शास्त्रनिरीक्षणं वा यद्वशात्तत्त्वं ज्ञात्वा मोक्षाय प्रवृत्तिः तत्सर्वमेकान्तिकक्षणिकपक्षाभ्युपगमे विरुध्यते, स्यादेतत्-परमार्थत एतदेव, तथाहि- न ज्ञानं कस्यचित् परिच्छेदकम्, उक्तनीत्या ग्राहकत्वायोगात्, नापि तत् कस्यचित्परिच्छेद्यं, तत्रापि ग्राह्यग्राहकत्वायोगात्, ततो ग्राह्यग्राहकाकारातिरिक्तं ज्ञानमेव केवलं स्वसंविदितरूपत्वात् स्वयं प्रकाशते, तेनाद्वैतमेव तत्त्वं, यस्तु तथार्थ-निश्चयादिको व्यवहारः सोऽनादिकालसंलीनवासनापरिपाकसम्पादितो द्रष्टव्यः, तदप्ययुक्तम्, वासनाया अपि विचार्यमाणाया अघटमानत्वात्, तथाहि-

सा वासना असती सती वा ?, न तावदसती, असतः खरविषाणस्येव सकलोपाख्याविकलतया तथा तथाऽर्थप्रतिभासहेतुत्वायोगाद्, अथ सती तर्हि सा ज्ञानाद् व्यत्यरैक्षीत् न वा ?, व्यत्यरैक्षी-च्चेदद्वैतहानिः, द्वयस्याभ्युपगमाद्, अपि च-सा ज्ञानाद् व्यतिरिक्ता सती एकरूपा वा स्यादनेक-रूपा वा ?, न तावदेकरूपा एकरूपत्वे तस्या नीलपीताद्यनेकप्रतिभासहेतुत्वायोगात्, स्वभावभेदेन विना भिन्नभिन्नार्थक्रियाकरणविरोधात्, अथानेका तर्हि नामान्तरेणार्थ एव प्रतिपन्नः, तथाहि-सा वासना ज्ञानाद् व्यतिरिक्ता अनेकरूपा च, अर्थोऽप्येवंरूप एवेति, अथाव्यतिरिक्ता साऽपि च पूर्वविज्ञानजनिता विशिष्टज्ञानान्तरोत्पादनसमर्था शक्तिः, आह च प्रज्ञाकरगुप्तः-"वासनेति हि पूर्वविज्ञानजनितां शक्तिमामनन्ति वासनास्वरूपविदः" एवं तर्हि पूर्वपूर्वविज्ञानजनिताः कालभेदेन तत्तद्विशिष्टविशिष्टतरज्ञानोत्पादनसमर्थाः शक्तयोऽनेकाः प्रबन्धेनानुवर्तमानाः तिष्ठन्ति, तत एकस्मिन्नपि ज्ञानक्षणेऽनेका वासनाः सन्ति, शक्तीनामेव वासनात्वेनाभ्युपगमात्, तासां च ज्ञानक्षणादव्यतिरेकादेकस्याः प्रबोधे सर्वासामपि प्रबोधः प्राप्नोति, अन्यथाऽव्यतिरेकायोगात्, ततो युगपदनन्तविज्ञानानामुदयप्रसङ्गः, स चायुक्तः, प्रत्यक्षबाधितत्वात्।

अन्यच्च-ज्ञाने विनश्यति तदव्यतिरेकात्ता अपि निरन्वयमेव विनष्टाः, ततः कथं तत्सामर्थ्या-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्कालभेदेन तत्तद्विशिष्टविशिष्टतरज्ञानान्तरप्रसूतिः ?, स्यादेतत्-पूर्वमेव विज्ञानं पाटवाधिष्ठितं, वासना तज्जनिता शक्तिः, उक्तदोषप्रसङ्गात्, तच्च पूर्वं विज्ञानं किञ्चिदनन्तरं तथा तथा विशिष्टं ज्ञानं जनयति, किञ्चित् कालान्तरे, यथा जाग्रद्दशाभाविज्ञानं स्वप्नज्ञानं, न च व्यवहितादुत्पत्तिर-सम्भाव्या, दृष्टत्वात्, तथाहि-अनुभवाच्चिरकालातीतादपि स्मृतिरुदयमासादयन्ती दृश्यते, तदप्ययुक्तम्, तत्राप्युक्तदोषानतिक्रमात्, यद्धि पूर्वविज्ञानं निरन्वयमेव विनष्टं न तस्य कोऽपि धर्म्मः क्षणान्तरेऽनुगच्छति, ततः कथं ततोऽनन्तरं कालान्तरे वा विशिष्टं ज्ञानमुदयते ? एवं हि तन्निर्हेतुकमेव परमार्थतो भवेत्, अथ पूर्वं विज्ञानं प्रतीत्य तदुत्पद्यते तत्कथं तन्निर्हेतुकं ?, क्रीडन-शीलो देवानांप्रियो यदेव भेवास्मान् पुनः पुनरायासयति, ननु यदा यत्पूर्वं विज्ञानं न तदा तद्विशिष्टं ज्ञानमुपजायते यदा च तदुपजायते न तदा पूर्वविज्ञानस्य लेशोऽपि तत्कथं तत्र निर्हेतुकम् ?, यदप्युक्तम्- 'किञ्चित्कालान्तरे' इति, तदपि न्यायबाह्यं, चिरविनष्टस्य कार्यकरणायोगाद्, अन्यथा चिरविनष्टेऽपि शिखिनि केकायितं भवेत्, ननु चिरविनष्टादप्यनुभवात् स्मृतिरुदयमासादयन्ती दृश्यते, न च दृष्टेऽनुपपन्नता, तद्वत् ज्ञानान्तरमपि भविष्यति को दोषः ?, उच्यते, दृश्यते चिरविन-ष्टादप्यनुभवात् स्मृतिः, केवलं साऽपि भवन्मतेन नोपपद्यते, तत्राप्युक्तदोषप्रसङ्गात्, ततोऽयमपरो भवतो दोषः, न च दृष्टमित्येव यथाकथञ्चित्परिकल्पनामभिसहते, किन्तु प्रमाणोपपन्नं, तत्र यथा भवत्परिकल्पना तथा न किमप्युपपद्यते, ततोऽवश्यमन्वयि ज्ञानमभ्युपगन्तव्यम्, तथा च सति न कश्चिद्दोषः, सर्वस्यापि स्मृत्यादेरुपपद्यमानत्वात्, तथाहि-

अनुभवेन पटीयसाऽविच्युतिरूपधारणासहितेनात्मनि वासनाऽपरपर्यायः संस्कार आधीयते, स च यावदवतिष्ठते तावत्तादृशार्थदर्शनादाभोगतो वा स्मृतिरुदयते, संस्काराभावे तु न, ततोऽन्व-यिज्ञानाभ्युपगमे परमार्थतोऽनुबन्धातुरेकस्याभ्युपगमात्कार्यकारणभावावगमो निखिल-जगदुःखितापरिभावनं शास्त्रपौर्वापर्यालोचनेन मोक्षोपायसमीचीनताविवेचनमित्यादि सर्वमुप-पद्यते, तत्र नैरात्म्यादिभावना रागादिक्लेशप्रहाणिहेतुः, तस्या मिथ्यारूपत्वात्।

यदपि च उक्तम्-आत्मनि परमार्थतया विद्यमाने तत्र स्नेहः प्रवर्त्तत इति' तत्रार्वाचीनावस्थाया-मेतदिष्यत एव, अन्यथा मोक्षायापि प्रवृत्त्यनुपपत्तेः, तथाहि-यत एवात्मनि स्नेहः तत एव प्रेक्षाव-तामात्मनो दुःखपरिजिहीर्षया सुखमुपादातुं यत्नः, तत्र संसारे सर्वत्रापि दुःखमेव केवलं, तथाहि-नरकगतौ कुन्ताग्रभेदकरपत्रशिरःपाटनशूलारोपकुम्भिपाकसिपत्रवनकृतकर्णनासिकादिच्छेदं कदम्बवालुकापथगमनादिरूपमनेकप्रकारं दुःखमेव निरन्तरं, नाक्षिनिमीलनमात्रमपि तत्र सुखं, तिर्यग्गतावपि अंकुशकशाभिधातप्राजनकतोदनवधबन्धरोगक्षुत्पिपासादिप्रभवमनेकं दुःखं, मनुष्यगतावपि परप्रेषगुप्तिगृहप्रवेशधनबन्धुवियोगानिष्टसम्प्रयोगरोगादिजनितं विविधमेनकं दुःखं, देवगतावपि च परगतविशिष्टद्युतिविभवदर्शनात्, मात्सर्यमात्मनि तद्विहीने विषादः च्युति-समये चातिरमणीयविमानवनवापीस्तूपदेवाङ्गनावियोगजमनिष्टजन्मसन्तापं वाऽवेक्षमाणस्य तप्तायोभाजननिक्षिप्तशफरादप्यधिकतरं दुःखं, यदपि च-

मनुष्यगतौ देवगतौ वा किमप्यापातरमणीयं कियत्कालभावि विषयोपभोगसुखं तदपि विषसम्मिश्रभोजनसुखमिव पर्यन्तदारुणत्वादतीव विदुषामनुपादेयम्, तत्र संसृतौ क्वापि विदुषा-मास्थोपनिबन्धो युक्तः यत्तु निःश्रेयसपदमधिरूढस्य सुखं तत्परमानन्दरूपमपर्यवसानं च, तच्च

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रायो युक्तिलेशेन प्रागेवोपदर्शितम्, आगमतो वाऽनुसर्त्तव्यम्, आगमप्रमाणबलाद्धि सकलमपि परलोकादिस्वरूपं यथावदवगम्यते, नान्यतः, तेन यदुच्यते प्रज्ञाकरगुप्तेन-'दीर्घकालसुखादृष्टा-विच्छा तत्र कथं भवेदि'ति, तदपास्तमवसेयम्, आगमतो दीर्घकालसुखमय दर्शनात्, न चागमस्य न प्रामाण्यं, तदप्रामाण्ये सकलपरलोकानुष्ठानप्रवृत्त्यनुपपत्तेः, उपायान्तराभावात्, तत आगमबला-दुक्तस्वरूपमोक्षसुखमवेत्य तत्रागमे सर्वात्मना निषण्णामानसः संसाराद्विरक्तो यद्यत्संसारहेतुः तत्तत्परिजिहीर्षुररक्तद्विष्टः सर्वकर्मनिर्मूलनाय प्रकर्षेण यतते, तस्य चैवं प्रयतमानस्य कालक्रमेण विशिष्टकालादिसामग्रीसम्प्राप्तौ प्रतनुभूतकर्मणः सकलमोहविकारप्रादुर्भावविनिवृत्तेरणि-माद्यैश्वर्यलब्धावपि नौत्सुक्यमुपजायते,

अत एव च तस्य मोक्षेऽपि न स्पृहाऽभिष्वङ्गापरपर्याया, तस्या अपि मोहविकारत्वात्, केवलं सा संसाराद्विरक्तिहेतुः स्वयमपि च परम्परानिरनुबन्धिनीत्यर्वाचीनावस्थायां प्रशस्यते, ननु यदि मोक्षेऽपि न स्पृहा कथं तर्हि तदर्थं प्रवृत्त्युपपत्तिः ?, न, लोकेऽपि स्पृहाव्यतिरेकेणापि तत्तत्कार्यकरणाय प्रवृत्तिदर्शनात्, तथाहि-दृश्यन्ते केचित् गम्भीराशया अभिष्वङ्गात्मिकां स्पृहामन्तरेणापि यथाकालं भोजनाद्यनुतिष्ठन्तः, तथाविधौत्सुक्यलाम्पट्यद्यदर्शनाद्, अपि च-यथा न मोक्षे स्पृहा तथा न संसारेऽपि, संसारादत्यन्तं विरक्तत्वात्, ततः सकलमपि संसारहेतुं परित्यजन्तः कथमिव संसारपरिक्षये मोक्षस्पृहाव्यतिरेकेणापि न मुक्तिभाजः ?, तदेवं सर्वत्र स्पृहारहितस्य सूत्रोक्तनीत्या ज्ञानादिषु यतमानस्य भावनाप्रकर्षे सत्यशेषारागादिकर्म्मपरिक्षयतो भवति मुक्तिः, एतेन यदुक्तम्-तत्स्नेहवशाच्च तत्सुखेषु परितर्षवान् भवती'त्यादि तदपि निर्विषयमवगन्तव्यम्, उक्तनीत्या तत्त्ववेदिनः परितर्षाद्यभावादिति स्थितं। साङ्ख्याः पुनराहुः-प्रकृतिपुरुषान्तरपरिज्ञानान्मुक्तिः, तथाहि-

"शुद्धचैतन्यरूपोऽयं, पुरुषः परमार्थतः ।
प्रकृत्यन्तरमज्ञात्वा, मोहात्संसारमाश्रितः ॥"

ततः प्रकृते सुखादिस्वभावाया यावत् न विवेकेन ग्रहणं तावन्न मुक्तिः, केवलज्ञानोदये तु मुक्तिः, तदप्यसद्, आत्मा ह्येकान्तनित्यः, सुखादयस्तूत्पादव्ययधर्म्माणः, ततो विरुद्ध-धर्म्मसंसर्गादात्मनः प्रकृतेर्भेदः प्रतीत एव, किं न मुक्तिः ?, अथैतदेव संसारी न पर्यालोचयति ततो न मुक्तिः, यद्येवं तर्हि सर्वदाऽप्यमुक्तिरेव, प्राप्तविवेकाध्यवसायस्यासम्भवात्, तथाहि-यावत्संसारी तावन्न विवेकपरिभावनं, अथ च विवेकपरिभावने संसारित्वव्यपगमः, ततो विवेका-ध्यवसायासम्भवात् न कदाचिदपि संसाराद्विप्रमुक्तिः, अपि च-सृष्टेरपि प्रागात्मा केवल इष्यते, ततस्तस्य कथं संसारः ?, कथं वा मुक्तस्य सतो न भूयोऽपि ?, अथ सृष्टेः, प्रागात्मनो दिदृक्षा ततो दिदृक्षावशात्प्रधानेन सहैकतामात्मनि पश्यतः संसारः, मुक्तिस्तु प्रकृतेर्दुष्टतामवधार्य प्रकृते-र्विरागतो भवति, ततो न पुनः प्रकृतिविषया दिदृक्षेति न भूयः संसारः, तदप्ययुक्तम्, स्वकृतान्त-विरोधात्, तथाहि-दिदृक्षा नाम द्रष्टुमभिलाषः, स च पूर्वदृष्टेष्वर्थेषु तथास्मरणतो भवति, न च प्रकृतिः पूर्वं कदाचनापि दृष्टा, तत्कथं तद्विषयौ स्मरणाभिलाषौ ?, अपि च-स्मरणाभिलाषौ प्रकृतिविकारत्वात् प्रकृतेर्भाविनौ, स्मरणाभिलाषाभ्यां च प्रकृत्यनुगम इत्यन्योऽन्याश्रयः,

"अभिलाषस्मरणयोः, प्रकृतेरेव वृत्तितः ।

अभिलाषाच्च तद्वृत्तिरित्यन्योऽन्यसमाश्रयः ॥"

अथानादिवासनावशात्प्रकृतिविषयौ स्मरणाभिलाषौ, तदप्यसत्, वासनाया अपि प्रकृति-विकारतया प्रकृतेः पूर्वमभावात्, अथात्मस्वभावरूपा सा वासना तर्हि तस्याः कदाचनाप्यात्मन इवोपरमासम्भवात्सर्वदाऽप्यमुक्तिरेवेति यत्किञ्चिदेतत्। यदप्युक्तम्-

'रागादयो धर्माः, ते च किं धर्म्मिणो भिन्ना अभिन्ना वा इत्यादि,' तदप्ययुक्तं, भेदाभेदपक्षस्य जात्यन्तरस्याभ्युपगमात्, केवलभेदाभेदपक्षे धर्मधर्मिभावस्यानुपपद्यामानत्वात्, तथाहि-धर्मधर्मिणोरेकान्तेन भेदेऽभ्युपगम्यमाने धर्मिणो निःस्वभावतापत्तिः, स्वभावस्य धर्म्मत्वात्तस्य च ततोऽन्यत्वात्, स्वो भावः स्वभावः-तस्यैवात्मीया सत्ता, न तु तदर्थान्तरं धर्म्मरूपं, ततो न निःस्वभावतापत्तिरिति चेत्, न, इत्थं स्वरूपसत्ताऽभ्युपगमे तदपरसत्तासामान्ययोगकल्पनाया वैयर्थ्यप्रसङ्गात्, अपि च-यद्येकान्तेन धर्म्मधर्मिणोर्भेदः ततो धर्म्मिणो ज्ञेयत्वादिभिः धर्म्मैरननुवेधात् तस्य सर्वथाऽनवगमप्रसङ्गो, न ह्यज्ञेयस्वभावं ज्ञातुं शक्यत इति, तथा च सति तदभावप्रसङ्गः, कदाचिदप्यवगमाभावात्, तथापि तत्सत्त्वाभ्युपगमेऽतिप्रसङ्गः, अन्यस्यापि यस्य कस्यचित् कदाचिदप्यनवगतस्य षष्ठभूतादेर्भावापत्तेः, एवं च धर्म्यभावे धर्माणामपि ज्ञेयत्वप्रमेयत्वादीनां निराश्रयत्वादभावापत्तिः, न हि धर्म्याधाररहिताः क्वापि धर्म्माः सम्भवन्ति, तथाऽनुपलब्धेः,

अन्यच्च-परस्परमपि तेषां धर्म्माणामेकान्तेन भेदाभ्युपगमे सत्त्वाद्यननुवेधात् कथं भावा-भ्युपगमः ?, तदन्यसत्त्वादिधर्म्माभ्युपगमे च धर्म्मित्वप्रसक्तिरनवस्था च, तन्नैकान्तभेदपक्षे धर्मिधर्मभावः, नाप्येकान्ताभेदपक्षे, यतस्तस्मिन्नभ्युपगम्यमाने धर्म्ममात्रं वा स्याद्धर्म्मिमात्रं वा, अन्यथैकान्ताभेदानुपपत्तेः, अन्यतराभावे चान्यतरस्याप्यभावः, परस्परनान्तरीयकत्वाद्, धर्म्मनान्तरीयको हि धर्म्मी, धर्म्मिनान्तरीयकाश्च धर्म्माः, ततः कथमेकाभावेऽपरस्यावस्थान-मिति ?, कल्पितो धर्म्मधर्म्मिभावः ततो न दूषणमिति चेत् तर्हि वस्त्वभावप्रसङ्गः, न हि धर्म्म-धर्म्मिस्वभावरहितं किञ्चिद्वस्त्वस्ति, धर्म्मधर्म्मिभावश्च कल्पित इति तदभावप्रसङ्गः, धर्म्मा एव कल्पिता न धर्म्मी तत्कथमभावप्रसङ्ग इति चेत्, न, धर्म्माणां कल्पनामात्रत्वाभ्युपगमेन परमार्थतोऽसत्त्वाभ्युपगमात्, तदभावे च धर्म्मिणोऽप्यभावापत्तेः, अथ तदेवैकं स्वलक्षणं सकल-सजातीयविजातीयव्यावृत्त्येकस्वभावं, धर्म्मिव्यावृत्तिनिबन्धनाश्च या व्यावृत्तयो भिन्ना इव कल्पितास्ता धर्म्माः, ततो न कश्चिन्नो दोषः, तदप्ययुक्तम्, एवं कल्पनायां वस्तुतोऽनैकान्ता-त्मकताप्रसक्तेः, अन्यथा सकलसजातीयविजातीयव्यावृत्त्ययोगात्, न हि येनैव स्वभावेन घटाद् व्यावर्त्तते पटः तेनैव स्तम्भादपि, स्तम्भस्य घटरूपताप्रसक्तेः, तथाहि-घटाद् व्यावर्तते पटो घटव्यावृत्तिस्वभावतया स्तम्भादपि घटव्यावृत्तिस्वभावतयैव व्यावर्त्तते तर्हि बलात् स्तम्भस्य घटरूपताप्रसक्तिः, अन्यथा तत्स्वभावतया व्यावृत्त्ययोगात्, तस्माद्यतो यतो व्यावर्त्तते तत्तद्व्या-वृत्तिनिमित्तभूताः स्वभावा अवश्यमभ्युपगन्तव्याः, ते च नैकान्तेन धर्म्मिणोऽभिन्नाः, तदभाव-प्रसङ्गात्, तथा च तदवस्थ एव पूर्वोक्तो दोषः तस्माद् भिन्नाभिन्नाः, भेदाभेदोऽपि धर्म्मधर्म्मिणोः कथमिति चेत्, उच्यते, इह यद्यपि तादात्म्यतो धर्म्मिणां धर्म्माः सर्वेऽपि लोलीभावेन व्याप्ताः तथाऽप्ययं धर्म्मी एते धर्म्मा इति परस्परं भेदोऽप्यस्ति, अन्यथा तद्भावानुपपत्तिः, तथा च सति प्रतीतिबाधा, मिथो भेदेऽपि च विशिष्टान्योऽन्यानुवेधेन सर्वधर्म्माणां धर्म्मिणा व्याप्तत्वादभेदोऽप्य-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्ति, अन्यथा तस्य धर्म्मा इति सञ्ज्ञानुपपत्तेः, ततश्च न सर्वेषां वीतरागत्वप्रसङ्गः, केवलभेदस्यानभ्युपगमात्, नापि दोषक्षयवदात्मनोऽपि क्षयः, केवलाभेदस्यानभ्युपगमादिति सर्वं सुस्थम्।

ननु येनैव क्रमेण भगवतोऽतिशयलाभः तेनैव क्रमेण तदभिधानं युक्तिमत् नान्यथा भगवतश्च प्रथमतोऽपायागमातिशयस्य लाभः पश्चात् ज्ञानातिशयस्य तत्किमर्थं व्युत्क्रमनिर्देशः?, उच्यते, फलप्रधानाः समारम्भा इति ज्ञापनार्थं। तथा 'भद्रं' कल्याणं भवतु, सुरैः-शुक्रादिभिः असुरैः-चमरादिभिर्नमस्कृतस्य, अनेन पूजातिशयमाह, न हि विभवानुरूपां भगवतः पूजामकृत्वा सुरासुरा नमस्कृतिक्रियायां प्रवृत्तिमातेनुः, तथाकल्पत्वात्, पूजां च ते कृतवन्तोऽष्टमहाप्रातिहार्यलक्षणां, तानि च महाप्रातिहार्याण्यमूनि-

"अशोकवृक्षः सुरपुष्पवृष्टिर्दिव्यो ध्वनिश्चामरमासनं च।
भामण्डलं दुन्दुभिरातपात्रं, सत्प्रातिहार्याणि जिनेश्वराणाम्॥"

पूजातिशयश्चान्यथानुपपत्त्या वागतिशयमाक्षिपति, न हि वागतिशयमन्तरेण तथा पूजातिशयो भवति, सामान्यकेवलिनामदर्शनात्, तदेवं ज्ञानातिशयादयश्चत्वारो मूलातिशया उक्ताः, एते च देहसौगन्ध्यादीनामतिशयानामुपलक्षणम्, एतेषु सत्सु तेषामवश्यं भावात्।

तथा 'भद्रं' कल्याणं भवतु 'धूतरजसः' धूतं-कम्पितं स्फोटितं रजो-बध्यमानं कर्म्म येन स धूतरजाः तस्य, अनेन सकलसांसारिकक्लेशविनिर्मुक्तावस्थामाह, यतो बध्यमानकं कर्म रजो भण्यते, बध्यमानकर्माभावश्चायोगिसिद्धावस्थां गतस्य, नार्वाचीनावस्थायां, यत उक्तं सूत्रे-

"जाव नं एस जीवे एयइ वेयइ चलइ फंदइ घट्टइ खुब्भइ उदीरइ तं तं (भावं) परिमणइ ताव नं अट्ठविहबंधए वा सत्तविहबंधए वा छव्विहबंधए वा एगविहबंधए वा, नो चेव नं अबंधए सिआ" तत्र मिथ्यादृष्ट्यादयो मिश्रवर्ज्जिता अप्रमत्तान्ता आयुर्बन्धकालेऽष्टानामपि कर्म्मणां बन्धकाः, शेषकाले त्वायुर्वर्जानां सप्तानां, एतेषामेव सप्तकर्मणां मिश्रापूर्वकरणानिवृत्तिबादरा अपि बन्धकाः, सूक्ष्मसम्पराया मोहायुर्वर्जानां षण्णां कर्मणाम्, उपशान्तमोहक्षीणमोहसयोगिकेवलिनः सातवेदनीयस्यैवैकस्य, तच्च सातवेदनीयं तेषां द्विसामयिकं, तृतीयसमयेऽवस्थानाभावात्, शैलेशीप्रतिपत्तेरारभ्य पुनर्योगाभावादबन्धकाः उक्तं च-

"सत्तविहबंधगा होंति पानिनो आउवज्जगाणं तु।
तह सुहुमसंपराया छविहबंधा विणिद्दिट्ठा॥१॥"
मोहाउयवज्जाणं पयडीणं ते उ बंधगा भणिया।
उवसंतखीणमोहा केवलिनो एगविहबंधा॥२॥
तं पुन दुसमयठिइयस्स बंधगा न उन संपरायस्स।
सेलेसीपडिवन्ना अबंधगा होंति विन्नेया॥३॥

अथ भगवान् संसारातीतत्वात् सदैव परमकल्याणरूपः तत्किमेवमुच्यते तस्य भद्रं भवतु?, न च स्तोत्रा भणितं सर्वमेव तथा भवति, अन्यत्र तथाऽदर्शनात्, अत्रोच्यते, सत्यमेतत्, तथाप्येवमभिधानं कर्तृश्रोतॄणांकुशलमनोवाकायप्रवृत्तिकारणमतो न दोषः।

तदेव वर्त्तमानतीर्थाधिपतित्वेनासन्नोपकारित्वाद्वर्द्धमानस्वामिनो नमस्कारमभिधाय सम्प्रति तीर्थकरानन्तरं सङ्घः पूज्य इति परिभावयन् सङ्घस्य नगररूपकेण स्तवमाह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (४) *गुणभवणगहण सुयरयणभरिय दंसणविसुद्धरत्थागा।*
*संघनगर! भद्दं ते अखंडचारित्तपागारा॥*

वृ. गुणा इह उत्तरगुणा गृह्यन्ते, मूलगुणानामग्रे चारित्रशब्देन गृह्यमाणत्वात्, ते चोत्तरगुणाः पिण्डविशुद्धादयो, यत उक्तम्-

"पिंडस्स जा विसोही समिईओ भावना तवो दुविहो।
पडिमा अभिग्गाहाविं य उत्तरगुण मो वियाणाहि॥"

त एव भवनानि तैर्गहनं-गुपिलं प्रचुरत्वादुत्तरगुणानां निरुपमसुखहेतुत्वाद्रत्नानि श्रुतरत्नानि तैर्भृतं-पूरितं तस्यामन्त्रणं हे श्रुतरत्नभृत! तथा 'दर्शनविशुद्धरथ्याक'! इह दर्शनं-प्रशमसंवेग-निर्वेदानुकम्पास्तिक्यलिङ्गगम्यमात्मपरिणामरूपं सम्यग्दर्शनमिति गृह्यते, तच्च क्षायिकादिभेदात् त्रिधा, तद्यथा-क्षायिकं क्षायोपशमिकमौपशमिकं च, उक्तं च-

"सम्मत्तंपि य तिविहं खओवसमियं तहोवसमियं च। खइयं चे"ति, तत्र त्रिविधस्यापि दर्शनमोहनीयस्यक्षयेण-निर्मूलमपगमेन निर्वृत्तं क्षायिकं, उदयावलिकाप्रविष्टस्यांशस्य क्षयेण शेषस्य तूपशमेन निर्वृत्तं क्षायोपशमिकं, उदयावलिकाप्रविष्टस्यांशस्य क्षये सति शेषस्य भस्मच्छन्नाग्नेरिवानुद्रेकावस्था उपशमः तेन निर्वृत्तमौपशमिकम्, आह-औपशमिकक्षायोप-शमिकयोः कः प्रतिविशेषः?, उच्यते, क्षायोपशमिके तदावारकस्य कर्म्मणः प्रदेशतोऽनुभवोऽस्थि न त्वौपशमिके इति। दर्शनमेवासारमिथ्यात्वादिकचवररहिता विशुद्धरथ्या यस्य तत्तथा, तस्या-मन्त्रणं हे दर्शनविशुद्धरथ्याक! 'सेर्ल्लोपः सम्बोधने ह्रस्वो वे'ति प्राकृतलक्षणसूत्रे वाशब्दस्य लक्ष्यानुसारेण दीर्घत्वसूचना(र्थत्वा)त् दीर्घनिर्देशो, यथा गोयमा इत्यत्र, सङ्घः-चातुर्वर्ण्णः श्रमणा-दिसङ्घातः स नगरमिव सङ्घनगरं 'व्याघ्रादिभिर्गौणैस्तदनुक्ता'विति समासो, यथा पुरुषो व्याघ्र इव पुरुषव्याघ्रः, तस्यामन्त्रणं हे सङ्घनगर! 'भद्रं' कल्याणं 'ते' तव भवतु अखण्डचारित्रप्रकार! चारित्रं-मूलगुणाः अखण्डम्-अविराधितं चारित्रमेव प्राकारो यस्य तत्तथा 'मांसादिषु चेति' प्राकृतलक्षणात् चारित्रशब्दस्यादौ ह्रस्वः तस्यामन्त्रणं हे अखण्डचारित्रप्राकार! दीर्घत्वं प्रागिव॥

भूयोऽपि सङ्घस्यैव संसारोच्छेदकारित्वाच्चक्ररूपकेण स्तवमाह-

मू. (५) *संजमतवतुंबारयस्स नमो सम्मत्तपारियल्लस्स।*
*अप्पडिचक्कस्स जओ होउ सया संघचक्कस्स॥*

वृ. संयमः-सप्तदश प्रकारः यदुक्तम्-

"पञ्चाश्रवाद्विरमणं पञ्चेन्द्रियनिग्रहः कषायजयः।
दण्डत्रयविरतिश्चेति संयमः सप्तदशभेदः॥१॥"

तपो द्विधा-बाह्यमाभ्यन्तरं च, तत्र बाह्यं षड्विधं, यदुक्तम्-

"अनशनमूनोदरता वृत्तेः संक्षेपणं रसत्यागः।
कायक्लेशः संलीनतेति बाह्यं तपः प्रोक्तम्॥१॥"

आभ्यन्तरमपि षोढा, यत उक्तम्-

"प्रायश्चित्तध्याने वैयावृत्त्यविनयावथोत्सर्गः।
स्वाध्याय इति तपः षट्प्रकारमाभ्यन्तरं भवति॥२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संयमश्च तपांसि च संयमतपांसि तुम्बं च अराश्च-अरकाः तुम्बाराः संयमतपांस्येव यथासंख्यं तुम्बारा यस्य तत्तथा तस्मै संयमतपस्तुम्बाराय नमः, सूत्रे षष्ठी प्राकृतलक्षणाच्चतुर्थ्यर्थे वेदितव्या, उक्तं च-'छट्ठिविहत्तीए भन्नइ चउत्थी,' तथा 'सम्मत्तपारियल्लस्स' सम्यक्त्वमेव पारियल्लं-बाह्यपृष्ठस्य बाह्या भ्रमिर्यस्य तत्तथा तस्मै नमः, गाथार्द्धं व्याख्यातं, तथा न विद्यते प्रति-अनुरूपं समानं चक्रं यस्य तदप्रतिचक्रं, चरकादिचक्रैरसमानमित्यर्थः, तस्य जयो भवतु 'सदा' सर्वकालं, सङ्घश्चक्रमिव सङ्घचक्रं तस्य।

सम्प्रति सङ्घस्यैव मार्गगामितया रथरूपकेण स्तवमभिधित्सुराह-

*मू. (६)* *भद्दं सीलपडागूसियस्स तवनियमतुरयजुत्तस्स।*
*संघरहस्स भगवओ सज्झायसुनंदिघोसस्स॥*

वृ. 'भद्रं' कल्याणं सङ्घरथस्य भगवतो भवत्विति योगः, किंविशिष्टस्य सतः इत्याह-'शीलोच्छ्रितपताकस्य' शीलमेव-अष्टादशशीलाङ्गसहस्ररूपमुच्छ्रिता पताका यस्य स तथा, भार्योढादेराकृतिगणतया तन्मध्यपाठाभ्युपगमादुच्छ्रितशब्दस्य परनिपातः, प्राकृतशैल्या वा, न हि प्राकृते विशेषणपूर्वापरनिपातनियमोऽस्ति, यथाकथञ्चित्पूर्वर्षिप्रणीतेषु वाक्येषु विशेषणनिपातदर्शनात्, 'तपोनियमतुरङ्गयुक्तस्य' तपःसंयमाश्वयुक्तस्य,

तथा स्वाध्यायः-पञ्चविधः, तद्यथा-वाचना प्रच्छना परावर्त्तना अनुप्रेक्षा धर्मकथा च, स्वाध्याय एव सन्-शोभनो नन्दिघोषो-द्वादशविधतूर्यनिनादो यस्य स तथा तस्य, 'सज्झायसुनेमिधोसस्से'ति क्वचित्पाठः, तत्र स्वाध्याय एव शोभनो नेमिघोषो यस्येति द्रष्टव्यम्, इह शीलाङ्गप्ररूपणे सत्यपि तपोनियमप्ररूपणं तयोः प्रधानपरलोकाङ्गत्वख्यापनार्थं, अस्ति चायं न्यायो यदुत-सामान्योक्तावपि प्राधान्यख्यापनार्थं विशेषाभिधानं क्रियते, यथा ब्राह्मण आयाता वशिष्ठोऽप्यायात इति, एवमन्यत्रापि यथायोगं परिभावनीयम्।

सङ्घस्यैव लोकमध्यवर्त्तिनोऽपि लोकधर्मासंश्लेषतः पद्मरूपकेण स्तवं प्रतिपादयितुमाह-

*मू. (७)* *कम्मरयजलोहविनिग्गयस्स सुयरयणदीहनालस्स।*
*पंचमहव्वयथिरकन्नियस्स गुणकेसरालस्स॥*

वृ. कर्म्म-ज्ञानावरणाद्यष्टप्रकारं तदेव जीवस्य गुण्डनेन मालिन्यापादनाद्रजो भण्यते कर्म्म रज एव जन्मकारणत्वाज्जलौघः तस्माद्विनिर्गत इव विनिर्गतः कर्मरजोजलौधविनिर्गतः तस्य, इह पद्मं जलौधाद्विनिर्गतं सुप्रतीतं, जलौधस्योपरि तस्य व्यवस्थितत्वात्, सङ्घस्तु कर्म्मरजोजलौधाद्विनिर्गतोऽल्पसंसारत्वादवसेयः, तथा च अविरतसम्यग्दृष्टेरप्यपार्द्धपुद्गलपरावर्त्तमान एव संसारः, अत एव विनिर्गत इवेति व्याख्यातं, न तु साक्षाद्विनिग्गर्तः, अद्यापि संसारित्वात्, तथा श्रुतरत्नमेव दीर्घो नालो यस्य स तथा तस्य, दीर्घनालतया च श्रुतरत्नस्य रूपणं कर्म्मरजो जलौधतः तद्बलाद्विनिर्गतेः, तथा पञ्च महाव्रतान्येव-प्राणातिपातादिविरमणलक्षणानि स्थिरा-दृढा कर्णिका-मध्यगण्डिका यस्य तत्तथा तस्य, तथा गुणाः-उत्तरगुणाः त एव पञ्चमहाव्रतरूपकर्णिकापरिकरभूतत्वात् केसरा इव गुणकेसराः ते विद्यन्ते यस्य तत्तथा तस्य, अत्र 'मतुवत्थंमि मुणिज्जह आलं इल्लं मणं तह य' इति प्राकृतलक्षणात् मत्वर्थे आलप्रत्ययः।

तथा ये अभ्युपेतसम्यक्त्वाः प्रतिपन्नाणुव्रता अपि प्रतिदिवसं यतिभ्यः साधूनामगारिणां

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चोत्तरोत्तरविशिष्टगुणप्रतिपत्तिहेतोः सामाचारीं शृण्वन्ति ते श्रावकाः, उक्तं च-

"संपत्तदंसणाई पयदियहं जइजना सुणेई य।
सामायारिं परमं जो खलु तं सावगं बिंति॥"

मू. (८) *सावगजनमहुअरिपरिवुडस्स जिनसूरतेयबुद्धस्स।*
*संघपउमस्स भद्दं समणगणसहस्सपत्तस्स॥*

**वृ.** श्रावकाश्च ते जनाश्च श्रावकजनाः त एव मधुकर्यः ताभिपरिवृत्तस्य तस्य, तथा 'जिनसूर्य-तेजोबुद्धस्य' जिन एव सकलजगत्प्रकाशकतया सूर्य इव-भास्कर इव जिनसूर्यस्तस्यतेजो-विशिष्टसंवेदनप्रभवा धर्मदेशना तेन बुद्धस्य, तथा श्राम्यन्तीति श्रमणा 'नन्द्यादिभ्योऽन' इति कर्त्तर्यनप्रत्ययः श्राम्यन्ति-तपस्यन्ति, किमुक्तं भवति ?-प्रव्रज्याऽऽरम्भदिवसादाराभ्य सकल-सावद्ययोगविरता गुरूपदेशादाप्राणोपरमाद्यथशक्त्यनशनादि तपश्चरन्ति, उक्तं च-

"यः समः सर्वभूतेषु, त्रसेषु स्थावरेषु च।
तपश्चरति शुद्धात्मा श्रमणोऽसौ प्रकीर्त्तितः॥"

श्रमणानां गणः श्रमणगणः स एव सहस्त्र पत्राणां यस्य तत् श्रमणगणसहस्त्रपत्रं तस्य (श्रीसङ्घप-द्मस्य भद्रं भवतु)॥ भूयोऽपि सङ्घस्यैव सोमतया चन्द्ररूपकेण स्तवमभिधित्सुराह-

मू. (९) *तवसंजममयलंछन अकिरियराहुमुहदुद्धरिस निच्चं।*
*जय संघचंद! निम्मलसम्मत्तविसुद्धजोण्हागा!॥*

**वृ.** तपश्च संयमश्च तपःसंयमं, समाहारो द्वन्द्वः, तपःसंयममेव मृगलाञ्छनं-मृगरूपं चिह्नं यस्य तस्यामन्त्राणं हे तपः संयममृगलाञ्छन!, तथा न विद्यन्तेऽनभ्युपगमात् परलोकविषया क्रिया येषां ते अक्रिया-नास्तिकाः त एव जिनप्रवचनशशाङ्कग्रसनपरायणत्वाद्राहुमुखमिवा-क्रियराहुमुखं तेन दुष्प्रधृष्यः-अनभिभवनीयः तस्यामन्त्रणं हे अक्रियराहुमुखदुष्प्रधृष्य!, सङ्घश्चन्द्र इव सङ्घचन्द्रः तस्यामन्त्राणं हे सङ्घचन्द्र!, तथा निर्मलं-मिथ्यात्वमलरहितं यत्सम्यक्त्वं तदेव विशुद्धा जयोत्स्ना यस्य स तथा, 'शेषाद्वे'ति कः प्रत्ययः, तस्यामन्त्रणं हे निर्मलसम्यक्त्व-विशुद्धज्योत्स्नाक!, दीर्घत्वं प्रागिव प्राकृतलक्षणादवसेयम्, 'नित्यं' सर्वकालं 'जय' सकलपर-दर्शनतारकेभ्योऽतिशयवान् भव, यद्यपि भगवान्, सङ्घचन्द्रः, सदैव जयन् वर्त्तते तथाऽपीत्थं स्तोतुरभिधानं कुशलमनोवाकायप्रवृत्तिकारणमित्यदुष्टम्।

पुनरपि सङ्घस्यैव प्रकाशकतया सूर्यरूपकेण स्तवमाह-

मू. (१०) *परतित्थियगहपहनासगस्स तवतेयदित्तलेसस्स।*
*नाणुज्जोयस्स जए भद्दं दमसंघसूरस्स॥*

**वृ.** परतीर्थिकाः-कपिलकणभक्षाक्षपादसुगतादिभतावलम्बिनः, त एव ग्रहाः तेषां या प्रभा-एकैकदुर्नयाभ्युपगमपरिस्फूर्तिलक्षणा तामनन्तनयसंकुलप्रवचनसमुत्थविशिष्टज्ञान-भास्करप्रभावितानेन नाशयति-अपनयतीति परतीर्थिकग्रहप्रभानाशकः तस्य, तथा तपस्येज एव दीप्ता-उज्ज्वला लेश्या-भास्वरता यस्य स तथा तस्य तपस्तेजोदीप्लेशस्य, तथा ज्ञानमेवोद्योतो-वस्तुविषयः प्रकाशो यस्य स तथा तस्य ज्ञानोद्योतस्य, 'जगति' लोके 'भद्रं कल्याणं' भवत्विति शेषः, दमः-उपशमः तत्प्रधानः सङ्घः सूर्य इव सङ्घसूर्यः तस्य दमसङ्घसूर्यस्य॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सम्प्रति सङ्घस्यैवाक्षोभ्यतया समुद्ररूपकेण स्तवं चिकीर्पुराह-

मू.( ११ )          *भद्दं धिइवेलापरिगयस्स सज्झायजोगमगरस्स।*

*अक्खोहस्स भगवओ संघसमुद्दस्स रुंदस्स॥*

वृ. (संघ एव समुद्रः) सङ्घसमुद्रः तस्य भद्रं भवत्विति क्रिया शेषः, किंविशिष्टस्य सत इत्याह-'धृतिवेलापरिगतस्य' धृतिः-मूलोत्तरगुणविपयः प्रतिदिवसमुत्सहमान आत्मपरिणाम-विशेषः सैव वेला-जलवृद्धिलक्षणा तया परिगतस्य, तथा स्वाध्याययोग एव कर्म्मविदारणक्षम-शक्तिसमन्विततया मकरइव मकरो यस्मिन् स तथा तस्य, तथा 'अक्षोभ्यस्य' परीषहोपसर्ग-सम्भवेऽपि निष्प्रकम्पस्य 'भगवतः' समग्रैश्वर्यरूपयशोधर्मप्रयत्नश्रीसम्भारसमन्वितस्य 'रुन्दस्य' विस्तीर्णस्य। भूयोऽपि सङ्घस्यैव सदास्थायितया मेरुरूपकेण स्तवमाह-गाथाषट्केन सम्बन्धः-

मू.( १२ )          *सम्मदंसणवरवइरदढरूढगाढावगाढपेढस्स।*

*धम्मवररयणमंडिअचामीयरमेहलागस्स।*

वृ. सम्यक्-अविपरीतं दर्शनं-तत्त्वार्थश्रद्धानं सम्यग्दर्शनं तदेव प्रथमं मोक्षाङ्गतया सारत्वाद्वर-वज्रमिव सम्यग्दर्शनवरवज्रं तदेव दृढं-निष्प्रकम्पं रूढं-चिरप्ररूढं गाढंनिबिडमवगाढं-निमग्नं पीठं-प्रथम भूमिका यस्य स तथा, इह मन्दरगिरिपक्षे वज्रमयं पीठं दृढादिविशेषणं सुप्रतीतं, सङ्घमन्दरगिरिपक्षे तु सम्यग्दर्शनवरवज्रमयं पीठं दृढं शङ्कादिशुषिररहिततया परतीर्थकवास-नाजलेनान्तः प्रवेशाभावतश्चालयितुमशक्यम्, रूढं प्रतिसमयं विशुद्धयमानतया प्रशस्ताध्यवसायेषु चिरकालं वर्त्तमान्, गाढं तीव्रतत्त्वविषयरुच्यात्मकत्वाद्, अवगाढं जीवादिषु पदार्थेषु सम्यग-वबोधरूपतया प्रविष्टं, तं वन्दे, सूत्रे प्राकृतत्वात् द्वितीयार्थे षष्ठी, यदाह पाणिनिः स्वप्राकृतलक्षणे-'द्वितीयार्थे षष्ठी', अथवा सम्बन्धविवक्षया षष्ठी, यथा माषाणामश्नीयादित्यत्र, यद्वा इत्थंभूतस्य सङ्घमन्दरगिरेर्यत् माहात्म्यं तद् वन्दे इति माहात्म्यशब्दाध्याहारापेक्षया षष्ठी, तथा दुर्गतौ प्रपतन्मात्मानं धारयतीति धर्म्मः स एव वररत्नमण्डिता चामीकरमेखला यस्य स धर्म्मवररत्नमण्डितचामी-करमेखलाकः 'शेषाद्वे'ति कप्रत्ययः तस्य, इह धर्म्मो द्विधा-मूलगुणरूप उत्तरगुणरूपश्च, तत्रोत्तर-गुणरूपो रत्नानि मूलगुणरूपस्तु मेखला, न खलु मूलगुणरूपधर्म्मात्मकचामीकरमेखला विशिष्टोत्तरगुणरूपवररत्नविभूषणविकला शोभते।

मू.( १३ )          *नियमूसियकणयसिलायलुज्जलजलंतचित्तकूडस्स।*

*नंदनवनमनहरसुरभिसीलगंधुद्धुमायस्स॥*

वृ.इहोच्छ्रितशब्दस्यव्यवहितः प्रयोगः, ततश्चायमर्थः-नियमा एव इन्द्रियनोइन्द्रियदमरूपाः कनकशिलातलानि तेषु उच्छ्रितानि-उज्ज्वलानि ज्वलन्ति चित्तान्येव कूटानि यस्मिन् स तथा तस्य, इह मन्दरगिरौ कूटानामुच्छ्रितत्वमुज्ज्वलत्वं भासुरत्वं च सुप्रतीतं, सङ्घमन्दरगिरिपक्षे तु चित्तरूपाणि कूटान्युच्छ्रितानि अशुभाध्यवसायपरित्यागादुज्ज्वलानि प्रतिसमयं कर्ममलविग-मात् ज्वलन्ति उत्तरोत्तरसूत्रार्थस्मरणेन भासुरत्वात्, तथा नन्दन्ति सुरासुरविद्याधरादयो यत्र तन्नन्दनं वनम्-अशोकसहकारादिपादपवृन्दं नन्दनं च तद्वनं च नन्दनवनं लतावितानगतविविधफल-पुष्पप्रवालसंकुलतया मनो हरतीति मनोहरं, 'लिहादिभ्यः' इत्यच् प्रत्ययः, नन्दनवनं च तन्मनोहरं च यस्य सुरभिस्वभावो यो गन्धस्तेन 'उद्धुमायः' आपूर्ण्णः, उद्धुमायशब्द आपूर्णपर्यायः, यत

Jain Education International          For Private & Personal Use Only          www.jainelibrary.org

उक्तमभिमानचिह्नेन-"पडिहत्थमुद्धमायं अहिरे(य)इयं च जाण आउण्णो" तस्य, सङ्घमन्दगिरिपक्षे तु नन्दनं-सन्तोषः, तथाहि-तत्र स्थिताः साधवो नन्दन्ति, तत्त्वविधिधामर्षौप-पध्यादिलब्धिसंकुलतया मनोहरं, तस्य सुरभिः शीलमेव गन्धः तेन व्याप्तस्य, अथवा मनोहरत्वं सुरभिशीलगन्धविशेषणं द्रष्टव्यम्॥

*मू. (१४) जीवदयासुंदरकंदरुद्दरियमुनिवरमइंदइन्नस्स।*
*हेउसयधाउउपगलंतरयणदित्तोसहिगुहस्स॥*

**वृ.** जीवदया एव सुन्दराणि स्वपरनिर्वृतिहेतुतया कन्दराणि तपस्विनामावासभूतत्वात् तथा च लोकेऽपि प्रतीतम् 'अहिंसाव्यवस्थितः तपस्वी'ति जीवदयासुन्दरकन्दराणि, तेषु ये उत्-प्राबल्येन कर्मशत्रुजयं प्रति दर्पिता उद्दर्पिता मुनिवरा एव शाक्यादिमृगपराजयात् मृगेन्द्राः तैराकीर्णोव्याप्तस्तस्य, तथा मन्दरगिरेर्गुहासु निष्यन्दवन्ति चन्द्रकान्तादीनि रत्नानि भवन्ति कनकादिधातवो दीप्ताश्चौषधयः, सङ्घमन्दरगिरिपक्षे तु अन्वयव्यतिरेकलक्षणा ये हेतवस्तेषां शतानि हेतुशतानि तान्येव धातवः, कुयुक्तिव्युदासेन तेपां स्वरूपेण भास्वरत्वात्, तथा प्रगलन्ति-निष्यन्दमानानि क्षायोपशमिकभावस्यन्दिवात्, श्रुतरत्नानि दीप्ताः-जाज्वल्यमाना ओषधयः-आमर्शौषध्यादयो गुहासु-व्याख्यानशालारूपासु यस्य स तथा तस्य।

*मू. (१५) संवरवरजलपगलियउज्झरपविरायमाणाहारस्स।*
*सावगजणपउररवंतमोरनच्चंतकुहरस्स॥*

**वृ.** संवरः-प्राणातिपातादिरूपपञ्चाश्रवप्रत्याख्यानं तदेव कर्ममलप्रक्षालनात् सांसारिक-तृडपनोदकारित्वात् परिणामसुन्दरत्वाच्च वरजलमिव संवरवरजलं तस्य प्रगलितः-सातत्येन व्यूढः उज्झरः-प्रवाहः स एव प्रविराजमानो हारो यस्य स तथा, श्रावकजना एव स्तुतिस्तोत्र-स्वाध्यायविधानमुखरतया प्रचुरा रवन्तो मयूराः तैर्नृत्यन्तीव कुहराणि-जिनमण्डपादिरूपाणि यस्य स तथा तस्य।

*मू. (१६) विनयनयपवरमुनिवरफुरंतविज्जुज्जलंतसिहरस्स।*
*विविहगुणकप्परुक्खगफलभरकुसुमाउलवनस्स॥*

**वृ.** विनयेन नता विनयेनता ये प्रवरमुनिवराः त एव स्फुरन्त्यो विद्युतो विनयनत-प्रवरमुनिवरस्फुरद्विद्युतः ताभिर्ज्वलन्ति-भासमानानि शिखराणि यस्य स तथा तस्य, इह शिखरस्थानीयाः प्रावचनिका विशिष्टा आचार्यादयो द्रष्टवाः, विनयनतानां च प्रवरमुनिवराणां विद्युता रूपणं विनयादिरूपेण तपसा तेषां भासुरत्वात्, तथा त्रिविधा गुणा येषां ते विधिधगुणाः, विशेषान्यथानुपपत्त्या साधवो गृह्यन्ते, त एव विशिष्टकुलोत्पन्नत्वात् परमान्दरूपसुख-हेतुधर्म्मफलदानाच्च कल्पवृक्षा इव विविधगुणकल्पवृक्षकाः, प्राकृतत्वात्, स्वार्थे कप्रत्ययः, तेषां च यः फलभरो यानि च कुसुमानि तैराकुलानि वनानि यस्य स तथा तस्य, इह फलभरस्थानीयो मूलोत्तरगुणरूपो धर्मः, कुसुमानि नानाप्रकारा ऋद्धयः, वनानि तु गच्छाः।

*मू. (१७) नाणवररयणदिप्पंतकंतवेरुलियविमलचूलस्स।*
*वंदामि विनयपणओ संघमहामंदरगिरिस्स॥*

**वृ.** तथा-ज्ञानमेव परमनिर्वृतिहेतुत्वाद्वरं रत्नं ज्ञानवररत्नं तदेव दीप्यमाना कान्ता विमला वैडूर्यमयी

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चूडा यस्य स तथा, तत्र मन्दरपक्षे वैडूर्यमयो चूडा कान्ता विमला च सुप्रतीता, संघमन्दरपक्षे तु कान्ता भव्यजनमनोहारित्वाद्विमला यथावस्थितजीवादिपदार्थस्वरूपोपलम्भात्मकत्वात्, तस्य इत्थंभूतस्य सङ्घमहामन्दरगिरेर्यन्माहात्म्यं तद्विनयप्रणतो वन्दे।

तदेवं संघस्यानेकधा स्तवोऽभिहितः, सम्प्रत्यावलिकाः प्रतिपादनीयाः, ताश्च तिस्रः, तद्यथा-तीर्थकरावलिका गणधरावलिका स्थविरावलिका च, तत्र प्रथमतः तीर्थकरावलिकामाह-

*मू. ( १८ ) उसमं अजियं संभवमभिनंदन सुमइ सुप्पभ सुपासं।*
*ससि पुप्फदंत सीयल सिज्जंसं वासुपुज्जं च॥*

*मू. ( १९ ) विमलमनंतय धम्म संतिं कुथुं अरं च मल्लिं च।*
*मुनिसुव्वय नमि नेमिं पासं तह वद्धमाणं च॥*

**वृ.** गाथाद्वयं निगदसिद्धं॥ गणधरावलिका तु या यस्य तीर्थकृतः सा तस्य प्रथमानुयोगतो दृष्टवा, भगवद्वर्द्धमानस्वामिन आह-

*मू. ( २० ) पढमित्थ इदंभूई बीए पुन होइ अग्गिभूईत्ति।*
*तईए य वाउभूई तओ वियत्ते सुहम्मे य॥*

*मू. ( २१ ) मंडिअ मोरियपुत्ते अकंपिए चेव अलयभावा य।*
*मेअज्जे य पहासे य गणहरा हुंति वीरस्स॥*

**वृ.** गाथाद्वयमेतदपि निगदसिद्धं॥ एते च गणभृतः सर्वेऽपि तथाकल्पत्वाद्भवदुपदिष्टं उप्पन्ने इ वेत्यादि मातृकापदत्रयाधिगम्य सूत्रतः सकलमपि प्रवचनं दृब्धवन्तः, तच्च प्रवचनं सकलसत्त्वानामुपकारकं, विशेपत इदानीन्तनजनानामतः तदेव सम्प्रत्यभिष्टुवन्नाह-

*मू. ( २२ ) निव्वुइपहसासणयं जयइ सया सव्वभावदेसणयं।*
*कुसमयमयनासणयं जिणिंदवरवीरसासनयं॥*

**वृ.** निर्वृत्तेः-मोक्षस्य पन्थाः-सम्यग्दर्शनज्ञानचारित्राणि, तथा चाह भगवानुमास्वातिवाचकः-'सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः' इति, निर्वृतिपथः 'ऋक्पूःपथ्यपोऽदि'ति समासान्तोऽत्प्रत्ययः, यद्यपि निर्वृतिपथशब्देन ज्ञानादित्रयमभिधीयते, तथाऽपीह सम्यग्दर्शनचारित्रयोरेव परिग्रहो, ज्ञानस्योत्तरत्र विशेषेणाभिधानात्, निर्वृतिपथस्य शासनं शिष्यतेऽनेनेति शासनं-प्रतिपादकं निर्वृतिपथशासनं, ततः 'कश्चे'ति प्राकृतलक्षणात्, स्वार्थे कप्रत्ययः, निर्वृतिपथ-शासनकम्, एवमन्यत्रापि यथायोगं कप्रत्ययभावना कार्या, 'सदा' सर्वकालं 'जयति' सर्वाण्यपि प्रवचनानि प्रभावातिशयेनातिक्रम्यातिशायी वर्त्तते, कथंभूतं सदित्याह-'सर्वभावदेशनकं' सर्वे च ते भावाश्च सर्वभावाः तेषां देशनं-प्ररूपकं सर्वभावदेशनं, ततः स्वार्थिकः कप्रत्ययः, सर्वभाव-देशनकम्, अत एव 'कुसमयमदनाशनकं' कुत्सिताः समयाः परतीर्थिकप्रवचनानि तेषां मदः-अवलेपस्तस्य नाशनं ततः स्वार्थिककप्रत्यये कुसमयमदनाशनकं, कुसमयमदनाशनं च कुसमयानां यथोक्तसर्वभावदेशकत्वायोगात्, इत्थंभूतं जिनेन्द्रवरवीरशासनकं जयति।

सम्प्रति यैरिदमविच्छेदेन स्थविरैः क्रमेणैदंयुगीनजन्तूनामुपकारार्थमानीतं तेषामावलि-कामभिधित्सुराह-



Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. ( २३ ) *सुहम्मं अग्गिवेसाणं, जंबूनामं च कासवं।*
*पभवं कच्चायणं वंदे, वच्छं सिज्जभवं तहा॥*

वृ. इह स्थविरावलिका सुधर्म्मस्वामिनः प्रवृत्ताः शेषगणधराणां सन्तानप्रवृत्तेरभावात्, उक्तं च- "तित्थं च सुहम्माहो निरवच्चा गणहरा सेसा" ततस्तमेवादौ कृत्वा तामभिधत्ते- "सधर्म्मं सुधर्म्मस्वामिनं पञ्चमगणधरं 'अग्गिवेसाणं'मिति अग्निवेशस्यापत्यं वृद्धं अग्निवेश्यो 'गर्गादिर्य'-ञिति यञ, प्रत्ययः तस्याप्यपत्यमाग्निवेश्यायनः तं आग्निवेश्यायनं, वन्दे इति क्रियाभिसम्बन्धः, तथा तस्य शिष्यं जम्बूनामानं, चः समुच्चये, कश्यपस्यापत्यं काश्यपः 'विदादेर्वृद्ध' इत्यञ्प्रत्ययः, तं काश्यपयोत्रं वन्दे, तस्यापि जम्बूस्वामिनः शिष्यं प्रभवनामानं कात्यायनं कतस्यापत्यं कात्यः 'गर्गोदेर्यञि'ति यञ् प्रत्ययस्तं वन्दे तथेति समुच्चये॥

मू. ( २४ ) *जसभद्दं तुंगियं वंदे, संभूयं, चेव माढरं।*
*भद्दबाहुं च पाइन्नं, थूलभद्दं च गोयमं॥*

वृ. शय्यम्भवशिष्यं यशोभद्रं 'तुङ्गिकं' तुङ्गिकगणं व्याघ्रापत्योत्रं वन्दे, तस्य च द्वौ प्रधान-शिष्यावभूताम्, तद्यथा-सम्भूतविजयो माढरगोत्रो भद्रबाहुश्च प्राचीनगोत्रः, तौ द्वावपि नमस्कुरुते, 'सम्भूतं चेव माढरं। भद्रबाहुं च पाईन्न' मिति, तत्र सम्भूतविजयस्य विनेयः स्थूलभद्रो गौतम आसीत्, तमाह-स्थूलभद्रं, चः समुच्चये, गौतमं गौतमस्यापत्यं गौतमः 'ऋषिवृष्ण्यन्धककुरुभ्य' इति अण् प्रत्ययः तं, वन्दे इति क्रियायोगः, स्थूलभद्रस्यापि द्वौ प्रधानशिष्यौ बभूवतः, तद्यथा-एलापत्यगोत्रो महागिरिर्वशिष्टगोत्रः सुहस्ती। तौ द्वावपि प्रणिणंसुराह-

मू. ( २५ ) *एलावच्चसगोत्तं वंदामि महागिरिं सुहत्थिं च।*
*तत्तो कोसिअगोत्तं बहुलस्स सरिव्वयं वन्दे॥*

वृ. इह यः स्वापत्यसन्तानस्य स्वव्यपदेशकारणमाद्यः प्रकाशकः पुरुषः तदपत्यसन्तानो गोत्रं, इलापतेरपत्यं एलापत्यः, 'प्रत्युत्तरपदयमादित्यादित्यतेर्योऽणपवादे वा स्वे' इति यञ् प्रत्ययः, एलापत्येन सह गोत्रेण वर्त्तते यः स एलापत्यसगोत्रः तं वन्दे महागिरिं, सुहस्तिनं च प्रागुक्तगोत्रं, तत्र सुहस्तिन आरभ्य सुस्थिसुप्रतिबुद्धादिक्रमेणावलिका विनिर्गता सा यथा दशाश्रुतस्कन्धे तथैव द्रष्टव्या, न च तयेहाधिकारः, तस्याभावलिकायां प्रस्तुताध्ययनकारकस्य देववाचकस्वाभावात्, तत इह महागिर्यावलिकयाऽधिकारः, तत्र महागिरेर्द्धौ प्रधानशिष्याव-भूताम्, तद्यथा-बहुलो बलिस्सहश्च, तौ च द्वावपि यमलभ्रातरौ कौशिकगौत्रौ च, तयोरपि मध्ये बलिस्सहः प्रवचनप्रधान आसीत्, ततस्तमेव निनंसुराह-'ततो' महागिरेरनन्तरं कौशिकगोत्रं बहुलस्य 'सदृशवयसं' समानवयसं, द्वयोरपि यमलभ्रातृत्वात्, 'वन्दे' नमस्करोमीति।

मू. ( २६ ) *हारियगुत्तं साइं च वंदिमो हारियं च सामज्जं।*
*वंदे कोसियगोत्तं संडिल्लं अज्जजीयधरं॥*

वृ. बलिस्सहस्यापि शिष्यं हारीतगोत्रं 'स्वातिं' स्वातिनामानं, चः समुच्चये वन्दे, तथा स्वातिशिष्यं 'हारीतं' हारीतगोत्रं चः समुच्चये स च भिन्नक्रमः श्यामार्यशब्दानन्तरं द्रष्टव्यः, श्यामार्यं वन्दे, तथा श्यामार्यशिष्यं कौशिकगोत्रं 'शाण्डिल्यं' शाण्डिल्यनामानं वन्दे, किम्भूत-मित्याह-'आर्यजीतधरं' आरात्-सर्वहेयधर्म्मेभ्योऽर्वाक् यातं आर्यं 'जीत' मिति सूत्रमुच्यते,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जीतं स्थितिः कल्पो मर्यादा व्यवस्थेति हि पर्यायाः, मर्यादाकारणं च सूत्रमुच्यते, तथा 'धृङ् धारणे' ध्रियते धारयतीति धरः 'लिहादिभ्यः' इत्यच् प्रत्ययः आर्यजीतस्य धर आर्यजीतधरः तम्, अन्ये तु व्याचक्षते-शाण्डिलस्यापि शिष्य आर्यगोत्रो जीतधरनामा सूरिरासीत् तं वन्दे इति॥

*मू. ( २७ )* *तिसमुद्दखायकित्तिं दीवसमुद्देसु गहियपेयालं।*
*वंदे अज्जसमुद्दं अक्खुभियसमुद्दगंभीरं॥*

**वृ.** शाण्डिलशिष्यमार्यसमुद्रनामानं वन्दे, कथंभूतमित्याह-'त्रिसमुद्रख्यातकीर्त्तिं' पूर्वदक्षिणा-परदिग्विभागव्यवस्थितत्वात्, पूर्वापरदक्षिणास्त्रयः समुद्रास्त्रिसमुद्रम्, उत्तरतस्तु हिमवान् वैताढ्य वा, त्रिसमुद्रे ख्याता कीर्त्तिर्यस्यासौ त्रिसमुद्रख्यातकीर्त्तिस्तं, तथा 'द्वीपसमुद्रेषु' द्वीपेषु समुद्रेषु च गृहीतं पेयालं-प्रमाणं येन स गृहीतपेयालस्तम्, अतिशयेन द्वीपसागरप्रज्ञप्तिविज्ञायकमिति भावः, तथा अक्षुभितसमुद्रवद्गम्भीरम्॥

*मू. ( २८ )* *भणगं करगं झरगं पभावगं नाणदंसणगुणाणं।*
*वंदामि अज्जमंगुं सुयसागरपारगं धीरं॥*

**वृ.** आर्यसमुद्रस्यापि शिष्यमार्यमंगुं वन्दे, किंभूतमित्याह-'भणकं' कालिकादिसूत्रार्थमनवरतं भणति-प्रतिपादयतीति भणः भण एव भणकः 'कश्चे'ति प्राकृतलक्षणसूत्रात् स्वार्थे कः प्रत्ययः तं, तथा 'कारकं' कालिकादिसूत्रोक्तमेवोपधिप्रत्युपेक्षणादिरूपं क्रियाकलापं करोति कारयतीति वा कारकस्तं, तथा धर्म्मध्यानं ध्यायतीति ध्याता तं ध्यातारं, इह यद्यपि सामान्यतः कारकमिति वचनाद् ध्यातारमिति विशेषणं गतार्थं तथापी तस्य विशेषतोऽभिधानं ध्यानस्य प्रधानपरलोकांगताख्यापनार्थं, तथा यत एव भणकं कारकं ध्यातारं वा अत एव प्रभावकं ज्ञानदर्शनगुणानाम्, 'एकग्रहणे तज्जातीयग्रहणमिति' न्यायाच्चरणगुणानामपि परिग्रहः, तथा धिया राजते इति धीरस्तं, तथा श्रुत सागरपारगं॥

*मू. ( २९ )* *वंदामि अज्ज धम्मं तत्तो वंदे च भद्दगुत्तं च।*
*तत्तो य अज्जवइरं तव नियम गुणेहिं वइरसमं॥* *॥प्र.॥*

*मू. ( ३० )* *वंदामि अज्जरक्खियखमणे रक्खियचरित सव्वसे।*
*रयणकरंडगभूओ अनुओगो रक्खिवओ जेहिं॥* *॥प्र.॥*

*मू. ( ३१ )* *नाणंमि दंसणंमि अ तवविणए णिच्चकालमुज्जत्तं।*
*अज्जं नंदिलखमणं सिरसा वंदे पसन्नमणं॥*

**वृ.** आर्यमङ्गोरपि शिष्यमार्यनन्दिलक्षपणं प्रसन्नमनसम्-अरक्तद्विष्टान्तःकरणं शिरसा वन्दे, कथम्भूतमित्याह-'ज्ञाने' श्रुतज्ञाने 'दर्शने' सम्यक्त्वे, चशब्दाच्चारित्रे च, तथा तपसि-यथायोग-मनशनादिरूपे विनये-ज्ञानविनयादिरूपे 'नित्यकालं' सर्वकालम् 'उद्युक्तम्' अप्रमादिनं॥

*मू. ( ३२ )* *वड्ढउ वायगवंसो जसवंसो अज्जनागहत्थीणं।*
*वागरणकरणभंगियकम्मपयडीपहाणाणं॥*

**वृ.** पूर्वगतं सूत्रमन्यच्च विनेयान् वाचयन्तीति वाचकाः तेषां वंशः-क्रमभाविपुरुषपर्वप्रवाहः स 'वर्द्धतां' वृद्धिमुपयातु, मा कदाचिदपि तस्य वृद्धिमुपगच्छतो विच्छेदो भूयादितियावत्, वर्द्धतामित्यत्राशंसायां पञ्चमी, कथम्भूतो वाचकवंश इत्याह-'यशोवंशो' मूर्त्तो यशसो वंश

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इव-पर्वप्रवाह इव यशोवंशः, अनेनापयशःप्रधानपुरुषवंशव्यवच्छेदमाह, तथाहि-अपयशः प्रधानानामपारसंसारसरित्पतिश्रोतः पतितानां परममुनिजनोपधृतलिङ्गविडम्बकानामलं सन्तान-परिवृद्धेति, केषां सम्बन्धी वाचकवंशः परिवर्द्धतामित्याह-आर्यनागहस्तिनामार्यनन्दिलक्ष-पणशिष्याणां, कथम्भूतानामित्याह- 'व्याकरणकरणभङ्गीकर्म्मप्रकृतिप्रधानानां' तत्र व्याकरणं-संस्कृतशब्दव्याकरणं प्राकृतशब्दव्याकरणं च प्रश्नव्याकरणं वा करणं-पिण्डविशुद्धादि, उक्तं

''पिंडविसोही समिई भावन पडिमा य इंदियनिरोहो।
पडिलेहण गुत्तीओ अभिग्गहा चेव करणं तु॥''

भङ्गी-भङ्गबहुलं श्रुतं कर्म्मप्रकृतिः-प्रतीता, एतषु प्ररूपणामधिकृत्य प्रधानानाम्॥

*मू.(३३) जच्चंजणधाउसमप्पहाण मुद्दियकुवलयनिहाणं।*
*वड्डउ वायगवंसो रेवइनक्खत्तनामाणं॥*

वृ. आर्यनागहस्तिनामपि शिष्याणां रेवतीनक्षत्रनाम्नां वाचकानां वाचकवंशो वर्द्धतां कथम्भू-तानामित्याह- 'जात्याञ्जनधातुसमप्रभाणां' जात्याश्चासावञ्जनधातुश्च तेन समा-सदृशा प्रभा देहकान्तिर्येषां ते तथा तेषां, मा भूदत्यन्तकालिम्नि सम्प्रत्यय इति विशेषणान्तरमाह- 'मुद्रिका-कुवलयनिभानां' परिपाकागतरसद्राक्षया नीलोत्पलेन च समप्रभाणां, अपरे पुनराहुः-कुवलयमिति मणिविशेषः तत्राप्यविरोधः॥

*मू.(३४) अयलपुरा निक्खंते कालियसुयआनुओगिए धीरे।*
*बंभद्दीवगसीहे वायगपयमुत्तमं पत्ते।*

वृ. रेवतीनक्षत्रनामकवाचकानां शिष्यान् 'ब्रह्मद्वीपकसिंहान्' ब्रह्मद्वीपकशाखोपलक्षितान् सिंहनामकानाचायान् 'अचलपुरात् निष्क्रान्तान्' अचलपुरे गृहीतदीक्षान् 'कालिकरुतानु-योगिकान्' कालिकश्रुतानुयोगे-व्याख्याने नियुक्ताः कालिकश्रुतानुयोगिकास्तान् अथवा कालिकश्रुतानुयोग एषां विद्यते इति कालिकश्रुतानुयोगिनः ततः स्वार्थिककप्रत्ययविधानात् कालिकश्रुतानुयोगिकाः तान्, धिया राजन्ते इति धीराः तान्, तथा तत्कालपेक्षया उत्तमं-प्रधानं वाचकपदं प्राप्तान्-

*मू.(३५) जेसि इमो अनुओगो पयरइ अज्जावि अड्डभरहम्मि।*
*बहुनयरनिग्गयजसे ते वंदे खंदिलायरिए॥*

वृ. येषामयं-श्रवणप्रत्यक्षत उपलभ्यमानोऽनुयोगोऽद्यापि अर्द्धभरतवैताढ्यदर्वाक् 'प्रचरति' व्याप्रियते तान् स्कन्दिलाचार्यान् सिंहवाचकसुरिशिष्यान् बहुषु नगरेषु निर्गतं-प्रसृतं यशो येषां ते बहुनगरनिर्गतयशसस्तान् वन्दे। अथायमनुयोगोऽर्द्धभरते व्याप्रियमाणः कथं तेषां स्कन्दिलनाम्नामाचार्याणां सम्बन्धी ?, उच्यते, इह स्कन्दिलाचार्यप्रतिपत्तौ दुष्षमसुषमा-प्रतिपन्थिन्याः तद्गतसकलुशभभावग्रसनैकसमारम्भायाः दुष्षमायाः साहायकमाधातुं परमसुहृदिव द्वादशवार्षिकं दुर्भिक्षमुदपादि, तत्र चैवंरूपे महति दुर्भिक्षे भिक्षालाभस्यासम्भवादवसीदतां साधूनामपूर्वार्थग्रहणपूर्वार्थस्मरणश्रुतपरावर्त्तनानि मूलत एवापजग्मुः, श्रुतमपि चातिशायि प्रभूत-मनेशत्, अङ्गोपाङ्गादिगतमपि भावतो विप्रनष्टम्, तत्परावर्त्तनादेरभावात्, ततो द्वादशवर्षानन्तरमुत्पन्ने सुभिक्षे मथुरापुरि स्कन्दिलाचार्यप्रमुखश्रमणसङ्घेनैकत्र मिलित्वा यो यत्स्मरति स तत्कथयतीत्येवं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कालिकश्रुतं पूर्वगतं च किञ्चिदनुसन्धाय घटितं, यतश्चैतन्मथुरापुरि सङ्घटितमत इयं वाचना माथुरीत्यभिधीयते, सा च तत्कालयुगप्रधानानां स्कन्दिलाचार्याणामभिमता तैरेव चार्थतः शिष्य-बुद्धिं प्रापितेति तदनुयोगः तेषामाचार्याणां सम्बन्धीति व्यपदिश्यते।

अपरे पुनरेवमाहुः-न किमपि श्रुतं दुर्भिक्षकालकवलीकृताः, एक एव स्कन्दिलसूरयो विद्यन्ते स्म, ततस्तैर्दुर्भिक्षापगमे मथुरापुरी पुनरनुयोगः प्रवर्त्तित इति वाचना माथुरीति व्यपदिश्यते, अनुयोगश्च तेषामाचार्याणामिति॥

*मू. (३६) तत्तो हिमवंतमहंतविक्कसे धिइपरक्कममनंते।*
*सज्झायमनंतधरे हिमवंते वंदिमो सिरसा॥*

**वृ.** 'ततः' स्कन्दिलाचार्यानन्तरं तच्छियान् हिमवतो-हिमवन्नामकान् 'हिमवन्महाविक्रमान्' हिमवत इव महान् विक्रमो-विहारक्रमेण प्रभूतक्षेत्रव्याप्तिरूपो येषां ते तथा तान्, 'धिइपरक्कममणंते' इति अनन्तधृतिपराक्रमान्, प्राकृतशैल्याऽनन्तशब्दस्यान्यथोपन्यासः सूत्रे, अनन्तः-अपरिमितो धृतिप्रधानः पराक्रमः कर्मशत्रून् प्रति येषां ते तथाविधास्तान्, तथा-'सज्झायमणंतधरे'त्ति अत्रापि प्राकृतशैल्याऽनन्तशब्दस्य परनिपातो मकारस्त्वलाक्षणिकः, तत एवं तात्त्विको निर्देशः 'अनन्त-स्वाध्यायधरान्' तत्रानन्तगमपर्यायात्मकत्वादनन्तं सूत्रं तस्य स्वाध्यायं धरन्तीति धराः अनन्तस्वाध्यायस्य धरा अनन्तस्वाध्यायधरास्तान्॥ भूयोऽपि हिमवदाचार्याणां स्तुतिमाह-

*मू. (३७) कालियसुयअनुओगस्स धारए धारए य पुव्वाणं।*
*हिमवंतखमासमणे वंदे नागज्जुनायरिए॥*

**वृ.** कालिकश्रुतानुयोगस्य धारकान् 'धारकांश्च पूर्वाणाम्' उत्पादादीनां धारकान् हिमवतः क्षमाश्रमणान् वन्दे। ततः तच्छिष्यान् वन्दे नागार्जुनाचार्यान्, कथम्भूतानित्याह-

*मू. (३८) मिउमद्दवसंपन्ने आनुपुव्वि वायगत्तणं पत्ते।*
*ओहसुयसमायारे नागज्जुनवायए वंदे।*

**वृ.** 'मृदुमार्दवसम्पान्नात्' मृदु-कोमलं मनोज्ञं सकलभव्यजनमनः सन्तोषहेतुत्वात् यत् मार्दवं तेन सम्पन्नान्, मार्द्दवं चोपलक्षणं तेन क्षान्तिमार्दवार्जवसन्तोषसम्पन्नानिति द्रष्टव्यम्, तथा 'आनुपूर्व्या' वयःपर्यायपरिपाट्या वाचकत्वं प्राप्तान्, इदं च विशेषणैर्मंदयुगीनसूरीणां सामाचारी-प्रदर्शनपरमवसेयम्, तथाहि-अपवादपदमपृष्टमवलम्ब्य नैवेदंयुगीनसाधूनामपि युज्यते कालोचित्तानुपूर्वीमपहाय गणधरपदाद्यारोपणम्, मा प्रापत् महापुरुषगौतमादीनामाशातनाप्रसङ्गः, तेषां चाशातना स्वल्पीयस्यपि प्रकृष्टदुस्तरंससारोपनिपातकारणम्, यदुक्तम्-

"वूढो गणहरसद्दो गोयममाईहिं धीरपुरिसेहिं।
जो तं ठवइ अपत्ते जाणंतो सो महापावो॥"

तत एतत् परिभाव्य संसारभीरुणा कथञ्चिद् विनयादिना समावर्जितेनापि स्वशिष्ये गुणवति कालोचितवयःपर्यायानुपूर्वीसम्पन्ने गणधरपदाध्यारोपः कर्त्तव्यो, न यत्र कुत्रचिदित स्थितम्, तथा 'ओघश्रुतसमाचारकान्' ओघश्रुतमुत्सर्गश्रुतमुच्यते तत्समाचरन्ति ये ते ओघश्रुतसमाचारकाः तान् नागार्जुनवाचकान् वन्दे॥

*मू. (३९) वरकनगतवियचंपगविमलउलवरकमलगब्भसरिसन्ने।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*भविअजनहिययदइए दयागुणविसारए धीरे ॥*

**वृ.** वरं-प्रधानं सार्द्धषोडशवर्णिणकारूपं तापितं यत्कनकं-यत्स्वर्णं यच्च वरचम्पकं-सुवर्ण-चम्पकपुष्पं तथा यच्च विमुकुलं-विकसितं वरं-प्रधानं कमलम्-अम्भोजं तस्य यो गर्भः तत्सदृशवर्णान्-तत्समदेहकान्तीन्, तथा 'दयागुणविशारदान्' सकलजगज्जन्तुदयाविधिविधा-पनयोरतीव कुशलान्, तथा धिया राजन्ते-शोभन्ते इति धीरास्तान्।

**मू. (४०)** *अड्ढभरहप्पहाणे बहुविहसज्झायसुमुणियपहाणे।*
*अनुओगियवरवसमे नाइलकुं वसनंदिकरे ॥*

**वृ.** तथा 'अर्द्धभरतप्रधानान्' तत्कालापेक्षया सकलार्द्धभरतमध्ये युगप्रधानान् तथा 'सुविज्ञा-तबहुविधस्वाध्यायप्रधानान्' बहुविध आचारादिभेदात् स्वाध्यायः ततः सुविज्ञातो बहुविधः स्वाध्यायो यैस्ते तथोक्ताः तेषां मध्ये प्रधानान्-उत्तमान्, तथा अनुयोजिताः-प्रवर्त्तिता यथोचिते वैयावृत्त्यादौ वरवृषभाः-सुसाधवो यैस्ते तथोक्तास्तान्, तथा नागेन्द्रकुलवंशस्य नन्दिकरान्, प्रमोदकरानित्यर्थः।

**मू. (४१)** *भूयहिअप्पगब्भे वंदेऽहं भूयदिन्नमायरिए।*
*भवभयवुच्छेयकरे सीसे नागज्जुनरिसीण ॥*

**वृ.** तथा 'भूतहितप्रगल्भान्' अनेकधासकलत्त्वहितोपदेशदानसमर्थान् 'भवभयव्य-वच्छेदकरान्' सदुपदेशादिना संसारभयव्यवच्छेदकरणशीलान् 'नागार्जनऋषीणां' नागार्जुन-महर्षिसूरीणां शिष्यान्, भूतदिन्ननामकान् आचार्यानहं वन्दे।

सूत्रे च भूतदिन्नशब्दात् मकारोऽलाक्षणिकः।

**मू. (४२)** *सुमुणियनिच्चानिच्चं सुमुणियसुत्तत्थारयं वंदे।*
*सब्भावुब्भावणयातत्थं लोहिच्चणामानं ॥*

**वृ.** सुष्ठु-यथावस्थिततया मुणितं-ज्ञातं, 'ज्ञो जाणमुणाविति' प्राकृतलक्षणाज्जानातेर्मुण आदेशः, नित्यानित्यं सामर्थ्याद्वस्त्विति गम्यते, येन स सुज्ञातनित्यानित्यः तं, यथा च वस्तुनो नित्यानित्यता तथा धर्मसंग्रहणिटीकायां सविस्तरमभिहितमिति नेह भूयोऽभिधीयते, मा भूद्ग्रन्थगौरवमितिकृत्वा, एतेन न्यायवेदिता तस्यावेदिता, तथा सुष्ठु-अतिशयेन ज्ञातं यत्सूत्रमर्थश्च तस्य धारकम्, अनेन सदैवाभ्यस्तसूत्रार्थता तस्यावेद्यते, तथा सन्तो-यथावस्थिता विद्यमाना भावाः-सद्भावाः तेषामुद्भावना-प्रकाशनं सद्भावोद्भावना तस्यां तथ्यम्-अविसंवादिनं सद्भावोद्भावनातथ्यम्, एतेन तस्य सम्यक्प्ररूपकत्वमुक्तम्, इत्थम्भूतं भूतदिन्नाचार्यशिष्यं लोहित्यनामानमहं वन्दे ॥

**मू. (४३)** *अत्थमहत्थक्खाणिं सुसमणवक्खाणकहणनिव्वाणिं।*
*पयईइ महुरवाणिं पयओ पणमामि दूसगणिं ॥*

**वृ.** तत्र भाषाभिधेया अर्था विभाषावार्तिकाभिधेया महार्थाः तेषामर्थमहार्थानां खानिरिव अर्थमहार्थखानिः तं, एतेन भाषाविभाषावार्त्तिकरूपानुयोगविधावतीव पटीयस्त्वमावेदयति, तथा सुश्रमणानां-विशिष्टमूलोत्तरगुणकलितसंयतानामपूर्वशास्त्रार्थव्याख्याने पृष्टार्थकथने च निर्वृतिः-समाधिर्यस्य स तथा तं, तथा प्रकृत्या-स्वभावेन मधुरवाचं-मधुरगिरं न शिष्यगतमनाक्-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रमादादिरूपकोपहेतुसम्पत्तावपि कोपोदयवशतो निष्ठुरभाषणम्, एतेन शिष्यानुवर्त्तनायामति-कौशलमाह, तथाहि-गुणसम्पद्योग्यान् कथञ्चित् प्रमादिनोऽपि दृष्ट्वा धर्मानुगतैः मधुरवचोभिरा-चार्यस्तान् शिक्षयेत्, यथा तेषां मनः प्रसादमेव विशिष्टगुणप्रतिपत्त्यभिमुखमश्नुते, न कोपं प्रतिपन्नगुणभ्रंशकारणमिति; उक्तं च-

"धम्ममइएहिं अइसुंदरेहिं कारणगुणोवणीएहिं।
पल्हायंतो य मनं सीसं चोएइ आयरिओ ॥"

तत इत्थं शिष्यानुवर्त्तनाकौशल्यख्यापनार्थमुक्तं 'प्रकृत्या मधुरवाच'मिति, तं दूष्यगणिनं 'प्रयतः' प्रयत्नपरः प्रणमामि। पुनरपि दूष्यगणिन एव स्तुतिमाह-

*मू. (४४) सुकुमालकोमलतले तेसिं पणमामि लक्खणपसत्थे।*
*पाए पावयणीणं पडिच्छसयएहि पणिवइए ॥*

**वृ.** तेषां दूष्यगणिनां 'प्रावचनिकानां' प्रवचने-प्रवचनार्थकथने नियुक्ताः प्रावचनिकास्तेषां, तत्कालापेक्षया युगप्रधानानामित्यर्थः, पादान् लक्षणैः-शङ्खचक्रादिभिः प्रशस्तान्-श्रेष्ठान्, तथा सुकुमारम्-अकर्कशं कोमलं-मनोज्ञं तलं येषां तान्, पुनः किम्भूतामित्याह-प्रातीच्छिकशतैः प्रणिपतितान्, इह ये गच्छान्तरवासिनः स्वाचार्यं पृष्ट्वा स्वाचार्यानुज्ञापुरः-सरमनुयोगाचार्य-प्रतीच्छया चरन्तीति प्रातीच्छिका इति व्युत्पत्तेः, तेषां शतैः प्रणिपतितान्-नमस्कृतान् 'प्रणिपतामि' नमस्करोमि।

तदेवमावलिकाक्रमेण महापुरुषाणां स्तवमभिधाय सम्प्रति सामान्येन श्रुतधरनमस्कारमाह-

*मू. (४५) जे अन्ने भगवंते कालिअसुयआनुओगिए धीरे।*
*ते पणमिऊण सिरसा नाणस्स परूवणं वोच्छं॥*

**वृ.** ये अन्येऽतीता भावनिक्षे भगवन्तः-श्रुतरत्ननिकरपूरितत्वात्, समग्रैश्वर्यादिमन्तः कालिक-श्रुतानुयोगिनो धीराविशिष्टधिया राजमानाः तान् 'शिरसा' उत्तमाङ्गेन प्रणम्य 'ज्ञानस्य' आभि-निबोधिकादेः 'प्ररूपणां' प्ररूपणाकारकमध्ययनं वक्ष्ये, क एवमाह?, उच्यते-दूष्यगणिशिष्यो देववाचकः। इह ज्ञानस्य प्ररूपणां वक्ष्य इत्युक्तम्, सा च प्ररूपणा शिष्यानधिकृत्य कर्त्तव्या, शिष्याश्च द्विधा-योग्या अयोग्याश्च, तत्र योग्यानधिकृत्य कर्त्तव्या नायोग्यानिति प्रथमतो योग्यायोग्यविभागोपदर्शनार्थं तावदिदमाह-

*मू. (४६) सेलघण कुडग चालणि परिपूणग हंस महिस मेसे य।*
*मसग जलूग बिराली जाहग गो भेरी आभीरी ॥*

**वृ.** अत्र पर आह-ननु ये देववाचकनामानः सूरयस्ते महापुरुषाः सदैव समभावव्यवस्थिताः कृपालवः अत एव सकलसत्त्वहितसम्पादनाय कृतोद्यमाः तत्कथमिदमध्ययनं दातुमुद्यता योग्यायोग्यविभागनिरीक्षणमारभन्ते?, न हि परहितकरणप्रवृत्तमनसो महीयांसो महादानं दातुकामा मार्गणकगुणमपेक्ष्य दानक्रियायां प्रवर्त्तन्ते दयालवः, किन्तु प्रावृषेण्यजलभृत इवाविशेषेण, अत्रोच्यते, यत एव देववाचकसूरयः समभावव्यवस्थिताः सकलसत्त्वहितसम्पादनाय कृतोद्या महीमांस, कृपालवश्च अत एव शुभमिदमध्ययनं दातुमुद्यता योग्यायोग्यविनेयजनविभागो-पदर्शनमारभन्ते, मा भूदयोग्येभ्यः प्रदाने तेषामनर्थोपनिपात इतिकृत्वा, अथ कथं तेषामेत-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दध्ययनप्रदाने महानर्थोपनिपातः ?, उच्यते,

ते हि तथास्वाभाव्यादेव अचिन्त्यचिन्तामणिकल्पमज्ञानतमः समूहभास्करमनेकभवशतसहस्रपरम्परासंकलितकर्मराशिविच्छेदकमपीदमध्ययनमवाप्य न विधिवदासेवन्ते, नापि मनसा बहुमन्यन्ते, लाघवमपि चास्य यथाशक्ति सम्पादयन्तिः, परेषामपि च यथायोगं बुद्धिर्भेदयन्ति, ततो विधि समासेवकाः कल्याणमिव ते महदकल्याणमासादयन्ति, उक्तं च -

"आमे घडे निहत्तं जहा जलं तं घडं विनासेइ।
इय सिद्धंतरहस्सं अप्पाहारं विनासेइ ॥"

ततोऽयोग्येभ्यः प्रकृताध्ययनप्रदाने तेषामनर्थोनिपातः, स वस्तुतो दातृकृत एवेति कृतं प्रसङ्गेन प्रकृतं प्रस्तुमः। तत्राधिकृतगाथायां प्रथममयोग्यशिष्यविषये मुद्गशैलघनदृष्टान्त उपात्तः, स च काल्पनिकः, मुद्गशैलघनयोर्वक्ष्यमाणप्रकारोऽहङ्कारर्दिन सम्भवति, तयोरचेतनत्वात्, केवलं शिष्यमतिवितानाय तौ तथा कल्पयित्वा दृष्टान्तत्वेनोपात्तौ, त चैतदनुपपन्नं, आर्षेऽपि काल्पनिकदृष्टान्तस्याभ्यनुज्ञानात्, यदाह भगवान् भद्रबाहुस्वामी -

"चरियं च कप्पियं वा आहरणं दुविहमेव पन्नत्तं।
अत्थस्स साहणट्ठा इंधनमिव ओयणट्ठाएं॥"

ततो नानुपपन्नः शैलघनदृष्टान्तः, तद्भावना चेयं-इह कचिद् गोष्पदायामरण्यान्यां मुद्गप्रमाणः क्षितिधरो मुद्गशैलाभिधो वर्त्तते, इतश्च जम्बूद्वीपप्रमाणः पुष्करावर्त्ताभिधानो महामेघः, तत्र महर्षिनारदस्थानीयः कोऽपि कलहाभिनन्दी तयोः कलहमाधातुं प्रथमतो मुद्गशैलस्योपकण्ठमगमत्, गत्वा च तमेवमभाषिष्ट-भो मुद्गशैल! कचिदवसरे महापुरुषसदसि जलेन भेत्तुमशक्यो मुद्गशैल इति मया त्वद्गुणवर्णनायां क्रियमाणायां नामापि तव पुष्करावर्त्ती न सहते स्म, यथा अलमनेनालीकप्रशंसावचनेन, ये हि शिखरसहस्राग्रभागोल्लिखितनभोमण्डलतलाः कुलाचलादयः शिखरिणः तेऽपि महा(दा)ऽऽसारोपनिपातेन भिद्यमानाः शतशो भेदमुपयान्ति, किं पुनः स वराको यो मदेकधारोपनिपातमात्रमपि न सहते ?, तदेवमुत्प्रासितो मुद्गशैलः, समुज्जवलितकोपानलोऽहङ्कारपुरस्सरं तमेवमवादीत्- भो नारदमहर्षे! किमत्र तं प्रति परोक्षे बहुजल्पितेन ?, शृणु मे भाषितमेकं, यदि तेन दुरात्मन सप्ताहोरात्रवर्षिणाऽपि मे तिलतुषसहस्रांशमात्रमपि भिद्यते ततोऽहं मुद्गशैलनामापि नोद्वहामि,

ततः स पुरुषोऽमूनि मुद्गशैलवचांसि चेतस्यवधार्य कलहोत्थानाय पुष्करावर्त्तमेघसमीपमुपागमत्, मुद्गशैलवचनानि सर्वाण्यपि सोत्कर्षं तस्य पुरतोऽन्ववादीत्, स च श्रुत्वा तानि वचनानि कोपमतीवाशिश्रियत्, स च पुरुषाणि वचनानी वक्तुं प्रावर्त्तिष्ट यथा-हा दुष्टः स वराकोऽनात्मज्ञो मामप्येवमधिक्षिपतीति, ततः सर्वादरेण सप्ताहोरात्रान् यावत् निरन्तरं मुशलप्रमाणधारोपनिपातेन वर्षितमयतिष्ट, सप्ताहोरात्रनिरन्तरवृष्टया च सकलमपि विश्वम्भरामण्डलं जलप्लावितमासीत्, तत एकार्णवकल्पं विश्वमालोक्य चिन्तितवान्हतः समूलघातं स वराक इति, ततः प्रतिनिवृत्तो वर्षात्, क्रमेण चापसृते जलसङ्घाते सहर्षं पुष्करावर्त्ती नारदमेवमवादीत्-भो नारद! स वराकः सम्प्रति कामवस्थामुपागतो वर्त्तते इति सहैव निरीक्ष्यतां, ततः तौ सहभूय मुद्गशैलस्य पार्श्वमगमतां, स च मुद्गशैलः पूर्वं धूलीधूसरशरीरत्वात् मन्दं मन्दमकाशिष्ट, सम्प्रति तु तस्यापि धूलेरपनयनादधि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

करतरमवभासमानो वर्त्तते, ततः स चाकचिक्यमादधानो हसन्निव नारदपुष्करावर्त्तौ समागच्छ-न्तावेवमभाषि-समागच्छत २, स्वागतं युष्माकम् ?,

अहो कृतकल्याणा वयं यदतर्कितोपनीतकाञ्चनवृष्टिरिव युष्मद्दर्शनमकाण्ड एव मन्मनो-मोदाधायि संवृत्तमिति, तत एवमुक्ते भ्रष्टप्रतिज्ञमात्मानवबुध्य लज्जावनतकन्धराशिरोनयनः पुष्करावर्त्तो यत्किञ्चिदाभाष्य स्वस्थानं गतः, एष दृष्टान्तः, उपनयस्त्वयम्-कोऽपि शिष्यो मुद्गशैलसमानधर्मा निरन्तरं यततः पाठ्यमानोऽपि पदमप्येकं भावतो नावगाहते, ततोऽयोग्योऽय-मितिकृतवा स्वाचार्येरुपेक्षितः, तं च तथोपेक्षितमवबुध्य कोऽप्यन्य आचार्योऽभिनवतरुणिमा-वेगवशोज्जृम्भितमहाबलपराक्रमः अत एवागणितव्याख्याविधिपरिश्रमो यौवनिकमदव-शतोऽपरिभावितगुणागुणविवेको वक्तुमेवं प्रवृत्तो-यथेनमहं पाठयिष्यामि, पठति च लोकानां पुरतः सुभाषितम्-

'आचार्यस्यैव तज्जाड्यं, यच्छिष्यो नावबुध्यते।
गावो गोपालकेनेव, कुतीर्थे नावतारिताः ॥'

ततः तं सर्वादरेण पाठयितुं लग्नः, स च मुद्गशैल इव दृढप्रतिज्ञो न भावतः पदमप्येकं स्वचेतसि परिणमयंति, ततः खिन्नशक्तिराचार्यो भ्रष्टप्रतिज्ञमात्मानां जानानो लज्जितो यत्किमप्युत्तरं कृत्वा तत्स्थानादपसृत्य गतः, ततः एवं विधाय नेदमध्ययनं दातव्यम्, यतो न खलु वन्ध्या गौः शिरः-शृङ्गवदनपृष्ठपृच्छोदरादौ सस्नेहं स्पृष्टाऽपि सती दुग्धप्रदायिनी भवति, तथास्वाभाव्याद्, एवमेषोऽपि सम्यक् पाठ्यमानोऽपि पदमप्येकं नावगाहते, ततो न तस्य तावदुपकारः, आस्तां तस्योपकाराभावः प्रत्युत आचार्ये सूत्रे चापकीर्त्तिरुपजायते, यथा न सम्यकौशलमाचार्यस्य व्याख्यायामिदं वाऽध्ययनं न समीचीनं, कथमयमन्यथा नावबुध्यते इति ?, अपि च-

तथाविधकुशिष्यपाठने तस्यावबोधाभावात् उत्तरोत्तरसूत्रार्थनवगाहने सूरेः सकलावपि शास्त्रा-न्तरगतौ सूत्रार्थौ भ्रंशमाविशतः, अन्येषामपि च पटुश्रोतृणामुत्तरोत्तरसूत्रार्थावगाहनहानिप्रसङ्गः, उक्तं च भाष्यकारेण-

"आयरिए सुत्तंमि य परिवाओ सुत्तअत्थपलिमन्थो।
अन्नेसिंपि य हानी पुट्ठावि न दुद्धया वंझा॥"

मुद्गशैलप्रतिपक्षभूतो योग्यशिष्यविषयो दृष्टान्तः कृष्णभूमिप्रदेशः, तत्र हि प्रभूतमपि जलं निपतितं तत्रैवान्तः परिणमति, न पुनः किञ्चिदपि ततो बहिरपगच्छति, एवं यो विनयेः सकल-सूत्रार्थग्रहणधारणासमर्थः स कृष्णभूमिप्रदेशतुल्यः स च योग्यः, ततस्तस्मै दातव्यमिदमध्ययन-मिति, आह च भाष्यकृत-

"वुट्ठेऽवि दोणमेहे न कण्हभोमाउ लोट्टए उदयं।
गहणधरणासमत्थे इय देयमछित्तिकारंमि॥"

सम्प्रति कुटदृष्टान्तभावना क्रियते-कुटा-घटाः ते द्विधा-नवीना जीर्णाश्च, तत्र नवीना नाम ये सम्प्रत्येवापाकतः समानीताः, जीर्णा द्विधा-भाविता अभाविताश्च, भाविता द्विधा-प्रशस्त-द्रव्यभाविता अप्रशस्तद्रव्यभाविताश्च, तत्र ये कर्पूरागुरुचन्दनादिभिः प्रशस्तैर्द्रव्यैर्भाविताः ते प्रशस्तद्रव्यभाविताः, ये पुनः पलाण्डुलशुनसुरातैलादिभिर्भाविताः तेऽप्रशस्तद्रव्यभाविताः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रशस्त(द्रव्य)भा विता अपि द्विधा-वाम्या अवाम्याश्च, अभाविता नाम ये केनापि द्रव्येण न वासिता:, एवं शिष्या अपि प्रथमतो द्विधा-नवीना जीर्णाश्च, तत्र प्रथमतो ये बालभाव एवाद्यापि वर्त्तन्ते अज्ञानिन: सम्प्रत्येव च बोधयितुमारब्धास्ते नवीना:, जीर्णा द्विधा-भाविता अभाविताश्च, तत्राभाविता ये केनापि दर्शनेन न वासिता:, भाविता द्विधा-कुप्रावचनिकपार्श्वस्थादिभि: संविग्नैश्च, कुप्रावचनिकपार्श्वस्थादिभिरपि भाविता द्विधा वाम्या अवाम्याश्च, संविग्नैरपि भाविता द्विधा-वाम्या अवाम्याश्च, तत्र ये नवीना ये जीर्णा अभाविता ये च कुप्रावचनिकादिभाविता अपि वाम्या: ये च संविग्नभाविता आवम्या: ते सर्वेऽपि योग्या:, शेषा अयोग्या:।

अथवा अन्यथा कुटदृष्टान्तभावना-इह चत्वार: कुटा: तद्यथा-छिद्रकुट: कण्ठहीनकुट: खण्ड-कुट: सम्पूर्णकुटश्च, तत्र यस्याधो बुध्ने छिद्रं स छिद्रकुट:, यस्य पुनरोष्ठपरिमण्डलाभाव: स कण्ठहीनकुट:, यस्य पुनरेकपाश्र्वे खण्डेन हीन: स खण्डकुट:, य: पुन: सम्पूर्णावयव: स सम्पूर्णकुट:, एवं शिष्या अपि चत्वारो वेदितव्या, तत्र यो व्याख्यानमण्डल्यामुपविष्ट: सर्वमवबुध्यते व्याख्यानादुत्थितश्च न किमपि स्मरति स छिद्रकुटसमानो, यथा हि छिद्रकुटो यावत्तदवस्थ एव गाढमवनितलसलग्नोऽवतिष्ठते तावत् न किमपि जलं तत: स्रवति, स्तोकं वा किञ्चिदिति, एवमेषोऽपि यावदाचार्य: पूर्वापरानुसन्धाने सूत्रार्थमुपदिशति तावदवबुध्यते, उत्थितश्चेद् व्याख्यानमण्डल्या: तर्हि स्वयं पूर्वापरानुसन्धानाशक्तिविकलत्वात् न किमप्यनुस्मरतीति, यस्तु व्याख्यानमण्डल्यामप्युपविष्टोऽर्द्धमात्रं त्रिभागं चतुर्भागं हीनं वा सूत्रार्थमवधारयति यथावधारितं च स्मरति स खण्डकुटसमान:, यस्तु किञ्चिदूनं सूत्रार्थमवधारयति पश्चादपि तथैव स्मरति स कण्ठहीनकुटसमान:, यस्तु सकलमपि सूत्रार्थमाचार्योक्तं यथावदवधारयति पश्चादपि तथैव स्मृतिपथमवतारयति स सम्पूर्णकुटसमान:, अत्र छिद्रकुटसमान एकान्तेनायोग्य:, शेषास्तु योग्या:, यथोत्तरं च प्रधाना: प्रधानतरा इति ॥

सम्प्रति चालनीदृष्टान्तभावाना-चालनी लोकप्रसिद्धा यथा कणिक्कादि चाल्यते, यथा चाल-न्यामुदकं प्रक्षिप्यमाणं तत्क्षणादेवाधो गच्छति न पुन: कियन्तमति कालमवतिष्ठते, तथा यस्य सूत्रार्थ: प्रदीयमानो यदैव कर्णे विशति तदैव विस्मृतिपथमुपैति स चालनीसमान: ॥

तथा मुद्गशैलच्छिद्रकुटचालनीसमानशिष्यभेदप्रदर्शनार्थमुक्तं भाष्यकृता-

"सेलेयछिड्डुचालनि मिहोकहा सोउमुट्ठियाणं तु।
छिद्दाऽऽह तत्थ बिट्ठो सुमरिंसु समरामि नेयाणिं ॥१॥
एगेन विसइ बीएण नीइ कण्णेण चालनी आह।
धन्नोऽत्थ आह सेलो जं पविसइ नीइ वा तुज्झं ॥२॥"

तत एषोऽपि चालनीसमानो न योग्य: चालनीप्रतिपक्षभूतं च वंशदलनिर्मापितं तापसभाजनं, ततो हि बिन्दुमात्रमपि जलं न स्रवति, उक्तं च-

"तावसखउरकढिणयं चालनिपडिवक्ख न सवइ दवंपि।
तत: तत्समानो योग्य इति ॥"

सम्प्रति परिपूर्णकदृष्टान्तो भाव्यते-परिपूर्णको नाम घृतक्षीरगालनकं सुगृहाभिधचटिका-कुलायो वा, तेन ह्याभीर्यो घृतं गालयन्ति, ततो यथा स परिपूर्णक: कचवरं धारयति घृतमुज्झति,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथा शिष्योऽपि यो व्याख्यावाचनादौ दोषानभिगृह्णाति गुणांस्तु मुञ्चति स परिपूर्णकसमानः, स चायोग्य, आह च आवश्यकचूर्णिकृत-

"वक्खाणाइसु दोसे हिययंमि ठवेइ मुयइ गुणजालं।
सो सीसो उ अजोग्गो भणिओ परिपूणगसमानो ॥"

आह-सर्वज्ञमतेऽपि दोषाः सम्भवन्तीत्यश्रद्धेयमेतत्, सत्यम्, उक्तमत्र भाष्यकृता-

"सव्वण्णुप्पामण्णा दोसा हु न संति जिनमए केवि।
जं अनुवउत्तवकहणं अपत्तमासज्ज व हवंति ॥"

सम्प्रति हंसदृष्टान्तभावना, यथा हंसः क्षीरमुदकमिश्रितमप्युदकमपहाय क्षीरमापिबति तथा शिष्योऽपि यो गुरोरनुपयोगसम्भवान् दोषानवधूय गुणानेव केवलानादत्ते स हंससमानः, स चैकान्तेन योग्यः।

ननु हंसः क्षीरमुदकमिश्रितमपि कथं विभक्तीकरोति ?, येन क्षीरमेव केवलमापिबति न तूदकमिति, उच्यते, तज्जिह्वाया अम्लत्वेन क्षीरस्य कूर्चिकीभूय पृथग्मभवनात्, उक्तं च-

"अंबत्तणेण जीहाए कूचिया होइ खीरमुदयंमि।
हंसो मोत्तूण जलं आवियइ पयं तह सुसीसो ॥"
मोत्तूण दढं दोसे गुरुणोऽनुवउत्तभासियाइंपि।
गिण्हइ गुणे उ जो सो जोग्गो समयत्थसारस्स ॥"

इदानीं महिषदृष्टान्तभावना-यथा महिषो निपातस्थानमवाप्तः सन् उदकमध्ये प्रविश्य तदुदकं मुहुर्मुहुः शृङ्गाभ्यां ताडयन्नवगाहमानश्च सकलमपि कलुषीकरोति, ततो न स्वयं पातुं शक्नोति नापि यूथं, तद्वत्, शिष्योऽपि यो व्याख्यानप्रबन्धावसरेऽकाण्ड एव क्षुद्रपृच्छादिभिः कलह-विकथादिभिर्वाऽऽत्मनः परेषां चानुयोगश्रवणविधातमाधत्ते स महिषसमानः, स चैकान्तेनायोग्यः,

"सयमवि न पियइ महिसो न य जूहं पिबति लोलियं उदयं।
विग्गहविकहाहिं तहा अथक्कपुच्छाहि य कुसीसो ॥"

मेषोदाहरणभावना-यथा मेषो वदनस्य तनुत्वात् स्वयं च निभृतात्मा गोष्पदमात्रस्थितिमपि जलमकलुषीकुर्वन् पिबति तथा शिष्योऽपि यः पदमात्रमपि विनयपुरस्सरमाचार्यचित्तं प्रसादयन् पृच्छति स मेषसमानः, स चैकान्तेन योग्यः ॥

मसकदृष्टान्तभावना-यः शिष्यो मसक इव जात्यादिदोषानुद्घट्टयन् गुरोर्मनसि व्यथामुत्पा-दयति स मसकसमानः, स चायोग्यः ॥

जलौकदृष्टान्तभावना-यथा जलौकाः शरीरमदुन्वती रुधिरमाकर्षति, तथा शिष्योऽपि यो गुरुमदुन्वन् श्रुतज्ञानं पिबति स जलौकासमानः, उक्तं च-

"जलुगा व अदूमिंतो पियइ सुसीसोऽवि सुयनाणं।"

बिडालीदृष्टान्तभावना-यथा बिडाली भाजनसंस्थं क्षीरं भूमौ विनिपात्य पिबति, तथादुष्ट-स्वभावत्वाद्, एवं शिष्योऽपि यो विनयकरणादिहीनतया न साक्षाद् गुरुसमीपे गत्वा शृणोति, किन्तु व्याख्यानादुत्थितेभ्यः केभ्यश्चित्, स बिडालीसमानः, स चायोग्यः ॥

तथा जाहकः-तिर्यग्विशेषः, तत्र दृष्टान्तभावना-यथा जाहकः स्तोकं २ क्षीरं पीत्वा पार्श्वाणि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लेढि, तथा शिष्योऽपि यः पूर्वं गृहीतं सूत्रमर्थं वाऽतिपरिचितं कृत्वाऽन्यत्पृच्छति, स जाहकसमानः, स च योग्यः ॥

सम्प्रति गोदृष्टान्तभावना क्रियते-यथा केनापि कौटुम्बिकेन कस्मिंश्चित् पर्व्वणि चतुर्भ्यश्चतुर्वेदपारगामिकेभ्यो विप्रेभ्यो गौर्दत्ता, ततः ते परस्परमेवं चिन्तयामासुः-यथेयमेका गौश्चतुर्णामस्माकं ततः कथं कर्त्तव्या ?, तत्रैकेनोक्तं-परिपाट्या दुह्यतामिति, तच्च समीचीनं प्रतिभातमिति सर्वैः प्रतिपन्नं, ततो यस्य प्रथमदिवसे गौरागता तेन चिन्तितं-यथाऽमद्यैव धोक्ष्यामि, कल्ये पुनरन्यो धोक्ष्यति, ततः किं निरर्थिकामस्याश्चारिं वहामि, ततो न किञ्चिदपि तस्यै तेन दत्तं, एवं शेषैरपि, ततः सा श्वपाककुलनिपतितेव तृणसलिलादिविरहिता गतासुरभूत, ततः समुत्थितः तेषां धिग्जातीयानामवर्णवादो लोके शेषगोदानादिलाभव्यवच्छेदश्च, एवं शिष्या अपि ये चिन्तयन्ति-न खलु केवलानामस्माकमाचार्यो व्याख्यानयति, किन्तु प्रातीच्छिकानामपि, ततस्त एव विनयादिकं करिष्यन्ति, किमस्माकमिति ?, प्रातीच्छिका अप्येवं चिन्तन्ति-निजशिष्याः सर्वं करिष्यन्ति, किमस्माकं कियत्कालावस्थायिनामिति ?, ततस्तेषामेवं चिन्तयतामपान्तराल एवाचार्योऽवसीदति, लोके च तेषामवर्णवादो जायते, अन्यत्रापि च गच्छान्तरे दुर्लभौ तेषां सूत्रार्थौ, ततस्ते गोप्रतिग्राहकचतुर्द्विजातय इवायोग्या द्रष्टव्याः, उक्तं च-

"अन्नो दुज्जिहि कल्लं निरत्थयं से वहामि किं चारिं ? ।
चउचरणगविउ मया अवण्ण हानी उ बडुआणं ॥१॥
सीसा पडिच्छिगाणं भरोत्ति तेऽवि हु सीसगभरोत्ति ।
न करेंति सुत्तहानी अन्नत्थवि दुल्लहं तेसिं ॥२॥"

एष एव गोदृष्टान्तः प्रतिपेक्षाऽपि योजनीयः, यथा कश्चित् कौटुम्बिको धर्मश्रद्धया चतुर्भ्यश्चतुर्वेदपारगामिभ्यो गां दत्तवान्, तेऽपि च पूर्ववत्परिपाट्या दोग्धुमारब्धाः, तत्र यस्य प्रथमदिवसे सा गौरागता स चिन्तितवान्-यद्यहमस्याश्चारिं न दास्यामि ततः क्षुधा धातुक्षयादेषा प्राणानपहास्यति, ततो लोकेषु मे गोहत्याऽवर्णवादो भविष्यति, पुनरपि चास्मभ्यं न कोऽपि गवादिकं दास्यति, अपि च-यदि मदीयचारिचरणेन पुष्टा सती शषैरपि ब्राह्मणैर्धोक्ष्यते ततो मे महाननुग्रहो भविष्यति, अहमपि च परिपाट्या पुनरप्येनां धोक्ष्यामि, ततोऽवश्यमस्ये दातव्या चारिरिति ददौ चारिं, एवं शेषा अपि ददुः, ततः सर्वेऽपि चिरकालं दुग्धाभ्यवहारभाजिनो जाताः, लोकेऽपि समुच्छलितः साधुवादो, लभन्ते च प्रभूतमन्यदपि गवादिकं, एवं योऽपि विनेयाश्चिन्तयन्ति-यदि वयमाचार्यस्य न किमपि विनयादिकं विधातारः तत एषोऽवसीदन्नावश्यमपगतासुर्भविष्यति, लोके च कुशिष्या एते इत्यवर्णवादो विजृम्भिष्यते, ततो गच्छान्तरेऽपि न वयमवकाशं लप्स्यामहे, अपि च-अस्माकमेष प्रव्रज्याशिक्षाव्रतारोपणादिविधानतो महानुपकारी, सम्प्रति च जगति दुर्लभं श्रुतरत्नमुपयच्छन् वर्त्तते, ततोऽवश्यमेतस्य विनयादिकमस्माभिः कर्त्तव्यम्, अन्यच्च-यद्यस्मदीयविनयादिसहायकबलेन प्रातीच्छिकानामप्याचार्यत उपकारः किमस्माभिर्न लब्धम् ?, द्विगुणतरपुण्यलाभश्चास्माकं भवेत्, प्रातीच्छिका अपि ये चिन्तयन्ति-अनुपकृतोपकारी भगवानाचार्योऽस्माकं, को नामान्वो महान्तमेवं व्याख्याप्रयासमस्मन्निमित्तं विदधाति ?, ततः किमेतेषां वयं प्रत्युपकर्त्तुं शक्ताः ?, तथापि यत् कुर्म्मः सोऽस्माकं महान् लाभ इति परनिरपेक्षं

विनयादिकमादधते, तेषां नावसीदत्याचार्यः अव्यवच्छिन्ना सूत्रार्थप्रवृत्तिः समुच्छलति च सर्वत्र साधुवादः गच्छान्तरे च तेषां सुलभं श्रुतज्ञानं परलोके च सुगत्यादिलाभ इति॥

सम्प्रति भेरीदृष्टान्तभावना-इह शक्रादेशेन वैश्रवणयक्षनिर्मापितायां काञ्चनमयप्राकारादिपरिकरितायां पुरि द्वारवत्यां त्रिखण्डभरतार्द्धाधिपत्वमनुभवति केशवे कदाचिदशिवमुपतस्थौ। इतश्च द्वात्रिंशद्विमानशतसहस्रसंकुले सौधर्म्मकल्पे सुधर्माभिधसभोपविष्टः सर्वतो दिवौकः-पर्युपास्यमानः शक्राभिधानो मघवा पुरुषगुणविचारणाधीकारे केशवमिहावस्थितमवधिना समधिगम्य सामान्यतः तत्प्रशंसामकार्षित्-अहो महानुभाव विष्णवो यद्दोषबहुलेऽपि वस्तुनि स्वभावतो गुणमेव गृह्णन्ति, न दोषलेशमपि, न च नीचयुद्धेन युध्यन्ते इति, इत्थं च मघवता केशवस्तुतिमभिधीयमानामसहमानः कोऽपि दिवौकाः परीक्षार्थमिहावतीर्य येन पथा भगवदरिष्टनेमिनमस्करणाय केशवो यास्यति तस्मिन् पथि अपान्तराले क्वचित् प्रदेशे समुत्रासितसकलजनमहादुरभिगन्धसंकुलमतीव दीप्यमानमहाकालिमकलितं विवृतमुखमुत्पादितश्वेतदन्तपंक्ति गतप्राणमिव शुनो रूपं विधाय प्रातरवतस्थे, केशवोऽपि चोज्जयन्तगिरिसमवसृतभगवदरिष्ठनेमिनमस्कृतये तेन पथा मन्तुं प्रववृतये, पुरोयायी च पदात्यादिवर्गः समस्तोऽपि तद्गन्धसमुत्त्रासितो वस्त्राञ्चलपिहितनासिकस्त्वरितमितस्ततो गन्तु मारेभे, ततः पृष्टं केशवेन-किमिति पुरोयायिनः सर्वे पिहितनासिकाः समुन्त्रासमादधते?, ततः कोऽपि विदितवेद्यो विज्ञपयामास-देव! पुरो महापूतिगन्धिः श्वा मृतो वर्त्तते, तद्गन्धमसहमानः सर्वोऽपि त्रासमगमत्, केशवो महोत्तमतया तद्गन्धादनुत्रस्यन् तेन पथा गन्तुं प्रवृत्तः, अवैक्षिष्ट च तं मृतं श्वानं, परिभावयामास च सकलमपि तस्य रूपं, ततो गुणप्रशंसामकर्त्तुमशक्नुवन् प्रशंसितुमारभते स्म-अहो जात्यमरकतमयभाजनविनिवेशितमुक्तामणिश्रेणिरिव शोभते अस्य वपुषि कालिमकलिते श्वेतदन्तपद्धतिरिति, तां च प्रशंसां श्रुत्वा सविस्मयं सुरसद्मजन्मा चिन्तयामास-अहो यथोक्तं मघवता तथैवेति।

ततो दूर गते केशवे तद्रूपमुपसंहृत्य कियत्कालं स्थित्वा गृहमागते केशवे युद्धपरीक्षानिमित्तं मन्दुरागतमेकमश्वरत्नं सकललोकसमक्षमपहृतवान्, धावितश्च मार्गतः सर्वोऽप्युद्गीर्णखड्गकुन्तादिरङ्गरक्षकादिपदातिवर्गः, समुच्छलितश्च महान् कोलाहलो, ज्ञातश्चायं व्यतिकरः केशवेन, प्रधाविताश्च सकोपं दिशोदिशं सर्वेऽपि कुमाराः मुञ्चन्ति च यथाशक्ति प्रहरान्, परं सुरो दिव्यशक्त्या तान् सर्वानपि लीलया विजित्य मन्दं मन्दं गन्तुं प्रवृत्तः, ततः प्राप्तः केशवः पृष्टश्च तेनाश्वापहारी-भोः किं मदीयमश्वरत्नमपहरसि?, तेनोक्तं-शक्नोम्यपहर्तुं, यदि पुनरस्ति ते काऽपि शक्तिस्तर्हि मां युद्धे विनिर्जित्य परिगृहाण, ततः केशवः तत्पौरषरञ्जितमनस्कः सहर्षमेवमावदीत्-भो महापुरुष! येन युद्धेन ब्रूषे तेन युद्धेऽहं, ततः सर्वाण्यपि युद्धानि केशवो नामग्रहं वक्तुं प्रवृत्तः, प्रतिषेधति च सर्वाण्यपि सुरसद्मजन्मा, ततो भूयः केशवो वदति-कथय केन युद्धेन युद्धेऽहमिति?, ततः स प्राह-पुतयुद्धेन, ततः कर्णौ पिधाय शल्यितहृदय इव हाशब्दव्याहारपुरस्सरं तं प्रत्येवमवादीत्-गच्छ गच्छाश्वरत्नमपि गृहीत्वा, नाहं नीचयुद्धेन युद्धे इति, तत एतत् श्रुत्वा हर्षवशोज्जृम्भितपुलकमालोपशोभितं वपुरादधानः सविस्मयं सुरसद्मजन्मा स्वचेतसि चिन्तयामास-अहो महोत्तमता केशवानाम्, अत एव शतसहस्तसङ्ख्यनमदमरकिरीटकोटी-सङ्घर्षमसृणीकृतपादपीठानां मघवतामप्येते प्रशंसार्हाः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत एवं चिन्तयित्वा सानन्दमवेक्षमाणो वक्तुं प्रवृत्तो भोः केशव ! नाहमश्वापहारी, किन्तु त्वद्गुणपरीक्षानिमित्तमेवं कृतवान्, ततः सकलमपि शक्रप्रशंसादिकं प्रर्ववृत्तान्तमचकथत्, ततः स्वगुणप्रशंसाश्रवणलज्जितोऽवनतमनाकन्धरः कुड्मलितकरसम्पुटो जनार्द्दनः तमुदन्तपर्यन्ते मुत्कलयामास स्वस्थाने, सुरोऽपि च सकलविश्वासाधारणकेशवगुणदर्शनतो हृष्टमनास्तं प्रत्येवमवादीत्-महापुरुष ! देवदर्शनममोघं मनुजजन्मनामिति प्रवाहो जगति प्रसिद्धो मा विफलतामापदिति वद किञ्चिदभीष्टं येन करोमीति, ततः केशवोऽब्रवीद्-वर्त्तते सम्प्रति द्वारवत्यामशिवं, ततस्तत्प्रतिविधानमातिष्ठ, येन भूयोऽपि न भवति, ततो गोशीर्षचन्दमयीमशिवोपशमिनीं देवो भेरीमदात्, कल्पं चास्याः कथयामास-यथा षण्मासषण्मासपर्यन्ते निजाऽऽस्थानमण्डपे वाद्यैषा भेरी, शब्दश्चास्याः सर्वतो द्वादशयोजनव्यापी जलभृतमेघध्वनिरिव गम्भीरो विजृम्भिष्यते, यश्च शब्दं श्रोष्यति तस्य प्राक्तनो व्याधिर्नियमतोऽपयास्यति, भावी च भूयः षण्मासादर्वाक् न भविष्यति, ततः एवमुक्त्वा देवः स्वस्थानमगमत् । वासुदेवोऽपि तां भेरीं सदैव भेरीताडननियुक्ताय समर्प्पितवान्, शिक्षां चास्मै ददौ यथा -

षण्मासषण्मासपर्यन्ते ममास्थानमण्डपे वाद्यैषा त्वया भेरी, यत्नतश्चावनीया, ततः सकलस्वलोकसामन्तादिबलसमन्वितो निजप्रासादमायासीत्, मुत्कालितश्च प्रतीहारेण सर्वोऽपि लोकः, ततो द्वितीयदिवसे मुकुटोपशोभितानेकपार्थिवसहस्रपर्युपास्यमानो निजास्थानमण्डपे विशिष्टसिंहासनोपविष्टः शक्र इव देवैः परिवृतो विराजमानस्तां भेरीमताडयत्, भेरीशब्दश्रवणसमनन्तरमेव च दिनपतिकरनिकरताडितमन्धकारमिव द्वारवतीपुरि सकलमपि रोगजालं विध्वंसमुपागमत्, ततः प्रमुदितः सर्वोऽपि पौरलोकः, आशास्ते च सदैवाधिपतित्वेन जनार्द्दनं, तत एवं व्याधिविकले गच्छति काले कोऽपि दूरदेशान्तरवर्त्ती धानढ्य महारोगाभिभूतो भेरीशब्दमाहात्म्यमाकर्ण्य द्वारवतीमगमत्, स दैवविनियोगाभ्देरीताडनदिवसातिक्रमे प्राप्तः, ततोऽचिन्तयत्-

कथमिदानीमहं भविष्यामि ?, यतो भूयो भेरीताडनं षण्मासातिक्रमे, षड्भिश्च मासैरेष प्रवर्द्धमानो व्याधिरसूनपि नियमात् कवलयिष्यति, ततः किं करोमीति ?, ततः इत्थं कतिपयदिनानि चिन्ताशोकसागरनिमग्नः कथमपि शेमुषीपोतमासाद्योन्मंक्तु लग्नो-यथा यदि तस्याः शब्दतोऽपि रोगोऽपयाति ततः तदेकदेशस्य घर्षित्वा पाने सुतरामपयास्यति, प्रभूतं च मे स्वं, ततः प्रलोभयामि धनेन ढाक्किकं, येन तच्छकलमेकं मे समर्प्पयति, ततः प्रलोभितो धनेन ढाक्किको, नीचसत्त्वा हि दुष्टदारा इव निरन्तरं धनादिभिः सन्मान्यमाना अपि व्यभिचरन्ति निजपतेः, ततस्तेन तच्छकलमेकं तस्मै व्यतिरिष्टि, तत्स्थाने च तस्यामन्यच्छकलं योजितम्, एवमन्यान्यदेशान्तरायातरोगिजनेभ्यो धनलुब्धतया खण्डखण्डप्रदाने सकलापि भेरी कन्थेव खण्डसङ्घातात्मिका कृता, ततोऽपगतो दिव्यप्रभावः, ततस्तदवस्थमेवाशिवं प्रावर्त्तिष्ट, समुत्थितश्च रावोऽशिवप्रादुर्भावविषयः पौरजनानां, विज्ञप्तश्च महत्तरैर्जनार्द्दनो-देव ! भूयोऽपि विजृम्भते वर्षासु कृष्णशर्वर्यामन्धकारमिव पुरि द्वारवत्यां महदशिवं, ततः प्रातरास्थानमण्डपे सिंहासने समुपविशयाकारितो भेरीताडननियुक्तः पुमान्, दत्तश्चादेशोऽस्मै भेरीताडने, ततस्ताडिता तेन भेरी, साऽपगतदिव्यप्रभावा न भांकारशब्देनास्थानमण्डपमात्रमपि पूरयति, ततो विस्मितो जनार्द्दनो-यथा किमेषा नास्थानमण्डपमपि भाङ्कारशब्देन पूरयितुं शक्तवती ?, ततः स्वयं निभालयामास तां भेरीं, दृष्टा च सा महादरिद्रकन्थेव लघुलघुतरश-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कलसहस्रसङ्घातात्मिका, ततश्चुकोप तस्मै जनार्दनो-रे दुष्टाधम ! किमिदमकार्षीः ?,

ततः स प्राणभयात् सकलमपि यथावस्थितमचीकथत्, ततो महानर्थकारित्वात् स तत्काल-मेव निरोपितो विनाशाय, ततो भूयोऽपि जनार्दनो जनानुकम्पया पौषधशालामुपगम्याष्टमभक्त-विधानतरतं देवमाराधयामास, ततः प्रत्यक्षीबभूव देवः, कथितवांश्च जनार्दनः प्रयोजनं, ततो भूयोऽपि दत्तवान् अशिवोपशमनीं भेरीं, तां च आप्तत्वेन सुनिश्चिताय कृष्णः समर्पयामास। एष दृष्टान्तः, अयमर्थोपनयः-यथा भेरी तथा प्रवचनावगतौ सूत्रार्थौ, यथा भेरीशब्दश्रवणतो रोगापगमः तथा सिद्धान्तस्य प्रभावश्रवणतो जन्तूनां कर्मविनाशः, ततो यः सूत्रार्थावपान्तराले विस्मृत्य विस्मृ-त्यान्यतः सूत्रमर्थं वा संयोज्य कन्थासमानौ करोति स भेरीताडननियुक्तप्रथमपुरुषसमानः, स चैकान्तेनायोग्यः, यस्त्वाचार्यप्रणीतौ सूत्रार्थौ यथावदवधारयति स भेरीताडननियुक्तपाश्चात्य-पुरुष इव कल्याणसम्पदे योग्यः ॥

सम्प्रत्याभीरीदृष्टान्तभावना-कश्चिदाभीरो निजभार्यया सह विक्रयाय घृतं गन्त्र्या गृहीत्वा पत्तनमवतीर्ण्णः, चतुष्पथे समागत्य वणिगापणेषु पणायितुं प्रवृत्तो, घटितश्च पणाय संटङ्कः, ततः समारब्धे घृतमापे गन्त्र्या अधस्तादवस्थिता आभीरी, घृतं भर्त्रा वारकेण समर्प्यमाणं प्रतीच्छती-ति, ततः कथमप्यर्पणे ग्रहणे वाऽनुपयोगतोऽपान्तराले वारकापरपर्यायो लघुघृतघटो भूमौ निपत्य खण्डशो भग्नः, ततो घृतहानिदूनमनाः पतिरुल्लपितुं स्वरपरुषवाक्यानि प्रावर्त्तत, यथा हा पापी-यसि ! दुःशीले कामविडम्बितमानसा तरुणतरुणिमाभिरमणीयं पुरुषान्तरमवलोकसे न सम्यग् घृतघटमभिगृह्णासि, ततः सा खरपरुषवाक्यश्रवणतः समुद्भूतकोपावेशवशोच्छलितकम्प-कम्पितपीनपयोधरा स्फुरदधरबिम्बोष्ठी दूरोत्पाटितभ्रूरेखाधनुरवष्टम्भतो नाराचश्रेणिमिव कृष्णकटाक्षसन्ततिमविरतं प्रतिक्षिपन्ती प्रत्युवाच-हा ग्रामेयकाधम ! घृतधटमप्यवगणय्य विदग्धमत्तकामिनीनां मुखारविन्दान्यवलोकसे, न चैतावताऽवतिष्ठसे, ततः खरपरुषवाक्यै-र्मामप्यधिक्षिपसि, ततः स एवं प्रत्युक्तोऽतीव ज्वलितकोपानलोऽपि यदकिञ्चिदसम्बद्धं भाषितुं लग्नः, साऽप्येवं, ततः समभूत्तयोः केशाकेशि, ततो विसंस्थुलपादादिन्यासतः सकलमपि प्रायो गन्त्रीधृतं भूमौ पतितं, तच्च किञ्चिच्छोषमुपगतमवशेषं चावलीढं श्वभिः, गन्त्रीधृतमपि शेषीभूतमपहृतं पश्यतोहरैः, सार्थिका अपि स्वं स्वं धृतं विक्रीय स्वग्रामगमनं प्रपन्नाः, ततः प्रभूतदिवसभागातिक्रमेणापसृते युद्धे स्वास्थ्ये च लब्धे यत्किञ्चित्प्रथमतो विक्रयामासतुर्घृतं तद्द्रव्यमादाय तयोः स्वग्रामं गच्छतोरपान्तरालेऽस्तं गते सहस्रमानौ सर्वतः प्रसरमभिगृह्णति तमोविताने परास्कन्दिनः समागत्य वासांसि द्रव्यं बलीवर्दौ चापहृतवन्तः, तत एवं तौ महतो दुःखस्य भाजनमजायेताम्। एष दृष्टान्तोऽयमर्थोपनयः यो विनेयोऽन्यथा प्ररूपयन् अधीयानो वा कथमपि खरपरुषवाक्यैराचार्येण शिक्षितोऽधिक्षेपपुरस्सरं प्रतिवदति-यथा त्वयैवेत्थमहं शिक्षितः, किमिदानीं निह्नुषे ? इत्यादि, स न केवलमात्मानं संसारे पातयति, किन्त्वाचार्यमपि खरपरुषप्रत्युच्चारणादिना तीव्रतीव्रतरकोपानलज्वालनात्, भवन्ति च कुविनेया मृदोरपि गुरोः खरपरुषप्रत्युच्चारणादिना कोपप्रकोपाः, यत उक्तमुत्तराध्ययनेषु-

"अनासवा थूलवया कुसीला, मिउंपि चंडं पकरेंति सीसा" इति ॥

अपि च-गुणगुरवो गुरवः, ततस्ते यदि कथमपि दुष्टशिष्यशिक्षापनने कोपमुपागमत् तथापि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तेषां भगवदाज्ञाविलोपतो गुर्वाशातनातश्चोपचिताशुभगुरुकर्मा नियमतो दीर्घतरसंसारभागी, किञ्च-एवं स वर्त्तमानो मतिमानपि श्रुतरत्नाद्बहिर्भवति, अन्यत्रापि तस्य दुर्लभश्रुतत्वात्, को हि नाम सचेतनो दीर्घतरजीविताभिलाषी सर्प्पमुखे स्वहस्तेन पयोबिन्दून प्रक्षिपतीति, स चैकान्तेना-योग्यः ? प्रतिपक्षभावनायामपीदमेव कथानकं परिभावनीय, केवलमिह घृतघटे भग्ने सति द्वावपि तौ दम्पती त्वरितं २ कर्प्परे यथाशक्ति घृतं गृहीतवन्तौ, स्तोकमेव विननाश, निन्दति चात्मानमाभीरो यथा-ही न मया घृतघटस्ते सम्यक् समर्पितः, आभीर्यपि वदति-समर्प्पितस्त्वा सम्यक्, परं न स मया सम्यक् गृहीतः, तत एवं तयोर्न कोपावेशदुःखं नापि घृतहानिर्नापि सकाल एवान्यसार्थिकैः सह स्वग्राममभिसमर्प्पतामपान्तराले तस्करावस्कन्दः, ततस्तौ सुखभाजनं जातौ एवमिहापि कथञ्चिदनुपयोगादिनाऽन्यथारूपव्याख्याने कृते सति पश्चादनुस्मृत-यथावस्थितव्याख्यानेन सूरिणा शिष्यं पूर्वमूक्तं व्याख्यानं चिन्तयन्तं प्रत्येवं वक्तव्यम्-वत्स! मैवं व्याख्यः, मया तदानीमनुपयुक्तेन व्याख्यातं, तत एवं व्याख्याहि, तत एवमुक्ते सति यो विनयेः कुलीनो विनीतात्मा स एवं प्रतिवदति-यथा भगवन्तः! किमन्यथा परूपयन्ति ?, केवलमहं मतिदौर्बल्यादन्यथाऽवगतवानिति, स चैकान्तेन योग्यः ?,

एवंविधाश्च विनेयाः प्रह्लादितगुरुमनसः श्रुतार्ण्णवपारगामिनो जायन्ते, चारित्रसम्पदश्च भागिनः, तदेवमेकैकं शिष्यमधिकृत्य योग्यायोग्यत्वविभागोपदर्शनं कृतम्,

सम्प्रति सामान्यतः पर्षदो योग्यायोग्यरूपतया निरूपयति-

*मू. (४७) सा समासओ तिविहा पन्नत्ता, तंजहा-जाणिआ अजाणिआ दुव्विअड्ढा, जाणिआ जहा-*

*मू. (४८) खीरमिव जहाहंसा जे धुट्टंति इह गुरुगुणसमिद्धा।*
*दोईं अविवज्जती तं जाणसु जाणिअं परिसं॥*

*मू. (४९) अजाणिआ जहा-जा होइ पगइमहुरा मियछावयसीहकुक्कुडयभूआ।*
*रयणमिव असंठविआ अजाणिआ सा भवे परिसा॥*

**वृ.** 'सा' पर्षत् 'समासतः' संक्षेपेण 'त्रिविधा' त्रिप्रकारा प्रज्ञप्ता, तीर्थकरगणधरैरिति गम्यते, पर्षदिति कथं लभ्यते इति चेत्?, उच्यते, इह प्रागुक्तं-प्रारम्भणीयः प्रवचनानुयोग इति, अनुयोगश्च शिष्यमधिकृत्य प्रवर्त्तते, निरालम्बनस्य तस्याभावात्, ततः सामर्थ्यात् सेत्युक्ते पर्षदिति लभ्यते, 'तद्यथे'त्युदाहरणोपदर्शनार्थं, 'जाणिय'त्ति ज्ञा अवबोधने' जानातीति ज्ञा, 'इगुपान्त्यप्रीकृगृज्ञः' इति कप्रत्ययः, 'इति धातो लोप' इत्याकारलोपः, ततो 'अजाद्यत' इति स्त्रियामाप्, ज्ञैव ज्ञिका, स्वार्थिकः कः प्रत्ययः, 'स्वज्ञाजभस्त्राधातुत्ययकादि'त्यापः स्थाने इकारादेशः, कप्रत्ययाच्च परतः स्त्रियामाप्, तत्सिद्धं ज्ञिकेति, ज्ञिका नाम परिज्ञानवती, किमुक्तं भवति?-कुपथप्रवृत्त-पाषण्डमतनादिग्धान्तःकरणा गुणदोषविशेषपरिज्ञानकुशला सतामपि दोषाणामपरिग्राहिका केवलगुणग्रहणयत्नवतीति, उक्तं च-

"गुणदोसविसेसण्णू अनभिग्गहिया य कुस्सुइमएसुं।
एसा जाणगपरिसा गुणतत्तिल्ला अगुणवज्जा॥"

तत्र 'गुणतत्तिल्लेति' गुणेषु यत्नवती गुणग्रहणपरायणा इत्यर्थः, 'अगुणवज्जि'त्ति अगुणान्-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दोपान् वर्जयति, सतोऽपि न गृह्णातीत्यगुणवर्जा।

तथा 'अज्ञिका' अज्ञिका ज्ञिकाविलक्षणा, सम्यक्परिज्ञानरहिता, किमुक्तं भवति ?-या ताम्रचूडकण्ठीरवकुरङ्गपोतवत्प्रकृत्या मुग्धस्वभावा असंस्थापितजात्यरत्नमिवान्तर्विशिष्ट-गुणसमृद्धा सुखप्रज्ञापनीया पर्षत् सा अज्ञिका, उक्तं च-

"पगईमुद्ध अयाणिय मिगछावगसीहकुक्कुडगभूया।
रयणमिव असंठविया सुहसंणप्पा गुणसमिद्धा॥"

इह 'मिगसावगसीहकुक्कुडगभूय'त्ति सावगशब्दोऽग्रे सम्बध्यते, ततो मृगसिंहकुर्कुटशावभूता इत्यर्थः 'असंठविय'त्ति असंस्थापिता, असंस्कृता इत्यर्थः, सुखेन प्रज्ञापनीया। तथा-

*मू.(५१)　　　　दुव्विअड्ढा जहा-*

*मू.(५२)　　न य कत्थइ निम्माओ न य पुच्छइ परिभवस्स दोसेणं।*
*वत्थिव्व वायपुण्णो फुट्टइ गामिल्लयविअड्ढो॥*

**वृ.** 'दुर्विदग्धा' मिथ्याऽहङ्कारविडम्बिता, किमुक्तं भवति ?-या तत्तद्गुणज्ञपार्श्वोपगमनेन कतिपयपदान्युपजीव्य पाण्डित्याभिमानिनी किञ्चिन्मात्रमर्थपदं सारं पल्लवमात्रं वा श्रुत्वा तत ऊर्ध्वं निजपाण्डित्यख्यापनायामभिमानतोऽवज्ञया पश्यति, अर्द्धकथ्यमानं चात्मनो बहुज्ञतासूचनाय या त्वरितं पठति सा पर्षत् दुर्विदग्धेत्युच्यते, उक्तं च-

"किञ्चिम्मत्तग्गाही पल्लवगाही य तुरियगाही य।
दुवियाड्डिया उ एसा भणिया तिविहा भवे परिसा॥"

अमूषां च तिसृणां पर्षदां मध्ये आद्ये द्वे पर्षदावनुयोगयोग्ये, तृतीया त्वयोग्या, यदाह चूर्णिकृत्-एत्थ जाणिया अजाणिया य अरिहा, दुव्विअड्ढा अणरिहा" इति, तत आद्ये एव द्वे अधिकृत्यानुयोगः प्रारम्भणीयो, न तु दुर्विदग्धां, मा भूदाचार्यस्य निष्फलः परिश्रमः, तस्याश्च दुरन्तसंसारोपनिपातः, सा हि तथास्वाभाव्यात् यत्किमप्यर्थपदं शृणोति, तदप्यवज्ञया, श्रुत्वा च सारपदमन्यत्र सर्वजनातिशायिनिजपाण्डित्याभिमानतो महतो महीयसोऽवमन्यते, तदवज्ञया च दुरन्तसंसाराभिष्वङ्ग इति स्थितम्॥ तदेवभीष्टदेवतास्तवादिसम्पादितसकलसौहित्यो भगवान् दूष्यगणिपादोपसेवी पूर्वान्तर्गतसूत्रार्थधारको देववाचको योग्यविनेयपरीक्षां कृत्वा सम्प्रत्यधिकृताध्ययनविषयस्य ज्ञानस्य प्ररूपणां विदधाति-

*मू.(५३) नाणं पंचविहं पन्नत्तं, तंजहा-आभिनिबोहिअनाणं सुअनाणं ओहिनाणं मनपज्जवनाणं केवलनाणं॥*

**वृ.** ज्ञातिर्ज्ञानं, भावे अनट्प्रत्ययः, अथवा ज्ञायते-वस्तु परिच्छिद्यते अनेनेति ज्ञानं, करणे अनट्, शेषास्तु व्युत्पत्तयो मन्दमतीनां सम्मोहहेतुत्वात्, नोपदिश्यन्ते, 'पञ्चे'ति सङ्ख्यावाचकं विधानं विधा 'उपसर्गादात' इत्यङ्प्रत्ययः, पञ्च विधाः-प्रकारा यस्य तत्पञ्चविधं-पञ्चप्रकारं 'प्रज्ञप्तं'प्ररूपितं तीर्थकरगणधरैरिति सामर्थ्यादवसीयते, अन्यस्य स्वयंप्ररूपकत्वेन प्ररूपणाऽसम्भवात्, उक्तं च-

"अत्थं भासइ अरहा सुत्तं गंथंति गणहरा निउणं।



Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

सासनस्स हियट्ठाए तओ सुत्तं पवत्तइ ॥"

एतेन स्वमनीषिकाव्युदासमहा, अथवा प्रज्ञा-वृद्धिः तया आप्तं-प्राप्तं तीर्थकरगणधरैरिति गम्यते, प्रज्ञाप्तं, किमुक्तं भवति?-'सर्वं वाक्यं सावधारणं भवतीति' न्यायात् अवश्यमिदं वाक्य-मवधारणीयं, ततोऽयमर्थः-ज्ञानं तीर्थकरैरपि सकलकालावलम्बिसमस्तवस्तुस्तोमसाक्षात्का-रिकेवलप्रज्ञया पञ्चविधमेव प्राप्तं, गणधरैरपि तीर्थकृद्भिरुपदिश्यमानं निजप्रज्ञया पञ्चविधमेव प्राप्तं, न तु वक्ष्यमाणनीत्या द्विभेदमेवेति, अथवा प्राज्ञात्-तीर्थकरदाप्तं प्राज्ञाप्तं गणधरैरिति गम्यते, अथवा प्राज्ञैः-गणधरैराप्तं प्राज्ञाप्तं, तीर्थकरादित्यनुमीयते,

'तद्यथे' त्युदाहरणोपदर्शनार्थः, आभिनिबोधिकज्ञानं श्रुतज्ञानं अवधिज्ञानं मनःपर्यायज्ञानं केवलज्ञानं, तत्रार्थाभिमुखो नियतः--प्रतिनियतस्वरूपो बोधो-बोधविशेषोऽभिनिबोधः (अभिनिबोध) एवाभिनिबोधकं, अभिनिबोधशब्दस्य विनयादिपाठाभ्युपगमाद् 'विनयादिभ्य' इत्यनेन स्वार्थे इकण्प्रत्ययः 'अतिवर्त्तन्ते स्वार्थे प्रत्ययकाः प्रकृतिलिङ्गवचनानी'ति वचनात् अत्र नपुंसकता, यथा विनय एव वैनयिकमित्यत्र, अथवा अभिनिबुध्यते अनेनास्मादस्मिन् वेति अभिनिबोधः-तदावरणकर्मक्षयोपशमः, तेन निर्वृत्तमाभिनिबोधकं, आभिनिबोधकं च तद् ज्ञानं च आभिनिबोधिकज्ञानं-इन्द्रियमनोनिमित्तो योग्यदेशावस्थितवस्तुविषयः स्फुटप्रति-भासो बोधविशेष इत्यर्थः १,

तथा श्रवणं श्रुतंवाच्यावाचकभावपुरस्सरीकारेण शब्दसंस्पृष्टार्थग्रहणेहेतुरुपलब्धिविशेषः, एवमाकारं वस्तु जलधारणाद्यर्थक्रियासमर्थं घटशब्दवाच्यमित्यादिरूपतया प्रधानीकृतत्रि-कालसाधारणसमानपरिणामः शब्दार्थपर्यालोचनानुसारी इन्द्रियमनोनिमित्तोऽवगमविशेष इत्यर्थः, श्रुतं च तद् ज्ञानं च श्रुतज्ञानं २,

तथा अवशब्दोऽधःशब्दार्थः, अव-अधोऽधो विस्तृतं वस्तु धीयते-परिच्छिद्यतेऽनेनेत्यवधिः, अथवा अवधिर्मयादा रूपविष्वेव द्रव्येषु परिच्छेदकतया प्रवृत्तिरूपा तदुपलक्षितं ज्ञानमप्यवधिः यद्वा अवधानम्-आत्मनोऽर्थसाक्षात्करणव्यापारोऽवधिः, अवधिश्चासौ ज्ञानं चावधिज्ञानं ३,

तथा परिः-सर्वतो भावे अवनं अवः 'तुदादिभ्यो न क्वा'वित्यधिकारे 'अकर्तौ चे' त्यनेनौणादि-कोऽकारप्रत्ययः, अवनं गमनं वेदनमिति पर्यायाः, परि अवः पर्यवः, मनसि मनसो वा पर्यवः मनःपर्यवः-सर्वतो मनोद्रव्यपरिच्छेद इत्यर्थः, अथवा मनःपर्यय इति पाठः, तत्र पर्ययणं पर्ययः, भावेऽल् प्रत्ययः, मनसि मनसो वा पर्ययो मनःपर्ययः, सर्वतस्तत्परिदच्छेद इत्यर्थः, स चासौ ज्ञानं च मनःपर्ययज्ञानं, अथवा मनःपर्यायज्ञानमिति पाठः, ततः मनांसि-मनोद्रव्याणि पर्येति-सर्वात्मना परिच्छिनत्ति मनःपर्यायं, 'कर्मणोऽणि'ति अण्प्रत्ययः, मनःपर्यायं च तज्ज्ञानं च मनःपर्यायं(यज्ञानं), यद्वा मनसः पर्यायाः मनः पर्यायाः, पर्याया भेदा धर्म्मा बाह्यवस्त्वालोचन-प्रकारा इत्यर्थः, तेषु तेषां वा सम्बन्धि ज्ञानं मनःपर्यायज्ञानं ४,

तथा केवलम्-एकमसहायं मत्यादिज्ञाननिरपेक्षत्वात् केवलज्ञानप्रादुर्भावे मत्यादीनाम-सम्भवात्, ननु कथमसम्भवो यावता मतिज्ञानादीनि स्वस्वावरणक्षयोपशमेऽपि प्रादुष्ष्यन्ति, ततो निर्मूलस्वस्वावरणविलये तानि सुतरां भविष्यन्ति, चारित्रपरिणामवत्, उक्तं च-

"आवरणदेसविगमे जाइवि जायंति मईसुयाईणि।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आवरणसव्वविगमे कह ताइ न होंति जीवस्स ? ॥"

उच्यते, इह यथा जात्यस्य मरकतादिमणेर्मलोपदिग्धस्य यावन्नाद्यापि समूलमलापगमस्तावद्यथा यथा देशतो मलविलयः तथा तथा देशतोऽभिव्यक्तिरुपजायते, सा च कचित्कदाचित् कथञ्चित् भवतीत्यनेकप्रकारा, तथाऽऽत्मनोऽपि सकलकालकलापावलम्बिनिखिलपदार्थपरिच्छेदकरणैकपारमार्थिकस्वरूपस्याप्यावरणमलपटलतिरोहितस्वरूपस्य यावत् नाद्यापि निखिलकर्ममलापगमः तावद्याथा यथा देशतः कर्मकलोच्छेदः तथा तथा देशतः तस्य विज्ञप्तिरुज्जृम्भते, सा च क्वचित्कदाचित्कथञ्चिदित्यनेकप्रकारा, उक्तं च–

"मलविद्धमणेर्व्यक्तिर्यथाऽनेकप्रकारतः।
कर्म्मविद्धात्मविज्ञप्तिस्तथाऽनेकप्रकारतः॥"

सा चानेकप्रकारता मतिश्रुतादिभेदेनावसेया, ततो यथा मरकतादिमणेरशेषमलापगमसम्भवे समस्तास्पष्टदेशव्यक्तिव्यवच्छेदेन परिस्फुटरूपैकाभिव्यक्तिरुपजायते तद्वदात्मनोऽपि ज्ञानदर्शनचारित्रप्रभावतो निःशेषावरणप्रहाणादशेषज्ञानव्यवच्छेदेनैकरूपा अतिस्फुटा सर्ववस्तुपर्यायसाक्षात्कारिणी विज्ञप्तिरुल्लसति, तथा चोक्तम्–

"यथा जात्यस्य रत्नस्य, निःशेषमलहानितः।
स्फुटैकरूपाऽभिव्यक्तिर्विज्ञप्तिस्तद्वदात्मनः॥"

ततो मत्यादिनिरपेक्षं केवलज्ञानं, अथवा शुद्धं केवलं, तदावरणमलकलङ्कस्य निःशेषतोऽपगमात्, सकलं वा केवलं, प्रथमत एवाशेषतदावरणापगमतः सम्पूर्णोत्पत्तेः, असाधारणं वा केवलमनन्यसदृशत्वात्, अनन्तं वा केवलं ज्ञेयानन्तत्वात्, केवलं च तज्ज्ञानं च केवलज्ञानं ननु सकलमपीदं ज्ञानं ज्ञाप्त्येकस्वभावं, ततो ज्ञप्त्येकस्वभावत्वाविशेषे किंकृत एष आभिनिबोधकादिभेदो ?, ज्ञेयभेदकृत इति चेत्, तथाहि–वार्त्तमानिकं वस्त्वाभिनिबोधकज्ञानस्य ज्ञेयं, त्रिकालसाधारणः समानपरिणामो ध्वनिर्गोचरः श्रुतज्ञानस्य, रूपिद्रव्याण्यवधिज्ञानस्य, मनोद्रव्याणि मनः–पर्यायज्ञानस्य, समस्तपर्यायान्वितं सर्वं वस्तु केवलज्ञानस्य, तदेतदसमीचीनम्, एवं सति केवलज्ञानस्य भेदबाहुल्यप्रसक्तेः,

तथाहि–ज्ञेयभेदात् ज्ञानस्य भेदः, यानि च ज्ञेयानि प्रत्येकमाभिनिबोधिकादिज्ञानानामिष्यते तानि सर्वाण्यपि केवलज्ञानेऽपि विद्यन्ते, अन्यथा केवलज्ञानेन तेषामग्रहणप्रसङ्गाद्, अविषयत्वात्, तथा च सति केवलिनोऽप्यसर्वज्ञत्वप्रसङ्गः, आभिनिबोधिकादिज्ञानचतुष्टयविषयजातस्य तेनाग्रहणात्, न चैतदिष्टमिति, अथोच्येतप्रतिपत्तिप्रकारभेद आभिनिबोधिकादिभेदः,

तथाहि–न यादृशी प्रतिपात्तिराभिनिबोधकज्ञानस्य तादृशी श्रुतज्ञानस्य किन्त्वन्यादृशी, एवमवध्यादिज्ञानानामपि प्रतिपत्तव्यम्, ततो भवत्येन प्रतिपत्तिभेदतो ज्ञानभेदः, तदप्ययुक्तम्, एवं सत्येकस्मिन्नपि ज्ञानेऽनेकभेदप्रसक्तेः, तथाहि–तत्तद्देशकालपुरुषस्वरूपभेदेन विविच्यमानमेकैकं ज्ञानं प्रतिपत्तिप्रकारानन्त्यं प्रतिपाद्यते, तन्नैषोऽपि पक्षः श्रेयान्, स्यादेतद्–अस्त्यावारकं कर्म्म, तच्चानेकप्रकारं, ततः तद्भेदात् तदावार्यं ज्ञानमप्यनेकतां प्रतिपद्यते, ज्ञानावारकं च कर्म्म पञ्चधा, प्रज्ञापनादौ तथाऽभिधानात्, ततो ज्ञानमपि पञ्चधा प्ररूप्यते, तदेतदतीव युक्त्यसङ्गतं, यत आवार्यपिक्षमावारकमत आवार्यभेदादेव तद्भेदः, आवार्यं च ज्ञप्तिरूपापेक्षया सकलमप्येक–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रूपं, ततः कथमावारकस्य पञ्चरूपता ?, येन तद्भेदात्, ज्ञानस्यापि पञ्चविधो भेदः उद्वीर्येत, अथ स्वभावत एवाभिनिबोधिकादिको ज्ञानस्य भेदो, न च स्वभावः पर्यनुयोगमश्नुते, न खलु किं दहनो दहति नाकाशमिति कोऽपि पर्यनुयोगमाचरति, अहो महती महीयसो भवतः शेमुषी, ननु यदि स्वभावत एवाभिनिबोधादिको ज्ञानस्य भेदस्तर्हि भगवतः सर्वज्ञत्वहानिप्रसङ्गः, तथाहि-

ज्ञानमात्मनो धर्मः, तस्य चाभिनिबोधादिको भेदः स्वभावत एव व्यवस्थितः, क्षीणावरणस्यापि तद्भावप्रसङ्गः, सति च तद्भावेऽस्मादृशस्येव भगवतोऽप्यसर्वज्ञत्वमापद्यते, केवलज्ञानभावतः समस्तवस्तुपरिच्छेदात्रासर्वज्ञत्वममिति चेत्, ननु यदा केवलोपयोगसम्भवः तदा तस्य भवतु भगवतः सर्वज्ञत्वं, यदा त्वामिनिबोधिकादिज्ञानोपयोगसम्भवः तदा देशतः परिच्छेदसम्भवाद-स्मादृस्येव तस्यापि बलादेवासर्वज्ञत्वमापद्यते, न च वाच्यं-तस्य तदुपयोग एव न भविष्यति, आत्मस्वभावत्वेन तस्यापि क्रमेणोपयोगस्य निवारयितुमशक्यत्वात्, केवलज्ञानानंतरं केवल-दर्शनोपयोगवत्, ततः केवलज्ञानोपयोगकाले सर्वज्ञत्वं शेषज्ञानोपयोगकाले चासर्वज्ञत्वमापद्यते, तच्च विरुद्धमतोऽनिष्ठिमिति, आह च-

नत्तेगसहावत्ते आभिनिबोहाइ किंकओ भेदो ?।
नेयविसेसाओ चे न सव्वविसयं जओ चरिमं ॥
अह पडिवत्तिविसेसा नेगंमि अनेगभेयभावाओ।
आवरणविभेओवि हु सभावमेयं विना न भवे ॥
तम्मि य सइ सव्वेसिं खीणावरणस्स पावई भाव।
तद्धम्मत्ताउ च्चिय जुत्तिविरोहा स चानिट्ठो ॥
अरहावि असघन्नू आभिनिबोहाइभावओ नियमा।
केवलभावाओ चे सव्वण्णू ननु विरुद्धमिणं ॥

तस्मादिदमेव युक्तियुक्तं पश्यामो-यदुतावग्रहज्ञानादारभ्य यावदुत्कर्षप्राप्तं परमावधिज्ञानं तावत् सकलमप्येकं, तच्चासकलसंज्ञितम्, अशेषवस्तुविषयत्वाभावात्, अपरं च केवलिनः, तच्च सकलसंज्ञितमिति द्वावेव भेदौ, उक्तं च-

'तम्हा अवग्गहाओ आरब्भ इहेगमेव नाणन्ति।
जुत्तं छउमत्थस्सासगलं इयरं च केवलिणो ॥'

अत्र प्रतिविधीयते, तत्र यत्तावदुक्तं-'सकलमपीदं ज्ञानं, ज्ञप्त्येकस्वभावत्वाविशेषे किंकृत एष आभिनिबोधादिको भेद इति ?' तत्र ज्ञप्त्येकस्वभावता किं सामान्यतो भवताऽभ्युपगम्यते विशेषतो वा ?, तत्र न तावदाद्यः, पक्षः क्षितिमाधत्ते, सिद्धसाध्यतया तस्य बाधकत्वायोगात्, बोधस्वरूपसामान्यापेक्षया हि सकलमपि ज्ञानमस्माभिरेकमभ्युपगम्यत एव, ततः का नो हानि-रिति। अथ द्वितीयपक्षः, तदयुक्तम्, असिद्धत्वात्, न हि नाम विशेषतो विज्ञानमेकमेवोपलभ्यते, प्रतिप्राणि स्वसंवेदनप्रत्यक्षेणोत्कर्षापकर्षदर्शनात्, अथ यद्युत्कर्षापकर्षमात्रभेददर्शनात् ज्ञानभेदः तर्हि तावुत्कर्षापकर्षौ प्रतिप्राणि देशकालाद्यपेक्षया शतसहस्रशो भिद्येते, ततः कथं पञ्चरूपता ?, नैष दोषः, परिस्थूरनिमित्तभेदतः पञ्चधात्वस्य प्रतिपादनात्, तथाहि-सकलघातिक्षयो निमित्तं केवलज्ञानस्य मनःपर्यायज्ञानस्य त्वामर्षौषध्यादिलब्ध्यपेतस्य प्रमादलेशेनाप्यकलङ्कितस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विशिष्टो विशिष्टाध्यवसायानुतोऽप्रमादः 'तं संजयस्स सवप्पमायरहियस्स विविहरिद्धिमतो'इति वचनप्रामाण्याद्, अवधिज्ञानस्य पुनः तथाविधानिन्द्रियरूपद्रव्यसाक्षादवगमनिबन्धनक्षयो-पशमविशेषः, मतिश्रुतज्ञानयोस्तु लक्षणभेदादिकं, तच्चाग्रे वक्ष्यते, उक्तं च-

"नत्तेगसहावत्तं ओहेण विसेसओ पुन असिद्धं।
एगंततस्सँहावत्तणओ कह हानिवुड्डीओ ॥१॥
जं अविचलियसहावे तत्ते एगंततस्सहावत्तं।
न य तं तहोवलद्धा उक्करिसावगरिसविसेसा ॥२॥
तम्हा परिथूराओ निमित्तभेयाओ समयसिद्धाओ।
उववत्तिसंगओच्चिय आभिनिबोहाइओ भेओ ॥३॥
धाइक्खओ निमित्तं केवलनाणस्स वन्निओ समए।
मनपज्जवनाणस्स उ तहाविहो अप्पमाउत्ति ॥४॥
ओहीनाणस्स तहा अनिंदिएसुंपि जो खओवसमो।
मइसुयनाणाणं पुण लक्खणभेयादिओ भेओ ॥५॥

यदप्युक्तम्-'ज्ञेयभेदकृतमित्यादि' तदप्यनभ्युपगमतिरस्कृतत्वाद्दूरापास्तप्रसरं, न हि वयं ज्ञेयभेदमात्रतो ज्ञानस्य भेदमिच्छामः, एकेनाप्यवग्रहादिना बहुबहुविधवस्तुग्रहणोपलम्भात्, यदपि च प्रत्यपादि-'प्रतिपत्तिप्रकारभेदकृत इत्यादि' तदपि न नो बाधामाधातुमलं, यतस्ते प्रतिपत्ति-प्रकारा देशकालादिभेदेनानन्त्यमपि प्रतिपद्यमाना न परिस्थूरनिमित्तभेदेन व्यवस्थापितानाभि-निबोधिकादीन् जातिभेदानतिक्रामन्ति, ततः कथमेकस्मिन् अनेकभेदभावप्रसङ्गः ?, उक्तं च-

'न य पडिवत्तिविसेसा एगंमि य नेगभेयभावेऽवि।
जं ते तहाविसिट्ठे न जाइभेए विलंघेइ ॥

यदप्यवादीद्-'आवार्यापेक्षं ह्यावरकमित्यादि' तदपि न नो मनोबाधायै, यतः परिस्थूरनिमित्त-भेदमधिकृत्य व्यवस्थापितो ज्ञानस्य भेदः, ततस्तदपेक्षमावारकमपि तथा भिद्यमानं न युष्मा-दृशदुर्जनवचनीयतामास्कन्दति। एवमुत्तेजितो भूयः सावष्टम्भं परः प्रश्नयति-ननु परिस्थूर-निमित्तभेदव्यवस्थापिता अप्यमी आभिनिबोधिकादयो भेदा ज्ञानस्यात्मभूता उतानात्मभूताः किञ्चातः ?, उभयथापि दोषः, तथाहि-यद्यात्मभूतास्ततः क्षीणावरणेऽपि तद्भावप्रसङ्गः, तथा चासर्वज्ञत्वं प्रागुक्तनीत्या तस्यापद्यते, अथानात्मभूतास्तर्हि न ते पारमार्थिकाः, कथमावार्यापेक्षो वास्तव आवारकभेदः ?, तदपि न मनोरमं, सम्यक्वस्तुतत्त्वापरिज्ञानाद्,

इह हि सकलघनपटविनिर्मुक्तशारददिनमणिरिव समन्ततः समस्तवस्तुस्तोमप्रकाश-नैकस्वभावो जीवः, तस्य च तथाभूतः स्वभावः केवलज्ञानमिति व्यपदिश्यते, स च यद्यपि सर्वघातिना केवलज्ञानावरणेनाव्रियते तथापि तस्यानन्ततमो भागो नित्योद्घाटित एव "अक्ख-रस्स अनंतो भागो निच्चुग्घाडिओ, जइ पुण सोऽवि आवरिज्जा तेणं जीवो अजीवत्तणं पाविज्जा" इत्यादि वक्ष्यमाणप्रवचनप्रामाण्यात्, ततस्तस्य केवलज्ञानावरणावृतस्य घनपटलाच्छादितस्येव सूर्यस्य यो मन्दः, प्रकाशः सोऽपान्तरालावस्थितमतिज्ञानाद्यावरणक्षयोपशमभेदसम्पादितं नानात्वं भजते, यथा घनपटलावृतसूर्यमन्दप्रकाशोऽपान्तरालावस्थितकटकुड्यद्यावरणविवरप्रदेशभेदतः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स च नानात्वं क्षयोपशमानुरूपं तथा तथा प्रतिपद्यमानः स्वस्वक्षयोपशमानुसारेणाभिधानभेदमश्नुते, यथा मतिज्ञानावरणक्षयोपशमजनितः स मन्दप्रकाशो मतिज्ञानं, श्रुतज्ञानावरणक्षयोपशमजनितः श्रुतज्ञानमित्यादि, ततः आत्मस्वभावभूता ज्ञानस्यभिनिबोधिकादयो भेदाः, ते च प्रवचनो-पदर्शित-परिस्थूरनिमित्तभेदतः पञ्चसङ्ख्याः ततस्तदपेक्षमावारकमपि पञ्चधोपवर्ण्यमानं न विरुध्यते, न चैवमात्मस्वभावभूतत्वे क्षीणावरणस्यापि तद्भावप्रसङ्गो, यत एते मतिज्ञानावरणादिक्षयोपशम-रूपोपाधिसम्पादितसत्ताकाः, यथा सूर्यस्य घनपटलावृतस्य मन्दप्रकाशभेदाः कटकुड्यद्या-वरणविवरभेदोपाधिसम्पादिताः, ततः कथं ते तथारूपक्षयोपशमाभावे भवितुमर्हन्ति ?, न खलु सकलघनपटलकटकुड्यद्यावरणापगमे सूर्यस्य ते तथारूपा मन्दप्रकाशभेदा भवन्ति, उक्तं च-

"कडविवरागयकिरणा मेहंतारियस्स जह दिनेसस्स।
ते कडमेहावगमे न होंति जह तह इमाइंपि॥"

ततो यथा जन्मादयो भावा जीवस्यात्मभूता अपि कर्म्मोपाधिसम्पादितसत्ताकत्वात् तदभावे न भवन्ति, तद्वदाभिनिबोधिकादयोऽपि भेदा ज्ञानस्यात्मभूता अपि मतिज्ञानावरणादिकर्म-क्षयोपशमसापेक्षत्वात् तदभावे केवलिनो न भवन्ति, ततो नासर्वज्ञत्वदोषभावः, उक्तं च-

"जमिह छउमत्थधम्मा जम्माईया न होंति सिद्धाणं।
इय केवलीणमाभिनिबोहाभावंमि को दोसो ?॥" इति।

पर आह-प्रपन्ना वयमुक्तयुक्तितो ज्ञानस्य पञ्चभेदत्वं, परममीषां भेदानामित्थमुपन्यासे किञ्चिदस्ति प्रयोजनमुत यथाकथञ्चिदेष प्रवृत्तः ?, अस्तीति ब्रूमः, किं तदिति चेद्, उच्यते, इह मतिश्रुते तावदेकत्र वक्तव्ये, परस्परमनयोः स्वामिकालकारणविषयपरोक्षत्वसाधर्म्यात्, तथाहि-य एव मतिज्ञानस्य स्वामी स एव श्रुतज्ञानस्यापि 'जत्थ मइनाणं तत्थ सुयनाणं, जत्थ सुयनाणं तत्थ मइनाण' मित्यादिवक्ष्यमाणवचनप्रामाण्यात् ततः स्वामिसाधर्म्यं, तथा यावानेव मतिज्ञानस्य स्थितिकालस्तावानेव श्रुतज्ञानस्यापि, तत्र प्रवाहापेक्षया अतीतानागतवर्त्तमानरूपः सर्व एव कालः, अप्रतिपतितैकजीवापेक्षया तु षट्षष्टिसागरोपमाणि समधिकानि, उक्तं च-

"दो वारे विजयाइसु गयस्स तिन्नुच्चुए अहव ताइं।
अइरेगं नरभवियं नाणाजीवाण सव्वद्धा॥"

इति कालसाधर्म्यं, यथेन्द्रियनिमित्तं मतिज्ञानं तथा श्रुतज्ञानमपीति कारणसाधर्म्यम् तथा यथा मतिज्ञानमादेशतः सर्वद्रव्यादिविषयमेवं श्रुतज्ञानमपीति विषयसाधर्म्यम्, यथा च मतिज्ञानं परोक्षं तथा श्रुतज्ञानमपि परोक्षं, परोक्षता चानयोरग्रे स्वयमेव सूत्रकृता वक्ष्यते इति परोक्षत्वसाधर्म्यम्, तत इत्थं स्वाम्यादिसाधर्म्यादेव मतिश्रुते नियमादेकत्र वक्तव्ये, ते चावध्यादिज्ञानेभ्यः, प्रागेव, तद्भाव एवावध्यादिज्ञानसद्भावात्, उक्तं च-

"जं सामिकालकारणविसयपरोक्खत्तणेहिं तुल्लाइं।
तब्भावे सेसाणि य तेणाईए मइसुयाइं॥"

ननु भवतामेकत्र मतिश्रुते प्रागेव चावध्यादिभ्यः, परमेतयोरेव मतिश्रुतयोर्मध्ये पूर्वं मतिः पश्चात् श्रुतमित्येतत्कथम् ?, उच्यते, मतिपूर्वकत्वात् श्रुतज्ञानस्य, तथाहि-सर्वत्रापि पूर्वमवग्रहा-दिरूपं मतिज्ञानमुदयते पश्चाच्छ्रुतं, तथा चोक्तं चूर्णावपि-"तेसुऽपि य मइपुव्वय सुयंतिकिच्चा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुव्वं मइनाणं कयं, तस्स पिट्ठओ सुयं" ति। नन्वेते मतिश्रुते सम्यक्त्वोत्पादकाले युगपदुत्पत्ति-मासादयतः, अन्यथा मतिज्ञानभावेऽपि श्रुतज्ञानाभावप्रसङ्गः, स चानिष्टः, तथा मिथ्यात्वप्रतिपत्तौ युगपदेव चाज्ञानरूपतया परिणमतः, ततः कथं मतिपूर्वं श्रुतमुदीर्यते ?, उक्तं च-

"नाणानन्नाणाणि य समकालइं जओ मइसुयाइं।
तो न सुयं मइपुव्वं मइनाणे वा सुयअन्नाणं ॥"

नैष दोषो, यतः सम्यक्त्वोत्पत्तिकाले समकालं मतिश्रुते लब्धिमात्रमेवाङ्गीकृत्य प्रोच्यते, न तूपयोगम्, उपयोगस्य तथाजीवस्वाभाव्यतः क्रमेणैव सम्भवात्, मतिपूर्वं च श्रुतमुच्यते उपयोगा-पेक्षया, न खलु मत्युपयोगेनासञ्चिन्त्य श्रुतग्रन्थानुसारि विज्ञानमासादयति जन्तुः, ततो न कश्चिद्दोषः, आह च भाष्यकृत्-

"इह लद्धिमइसुयाइं समकालाइं न तूवगोओ सिं।
मइपुव्वं सुयमिह पुण सुओवओगो मइप्पभवो ॥"

तथा कालविपर्ययस्वामित्वलाभसाधर्म्यात्, मतिश्रुतानन्तरमवधिज्ञानतमुक्तं, तत्र प्रवाहापेक्षया अप्रतिपतितैकसत्त्वाधारापेक्षया यावान् मतिश्रुतयोः स्थितिकालः तावानेवावधिज्ञानस्यापि, तथा यथैव मतिश्रुते ज्ञाने मिथ्यादर्शनोदयतो विपर्ययरूपतयामासादयतः तथाऽवधिज्ञानमपि, तथाहि-मिथ्यादृष्टेः सतः तान्येव मतिश्रुतावधिज्ञानानि मत्यज्ञानश्रुताज्ञानविभङ्गज्ञानानि भवन्ति, उक्तं च-"आद्यत्रयमज्ञानमपि भवति मिथ्यात्वसंयुक्त"मिति, तथा य एव मतिश्रुतज्ञानयोः स्वामी स एवावधिज्ञानस्यापि, तथा विभङ्गज्ञानिनस्त्रिदशादेः सम्यग्दर्शनावाप्तौ युगपदेव मतिश्रुता-वधिज्ञानानां लाभसम्भवः ततो लाभसाधर्म्यम्।

अवधिज्ञानानन्तरं च छद्मस्थविषयभावप्रत्यक्षत्वसाधर्म्यात् मनःपर्यायज्ञानमुक्तं, तथाहि-यथाऽवधिज्ञानं छद्मस्थस्य भवति तथा मनःपर्यवज्ञानमपीति छद्मस्थसाधर्म्यं, तथा यथाऽवधिज्ञानं क्षायोपशमिके भावे वर्त्तते तथा मनःपर्यायज्ञानमपीति भावसाधर्म्यं, यथा चावधिज्ञानं प्रत्यक्षं तथा मनःपर्यायज्ञानमपीति प्रत्यक्षत्वसाधर्म्यम्, उक्तं च-

"कालविवज्जयसामित्तलाभसाहम्मओवही तत्।
मानसमित्तो छउमत्थविसयभावाइसाहम्मा ॥"

तथा मनःपर्यायज्ञानान्तरं केवलज्ञानस्योपन्यासः सर्वोत्तमत्वादप्रमत्तयतिस्वामिसाधर्म्यात् सर्वावसाने लाभाच्च, तथाहि-सर्वाण्यपि मतिज्ञानादीनि ज्ञानानि देशतः परिच्छेदकानि केवलज्ञानं तु सकलवस्तुस्तोमपरिच्छेदकं, सर्वोत्तमं सर्वोत्तमत्वाच्चान्ते सर्वशिरः शिखरकल्पं उपन्यस्तं, तथा यथा मनःपर्यायज्ञानमप्रमत्तयतेरेवोदयेत तथा केवलज्ञानमप्यप्रमादभावमुपगतस्यैव यतेर्भवति, नान्यस्य, ततोऽप्रमत्तयतिसाधर्म्यं, यथा यः सर्वाण्यपि ज्ञानानि समासादियतुं योग्यः स नियमात् सर्वज्ञानावसाने केवलज्ञानमवाप्नोति, ततः सर्वान्ते केवलमुक्तम्। उक्तं च-

अंते केवलमुत्तमजइसामित्तावसाणलाभाओ" इति, तथा यथा मनःपर्यायज्ञानं न विपर्ययना-सादयति तथा केवलज्ञानमपीति विपर्ययाभावसाधर्म्याच्च मनःपर्यायज्ञानान्तरं केवलज्ञानमुक्तमिति

*मू. (५४) तं समासओ दुविहं पन्नत्तं, तंजहा-पच्चक्खं च परोक्खं च ॥*

वृ. 'तत्' पञ्चप्रकारमपि ज्ञानं 'समासतः' संक्षेपेण 'द्विविधं' द्विप्रकारं प्रज्ञप्तं, 'तद्यथे' त्युदा.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हरणोपन्यासार्थः, प्रत्यक्षं च परोक्षं च, तत्र 'अशुं व्याप्तौ' अश्नुते ज्ञानात्मना सर्वानर्थान् व्याप्नोतीत्यक्षः, अथवा 'अश् भोजने' अश्नाति सर्वान् अर्थान् यथायोगं भुंक्ते पालयति वेत्यक्षो-जीवः, उणयत्रा-प्यौणादिकः सक्प्रत्ययः, तं अक्षं-जीवं प्रति साक्षाद्वर्त्तते यत् ज्ञानं तत्प्रत्यक्षम्-इन्द्रियमनोनिर-पेक्षमात्मनः साक्षात्प्रवृत्तिमदवध्यादिकं त्रिप्रकारं, उक्तं च-

''जीवो अक्खो अत्थव्वावणभोयणगुणन्निओ जेणं।
तं पइ वट्टइ नाणं जं पच्चक्खं तयं तिविहं ॥''

चशब्दः स्वगतानेकावध्यादिभेदसूचकः, तथा अक्षस्य-आत्मनो द्रव्येन्द्रियाणि द्रव्यम-नश्च पुद्गलमयत्वात् पराणि वर्त्तन्ते-पृथग्वर्तन्ते इत्यर्थः, तेभ्यो यदक्षस्य ज्ञानमुदयते तत्परोक्षं, पृषोदरादय इति रूपसिद्धिः, अथवा परैः-इन्द्रियादिभिः सह उक्षः-सम्बन्धो विषयविषयिभाव-लक्षणो यस्मिन् ज्ञाने, न तु साक्षादात्मनो, धूमादग्निज्ञानमिव, तत्परोक्षम्, उभयत्रापि इन्द्रियमनो-निमित्तं ज्ञानमभिधेयम्। आह-इन्द्रियमनोनिमित्ताधीनं कथं परोक्षम्?, उच्यते, पराश्रयत्वात्, तथाहि-पुद्गलमयत्वाद्द्रव्येन्द्रिमनांस्यात्मनः पृथग्भूतानि, ततः तदाश्रयेणोपजायमानं ज्ञानमात्मनो न साक्षात्, किन्तु परम्परया, इतीन्द्रियमनोनिमित्तं ज्ञानं धूमादग्निज्ञानमिव परोक्षं,

''अक्खस्स पोग्गलमया जं दव्विदियमणा परा होंति।
तेहिंतो जं नाणं परोक्खमिह तमनुमानं व ॥''

अत्र वैशपिकादयः प्राहुः-नन्वक्षमिन्द्रियं श्रोतो हृषीकं करणं स्मृतं, ततोऽक्षाणाम्-इन्द्रियाणां या साक्षादुपलब्धिः सा प्रत्यक्षं, अक्षम्-इन्द्रियं प्रति वर्त्तते इति प्रत्यक्षव्युत्पत्तेः, तथा च सति सकललोके प्रसिद्धं साक्षादिन्द्रियाश्रितं घटादि ज्ञानं प्रत्यक्षमिति सिद्धं, तदेतदयुक्तम्, इन्द्रियाणा-मुपलब्धृत्वासम्भवात्, तदसंभवश्चाचेतनत्वात्, तथा चात्र प्रयोगः-यदचेतनं तन्नोपलब्धृ, यथा घटः, अचेतनानि च द्रव्येन्द्रियाणि, न चायमसिद्धो हेतुः, यतो नाम द्रव्येन्द्रियाणि निर्वृत्त्युपकरण-रूपाणि, 'निर्वृत्त्युपकरणे द्रव्येन्द्रिय'मिति वचनात्, निर्वृत्त्युपकरणे च पुद्गलमये, यथा चानयोः पुद्गलमयता तथाऽग्रे वक्ष्यते, पुद्गलमयं च सर्वमचेतनं, पुद्गलानां काठिन्यानवबोधरूपतया चैतन्यं प्रति धर्मित्वायोगात्, धर्मानुरूपो हि सर्वत्रापि धर्म्मी, यथा काठिन्यं प्रति पृथिवी, यदि पुनरनुरूप-त्वाभावेऽपि धर्मधर्म्मिभावो भवेत् ततः काठिन्यजलयोरपि स भवेत्, न च भवति, तस्मादचेतनाः पुद्गलाः, उक्तं च-

बोहसहावममुत्तं विसयपरिच्छेगयं च चेयन्नं।
विवरीयसहावाणि य भूयाणि जगप्पसिद्धाणि ॥१॥
ता धम्मधम्मिभावो कहमेसिं घडइ तहऽब्भुवगमेऽवि।
अनुरूवत्ताभावे काठिन्नजलाण किन्न भवे? ॥२॥'' इति,

नापि सन्दिग्धानैकान्तिकता हेतोः शङ्कनीया, अचेतनस्योपलम्भकत्वशक्त्ययोगाद्, उपलम्भ-कत्वं हि चेतनाया धर्मः, ततः स कथं तदभावे भवितुमर्हति?, आह-प्रत्यक्षबाधितेयं प्रतिज्ञा, साक्षादिन्द्रियाणामुपलम्भकत्वेन प्रतीतेः, तथाहि-चक्षू रूपं गृह्णदुपलभ्यते, शब्दं कर्ण्णौ, नासिका गन्धमित्यादि, तदेतत् मोहावष्टब्धान्तःकरणताविलसितं, तथाहि-आत्मा शरीरेन्द्रियैः सहान्योऽन्यानुवेधेन व्यवस्थितः, ततोऽयमात्मा अमूनि चेन्द्रियाणीति विवेक्तुमशक्नुवन्तो बालिश-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जन्तवः, तत्रापि युष्मादृशां कुशास्त्रसम्पर्कतः, कुवासनासङ्क्रमः, ततः साक्षादुपलम्भकानी-न्द्रियाणीति मन्यन्ते, परमार्थतः पुनरुपलब्धा तत्रात्मैव, कथमेतदवसीयत इति चेत्, उच्यते, तद्विगमेऽपि तदुपलब्धार्थानुस्मरणात्, तथाहि-कोऽपि पूर्वं चक्षुषा विवक्षितमर्थं गृहीतवान्, ततः कालान्तरे दैवविनियोगतः, चक्षुषोऽपगमेऽसि स तमर्थमनुस्मरति, तत्र यदि चक्षुरेव द्रष्टृ स्यात् ततः चक्षुषोऽभावे तदुपलब्धार्थानुस्मरणं न भवेत्, न ह्यात्मना सोऽर्थोऽनुभूतः, किन्तु चक्षुषा, चक्षुष एव साक्षाद्द्रष्टृत्वेनोपगमात्, न चान्येनानुभूतेऽर्थेऽन्यस्य स्मरणं, मा प्रापदतिप्रसङ्गः, अपि च-मा भूच्चक्षुषोऽपगमः तथापि यदि चक्षुरेव द्रष्टृ ततः स्मरणमात्मनो न भवेत्, अन्येना-नुभूतेऽर्थेऽन्यस्य स्मरणायोगात्, भवति च स्मरणमात्मनः चक्षुषः स्मर्तृत्वेनाप्रतीतेरनभ्युपगमाच्च, तस्मादात्मैवोपलब्धा नेन्द्रियमिति।

तथा चात्र प्रयोगः-यो येषुपरतेष्वपि तदुपलब्धानर्थान् स्मरति स तत्रोपलब्धा, यथा गवाक्षोप-लब्धानामर्थानामनुस्मर्त्ता देवदत्तः, अनुस्मरति च द्रव्येन्द्रियोपलब्धानर्थान् द्रव्येन्द्रियापग-मेऽप्यात्मा, इह स्मरणमनुभवपूर्वकतया व्याप्तं, व्याप्यव्यापकभावश्चानुभवस्मरणयोः प्रत्यक्षेणैव प्रतिपन्नः, तथाहि-योऽर्थोऽनुभूतः स स्मर्यते न शेषः, तथा स्वसंवेदनप्रत्यक्षेण प्रतीतेः, विपक्षे चातिप्रसङ्गो बाधकं प्रमाणं, अननुभूतेऽपि विषये यदि स्मरणं भवेत् ततोऽननुभूतत्वाविशेषात् खरविषाणादेरपि स्मरणं भवेदित्यतिप्रसङ्गः, तस्मात् द्रव्येन्द्रियापगमेऽपि तदुपलब्धार्थानु-स्मरणादात्मा उपलब्धेति स्थितं उक्तं च-

"केसिंचि इंदियाइं अक्खाइं तदुवलद्धि पच्चक्खं।
तन्नो ताइं जमचेयाणइं जाणंति न घडोव्व॥१॥
उवलद्धा तत्थाया तव्विगमे तदुवलद्धसरणाओ।
गेहगवक्खोवरमेवि तदुवलद्धानुसरिया वा॥२॥"

अत्र वाशब्द उपमार्थः। अपरे पुनराहुः-वयमिन्द्रियाणामुपलब्धृत्वं प्रतिजानीमहे, किन्त्वेतदेव ब्रूमो-यदिन्द्रियद्वारेण प्रवर्तते ज्ञानमात्मनि तत्प्रत्यक्षं, न चेन्द्रियव्यापारव्यवहितत्वादात्मा साक्षान्नोपलब्धेति वक्तव्यम्, इन्द्रियाणामुपलिब्धं प्रति करणतया व्यवधायकत्वायोगात्, न खलु देवदत्तो हस्तेन भुञ्जानो हस्तव्यापारव्यवहितत्वात् साक्षान्न भोक्तेति व्यपदेष्टुं शक्यम्, तदेतदसमीचीनं, सम्यग्वस्तुतत्त्वापरिज्ञानात्, इह हि यदाऽऽत्मा चक्षुरादिकमपेक्ष्य बाह्यमर्थमव-बुध्यते तदाऽवश्यं चक्षुरादेः, साद्गुण्याद्यपेक्षते, तथाहि-

यदा सद्गुणं चक्षुः तदा बाह्यमर्थं स्पष्टं यथावस्थितं चोपलभते, यदा तु तिमिराशुभ्रमण-नौयानपित्तादिसंक्षोभदेशदवीयस्त्वाद्यापादितविभ्रमं तदा विपरीतं संशयितं वा, ततोऽवश्यमात्मा अर्थोपलब्धौ पराधीनः, तथा च सति यथा राजा निजराजदौवारिकेणोपदर्शितं परराष्ट्रराजकीयं पुरुषं पश्यन्नपि समीचीनमसमीचीनं वा निजराजदौवारिकवचनत एव प्रत्येति न साक्षात्, तद्वदात्मापि चक्षुरादिनोपदर्शितं बाह्यमर्थं चक्षुरादिप्रत्यय एव समीचीनमसमीचीनं वा वेत्ति, न साक्षात्, तथाहि-चक्षुरादिना दर्शितेऽपि बाह्योऽर्थे यदि संशयमधिरूढो भवति तर्हि चक्षुरादि-साद्गुण्यमेव प्रतीत्य निश्चयं विदधाति, यथा न मे चक्षुस्तिमिरोपप्लुतं, न नौयानाशुभ्रमणाद्यापादित-विभ्रमं, ततोऽयमर्थः समीचीन इति, ततो यथा राज्ञो नायं मम राजदौवारिकोऽसत्यालापी कदाचना-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्यस्य व्यभिचारानुपलम्भादिति निजदौवारिकस्य साद्गुण्यमवगम्य परराष्ट्रराजकीय-पुरुष-समीचीनतावधारणं परमार्थतः परोक्षं तद्वदात्मनोऽपि चक्षुरादिसाद्गुण्यावधारणतो वस्तुयाथात्म्यावधारणं परमार्थतः परोक्षं, नन्विदमिन्द्रियसाद्गुण्यावधारणतो वस्तु याथात्म्यावधारणमनभ्यास-दशामापन्नस्यापलभ्यते नाभ्यासदशामुपागतस्य, अभ्यासदशामापन्नो ह्यभ्यासप्रकर्ष-सामर्थ्यादि-न्द्रियसाद्गुण्यमनपेक्ष्यैव साक्षादवबुध्यते, ततस्तस्येन्द्रियाश्रितं ज्ञानं कथं प्रत्यक्षं न भवति ?, तदयुक्तम्, अभ्यासदशामापन्नस्यापि साक्षादनवबोधात्, तस्यापीन्द्रियद्वारेणावबोध-प्रवृत्तेरवश्य-मिन्द्रियसाद्गुण्यापेक्षणात्, केवलमभ्यासप्रकर्षवशात्तदिन्द्रियसाद्गुण्यं झटित्येवा-वधारयति, पूर्वावधृतं च झटित्येव निश्चिनोति,

ततः कालसौक्ष्म्यात्तन्नोपलभ्यते, इत्थं चैतदङ्गीकर्त्तव्यम्, यतोऽवश्यमवायज्ञानमवग्रहेहापूर्वं, ईहा च विचारणात्मिका, विचारश्चेन्द्रियसाद्गुण्यसद्भूतवस्तुधर्म्माश्रितः, अन्यथैकतरविचारा-भावेऽवायज्ञानस्य सम्यग्ज्ञानत्वायोगात्, न खल्विन्द्रिये वस्तुनि वा सम्यगविचारितेऽवायज्ञानं समीचीनं भवति, ततोऽभ्यासदशापन्नेऽपीन्द्रियसाद्गुण्यावधारणमवसेयं, यदपि चोक्तम्-'न खलु देवदत्तो हस्तेन भुञ्जानो हस्तव्यापारव्यवहितत्वात्साक्षान्न भोक्तेति व्यपदेष्टुं शक्यमिति' तदप्ययुक्तं, दृष्टान्दार्ष्टान्तिकार्थवैषम्याद्, भोक्ता हि भुजिक्रियानुभवभागी भण्यते, भुजिक्रियाऽनु-भवश्च देवदत्तस्य न हस्तेन व्यवधीयते, किन्तु साक्षात्, हस्तो हि कवलप्रक्षेप एव व्याप्रियते न परिच्छेदक्रियायामिन्द्रियमिवाहारक्रियानुभवेऽपि येन व्यवधानं भवेत्, ततः साक्षाद्देवदत्तो भोक्तेति व्यवह्रियते, इह तु वस्तूनामुपलब्धिरुक्तनीत्या चक्षुरादीन्द्रियसाद्गुण्यावगमानुसारेणापजायते, ततो व्यवधानान्न साक्षादुपलम्भक, आत्मेति । नन्विदं सर्वमप्युत्सूत्रप्ररूपणं, सूत्रे ह्यनन्तरमेवेन्द्रियाश्रितं ज्ञानं प्रत्युक्षमुपदेक्ष्यते-

'पच्चक्खं दुविहं पन्नत्तं, तंजहा-इंदियपच्चक्खं नोइंदियपच्चक्खं चेति' सत्यमेतत्, किन्त्विदं लोकव्यवहारमधिकृत्योक्तं, न परमार्थतः, तथाहि-यदिन्द्रियाश्रितमपरव्यवधानरहितं ज्ञानमुदयते तल्लोके प्रत्यक्षमिति व्यवहृतं, अपरधूमादिलिङ्गनिरपेक्षतया साक्षादिन्द्रियमधिकृत्य प्रवर्त्तनात्, यत्पुनरिन्द्रियव्यापारेऽप्यपरं धूमादिकमपेक्ष्याग्न्यादिविषयं ज्ञानमुदयते तल्लोके परोक्षं, तत्र साक्षादिन्द्रियव्यापारासम्भवात्, यत्पुनरात्मनः इन्द्रियमप्यनपेक्ष्य साक्षादुपजायते तत्परमार्थतः प्रत्यक्षं, तच्चावध्यादिकं त्रिप्रकारं, ततो लोकव्यवहारमधिकृत्येन्द्रियाश्रितं ज्ञानमनन्तरसूत्रे प्रत्यक्षमुक्तं, न परमार्थतः, अथोच्येत-अनन्तरसूत्रे न किमपि विशेषसूचकं पदमीक्षामहे, ततः कथमिदमवसीयते-

संव्यवहारमधिकृत्येन्द्रियाश्रितं ज्ञानं प्रत्यक्षमुक्तं, न परमार्थत इति ?, उच्यते, उत्तरसूत्रार्थ-पर्यालोचनात्, प्रत्यक्षभेदाभिधानानन्तरं हि सूत्रमाचार्यो वक्ष्यति-'परोक्खं दुविहं पन्नत्तं, तंजहाआभिनिबोहियनाणं सुयनाण'मित्यादि, तत्राभिनिबोधिकमवग्रहादिरूपम्, अवग्रहादयश्च श्रोत्रेन्द्रियाद्याश्रिता वर्णयिष्यवति, तद्यपि श्रोत्रादिन्द्रियाश्रितं ज्ञानं परमार्थतः प्रत्यक्षं तत्कथ-वग्रहादयः परोक्षज्ञानत्वेनाग्रेऽभिधीयन्ते ?, तस्मादुत्तरत्रेन्द्रियाश्रितज्ञानस्य परोक्षत्वेनाभिधाना-दवसीयते-अनन्तरसूत्रेणोच्यमानमिन्द्रियाश्रितं ज्ञानं व्यवहारप्रत्यक्षमुक्तं, न परमार्थत इति स्थितं,

"एगंतेन परोक्खं लिंगयमोहाइयं च पच्चक्खं ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इंदियमनोभवं जं तं संववहारपच्चक्खं ॥"

अकलङ्कोऽप्याह-"द्विविधं प्रत्यक्षज्ञानं-सांव्यवहारिकं मुख्यं च, तत्र सांव्यवहारिकमिन्द्रियानिन्द्रियप्रत्यक्षं मुख्यमतीन्द्रियज्ञान"मिति, केवलमनोमात्रनिमित्तं श्रुतज्ञानं च लोकेऽपि परोक्षमिति प्रतीतं, नापि सूत्रे कचिदपि प्रत्यक्षमिति व्यवहृतं ततो न तत्र कश्चिद्विवादः।

तदेवं प्रत्यक्षं परोक्षं चेति भेदद्वयोपन्यासे कृते सति शिष्योऽनवबुध्यमानः प्रश्नं विधत्ते -

*मू. ( ५५ )से किं तं पच्चक्खं ?, पच्चक्खं दुविहं पन्नत्तं, तंजहा-इंदियपच्चक्खं नोइंदियपच्चक्खं च।*

**वृ.** सेशब्दो मागधदेशीयप्रसिद्धो निपातोऽथशब्दार्थो वर्त्तते, अथशब्दार्थश्च प्रक्रियाद्यर्थाभिधायी, यत उक्तं-"अथ प्रक्रियाप्रश्नानन्तर्यमङ्गलोपन्यासप्रतिवचनसमुच्चयेष्वि"ति, इह चोपन्यासार्थो वेदितव्यः, 'किं'मिति परप्रश्ने, तत्प्रागुपदिष्टं प्रत्यक्ष (क्षं किं)मिति ?, न्यायमार्गोपदर्शनार्थमाचार्यः शिष्यपृष्टपदानुवादपुरस्सरीकारणे प्रतिवचन-मभिधातुकाम आह-पच्चक्खमित्यादि, एवमन्यत्रापि यथायोगं प्रश्ननिर्वचनसूत्राणां पातनिका भावनीया।

प्रत्यक्षं द्विविधं प्रज्ञप्तं, तद्यथा-इन्द्रियप्रत्यक्षं नोइन्द्रियप्रत्यक्षं च, तत्र 'इदुपरमैश्वर्ये' उदितो नमि'ति नम् इन्दनादिन्द्रः-आत्मा सर्वद्रव्योपलब्धिरूपपरमैश्वर्ययोगात्, तस्य लिङ्गं-चिह्नमविनाभावि इन्द्रियम् 'इन्द्रियमिति' निपातनसूत्राद्रूपनिष्पत्तिः, तत् द्विधा-द्रव्येन्द्रियं भावेन्द्रियं च, तत्र द्रव्येन्द्रियं द्विधा-निर्वृत्तिरुपकरणं च, निर्वृत्तिर्नाम प्रतिविशिष्टः संस्थानविशेषः, सापि द्विधा-बाह्या अभ्यन्तरा च, तत्र बाह्या कर्ण्णपर्पटकादिरूपा, सापि विचित्रा-न प्रतिनियतरूपतयोपदेष्टुं शक्यते, तथाहि-मनुष्यस्य श्रोत्रे-भ्रूसमे नेत्रयोरुभयापार्श्वतः संस्थिते वाजिनोः मस्तके नेत्रयोरुपरिष्टाद्भाविनी तीक्ष्णे चाग्रभागे इत्यादिजातिभेदान्नानाविधाः, आभ्यन्तरा तु निर्वृत्तिः सर्वेषामपि जन्तूनां समाना, तामेवाधिकृत्यामूनि सूत्राणि प्रावर्तिष्यन्तः।

सोइंदिए णं भंते ! किंसंठाणसंठिए पन्नत्ते ?, गोअमा ! कलंबुयासंठाणसंठिए पन्नत्ते, चक्खिदिए णं भंते ! किंसंठाणसंठिए पन्नत्ते ?, गोअमा ! मसूरचंदसंठाणसंठिए पन्नत्ते, घाणिंदिए णं भंते ! किंसिठाणसंठिए पन्नत्ते ?, गोयमा ! अइमुत्तसंठाणसंठिए पन्नत्ते, जिब्भिंदिए णं भंते ! किंसंठाणसंठिए पन्नत्ते ?, गोअमा ! खुरप्पसंठाणसंठिए पन्नत्ते, फासिंदिए णं भंते ! किंसंठाणसंठिए पन्नत्ते ? गोअमा ! नानासंठाणसंठिए पन्नत्ते"

इह स्पर्शनेन्द्रियनिर्वृत्तेः प्रायो न बाह्याभ्यन्तरभेदः, तत्त्वार्थमूलटीकायां तथाभिधानात्, उपकरणं खङ्गस्थानीयाया बाह्यनिर्वृत्तेर्या खङ्गधारासमाना स्वच्छतरपुद्गलसमूहात्मिका अभ्यन्तरा निर्वृत्तिः-तस्याः शक्तिविशेषः, इदं चोपकरणरूपं द्रव्येन्द्रियमान्तरनिर्वृत्तेः कथञ्चिदर्थान्तरं, शक्ति-शक्तिमतोः कथञ्चिद्भेदात्, कथञ्चिद्भेदश्च सत्यामपि तस्यामान्तरनिर्वृत्तौ द्रव्यादिनोपकरणस्य विघातसम्भवात्, तथाहि-सत्यामपि कदम्बपुष्पाद्याकृतिरूपायामान्तरानिर्वृत्तावतिकठोरतर-घनगर्जितादिना शक्त्युपघाते सति न परिच्छेत्तुमीशते जन्तवः शब्दादिकमिति, भावेन्द्रियमपि द्विधालब्धिरुपयोगश्च, तत्र लब्धिः श्रोत्रेन्द्रियादिविषयः सर्वात्मप्रदेशानां तदावरणकर्मक्षयोपशमः, उपयोगः स्वस्वविषये लब्धिरूपेन्द्रियानुसारेण आत्मनो व्यापारः, इह च द्विविधमपि द्रव्यभावरूपमिन्द्रियं गृह्यते, एकतरस्याप्यभावे इन्द्रियप्रत्यक्षत्वानुपपत्तेः, तत्र इन्द्रियस्य प्रत्यक्षं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इन्द्रियप्रत्यक्षं, नोइन्द्रियप्रत्यक्षं यत् इन्द्रियप्रत्यक्षं न भवति, नोशब्दः सर्वनिषेधवाची, तेन मनसोऽपि कथञ्चिदिन्द्रियत्वाभ्युपगमात्तदाश्रितं ज्ञानं प्रत्यक्षं न भवतीति सिद्धम् ॥

*मू. ( ५६ )से किं तं इंदिअपच्चक्खं ?, इंदिअपच्चक्खं पंचविहं पन्नत्तं, तंजहा- सोइंदिअपच्चक्खं चक्खिदिअपच्चक्खं घाणिंदिअपच्चक्खं जिब्भिदिअपच्चक्खं फासिंदिअपच्चक्खं, से तं इंदिअपच्चक्खं ।*

वृ. अथ किं तदिन्द्रियप्रत्यक्षं ?, इन्द्रियप्रत्यक्षं पञ्चविधं प्रज्ञप्तं, तद्यथा- श्रोत्रेन्द्रियप्रत्यक्षमित्यादि, तत्र श्रोत्रेन्द्रियस्य प्रत्यक्षं श्रोत्रेन्द्रियप्रत्यक्षं, श्रोत्रेन्द्रियं निमित्तीकृत्य यदुत्पन्नं ज्ञानं तत् श्रोत्रेन्द्रियप्रत्यक्षमिति भावः, एवं शेषेष्वपि भावनीयम् । एतच्च व्यवहारत उच्यते, न परमार्थत इत्यनन्तरमेव प्रागुक्तम् । आह-स्पर्शनरसनघ्राणचक्षुःश्रोत्राणीन्द्रियाणीपि क्रमः, अयमेव च समीचीनः, पूर्वपूर्वलाभ एवोत्तरोत्तरलाभसम्भवात्, ततः किमर्थमुत्क्रमोपन्यासः कृतः ?, उच्यते, अस्ति पूर्वानुपूर्वी अस्ति पश्चानुपूर्वीति न्यायप्रदर्शनार्थं, अपि च-शेषेन्द्रियापेक्षया श्रोत्रेन्द्रियं पटु, ततः श्रोत्रेन्द्रियस्य यत् प्रत्यक्षं तच्छेषेन्द्रियप्रत्यक्षापेक्षया स्पष्टसंवेदनं, स्पष्टसंवेदनं चोपवर्ण्यमानं विनेयः सुखेनावबुध्यते, ततः सुखप्रतिपत्तये श्रोत्रेन्द्रियादिक्रमः उक्तः ॥

*मू. ( ५७ )से किं तं नोइंदिअपच्चक्खं ?, नोइंदियअपच्चक्खं तिविहं पन्नत्तं, तंजहा- ओहिनाणपच्चक्खं मनपज्जवनाणपच्चक्खं केवलनाणपच्चक्खं ।*

*मू. ( ५८ )से किं तं ओहिनाणपच्चक्खं ?, ओहिनाणपच्चक्खं दुविहं पन्नत्तं, तंजहा- भवपच्चइअं च खओवसमिअं च ।*

*मू. ( ५९ ) से किं तं भवपच्चइअं ?, २ दुण्हं, तंजहा- देवाण य नेरइआण य ।*

*मू. ( ६० )से किं तं खओवसमिअं ?, खओवसमिअं दुण्हं, तंजहामनूसाण य पंचेंदिअतिरिक्खजोणिआण य ?, को-हेऊ खाओवसमियं ?, खओवसमियं तयावरणिज्जाणं कम्माणं उदिण्णाणं खएणं अनुदिण्णाणं उवसमेणं ओहिनाणं समुपज्जइ ॥*

वृ. अथ किं तन्नोइन्द्रियप्रत्यक्षं ?, नोइन्द्रियप्रत्यक्षं त्रिविधं प्रज्ञप्तं, तद्यथा-अविधज्ञानप्रत्यक्षमित्यादि ॥ अथ किं तदवधिज्ञानप्रत्यक्षं ?, २ द्विविधं प्रज्ञप्तं, तद्यथा- भवप्रत्ययं च क्षायोपशमिकं च, तत्र भवन्ति कर्मवशवर्त्तिनः प्राणिनोऽस्मिन्निति भवो-नारकादिजन्म 'पुंनाम्नी'ति अधिकरणे घप्रत्ययः, भव एव प्रत्ययः-कारणं यस्य तद्‌भवप्रत्ययं, प्रत्ययशब्दश्चेह कारणपर्यायः, वर्त्तते प्रत्ययशब्दः कारणत्वे, यत उक्तम्-'प्रत्ययः शपथे ज्ञाने, हेतुविश्वासनिश्चये' चशब्दः स्वगतदेवनारकाश्रितभेदद्वयसूचकः, तौ च द्वौ भेदौ अनन्तरमेव वक्ष्यति ।

तथा क्षयश्चोपशमश्च क्षयोपशमौ ताभ्यां निर्वृतं क्षायोपशमिकं, चशब्दः स्वगतानेकभेदसूचकः, तत्र यद्येषां भवति तत्तेषामुपदर्शयति-दोण्हमित्यादि, द्वयोर्जीवसमूहयोः भवप्रत्ययं, तद्यथा देवाना च नारकाणां च, तत्र दिव्यन्ति-निरुपमक्रीडामनुभवन्तीति देवाः तेषां, तथा नरान् कायन्ति शब्दयन्ति योग्यतया अनतिक्रमेणाकारयन्ति जन्तून् स्वस्थाने इति नरकाः तेषु भवा नारकाः तेषां, चशब्द उभयत्रापि स्वगतानेकभेदसूचकः, ते च संस्थानचिन्तायामग्रे दर्शयिष्यन्ते ।

अत्राह परः-नन्ववधिज्ञानं क्षायोपशमिके भावे वर्त्तते नारकादिभवश्चौदयिके तत्कथं देवादीनामवधिज्ञानं भवप्रत्ययमिति व्यपदिश्यते ?, नेष दोषः, यतस्तदपि परमार्थतः क्षायोपश-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मिक मेव, केवलं स क्षयोपशमो देवनारकभवेष्ववश्यंभावी, पक्षिणां गगनगमनलब्धिरिव, ततो भवप्रत्ययमिति व्यपदिश्यते, उक्तं च चूर्णौ-"ननु ओही खाओवसमिए भावे नारगाइभवो से उदइए भावे तओ कहं भवपच्चइओ भण्णइ ?, उच्यते, सोऽवि खओवसमिओ चेव, किंतु सो खओवसमो नारगदेवभवेसु अवस्सं भवइ, को दिट्ठंतो ?, पक्खीणं आगासगमणं व, तओ भवपच्चइओ भन्नइ" त्ति। तथा द्वयोः क्षायोपशमिकं, तद्यथा-मनुष्याणां च पञ्चेन्द्रियतिर्यग्योनिजानां च, अत्रापि चशब्दौ प्रत्येकं स्वगतानेकभेदसूचकौ पञ्चेन्द्रियतिर्यग्मनुष्याणां चावधिज्ञानं नावश्यंभावि, ततः समानेऽपि क्षायोपशमिकत्वे भवप्रत्ययादिदं भिद्यते, परमार्थतः पुनः सकलमप्यवधिज्ञानं क्षायोपशमिकं।

सम्प्रति क्षायोपशमिकस्वरूपं प्रतिपादयति-'को हेतुः ?' किं निमित्तं यद्वशादवधिज्ञानं क्षायोपशमिकमित्युच्यते ?, तत्र निर्वचनमभिधातुकाम आह-क्षायोपशमिकं येन करणेन तदावरणीयानाम्-अवधिज्ञानावरणीयानां कर्मणामुदीर्णानां क्षयेण अनुदीर्णानाम्-उदयावलिकामप्राप्तानामुपशमेन-विपाकोदयविष्कम्भलक्षणेनावधिज्ञानमुत्पद्यते, तेन कारणेन क्षायोपशमिकमित्युच्यते, क्षयोपशमश्च देशघातिरसस्पर्द्धकानामुदये सति भवति न सर्वघाति-रसस्पर्द्धकानाम्, अथ किमिदं देशघातीनि सर्वघातीनि वा रसस्पर्द्धकानीति ?, उच्यते, इह कर्म्मणां प्रत्येकमनन्तानन्तानि रसस्पर्द्धकानि भवन्ति, रसस्पर्द्धकस्वरूपं च कर्म्मप्रकृतिटीकायां सप्रपञ्चमुपदर्शितमिति न भूयो दर्श्यते, तत्र केवलज्ञानावरणीयादिरूपाणां सर्वघातिनीनां प्रकृतीनां सर्वाण्यपि रसस्पर्द्धकानि सर्वघातीनि, देशघातिनीनां पुनः कानिचित् सर्वघातीनि कानिचिद्देश-घातीनि, तत्र यानि चतुःस्थानकानि त्रिस्थानकानि वा रसस्पर्द्धकानि तानि नियमतः सर्वघातीनि, द्विस्थानकानि पुनः कानिचिद्देशघातीनि कानिचित्सर्वघातीनि, एकस्थानकानि तु सर्वाण्यपि देशघातीन्येव, उक्तं च-

"चउतिट्ठाणरसाणि य सवघाईणि होंति फड्डाणि।
दुट्ठाणियाणि मीसाणि देसघाईणि सेसाणि॥"

अथ किमिदं रसस्य चतुःस्थानकत्रिस्थानकत्वादि ?, उच्यते, इह शुभप्रकृतीनां रसः क्षीर-खण्डादिरसोपमः अशुभप्रकृतीनां तु निम्बघोषातक्यादिरसोपमः, उक्तं च -'घोसाडइनिंबुवमो असुभाण सुभाण खीरखंडुवमो' क्षीरादिरसश्च स्वाभाविक एकस्थानकः, द्वयोस्तु कर्षयोरावर्त्तने कृते सति योऽवशिष्यते एकः कर्षकः स द्विस्थानकः, त्रयाणां कर्षाणामावर्त्तने कृते सति एकः कर्षोऽवशिष्यः त्रिस्थानकः, चतुर्णां कर्षणामावर्त्तने कृते सति उद्धरति य एकः कर्षः स चतुःस्थानकः, एकस्थानकोऽपि च रसो जललवबिन्दुचुलुकार्धचुलुकप्रसृत्यञ्जलिकरक-कुम्भद्रोणादिप्रक्षेपात् मन्दमन्दतरादिबहुभेदत्वं प्रतिपद्यते, एवं द्विस्थानकादयोऽपि, एवं कर्मणामपि चतुःस्थानकादयो रसा भावनीयाः प्रत्येकमनन्तभेवभाजश्च, कर्मणां चैकस्थानकादयो रसाः यथोत्तरमनन्तगुणा वेदितव्याः, उक्तं च-

"अनंतगुणिया कमेणिरे" तत्राशुभप्रकृतीनां चतुःस्थानकरसबन्धः प्रस्तररेखासदृशैः अनन्तानुबन्धिक्रोधादिकैः क्रियते दिनकरतपशोषिततडागभूरेखासदृशैरप्रत्याख्यानसंज्ञैः क्रोधादिभिः त्रिस्थानकरसबन्धः सिकताकणसंहतिगतरेखासदृशैः प्रत्याख्यानावरणसंज्ञैर्द्वि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्थानकरसबन्धौ जलरेखासदृशैस्तु सञ्ज्वलनसंज्ञैरेकस्थानकरसबन्धः, शुभप्रकृतीनां पुनरेतदेव व्यत्यासेन योजनीयम्, नवरं द्विस्थानकादारभ्य, तथा चोक्तम्-

''पव्वयभूमीवालुयजलरेहासरिस संपराएसुं।
चउठाणाई असुभाण सेसयाणं तु वच्चासो ॥'' इति,

'शेषकाणां' शुभप्रकृतीनां व्यत्यासो द्रष्टव्यः सच द्विस्थानकादारभ्य, यथोक्तं प्राक्। अथ कथमवसीयते ? यदुत द्विस्थानकादारभ्य व्यत्यासो नैकस्थानकादारभ्य ?, उच्यते, शुभप्रकृतीनामेकस्थानकरसबन्धस्यासम्भवाद्, असम्भवः कथमिति चेद्, उच्यते, इहात्यन्तविशुद्धौ वर्त्तमानः शुभप्रकृतीनां चतुःस्थानकमेव रसं बन्धाति, ततो मन्दमन्दतरविशुद्धौ त्रिस्थानकं द्विस्थानकं वा, सङ्क्लेशाद्धायां तु वर्त्तमानस्य शुभप्रकृतयो बन्धमेव नायान्ति, कुतः ?, तस्यामवस्थायां तद्गतरसस्थानकचिन्तायामपि नरकगतिप्रायोग्यं बन्धतोऽतिसंक्लष्टस्यापि वैक्रियतैजसादिकाः प्रकृतयो बन्धमायान्ति तासामपि स्वभावतो द्विस्थानकरसस्यैव बन्धो नैकस्थानस्य, ततः शुभप्रकृतीनां व्यत्यासयोजना द्विस्थानकरसबन्धादारभ्य कर्त्तव्या, अथाशुभप्रकृतीनामेकस्थानकस्यापि रसस्य बन्धो भवतीति कथमवसेयम् ?, उच्यते, इह द्विधा घातिन्योऽशुभप्रकृतयः, तद्यथा-सर्वघातिन्यो देशघातिन्यश्च, तत्र याः सर्वघातिन्यः तासां जघन्यपदेऽपि द्विस्थानक एव रसो बन्धमायाति, नैकस्थानकः, तथास्वाभाव्यात्,

तथाहि-क्षपकश्रेण्यारोहेऽपि सूक्ष्मसम्परायगुणस्थानकचरमसमयेऽपि वर्त्तमानस्य केवलज्ञानावरणकेवलदर्शनावरणयोः रसबन्धो द्विस्थानक एवेति, नैकस्थानकः, यास्तु देशघातिन्यः तासां श्रेण्यारोहाभावे बन्धमागतानां नियमात् सर्वघातिनमेव रसं बन्धाति, यत उक्तं कर्मप्रकृतौ- ''असेढिगा य बंधंति उ सवघाईणि'' सर्वघाती च रसो जघन्यपदेऽपि द्विस्थानको 'दुट्ठाणियाणि मीसाणि देसघाईणि सेसाणीति' वचनात्, ततो न श्रेण्यारोहाभावे तासामेकस्थानकरसबन्धसम्भवः, श्रेण्यारोहे त्वनिवृत्तिबादरसम्परायगुणस्थानकाद्धायाः सङ्ख्येयेषु भागेषु गतेषु सत्सुतत ऊर्द्ध्वमेकस्थानकरसबन्धसम्भवः, तदानीं च ज्ञानावरणचतुष्टयदर्शननावरणत्रयपुरुषवेदान्तरायपञ्चकसञ्ज्वलनचतुष्टयरूपाः सप्तदश प्रकृतीर्व्यतिरिच्य शेषा बन्धमेव नायान्ति, तद्बन्धहेतुव्यवच्छेदात्, ततो न तासामेकस्थानकरसबन्धसम्भवः, सप्तदशानां तु प्रकृतीनां तदा बन्धसम्भवादेकस्थानको रसबन्धः प्राप्यते, उक्तं च-

''आवरणमसव्वग्घं पुंसंजलणंतरायपयडीओ।
चउठाणपरिणयाओ दुतिचउठाणाउ सेसाओ ॥''

अत्र 'चउठाणपरिणयाउ'त्ति एकस्थानकपरिणता द्विस्थानकपरिणताः त्रिस्थानकपरिणताश्चःस्थानकपरिणताश्चेत्यर्थः, शेषं सुगमं, ततः सप्तदशप्रकृतिनामेकस्थानकरसबन्धसम्भवात् तदपेक्षयाऽशुभप्रकृतीनामेकस्थानकरसबन्धादारभ्य योजना कृता, सर्वघातीनि च रसस्पर्द्धकानि सकलमपि स्वधात्यं ज्ञानादिगुणमुपघ्नन्ति, तानि च स्वरूपेण ताम्रभाजनवन्निश्छिद्राणि धृतमिवातिशयेन स्निग्धानि द्राक्षेव तनुप्रदेशोपचितानि स्फटिकाभ्रकहावच्चातीव निर्मलानि, उक्तं च-

''जो घाएइ सविसयं सयलं सो होइ सव्वघाइरसो।
सो निच्छद्दो निद्धो तणुओ फलिहब्भहरविमलो ॥''

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यानि च देशघातीनि रसस्पर्द्धकानितानि स्वघात्यं ज्ञानादिगुणं देशतो घ्नन्ति, तदुदयेऽवश्यं क्षयोपशमसम्भवात्, तानि च स्वरूपेणानेकविधविवरसंकुलानि, तथाहि-कानिचित्कट इवातिस्थूरच्छिद्रशतसंकुलानि, कानिचित्, कम्बल इव मध्यमविवरशतसंकुलानि, कानिचित्पुन-रतिसूक्ष्मविवरसंकुलानि, यथा वासांसि, तथा तानि देशघातीनि रसस्पर्द्धकानि स्तोकस्नेहानि भवन्ति वैमल्यरहितानि च, उक्तं च-

"देसविघाइत्तणओ इयरो कडकंबलंसुसंकासो।
विविहच्छिद्दुहभरिओ अप्पसिनेहो अविमलो अ॥"

अघातिनीनां तु रसस्पर्द्धकानि स्वरूपेण न सर्वघातीनि नापि देशघातीनि, केवलं सर्वघाति-रसस्पर्द्धकसङ्घर्षतः सर्वघातिरससदृशानि भवन्ति, यथा स्वयमचौरा इति(अपि) चौरसम्पर्कतः चौरप्रतिभासाः, उक्तं च-

"जाण न विसओ घाइत्तणंमि ताणंपि सव्वघाइरसो।
जायइ घाइसगासेण चोरया वेहऽचोराणं॥"

तदेवमुक्तानि सर्वघातीनि देशघातीनि च रसस्पर्द्धकानि, सम्प्रति यथा क्षयोपशमो भवति तथा भाव्यते-तत्र देशघातिनीनां मतिज्ञानावरणीयादिकर्मप्रकृतीनां सर्वघातीनि रसस्पर्द्धकानि अध्यवसायविशेषतो देशघातीनि कर्तुं शक्यन्ते, तथास्वाभाव्यात्, कथमेतदवसेयमिति चेत्?, उच्यते, इह यदि बन्धत एव देशघातीनि रसस्पर्द्धकानि भवेयुर्नाध्यवसायविशेषतः तथापरिण-मनेनापि, तर्हि मतिज्ञानादीनामभाव एव सर्वथा प्राप्नोति, मत्यादीनि ज्ञानानि क्षायोपशमिकाणी यदुक्तमनुयोगद्वारेषु-"खओवसमिया आभिनिबोहियनाणलद्धी खओवसमिया सुयनाणलद्धी खओवसमिया ओहिनाणलद्धी" इत्यादि, क्षयोपशमश्च विपाकोदयवतीनां प्रकृतीनां देशघाति-नामेव रसस्पर्द्धकानामुदये भवति, न सर्वघातिनां, देशघातीनी च रसस्पर्द्धकानि बन्धमधिकृत्या-निवृत्तिबादरसम्पराद्धायाः सङ्ख्येयेषु भागेषु गतेषु सत्सुतत ऊर्द्ध्वं प्राप्यन्ते, ततस्तस्या अवस्थाया अर्वाक् सर्वथा मतिज्ञानादीनि न प्राप्नुवन्ति, सर्वघातिरसस्पर्द्धकविपाकोदयभावतः तेषां क्षयोपशमासम्भवाद्, अथ च मतिज्ञानादिबलप्रभावतः तस्या अवस्थायाः सम्प्राप्तिस्ततः इतरेतराश्रयदोषवैवस्वतमुखोपनिपतित्वान्न कदाचिदपि मतिज्ञानादिसम्भवः, अपि च मतिश्रुत-ज्ञानाचक्षुदर्शनान्यपि क्षायोपशमिकाणि, क्षयोपशमश्च यदि विपाकोदये भवति तर्हि देशघाति-रसस्पर्द्धकानामेव न सर्वघातिरसस्पर्द्धकानां, देशघातीनि च रसस्पर्द्धकानि अनिवृत्तिबादर-सम्पराद्धायां, ततस्तेषामपि ततोऽर्वागभावः प्राप्नोति, अथ च सर्वजीवानामपि तामवस्थामप्राप्ता-नाममूनि विद्यन्ते, ततोऽवश्यमेतदुरीकर्त्तव्यं-भवन्ति देशघातिनीनां प्रकृतीनां सर्वघातीन्यपि रसस्पर्द्धकान्यध्यवसायविशेषतो देशघातीनीति, अथ यथा देशघातिनीनां सर्वघातीनि रसस्पर्द्धकानि अध्यवसायविशेषतो देशघातीनि भवन्ति तथा सर्वघातिनोः केवलज्ञानावरणकेवलदर्शना-वरणयोरपि कस्मान्नोपजायन्ते?, उच्यते, तथास्वाभाव्यात्,

तथाहि-तथारूपा एव ते पुद्गलाः केवलज्ञानकेवलदर्शनावरणयोर्योग्या ये द्विस्थानकर-सपरिणता अपि न देशघातिनो भवन्ति, नापि तेषां विपाकोदयविष्कम्भभाञ्जि, तथास्वाभाव्याद्, एतच्चावसीयते तथाकार्यदर्शनात्, तथाहि-सम्यक्त्वसम्यग्मिथ्यात्वदेशविरतिसामायिक-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

च्छेदोपस्थापनपरिहारविशुद्धिकसूक्ष्मसम्परायसंयमाः क्षायोपशमिका उपवर्ण्यन्ते, यत उक्तं - "खओवसमिया सम्मदंसणलद्धी खओवसमिआ सम्मामिच्छादंसणलद्धी खओवसमिया सामाइयलद्धी खओवसमिया छेओवट्ठाणलद्धी, एवं परिहारविसद्धियलद्धी सुहुमसंपरायलद्धी खओवसमियो चरित्ताचरित्तलद्धी" इति। अन्यत्रापि उक्तं-

"मिच्छत्तं जमुइन्नं तं खीणं अनुइयं च उवसंतं।
मीसीभावपरिणयं वेइज्जंतं खओवसमं॥१॥" तथा
"क्षपयत्युपशमयति वा प्रत्याख्यानावृतः कषायांस्तान्।
स ततो येव भवेत् तस्य विरमणे बुद्धिरल्पाल्पा॥१॥"
छेदोपस्थाप्यं वा व्रतं सामायिकं चरित्रं वा।
स ततो लभते प्रत्याख्यानावरणक्षयोपशमात्॥२॥"

क्षयोपशमश्च भवति विपाकोदयनिरोधे, ततोऽवसीयते-भवन्ति मिथ्यात्वाप्रत्याख्यानप्रत्याख्यानावरणादीनां सर्वघातिप्रकृतीनां सर्वघातीनि रसस्पर्द्धकान्यध्यवसायविशेषतो विपाकोदयाभावयुक्तानीति कृतं प्रसङ्गेन। तत्रावधिज्ञानावरणप्रकृतीनां तथाविधविशुद्धाध्यवसायभावतः सर्वघातिषु रसस्पर्द्धकेषु देशघातिरूपतया परिणमितेषु देशघातिरसस्पर्द्धकेष्वपि चातिस्निग्धेष्वल्पसरसीकृतेषु उदयावलिकामाप्तस्यांशस्य क्षयेऽनुदीर्णस्य चोपशमे विपाकोदयविष्कम्भरूपे जीवस्यावध्यादयो गुणाः प्रादुष्ष्यन्ति, उक्तं च-

"निहिएसु सव्वघाईरसेसु फड्डेसु देसघाईणं।
जीवस्स गुणा जायन्ति ओहिमनचक्खुमाईया॥"

अत्र 'निहितेष्वि'ति देशघातिरसस्पर्द्धकतया व्यवस्थापितेषु, शेषं सुगमं, सर्वघातीनि च रसस्पर्द्धकानि अवधिज्ञानावरणीयस्य देशघातिरसस्पर्द्धकतया परिणमयति, कदाचित् विशिष्टगुणप्रतिपत्तिमन्तरेण कदाचित् पुनर्विशिष्टगुणप्रतिपत्त्या, विशिष्टगुणप्रतिपत्तिमन्तरेण कथमिति चेद्, उच्यते, इह यथा दिवाकरमण्डलस्य घनपटलाच्छादितस्य कथञ्चिद्विस्रसापरिणामेन घनपटलपुद्गलानां निःस्नेहीभूय परिक्षयतः समुपजातेन रन्ध्रेण तिमिरनिकरोपसंहारहेतवो भानवः स्वावपातदेशास्पदं द्रव्यमुद्योतयन्ति तथा प्रकृतिभासुरस्य आत्मनो मिथ्यात्वादिहेतूपचयोपजनितावधिज्ञानावरणपटलतिरस्कृतस्वरूपस्य संसारे परिभ्रमतः कथञ्चिदेवमेव तथाविधशुभाध्यवसायप्रवृत्तितोऽवधिज्ञानावरणसम्बन्धिनां सर्वधारतिरसस्पर्द्धकानां देशघातिरसस्पर्द्धकतया जातानामुदयावलिकाप्राप्तस्यांशस्य परिक्षयतोऽनुदयावलिकाप्राप्तस्योपशमतः समुद्भूतेन क्षयोपशमरूपेण रन्ध्रेण विनिर्गतोऽवधिज्ञानालोकः प्रसाधयति स्वकार्यं, कदाचित् पुनर्विशिष्टगुणप्रतिपत्तितः सर्वघातीनि रसस्पर्द्धकानि दशेघातीनि भवन्ति तथा चोक्तम्-

*मू. (६१) अहवा गुणपडिवन्नस्स अनगारस्स ओहिनाणं समुप्पज्जइ तं, समासओ छव्विहं पन्नत्तं, तंजहा-आनुगामिअं १ अनानुगामिअं २ वड्ढमानयं ३ हीयमानयं ४ पडिवाइयं ५ अप्पडिवाइयं ६।*

**वृ.** 'अथवे'ति प्रकारान्तरोपदर्शने, प्रकारान्तरता च गुणप्रतिपत्तिमन्तरेणेत्यपेक्ष्य द्रष्टव्या, गुणाः-मूलोत्तररूपाः तान् प्रतिपन्नो गुणप्रतिपन्नः, अथवा गुणैः प्रतिपन्नःपात्रमितिकृत्वा गुणैराश्रितो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गुणप्रतिपन्नः, अनेन पात्रतायां सत्यां स्वयमेव गुणा भवन्तीति प्रतिपादयति, उक्तं च-

"नोदन्वानर्थितामेति, न चाम्भोभिर्न पूर्यते।
आत्मा तु पात्रतां नेयः, पात्रमायान्ति सम्पदः॥"

अगारं-गृहं न विद्यते अगारं यस्यासावनगारः, परित्यक्तद्रव्यभावगृह इत्यर्थः, तस्य, प्रशस्तेष्वध्यवसायेषु वर्त्तमानस्य सर्वघातिरसस्पर्द्धकेषु देशघातिरसस्पर्द्धकतया जातेषु पूर्वोक्तक्रमेण क्षयोपशमभावतोऽवधिज्ञानमुपजायते।

मनःपर्यायज्ञानावरणीयस्य तु विशिष्टसंयमाप्रमादादिप्रतिपत्तावेव सर्वघातीनि रसस्पर्द्धकानि देशघातीनि, भवन्ति, तथास्वाभाव्यात्, तच्च तथास्वाभाव्यं बन्धकाले तथारूपाणामेव तेषां बन्धनात्, ततो मनःपर्यायज्ञानं विशिष्टगुणप्रतिपन्नस्यैव वेदितव्यं, मतिश्रुतावरणाचक्षुदर्शनावरणान्तरायप्रकृतीनां पुनः सर्वघातीनि रसस्पर्द्धकानि येन तेन चाध्यवसायेनाध्यवसायानुरूपं देशघातीनि स्पर्द्धकानि भवन्ति, तेषां तथास्वाभाव्यात्, ततो मत्यावरणादीनां सदैव देशघातिनामेव रसस्पर्द्धकानामुदयः, सदैव च क्षयोपशमः, उक्तं च पञ्चसंग्रहमूलटीकायां-'मतिश्रुतावरणाचक्षुदर्शनावरणान्तरायप्रकृतीनां च सदैव देशघातिरसस्पर्द्धकानामेवोदयः, ततस्तासां सदैवोदयिकक्षायौपशमिकौ भावावि'ति कृतं प्रसङ्गेन॥ 'तद्' अवधिज्ञानं 'समासतः' संक्षेपेण 'षड्विधं' षट्प्रकारं प्रज्ञप्तम्, तद्यथा-'आनुगामिकमि'त्यादि, तत्र गच्छन्तं पुरुषम्-आसमन्तादनुगच्छतीत्येवंशीलमानुगामि आनुगाम्येवानुगामिकं, स्वार्थे कः प्रत्ययः, अथवा अनुगमः प्रयोजनं यस्य तदानुगामिकं, यल्लोचनवत् गच्छन्तमनुगच्छति तदवधिज्ञानमानुगामिकमिति भावः। तथा न आनुगामिकं अनानुगामिकं शृङ्खलाप्रतिबद्धप्रदीप इव यत् न गच्छन्तमनुगच्छति तदवधिज्ञानमनानुगामिकं, उक्तं च-

"अनुगामिओऽनुगच्छइ गच्छंतं लोअणं जहा पुरिसं।
इयरो उ नानुगच्छइ ठियप्पईवोव गच्छंतं॥"

तथा वर्द्धत इति वर्द्धमानं, ततः संज्ञायां कन्प्रत्ययः, बहुबहुतरेन्धनप्रक्षेपादिभिर्वर्द्धमानदहनज्वालाकलाप इव पूर्वावस्थातो यथायोगं प्रशस्तप्रशस्ततराध्यवासयभावतोऽभिवर्द्धमानमवधिज्ञानं वर्द्धमानकं, तच्चासकृद्विशिष्टगुणविशुद्धिसापेक्षत्त्वात्। तथा हीयते-तथाविधसामग्र्यभावतो हानिमुपगच्छति हीयमानं, कर्म्मकर्तृविवक्षायामानश्प्रत्ययः, हीयमानमेव हीयमानकं, 'कुत्सितात्पाज्ञाते' इति कः प्रत्ययः, पूर्वावस्थातो यदधो ह्रासमुपगच्छत्यवधिज्ञानं तत् हीयमानकमिति भावः, उक्तं च-हीयमानं पुव्वावत्थाओ अहोऽहो हस्समाणं" इति।

तथा प्रतिपतनशीलं प्रतिपाति, यदुत्पन्नं सत् क्षयोपशमानुरूपं कियत्कालं स्थित्वा प्रदीप इव सामस्त्येन विध्वंसमुपयाति तत्प्रतिपातीत्यर्थः। हीयमानकप्रतिपातिनोः कः प्रतिविशेष इति चेद्, उच्यते, हीयमानकं पूर्वावस्थातोऽधोऽधो ह्रासमुपगच्छदभिधीयते, यत्पुनः प्रदीप इव निर्मूलमेककालमपगच्छति तत्प्रतिपाति तथा न प्रतिपाति-यत् न केवलज्ञानादर्वाक् भ्रंशमुपयाति तदप्रतिपातीत्यर्थः। आह-आनुगामिकानानुगामिकरूपभेदद्वये एव शेषभेदा वर्द्धमानकादयोऽन्तर्भावयितुं शक्यन्ते, तत्किमर्थं तेषामुपादानं?, उच्यते, यद्यप्यन्तर्भावयितुं शक्यन्ते तथाऽप्यानु-



Jain Education International For Private & Personal Use Only www.jainelibrary.org

गामिकमनानुगामिकं चेत्युक्ते न वर्द्धमानकादयो विशेषा अवगन्तुं शक्यन्ते, विशेषावगमकरणाय च महता शास्त्रारम्भप्रयासः, ततो विशेषज्ञापनार्थं विशेषभेदोपन्यासकरणं ॥

*मू. ( ६२ )से किं तं आनुगामिअं ओहिनाणं ?, आनुगामिअं ओहिनाणं दुविहं पन्नत्तं, तंजहा- अंतगयं च मज्झगयं च ।*

*से किं तं अंगतयं ?, अंतगयं तिविहं पन्नत्तं, तंजहा-पुरओ अन्तगयं मग्गओ अन्तगयं पासओ अन्तगयं, से किं तं पुरओ अंतगयं ?, २ से जहानामए केइ पुरिसे उक्कं वा चडुलिअं वा अलायं वा मणिं वा पईवं वा जोइं वा पुरओ काउं पणुल्लेमाणे २ गच्छेज्जा, से तं पुरओ अंतगयं, से किं तं मग्गओ अन्तगयं ?, २-से जहानामए केइ पुरिसे उक्कं वा चडुलिअं वा अलायं वा मणिं वा पईवं वा जोइं वा मग्गओ काउं अणुकड्ढेमाने २ गच्छिज्जा से तं मग्गओ अंतगयं, से किं तं पासओ अंतगयं ?, २-से जहानामए केइ पुरिसे उक्कं वा चडुलिअं वा अलायं वा मणिं वा पईवं वा जोइं वा पासओ काउं परिकड्ढेमाने २ गच्छिज्जा से तं पासओ अंतगयं, से तं अंतगयं ।*

*से किं तं मज्झगयं ?, मज्झगयं से जहानामए केइ पुरिसे उक्कं वा चडुलिअं वा अलातं वा मणिं वा पईवं वा जोइं वा मत्थए काउं समुव्वहमाणे २ गच्छिज्जा से तं मज्झगयं ।*

**वृ.** अथ किं तदानुगामिकमवधिज्ञानं ?, आनुगामिकमवधिज्ञानं द्विविधं-अन्तगतं च मध्यगतं च, इहान्तशब्दः पर्यन्तवाची, यथा वनान्ते इत्यत्र, ततश्च अन्ते-पर्यन्ते गतं-व्यवस्थितमन्तगतम्, इहार्थत्रयव्याख्याअन्ते गतम्-आत्मप्रदेशानां पर्यन्ते स्थितमन्तगतं, इयमत्र भावना ।

इहावधिरुत्पद्यमानः कोऽपि स्पर्द्धकरूपतयोत्पद्यते, स्पर्द्धकं च नामावधिज्ञानप्रभावा गवाक्षजालादिद्वारविनिर्गतप्रदीपप्रभाया इन प्रतिनियतो विच्छेदविशेषः, तथा चाह जिनभद्रक्षमाश्रमणः स्वोपज्ञभाष्यटीकायां-'स्पर्द्धकमवधिविच्छेदविशेषः' इति, तानि चैकजीवस्य सङ्ख्येयान्यसङ्ख्येयानि वा भवन्ति, यत उक्तं मूलावश्यकप्रथमपीठिकायां-"फड्डा य असंखेज्जा संखेज्जा आवि एगजीवस्से"ति, तानि च विचित्ररूपाणि, तथाहि-कानिचित् पर्यन्तवर्त्तिष्वात्मप्रदेशेषूत्पद्यन्ते, तत्रापि कानिचित्पुरतः कानिचित्पृष्ठतः कानिचिदधोभागे कानिचिदपरितनभागे तथा कानिचिन्मध्यवर्त्तिष्वात्मप्रदेशेषु तत्र यदा अन्तवर्तिष्वात्मप्रदेशेष्ववधिज्ञानमुपाजयते तदा आत्मनोऽन्ते-पर्यन्ते स्थितमितिकृत्वा अन्तगतमित्युच्यते, तैरेव पर्यन्तवर्त्तिभिरात्मप्रदेशैः साक्षादवधिरूपेण ज्ञानेन ज्ञानात् न शषैरिति, अथवा औदारिकशरीरस्यान्ते गतं-स्थितं अन्तगतं, कयाचिदेकदिशोपलम्भात्, इदमपि स्पर्द्धकरूपमवधिज्ञानं, अथवा सर्वेषामप्यात्मप्रदेशानां क्षयोपशमभावेऽपि औदारिकशरीरान्तेनैकया दिशा यद्वशादुपलभ्यते तदप्यन्तगमत् ।

आह-यदि सर्वात्मप्रदेशानां क्षयोपक्षमस्ततः सर्वतः किं न पश्यति ?, उच्यते, एकदिशैव क्षयोपशमसंभवात्, विचित्रो हि क्षयोपशमः, ततः सर्वेषामप्यात्मप्रदेशानामित्थम्भूत एव स्वसामग्रीवशात् क्षयोपशमः संवृत्तो यदौदारिकशरीरमपेक्ष्य कयाचित् विवक्षितयैकया दिशा पश्यतीति, उक्तं चूर्णौ-"ओरालियसरीरंते ठियं गयंति एगट्ठं, तं चायप्पएसफड्डगा बहि एगदिसि पासणा गयंति अन्तगयं भन्नइ" तृतीयोऽर्थ एकदिग्भाविना तेनावधिज्ञानेन यदुद्योतितं क्षेत्रं तस्यान्ते वर्त्तते तदवधिज्ञानम्, अवधिज्ञानवतः तदन्ते वर्त्तमानत्वात्, ततोऽन्ते-एकदिगरूपस्यावधिज्ञानविषयस्य पर्यन्ते व्यवस्थितमन्तगतं ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चशब्दो देशकालाद्यपेक्षया स्वगतानेकभेदसूचकः, तथा 'मध्यगतं चे'ति इह मध्यं-प्रसिद्धं दण्डादिमध्यवत्, ततो मध्ये गतं मध्यगतं, इदमपि त्रिधा व्याख्येयं, आत्मप्रदेशानां मध्ये-मध्यवर्त्तिष्वात्मप्रदेशेषु गतं-स्थितं मध्यगतं, इदं च स्पर्द्धकरूपमवधिज्ञानं सर्वदिगुपलम्भकारणं मध्यवर्त्तिनामात्मप्रदेशानामवसेयम्, अथवा सर्वेषामप्यात्मप्रदेशानां क्षयोपशमभावेऽप्यौदारिकशरीरमध्यभागेनोपलब्धिस्तन्मध्ये गतं मध्यगतं, उक्तं चूर्णौ-''ओरालियसरीरमज्झे फड्डगविसुद्धीओ सव्वायप्पएसविसुद्धीओ वा सवदिसोवलम्भत्तणओ मज्झगउत्ति भन्नति'' अथवा तेनावधिज्ञानेन यदुद्योदितं क्षेत्रं सर्वासु दिक्षु तस्य मध्ये-मध्यभागे गतं-स्थितं मध्यगतम्, अवधिज्ञानिनः तदुद्योतितक्षेत्रमध्यवर्त्तित्वात्, आह च चूर्णिकृत-''अहवा उवलद्धिखेत्तस्स अवहिपुरिसो मज्झगउत्ति, अतो वा मज्झगओ ओही भन्नइ'' इति, चशब्दः स्वगतानेकभेदसूचकः-अथ किं तदन्तगतं ?, अन्तगतं 'त्रिविधं' त्रिप्रकारं प्रज्ञप्तम्, तद्यथा-तत्र 'पुरतः' अवधिज्ञानिनः स्वव्यपेक्षया अग्रभागेऽन्तगतं पुरतोऽन्तगतं, तथा मार्गतः-पृष्ठन्तः अन्तगतं मार्गतोऽन्तगतं, तथा पार्श्वतोर्द्वयोः पार्श्वयोरेकतरपार्श्वतो वाऽन्तगतं पार्श्वतोऽन्तगतं।

अथ किं तत्पुरतोऽन्तगतं ?, 'से जहा' इत्यादि 'स' विवक्षितो यथानामकः कश्चित्पुरुषः अत्र सर्वेष्वपि पदेष्वेकारान्तत्वम् 'अतः सौ पुंसी'ति मागधिकभाषालक्षणात्, सर्वमपि हि प्रवचनमर्द्धमागधिकभाषात्मकम्, अर्द्धमागधिकभाषया तीर्थकृतां देशनाप्रवृत्तेः, ततः प्रायः सर्वत्रापि मागधिकभाषालक्षणमनुसरणीयं।

'उक्का चेति' उल्का-दीपिका, वाशब्दः सर्वोऽपि विकल्पार्थः, चटुली वा चटुलीः-पर्यन्तज्वलिततृणपूलिका 'अलातं वा' अलातमुल्मुकं अग्रभागे ज्वलत्काष्ठमित्यर्थः, 'मणिर्वा' मणिः-प्रतीतः, 'ज्योतिर्वा' ज्यतोिः शरावाद्याधारो ज्वलन्नग्निः, आह च चूर्णिकृत-''जोइत्ति मल्लगाइठिओ अगनी जलंतो' इति, 'प्रदीपं वा' प्रदीप-प्रतीतः 'पुरतः' अग्रतो हस्ते दणडादौ वा कृत्वा 'पणोल्लेमाणोत्ति' प्रणुदन् २ हस्तस्थितं वा क्रमेण स्वगत्यनुसारतः प्रेरयन् २ 'गच्छेत्' यायात्, एष दृष्टान्तः, उपनयस्तु स्वयमेव भावनीयः, तत उपसंहारः-'से तं पुरओ अंतगयं' सेशब्दः प्रतिवचनोपसंहारदर्शने, तदेतत्, पुरतोऽन्तगतं, इयमत्र भावना-यथा स पुरुष उल्कादिभिः पुरत एव पश्यति, नान्यत्र, एवं येनावधिज्ञानेन तथाविधक्षयोपशमभावतः पुरत एव पश्यति, नान्यत्र, तदवधिज्ञानं पुरतोऽन्तगतमभिधीयते। एवं मार्गतोऽन्तर्गतपार्श्वतोऽन्तगतसूत्रं भावनीयं, नवरं 'अनुकड्ढेमाणे अनुकड्ढेमाणे'त्ति हस्तगतं दण्डाग्रादिस्थितं वा अनुपश्चात् कर्षन् अनुकर्षन् पृष्ठतः पश्चात् कृत्वा समाकर्षन् २ इत्यर्थः।

तथा 'पासओ परिकड्ढेमाणे'त्ति पार्श्वतो दक्षिणपार्श्वतोऽथवा वामपार्श्वतो यद्वा द्वयोरपि पार्श्वयोरुल्कादिकं हस्तस्थितं दण्डाग्रादिस्थितं वा परिकर्षन-पार्श्वभागे कृत्वा समाकर्षन् समाकर्षन्नित्यर्थः-निगदसिद्धं नवरं 'मस्तके' शिरसि कृत्वा गच्छेत् तदेत्त मध्यगतं, इयमत्र भावना-यथा तेन मस्तकस्थेन सर्वासु दिक्षु पश्यति, एवं येनावधिज्ञानेन सर्वासु दिक्षु पश्यति तन्मध्यगतमिति। इत्थम्भूतां च व्याख्यां सम्यगनवबुध्यमानः शिष्यः प्रश्नं करोति

*मू. ( ६२ वर्तते एव )अंतगयस्स मज्झगयस्स य को पइविसेसो ?, पुरओ अंतगएणं ओहिनाणेणं पुरओ चेव संखिज्जाणि वा असंखेज्जाणि वा जोयणाइं जाणइ पासइ, मग्गओ*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*अंतगएणं ओहिनाणेणं मग्गओ चेव संखिज्जाणि वा असंखिज्जाणि वा जोयनाइं जानइ पासइ, पासओ अंतगएणं पासओ चेव संखिज्जाणि वा असंखिज्जाणि वा जोयनाइं जाणइ पासइ, मज्झगएणं ओहिनाणेणं सव्वओ समंता संखिज्जाणि वा असंखिज्जाणि वा जोअणाइं जाणइ पासइ, से तं अनुगामिअं ओहिनाणं ॥*

**वृ.** अन्तगतस्य मध्यगतस्य च परस्परं कः प्रतिविशेषः ?-प्रतिनियतो विशेषः ?, सूरिराह-पुरतोऽन्तगतेनावधिज्ञानेन पुरत एव-अग्रत एव सङ्ख्येयानि-एकादीनि शीर्षप्रहेलिकापर्यन्तानि असङ्ख्येयानि वा योजनानि, एतावत्सु योजनेष्ववगाढं द्रव्यमित्यर्थः, जानाति पश्यति, ज्ञानं विशेषग्रहणात्मकं दर्शनं सामान्यग्रहणात्मकं, तदेवं पुरतोऽन्तगतस्य शेषावधिज्ञानेभ्यो भेदः, एवं शेषाणामपि परस्परं भावनीयः, नवरं 'सवओ समंता' इति सर्वतः-सर्वासु दिग्विदिक्षु समन्तात्-सर्वैरेवात्मप्रदेशेः सर्वैर्वा विशुद्धस्पर्द्धकैः, उक्तं च चूर्णौ-

"सव्वउत्ति सव्वासु दिसिविदिसासु, समंता इति सव्वायप्पएसेसु सव्वेसु वा विसुद्धिफड्डेगसु" इति, अत्र 'सव्वायप्पएसेसु' इत्यादिस्तृ(त्यत्रतृ)तीयार्थे सप्तमी, भवति च तृतीयार्थे सप्तमी, यदाह पाणिनिः स्वप्राकृतलक्षणे-व्यत्ययोऽप्यासा'मित्यत्र सूत्रे, तृतीयार्थे सप्तमी यथा-'तिसु तेसु अलंकिया पुहवि' इति, अथवा स मन्ता इत्यत्र स इत्यवधिज्ञानी परामृश्यते, मन्ता इति ज्ञाता, शेषं तथैव-

अथ किमवधिज्ञानं केषामसुमतां भवतीति चेद्, उच्यते, देवनारकतीर्थकृतामवश्यं मध्यगतं तिरश्चामन्तगतं मनुष्याणां तु यथाक्षयोपशममुभयं, तथा चोक्तं प्रज्ञापनायां-"नेरइयाणं भंते! किं देसोही सव्वोही ?, गोयमा! नो देसोही सव्वोही, एवं जाव थणियकुमाराणं। पंचेंदियतिरिक्ख-जोणियाणं पुच्छा, गोअमा! देसोही न सव्वोही। मनुस्साणं पुच्छा, गोयमा! देसोहीवि सव्वोही-वि। वाणमंतरजोइसियवेमाणियाणं जहा नेरइयाणं" वक्ष्यति च-

"नेरइय देव तित्थंकरा य ओहिस्सऽबाहिरा होंति।
पासंति सव्वओ खलु सेसा देसेण पासंति॥"

देवनारकाणां च मध्यगतमवधिरूपं ज्ञानमाभववर्त्ति, भवप्रत्ययत्वात्तस्य, तीर्थकृतां त्वाकेवलज्ञानं, केवलज्ञानोत्पत्तौ तस्य व्यवच्छेदात्, ननु सङ्ख्येयानि असंख्येयानि वा योजनानि पश्यन्तीत्युक्तं, तत्र के जीवाः कति योजनानि पश्यन्तीति ?, उच्यते, इह तिर्यग्मनुष्या अनियत-परिमाणावधयः, तथाहि-केचिदंगुलासङ्ख्येयभागं केचिदंगुलं केचिद्वितस्तिं यावत्केचित् सङ्ख्येयानि योजानानि केचिदसङ्ख्येयानि, मनुष्यास्तु केचित् परिपूर्णं लोकं, केचिदलोकेऽपि लोकमात्राणि असंख्येयानि खण्डानि, ये तु देवनारकास्ते प्रतिनियतावधिपरिमाणाः ततः तेषां प्रतिनियतं क्षेत्रपरिमाणमुच्यते-

तत्र रत्नप्रभानारका जघन्यतोऽर्द्धचतुर्थानि गव्यूतानि क्षेत्रमवधिज्ञानतः पश्यन्ति, उत्कर्ष-तश्चत्वारि गव्यूतानि १, शर्करप्रभानारका जघन्यतस्त्रीणि गव्यूतानि उत्कर्षतोऽर्द्धचतुर्थानि २,

वालुकप्रभानारका जघन्यतोऽर्द्धतृतीयानि गव्यूतानि उत्कर्षतस्त्रीणि गव्यूतानि ३, पङ्कप्रभा-नारका जघन्यनैकं गव्यूतमुत्कर्षतः सार्द्धं गव्यूतं ६, तमतमः-प्रभानारका जघन्यतोऽर्द्धगव्यूत-मुत्कर्षतो गव्यूतं, तथा चोक्तं प्रज्ञापनायां-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"रयणप्पभापुढविनेरइया णं भंते! केवइयं खेत्तं ओहिणा जाणंति पासंति?, गोअमा! जहन्नेणं अद्धुट्ठाइं गाउयाइं जाणंति पासंति उक्कोसेणं चत्तारि गाउआइं जाणंति पासंति, सक्करप्पभापुढविनेरइयाणं पुच्छा, गोअमा! जहन्नेणं अड्ढाइज्जाइं गाउआइं उक्कोसेणं तिन्नि गाउआइं जाणंति पासंति, पंकप्पभापुढविनेरइया णं पुच्छा, गोयमा! जहन्नेणं दोन्नि गाउइयाइं उक्कोसेणं अड्ढाइज्जाइं गाउयाइं जाणंति पासंति, धूमप्पभापुढविनरइया णं पुच्छा, गोअमा! जहन्नेणं दिवड्ढं गाउयं उक्कोसेणं दो गाऊआइं जाणंति पासंति, तमापुढविनेरइया णं पुच्छा, गोअमा! जहन्नेणं गाउयं उक्कोसेणं दिवड्ढं गाउयं जाणंति पासंति, अह सत्तमपढविनेरइया णं भंते! पुच्छा, गोयमा! जहन्नेणं अद्धगाउयं उक्कोसेणं गाउयं जाणंति पासंति।

असुरकुमाराः पुनरवधिज्ञानतो जघन्यतः क्षेत्रं पञ्चविंशतियोजानि जानान्ति पश्यन्ति उत्कर्षतोऽसंख्येयान् द्वीपसमुद्रान्, नागकुमारादयः पुनः सर्वेऽपि स्तनिकुमारपर्यन्ता जघन्यतः पञ्चविंशति योजनानि जानन्ति पश्यन्ति उत्कर्षतः सङ्ख्येयान् द्वीसमुद्रान्, एवं व्यन्तरा अपि, तथा चोक्तम्-'असुरकुमारा णं भंते! ओहिणा केवइयं खेत्तं जाणंति पासंति?, गोअमा! जहन्नेणं पणवीसं जोयणाइं उक्कोसेणं असङ्खेज्जदीवसमुद्दे ओहिणा जाणंति पासंति, नागकुमारा णं पुच्छा, गोअमा! जहन्नेणं पणवीसं जोयणाइं उक्कोसेणं संखेज्जदीवसमुद्दे जाणंति पासंति, एवं जाव थणियकुमारा, वाणमंतरा जहा नागकुमारा" इह पञ्चविंशतियोजनानि भवनपतयो व्यन्तरा वा जघन्यतस्ते पश्यन्ति येषामायुर्दशवर्षसहस्रप्रमाणं, न शेषाः, आह च भाष्यकृत- "पणवीसजोयणाइं दसवाससहस्सिया ठिई जेसि"मिति। जयोतिष्यकाः पुनर्देवा जघन्यतोऽपि सङ्ख्येयान् द्वीपसमुद्रानवधिज्ञानतः पश्यन्ति, उत्कर्ष-तोऽपि संख्येयान् द्वीपसमुद्रान्, केवलमधिकतरान्, यदाह-'जोइसिया णं भंते! केवइयं खित्तं ओहिणा जाणंति पासंति?, जहन्नेणऽवि संखेज्जे उक्कोसेणवि संखेज्जे दीवसमुद्दे"

सौधर्म्मकल्पवासिनो देवाः पुनरवधिज्ञानतो जघन्येनांगुलासंख्येयभागमात्रं पश्यन्ति उत्कर्षतोऽधस्ताद्रत्नप्रभायाः पृथिव्याः सर्वान्तिममधस्तनं भागं यावत्, तिर्यक्षुअसंख्येयान् द्वीपसमुद्रान्, ऊर्ध्व तु स्वकल्पविमानस्तूपध्वजादिकं, एवमीशानदेवा अपि। अत्राह-नन्वंगुलासंख्येयभागमात्रक्षेत्रपरिमितोऽवधिः सर्वजघन्यो भवति, सर्वजघन्यश्चावधिस्तिर्यग्मनुष्येष्वेव, न शेषेषु, यत आह भाष्यकृत्स्वकृतभाष्यटीकायाम् 'उत्कृष्टो मनुष्येष्वेवे, नान्येषु, मनुष्यतिर्यग्योनिष्वेव जघन्यो नान्येषु, शेषाणां मध्यम एवे'ति, तत्कथमीह सर्वजघन्य उक्तः?, उच्यते, सौधर्मादिदेवानां पारभविकोऽप्युपपातकालेऽवधिः सम्भवति, स च सर्वजघन्योऽपि कदाचिदवाप्यते, उपपातानन्तरं तु तद्भवजः, ततो न कश्चिद्दोषः, आह च दुष्षमान्धकारनिमग्नजिनप्रवचनप्रदीपो जिनभद्रगणिक्षमाश्रमणः-

"वेमाणीयाणमंगुलभागमसंखं जहन्नओ होइ(ओही)।
उववाए परभविओ तब्भवजो होइ तो पच्छा॥"

एवं सनत्कुमारादिदेवानामपि द्रष्टव्यम्, नवरमधोभागदर्शने विशेषः ततः स प्रदर्श्यते-सनत्कुमारमाहेन्द्रदेवा अधस्तात् शर्करप्रभायाः सर्वान्तिममधस्तनं भागं यावत्पश्यन्ति, ब्रह्मलोक-लान्तकदेवास्तृतीयपृथिव्याः, महाशुक्रसहस्रारकल्पदेवाश्चतुर्थपृथिव्याः, आनतप्राणतारणा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

च्युतदेवाः पञ्चमपृथिव्याः, अधस्तनमध्यमग्रैवेयकदेवाः षष्ठपृथिव्याः, उपरितनग्रैवेयकदेवाः सप्तमपृथिव्याः, अनुत्तरोपपातीनः सम्पूर्णलोकनालिं चतुर्दशरज्ज्वात्मिकामिति, उक्तं च प्रज्ञापनायां-"सोहम्मगदेवा णं भंते! केवइयं खेत्तं ओहिणा जाणंति पासंति?, गोयमा! जहन्नेणं अंगुलस्स असंखेज्जइभागं उक्कोसेणं जाव इमीसे रयणप्पभाए पुढवीए हेट्ठिल्ले चरमंते, तिरियं जाव असंखेज्जे दीवसमुद्दे, उड्ढं जाव सगाइं विमाणाइं ओहिणा जाणंति पासंति। एवं ईसानगदेवावि, सणंकुमारदेवा एवं चेव, नवरं अहे जाव दोच्चाए सक्करप्पभाए पुढविए हिट्ठिल्ले चरिमंते, एवं माहिंददेवावि, बंभलोगलंतगदेवा तच्चाए पुढवीए हिट्ठिल्ले चरिमंते, महासुक्कसहस्सारदेवा चउत्थीए पंकप्पभाए पुढवीए हेट्ठिल्ले चरिमंते, आणयपाणयआरणअच्चुयदेवा अहे पंचमाए धूमप्पभाए पुढवीए हेट्ठिल्ले चरिमन्ते, हेट्ठिममज्झिमगेवेज्जगदेवा अहे जाव छट्ठिए तमाए पुढवीए हेट्ठिल्ले चरिमंते, उवरिमगेवेज्जगदेवा नं भंते! केवइयं खेत्तं ओहिणा जाणंति पासंति?, गोयमा! जहन्नेणं अंगुलस्स असंखेज्जइभागं, उक्कोसेणं अहे सत्तमाए पुढवीए हेट्ठिल्ले चरिमंते, तिरियं जाव असंखेज्जदीवसमुद्दे, उड्ढं जाव सगाइ विमाणाइं ओहिणा जाणंति पासंति। अनुत्तरोववाइया णं देवा णं भंते! केवइयं खेत्तं ओहिणा जाणंति पासंति?, संभिन्नं लोगनालिं जाणंति पासंति"

सम्प्रति नारकादीनामेवावधेः संस्थानं चिन्त्यते-तत्र नारकाणामवधिः तप्राकारः, तप्रो नाम काष्ठसमुदायविशेषो यो नदीप्रवाहणे प्लाव्यमानो दूरादानीयते, स चायतस्त्र्यस्रश्च भवति, तदाकारोऽवधिर्नारकाणां, भवनपतीनां सर्वेषामपि पल्लकसंस्थानसंस्थितः पल्लको नाम लाटदेशे धान्याधारविशेषः स चोर्द्ध्वायत उपरि च किञ्चित्संक्षिप्तः, व्यन्तराणां पटहसंस्थानसंस्थितः, पटहः-आतोद्यविशेषः, स च किञ्चिदायतः, उपर्यधश्च समप्रमाणः, ज्योतिष्कदेवानां झल्लरी-संस्थानसंस्थितः, झल्लरी-चर्मावनद्धविस्तीर्णवलयाकारा आतोद्यविशेषरूपा देशविशेष प्रसिद्धा, सौधर्म्मदेवादीनामच्युतदेवपर्यन्तानां मृदङ्गसंस्थानसंस्थितः, मुदङ्गो-वाद्यविशेषः, स चाधस्ताद्विस्तीर्ण्ण उपरि च तनुकः सुप्रतीतः, ग्रैवेयकदेवानां ग्रथितपुष्पसशिखाकभृतचङ्गेरीसंस्थान-संस्थितः, अनुत्तरोपपातिकदेवानां कन्याचोलकापरपर्यायजवनालकसंस्थानसंस्थितः, उक्तं च-नेरइयाणं भंते! ओहि किंसंठाणसंठिए पन्नत्ते?, गोयमा! तप्पागारसंठाणसंठिए पन्नत्ते, सोहम्मदेवाणं पुच्छा, गोअमा! मुइंगसंठाणसंठिए पन्नत्ते, एवं जाय अच्चुयदेवाणं, गेवेज्जदेवाणं पुच्छा, गोअमा! पुप्फचंगेरीसंठाणसंठिए पन्नत्ते, अनुत्तरोववाइयदेवाणं पुच्छा, गोअमा! जवनालगसंठाणसंठिए पन्नत्ते" तप्राकारादीनां च व्याख्यानमिदं भाष्यकृदाह-

"तप्पेण समागारो ओही नेओ स चाययत्तंसो।
उद्धाययो उ पल्लो उवरिं च स किंचि संखेत्तो ॥१॥
नच्चायओ समोऽविय पडहो हेट्ठोवरिं पईएसो।
चम्मावनद्धविच्छिन्नवलयरूवा य झल्लरिया॥२॥"
उद्धायओ मुइंगो हेट्ठा रुंदो तहोवरिं तनुओ।
पुप्फसिहावलिरइया चंगेरी पुप्फचंगेरी ॥३॥

"जवनालउत्ति भन्नइ उब्भो सरकंचुओ कुमारीए" इति। तिर्यग्मनुष्याणां चावधिर्नानासंस्थान-संस्थितो यथा स्वयम्भूरमणोदधौ मत्स्याः, अपि च-तत्र मत्स्यानां वलयाकारं संस्थानं निषिद्धं,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तिर्यग्मनुष्यावधौ तु तदपि भवति, उक्तं च–

"नानागारो तिरियमनुएसु मच्छा सयंभुरमणोव्व।
तत्थ वलयं निसिद्धं तस्स पुण तयंपि होज्जाहि॥"

तथा भवनपतिव्यन्तराणामूर्द्ध्वं प्रभूतोऽवधिर्भवति, वैमानिकानामधः, ज्योतिष्कनारकाणां तिर्यग्, विचित्रो नरतिरश्चाम्, आह च– 'भवनवइ वंतरानं उड्ढं बहुगो हो य सेसानं। नारगजोइसियाणं तिरियं ओरालिओ चित्तो॥' तदेवमुक्तमानुगामिकमवधिज्ञानं, तथा चाह– से त्तं अनुगामियं।

सम्प्रत्यनानुगामिकं शिष्यः पृच्छन्नाह–

*मू. ( ६३ )से किं तं अनानुगामिअं ओहिनाणं ?, अनानुगामिअं ओहिनाणं से जहानामए केइ पुरिसे एगं महंतं जोइट्ठाणं काउं तस्सेव जोइट्ठाणस्स परिपेरंतेहिं २ परिघोलेमाने २ तमेव जोइट्ठाणं पासइ, अन्नत्थ गए न पासइ, एवामेव अनानुगामिअं ओहिनाणं जत्थेव समुप्पज्जइ तत्थेव संखेज्जाणि असंखेज्जाणि वा संबद्धाणि वा असंबद्धाणि वा जोअणाइं जाणइ पासइ, अन्नत्थ गए न पासइ, से त्तं अनानुगामिअं ओहिनाणं॥*

**वृ.** अथ किं तदनानुगामिकमवधिज्ञानं ?, सूरिराह– अनानुगामिकमवधिज्ञानं स– विवक्षितो यथानामकः कश्चित्पुरुषः पूर्णः सुखदुःखानामिति पुरुषः पुरि शयनाद्वा पुरुषः, एकं महज्ज्योतिःस्थानं– अग्निस्थानं कुर्यात्, कस्मिंश्चित्स्थानेऽनेकज्वालाशतसंकुलमिग्निं प्रदीपं वा स्थूलवर्त्ति– ज्वालानुरूपमुत्पादयेदित्यर्थः, ततस्तत्कृत्वा तस्यैव ज्योतिः स्थानस्य 'परिपर्यन्तेषु २' परितः सर्वासु दिक्षु पर्यन्तेषु 'परिघूर्णन् २' परिभ्रमन् २ इत्यर्थः, तदेव 'ज्योतिःस्थानं' ज्योतिः स्थान– प्रकाशितं क्षेत्रं पश्यति, अन्यत्र गतो न पश्यति, एष दृष्टान्तः उपनयमाह– 'एवमेव' अनेनैव प्रकारेणानानुगामिकमवधिज्ञानं यत्रैव क्षेत्रे व्यवस्थितस्य सतः समुत्पद्यते तत्रैव व्यवस्थितः सन् संख्येयानि असंख्येयानि वा योजनानि स्वावगाढक्षेत्रेण सह सम्बद्धानि असम्बद्धानि वा, अवधिर्हि कोऽपि जायमानः स्वावगाढदेशादारभ्य निरन्तरं प्रकाशयति कोऽपि पुनरपान्तरालेऽन्तरं कृत्वा परतः प्रकाशयति, तत उच्यते–सम्बद्धान्यसम्बद्धानि वेति, 'जानाति' विशेषाकारेण परिच्छिनत्ति 'पश्यति' सामान्यकारेणावबुध्यते, 'अन्यत्र' देशान्तरे गतो नैव पश्यति, अवधिज्ञानावरणक्षयो– पशमस्य तत्क्षेत्रसापेक्षत्वात्।

तदेवमुक्तमनानुगामिकं, सम्प्रति वर्द्धमानकमनवबुध्यमानः शिष्यः प्रश्नं करोति –

*मू. ( ६४ )से किं तं वड्डमाणयं ओहिनाणं ?, २ पसत्थेसु अज्झवसाणट्ठाणेसु वट्टमाणस्स वड्डमाणचरित्तस्स विसुज्झमाणस्स विसुज्झमाणचरित्तस्स सव्वओ समंता ओही वड्डइ–*

**वृ.** अथ किं वर्द्धमानकमवधिज्ञानं ?, सूरिराह– वर्द्धमानकमवधिज्ञानं प्रशस्तेष्वध्यवसाय– स्थानेषु वर्त्तमानस्य, इह सामान्यतो द्रव्यलेश्योपरञ्जितं चित्तमध्यवसायस्थानमुच्यते, तच्चानवस्थितं, तत्तल्लेश्याद्रव्यसाचिव्ये विशेषसम्भवात्, ततो बहुवचनमुक्तं, 'प्रशस्तेष्वि'ति, अनेन चाप्रशस्तकृष्णादिद्रव्यलेश्योपरञ्जितव्यवच्छेदमाह, प्रशस्तेष्वध्यवसायेषु वर्त्तमानस्येति, किमुक्तं भवति ?–प्रशस्ताध्यवसायस्थानकलितस्य, 'सर्वतः' समन्तादवधिः परिवर्द्धते इति सम्बन्धः, अनेनाविरतसम्यग्दृष्टेरपि परिवर्द्धमानकोऽवधिर्भवतीत्याख्यायते, तथा 'वद्धमान– चरित्तस्स' प्रशस्तेष्वध्यवसायस्थानेषु वर्धमानचारित्रस्य, एतेन देशविरतिसर्वविरतयोर्व–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

र्द्धमानकमवधिमभिधत्ते, वर्द्धमानकश्चावधिरुत्तरोत्तरां विशुद्धिमासादयतो भवति नान्यथा तथा आह-'विशुद्धमानस्य' तदावरणकमलकलङ्कविगमत उत्तरोत्तरविशुद्धिमासादयतः, अनेनाविरत-सम्यग्दृष्टेर्वर्द्धमानकावधेः शुद्धिजन्यत्वमाह, तथा 'विशुद्धयमानचारित्रस्य च', इदं च विशेषणं देशविरतसर्वविरतयोर्वेदितव्यम् 'सर्वतः' सर्वासु दिक्षु समन्तादवधिः परिवर्द्धते।

*मू.(६५) जावइया तिसमयाहारगस्स सुहुमस्स पणगजीवस्स।*
*ओगाहणा जहन्ना ओहीखित्तं जहन्नं तु॥*

**वृ.** स च कस्यापि सर्वजघन्यादारभ्य प्रवर्द्धते, ततः प्रथमतः सर्वजघन्यमवधिं प्रतिपादयति-'त्रिसमयाहारकस्य' आहारयति-आहारं गृह्णातीत्याहारकः, त्रयः समयाः समाहृतास्त्रिसमयं, त्रिसमयमाहारकस्त्रिसमयाहारकः 'नामनाम्नैकार्थे समासो बहुल'मिति समासः तस्य त्रिसमया-हारकस्य 'सूक्ष्मस्य' सूक्ष्मनामकर्मोदयवर्त्तिनः 'पनकजीवस्य' पनकश्चासौ जीवश्च पनकजीवः, पनकजीवो वनपस्तिविशेषः, तस्य 'यावती' यावत्परिमाणा अवगाहन्ते क्षेत्रं यस्यां स्थिता जन्तवः साऽवगाहना-तनुरित्यर्थः, 'जघन्या' त्रिसमयाहारकशेषसूक्ष्मपनकजीवापेक्षया सर्वस्तोका, एतावत्परिमाणमवधेर्जन्यं क्षेत्रं, तुशब्द एवकारार्थः, स चावधारणे, तस्य चैवं प्रयोगः-जघन्य-मवधिक्षेत्रमेतावदेवेति।

अत्र चायं सम्प्रदायः-यः किल योजनसहस्रपरिमाणायामो मत्स्यः स्वशरीरबाह्यैकदेश एवोत्पद्यमानः प्रथमसमये सकलनिजशरीरसम्बद्धमात्मप्रदेशानामायामं संहृत्यांगुलासंख्येय-भागबाहल्यं स्वदेहविष्कम्भायामविस्तारं प्रतरं करोति, तमपि द्वितीयसमये संहृत्यांगुलासंख्येय-भागबाहल्यविष्कम्भां मत्स्यदेहविष्कम्भायामामात्मप्रदेशानां सूचिं विरचयति, ततस्तृतीयसमये तामपि संहृत्यांगुलसंख्येयभागमात्र एव स्वशरीरबहिःप्रदेशे सूक्ष्मपरिणामपनकरूपतयोत्पद्यते, तस्योपपातसमयादारभ्य तृतीये समये वर्त्तमानस्य यावत्प्रमाणं शरीरं भवति तावत्परिमाणं जघन्यमवधेः क्षेत्रमालम्बनवस्तुभाजनमवसेयम्, उक्तं च-

"योजनसहस्रमानो मत्स्यो मृत्वा स्वकायदेशे यः।
उत्पद्यते हि पनकः सूक्ष्मत्वेनेह स ग्राह्यः॥१॥
संहृत्य चाद्यसमये स ह्यायामं करोति च प्रतरम्।
सङ्ख्यातीताख्यांगुलविभागबाहल्यमानं तु॥२॥
स्वकतनुपृथुत्वमात्रं दीर्घत्वेनापि जीवसामर्थ्यात्।
तमपि द्वितीयसमये संहृत्य करोत्यसौ सूचिम्॥३॥
सङ्ख्यातीताख्यांगुलविभागविष्कम्भमाननिर्दिष्टाम्।
निजतनुपृथुत्वदीर्घां तृतीयसमये तु संहृत्य॥४॥
उत्पद्यते च पनकः स्वदेहदेशे स सूक्ष्मपरिणामः।
समयत्रयेण तस्यावगाहना यावती भवति॥५॥
तावज्जघन्यमवधेरालम्बनवस्तुभाजनं क्षेत्रम्।
इदमित्थमेव मुनिगणसुसम्प्रदायात् समवसेयम्॥६॥

आह-किमिति योजनसहस्रायामो मत्स्यः ? किं वा तस्य तृतीयसमये स्वदेहदेशे सूक्ष्म-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पनकत्वेनोत्पादः ?, किं वा त्रिसमयाहारकत्वं परिगृह्यते ?, उच्यते, इह योजनसहस्रायामो मत्स्यः, स किल त्रिभिः समयैरात्मानं संक्षिपति महतः प्रयत्नविशेषात्, महाप्रयत्नविशेषारूढश्चोत्पत्तिदेशेऽवगाहनामारभमाणोऽतीव सूक्ष्मामारभते ततो महामत्स्यस्य ग्रहणं, सूक्ष्मपनकश्चान्यजीवापेक्षया सूक्ष्मतमावगाहनो भवति, ततः सूक्ष्मपनकग्रहणं, तथा उत्पत्तिसमये द्वितीयसमये चातिसूक्ष्मो भवति चतुर्थादिषु च समयेष्वतिस्थूरः त्रिसमयाहारकस्तु योग्यः ततः त्रिसमयाहारकग्रहणं, उक्तं च –

"मच्छो महल्लकाओ संखेत्तो जो उ तीहि समएहिं।
स किर पयत्तविसेसेण सण्हमोगाहणं कुणइ ॥१॥
सण्हयरा सण्हयरो सुहुमो पणओ जहन्नदेहो य।
स बहुविसेसविसिट्ठो सण्हयरो सवदेहेसु ॥२॥
पढमबीएऽतिसण्हो जायइ थूलो चउत्थयाईसुं।
तइयसमयंमि जोगो गहिओ तो तिसमयहारो ॥३॥"

अन्ये तु व्याचक्षते–'त्रिसमयाहारकस्ये'ति आयामप्रतरसंहरणे समयद्वयं तृतीयश्च समयः सूचीसंहरणोत्पत्तिदेशागमनविषयः, एवं त्रयः समया विग्रहगत्यभावाश्चैतेषु त्रिष्वपि समयेष्वाहारकः, तत उत्पादसमय एव त्रिसमयाहारकः सूक्ष्मपनकजीवो जघन्यावगाहनश्च, ततः तच्छरीरमानं जघन्यमवधेः क्षेत्रं, तच्चायुक्तं, यतस्त्रिसमयाहारकस्येति विशेषणं पनकस्य, न च मत्स्यायामप्रतरसंहरणसमयौ पनकभवस्य सम्बन्धिनौ, किन्तु मत्स्यभवस्य, तत उत्पादसमयादारभ्य त्रिसमयाहारकस्येति द्रष्टव्यम्, नान्यथा।

एतावत्प्रमाणं जघन्यं क्षेत्रमवधेः तैजसभाषाप्रायोग्यवर्गणापान्तरालवर्त्तिद्रव्यमालम्बते 'तेयाभासादवाणमंतरा एत्थ लहइ पट्ठवओ' इति वचनात्, तदपि चालम्ब्यमानं द्रव्यं द्विधा–गुरुलघु अगुरुलघु च, तत्र तैजसप्रत्यासन्नं गुरुलघु भाषाप्रत्यासन्नं चागुरुलघु, तद्‌गतांश्च पर्यायान् चतुःसंख्यानेव वर्णरसगन्धस्पर्शलक्षणान् पश्यति न शेषान्, यत आह–

"दवाइं अंगुलावलिसंखेज्जातीतभागविसयाइं।
पेच्छइ चउग्गुणाइं जहन्नओ मुत्तिमंताइं ॥"

अत्र 'जघन्यत' इति जघन्यावधिज्ञानी। तदेवं जघन्यमवधेः क्षेत्रमभिधाय साम्प्रतमुत्कृष्टभिधातुकाम आह–

*मू. ( ६६ )* *सव्वबहुअगनिजीवा निरंतरं जत्तियं भरिज्जंसु।*
*खित्तं सव्वदिसागं परमोही खेत्त निद्दिट्ठो ॥*

**वृ.** यतः ऊर्द्ध्वमन्य एकोऽपि जीवो न कदाचनापि प्राप्यते सर्वबहवः सर्वबहवश्च ते अग्निजीवाश्च सूक्ष्मबादररूपाः सर्वबह्वग्निजीवाः, कदा सर्वबह्वग्निजीवा इति चेद्, उच्यते, यदा सर्वासु कर्मभूमिषु निर्व्याघातमग्निकायसमारम्भकाः सर्वबहवो मनुष्याः, ते च प्रायोऽजितस्वामितीर्थकरकाले प्राप्यन्ते, यदा चोत्कृष्टपदवर्त्तिनः सूक्ष्मानलजीवाः तदा सर्वबह्वग्निजीवाः,

"अव्वाघाए सव्वासु कम्मभूमिसु जया तयारंभा।
सवबहवो मनुस्सा होंतिऽजियजिणिंदकालंमि ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"उक्कोसिया य सुहुमा जया तया सवबहुअगनिजीवा" इति, 'निरंतरमिति' क्रियाविशेषणं यावत्परिमाणं क्षेत्रं भृतवन्तः, एतदुक्तं भवतिनैरन्तर्येण विशिष्टसूचीरचनया यावद् भृतवन्तः, भृतवन्त इती च भूतकालनिर्देशः अजितस्वामिकाल एव प्रायः सर्वबहवोऽनलजीवा अस्याम-वसर्प्पिण्यां सम्भवन्ति स्मेति ख्यापनार्थं, इदं चानन्तरोदितं क्षेत्रमेकदिक्कमपि भवति तत आह-सर्वदिक्कं, अनेन सूचीभ्रमणप्रमितत्वं क्षेत्रस्य सूचयति, परमश्चासाववधिश्च परमावधिः, एतावद-नन्तरोदितं सर्वबह्वनलजीवसूचीपरिक्षेपप्रमितं क्षेत्रमङ्गीकृत्य 'निर्दिष्टः' प्रतिपादितो गणधरादिभिः क्षेत्रनिर्दिष्टः, एतावत् क्षेत्रं परमावधेर्भवतीत्यर्थः, किमुक्तं भवति ?, सर्वबह्वग्निजीवा निरन्तरं यावत् क्षेत्रं सूचीभ्रमणेन सर्वदिक्कं भृतवन्तः एतावति क्षेत्रे यान्यवस्थितानि द्रव्याणि तत्परिच्छेद-सामर्थ्ययुक्तः परमावधिः क्षेत्रमधिकृत्य निर्दिष्टो गणधरादिभिः,

अयमिह सम्प्रदायः-सर्वबह्वग्निजीवाः प्रायोऽजितस्वामितीर्थकृत्काले प्राप्यन्ते, तदारम्भ-कमनुष्यबाहुल्यसम्भवात्, सूक्ष्माश्चोत्कृष्टपदवर्त्तिनः तत्रैव विवक्ष्यन्ते, ततश्च सर्वबहवोऽनलजीवा भवन्ति, तेषां स्वबुद्धया षोढाऽवस्थानं परिकल्प्यते-एकैकक्षेत्रप्रदेशे एकैकजीवावगाहनया सर्वतश्चतुरस्रो घन इति प्रथमं, स एव घनो जीवैः स्वावगाहनादिभिरिति द्वितीयम्, एवं प्रतरोऽपि द्विभेदः, श्रेणिरपि द्विधा, तत्राद्याः पञ्च प्रकारा अनादेशाः, तेषु क्षेत्रस्याल्पीयस्तया प्राप्यमाणत्वात्, षष्ठुस्तु प्रकारः सूत्रादेशः उक्तं च-

"एकेक्कागासपएसजीवरयणाए सावगाहे य।
चउरंसं घण पयरं सेढी छट्ठो सुयादेसो ॥१॥"

ततश्चासौ श्रेणिः स्वावगाहनासंस्थापितसकलानलजीवावलीरूपा अवधिज्ञानिनः सर्वासु दिक्षु शरीरपर्यन्तेन भ्राम्यते, सा च भ्राम्यमाणा असंख्येयान् लोकमात्रान् क्षेत्रविभागानलोके व्याप्नोति, एतावत्क्षेत्रमवधेरुत्कृष्टमिति, उक्तं च-

"निययावगाहणागनिजीवसरीरावली समंतेणं।
भामिज्जइ ओहिनाणिदेहपज्जंतओ सा य ॥१॥
अइगंतूनमलोगे लोगागासप्पमाणमेत्ताइं।
ठाइ असंखेज्जाइं इदमोहिक्खेत्तमुक्कोसं ॥२॥"

इदं च सामर्थ्यमात्रमुपवर्ण्यते, एतावति क्षेत्रे यदि द्रष्टव्यं भवति तर्हि पश्यति, यावता तत्र विद्यते, अलोके रूपिद्रव्याणामसम्भवात्, रूपिद्रव्यविषयश्चावधिः, केवलमयं विशेषो-यावदद्यापि परिपूर्णमपि लोकं पश्यति तावदिह स्कन्धानेव पश्यति, यदा पुनरलोके प्रसरमवधिरधिरोहति तदा यथा यथाऽभिवृद्धिमासादयति तथा २ लोके सूक्ष्मान् सूक्ष्मतरान् स्कन्धान् पश्यति, यावदन्ते परमाणुमपि, उक्तं च-

"सामत्थमेत्तमुत्तं दट्ठवं जइ हवेज्ज पेच्छेज्जा।
न उ तं तत्थत्थि जओ सो रूविनिबंधणो भणिओ ॥१॥
वड्ढंतो पुण बाहिं लोगत्थं चेव पासई दवं।
सुहुमयरं २ परिमोही जाव परमाणू ॥२॥"

परमावधिकलितश्च नियमादन्तर्मुहूर्तमात्रेण केवलालोकलक्ष्मीमालिङ्गति, उक्तं च-'परमोहि-

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

त्राणठिओ केवलमंतोमुहूत्तमेत्तेणं ।' एवं तावज्जघन्यमुत्कृष्टं चावधिक्षेत्रमुक्तं, सम्प्रति मध्यमं प्रतिपिपादयिपुरेतावत्क्षेत्रोपलम्भे एतावत्कालोपलम्भः एतावत्कालोपलम्भे चैतावत्क्षेत्रोपलम्भ इत्यस्यार्थस्य प्रकटनार्थं गाथाचतुष्टयमाह-

मू. ( ६७ ) *अंगुलमावलिआणं भागमसंखिज्ज दोसु संखिज्जा ।*
*अंगुलमावलिअंतो आवलिआ अंगुलपुहुत्तं ॥*

वृ. अंगुलमिह क्षेत्राधिकारात् प्रमाणांगुलमभिगृह्यते, अन्येत्वाहुः - अवध्यधिकारादुत्से-धांगुलमिति, आवलिका असंख्येयसमयात्मिका, अंगुलं चावलिका चांगुलावलिके तयोरं-गुलावलिकयोर्भागमसंख्येयमसंख्येयं पश्यत्यवधिज्ञानी, इदमुक्तं भवति-क्षेत्रतोऽगुंलासंख्येय-भागमात्रं पश्यन् कालत आवलिकाया असंख्येयमेव भागमतीतमनागतं च पश्यति, उक्तं च-

"खेत्तमसंखेज्जंगुलभागं पासे तमेव कालेणं ।
आवलियाए भागं तीयमनायं च जाणाइ ॥"

आवलिकायाश्चासंख्येयं भागं पश्यन् क्षेत्रतोऽगुलासंख्येयभागं पश्यति, एवं सर्वत्रापि क्षेत्र-कालयोः परस्परं योजना कर्त्तव्या, क्षेत्रकालदर्शनं चोपचारेण द्रष्टव्यं, न साक्षात्, न खलु क्षेत्रं कालं वा साक्षादवधिज्ञानी पश्यति, तयोरमूर्त्तत्वात्, रूपिद्रव्यविषयश्चावधिः, तत एतदुक्तं भवति-क्षेत्रे काले च यानि द्रव्याणि तेषां च द्रव्याणां ये पर्यायास्तान् पश्यतीति, उक्तं च-

"तत्थेव य जे दवा तेसिंचिय जे हवंति पज्जाया ।
इय खेत्ते कालंमि य जोएज्जा दवपज्जाए ॥१॥"

एवं सर्वत्रापि भावनीयम्, क्रिया च गाथाचतुष्टये स्वयमेव योजनीया ।

तथा द्वयोरंगुलावलिकयोः सङ्ख्येयौ भागौ पश्यति, अंगुलस्य सङ्ख्येयभागं पश्यन् आवलिकाया अपि संख्येयमेव भागं पश्यतीत्यर्थः । तथा 'अंगुलम्' अंगुलमात्रं क्षेत्रं पश्यन् 'आवलिकान्तः' किञ्चिदूनामावलिकां पश्यति, आवलिकां चेत् कालतः पश्यति तर्हि क्षेत्रतोऽगुलपृथक्त्वं-अंगुलपृथक्त्वपरिमाणं क्षेत्रं पश्यति, उक्तं च-

"संखेज्जंगुलभागे आवलियाएवि मुणइ तइभागं ।
अंगुलमिह पेच्छंतो आवलियंतो मुणइ कालं ॥"

आवलियं मुणमाणो संपुन्नं खेत्तमंगुलपुहुत्त" मिति, पृथक्त्वं द्विप्रभृतिरा नवभ्य इति ।

मू. ( ६८ ) *हत्थंमि मुहुत्तंतो दिवसंतो गाउअंमि बोद्धव्वो ।*
*जोयण दिवसपुहुत्तं पक्खंतो पन्नवीसाओ ॥*

वृ. तथा 'हस्ते' हस्तमात्रे क्षेत्रे ज्ञायमाने कालतो 'गव्यूते' गव्यूतविषयो द्रष्टव्यः, तथा 'योजनं' योजनमात्रं क्षेत्रं पश्यन् कालतो दिवसपृथक्त्वं पश्यति, दिवसपृथक्त्वमानं कालं पश्यतीत्यर्थः, तथा 'पक्षान्तः' किञ्चिदूनं पक्षं पश्यन् क्षेत्रतः पञ्चविंशतियोजनानि पश्यति ।

मू. ( ६९ ) *भरहंमि अद्धमासो जंबूद्दीवंमि साहिओ मासो ।*
*वासं च मनुअलोए वासपुहुत्तं च रुअगंमि ॥*

वृ. 'भरते' सकलभरतप्रमाणक्षेत्रावधौ कालतोऽर्द्धमास उक्तः, भरतप्रमाणं क्षेत्रं पश्यन् कालतोऽतीतमनागतं चार्द्धमासं पश्यतीत्यर्थः, एवं जम्बूद्वीपविषयेऽवधौ साधिको मासः कालतो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विषयत्वेन बोद्धव्यः तथा मनुष्यलोकप्रमाणक्षेत्रविषयेऽवधौ 'वर्षं' संवत्सरमतीतमनागतं च पश्यति, तथा रुचकाख्ये रुचकाख्यबाह्यद्वीपप्रमाणक्षेत्रविषयेऽवधौ वर्षपृथक्त्वं पश्यति।

मू. (७०) *संखिज्जंमि उ काले दीवसमुद्दाऽवि हुंति संखिज्जा।*
*कालंमि असंखिज्जे दीवसमुद्दा उ भइअव्वा॥*

वृ. तथा सङ्ख्यायत इति सङ्ख्येयः, स च वर्षमात्रोऽपि भवति ततः तुशब्दो विशेषणार्थः, किं विशिनष्टि?-सङ्ख्येयकालो वर्षसहस्रात्परो वेदितव्यः, तस्मिन् सङ्ख्येये कालेऽवधिगोचरे सति क्षेत्रतः तस्यैवावधेर्गोचरतया द्वीपाश्च समुद्राश्च द्वीपसमुद्राः तेऽपि सङ्ख्येया भवन्ति, अपिशब्दात् महानेकोऽपि महत एकदेशोऽपि, किमुक्तं भवति?-सङ्ख्येये कालेऽवधिना परिच्छिद्यमाने क्षेत्रमप्यत्रत्यप्रज्ञापकापेक्षया सङ्ख्येयद्वीपसमुद्रपरिमाणं परिच्छेद्यं भवति, ततो यदि नामात्रत्यस्यावधिरुत्पद्यते तर्हि जम्बूद्वीपादारभ्य सङ्ख्येया द्वीपसमुद्रास्तस्य परिच्छेद्याः, अथवा बाह्ये द्वीपे समुद्रे वा सङ्ख्येययोजनविस्तृते कस्यापि तिरश्चः सङ्ख्येयकालविषयोऽवधिरुपद्यते तदा स यथोक्तक्षेत्रपरिमाणं तमेवैकं द्वीपं समुद्रं वा पश्यति, यदि पुनरसंख्येययोजनाविस्तृते स्वयम्भूरमणादिके द्वीपे समुद्रे वा संख्येयकालविषयोऽवधिः कस्याप्युत्पद्यते तदानीं स प्रागुक्तपरिमाणं तस्य द्वीपस्य समुद्रस्य वा एकदेशं पश्यति इहत्यमनुष्यबाह्यावधिरिव कश्चित्, तथा कालेऽसंख्येये पल्योपमादिलक्षणे अवधेर्विषये सति तस्यैव संख्येयकालपरिच्छेदकस्यावधेः क्षेत्रतया परिच्छेद्या द्वीपसमुद्राः 'भाज्या' विकल्पनीया भवन्ति, कस्यचिदसङ्ख्येयाः कस्याचित्सङ्ख्येयाः कस्यचिदेकदेश इत्यर्थः, यदा इह मनुष्यस्यासङ्ख्येयकालविषयोऽवधिरुत्पद्यते तदानीमसङ्ख्येया द्वीपसमुद्रास्तस्य विषयः, यदा पुनर्बहिर्द्वीपे समुद्रे वा वर्तमानस्य कस्यचित् तिरश्चोऽसङ्ख्येयकालविषयोऽवधिरुत्पद्यते तर्हि तस्य सङ्ख्येया द्वीपसमुद्राः, अथवा यस्य मनुष्यस्य सङ्ख्येयकालविषयो बाह्यद्वीपसमुद्रालम्बनो बाह्यावधिरुत्पद्यते तस्य सङ्ख्येया द्वीपाः, यदा पुनः स्वयम्भूरमणे द्वीपे समुद्रे वा कस्यचित्तिरश्चोऽवधिरसङ्ख्येयकालविषया जायते तदानीं तस्य स्वयम्भूरमणस्य द्वीपस्य समुद्रस्य वा एकदेशो विषयः, स्वयम्भूरमणविषयमनुष्यबाह्यावधेर्वा तदेकदेशो विषयः, क्षेत्रपरिमाणं पुनर्योजनापेक्षया सर्वत्रापि जम्बूद्वीपादारभ्यासङ्ख्येयद्वीपसमुद्रपरिमाणमवसेयम्।

मू. (७१) *काले चउण्ह वुड्ढी कालो भइअव्वु खित्तवुड्ढीए।*
*वुड्ढिए दव्वपज्जव भइअव्वा खित्तकाला उ॥*

वृ. तदेवं यथा क्षेत्रवृद्धौ कालवृद्धौ च यथा क्षेत्रवृद्धिः तथा प्रतिपादितं, सम्प्रति द्रव्यक्षेत्रकालभावानां मध्ये यद्वृद्धौ यस्य वृद्धिरुपजायते यस्य च न तदभिधित्सुराह-'काले' अवधिगोचरे वर्द्धमाने 'चतुर्णां' द्रव्यक्षेत्रकालभावनां वृद्धिर्भवति, तथा क्षेत्रस्य वृद्धिः क्षेत्रवृद्धिस्तस्यां सत्यां कालो 'भजनीयो' विकल्पनीयः कदाचिद्वर्द्धते कदाचित् न, क्षेत्रं ह्यत्यन्तसूक्ष्मं, कालस्तु तदपेक्षया परिस्थूरः, ततो यदि प्रभूता क्षेत्रवृद्धिस्ततो वर्द्धते शेषकालं नेति, द्रव्यपर्यायौ तु नियमतो वर्द्धेते, आह च भाष्यकृत-

"काले पवड्ढमाणे सवे दव्वादओ पवड्ढंति।
खेत्ते कालो भइओ वड्ढंति उ दव्वपज्जाया॥"

तथा द्रव्यं च पर्यायश्च द्रव्यपर्यायौ तयोर्वृद्धौ सत्यां, सूत्रे विभक्तिलोपः प्राकृतशैल्या, भजनी-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यामेव क्षेत्रकालौ, तुशब्द एवकारार्थः, स च भिन्नक्रमस्तथैव च योजितः, विकल्पश्चायं-कदाचित्तयोर्वृद्धिर्भवति कदाचिन्न, यतो द्रव्यं क्षेत्रादपि सूक्ष्मं, एकस्मिन्नपि नमःप्रदेशेऽनन्तस्कन्धावगाहनात्, द्रव्यादपि सूक्ष्मः पर्यायः, एकस्मिन्नपि द्रव्येऽनन्तपर्यायसम्भवात्, ततो द्रव्यपर्यायवृद्धौ क्षेत्रकालौ भजनीयावेव भवतः, द्रव्ये च वर्धमाने पर्याया नियमतो वर्धन्ते, प्रतिद्रव्यं संख्येयानामसंख्येयानां चावधिना परिच्छेदसंभवात्, पर्यायतो वर्द्धमाने द्रव्यं भाज्यं, एकस्मिन्नपि द्रव्ये पर्यायविषयावधिवृद्धिसम्भवात्, आह च भाष्यकृत-

"भयणाए खेत्तकाला परिवड्ढंतेसु दव्वभावेसुं।
दव्वे वड्ढइ भावो भावे दव्वं तु भयणिज्जं ॥"

अत्राह-ननु जघन्यमध्यमोत्कृष्टभेदभिन्नयोः अवधिज्ञानसंबन्धिनोः क्षेत्रकालयोरंगुलावलिकाऽसंख्येयभागादिरूपयोः परस्परं समयप्रदेशसंख्ययोः किं तुल्यत्वमुत हीनाधिकत्त्वम् ?, उच्यते, हीनाधिकत्वं, तथाहि-आवलिकाया असंख्येयभागे जघन्यायवधिविषये यावन्तः समयाः तदपेक्षया अंगुलस्यासंख्येयभागे जघन्यायवधिविषय एव ये नभःप्रदेशास्ते असंख्येगुणाः, एवं सर्वत्रापि अवधिविषयात् कालादसंख्येयगुणत्वमधविविषयस्य क्षेत्रस्यावगन्तव्यम्, उक्तं

"सव्वमसंखेज्जगुणं कालाओ खेत्तमोहिविसयं तु।
अवरोप्परसंबद्धं समयप्पएसप्पमाणेणं ॥"

अथ क्षेत्रस्येत्थं कालादसंख्येयगुणता कथमवसीयते ?, उच्यते, सूत्रप्रामाण्यात्, तदेव सूत्रमुपदर्शयति-

*मू.(७२) सुहुमो अ होइ कालो तत्तो सुहुमयरं हवइ खित्तं।*
*अंगुलसेढिमित्ते ओसप्पिणिओ असंखिज्जा ॥*

**वृ.** 'सूक्ष्मः' श्लक्ष्णो भवति कालः, चशब्दो वाक्यभेदक्रमपोपदर्शनार्थो यथा सूक्ष्मस्तावत्कालो भवति यस्मादुत्पलपत्रशतभेदे प्रतिपत्रमसङ्ख्येयाः समयाः प्रतिपाद्यन्ते ततः सूक्ष्मः कालः, तस्मादपि कालात् सूक्ष्मतरं क्षेत्रं भवति, यस्मादंगुलमात्रे क्षेत्रे-प्रमाणांगुलैकमात्रे श्रेणिरूपे नभःखण्डे प्रतिप्रदेशं समयगणनया असंख्येया अवसर्प्पिण्यस्तीर्थकृद्भिराख्याताः, इदमुक्तं भवति-प्रमाणांगुलैकमात्रे एकैकप्रदेशश्रेणिरूपे नभःखण्डे यावन्तोऽसंख्येयास्ववसर्प्पिणीषु समयाः तावत्प्रमाणाः प्रदेशा वर्त्तन्ते, ततः सर्वत्रापि कालदसंख्येयगुणं क्षेत्रं, क्षेत्रादपि चानन्तगुणं द्रव्यं, द्रव्यादपि चावधिविषयाः पर्यायाः संख्येयगुणा असंख्येयगुणा वा, उक्तं च-

"खेत्तपएसेहिंतो दवमणंतगुणितं पएसेहिं।
दव्वेहिंतो भावो संखगुणोऽसंखगुणिओ वा ॥"

*मू.(७३) से त्तं वड्ढमानयं ओहिनाणं ॥*

**वृ.** तदेतद्वर्द्धमानकमवधिज्ञानम्।

*मू.(७४) से किं तं हीयमाणयं ओहिनाणं ?, हीयमाणयं ओहिनाणं अप्पसत्थेहिं अज्झवसाणट्ठाणेहिं वट्टमाणस्स वट्टमाणचरित्तस्स संकिलिस्समाणस्स संकिलिस्समाणचरित्तस्स सव्वओ समंता ओहिपरिहायइ से त्तं हीयमाणयं ओहिनाणं ॥*

**वृ.** अथ किं तद्धीयमानकमवधिज्ञानं ?, सूरिराह-हीयमानकमवधिज्ञानं कथञ्चिदवाप्तं सत्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अप्रशस्तेष्वध्यवसायस्थानेषु वर्त्तमानस्याविरतसम्यग्दृष्टेर्वर्त्तमानचारित्रस्य-देशविरतादेः 'संक्लिश्यमानस्य' उत्तरोत्तरं संक्लेशमासादयतः, इदं च विशेषणमविरतसम्यग्दृष्टेरवसेयं, तथा संक्लिश्यमानचारित्रस्य देशविरतादेः सर्वतः समन्तादवधिः 'परिहीयते' पूर्वावस्थातो हानिमुपगच्छति, तदेतद्धीयमानकमवधिज्ञानम्।

*मू. ( ७५ )से किं तं पडिवाइओहिनाणं ?, पडिवाइओहिनाणं जहन्नेणं अंगुलस्स असंखिज्जयभागं वा संखिज्जभागं वा वालग्गं वा वालग्गपुहत्तं वा लिक्खं वा लिक्खपुहत्तं वा जूअं वा जूयपुहुत्तं वा जवं वा जवपुहुत्तं वा अंगुलं वा अंगुलपुहुत्तं वा पायं वा पायपुहुत्तं वा विहत्थिं वा विहत्थिपुहुत्तं वा रयणिं वा रयणिपुहुत्तं वा कुच्छिं वा कुच्छिपुहत्तं वा धणुं वा धनुपुहुत्तं वा गाउअं वा गाउपुहुत्तं वा जोअणं वा जोअणपुहुत्तं वा जोअणसयं वा जोयणसयपुहत्तं वा जोयणसहस्सं वा जोयणसहस्सपुहत्तं वा जोअणलक्खं वा जोअणलक्खपुहत्तं वा उक्कोसेणं लोगं वा पासित्ता णं पडिवइज्जा, से त्तं पडिवाइओहिनाणं ॥*

वृ. अथ किं तत्प्रतिपातिअवधिज्ञानं ?, सूरिराह-प्रतिपात्यवधिज्ञानं यदवधिज्ञानं जघन्यतः सर्वस्तोकतया अंगुलस्यासंख्येयभागमात्रं संख्येयभागमात्रं वा वालाग्रं वा वालाग्रपृथक्त्वं वा लिक्षां वा-वालाग्राष्टकप्रमाणां लिक्षापृथक्त्वं वा, यूकां वा लिक्षाष्टकमानां यूकापृथक्त्वं वा, यवं वा-यूकाष्टकमानं यवपृथक्त्वं वा अंगुलं वा अंगुलपृथक्त् वा, एवं यावदुत्कर्षेण सर्वप्रचुरतया लोकं 'दृष्ट्वा उपलभ्य 'प्रतिपतेत्' प्रदीप इव नाशमुपायायात्। तस्य तथाविधक्षयोपशमजन्यत्वात्, तदेतत् प्रतिपात्यवधिज्ञानं, शेषं सुगमं, नवरं 'कुक्षिः' द्विहस्तप्रमाणा 'धनुः' चतुर्हस्तप्रमाणं, पृथक्त्वं सर्वत्रापि द्विप्रभृतिरा नवभ्य इति सैद्धान्तिक्या परिभाषया द्रष्टव्यम् ॥

*मू. ( ७६ )से किं तं अपडिवाइ ओहिनाणं ?, अपडिवाइ ओहिनाणं जेणं अलोगस्स एगमवि आगासपएसं जाणइ पासइ तेन परं अपडिवाइ ओहिनाणं, से तं अपडिवाइ ओहिनाणं ॥*

वृ. अथ किं तदप्रतिपात्यवधिज्ञानं ?, सूरिराह-अप्रतिपात्यवधिज्ञानं येनावधिज्ञानेन अलोकस्य सम्बन्धिनमेकमप्याकाशप्रदेशम्, आस्तां बहूनाकाशप्रदेशानित्यपिशब्दार्थः, पश्येत्, एतच्च सामर्थ्यमात्रमुपवर्ण्यते, न त्वलोके किञ्चिदप्यवधिज्ञानस्य द्रष्टव्यमस्ति, एतच्च प्रागेवोक्तं, तत आरभ्याप्रतिपात्या केवलप्राप्तेरवधिज्ञानम्, अयमत्र भावार्थः-एतावति क्षयोपशमे सम्प्राप्ते सत्यात्मा विनिहतप्रधानप्रतिक्षयोधसंघातनरपतिरिव न भूयः कर्म्मशत्रुणा परिभूयते, किन्तु समासादितैतावदालोकजयोऽप्रतिनिवृत्तः शेषमपि कर्म्मशत्रुसङ्घातं विनिर्जित्य प्राप्नोति केवलराज्यश्रियमिति। तदेतप्रतिपाति अवधिज्ञानं।

तदेवमुक्ताः षडप्यवधिज्ञानस्य भेदाः, सम्प्रति द्रव्याद्यपेक्षयाऽवधिज्ञानस्य भेदान् चिन्तयति-

*मू. ( ७७ )तं समासओ चउव्विहं पन्नत्तं, तंजहा-दव्वओ खित्तओ कालओ भावओ, तत्थ दव्वओ णं ओहिनाणी जहन्नेणं अणंताइं रूविदव्वाइं जाणइ पासइ उक्कोसेणं सव्वाइं रूविदव्वाइं जाणइ पासइ, खित्तओ नं ओहिनाणी जहन्नेणं अंगुलस्स असंखिज्जइभागं जाणइ पासइ उक्कोसेणं असंखिज्जाइं अलोगे लोगप्पमाणमित्ताइं खंडाइं जाणइ पासइ, कालओ णं ओहिनाणी जहन्नेणं आवलिआए असंखिज्जइभागं जाणइ पासइ उक्कोसेणं असंखिज्जाओ उस्सप्पिणीओ अवसप्पिणीओ अईयमनागयं च कालं जाणइ पासइ, भावओ णं ओहिनाणी*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*जहन्नेणं अनंते भावे जाणइ पासइ उक्कोसेणवि अनंते भावे जाणइ पासइ, सव्वभावाणमनंतभागं जाणइ पासइ ॥*

**वृ.** तदवधिज्ञानं 'समासतः' संक्षेपेण 'चतुर्व्विधं' चतुष्प्रकारं प्रज्ञप्तम्, तद्यथा-द्रव्यतः क्षेत्रतः कालतो भावतश्चेति, तत्र द्रव्यतो 'ण'मिति वाक्यालङ्कारे, अवधिज्ञानी, जघन्येनापि-भावप्रधानोऽयं निर्देशः सर्वजघन्यतयाऽपि अनन्तानि रूपिद्रव्याणि जानाति पश्यति, तानि च तैजसभाषाप्रायोग्यवर्गणापान्तरालवर्त्तीनि द्रव्याणि, उत्कर्षतः पुनः सर्वाणि रूपिद्रव्याणि बादरसूक्ष्माणि जानाति पश्यति, तत्र ज्ञानं विशेषग्रहणात्मकं दर्शनं सामान्यपरिच्छेदात्मकं, आह च चूर्ण्णिकृत्-जाणइत्ति नाणं, तत्थ जं विसेसग्गहणं तन्नाणं, सागारमित्यर्थः, पासइत्ति दंसणं, जं सामन्नग्गहणं तं दंसणमनागारमित्यर्थः, आह- आदौ दर्शनं ततो ज्ञानमिति च क्रमः, तत एनं क्रमं परित्यज्य किमर्थं प्रथमं जानातीत्युक्तम्?, उच्यते, इह सर्वा लब्धयः साकारोपयोगोपयुक्तस्योत्पद्यन्ते, अवधिरपि लब्धिरुपवर्ण्यते, ततः स प्रथममुत्पद्यमानो ज्ञानरूप एवोत्पद्यते न दर्शनरूपः, ततः क्रमणोपयोगप्रवृत्तेर्ज्ञानोपयोगानन्तरं दर्शनरूपोऽपीति प्रथमतो ज्ञानमुक्तं पश्चाद्दर्शनम्, अथवा इहाध्ययने सम्यग्ज्ञानं प्ररूपयितुमुपक्रान्तं, यतोऽनुयोगप्रारम्भेऽवश्यं मङ्गलाय ज्ञानपञ्चकरूपो भावनन्दिर्वक्तव्य इति तत्प्ररूपणार्थमिदमध्ययनमारब्धं, ततः सम्यग्ज्ञानमिह प्रधानं, न मिथ्याज्ञानं, तस्य माङ्गल्यहेतुत्वायोगदा, दर्शनं त्ववधिज्ञानविभङ्गसाधारणमिति तदप्रधानं, प्रधानानुयायी च लौकिको लोकोत्तरश्च मार्ग्गः, ततः प्रधानत्वात् प्रथमं ज्ञानमुक्तं पश्चाद्दर्शनमिति।

तथा क्षेत्रोऽवधिज्ञानी जघन्येनांगुलासङ्ख्येयभागमुत्कर्षतोऽसङ्ख्येयानि अलोके लोकप्रमाणानि चतुर्दशरज्ज्वात्मकानि खण्डानि जानाति पश्यति।

कालतोऽवधिज्ञानी जघन्येनावलिकाया असङ्ख्येयभागमुत्कर्षतोऽसङ्ख्येया उत्सर्प्पिण्यवसर्प्पिणीः-असङ्ख्येयावसर्प्पिण्युत्सर्प्पिणीप्रमाणमतीतमनागतं च कालं जानाति पश्यति।

भावतोऽवधिज्ञानी जघन्येनानन्तान् भावान्-पर्यायान् आधारद्रव्यानन्तत्वात्, नतु प्रति द्रव्यं, प्रतिद्रव्यं सङ्ख्येयानामसङ्ख्येयानां वा पर्यायाणां दर्शनात्, उक्तं च-

'एगं दव्वं पेच्छं खंधमणुं वा स पज्जवे तस्स।
उक्कोसमसंखेज्जे संखिज्जे पेच्छइ कोई ॥'

उत्कर्षतोऽप्यनन्तान् भावान् जानाति पश्यति, केवलं जघन्यपदादुत्कृष्टपदमनन्तगुणम्, आह च चूर्णिकृत्-'जहन्नपयाओ उक्कोसपयमनंतगुणमिति' 'सव्वभावाणमनंतभागं जाणइ पासइ'त्ति तानपि चोत्कृष्टपदवर्त्तिनो भावान् 'सर्वभावनां' सर्वपर्यायाणामनन्तभागकल्पान् जानाति पश्यति। तदेवमवधिज्ञानां द्रव्यादिभेदतोऽप्यभिधाय साम्प्रतं संग्रहगाथामाह-

*मू. (७८) ओही भवपच्चइओ गुणपच्चइओ अ वण्णिओ दुविहो।*
*तस्स य बहू विगप्पा दव्वे खित्ते अ काले अ ॥*

**वृ.** एषः अनन्तरोऽवधिर्भवप्रत्ययतो गुणप्रत्ययतश्च 'वर्ण्णितो' व्याख्यातः, पाठान्तरं 'वण्णिओ दुविहो'त्ति वर्ण्णितो 'द्विविधो' द्विप्रकारः, तस्य च भवगुणप्रत्ययतो द्विविधस्यापि बहवो विकल्पा-भेदाः, तद्यथा-द्रव्ये द्रव्यविषयाः कस्यापि कियद्द्रव्यविषय इति द्रव्यभेदात्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भेदः, तथा क्षेत्रे-क्षेत्रविषया अंगुलासङ्ख्येयभागादिक्षेत्रभेदात्, काले-कालविषया आवलिकाऽसङ्ख्येयभागादिकालभेदात्, चशब्दाद्भावविषयाश्च कस्यापि कियन्तः पर्याया विषय इति भावभेदाद्भेदः।

तत्र जघन्यपदे प्रतिद्रव्यं चत्वारो वर्णगन्धरसस्पर्शलक्षणाः पर्याया 'दो पज्जवे दुगुणिए सवजहन्नेण पेच्छए ते उ। वन्नाईया चउरो' इति वचनप्रामाण्यात्, मध्यमतोऽनेकसङ्ख्यभेदभिन्ना उत्कर्षतः प्रतिद्रव्यमसङ्ख्येयान् न तु कदाचनाप्यनन्तान्, यत आह भाष्यकृत-'नाणंते पेच्छइ कयाइ'। तदेवमवधिज्ञानमभिधाय साम्प्रतं ये बाह्यावधयो ये चाबाह्यावधयः तानुपदर्शयति-

*मू. (७१) नेरेइयदेव तित्थंकरा य ओहिस्सऽबाहिरा हुंति।*
*पासंति सव्वओ खलु सेसा देसेण पासंति॥*

वृ. नैरयिकाश्च देवाश्च तीर्थंकराश्च नैरयिकदेवतीर्थङ्कराः, तीर्थकरा इत्यत्र 'तीर्थाच्चैक' इति वचनात् स्वप्रत्यये तीर्थशब्दान्मन्, चशब्दोऽवधारणे, तस्य च व्यवहितः प्रयोगस्तं च दर्शयिष्यामः, नैरयिकदेवतीर्थङ्करा 'अवधेः' अवधिज्ञानस्याबाह्या एव भवन्ति, बाह्या न कदाचनापि भवन्तीति भावः, सर्वतोऽवभासकावध्युपलब्धक्षेत्रमध्यवर्त्तिनः सदैव भवन्तीत्यर्थः। तथा पश्यन्ति 'सर्वतः' सर्वासु दिक्षु विदिक्षु च, खलुशब्दोऽवधारणार्थः, सर्वास्वेव दिग्विदिक्ष्विति, आह-अवधेरबाह्या भवन्तीत्यस्मादेव सर्वत इत्यस्यार्थस्य लब्धत्वात् सर्वतःशब्दग्रहणमतिरिच्यते, उच्यते, अभ्यन्तरत्वाभिधानेऽपि सर्वतोदर्शनाप्रतीतेः, न खलु सर्वाभ्यन्तरावधिः सर्वतः पश्यति, कस्यचिद्दिगन्तरालादर्शनात्, विचित्रत्वादवधेः, ततः सर्वतोदर्शनख्यापनार्थं 'पासंति सवओ खलु' इत्युक्तम्, आह च भाष्यकृत्-

"अब्भितरत्ति भणिए भन्नइ पासंति सवओ कीस ?।
ओदइ जमसंततदिसो अंतोवि ठिओ न सव्वत्तो॥"

'शेषाः' तिर्यङ्नरा देशेन-एकदेशेन पश्यन्ति, 'सर्वं वाक्यं सावधारणमिष्टितश्चावधारणविधिः' तत एवमवधारणीयं-शेषा एव देशतः पश्यन्ति, न तु शेषा देशत एवेति, अथवा अन्यथा व्याख्यायते-तदेवमधिज्ञानमभिधाय साम्प्रतं ये नियतावधयो ये चानियतावधयस्तान् प्रतिपादयति-नैरयिकदेवतीर्थंकरा एवावधेरबाह्या भवन्ति, किमुक्तं भवति ?, नियतावधयो भवन्ति, नियमेनैषामवधिर्भवतीत्यर्थः, एवं चाभिहिते सति संशयः-किं ते देशेन पश्यन्ति उत सर्वतः ?, ततः संशयापनोदार्थमाह-'पासंतो'त्यादि 'सर्वतः खलु' सर्वत एव तेनावधिना ते नैरयिकादयः पश्यन्ति न तु देशतः।

अत्र पर आह-ननु 'पश्यन्ति सर्वतः खल्वि'त्येतावदेवास्ताम्, अवधेरबाह्या भवन्तीत्येतत् न युक्तं, यतो नियतावधित्वप्रतिपादनार्थमिदमुच्यते, तच्च नियतावधित्वं देवनारकाणां 'दोण्हं भवपच्चइयं, तंजहा-देवाणं नेरइयाणं चे'ति वचनसामर्थ्यात् सिद्धं, तीर्थकृतां तु पारभविकावधिसमन्वितागमस्यातिप्रसिद्धत्वादिति, अत्रोच्यते, इह यद्यपि 'दोण्हं भवपच्चइय'मित्यादिवचनतो नैरयिकादीनां नियतावधित्वं लब्धं, तथापि सर्वकालं तेषां नियतोऽवधिरिति न लभ्यते, ततः सर्वकालं नियतावधित्वख्यापनार्थमधेरबाह्या भवन्तीत्युक्तम्।

आह-यद्येवं तीर्थकृतामवधेः सर्वकालावस्थायित्वं विरुध्यते, न छद्मस्थकालस्यैव तेषां

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विवक्षितत्वात्, शेषं प्राग्वत्।

*मू. (८०) से तं ओहिनाणपच्चक्खं ॥*

वृ.तदेतदवधिज्ञानम्॥

*मू. (८१) से किं तं मनपज्जवनाणं ?, मनपज्जवनाणे णं भंते ! किं मनुस्साणं उप्पज्जइ अमनुस्साणं ?, गोअमा ! मनुस्साणं नो अमनुस्साणं जइ मनुस्साणं किं संमुच्छिममनुस्साणं गब्भवक्कंतिअमनुस्साणं ?, गोअमा ! नो संमुच्छिममनुस्साणं उप्पज्जइ गब्भवक्कंतिअमनुस्साणं, जइ गब्भवक्कंतियमनुस्साणं किं कम्मभूमिअगब्भवक्कंतिअमनुस्साणं अकम्मभूमियगब्भ-वक्कंतिअमनुस्साणं अंतरदीवगगब्भवक्कंतिअमनुस्साणं ?, गोअमा ! कम्मभूमिअगब्भवक्कंतिअ-मनुस्साणं नो अकम्मभूमिअगब्भक्कंतिअमनुस्साणं नो अंतरदीवगगब्भवक्कंतिअमनुस्साणं।*

*जइ कम्मभूमिअगब्भक्कंतिअमनुस्साणं किं संखिज्जवासाउयकम्मभूमिअगब्भ-वक्कंतिअमनुस्साणं असंखिज्जवासाउअकम्मभूमिअगब्भवक्कंतिअमनुस्साणं ?, गोअमा ! संखेज्जवासाउअकम्मभूमिअगब्भवक्कंतिअमनुस्साणं नो असंखेज्जवासाउअकम्मभूमि-अगब्भवक्कंतिअमनुस्साणं,*

*जइ संखेज्जवासाउयकम्मभूमिअगब्भवक्कंतिअमनुस्साणं किं पज्जत्तगसंखेज्जवासाउ-अकम्मभूमिअगब्भवक्कंतीअमनुस्साणं अपज्जत्तगसंखेज्जवासाउअकम्मभूमिअगब्भ-वक्कंतिअमनुस्साणं ?, गोअमा ! पज्जत्तगसंखेज्जवासाउअकम्मभूमिअगब्भवक्कंतिअमनु-स्साणं नो अपज्जत्तगसंखेज्जवासाउअकम्मभूमिअगब्भवक्कंतिअमनुस्साणं,*

*जइ पज्जत्तगसंखिज्जवासाउअकम्मभूमिअगब्भवक्कंतिअमनुस्साणं किं सम्मद्दिट्ठि-पज्जत्तगसंखेज्जवासाउअकम्मभूमिअगब्भवक्कंतिअमनुस्साणं मिच्छदिट्ठिपज्जत्तग-संखिज्जवासाउअकम्मभूमिअगब्भवक्कंतिअमनुस्साणं सम्मामिच्छदिट्ठिपज्जत्तग-संखिज्जवासाउअकम्मभूमिअगब्भवक्कंतिअमनुस्साणं ?, गोअमा ! सम्मदिट्ठिपज्जत्तग-संखिज्जवासाउअकम्मभूमिअगब्भवक्कंतिअमनुस्साणं नो मिच्छदिट्ठिपज्जत्तगसंखिज्ज-वासाउअकम्मभूमिअगब्भवक्कंतिअमनुस्साणं नो सम्मामिच्छद्दिट्ठिपज्जत्तगसंखिज्जवासा-उअकम्मभूमिअगब्भवक्कंतिअमनुस्साणं,*

*जइ समद्दिट्ठिपज्जत्तगसंखिज्जवासाउअकम्मभूमिअगब्भवक्कंतिअमनुस्साणं किं संजय-सम्मद्दिट्ठिपज्जत्तगसंखिज्जवासाउअकम्मभूमिअगब्भवक्कंतिअमनुस्साणं असंजयसम्म-द्दिट्ठिपज्जत्तगसंखिज्जवासाउअकम्मभूमिअगब्भवक्कंतिअमनुस्साणं संजयासंजयसम्म-द्दिट्ठिपज्जत्तगसंखिज्जवासाउअकम्मभूमिअगब्भवक्कंतिअमनुस्साणं ?, गोयमा ! संजयसम्म-द्दिट्ठिपज्जत्तगसंखिज्जवासाउअकम्मभूमिअगब्भवक्कंतिअमनुस्साणं नो असंजयसम्मदिट्ठि-पज्जत्तगसंखिज्जवासाउअकम्मभूमिअगब्भवक्कंतिअमनुस्साणं नो संजयासंजयसम्मद्दिट्ठि-पज्जत्तगसंखिज्जवासाउअकम्मभूमिअगब्भवक्कंतिअमनुस्साणं,*

*जइ संजयसम्मद्दिट्ठिपज्जत्तगसंखिज्जवासाउअकम्मभूमिअगब्भवक्कंतिअमनुस्साणं किं पमत्तसंजयसम्मद्दिट्ठिपज्जत्तगसंखिज्जवासाउअकम्मभूमिअगब्भवक्कंतिअमनुस्साणं अपमत्त-*



Jain Education International For Private & Personal Use Only www.jainelibrary.org

*संजयसम्मद्दिट्ठिपज्जत्तगसंखिज्जवासाउअकम्मभूमिअगब्भवक्कंतिअमनुस्साणं ?, गोअमा! अपमत्तसंजयसम्मद्दिट्ठिपज्जत्तगसंखिज्जवासाउअकम्मभूमिअगब्भवक्कंतिअमनुस्साणं नो पमत्तसंजयसम्मद्दिट्ठिपज्जत्तगसंखिज्जवासाउअकम्मभूमिअगब्भवक्कंतिअमनुस्साणं,*

*जइ अपमत्तसंजयसम्मद्दिट्ठिपज्जत्तगसंखिज्जवासाउअकम्मभूमिअगब्भवक्कंतिअमनुस्साणं किं इड्ढीपत्तअपमत्तसंजयसम्मद्दिट्ठिपज्जत्तगसंखिज्जवासाउअकम्मभूमिअगब्भवक्कंतिअमनुस्साणं अनिड्ढीपत्तअपमत्तसंजयसम्मद्दिट्ठिपज्जत्तगसंखिज्जवासाउअकम्मभूमिअगब्भवक्कंतिअमनुस्साणं ?, गोअमा ! इड्ढीपत्तअपमत्तसंजयसम्मद्दिट्ठिपज्जत्तगसंखिज्जवासाउअकम्मभूमिअगब्भवक्कंतिअमनुस्साणं नो अनिड्ढीपत्तअपमत्तसंजयसम्मद्दिट्ठिपज्जत्तगसंखिज्जवासाउअकम्मभूमिअगब्भवक्कंतिअमनुस्साणं मनपज्जवनाणं समुप्पज्जइ ॥*

**वृ.** अथ किं तत् मनःपर्यायज्ञानं ?, एवं शिष्येण प्रश्ने कृते सति ये गौतमप्रश्नभगवन्निर्वचनरूपा मनःपर्यायज्ञानोत्पत्तिविषयस्वामिमार्गणाद्वारेण पूर्वसूत्रालापकास्तान् वितथप्ररूपणाशङ्काव्युदासाय प्रवचनबहुमानिविनेयजनश्रद्धाभिवृद्धये च तदवस्थानेव देववाचकः पठति 'जावइया तिसमयाहारगस्से'त्यादिनिर्युक्तिगाथासूत्रमिव, मनःपर्यायज्ञानं प्राग्निरूपितशब्दार्थं 'ण'मिति वाक्यालङ्कारे 'भंते'त्ति गुर्वामन्त्रणे 'किमिति' परप्रश्ने मनुष्याणामुत्पद्यते इति प्रकटार्थं अमनुष्याणामुत्पद्यते इति, 'अमुनष्याः' देवादयः तेषामुत्पद्यते ?, एवं भगवता गौतमेन प्रश्ने कृते सति परमार्हन्त्यमहिम्ना विराजमानस्त्रिलोकीपतिर्भगवान् वर्द्धमानस्वामी निर्वचनमभिधत्ते-हे गौतम! सूत्रे दीर्घत्वं 'सेर्लोपः सम्बोधने ह्रस्वो वे'ति प्राकृतलक्षणसूत्रे वाशब्दस्य लक्ष्यानुसारेण दीर्घत्वसूचनादवसेयम्, यथा भो वयस्सा इत्यादौ, मनुष्याणामुत्पद्यते नामनुष्याणां, तेषां विशिष्टचारित्रप्रतिपत्त्यसम्भवात्, अत्राह-ननु गौतमोऽपि चतुर्दशपूर्वधरः सर्वाक्षरसंन्निपाती सम्भिन्नश्रोताः सकलप्रज्ञापनीयभावपरिज्ञानकुशलः प्रवचनस्य प्रणेता सर्वज्ञदेशीय एव, उक्तं च-

"संखातीतेऽवि भवे साहइ जं वा परो उ पुच्छेज्जा।
न य णं अनाइसेसे वियाणई एस छउमत्थो ॥"

ततः किमर्थं पृच्छति ?, उच्यते, शिष्यसम्प्रत्यार्थं, तथाहि-तमर्थं स्वशिष्येभ्यः प्ररूप्यं तेषां सम्प्रत्ययार्थं तत्समक्षं भूयोऽपि भगवन्तं पृच्छति, अथवा इत्थमेव सूत्ररचनाकल्पः, ततो न कश्चिद्दोष इति । पुनरपि गौतम आह-यदि मनुष्याणामुत्पद्यते तर्हि किं सम्मूर्च्छिममनुष्याणामुत्पद्यते किंवा गर्भव्युत्क्रान्तिकमनुष्याणामुत्पद्यते ?, तत्र 'मूर्च्छा मोहसमुच्छ्रययोः' संमूर्च्छनं संमूर्च्छा भावे धञ् प्रत्ययः तेन निवृत्ताः सम्मूर्च्छिमाः, ते च वान्तादिसमुद्भवाः, तथा चोक्तं प्रज्ञापनायां-

"कहिं णं भंते! संमुच्छिममनुस्सा संमुच्छंति ?, गोअमा! अंतोमनुस्सखेत्ते पणयालीसाए जोयणसयसहस्सेसु अड्ढाइज्जेसु दीवसमुद्देसु पन्नरससु कम्मभूमीसु तीसाए अकम्मभूमीसु छप्पन्नाए अंतरदीवेसु गब्भवक्कंतियमणुस्साणं चेव उच्चारेसु वा पासवणेसु वा खेलेसु वा सिंघाणेसु वा वंतेसु वा पित्तेसु वा सुक्केसु वा सोणिएसु वा सोक्कपोग्गलपरिसाडेसु वा विगयकलेवरेसु वा थीपुरिससंजोएसु वा गामनिद्धमणेसु वा नगरनिद्धमणेसु वा सव्वेसु चेव असुइठाणेसु एत्थ णं संमुच्छिममनुस्सा संमुच्छंति अंगुलस्य असंखेज्जइभागमेत्ताए ओगाहणाए असण्णी

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मिच्छादिट्ठी अन्नाणी सव्वाहिं पज्जत्तीहिं अपज्जत्तगा अंतमुहुत्ताउया चेव कालं करेंति" ।

तथा गर्भे व्युत्क्रान्तिः-उत्पत्तिर्येषां ते गर्भव्युत्क्रान्तिकाः, अथवा गर्भाद् व्युत्क्रान्तिः-व्युत्क्रमणं निष्क्रमणं येषां ते गर्भव्युत्क्रान्तिकाः, उभयत्रापि गर्भजा इत्यर्थः, भगवानाह-नो सम्मूर्च्छिममनुष्याणामुत्पद्यते, तेषां विशिष्टचारित्रप्रतिपत्त्यसम्भवात्, किन्तु गर्भव्यत्क्रान्तिक-मनुष्याणां, एवं सर्वेषामपि प्रश्ननिर्वचनसूत्राणां भावार्थो भावनीयः,

नवरं कृषिवाणिज्यतपःसंयमानुष्ठानादिकर्मप्रधाना भर्मयः कर्मभूमयो-भरतपञ्चकैरवत-पञ्चकमहाविदेहपञ्चकलक्षणाः पञ्चदश तासु जाताः कर्मभूमिजाः, कृष्यादिकर्म्मरहिताः कल्प-पादफलोपभोगप्रधाना भूमयो हैमवतपञ्चकहरिवर्षपञ्चकदेवकुरुपञ्चकोत्तरकुरुपञ्चकरम्यक-पञ्चकैरण्यवतपञ्चकरूपास्त्रिंशदकर्मभूमयः तासु जाता अकर्मभूमिजाः, तथा अन्तरे-लवण-समुद्रस्य मध्ये द्वीपा अन्तरद्वीपाः-एकोरुकादयः षट्पञ्चाशत् तेषु जाताः अन्तरद्वीपजाः ।

अथ लवणसमुद्रस्य मध्ये षट्पञ्चाशदन्तरद्वीपा वर्तन्ते किंप्रमाणा वा ते किंस्वरूपा वा तत्र मनुष्या इति ?, उच्यते, इह जम्बूद्वीपे भरतस्य हैमवतस्य च क्षेत्रस्य सीमाकारी भूमिनिमग्नपञ्च-विंशतियोजनो योजनशतोच्छ्रायप्रमाणो भरतक्षेत्रापेक्षया द्विगुणविष्कम्भो हेममयश्चीनपट्टवर्ण्णो नानावर्ण्णविशिष्टद्युतिमणिनिकरपरिमण्डितपार्श्वः सर्वत्र तुल्यविस्तरो गगनमण्डलोल्लिखित-रत्नमयैकादशकूटोपशोभितः तपनीयमयतलविविधमणिकनकमण्डिततटदशयोजनावगाढपूर्व-पश्चिमयोजनसहस्रायामदक्षिणोत्तरयोजनापञ्चशतविस्तृतपद्महृदोपशोभितशिरोमध्यभागः कल्पपादपश्रेणिरमणीयः पूर्वापरपर्यन्ताभ्यां लवणार्णवजलसंस्पर्शी हिमवन्नामा पर्वतः तस्य लवणार्णवजलसंस्पर्शादारभ्य पूर्वस्यां पश्चिमायां च दिशि प्रत्येकं द्वे द्वे गजदन्ताकारे दंष्ट्रे विनिर्गते, तत्र ऐशान्यां दिशि या विनिर्गता दंष्ट्रा तस्यां हिमवतः पर्यन्तादारभ्य त्रीणि योजनशतानि लवलसमुद्रवगाह्य अत्रान्तरे योजनशतत्रयायामविष्कम्भः किञ्चिन्न्यूनैकोनपञ्चाशदधिकनव-योजनशतपरिरय एकोरुकनामा द्वीपो वर्त्तते, अयं च पञ्चधनुःशतप्रमाणविष्कम्भया गव्यूत-द्वयोच्छ्रितया पद्मवरवेदिकया वनखण्डेन च सर्वतः परिमण्डितः,

एवं तस्यैव हिमवतः पर्वतस्य पर्यन्तादारभ्य दक्षिणपूर्वस्यां दिशि त्रीणि योजनशतानि लवणसमुद्रमवगाह्य द्वितीयदंष्ट्रायामुपरि एकोरुकद्वीपप्रमाण आभासिकनामा द्वीपो वर्त्तते, तथा तस्यैव हिमवतः पश्चिमायां दिशि पर्यन्तादारभ्य दक्षिणपश्चिमायां, नैर्ऋतकोणानुसारेण इत्यर्थः, त्रीणि योजनशतानि लवणसमुद्रे दंष्ट्रामतिक्रमयात्रान्तरे यथोक्त प्रमाणो वैषाणिकनामा द्वीपो वर्त्तते, तथा तस्यैव हिमवतः पश्चिमायामेव दिशि पर्यन्तादारभ्य पश्चिमोत्तरस्यां दिशि, वायव्यकोणानुसारेण इत्यर्थः, त्रीणि शतानि योजनानां लवणसमुद्रमध्ये चतुर्थीदंष्ट्रामति-क्रम्यात्रान्तरे पूर्वोक्तप्रमाणो नङ्गोलिकनामा द्वीपो वर्त्तते, एवमेते चत्वारो द्वीपा हिमवतः चतसृष्वपि विदिक्षु तुल्यप्रमाणा अवतिष्ठन्ते, उक्तं च-

"चुल्लहिमवंतपुवावरेण विदिसासु सागरं तिसए ।
गंतूनंतरदीवा तिन्नि सए होंति विच्छिन्ना ॥
अउणापन्ननवसए किंचूने परिहि एसिमे नामा ।
एगोरुअ आभासिय वेसाणी चेव नंगूली ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत एतेषामेकोरुकादीनां चतुर्ण्णां द्वीपानां परतो यथाक्रमं पूर्वोत्तरादिविदिक्षु प्रत्येकं २ चत्वारि २ योजनशतान्यतिक्रम्य चतुर्योजनशतायामविष्कम्भाः किञ्चिन्न्यूनपञ्चषष्ट्यधिक-द्वादशयोजनशतपरिक्षेपाः यथोक्तपद्मवरवेदिकावनखण्डमण्डितपरिसराः हयकर्ण्णगजकर्ण्णगो-कर्ण्णशुष्कुलीकर्ण्णनामानश्चत्वारो द्वीपाः, तद्यथा-एकोरुकस्य परतो हयकर्ण्णः, आभासिकस्य परतो गजकर्ण्णः, वैषाणिकस्य परतो गोकर्ण्णो, नङ्गोलीकस्य परतो शुष्कुलीकर्ण्ण इति।

ततः एतेषामपि हयकर्ण्णादीनां चतुर्ण्णां द्वीपानां परतः पुनरपि यथाक्रमं पूर्वोत्तरादिविदिक्षु प्रत्येकं पञ्च योजनशतनि व्यतिक्रम्य पञ्चयोजनशतायामविष्कम्भा एकाशीत्यधिक-पञ्चदशयोजनशतपरिक्षेपाः पूर्वोक्तप्रमाणपद्मवरवेदिकावनखण्डमण्डितबाह्यप्रदेशा आदर्श-मुखमेण्ढ्रमुखायोमुखगोमुखनामानश्चत्वारो द्वीपाः तद्यथा-हयकर्ण्णस्य परतः आदर्शमुखो, गजकर्ण्णस्य परतो मेण्ढ्रमुखो, गोकर्ण्णस्य परतो अयोमुखः, शुष्कुलीकर्ण्णस्य परतो गोमुख,

एवमग्रेऽपि भावना कार्या। ततः एतेषामप्यादर्शमुखादीनां चतुर्ण्णां द्वीपानां परतो भूयोऽपि यथाक्रमं पूर्वोत्तरादिविदिक्षु प्रत्येकं षड् योजनशतान्यतिक्रम्य षड्२योजनशतायामविष्कम्भाः सप्तनवत्यधिकाष्टादशयोजनशतपरिक्षेया यथोक्तप्रमाणपद्मवरवेदिकावनखण्डमण्डितपरिसरा अश्वमुखहस्तिमुखसिंहमुखव्याघ्रमुखनामानश्चत्वारो द्वीपाः। तत एतेषामप्यश्वमुखादीनां परतो यथाक्रमं पूर्वोत्तरादिविदिक्षु प्रत्येकं सप्त २ योजनशतानि अतिक्रम्य सप्त २ योजनशतायामविष्क-म्भास्त्रयोदशाधिकद्वाविंशतियोजनशतपरिधयः पूर्वोक्तप्रमाणपद्मवरवेदिकावनखण्डसमवगूढा अश्वकर्ण्णहरिकर्ण्णहस्तिकर्णकर्ण्णप्रावरणनामानश्चत्वारो द्वीपाः।

तत एतेषामप्यश्वकर्ण्णादीनां चतुर्ण्णां द्वीपानां परतो यथाक्रमं पूर्वोत्तरादिविदिक्षु प्रत्येक-मष्टावष्टौ योजनशतान्यतिक्रम्य अष्ट २ योजनशतायामविष्कम्भा एकोनत्रिंशदधिकपञ्चविंशति-योजनशतपरिक्षेपा यथोक्तप्रमाणपद्मवरवेदिकावनखण्डमण्डितपरिसरा उल्कामुखमेघ-मुखविद्युन्मुखविद्युद्दन्ताभिधानाश्चत्वारो द्वीपाः। ततोऽमीषामपि उल्कामुखादीनां चतुर्ण्णां द्वीपानां परतो यथाक्रमं पूर्वोत्तरादिविदिक्षु प्रत्येकं नव नव योजनशतान्यतिक्रम्य नवनवयोजन-शतायामविष्कम्भाः पञ्चचत्वारिंशदधिकाष्टाविंशतियोजनशतपरिक्षेपा यथोक्तप्रमाणापद्म-वरवेदिकावनखण्डसमवगूढाः समदन्तलष्टदन्तगूढदन्तशुद्धदन्तनामानश्चत्वारो द्वीपाः। एवमेते हिमवति पर्वते चतसृषु विदिक्षु व्यवस्थिताः सर्वसङ्ख्यया अष्टाविंशतिसङ्ख्या द्वीपाः।

एवं हिमवत्तुल्यवर्ण्णप्रमाणे पद्महूदप्रमाणायामविष्कम्भावगाहपुण्डरीकहूदोपशोभिते शिखरिण्यपि पर्वते लवणार्णवजलसंस्पर्शादारभ्य चतुसृषु विदिक्षु व्यवस्थिताः एकोरुकादि-नामानोऽक्षूणापान्तरालायामविष्कम्भा अष्टाविंशतिसङ्ख्या द्वीपा वक्तव्याः। ततः सर्वसङ्ख्यया षट्पञ्चाशदन्तरद्वीपाः।

एतेषु च वर्त्तमाना मनुष्या अपि एवंनामानो भवन्ति, भवति च निवासयोगतः तथाव्यपदेशो यथा पञ्चालजनपदनिवासिनः पुरुषाः पञ्चाला इति, तेऽपि चान्तरद्वीपवासिनो मनुष्या वज्रर्ष-भनाराचसंहनिनः समचतुरस्रसंस्थानसंस्थिताः समग्रशुभलक्षणतिलकमषपरिकालिता देव-लोकानुकारिरूपलावण्यालङ्कारशोभितविग्रहा अष्टधनुःशतप्रमाणशरीरच्छायाः, स्त्रीणां त्विदमेव किञ्चिन्न्यूनं द्रष्टव्यं, तथा पल्योपमासङ्ख्येयभागप्रमाणायुषः स्त्रीपुरुषयुगलव्यवस्थिताः दशविध-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कल्पपादसम्पाद्योपभोगसम्पदः प्रकृत्यैव शुभचेतसो विनीताः प्रतनुक्रोधमानमायालोभाः सन्तोषिणो निरौत्सुक्याः कामचारिणोऽनुलोमवायुवेगाः सत्यपि मनोहारिणि मणिकनकमौक्तिकादिके ममत्वकारिणि ममत्वाभिनिवेशरहिताः सर्वथापगतवैरानुबन्धाः परस्परप्रेष्यादिभावविनिर्मुक्ता अत एवाहमिन्द्रा हस्त्यश्वकरभगोमहिष्यादीनां सद्भावेऽपि तत्परिभोगपरांमुखाः पादविहारचारिणो रोगवेदनादिवकिला वर्त्तन्ते चतुर्थाहारमेते गृह्णन्ति चतुःषष्टिश्च पृष्टकरण्ड-कास्तेषां, षण्मासावशेषायुषश्चामी स्त्रीपुरुषयुगलं प्रसुवते एकोनाशीतदिनानि च तत् परिपाल-यन्ति स्तोकस्नेहकषायतया च ते मृत्वा देवलोकमुपसर्प्पन्ति, उक्तं च –

"अंतरदीवेसु नरा धनुसयअट्ठूसिया सयामुइया।
पालंति मिहुणधम्मं पल्लस्स असंखभागाउ ॥
चउसट्ठी पिट्ठिकरंडयाण मणुआण तेसिमाहारो।
भत्तस्स चउत्थस्स य अनुसीति दिनानि पालणया ॥"

इत्यादि, तिर्यञ्चोऽपि च तत्र व्याघ्रसिंहसर्प्पादयो रौद्रभावरहिततया न परस्परं हिंस्यहिंसकभावे वर्त्तन्ते, तत एव तेऽपि देवलोकगामिनो भवन्ति, तेषु च द्वीपेषु शाल्यादीनि धान्यानि विस्त्रसात एव समुत्पद्यन्ते परं न ते मनुष्यादीनां परिभोगाय जायन्ते, तेषु च द्वीपेषु दंशमशकयुकामत्कुणादयः शरीरोपद्रवकारिणोऽनिष्टसूचकाश्च चन्द्रसूर्योपरागादयो न भवन्ति, भूमिरपि तत्र रेणुपङ्ककण्टकादिरहिता सकलदोषपरित्यक्ता सर्वत्र समतला रमणीया च वर्त्तत इति।

तथा 'संखेज्जवासाउय'त्ति सङ्ख्येयवर्षायुषः पूर्वकोट्यदिजीविनः असङ्ख्येयवर्षायुषः-पल्योपमादिजीविनः, तथा 'पज्जत्तग'त्ति पर्याप्तिः-आहारादिपुद्गलग्रहणपरिणामनहेतुरात्मनः शक्तिविशेषः, स च पुद्गलोपचयात्, किमुक्तं भवति ?-उत्पत्तिदेशमागतेन येन गृहीता आहारदिपुद्गलास्तेषां तथा अन्येषां च प्रतिसमयं गृह्यमाणानां तत्सम्पर्कतः तद्रूपतया जातानामुपष्टम्भेन यः शक्तिविशेषो जीवस्याहारादिपुद्गलानां खलरसादिरूपतया परिणमनहेतुर्यथोदरान्तर्गतानां पुद्गलविशेषाणामवष्टम्भेनाहारपुदगलखलरसरूपतयापादनहेतुः शक्तिविशेषः सा पर्याप्तिः, सा च षोढा, तद्यथा-

आहारपर्याप्तिः शरीरपर्याप्तिः इन्द्रियपर्याप्तिः प्राणापानपर्याप्तिः भाषापर्याप्तिः मनःपर्याप्तिश्चेति, तत्र यया बाह्यमाहारमादाय खलरसरूपतया परिणमयति साऽऽहारपर्याप्तिः ?, यया रसीभूतमाहारं रसासृग्मांसमेदोऽस्थिमज्जाशुक्रलक्षणसप्तधातुरूपतया परिणमयति सा शरीरपर्याप्तिः २, यया धातुरूपतया परिणमितमाहारमिन्द्रियरूपतया परिणमयति सा इन्द्रियपर्याप्तिः ३, यया पुनरुच्छ्वासप्रयोग्यवर्गणादलिकमादायोच्छ्वासरूपतया परिणमय्यालम्ब्य च मुञ्चति सा उच्छ्वासपर्याप्तिः ४, यया तु भाषाप्रयोग्यवर्गणादलिकमादाय भाषात्वेन परिणमय्यालम्ब्य च मुञ्चति सा भाषापर्याप्तिः ५, यया पुनर्मनोयोग्यवर्गणादलिकमादाय मनस्त्वेन परिणमय्यालम्ब्य च मुञ्चति सा मनःपर्याप्तिः ६,

एताश्च यथाक्रममेकेन्द्रियाणां संज्ञिवर्जानां द्वीन्द्रियादीनां संज्ञिनां च चतुःपञ्चषट्सङ्ख्या भवन्ति, उत्पत्तिप्रथमसमय एव चैता यथायथं सर्वा अपि युगपन्निष्पादयितुमारभ्यन्ते क्रमेण च निष्ठामुपयान्ति, तद्यथा-प्रथममाहारपर्याप्तिः ततः शरीरपर्याप्तिः तत इन्द्रियपर्याप्तिरित्यादि,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आहारपर्याप्तिश्च प्रथमसमय एव निष्पद्यते, शेषास्तु प्रत्येकमन्तर्मुहूर्तेन कालेन, अथाहारपर्याप्तिः प्रथमसमय एव निष्पद्यते इति कथमवसीयते ?, उच्यते, इह भगवता आर्यश्यामेन प्रज्ञापनाया- माहारपदे द्वितीयोद्देशके सूत्रमिदमपाठि-'आहारपज्जत्तीए अपज्जत्तएणं भंते ! किं आहारए अनाहारए वा ?, गोयमा ! नो आहारए अनाहारए'त्ति तत आहार पर्याप्त्या अपर्याप्तो विग्रह- गतावेवोपपद्यते, नोपपातक्षेत्रमागतोऽपि, उपपातक्षेत्रमागतस्य प्रथमसमय एवाहारकत्वात्, तत एकसामायिकी आहारपर्याप्तिनिर्वृत्तिः, यदि पुनरुपपातक्षेत्रमागतोऽपि आहारपर्याप्त्या अपर्याप्तः स्यात् तत एवं सति व्याकरणसूत्रमित्थं पठेत्-'सिय आहारए सिय अनाहारए' यथा शरीरादिपर्याप्तिषु, सर्वासामपि च पर्याप्तीनां परिसमाप्तिकालोऽन्तर्मुहूर्त्तप्रमाणः पर्याप्तयो विद्यन्ते येषां ते पर्याप्ता 'अभ्रादिभ्य' इति मत्वर्थीयोऽप्रत्ययः ।

ये पुनः स्वयोग्यपर्याप्तिसमाप्तिविकलाः ते अपर्याप्ताः, त च द्विधा-लब्ध्या करणैश्च, तत्र येऽपर्याप्तका एव सन्तो भ्रियन्ते न पुनः स्वयोग्यपर्याप्तिः सर्वा अपि समर्थयन्ते ते लब्ध्य- पर्याप्तकाः, तेऽपि नियमादाहारशरीरेन्द्रियपर्याप्तिपरिसमाप्तावेव म्रियन्ते, नार्वाक्, यस्मादागमि- भवायुर्बद्ध्वा म्रियन्ते सर्व एव देहिनः, तच्चाहारशरीरेन्द्रियपर्याप्तिपर्याप्तनामेव बध्यत इति, ये पुनः करणानि-शरीरेन्द्रियादीनि न तावन्निर्वर्त्तयन्ति अथ चावश्यं निर्वर्त्तयिष्यन्ति ते करणा- पर्याप्तकाः, इहोभयेषामप्यपर्याप्तानां प्रतिषेधः, उभयेषामपि विशिष्टचारित्रप्रतिपत्त्यसम्भवात्,

तथा 'सम्मद्दिट्ठी'त्ति सम्यक्-अविपरीता दृष्टिः-जिनप्रणीतवस्तुप्रतिपत्तिर्येषां ते सम्य- ग्दृष्टयः, मिथ्या-विपरीतार्याये वा मतिदौर्बल्यादिना एकान्तेन सम्यक्परिज्ञानमिथ्याज्ञानाभावतो न सम्यक्श्रद्धानं नाप्येकान्ततो विप्रतिपत्तिः ते सम्यग्मिथ्यादृष्टयः, उक्तं च शतकबृहच्चूर्णौ- 'जहां नालिकेरदीववासिस्स सुहाइयस्सवि एत्थ समागयस्स ओयणाइए अनेगविहे ढोइए तस्स उवरिं न रुई न य निंदा, जओ तेन सो ओयणाईओ आहारो न कयाइ दिट्ठो नावि सुओ, एवं सम्ममिच्छद्दिट्ठिस्स वि जीवाइपयत्थाणं उवरिं न य रुई नावि नंदि'त्ति, तथा 'संजय'त्ति 'यम' उपरमे संयच्छन्ति स्म सर्वसावद्ययोगेभ्यस्सम्यगुपरमन्ते स्मेति संयताः, "गत्यर्थ-कर्म्मण्या- धारे" ति कर्त्तरि क्तप्रत्ययः, संयताः-सकलचारित्रिणः असंयता-अविरतसम्यग्दृष्टयः संयता- संयताः-देवशविरतिमन्तः, तथा 'पमत्त'त्ति प्रमाद्यन्ति स्म मोहनीयादिकर्म्मोदयप्रभावतः सञ्ज्वलनकषायनिद्राद्यन्यतमप्रमादयोगतः संयमयोगेषु सीदन्ति स्मेति प्रमात्ताः, पूर्ववत् कर्त्तरि क्तप्रत्ययः, ते च प्रायो गच्छवासिनः, तेषां क्वचिदनुपयोगसम्भवात्, तद्विपरीता अप्रमत्ताः, ते च प्रायो जिनकल्पिकपरिहारविशुद्धिकयथालन्दकल्पिकप्रतिमाप्रतिपन्नाः, तेषां सततोपयोग- सम्भवाद्, इह तु ये गच्छवासिन तन्निर्गता वा प्रमादरहिताः तेऽप्रमत्ता दृष्टव्याः, तथा 'इड्ढिप- त्तस्से'त्यादि, ऋद्धीः-आमर्षौषध्यादिलक्षणाः प्राप्ता ऋद्धिप्राप्ताः तद्विपरीता अनृद्धिप्राप्ताः, ऋद्धीश्च प्राप्नुवन्ति विशिष्टमुत्तरोत्तरमपूर्वापूर्वार्थप्रतिपादकं श्रुतमवगाहमानाः श्रुतसामर्थ्य- तस्तीव्रां तीव्रतरां शुभभावनामधिरोहन्तोऽप्रमत्तयतयः, तथा चोक्तम्-

'अवगाहते च स श्रुतजलधिं प्राप्नोति चावधिज्ञानम् ।
मानसपर्यायं वा ज्ञानं कोष्ठादिबुद्धिर्वा ॥
चारणवैक्रियसर्वौषधताद्या वा लब्धयस्तस्य् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रादुर्भवन्ति गुणतो बलानि वा मानसादीनि ॥'

अत्र स इति अप्रमत्तयतिः 'मानसपर्याय'मिति मानसाः-मनःसम्बन्धिनः पर्याया विषयो यस्य तन्मानसपर्यायं, मनःपर्यायज्ञानमित्यर्थः, 'कोष्ठादिबुद्धिर्वे'ति अत्रादिशब्दात्पदानु-सारिबीजप्ररिग्रहः, तिस्रो हि बुद्धयः परमातिशयरूपाः प्रवचने प्रतिपाद्यन्ते, तद्यथा-कोष्ठबुद्धिः पदानुसारिणीबुद्धिः बीजबुद्धिश्च, तत्र कोष्ठ इव धान्यं या बुद्धिराचार्यमुखाद्विनिर्गतौ तदवस्थावेव सूत्रार्थौ धारयति, न किमपि तयोः सूत्रार्थयोः कालान्तरेऽपि गलति सा कोष्ठबुद्धिः, या पुनरेक-मपि सूत्रपदमवधार्य शेषमश्रुतमपि तदवस्थमेव श्रुतमवगाहते सा पदानुसारिणी, या पुनरेकमर्थपदं तथाविधमनुसृत्य शेषमश्रुतमपि यथावस्थितं प्रभूतमर्थमवगाहते सा बीजबुद्धिः, सा च सर्वोत्तमा प्रकर्षप्राप्ता भगवतां गणभृतां, ते हि उत्पादादिपदत्रयमवधार्य सकलमपि द्वादशाङ्गात्मकं प्रवचनमभिसूत्रयन्ति, तथा चारणाश्च वैक्रियं च सर्वौषधश्च चारणवैक्रियसर्वौषधाः तद्भावः चारणवैक्रियसर्वौषधता, तत्र चरणं-गमनं तद्विद्यते येषां ते चारणा 'ज्योत्स्नादिभ्योऽण्' इति मत्वर्थीयोऽण्प्रत्ययः, तत्र गमनमन्येषामपि मुनीनां विद्यते ततो विशेषणान्यथानुपपत्त्या चरणमिह विशिष्टं गमनमभिगृह्यते, अत एवातिशायने मत्वर्थीयो, यथा रूपवती कन्येत्यत्र, ततोऽयमर्थः-अतिशयचरणसमर्थाश्चारणः, तथा चाह भाष्यकृत् स्वाभाष्यटीकायां-अतिशयचरणाच्चारणाः, अतिशयगमनादित्यर्थः,

ते च द्विधा-जङ्घाचारणा विद्याचारणाश्च, तत्र ये चारित्रपोविशेषप्रभावतः समुद्भूतगमन-विषयलब्धिविशेषास्ते जङ्घाचारणाः, ये पुनर्विद्यावशतः समुत्पन्नगमनागमनलब्ध्यतिशयाः ते विद्याचारणाः, जङ्घाचारणास्तु रुचकवरद्वीपं यावद्गन्तुं समर्थाः विद्याचारणा नन्दीश्वरं तत्र जङ्घाचारणा यत्र कुत्रापि गन्तुमिच्छवः तत्र रविकरानपि निश्रीकृत्य गच्छन्ति विद्याचारणा-स्त्वंवमेव, जङ्घाचारणश्च रुचकवरद्वीपं गच्छन्नेकेनैवोत्पातेन गच्छति, प्रतिनिवर्त्तमानस्त्वेके-नोत्पातेन नन्दीश्वरमायाति द्वितीयेन स्वस्थानं, यदि पुनर्मेरुशिखरं जिगमिपुस्तर्हि एकेनैवोत्पातेन ण्डकवनमधिरोहति, प्रतिनिवर्त्तमानस्तु प्रथमेनोत्पातेन नन्दनवनमागच्छति द्वितीयेन, जङ्घा-चारणो हि चारित्रातिशयप्रभावतो भवति ततो लब्ध्युपजीवने औत्सुक्यभावतः प्रमाद-सम्भवाच्चारित्रतिशयनिबन्धना लब्धिरपहीयते ततः प्रतिनिवर्त्तमानो द्वाभ्यामुत्पाताभ्यां स्वस्थान-मयायाति, विद्याचरणः पुनः प्रथमेनोत्पातेन मानुषोत्तरं पर्वतं गच्छति द्वितीयेन तु नन्दीश्वरं, प्रतिनिवर्त्तमानस्त्यकेनैवोत्पातेन स्वस्थानमायाति, तथा मेरुं गच्छन् प्रथमेनोत्पातेन नन्दनवनं गच्छति द्वितीयेन पण्डकवनं, प्रतिनिवर्त्तमानस्त्वेकेनैवोत्पातेन स्वस्थानमायाति, विद्याचरणो हि विद्यावशाद्भवति, विद्या च परिशील्यमाना स्फुट्य स्फुटतरोपजायते, ततः प्रतिनिवर्त्तमानस्य शक्त्यतिशयसम्भवादेकेनोत्पातेन स्वस्थानागमनमिति, उक्तं च-

"अइसयचरणसमत्था जंघाविज्जाहि चारणा मनुओ ।
जंघाहि जाइ पढमो नीसं काउं रविकरेऽवि ॥
एगुप्पाएणं गओ रुयगवरंमि उ तओ पडिनियत्तो ।
बिइएणं नंदिस्सरमिहं तओ एइ तइएणं ॥
पढमेण पंडगवनं बिइउप्पाएण नंदनं एइ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तइउप्पाएण तओ इह जंघाचारणो एइ ॥
पढमेणमानुसोत्तरनगं स नंदिस्सरं तु बिइएणं ।
एइ तओ तइएणं कयन्नेइयवंदणो इहयं ॥
पढमेण नंदनवने बिइउप्पाएण पंडगवनंमि ।
एइ इहं तइएणं जो विज्जाचारणो होइ ॥"

तथा सर्वं-विण्मूत्रादिकमौषधं यस्य स सर्वौषधः, किमुक्तं भवति ?-यस्य मूत्रं विट् श्लेष्मा शरीरमलो वा रोगोपशमसमर्थो भवति स सर्वौषधः, आद्यशब्दादामर्षौषध्वादि-लब्धिपरिग्रहः, तथा आमर्षौषध्यादीनामन्यतमामृद्धिमवध्यृद्धिं वा प्राप्तस्य मनःपर्यायज्ञान-मुत्पद्यते, नानृद्धिप्राप्तस्य, अन्ये त्ववध्यृद्धिप्राप्तस्यैवेति नियमामचक्षते, तदयुक्तं, सिद्धप्राभृता-दाववधिमन्तरेणापि मनःपर्यायज्ञानस्यानेकशोऽभिधानात्।

अत्राह-मनुष्याणामुत्पद्यते इत्युक्ते सामर्थ्यादमनुष्याणां नोत्पद्यते इत्यनुमीयते, ततः कथमुच्यते 'नो अमनुस्साणं उप्पज्जइ' इत्यादि, निरर्थकत्वाद् ?, उच्यते, इह त्रिधा विनेयाः, तद्यथा-उद्घटितज्ञा मध्यबुद्धयः प्रपञ्चितज्ञाश्च, तत्र ये उद्घटितज्ञा मध्यबुद्धयो वा ते यथोक्तं सामर्थ्य-मवबुध्यन्ते, ये पुनरद्याप्यव्युत्पन्नत्वात् न यथोक्तसामर्थ्यावगमकुशलाः ते प्रपञ्चितमेवाव-गन्तुमीशते ततस्तेषामनुग्रहाय सामर्थ्यलभ्यस्यापि विपक्षनिषधस्याभिधानं, महीयांसो हि परम-करुणापरीतत्वादविशेषेण सर्वेषामनुग्रहाय प्रवर्त्तन्ते, ततो न कश्चिद्दोषः ।

**मू. ( ८२ )** *तं च दुविहं उप्पज्जइ, तंजहा- उज्जुमई य विउलमई य, तं समासओ चउव्विहं पन्नत्तं, तं जहा-दव्वओ खित्तओ कालओ भावओ,*

*तत्थ दव्वओ णं उज्जुमई णं अनंते अनंतपएसिए खंधे जाणइ पासइ ते चेव विउलमई अब्भहियतराए विउलतराए विसुद्धतराए वितिमिरतराए जाणइ पासइ,*

*खेत्तओ णं उज्जुमई अ जहन्नेणं अंगुलस्स असंखेज्जयभागं उक्कोसेणं अहे जाव इमीसे रयणप्पभाए पुढवीए उवरिमहेट्ठिल्ले खुड्डगपयरे उड्ढं जाव जोइसस्स उवरिमतले, तिरियं जाव अंतोमनुस्सखित्ते अड्ढाइज्जेसु दीवसमुद्देसु पन्नरस्सु कम्मभूमिसु तीसाए अकम्मभूमिसु छप्पन्नाए अंतरदीवगेसु सन्निपंचेंदिआणं पज्जत्तयाणं मणोगए भावे जाणइ पासइ, तं चेव विउलमई अड्ढाइज्जेहिमंगुलेहिं अब्भहिअतरं विउलतरं विसुद्धतरं वितिमिरतरागं जाणइ पासइ,*

*भावओ णं उज्जुमई अनंते भावे जाणइ पासइ सव्वभावाणं अनंतभागं जाणइ पासइ, त चेव विउलमइ अब्भहियतरागं विउलतरागं विसुद्धतरागं वितिमिरतरागं जाणइ पासइ-*

**वृ.** तत्र मनःपर्यायज्ञानमृद्धिप्राप्तानामप्रमत्तसंयतानामुत्पद्यमानं द्विधोत्पद्यते, तद्यथा-ऋजुमतिश्च विपुलमतिश्च, तत्र मननंमतिः, संवेदनमित्यर्थः, ऋज्वी-सामान्यग्राहिणी मतिः ऋजुमतिः घटोऽनेन चिन्तित इत्यादिसामान्याकाराध्यवसायनिबन्धनभूता कतिपयपर्यायविशिष्टमनोद्रव्य-परिच्छित्तिरित्यर्थः, उक्तं च भाष्यकृता-

"रिजु सामन्नं तम्मत्तगाहिणी रिजुमई मनोनाणं ।
पायं विसेसविमुहं घटमित्तं चिंतियं मुणइ ॥"

चूर्णिकृदप्याह-"उज्जु नं विसेसविमुहं उवलहई, नाईव बहुविसेसविसिट्ठं अत्थं उवलम-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्ति भणियं होइ, घडोऽणेण चिंतिओत्ति जाणइ'त्ति। चशब्दः स्वगतानेकद्रव्यक्षेत्रादिभेद-सूचकः। तथा विपुला-विशेषग्राहिणी मतिः विपुलमतिः, घटोऽनेन चिन्तितः, स च सौवर्णः पाडलिपुत्रकोऽद्यतनो महान् अपवरकस्थितः फलपिहित इत्याद्यध्यवसायहेतुभूता प्रभूत-विशेषविशिष्टमनोद्रव्यपरिच्छित्तिरित्यर्थः, आह च भाष्यकृत-

"विपुलं वत्थुविसेसणनाणं तग्गाहिणी मई विपुला।
चिंतियमनुसरइ घडं पसंगओ पज्जवसएहिं ॥"

चूर्णिकृदपि आह-"विपुला मई विपुलमई बहुविसेसगाहिणीत्ति भणियं होइ, दिट्ठंतो जहाऽनेन घडो चिंतिओ, तं च देसकालाइअनेगपज्जायविसेसविसिट्ठं जाणइ'त्ति। चशब्दः पूर्ववत्, अस्यां च व्युत्पत्तौ स्वतन्त्रमेव ज्ञानमभिधेयं, यदा पुनस्तद्वानभिधेयो विवक्ष्यते तदेवं व्युत्पत्तिः ऋज्वी-सामान्यग्राहिणी मतिरस्य स ऋजुमतिः, तथा विपुला-विशेषग्राहिणी मतिरस्य स विपुलमतिः।

तत् मनःपर्यायज्ञानं द्विविधमपि 'समासतः' संक्षेपेण चतुर्विधं प्रज्ञप्तं, तद्यथा-द्रव्यतः क्षेत्रतः कालतो भावतश्च,

तत्र द्रव्यतो णमिति वाक्यालङ्कारे ऋजुमतिरनन्तान् अनन्तप्रदेशिकान्-अनन्तपरमाण्वात्मकान् स्कन्धान्-विशिष्टैकपरिणामपरिणतान् अर्द्धतृतीयद्वीपसमुद्रान्तर्वर्तिपर्याप्तसंज्ञिपञ्चेन्द्रियैर्मनस्त्वेन परिणामितान् पुद्गलान् पुद्गलसमूहानित्यर्थः जानाति-साक्षात्कारेणावगच्छति 'पासइ'त्ति इह मनस्त्वपरिणतैः स्कन्धैरालोचितं बाह्यमर्थं घटादिलक्षणं साक्षादध्यक्षतो मनःपर्यायज्ञानी न जानाति, किन्तु मनोद्रव्याणामेव तथारूपपरिणामान्यथानुपपत्तितोऽनुमानतः, आह च भाष्यकृत-"जाणइ वज्झेऽनुमानेनं" इत्थं चैतदङ्गीकर्त्तव्यम्, यतो मूर्त्तद्रव्यालम्बनमेवेदं मनःपर्याय-ज्ञानमिष्यते, मन्तारस्त्वमूर्त्तमपि धर्म्मास्तिकायादिकं मन्यन्ते, ततोऽनुमानत एव चिन्तितमर्थमव-बुध्यन्ते नान्यथेति प्रतिपत्तव्यम्, ततस्तमधिकृत्य पश्यतीत्युच्यते, तत्र मनोनिमित्तस्याचक्षुर्दर्शनस्य सम्भवात्, आह च चूर्णिकृत-"मुणियत्थं पुण पच्चक्खओ न पेक्खइ, जेण मनोदवालंबनं मुत्तमभुत्तं वा, सो य छउमत्थो तं अनुमानओ पेक्खइ, अतो पासणिया भणिया" इति।

अथवा सामान्यत एकरूपेऽपि ज्ञाने क्षयोपशमस्य तत्तद्द्रव्याद्यपेक्ष्य वैचित्र्यसम्भवादनेक-विध उपयोगः सम्भवति, यथाऽत्रैव ऋजुमतिविपुलमतिरूपः, ततो विशिष्टतरमनोद्रव्याकार-परिच्छेदापेक्षया जानातीत्युच्यते, सामान्यमनोरूपद्रव्याकारपरिच्छेदापेक्षया तु पश्यतीति, तथा चाह चूर्णिकृत-"अहवा छउमत्थस्स एगविहखओवसमलंभेऽवि विविहोवओगसंभवो भवइ, जहा एत्थेव ऋजुमइविपुलमईणं उवओगो, अओ विसेससामान्नत्थेसु उवजुज्जइ जाणइ पासइत्ति भणियं न दोसो" इति।

अत्र 'एगविहखओवसमलंभेवि'त्ति सामान्यत एकरूपेऽपि क्षयोपशमलम्भेऽपान्तराले द्रव्याद्यपेक्षया क्षयोपशमस्य विशेषसम्भवाद्विविधोपयोगसम्भवो भवतीति, तदेवं विशिष्टतरमनोद्रव्याकारपरिच्छेदापेक्षया सामान्यरूपमनोद्रव्याकारपरिच्छेदो व्यवहारतो दर्शन-रूप उक्तः, परमार्थतः पुनः सोऽपि ज्ञानमेव, यतः सामान्यरूपमपि मनोद्रव्यकारप्रतिनियतमेव पश्यति, प्रतिनियतविशेषग्रहणात्मकं च ज्ञानं न दर्शनम्, अत एव सूत्रेऽपि दर्शनं चतुर्विधमे-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चोक्तं, न पञ्चविधमपि, मनःपर्यायदर्शनस्य परमार्थतोऽसम्भवादिति।

तथा तानेव मनस्त्वेन परिणामितान् स्कन्धान् विपुलमतिः अभ्यधिकतरान्-अर्द्धतृतीयांगुलप्रमाणभूमिक्षेत्रवर्त्तिभिः स्कन्धैरधिकतरान्, सा चाधिकतरता देशोऽपि भवति ततः सर्वासु दिक्षु अधिकतरताप्रातिपादनार्थमाह-विपुलतरकान्-प्रभूततरकान्, तथा विशुद्धतरान्-निर्मलतरान् ऋजुमत्यपेक्षयाऽतीव स्फुटतरप्रकाशानित्यर्थः, स च स्फुटः प्रतिभासो भ्रान्तोऽपि सम्भवति यथा द्विचन्द्रपतिभासः ततो भ्रान्तताशङ्काव्युदासाय विशेषणान्तमाह-वितिमिरतरकान्-विगतं तिमिरं-तिमिरसम्पाद्यो भ्रमो येषु ते वितिमिराः ततो 'द्वयोः प्रकृष्टे तरबिति'तरप्प्रत्ययः ततः प्राकृतलक्षणात् स्वार्थे कः प्रत्ययः, एवं पूर्वेष्वपि पदेषु यथायोग व्युत्पत्तिर्द्रष्टवा, वितिमिरतरकान्-सर्वथा भ्रमरहितान्, अथवा अभ्यधिकतरकान् विपुलतरकानिति द्वावपि शब्दावेकार्थौ, विशुद्धतरकान् वितिमिरतरकानेतावपि एकार्थौ, नानादेशजा हि विनेया भवन्ति ततः कोऽपि कस्यापि प्रसिद्धो भवति तेषामनुग्रहार्थमेकार्थिकपदोपन्यासः।

तथा क्षेत्रतो णमिति वाक्यालङ्कारे ऋजुमतिरधो यावदस्या रत्नप्रभायाः पृथिव्या उपरितनाधस्तनान् क्षुल्लकप्रतरान्। अथ किमिदं क्षुल्लकप्रतर इति?, उच्यते, इह लोकाकाशप्रदेशा उपरितनाधस्तनदेशरहिततया विवक्षिता मण्डकाकारतया व्यवस्थिताः प्रतरमित्युच्यन्ते, तत्र तिर्यग्लोकस्योर्ध्वाधोऽपेक्षयाऽष्टादशयोजनशतप्रमाणस्य मध्यभागे द्वौ लघुक्षुल्लकप्रतरौ, तयोर्मध्यभागे जम्बूद्वीपे रत्नप्रभाया बहुसमे भूमिभागे मेरुमध्येऽष्टप्रादेशिको रुचकः, तत्र गोस्तनाकाराश्चत्वार उपरितनाः प्रदेशाश्चत्वारश्चाधस्तनाः, एष एव रुचकः सर्वासां दिशां विदिशां वा प्रवर्त्तकः, एतदेव च सकलतिर्यग्लोकमध्यं, तौ च द्वौ सर्वलघू प्रतरावंगुलासङ्ख्येयभागबाहल्याव-लोकसवर्त्तितौ रज्जुप्रमाणौ, तत एतयोरुपर्यन्येऽन्ये प्रतरास्तिर्यगुलासङ्ख्येयभागवृद्धा वर्द्धमानास्ताद्रव्यष्टव्या यावदूर्ध्वलोकमध्यं, तत्र पञ्चरज्जुप्रमाणः प्रतरः, तत उपर्यन्येऽन्ये प्रतरास्तिर्यगंगुलासङ्ख्येयभागहान्या हीयमानास्तावदवसेया यावल्लोकान्ते रज्जुप्रमाणः प्रतरः, इह ऊर्ध्वलोकमध्यवर्त्तिनं सर्वोत्कृष्टं पञ्चरज्जुप्रमाणं प्रतरमवधीकृत्यान्ये उपरितना अधस्तनाश्च क्रमेण हीयमानाः २ सर्वेऽपि क्षुल्लकप्रतरा इति व्यवह्रियन्ते यावल्लोकान्ते तिर्यग्लोको च रज्जुप्रमाणप्रतर इति, तथा तिर्यग्लोकमध्यवर्त्तिसर्वलघुक्षुल्लकप्रतरस्याधस्तिर्यगंगुलासङ्ख्येयभागवृद्धा वर्द्धमानाः २ प्रतरास्तावद्वक्तव्या यावदधोलोकान्ते सर्वोत्कृष्टः सप्तरज्जुप्रमाणः प्रतरः, तं च सप्तरज्जुप्रमाणं प्रतरमपेक्ष्यान्ये उपरितनाः सर्वेऽपि क्रमेण हीयमानाः क्षुल्लकप्रतरा अभिधीयन्ते यावत्तिर्यग्लोकमध्यवर्त्ती सर्वलघुक्षुल्लकप्रतरः, एषा क्षुल्लकप्रतरप्ररूपणा। तत्र तिर्यग्लोकमध्यवर्त्तिनः सर्वलघुरज्जुप्रमाणात् क्षुल्लकप्रतरादारभ्य यावदधो नव योजनशतानि तावदस्यां रत्नप्रभायां पृथिव्यां ये प्रतराः ते उपरितनक्षुल्लकप्रतरा भण्यन्ते, तेपामपि चाधस्ताद्ये प्रतरा यावदधोलौकिकग्रामेषु सर्वान्तिमः प्रतरः तेऽधस्तनक्षुल्लकप्रतराः, तान् यावदधः क्षेत्रत ऋजुमतिः पश्यति, अथवा अधोलोकस्योपरितनभागवर्त्तिनः क्षुल्लकप्रतरा उपरितना उच्यन्ते, ते चाधोलौकिकग्रामवर्त्तिप्रतरादारभ्य तावदवसेया यावत्तिर्यग्लोकस्यान्तिमोऽधस्तनप्रतरः, तथा तिर्यग्लोकस्य मध्यभागादारभ्याधोभागवर्त्तिनः, क्षुल्लकप्रतरा अधस्तना उच्यन्ते, तत उपरितनाश्चाधस्तनाश्च उपरितनाधस्तनाः तान् यावदृजुमतिः पश्यति, अन्ये त्वाहुः-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अधोलोकस्योपरिवर्त्तिन उपरितनाः, ते च सर्वतिर्यग्लोकवर्त्तिनो यदिवा तिर्यग्लोकस्याधो नवयोजनशतवर्त्तिनो द्रष्टव्याः, ततः तेषामेवोपरितानां क्षुल्लकप्रतराणां सम्बन्धिनो ये सर्वान्तिमाधस्तानाः क्षुल्लकप्रतराः तान् यावत्पश्यति, अस्मिंश्च व्याख्याने तिर्यग्लोकं यावत्पश्यतीत्यापद्यते, तच्च न युक्तम्, अधोलौकिकग्रामवर्त्तिसंज्ञिपञ्चन्द्रियमनोद्रव्यापरिच्छेदप्रसङ्गात्, अथवा अधोलोकिकग्रामेष्वपि संज्ञिपञ्चेद्रियमनोद्रव्याणि परिच्छिनत्ति, यत उक्तम्-

"इहाधोलौकिकान् ग्रामान्, तिर्यग्लोकविवर्त्तिनः ।
मनोगतांस्त्वसौ भावान्, वेत्ति तद्वर्त्तिनामपि ॥

तथा-ऊर्ध्वं यावज्ज्योतिश्चक्रस्योपरितलस्तिर्यग् यावदन्तोमनुष्यक्षेत्रे मनुष्यलोकपर्यन्त इत्यर्थः, एतदेव व्याचष्टे-अर्द्धतृतीयेषु द्वीपेषु पञ्चदशसु कर्म्मभूमिषु त्रिंशति चाकर्मभूमिषु षट्पञ्चाशत्सङ्खयेषु चान्तरद्वीपेषु संज्ञिनां, ते चापान्तरालगतावपि तदायुष्कसंवेदनादभिधीयन्ते न च तैरिहाधिकारः ततो विशेषणमाह-पञ्चेन्द्रियाणां, पञ्चेन्द्रियाश्चोपपातक्षेत्रमागता इन्द्रियपर्याप्तिसमाप्तौ मनःपर्याप्ता अपर्याप्ता अपि भवन्ति न च तैः प्रयोजनमतो विशेषणान्तरमाहपर्याप्तानाम्, अथवा संज्ञिनो हेतुवादोपदेशेन विकलेन्द्रिया अपि भण्यन्ते ततस्तद्व्यवच्छेदार्थं पञ्चेन्द्रियग्रहणं, ते चापपर्याप्तका अपि भवन्ति तदध्यवच्छेवार्थं पर्याप्तग्रहणं, तेषां मनोगतान् भावान् जानाति पश्यति, तदेव मनोलब्धिसमन्वितजीवाधारक्षेत्रं विपुलमतिरर्द्धं तृतीयं येषु तान्यर्द्धतृतीयानि अंगुलानि तानि च ज्ञानाधिकारादुच्छ्रयांगुलानि द्रष्टव्यानि, यत उक्तं चूर्णिकृता-"अड्ढाइयंगुलग्गहणमुस्सेहंगुलमाणओ नाणविसयत्तणओ य न दोसो" त्ति, तैरर्द्धतृतीयैरंगुलैरभ्यधिकतरं, तच्चैकदेशमपि भवति तत आह-विपुलतरं-विस्तीर्णतरं, अथवा आयामविष्कम्भाभ्यामभ्यधिकतरं बाहुल्यमाश्रित्य विपुलतरं, तथा विशुद्धतरं वितिमिरतरमिति प्राग्वत्, जानाति पश्यति तात्स्थ्यात्तद्व्यपदेश इति तावत्क्षेत्रगतानि मनोद्रव्याणि जानाति पश्यतीत्यर्थः ।

यावदुक्तस्वरूपमनःपर्यायज्ञानप्रतिपादिका गाथा, तस्या व्याख्या-

*मू. (८३) मनपज्जनाणं पुन जनमनपरिचिंतिअत्थपागडणं ।*
*मानुसखित्तनिबद्धं गुणपच्चइअं चरित्तवओ ॥*

**वृ.** मनःपर्यायज्ञानं-प्राग्निरूपितशब्दार्थं, पुनःशब्दो विशेषणार्थः, स च रूपिविषयत्वक्षायोपशमिकत्वप्रत्यक्षत्वादिसाम्येऽप्यवधिज्ञानादिदं मनःपर्यायज्ञानं स्वाम्यादिभेदादिभन्नमिति विशेषयति, तथाहि-अवधिज्ञानमविरतसम्यग्दृष्टेरपि भवति द्रव्यतोऽशेषरूपिद्रव्यविषयं क्षेत्रतो लोकविषयं कतिपयलोकप्रमाणक्षेत्रापेक्षया अलोकविषयं च कालतोऽतीतानागतासङ्खयेयोत्सर्प्पिणीविषयं भावतोऽशेषेषु रूपिद्रव्येषु प्रतिद्रव्यमसङ्खयेयपर्यायविषयं, मनःपर्यायज्ञानं पुनः संयतस्याप्रमत्तस्यामर्षौध्याद्यन्यतमर्द्धिप्राप्तस्य द्रव्यतः संज्ञिमनोद्रव्यविषयं क्षेत्रतो मनुष्यक्षेत्रगोचरं कालतोऽतीतानागतपल्योपमासङ्खयेयभागविषयं भावतो मनोद्रव्यगतानन्तपर्यायालम्बनं, ततोऽवधिज्ञानाद्भिन्नं, एतदेव लेशतः सूत्रकृदाह-'जनमनः परिचिन्तितार्थप्रकटनं' जायन्ते इति जानेस्तेषां मनांसि जनमनांसि तैः परिचिन्तितश्चासावर्थश्च जनमनःपरिचिन्तितार्थः तं प्रकटयति-प्रकाशयति जनमनः परिचिन्तितार्थप्रकटनं, तथा मानुषक्षेत्रनिबद्धं, न तद्बहिर्व्यवस्थितप्राणिद्रव्यमनोविषयमित्यर्थः, तथा गुणाः-क्षान्त्यादयस्ते प्रत्ययः-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कारणं यस्य तद्गुणप्रत्ययं, चारित्रवतोऽप्रमत्तसंयतस्य।

*मू. (८४) सेत्तं मनपज्जवनाणं॥*

वृ. 'सेत्तं मनपज्जवनाणं' तदेतत् मनःपर्यायज्ञानं॥

*मू. (८५) से किं तं केवलनाणं?, केवलनाणं दुविहं पन्नत्तं, तंजहा- भवत्थकेवलनाणं च सिद्धकेवलनाणं च। से किं तं भवत्थकेवलनाणं?, भवत्थकेवलनाणं दुविहं पन्नत्तं, तंजहा- सजोगिभवत्थकेवलनाणं च अयोगिभवत्थकेवलनाणं च।*

*से किं तं सजोगिभवत्थकेवलनाणं?, सयोगिभवत्थकेवलनाणं दुविहं पन्नत्तं, तंजहा- पढमसमयसयोगिभवत्थकेवलनाणं च अपढमसमवसजोगिभवत्थकेवलनाणं च, अहवा चरमसमयसयोगिभवत्थकेवलनाणं च अचरमसमयसजोगिभवत्थकेवलनाणं च, से तं सजोगी भवत्थकेवलनाणं।*

*से किं तं अयोगिभवत्थकेवलनाणं?, अयोगिभवत्थकेवलनाणं दुविहं पन्नत्तं, तंजहा- पढमसमयअयोगिभवत्थकेवलनाणं च अपढमसमयअजोगिभवत्थकेवलनाणं च, अहवा चरमसमयअजोगिभवत्थकेवलनाणं च अचरमसमयअजोगिभवत्थकेवलनाणं च, से तं अजोगिभवत्थकेवलनाणं।*

वृ. अथ किं तत्केवलज्ञानं?, सूरिराह-केवलज्ञानं द्विविधं प्रज्ञप्तम्, तद्यथा-भवस्थकेवलज्ञानं च सिद्धकेवलज्ञानं च, भवन्ति कर्म्मवशवर्त्तिनः प्राणिनोऽस्मान्निति भवो-नारकादिजन्म, तत्रेह भवो मनुष्यभव एव ग्राह्योऽन्यत्र केवलोत्पादाभावात्, भवे तिष्ठन्तीति भवस्थाः 'स्थादिभ्यः क' इति कः प्रत्ययः तस्य केवलज्ञानं, चशब्दः स्वगतानेकभेदसूचकः, तथा 'षिधू संराद्धौ' सिध्यति स्म सिद्धः-यो येन गुणेन परिनिष्ठितो न पुनः साधनीयः स सिद्ध उच्यते, यथा सिद्ध ओदनः, स च कर्मसिद्धादिभेदादनेकविधः, उक्तं च-

"कम्मे सिप्पे य विज्जाए, मंते जोगे स आगमे।
अत्थजत्ताअभिप्पाए, तवे कम्मक्खए इअ॥

अत्र कर्म्मक्षयसिद्धेनाधिकारोऽन्यस्य केवलज्ञानासम्भवाद्, अथवा सितं-बद्धं ध्यातं-भस्मीकृतमष्टप्रकारं कर्म्म येन स सिद्धः पृषोदरादय इति रूपसिद्धिः, सकलकर्म्मविनिर्मुक्तो मुक्तावस्थामुपागत इत्यर्थः, तस्य केवलज्ञानं सिद्धकेवलज्ञानं, अत्रापि चशब्दः स्वगतानेक-भेदसूचकः। अथ किं तद्भवस्थकेवलज्ञानं?, भवस्थकेवलज्ञानं द्विविधं प्रज्ञप्तम्, तद्यथा-सयोगिभवस्थकेवलज्ञानं च अयोगिभवस्थकेवलज्ञानं च, तत्र योजनं योगो-व्यापारः, उक्तं च-'कायवाङ्मनःकर्म योगः, इह औदारिकादिशरीरयुक्तस्यात्मनो वीर्यपरिणतिविशेषः काययोगः, औदारिकवैक्रियाहारकव्यापाराहृतवाग्द्रव्यसमूहसाचिव्याज्जीवव्यापारो वाग्योगः, उक्तं च-

"अहवा तनुजोगाहियवयदवसमूहजीववावारो।
सो वयजोगो भन्नइ वाया निसिरिज्जए तेणं॥"

तथा औदारिकवैक्रियाहारकशीरव्यापाराहृतमनोद्रव्यसाचिव्याज्जीवव्यापारो मनोयोगः उक्तं

"तह तनुवावाराहियमणदवसमूहजीववावारो।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सो मनजोगो भण्णइ मन्नइ नेयं जओ तेणं ॥"

ततः सह योगेन वर्त्तन्ते ये ते सयोगाः योगाः-मनोवाक्कायाः ते यथासम्भवमस्य विद्यन्ते इति सयोगी, सयोगी चासौ भवस्थश्च सयोगिभवस्थस्तस्य केवलज्ञानं सयोगिभवस्थकेवलज्ञानं। तथा योगा अस्य विद्यन्ते इति योगी न योगी अयोगी अयोगी चासौ भवस्थश्च अयोगिभवस्थः, शैलेश्यवस्थामुपागत इत्यर्थः, तस्य केवलज्ञानमयोगिभवस्थकेवलज्ञानं ॥

अथ किं तत् सयोगिभवस्थकेवलज्ञानं ?, सयोगिभवस्थकेवलज्ञानं द्विविधं प्रज्ञप्तं, तद्यथा-प्रथसमयसयोगिभवस्थकेवलज्ञानम् अप्रथमसमयसयोगिवभवस्थकेवलज्ञानं च, तत्रेह प्रथम-समयः केवलज्ञानोत्पत्तिसमयः, अप्रथमसमयः केवलोत्पत्तिसमयादूर्द्ध्वं द्वितीयादिकः सर्वोऽपि समयो यावत्सयोगित्वचरमसमयः। अथवेति प्रकारान्तरे, एष एवार्थः समयविकल्पनेनान्यथा प्रतिपाद्यते इत्यर्थः, 'चरमसमये'त्वादि, तत्र चरमसमयः-सयोग्यवस्थान्तिमसयमः, न चरम-समयः अचरमसमयः-सयोग्यवस्थाचरमसमयादर्वाक्तनः सर्वोऽप्याकेवलप्राप्तेः। 'से त्तमि'-त्यादि निगमनं सुगमं।

अथ किं तद् अयोगिभवस्थकेवलज्ञानं ?, अयोगिभवस्थकेवलज्ञानं द्विविधं प्रज्ञप्तं, तद्यथा-प्रथमसमयायोगिभवस्थकेवलज्ञानं अप्रथमसमयायोगिभवस्थकेवलज्ञानं च, अत्र प्रथम-समयोऽयोगित्वोत्पत्तिसमयो वेदितव्यः, शैलेश्यवस्थाप्रतिपत्तिसमय इत्यर्थः, प्रथमसमयादन्यः सर्वोऽप्यप्रथमसमयो यावच्छैलेश्यवस्थाचरमसमयः। अथवेति प्रकान्तरे 'चरमसमये'त्यादि, इह चरमसमयः शैलेश्यवस्थान्तिमसमयः, चरमसमयादन्यः सर्वोऽप्यचरमसमयो यावच्छैलेश्य-वस्थाप्रथमसमयः 'सेत्तं अयोगिभवत्थकेवलज्ञाणं' तदेतदयोगिभवस्थकेवलज्ञानम्।

*मू. (८६) से किं तं सिद्धकेवलनाणं ?, सिद्धकेवलनाणं दुविहं पन्नत्तं, तंजहा-अनंतरसिद्धकेवलनाणं च परंपरसिद्धकेवलनाणं च।*

वृ. अथ किं तत्सिद्धकेवलज्ञानं ?, सिद्धकेवलज्ञानं द्विविधं प्रज्ञप्तम्, तद्यथा-अनन्तरसिद्ध-केवलज्ञानं च परम्परसिद्धकेवलज्ञानं च, तत्र न विद्यते अन्तरं-समयेन व्यधानं यस्य सोऽनन्तरः स चासौ सिद्धश्चानन्तरसिद्धः, सिद्धत्वप्रथमसमये वर्त्तमान इत्यर्थः, तस्य केवलज्ञानमनन्तरसिद्ध-केवलज्ञानं, चशब्दः स्वगतानेकभेदसूचकः, तथा विवक्षिते प्रथमसमये यः सिद्धः तस्य यो द्वितीयसमयसिद्धः स परः तस्यापि यः तृतीयसमयसिद्धः स परः एवमन्येऽपि वाच्याः परे च परे चेति वीप्सायां पृषोदरादय इति परम्परशब्दनिष्पत्तिः परम्परे च ते सिद्धाश्च परम्परसिद्धाः, विवक्षितसिद्धत्वप्रथमसमयात्प्राक् द्वितीयादिषु समयेष्वनन्ता अतीताद्धां यावद्वर्त्तमाना इत्यर्थः, तेषां केवलज्ञानं परम्परसिद्धकेवलज्ञानम्, अत्रापि चशब्दः स्वगतानेकभेदसूचकः। इहानन्तरसिद्धाः सत्पद प्ररूपणा १ द्रव्यप्रमाण २ क्षेत्र ३ स्पर्शना ४ कला ५ ऽन्तर ६ भावा ७ ल्पबहुत्व ८ रूपैरष्टभिरनुयोगद्वारैः परम्परसिद्धाः सत्पदप्ररूपणाद्रव्यप्रमाणक्षेत्रस्पर्शना-कालान्तरभावाल्पबहुत्वसन्निकर्षरूपैर्नवभिरनुयोगद्वारैः क्षेत्रादिषु पञ्चदशसु द्वारेषु सिद्धप्राभृते चिन्तिताः ततस्तदनुसारेण वयमपि विनेयजनानुग्रहार्थं लेशतश्चिन्तयामः।

क्षेत्रादीनि च पञ्चदश द्वाराण्यमूनि-

"खेत्ते १ काले २ गइ ३ वेय ४ तित्थ ५ लिंगे ६ चरित्त ७ बुद्धे ८ य।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नाणा ९ गाहु १० क्कस्से ११ अंतर १२ मनुसमय १३ गणण १४ अप्पबहू १५ ॥"

तत्र प्रथमत एषु द्वारेषु सत्पदप्ररूपणया अनन्तरसिद्धाश्चिन्त्यन्ते, क्षेत्रद्वारे त्रिविधेऽपि लोके सिद्धाः प्राप्यन्ते, तद्यथा-ऊर्ध्वलोके अधोलोके तिर्यग्लोक च, तत्रोर्ध्वलोके पाण्डुकवनादौ अधोलोके अधोलौकिकेषु ग्रामेषु, तिर्यग्लोके मनुष्यक्षेत्रे, तत्रापि निर्व्याघातेन पञ्चदशसु कर्म्मभूमिषु, व्याघातेन समुद्रनदीवर्षधरपर्वतादावपि, व्याघातो नाम संहरणं, उक्तं च-

"दीवसमुद्देह्वाइज्जएसु वाधाय खेत्तओ सिद्धा।
निव्वाघाएण पुणो पनरससुं कम्मभूमीसुं ॥"

तीर्थकृतः पुनरधोलोके तिर्यग्लोके वा, तत्राधोलोकेऽधोलौकिकेषु ग्रामेषु तिर्यग्लोके पञ्चदशसु कर्म्मभूमिषु, न शेषेषु स्थानेषु, शेषेषु हि स्थानेषु संहरणतः तृतीयचतुर्थारकयोः, सिद्धिगमनं तु केषाञ्चित् पञ्चतेऽप्यरके यथा जम्बूस्वामिनः, उत्सर्प्पिण्यां जन्म चरमशरीरिणां दुष्षमादिषु द्वितीयतृतीयचतुर्थारकेषु, सिद्धिगमनं तु तृतीयचतुर्थयोरेव, उक्तं च-

"दोसुवि समासु जाया सिज्झंतोस्सप्पिणीए कालतिगे।
तीसु य जाया ओसप्पिणीएँ सिज्झंति कालदुगे ॥"

महाविदेहेषु पुनः कालः सर्वदैव सुषमदुष्षमाप्रतिरूपः, ततस्तद्वक्तव्यताभणनेनैव तत्र वक्तव्य भणिता द्रष्टव्या, संहरणमधिकृत्य पुनरुत्सर्प्पिण्याभवसर्प्पिण्यां च षट्स्वप्यरकेषु सिध्यन्तो द्रष्टव्यः, तीर्थकृतां पुनरवसर्प्पिण्यामुत्सर्प्पिण्यां च जन्म सिद्धिगमनं च सुषमदुष्षमादुष्षमसुषमारूपयोरेवारकयोर्वेदितव्यं, न शेषेष्वरकेषु, तथाहि-भगवान् ऋषभस्वामी सुषमदुष्षमारकपर्यन्ते समुदपादि, एकोननवतिपक्षेषु शेषेषु सिद्धिमगमत्, वर्द्धमानस्वामी तु दुष्षमसुषमारकपर्यन्तेषु एकोननवतिपक्षेषु शेषेषु मुक्तिसौधमध्यमध्यास्त, तथा चोक्तम्-

"समणे भगवं महावीरे तीसं वासाइं अगारवासमज्झे वसित्ता साइरेगाइं दुवालस संवच्छराइं छउमत्थपरियागं पाउणित्ता बायालीसं वासाइं सामन्नपरियागं पाउणित्ता बावत्तरिं वासाणि सव्वाउयं पालइत्ता खीणे वेयणिज्जआउयनामगोए दूसमसुसमाए बहुविइक्कंताए तिहिं वासेहिं अद्धनवमेहि य मासेहिं सेसेहिं पावाए मज्झिमाए जाव सव्वदुक्खप्पहीणे"

उत्सर्प्पिण्यामपि च प्रथमतीर्थकरो दुष्षमसुषमायामेकोननवतिपक्षेषु व्यतिक्रान्तेषु जायते, यतो भगवद्वर्द्धमानस्वामिसिद्धिगमनस्य भविष्यन्महापद्मतीर्थकरोत्पादस्य चान्तरं चतुरशीतवर्षसहस्राणि सप्त वर्षाणि पञ्च(च) मासाः पठ्यन्ते, तथा चोक्तम्-

"चुलसीइवाससहसा वासा सत्तेव पंच मासा य।
वीरमहापउमाणं अंतरमेयं जिनुद्दिट्ठं ॥"

तत उत्सर्प्पिण्यामपि प्रथमतीर्थङ्करो यथोक्ताकालमान एव जायते, तथा उत्सर्प्पिण्यां चतुर्विंशतितमः तिर्थकरः सुषमदुष्षमायामेकोननवतिपक्षेषु व्यतिक्रान्तेषु जन्मासादयति, एकोननवतिपक्षाधिकचतुरशीतिपूर्वलक्षातिक्रमे च सिध्यति, तत उत्सर्प्पिण्यामवसर्प्पिण्यां वा दुष्षमसुषमासुषमदुष्षमयोरेव तीर्थकृतां जन्म निवार्णं चेति २।

गतिद्वारे प्रत्युत्पन्ननयमधिकृत्य मनुष्यगतावेव सिध्यन्तः प्राप्यन्ते, न शेषासु गतिषु, पाश्चात्यमनन्तरं भवमधिकृत्य पुनः सामान्यतश्चतसृभ्योऽपि गतिभ्य आगताः सिध्यन्ति, विशेषचिन्तायां

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुनश्चतसृभ्यो नरकपृथिवीभ्यो, न शेषाभ्य: तिर्यग्गते: पृथिव्यम्बुवनस्पतिपञ्चेन्द्रियेभ्यो न शेषेभ्य:, मनुष्यगते: स्त्रीभ्य: पुरुषेभ्यो वा, देवगतेश्चतुर्भ्यो देवनिकायेभ्य:,

तथा चाह भगवानार्यश्याम: -

"नेरइया णं भंते ! अनंतरागया अंतकिरियं करेंति परंपरागया अंतकिरिअं करेंति ?, गोअमा ! अणंतरागयावि अंतकिरिअं करेंति परंपरागयावि अंतकिरियं करेंति, एवं रयणप्पभापुढविनेरइयावि जाव पंकप्पभापुढविनेरइया, धूमप्पभापुढविनेरइयाणं पुच्छा, नो अणंतरागया अंतकिरिअं करेंति, परंपरागया अंतकिरियं करेंति, एवं जाव अहे सत्तमपुढविनेर-इया। असुरकुमारा जाव थणियकुमारा। पुढविआउवणस्सइकाइया अनंतरागयावि अंतकिरियं करेंति, परंपरागयावि अंतकिरियं करेंति, तेउवाउबेइंदिय तेइंदियचउरिंदिया नो अनंतरागया अंतकिरियं करेंति परंपरागया अंतकिरियं करेंति, सेसा अनंतरागयावि अंतकिरियं करेंति परंपरागयावि," तीर्थकृत: पुनर्देवगतेर्नरकगतेर्वाऽनन्तरागता: सिध्यन्ति, न शेषगते:, तत्रापि नरकगते: तिसृभ्यो नरक-पृथिवीभ्यो, न शेषेभ्य:, देवगतेर्वैमानिकदेवनिकायेभ्यो, न शेषनिकायेभ्य:,

तथा चाह भगवानार्यश्याम: -

"रयणप्पभापुढविनेरइया णं भंते ! रयणप्पभापुढविनेरइएहंतो अनंतरं उव्वट्टित्ता तित्थयरत्तं लभेज्जा ?, गोयमा ! अत्थेगइए लभेज्जा अत्थेगइए नो लभेज्जा, से केणट्ठेणं भंते ! एवं वुच्चइ अत्थेगइए लभेज्जा अत्थेगइए नो लभेज्जा ?, गोअमा ! जस्स रयणप्पभापुढविनेरइस्स तित्थयरनामगोत्ताइं कम्माइं बद्धाइं पुट्ठाइं कडाइं निबद्धाइं अभिनिवट्टाइं अभिसमन्नागयाइं उइन्नाइं नो उवसंताइं भवंति से णं रयणप्पभापुढविनेरइए रयणप्पभापुढविनेरइएहिंतो उवट्टित्ता तित्थयरत्तं लभेज्जा, जस्स णं रयणप्पभापुढविनेरइयस्स तित्थयरनामगोत्ताइं कम्माइं नो बद्धाइं जाव नो उइन्नाइं उवसंताइं भवंति से णं रयणप्पहापुढविनेरइए रयणप्पभापुढविनेरइएहिंतो उव्वट्टित्ता तित्थयरत्तं नो लभेज्जा, से एएणट्ठेणं गोयमा ! एवं वुच्चइ-अत्थेगइए लभेज्जा अत्थेगइए नो लभेज्जा। एवं जाव वालुयप्पभापुढविनेरइएहिंतो तित्थयरत्तं लभेज्जा। पंकप्पभापुढविनेरइया णं भंते ! पंकप्पभापुढविनेरइएहिंतो अनंतरं उव्वट्टित्ता तित्थयरत्तं लभेज्जा ?, गोअमा !, नो इणट्ठे समट्ठे अंतकिरियं पुण करेज्जा। धूमप्पभापुढविनेरइए णं पृच्छा, गोअमा ! नो इणट्ठे समट्ठे, विरइं पुण लभेज्जा, तमापुढविपुच्छा, गोयमा ! नो इणट्ठे समट्ठे, विरयाविरइं लभेज्जा, अहे सत्तमाए पुच्छा, गोयमा ! नो इणट्ठे समट्ठे, संमत्तं पुण लभेज्जा। असुरकुमाराणं पुच्छा, गोयमा ! नो इणट्ठे समट्ठे, अंतकिरियं पुणो करेज्जा, एवं निरंतरं जाव आउक्काइया, तेउ-काइए णं भते ! तेउकाइएहिंतो अनंतरं उव्वट्टित्ता तित्थयरत्तं लभेज्जा ?, गायमा ! नो इणट्ठे समट्ठे, केवलिपन्नत्तं धम्मं लभेज्जा सवणयाए, एवं वाउकाइएवि, वणस्सइकाइए णं पुच्छा, गोअमा ! नो इणट्ठे समट्ठे, अंतकिरियं पुण करेज्जा। बेइंदियतेइंदियचउरिंदियाणं पुच्छा, गोअमा ! नो इणट्ठे समट्ठे मनपज्जवनाणं पुण उप्पाडेज्जा। पंचिंदियतिरिक्खजोणियमणुस्सवाणमंतरजोइसिएसु पुच्छा, गोयमा ! नो इणट्ठे समट्ठे, अंतकिरियं पुण करेज्जा। सोहम्मगदेवे णं भंते ! अनंतरं चइत्ता तित्थयरत्तं लभेज्जा ?, गोअमा ! अत्थेगइए लभेज्जा अत्थेगइए नो लभेज्जा, एवं जहा रयणप्पभापुढविनेरइयस्स एवं जाव सव्वट्ठगदेवे" ३,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वेदद्वारे प्रत्युत्पन्नयमधिकृत्यापगतवेद एव सिध्यति, तद्भवानुभूतपूर्ववेदापेक्षया तु सर्वेष्वपि वेदेषु, उक्तं च-

"अवगयवेओ सिज्झइ पच्चुप्पन्नं नयं पडुच्चा उ।
सव्वेहिवि वेएहिं सिज्झइ समईयनयवाया ॥"

तीर्थकृतः पुनः स्त्रीवेदे पुरुषवेदे वा, न नपुंसकवेदे ४, तथा तीर्थद्वारे तीर्थकरतीर्थे तीर्थकरीतीर्थे च अतीर्थे च सिध्यन्ति। ५

लिङ्गद्वारे अन्यलिङ्गे गृहलिङ्गे स्वलिङ्गे वा, एतच्च सर्वं द्रव्यलिङ्गापेक्षया द्रष्टव्यं, संयमरूपभावलिङ्गापेक्षया तु स्वलिङ्ग एव, उक्तं च-

"लिंगेन अन्नलिंगे गिहत्थलिंगे तहेव य सलिङ्गे।
सव्वेहिं दव्वलिङ्गे भावेन सलिंग संजमओ ॥" ६,

चारित्रद्वारे प्रत्युत्पन्ननयापेक्षया यथाख्यातचारित्रे, तद्भानुभूतपूर्वचरणापेक्षया तु केचित्सामायिकसूक्ष्मसम्परायययथाख्यातचारित्रिणः केचित्सामायिकच्छेदोपस्थापनसूक्ष्मसम्पराययथाख्यातचारित्रिणः, केचित् सामायिकपरिहारविशुद्धिकसूक्ष्मसंपराययथाख्यातचारित्रिणः केचित्सामायिकच्छेदोपस्थापनपरिहारविशुद्धिसूक्ष्मसम्पराययथाख्यातचारित्रिणः, उक्तं च-

"चरणंमि अहक्खाए पच्चुप्पन्नेण सिज्झइ नएणं।
पुव्वानंतरचरणे तिचउक्कगपंचगगमेणं ॥"

तीर्थकृतः पुनः सामायिकसूक्ष्मसम्पराययथाख्यातचारित्रिण एव,

बुद्धद्वारे प्रत्येकबुद्धाः स्वयम्बुद्धा बुद्धबोधिता बुद्धीबोधिता वा सिध्यनत् ८,

ज्ञानद्वारे प्रत्युत्पन्ननयमपेक्ष्य केवलज्ञाने, तद्भवानुभूतपूर्वानन्तरज्ञानापेक्षया तु केचिन्मतिश्रुतज्ञानिनः केचिन्मतिश्रुतावधिज्ञानिनः केचिन्मतिश्रुतमनःपर्यायज्ञानिनः केचिन्मतिश्रुतावधिमनःपर्यायज्ञानिनः, तीर्थकृतस्तु मतिश्रुतवधिमनःपर्यायज्ञानिन एव ९,

अवगाहनाद्वारे जघन्यायामपि अवगाहनायां सिध्यन्ति उत्कृष्टानां मध्यमायां च, तत्र द्विहस्तप्रमाणा जघन्या, पञ्चविंशत्यधिकपञ्चधनुःशतप्रमाणा उत्कृष्टा, सा च मरुदेवीकालवर्त्तिनामवसेया, मरुदेव्यप्यादेशान्तरेण नाभिकुलकरतुल्या, तदुक्तं सिद्धप्राभृतटीकायां- 'मरुदेवीवि आएसन्तरेण नाभितुल्ल' त्ति, तत आदेशान्तरापेक्षया मरुदेव्यामपि यथोक्तप्रमाणावगाहना द्रष्टव्या, उक्तं च-

"उग्गाहणा जहन्ना रयणिदुगं अह पुणो उ उक्कोसा।
पंचेव धनुसयाइं धनुहपुहुत्तेण अहियाइं ॥"

अत्र पृथक्त्वशब्दो बहुत्ववाची बहुत्वं चेह पञ्चविंशतिरूपं द्रष्टव्यं, सिद्धप्राभृतटीकायां तथाव्याख्यानात्, तेन पञ्चविंशत्यधीकानीत्यवसेयं, शेषा त्वजघन्योत्कृष्टावगाहना, तीर्थकृतां तु जघन्यावगाहना सप्तहस्तप्रमाणा उत्कृष्टा पञ्चधनुःशतमाना शेषा त्वजघन्योत्कृष्टा १०,

उत्कृष्टद्वारे सम्यक्त्वपरिभ्रष्टा उत्कर्षतः कियता कालेन सिध्यन्ति ?, उच्यते, देशोनापार्द्धपुद्गलपरावर्त्तसंसारातिक्रमे, अनुत्कर्षतस्तु केचित्सङ्ख्येयकालातिक्रमे, केचिदसङ्ख्येयकालातिक्रमे केचिदनन्तेन कालेन ११,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अन्तरद्वारे जघन्यत एकसमयोऽन्तरं उत्कर्षतः षण्मासाः १२,

निरन्तरद्वारे जघन्यतो द्वौ समयौ निरन्तरं सिध्यन्तः प्राप्यन्त उत्कर्षतोऽष्टौ समयान् १३,

गणनाद्वारे जघन्यत एकस्मिन् समये एकः सिध्यति, उत्कर्षतोऽष्टाधिकं शतं, तथा चास्मिन् भरतक्षेत्रेऽस्यामवसर्प्पिण्यां भगवतः श्रीनाभेयस्य निर्वाणसमये श्रूयतेऽष्टोत्तरं शतमेकसमयेन सिद्धं, तथा चोक्तं सङ्घदासगणिना वसुदेवचरिते–'भयवं च उसभसामी जयगुरू, पुव्वसयसहस्सं वाससहस्सूणयं विहरिऊणं केवली अट्ठावयपव्वए सह दसहिं समणसहस्सेहिं परिनिव्वाणमु–वगते चोद्दसणं भत्तेणं माघबहुले पक्खे तेरसीए अभीइणा नक्खत्तेणं एगूनपुत्तसएणं अट्ठहि य नत्तुएहिं सह एगसमएणं निव्वुओ, सेसाणवि अनगाराणं दस सहस्साणि अट्ठसयऊणगाणि सिद्धाणि, तंमि चेव रिक्खे समयंतरेसु बहूसु" इति १४,

अल्पबहुत्वद्वारे युगपद् द्वित्रादिकाः सिद्धाः स्तोकाः, एककाः सिद्धाः सङ्ख्येयगुणाः, उक्तं

"संखाए जहन्नेणं एक्को उक्कोसएण अट्ठसयं।
सिद्धाणेगा थोवा एगगसिद्धाउ संखगुणा॥ १५"

तदेवं कृत्वा पञ्चदशस्वपिद्वारेषु सत्पदप्ररूपणा, सम्प्रति द्रव्यप्रमाणमभिधीयते–तत्र क्षेत्रद्वारे ऊर्ध्वलोके युगपदेकसमयेन चत्वारः, सिध्यन्ति द्वौ समुद्रे चत्वारः सामान्यतो जलमध्ये तिर्यग्लोकेऽष्टशतं विशंतिपृथक्त्वमधोलोके, उक्तं च–

"चत्तारि उड्ढलोए जले चउक्कं दुवे समुद्दंमि।
अट्ठसयं तिरियलोए वीसपुहुत्तं अहोलोए॥"

तथा नन्दनवने चत्वारः, 'नंदने चत्तारीति वचनात्, एकतमस्मिंस्तु विजये विंशतिः, उक्तं च सिद्धप्राभृतटीकायां–"वीसा एगयरे विजये" तथा सर्वास्वप्यकर्मभूमिषु प्रत्येकं संहरणतो दश २, पण्डकवने द्वौ, पञ्चदशस्वपि कर्मभूमिषु प्रत्येकमष्टशतं, उक्तं च–

"संकामणाए दसगं दो चेव हवंति पंडगवनंमि।
समएण य अट्ठसयं पन्नरससु कम्मभूमिषु॥"

कालद्वारे उत्सर्प्पिण्यामवसर्प्पिण्यां च प्रत्येक तृतीये चतुर्थे चारकेऽष्टशतं, अवसर्प्पिण्यां पञ्चमारके विंशतिः, शेषेष्वरकेषु प्रत्येकमुत्सर्प्पिण्यामवसर्प्पिण्यां च संहरणतो दश २, तथा चोक्तं सिद्धप्राभृतटीकायां–"सेसेसुं अरएसु दस सिज्झंति, दोसुवि उस्सप्पिणीओसप्पिणीसु संहरणतो।" सिद्धप्राभृतसूत्रेऽप्युक्तम्–

"उस्सप्पिणीओसप्पिणीतइयचउत्थयसमासु अट्ठसयं।
पंचमियाए वीसं दसगं दसगं च सेसेसु॥"

गतिद्वारे–देवगतेरागतामष्टशतं, शेषगतिभ्य आगताः प्रत्येकं दश २, उक्तं च सिद्धप्राभृते–'सेसाण गई दसदसगं' भगवांस्त्वार्यश्यामः पुनरेवमाह–नरकगतेरागता दश, तत्रापि विशेष–चिन्तायां रत्नप्रभापृथिव्याः शर्कराप्रभाया वालुकाप्रभायाश्च पृथिव्या आगताः प्रत्येकं दश २, पङ्कप्रभायाः पृथिव्या आगताश्चत्वारः, तथा तिर्यग्गतेरागताः सामान्यतो दश, विशेषचिन्तानां पुनः पृथिवीकायेभ्योऽप्कायेभ्यश्चागताः प्रत्येकं चत्वारश्चत्वारः, वनस्पतिकायेभ्य आगताः



Jain Education International For Private & Personal Use Only www.jainelibrary.org

पट् पञ्चेन्द्रियस्तिर्यग्योनिपुरुषेभ्य आगता दश, पञ्चेन्द्रियतिर्यग्योनिस्त्रीभ्योऽप्यागता दश, तथा सामान्यतो मनुष्यगतेरागता विंशतिः, विशेपचिन्तायां मनुष्यपुरुषेभ्य आगता दश मनुष्य-स्त्रीभ्य आगता विंशतिः, तथा सामान्यतो देवगतेरागता अष्टशतं, विशेपचिन्तायामसुरकुमारेभ्यो नागकुमारेभ्यो यावत् स्तनितकुमारेभ्यः प्रत्येकमागता दश २ असुरकुमारीभ्यः प्रत्येकमागताः पञ्च पञ्च व्यन्तरदेवेभ्य आगता दश व्यन्तरीभ्य आगताः पञ्च ज्योतिष्कदेवेभ्य आगता दश ज्योतिष्कदेवीभ्य आगता विंशतिः वैमानिकदेवेभ्य आगता अष्टशतं, वैमानिकदेवीभ्य आगता विंशतिः, तथा च प्रज्ञापनाग्रन्थः-

"अनंतरागया णं भंते ! नेरइया एगसमएणं केवइया अंतकिरिअं पकरेंति ?, गोअमा !, जहन्नेणं एक्को वा दो वा तिन्नि वा उक्कोसेणं दस, रयणप्पभापुढविनेरइयावि एवं चेव, जाव वालुयप्पभापुढविनेरइया, अनंतरागया णं भंते ! पंकप्पभापुढविनेरइया एगसमयेणं केवइया अंतकिरिअं पकरेंति ?, गोअमा !, जहन्नेणं एक्को वा दो वा तिन्नि वा उक्कोसेणं चत्तारि, अनंतरागया णं भंते ! असुरकुमारा एगसमए णं केवइया अंतकिरिअं पकरेंति ?, गोअमा ! जहन्नेणं एक्को वा दो वा तिन्नि वा, उक्कोसेणं दस, अनंतरागयाणं भंते ! असुरकुमारीओ एगसमएणं केवइयाओ अंतकिरियं पकरेंति ?, गोअमा ! जहन्नेणं एक्को वा दो वा तिन्नि वा उक्कोसेणं पंच, एवं जहा असुरकुमारा सदेवीया तहा जाव थणियकुमारा, अनंतरागया णं भंते ! पुढविकाइया एगसमएणं केवइया अंतकिरिअं पकरेंति ?, गोअमा ! जहन्नेणं इक्को वा दो वा तिन्नि वा उक्कोसेणं चत्तारि, एवं आउक्काइयावि, वणस्सइकाइया पंचेदियतिरिक्खजोणिया दस, पंचेदियतिरिक्खजोणिणीओवि दस, मणुस्सा दस, मणुस्सीओ वीसं, वाणमंतरा दस, वाणमंत-रीओ पञ्च, जोइसिया दस, जोइसिणीओ वीसं, वेमाणिया अट्ठसयं, वेमाणिणीओ वीस" मिति तत्त्वं पुनः केवलिनो बहुश्रुता वा विदन्ति । वेदद्वारे-पुरुषाणामष्टशतं, स्त्रीणां विंशतिः, दश नपुंसकाः, उक्तं च-

"अट्ठसयं पुरिसाणं वीसं इत्थीण दस नपुंसाणं" तथा इह पुरुषेभ्य उद्धृता जीवाः केचित्पुरुषा एव जायन्ते केचित् स्त्रियः केचिन्नपुंसकाः, एवं स्त्रिभ्योऽप्युद्धृतानां भङ्गत्रयं, एवं नपुंसके-भ्योऽपि, सर्वसङ्ख्यया भङ्गा नव, तत्र ये पुरुषेभ्य उद्धृताः पुरुषा एव जायन्ते तेषामष्टशतं, शेषेषु चाष्टसु भङ्गेषु दश २, तथा चोक्तं सिद्धप्राभृते-

'सेसा उ अट्ठ भंगा दसगं २ तु होइ एक्केक्कं' तीर्थद्वारे-तीर्थकृतो युगपदेकसमयेन उत्कर्ष-तश्चत्वारः सिध्यन्ति, दश प्रत्येकबुद्धाश्चत्वारः स्वयम्बुद्धा, अष्टशतमतीर्थकृतां, विंशतिः स्त्रीणां, द्वे तीर्थकर्यौ ।

लिङ्ग द्वारे-गृहिलिङ्गे चत्वारः, अन्यलिङ्गे दश, स्वलिङ्गे अष्टशतं, उक्तं च-'चउरो दस अट्ठसयं गिहन्नलिंगे सलिंगे य ।

चारित्रद्वारे सामायिकसूक्ष्मसम्परायथाख्यातचारिताणां सामायिकच्छेदोपस्थापनसूक्ष्म-सम्परायथाख्यातचारित्राणां च प्रत्येकमष्टशतं, सामायिकपरिहारविशुद्धिकसूक्ष्मसम्पराय-यथाख्यातचारित्रिणां समायिकच्छेदोपस्थापनपरिहारविशुद्धसूक्ष्मसम्परायथाख्यातचारित्रिणा च दशकं २, उक्तं च-

"पच्छाकडं चरित्तं तिगं चउक्कं च तेसिमट्ठसयं ।
परिहारिएहिं सहिए दसगं दसगं च पंचगडे ॥"

बुद्धद्वारेप्रत्येकबुद्धानां दशकं, बुद्धबोधितानां पुरुषाणामष्टशतं, बुद्धबोधितानां स्त्रीणां विंशतिः, नपुंसकानां दशकं, बुद्धीभिर्बोधितानां स्त्रीणां विंशतिः, बुद्धिभिर्बोधितानामेव सामान्यतः पुरुषादीनां विंशतिपृथक्त्वं, उक्तं च सिद्धप्राभृतटीकायां- 'बुद्धीहिं चेव बोहियाण पुरिसाईणं सामन्नेण वीसपुहुत्तं सिज्झइ' त्ति, बुद्धी च मल्लिस्वामिनीप्रभृतिका तीर्थकरी सामान्यसाध्व्यादिका वा वेदितव्या, यतः सिद्धप्राभृतटीकायामेवोक्तं- बुद्धीओवि मल्लीपमुहो अन्नाओ य सामन्नसाहुणीपमुहाओ बोहंतित्ति"

ज्ञानद्वारे- पूर्वभावमपेक्ष्य मतिश्रुतज्ञानिनो युगपदेकसमयेनोत्कर्षतश्चत्वारः सिध्यन्ति, मतिश्रुतमनःपर्यायज्ञानिनो दश, मतिश्रुतावधिज्ञानिनां मतिश्रुतावधिनःपर्यायज्ञानिनां वा अष्टशतं ।

अवगाहनाद्वारे- जघन्यायामवगाहनायां युगपदेकसमयेनोत्कर्षतश्चत्वारः सिध्यन्ति, उत्कृष्टायां द्वौ, अजघन्योत्कृष्टायामष्टशतं, यवमध्येऽष्टौ, उक्तं च-

"उक्कोसगाहणाए दो सिद्धा होंति एकसमएणं ।
चत्तारि जहन्नाए अट्ठसयं मज्झिमाए उ ॥"

अत्र टीकाकारेण व्याख्या कृता- गाथापर्यन्तवर्त्तिनस्तुशब्दस्याधिकार्थसंसूचनात् 'जवमज्झे अट्ठ' इति' उत्कृष्टद्वारे येषां सम्यक्त्वपरिभ्रष्टानामनन्तः कालोऽगमत् तेषामष्टशतं, सङ्ख्यातकालपतितानामसङ्ख्यातकालपतितानां च दशकं २, अप्रतिपतितसम्यक्त्वानां चतुष्टयं, उक्तं च-

"जेसिं अनंतकालो पडिवाओ तेसिं होइ अट्ठसयं ।
अप्पडिवडिए चउरो दसगं दसगं च सेसाणं ॥"

अन्तरद्वारे एको वा सान्तरतः सिध्यति वहवो वा, तत्र बहवो यावदष्टशतं ।

अनुसमयद्वारे- प्रतिसमयमेको वा सिध्यति बहवो वा, तत्र बहूनां सिध्यतामियं प्ररूपणा- एकादयो द्वात्रिंशत्पर्यन्ता निरन्तरमुत्कर्षतोऽष्टौ समयान् यावत् प्राप्यन्ते, इयमत्र भावना- प्रथमसमये जघन्य एको द्वौ वा उत्कर्षतो द्वात्रिंशत् सिध्यन्तः प्राप्यन्ते, द्वितीयसमये जघन्यत एको द्वौ वा उत्कर्षतो द्वात्रिंशद्, एवं तृतीयसमयेऽपि, एवं चतुर्थसमयेऽपि, एवं यावदष्टमेऽपि समये जघन्यत एको द्वौ वा उत्कर्षतो द्वात्रिंशत्तः परमवश्यमन्तरं ।

तथा त्रयस्त्रिंशदादयोऽष्टचत्वारिंशत्पर्यन्ता निरन्तरं सिध्यन्तः, सप्त समयान् यावत्प्राप्यन्ते, भावना प्रागवत्, परतो नियमादन्तरं, तथा एकोनपञ्चाशदयादयः षष्ठिपर्यन्ता निरन्तरं सिध्यन्तः उत्कर्षतः षट् समयान् यावदवाप्यन्ते, परतोऽवश्यमन्तरं, तथा एकषष्ट्यादयो द्विसप्ततिपर्यन्ता निरन्तरमुत्कर्षतः सिध्यन्तः उत्कर्षतः पञ्च समयान् यावत्प्राप्यन्ते, ततः परमन्तरं, तथा त्रिसप्तत्यादयश्चतुरशीतिपर्यन्ता निरन्तरं सिध्यन्तः उत्कर्षश्चतुरस्समयान् यावत्प्राप्यन्ते, तत ऊर्द्ध्वमन्तरं, तथा पञ्चाशीत्यादयः षण्णवतिपर्यन्ता निरन्तरं सिध्यन्तः उत्कर्षतस्त्रीन् समयान् यावदवाप्यन्ते, परतोऽवश्यमन्तरं, तथा सप्तनवत्यादयो द्व्युत्तरशतपर्यन्ता निरन्तरं सिध्यन्त उत्कर्षतो द्वौ समयौ यावदवाप्यन्ते, परतो नियमादन्तरं, तथा त्र्युत्तरशतादयोऽष्टोत्तरशतपर्यन्ताः सिध्यन्तो नियमादेकमेव समयं यावदवाप्यन्ते, न द्वित्रादिसमयानिति । एतदर्थसंग्राहिका चेयं गाथा -

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"बत्तीसा अडयाला सट्ठी बावत्तरी य बोद्धवा।
चुलसीई छन्नउई दुरहियमट्ठुत्तरसयं च ॥"

अत्राष्टसामायिकेभ्य आरभ्य द्विसामायिकपर्यन्ता निरन्तरं सिद्धाः एकैकस्मिंश्च विकल्पे उत्कर्षतः शतपृथक्त्वं सङ्ख्यापरिमाणं, गणनाद्वारमल्पबहुत्वद्वारं च प्रागिव द्रष्टव्यं, तथा च सिद्धप्राभृतेऽपि द्रव्यप्रमाणचिन्तायामेतयोर्द्वारयोः सत्पदप्ररूपणोक्तैव गाथा भूयोऽपि परावर्त्तिता-

"संखाए जहन्नेणं एक्को उक्कोसएण अट्ठसयं।
सिद्धा नेगा थोवा एक्कगसिद्धा उ संखगुणा ॥"

तदेवमुक्तं द्रव्यप्रमाणं, सम्प्रति क्षेत्रप्ररूपणा कर्त्तव्या-तत्र पूर्वभावमपेक्ष्य सत्पद-प्ररूपणायामेव कृता, सम्प्रति प्रत्युत्पन्ननयमतेन क्रियते-तत्र पञ्चदशस्वप्यनुयोगद्वारेषु पृच्छा, इह सकलकर्म्मक्षयं कृत्वा कुत्र गतो भगवान् सिध्यति?, उच्यते, ऋजुगत्या मनुष्यक्षेत्रप्रमाणे सिद्धिक्षेत्रे गतः सिध्यति, यदुक्तं-"इह बोंदि चइत्ता णं तत्थ गंतूण सिज्झइ" गतं क्षेत्रद्वारं,

सम्प्रति स्पर्शनाद्वारं-स्पर्शना च क्षेत्रावगाहादतिरिक्ता यथा परमाणोः, तथाहि-परमाणो-रेकंस्मिन् प्रदेशेऽवगाहः सप्तप्रादेशिकी च स्पर्शना, उक्तं च-"एगपएसोगाढं सत्तपएसा य से फुसणा" सिद्धानां तु स्पर्शना एवमवगन्तव्या-

"फुसइ अनंते सिद्धे सव्वपएसेहिं नियमसो सिद्धो।
ते उ असंजेज्जगुणा देसपएसेहिं जे पुट्ठा ॥"

गतं स्पर्शनाद्वारं। सम्प्रति कालद्वारं, तत्र चेयं परिभाषा-

सर्वेष्वपि द्वारेषु यत्र २ स्थानेऽष्टशतमेकसमयेन सिध्युक्तं तत्र तत्राष्टौ समया निरन्तरं कालो वक्तव्यः, यत्र २ पुनर्विंशतिर्दश वा तत्र २ चत्वारः समयाः, शेषेषु स्थानेषु द्वौ समयौ, उक्तं-

"जहिं अट्ठसयं सिज्झइ अट्ठ उ समया निरंतरं कालो।
वीसदसएसु चउरो सेसा सिज्झंति दो समए ॥"

सम्प्रति एतदेव मन्दविनेयजनानुग्रहाय विभाव्यते, तत्र क्षेत्रद्वारे-जम्बूद्वीपे धातकीखण्डे पुष्करवरद्वीपे च प्रत्येकं भरतैरावतमहाविदेहेषूत्कर्षतोऽष्टौ समयान्, यावन्निरन्तरं सिध्यन्तः प्राप्यन्ते, हरिवर्षादिष्वधोलोके च चतुरश्चतुरः समयान्, नन्दनवने पण्डकवने लवणसमुद्रे च द्वौ द्वौ समयौ, कालद्वारे-उत्सर्प्पिण्यामवसर्प्पिण्यां च प्रत्येक तृतीयचतुर्थारकयोरष्टावष्टौ समयान्, शेषेषु चारकेषु चतुरश्चतुरः समयान्, गतिद्वारे-देवगतेरागता उत्कर्षतोऽष्टौ समयान्, शेषगतिभ्य आगताश्चतुरः समयानिति, वेदद्वारे-पश्चात्कृतपुरुषवेदा अष्टौ समयान्, पश्चात्कृतस्त्रीवेदन-पुंसकवेदाः प्रत्येकं चतुरश्चतुरः समयान्, पुरुषवेदेभ्य उद्वृत्य पुरुषा एव सन्तः सिध्यन्तोऽष्टौ समयान्, शेषेषु चाष्टसु भङ्गेषु चतुरश्चतुरः समयानिति,

तीर्थद्वारे-तीर्थकरतीर्थे तीर्थकरीतीर्थे वाऽतीर्थकरसिद्धा उत्कर्षतोऽष्टौ समयान्, तीर्थकराः तीर्थकर्यश्च द्वौ द्वौ समयौ, लिङ्गद्वारे-स्वलिङ्गेऽष्टौ समयान्, अन्यलिङ्गे चतुरः समयान्, गृहलिङ्गे द्वौ समयौ, चारित्रद्वारे-अनुभूतपरिहारविशुद्धचारित्राश्चतुरः समयान्, शेषा अष्टावष्टौ समयान्, बुद्धद्वारे-स्वयंबुद्धा द्वौ समयौ, बुद्धबोधिता अष्टौ समयान्, प्रत्येकबुद्धा बुद्धीबोधिताः स्त्रियो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बुद्धीबोधिता एव च सामान्यतः पुरुषादयः प्रत्येकं चतुरश्चतुरः समयान्, ज्ञानद्वारे-मतिश्रुतज्ञानिनो द्वौ समयौ, मतिश्रुतमनःपर्यायज्ञानिनश्चतुरस्समयान्, मतिश्रुतावधिज्ञानिनो मतिश्रुतावधि-मनःपर्यायज्ञानिनो वाऽष्टावष्टौ समयान्, अवगाहनाद्वारे-उत्कृष्टायां जघन्यायां चावगाहनायां द्वौ द्वौ समयौ, यवमध्ये चतुरः समयान्, उक्तं च सिद्धप्राभृतटीकायां-'जवमज्झाए य चत्तारि समया' इति, अजघन्योत्कृष्टायां पुनरवगाहनायामष्टौ समयान्, उत्कृष्टद्वारे अप्रतिपतितसम्यक्त्वा द्वौ समयौ, सङ्ख्येयकालप्रतिपतिता असङ्ख्येयकालप्रतिपतिताश्चतुरः २ समयान्, अनन्तकाल-प्रतिपतिता अष्टौ समयान्, अन्तरादीनि चत्वारि द्वाराणि नेहावतरन्ति,

गतं मौलं पञ्चम् काल इति द्वारं, सम्प्रति षष्ठमन्तरद्वारं-अन्तरं नाम सिद्धिगमनविरहकालः स च सकलमनुष्यक्षेत्रापेक्षया सत्पदप्ररूपणायामेवोक्तो, यथा जघन्यत एकसमय उत्कर्षतः षण्मासा इति, ततः इह क्षेत्रविभागतः सामान्यतो विशेषतश्चोच्यते-तत्र जम्बूद्वीपे धातकीखण्डे च प्रत्येकं सामान्यतो वर्षपृथक्त्वमन्तरं, जघन्यत एकसमयः, विशेषचिन्तायां-जम्बूद्वीपविदेहे धातकीखण्डविदेहयोश्चोत्कर्षतः प्रत्येकं वर्षपृथक्त्वमन्तरं जघन्यत एक समयः, तथा सामान्यतः पुष्करवरद्वीपे विशेषचिन्तायां च तत्रत्ययोर्द्वयोरपि विदेहयोः प्रत्येकमुत्कर्षतः साधिकं वर्षमन्तरं जघन्यत एकः समयः उक्तं च-

"जम्बूद्दीवे धायइ ओहविभागे य तिसु विदेहेसुं ।
वासपुहुत्तं अंतर पुक्खरमुभयंपि वासहियं ॥"

कालद्वारे-भरतेष्वैरावतेषु च जन्मत उत्कृष्टमन्तरं किञ्चिदूना अष्टादश सागरोपमकोटीकोट्यः, संहरणतः संख्येयानि वर्षसहस्राणि जघन्यतः पुनरुभयत्राप्येकः समयः

गतिद्वारे-निरयगतेरागत्योपदेशः सिध्यतामुत्कृष्टमन्तरं वर्षसहस्र हेतुमाश्रित्य प्रतिबोध-सम्भवेन सिध्यतां सङ्ख्येयानि वर्षसहस्राणि, जघन्यतः पुनरुभयत्राप्येकः समयः तिर्यग्यो-निकेभ्य आगत्योपदेशतः सिध्यतां संख्येयानि वर्षसहस्राणि, जघन्यतः पुनरुभयत्राप्येकः समयः तिर्यग्योनिकस्त्रीभ्यो मनुष्येभ्यो मनुष्यस्त्रीभ्यः सौधर्मेशानवर्जदेवेभ्यो देवीभ्यश्च पृथक् २ समागत्योपदेशतः सिध्यतां प्रत्येकमुत्कर्षतोऽन्तरं सातिरेकं वर्षं हेतुमाश्रित्य प्रतिबोधतः सिध्यतां सङ्ख्येयानि वर्षसहस्राणि, जघन्यतः पुनरुभयत्राप्येकः समयः, तथा पृथिव्यब्वनस्पतिभ्यो गर्भव्युत्क्रान्तेभ्यः प्रथमद्वितीयनरकपृथिवीभ्यामीशानदेवेभ्यः सौधर्म्मदेवेभ्यश्च समागत्योपदेशेन हेतुना च सिध्यतां प्रत्येकमुत्कृष्टमन्तरं सङ्ख्येयानि वर्षसहस्राणि, पुरुषेभ्य उद्धृत्य पुरुषत्वेन सिध्यतां साधिकं वर्षं, शेषेषु चाष्टसु भङ्गकेषु प्रत्येकं सङ्ख्येयानि वर्षसहस्राणि, जघन्यतः सर्वत्राप्येकः समयः,

तीर्थद्वारे-तीर्थकृतां पूर्वसहस्रपृथक्त्वं उत्कर्षतोऽन्तरं, तीर्थकरीणामनन्तः कालः, अतीर्थ-कराणां साधिकं वर्षं, नोतीर्थसिद्धानां सङ्ख्येयानि वर्षसहस्राणि, नोतीर्थसिद्धाः प्रत्येकबुद्धाः, जघन्यतः सर्वत्रापि समयः उक्तं च -

"पुव्वसहस्सपुहुत्तं तित्थकरानंतकाल तित्थगरी ।
नोतित्थकरा वासाहिगं तु सेसेसु संखसमा ।।"

एएसिं च जहन्नं समओ" 'संखसमत्ति' सङ्ख्येयानि वर्षसहस्राणि,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लिङ्गद्वारे-स्वलिङ्गादिषु सर्वेष्वपि जघन्यत एकः समयोऽन्तरं उत्कर्षतोऽन्यलिङ्गे गृहिलिङ्गे च प्रत्येकं संख्येयानि वर्षसहस्राणि, स्वलिङ्गे साधिकं वर्ष,

चारित्रद्वारे-पूर्वभावमपेक्ष्य सामायिकसूक्ष्मसम्परायथाख्यातचारित्रिणामुत्कृष्टमन्तरं साधिकं वर्ष, सामायिकच्छेदोपस्थापनपरिहारविशुद्धिकसूक्ष्मसम्परायथाख्यातचारित्रिणां च किञ्चिदूनाष्टादशसागरोपमकोटीकोट्यः, जघन्यतः सर्वत्राप्येकः समयः,

बुद्धद्वारे-बुद्धबोधितानामुत्कर्षतोऽन्तरं सातिरेकं वर्ष, बुद्धबोधितानां स्त्रीणां प्रत्येकबुद्धानां च सङ्ख्येयानि वर्षसहस्राणि, स्वयम्बुद्धानां पूर्वसहस्रपृथक्त्वं, जघन्यतः पुनः सर्वत्रापि समयः,

'बुद्धेहिं बोहियाणं वासहियं सेसयाण संखसमा।
पुव्वसहस्सपुहुत्तं होइ सयंबुद्ध समइयरं॥"

'समइयरमिति' इतरज्जघन्यमन्तरं समयः, ज्ञानद्वारे--मतिश्रुतज्ञानिनामुत्कृष्टमन्तरं पल्योपमासङ्ख्येयभागः, मतिश्रुतावधिज्ञानिनां साधिकं वर्ष, मतिश्रुतमनःपर्यायज्ञानिनां मतिश्रुतावधिमनःपर्यायज्ञानिनां च सङ्ख्येयानि वर्षसहस्राणि, जघन्यतः सर्वत्रापि समयः, अवगाहनाद्वारे-जघन्यायामुत्कृष्टायां चावगाहनायां यवमध्ये चोत्कृष्टमन्तरं श्रेण्यसङ्ख्येयभागः अजघन्योत्कृष्टायां साधिकं वर्ष, जघन्यतः पुनः सर्वत्रापि समयः, उत्कृष्टद्वारे-अप्रतिपतितसम्यक्त्वानां सागरोपमासङ्ख्येयभागः, सङ्ख्येयकालप्रतिपतितानामसङ्ख्येयकालप्रतिपतितानां च सङ्ख्येयानि वर्षसहस्राणि, अनन्तकालप्रतिपतितानां साधिकं वर्ष, जघन्यंतः सर्वत्रापि समयः, उक्तं च-

"उयहिअसंखो भागो अप्पडिवडियाण सेस संखसमा।
वासमहियमनंते समओ य जहन्नओ होइ॥"

अन्तरद्वारे-सान्तरं सिध्यतामनुसमयद्वारे निरन्तरं सिध्यतां गणनाद्वारे एककानानेकेषां च सिध्यतामुत्कृष्टमन्तरं सङ्ख्येयानि वर्षसहस्राणि, जघन्यतः पुनः सर्वत्रापि समयः।

गतमन्तरद्वारं, सम्प्रति भावद्वारं-तत्र सर्वेष्वपि क्षेत्रादिषु द्वारेषु पृच्छा, कतरस्मिन् भावे वर्तमानाः सिध्यन्तीति? उत्तरं क्षायिके भावे, उक्तं-'खेत्ताइएसु पुच्छा वागरणं सव्वहिं खइए'

गतं भावद्वारं, सम्प्रत्यल्पबहुत्वद्वारं-तत्र ये तीर्थकरा ये च जले ऊर्ध्वलोकदौ च चतुष्काः सिध्यन्ति ये च हरिवर्षादिषु सुषमसुषमादिषु च संहरणतो दश दश सिध्यन्ति दश दश सिध्यन्ति ते परस्परं तुल्याः, तथैवोत्कर्षतो युगपदेकसमयेन प्राप्यमाणत्वात्, तेभ्यो विंशतिसिद्धाः स्तोकाः, तेषां स्त्रीषुं दुष्षमायामेकतमस्मिन् विजये वा प्राप्यमाणत्वात्, तथा चोक्तं-"वीसगसिद्धा इत्थी अहलोगेगविजयादिसु अओ चउरो। दसगेहिंतो थोवा" तेस्तुल्या विंशतिपृथक्त्वसिद्धाः, यतस्ते सर्वाधोलौकिकग्रामेषु बुद्धीबोधितस्त्र्यादिषु वा लभ्यन्ते, ततो विंशतिसिद्धैस्तुल्याः, यदुक्तं-"वीसपुहुत्तं सिद्धा सव्वाहोलोगबुद्धीबोहियाइ अओ वीसगेहिं तुल्ला" क्षेत्रकालयोः स्वल्पत्वात् कादाचित्कत्वेन च सम्भवादिति, तेभ्योऽष्टशतसिद्धाः सङ्ख्येयगुणाः, उक्तं च-

"चउ दसगा तह वीसा वीसपुहुत्ता य जे य अट्ठसया।
तुल्ला थोवा तुल्ला संखेज्जगुणा भवे सेसा॥"

गतमल्पबहुत्वद्वारं, कृताऽनन्तरसिद्धप्ररूपणा, सम्प्रति परम्परसिद्धप्ररूपणा क्रियते-तत्र सत्पदप्ररूपणा पञ्चदशस्वपि क्षेत्रादिषु द्वारेष्वनन्तरसिद्धवदविशेषेण द्रष्टव्या, द्रव्यप्रमाण-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चिन्तायां सर्वेष्वपि द्वारेपु सर्वत्रैवानन्ता वक्तव्याः, क्षेत्रस्पर्शने प्रागिव, कालः पुनः सर्वत्रापि अनादिरूपोऽनन्तो वक्तव्यः, अत एवान्तरमसम्भवान्न वक्तव्यम्, तदुक्तं द्रव्यप्रमाणं कालमन्तरं चाधिकृत्य सिद्धप्राभृते--"परिमाणेन अनंता कालोऽणाई अनंतओ तेसिं। नत्थि य अंतर-कालो"त्ति, भावद्वारमपि प्रागिव, सम्प्रत्यल्पबहुत्वं सिद्धप्राभृतक्रमेणोच्यते-समुद्रसिद्धाः स्तोकाः तेभ्यो द्वीपसिद्धाः सङ्ख्येयगुणाः, तथा जलसिद्धाः स्तोकाः तेभ्यः स्थलसिद्धाः सङ्ख्येयगुणाः, तथा ऊर्द्धलोकसिद्धाः स्तोकाः तेभ्योऽधोलोकसिद्धाः सङ्ख्येयगुणाः तेभ्योऽपि तिर्यग्लोकसिद्धाः सङ्ख्येयगुणाः, उक्तं च-

"सामुद्दीव जलथल दुण्हं २ तु थोव संखगुणा।
उड्डअहतिरियलोए थोवा संखागुणा संखा॥"

तथा लवणसमुद्रसिद्धाः सर्वस्तोकाः तेभ्यः कालोदसमुद्रसिद्धाः सङ्ख्येयगुणाः तेभ्योऽपि जम्बूद्वीपासिद्धाः सङ्ख्येयगुणाः तेभ्यो धातकीखण्डसिद्धाः सङ्ख्येयगुणाः तेभ्योऽपि पुष्करवरद्वीपार्द्धसिद्धाः सङ्ख्येयगुणाः उक्तं च-

"लवणे कालोए वा जंबूद्दीवे य धायईसंडे।
पुक्खरवरे य दीवे कमसो थोवा य संखगुणा॥"

तथा जम्बूद्वीपे संहरणतो हिमवच्छिखरिसिद्धाः सर्वस्तोकाः १ तेभ्यो हैमवतऐरण्यवतसिद्धाः सङ्ख्येयगुणाः २ तेभ्योऽपि महाहिमवद्रुक्मिसिद्धाः सङ्ख्येयगुणाः ३ तेभ्योऽपि देवकुरूत्तर-कुरुसिद्धाः सङ्ख्येयगुणाः ४ तेभ्योऽपि हरिवर्षरम्यकसिद्धाः सङ्ख्येयगुणाः, क्षेत्रबाहुल्यात् ५, तेभ्योऽपि निषधनीलवतसिद्धाः सङ्ख्येयगुणाः ६ तेभ्योऽपि भरतैरावतसिद्धाः सङ्ख्येयगुणाः, स्वस्थानन्तवात् ७, तेभ्यो महाविदेहसिद्धाः सङ्ख्येयगुणाः, सद्भावात् ८,

सम्प्रति धातकीखण्डे क्षेत्रविभागेनोच्यते-धातकीखण्डे संहरणतो हिमवत्शिखरिसिद्धाः सर्वस्तोकाः १ तेभ्यो महाहिमवद्रुक्मिसिद्धाः संख्येयगुणाः २ तेभ्योऽपि निषधनीलवत्सिद्धाः संख्येयगुणाः ३ तेभ्योऽपि हैमवतैरण्यवतसिद्धा विशेषाधिकाः ४ तेभ्यो देवकुरूत्तरकुरुसिद्धाः सङ्ख्येयगुणाः ५ तेभ्योऽपि हरिवर्षरम्यकसिद्धा विशेषाधिकाः ६ तेभ्योऽपि भरतैरावतसिद्धाः सङ्ख्येयगुणाः ७ तेभ्योऽपि महाविदेहसिद्धाः सङ्ख्येयगुणाः ८,

तथा पुष्करवरद्वीपार्द्धे हिमवच्छिखरिसिद्धाः सर्वस्तोकाः १ तेभ्योऽपि महाहिमवद्रुक्मिसिद्धाः सङ्ख्येयगुणाः २ तेभ्योऽपि निषधनीलवत्सिद्धाः सङ्ख्येयगुणाः ३ तेभ्योऽपि हैमवतैरण्यवतसिद्धाः सङ्ख्येयगुणाः ४ तेभ्योऽपि देवकुरूत्तरकुरुसिद्धाः सङ्ख्येयगुणाः ५ तेभ्योऽपि हरिवर्षरम्यकसिद्धाः विशेषाधिकाः ६ तेभ्योऽपि भरतैरावतसिद्धाः सङ्ख्येयगुणाः ७, स्वस्थानमितिकृत्वा, तेभ्योऽपि महाविदेहसिद्धाः सङ्ख्येयगुणाः, क्षेत्रबाहुल्यात् स्वस्थानाच्च ८,

सम्प्रति त्रयाणामपि समवायेनाल्पबहुत्वमुच्यते-सर्वस्तोका जम्बूद्वीपे हिमवच्छिखरिसिद्धिाः १ तेभ्योऽपि हैमवतैरण्यवत्सिद्धाः सङ्ख्येयगुणाः २ तेभ्योऽपि महाहिमवद्रुक्मिसिद्धाः सङ्ख्येयगुणाः ३ तेभ्योऽपि देवकुरूत्तरकुरुसिद्धाः सङ्ख्येयगुणाः ४ तेभ्योऽपि हरिवर्षरम्यकसिद्धाः सङ्ख्येयगुणाः ५ तेभ्योऽपि निषधनीलवत्सिद्धाः सङ्ख्येयगुणाः ६ तेभ्योऽपि धातकीखण्डहिमवच्छिखरिसिद्धाः सङ्ख्येयगुणाः स्वस्थाने तु परस्परं तुल्याः ७ ततो धातकीखण्ड-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

महाहिमवद्रुक्मिपुष्करवरद्वीपार्द्धहिमवच्छिखरिसिद्धाः सङ्ख्येयगुणाः, स्वस्थाने तु चत्वारोऽपि परस्परं तुल्याः ८ ततो धातकीखण्डनिषधनीलवत्सिद्धाः पुष्करवरद्वीपार्द्धमहाहिमवद्रुक्मि-सिद्धाश्च सङ्ख्येयगुणाः स्वस्थाने तु परस्परं तुल्याः ९ ततो धातकीखण्डहैमतैरण्यवतसिद्धा विशेषाधिकाः १० तेभ्योऽपि पुष्करवरद्वीपार्द्धनिषधनीलवत्सिद्धाः सङ्ख्येयगुणाः ११ ततो धातकीखण्डदेवकुरूत्तरकुरुसिद्धाः सङ्ख्येयगुणाः १२ तेभ्योऽपि धातकीखण्ड एव हरिवर्ष-रम्यकसिद्धा विशेषाधिकाः १३ ततः पुष्करवरद्वीपार्द्धहिमवतैरण्यवतसिद्धाः सङ्ख्येयगुणाः १४ तेभ्योऽपि पुष्करवरद्वीपार्द्धे एव देवकुरूत्तरकुरुसिद्धाः सङ्ख्येयगुणाः १५ तेभ्योऽपि तत्रैव हरिवर्षरम्यकसिद्धा विशेषाधिकाः १६ तेभ्योऽपि जम्बूद्वीपभरतैरावतसिद्धाः सङ्ख्येयगुणाः १७ तेभ्योऽपि धातकीखण्डसत्कभरतैरावतसिद्धाः सङ्ख्येयगुणाः १८ तेभ्योऽपि पुष्कर-वरद्वीपार्द्धभरतैरावतसिद्धाः सङ्ख्येयगुणाः १९ तेभ्योऽपि जम्बूद्वीपे विदेहसिद्धाः सङ्ख्येयगुणाः २० ततो धातकीखण्डविदेहसिद्धाः सङ्ख्येयगुणाः २१ ततोऽपि पुष्करवरद्वीपार्द्धे विदेहसिद्धाः सङ्ख्येयगुणाः २२, इदं च क्षेत्रविभागेनाल्पबहुत्वं सिद्धप्राभृतटीकातो लिखितं।

गतं क्षेत्रद्वारं, अधुना कालद्वारं तत्रावसर्प्पिण्यां संहरणत एकान्तदुष्षमासिद्धाः सर्वस्तोकाः इतो दुष्षमासिद्धाः सङ्ख्येयगुणाः, तेभ्यः सुषमदुष्षमासिद्धा असङ्ख्येयगुणाः, कालस्यासङ्ख्येय-गुणत्वात्, तेभ्योऽपि सुषमासिद्धा विशेषाधिकाः, तेभ्योऽपि सुषमसुषमासिद्धा विशेषाधिकाः, तेभ्योऽपि दुष्षमसुषमासिद्धाः सङ्ख्येयगुणाः, उक्तं च-

"अइदूसमाइ थोवा संख असंखा दुवे विसेसहिया।
दूसमसुसमा संखागुणा उ ओसप्पिणीसिद्धा॥"

एवमुत्सर्प्पिण्यामपि द्रष्टव्यम्, तथा चोक्तम्-

"अइदूसमाइ थोवा संखअसंखा उ दुन्नि सविसेसा।
दूसमसुसमा संखागुणा उ उस्सप्पिणीसिद्धा॥"

सम्प्रत्युत्सर्प्पिण्यवसर्प्पिण्योः समुदायेनाल्पबहुत्वमुच्यते-तत्र द्वयोरप्युत्सर्प्पिण्यवसर्प्पि-ण्योरेकान्तदुष्षमासिद्धाः सर्वस्तोकाः, तत उत्सर्प्पिण्यां दुष्षमासिद्धा विशषाधिकाः, ततोऽव-सर्प्पिण्यां दुष्षमासिद्धाः सङ्ख्येयगुणाः, ततो द्वयोरपि सुषमदुषमासिद्धाः असङ्ख्येयगुणाः तेभ्योऽपि द्वयोः सुषमासिद्धा विशेषाधीकाः तेभ्योऽपि द्वयोरपि सुषमसुषमासिद्धाः॥ विशेषा-धिकाः इति पाठः। तेभ्योऽपि द्वयोरपि दुष्षमसुषमासिद्धाः सङ्ख्येयगुणाः, ततोऽवसर्प्पिण्यां सर्वसिद्धाः सङ्ख्येयगुणाः, तेभ्योऽप्युत्सर्प्पिणीसर्वसिद्धा विशेषाधिकाः, गतं कालद्वारं,

सम्प्रति गतिद्वारं-तत्रा मानुषीभ्योऽनन्तरागताः सिद्धाः सर्वस्तोकाः, ततो मानुषेभ्योऽनन्त-रागताः सिद्धाः सङ्ख्येयगुणाः, तेभ्योऽपि नैरयिकेभ्योऽनन्तरागताः सिद्धाः सङ्ख्येयगुणाः, तेभ्यो-ऽपि तिर्यग्यो-निस्त्रीभ्योऽनन्तरागताः सिद्धाः सङ्ख्येयगुणाः, तेभ्योऽपि तिर्यग्योनिकेभ्योऽनन्त-रागताः सिद्धाः सङ्ख्येयगुणाः, तेभ्योऽपि देवीभ्योऽनन्तरागताः सिद्धाः सङ्ख्येयगुणाः, तेभ्योऽपि देवेभ्योऽनन्तरागताः सिद्धाः सङ्ख्येयगुणाः, उक्तं च-

"मनुई मनुया नारय तिरिक्खणी तह तिरिक्ख देवीओ।
देवा य जहाकमसो संखेज्जगुणा मुणेयव्वा॥"

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथा एकेन्द्रियेभ्योऽनन्तरागताः सिद्धाः सर्वस्तोकाः, ततः पृथिवीकायेभ्योऽनन्तरागताः सिद्धाः सङ्ख्येयगुणाः, ततोऽप्यप्कायेभ्योऽनन्तरागताः सिद्धाः सङ्ख्येयगुणाः, तेभ्योऽपि त्रसकायेभ्योऽनन्तरागताः सिद्धाः सङ्ख्येयगुणाः, उक्तं च-

"एगिंदिएहिं थोवा सिद्धा पञ्चेंदिएहिं संखगुणा।
तरुपुढविआउतसकाइएहिं संखागुणा कमसो ॥"

तथा चतुर्थपृथिवीतोऽनन्तरागताः सिद्धाः सर्वस्तोकाः तेभ्यस्तृतीयपृथिवीतोऽनन्तरागताः सिद्धाः सङ्ख्येयगुणाः, तेभ्योऽपि द्वितीयपृथिवीतोऽनन्तरागताः सिद्धाः सङ्ख्येयगुणाः, तेभ्योऽपि पर्याप्तबादरप्रत्येकवनस्पतिभ्योऽनन्तरागताः सिद्धाः सङ्ख्येयगुणाः, तेभ्योऽपि पर्याप्तबादर-पृथिवीकायेभ्योऽनन्तरागताः सिद्धाः सङ्ख्येयगुणाः, तेभ्योऽपि पर्याप्तबादरापकायेभ्योऽनन्त-रागताः सिद्धाः सङ्ख्येयगुणाः, तेभ्योऽपि भवनपतिदेवीभ्योऽनन्तरागताः सिद्धाः सङ्ख्येयगुणाः, तेभ्योऽपि भवनवासिदेवेभ्योऽनन्तरागताः सिद्धाः सङ्ख्येयगुणाः, ततोऽपि व्यन्तरीभ्योऽनन्त-रागताः सिद्धाः सङ्ख्येयगुणाः, तेभ्योऽपि व्यन्तरदेवेभ्योऽनन्तरागताः सिद्धाः सङ्ख्येयगुणाः, तेभ्योऽपि ज्योतिष्कदेवीभ्योऽनन्तरागताः सिद्धाः सङ्ख्येयगुणाः, तेभ्योऽपि ज्योतिष्कदेवे-भ्योऽनन्तरागताः सिद्धाः सङ्ख्येयगुणाः, तेभ्योपि मनुष्यस्त्रीभ्योऽप्यनन्तरागताः सिद्धाः सङ्ख्येय-गुणाः, तेभ्योऽपि मनुष्येभ्योऽनन्तरागताः सिद्धाः सङ्ख्येयगुणाः, तेभ्योऽपि प्रथमनरकपृथिवी-तोऽनन्तरागताः सिद्धाः संख्येयगुणाः, तेभ्योऽपि तिर्यग्योनिस्त्रीभ्योऽनन्तरागताः, सिद्धाः संख्येयगुणाः, तेभ्योऽपि तिर्यग्योनिकेभ्योऽनन्तरागताः, सिद्धाः संख्येयगुणाः, तेभ्योऽपि अनुत्तरोपपातिकदेवेभ्योऽनन्तरागताः, सिद्धाः संख्येयगुणाः, तेभ्योऽपि ग्रैवेयकेभ्योऽनन्तरागताः, सिद्धाः संख्येयगुणाः, तेभ्योऽप्यच्युतदेवलोकादनन्तरागताः सिद्धाः संख्येयगुणाः, तेभ्योऽपि आरणदेवेभ्योऽनन्तरागताः, सिद्धाः संख्येयगुणाः एवमधोमुखं तावन्नेयं यावत् सनत्कुमारादनन्त-रागताः सिद्धाः संख्येयगुणाः, तत ईशानदेवीभ्योऽनन्तरागताः, सिद्धाः संख्येयगुणाः, ततोऽपि सौधर्मदेवीभ्योऽनन्तरागताः, सिद्धाः संख्येयगुणाः, तेभ्योऽपि ईशानदेवेभ्योऽनन्तरागताः, सिद्धाः संख्येयगुणाः, तेभ्योऽपि सौधर्मदेवेभ्योऽनन्तरागताः, सिद्धाः संख्येयगुणाः, उक्तं च-

"नरगचउत्थापुढवी तच्चा दोच्चा तरू पुढवि आऊ।
भवणवइदेवि देवा एवं वणजोइसाणंपि ॥
मनुई मनुस्स नारयपढमा तह तिरिक्खिणीयतिरिया य।
देवा अनुत्तराई सव्वेवि सणंकुमारंता ॥
ईसाणदेवि सोहम्मदेवि ईसाणदेव सोहम्मा।
सव्वेवि जहाकमसो अनंतरायाउ संखगुणा ॥

गतं गतिद्वारं, सम्प्रति वेदद्वारं-अत्र सर्वस्तोका नपुंसकसिद्धाः तेभ्यः स्त्रीसिद्धाः संख्येय-गुणाः, तेभ्योऽपि पुरुषसिद्धाः संख्येयगुणाः, उक्तं च-"थोवा नपुंस इत्थी संखा संखगुणा तओ पुरिसा"

तीर्थद्वारे-सर्वस्तोकाः तीर्थकरीसिद्धाः ततः तीर्थकरीतीर्थे प्रत्येकबुद्धसिद्धाः संख्येयगुणाः तेभ्योऽपि तीर्थकरीतीर्थेऽतीर्थकरीसिद्धाः संख्येयगुणा तेभ्योऽपि तीर्थकरीतीर्थे एवातीर्थकर-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सिद्धाः संख्येयगुणा तेभ्यः तीर्थकरसिद्धा अनन्तगुणाः तेभ्योऽपि तीर्थकरतीर्थे प्रत्येकबुद्धसिद्धाः संख्येयगुणा तेभ्योऽपि तीर्थकरतीर्थ एव साध्वीसिद्धाः संख्येयगुणाः तेभ्योऽपि तीर्थकरतीर्थ एवातीर्थकरसिद्धाः सङ्खयेयगुणाः,

लिङ्गद्वारे-गृहिलिङ्गसिद्धाः सर्वस्तोकाः तेभ्योऽप्यन्यलिङ्गसिद्धाः असङ्खयेयगुणाः तेभ्यो-ऽपि स्वलिङ्गसिद्धाः असङ्खयेयगुणाः, उक्तं च- "गिहिअन्नलिंगेहि सिद्धा थोवा दुवे असंखगुणा"

चारित्रद्वारे-सर्वस्तोकाश्छेदोपस्थापनपरिहारविशुद्धिकसूक्ष्मसम्परायथास्खातचारित्रा-सिद्धाः तेभ्यः सामायिकच्छेदोपस्थानपरिहारवशुद्धिकसूक्ष्मसम्परायथाख्यातचारित्रसिद्धाः सङ्खयेयगुणाः तेभ्योऽपि छेदोपस्थापनसूक्ष्मसम्परायथाख्यातचारित्रसिद्धाः असङ्खयेयगुणाः, सामायिकरहितं च छेदोपस्थापनं भग्नाचारित्रस्यावगन्तव्यं, तेभ्योऽपि सामायिकच्छेदोपस्थापन-सूक्ष्मसम्परायगाथाख्यातचारित्रसिद्धाः सङ्खयेयगुणाः तेभ्योऽपि सामायिकसूक्ष्मसम्परायथा-ख्यातचारित्रसिद्धाः सङ्खयेयगुणाः, उक्तं च-

"थोवा परिहारचऊ पंचग संखा असंख छेयतिगं।
छेयचउक्कं संखे सामाइयतिगं च संखगुणं॥"

बुद्धद्वारेसर्वस्तोकाः स्वयम्बुद्धसिद्धाः, तेभ्यः प्रत्येकबुद्धसिद्धाः सङ्खयेयगुणाः तेभ्योऽपि बुद्धीबोधितसिद्धाः सङ्खयेयगुणाः तेभ्योऽपि बुद्धबोधितसिद्धाः सङ्खयेयगुणाः,

ज्ञानद्वारे-मतिश्रुतमनःपर्यायज्ञानिः सिद्धाः सर्वस्तोकाः तेभ्यो मतिश्रुतज्ञानिसिद्धाः सङ्खयेयगुणाः, तेभ्योऽपि मतिश्रुतावधिमनःपर्यज्ञानसिद्धाः असङ्खयेयगुणाः तेभ्योऽपि मतिश्रुतावधिज्ञानिसिद्धाः सङ्खयेयगुणाः, उक्तं च-

"मनपज्जवनाणतिगे दुगे चउक्के मनस्स आणस्स।
थोवा संख असंखा ओहितिगे हुंति संखेज्जा॥"

अवगाहनाद्वारे-सर्वस्तोका द्विहस्तप्रमाणजघन्यावगाहनासिद्धाः तेभ्या धनुःपृथक्त्वा-भ्यधिकपञ्चधनुः-शतोप्रमाणोत्कृष्टावगाहनासिद्धाः असङ्खयेयगुणाः ततो मध्यमावगाहनासिद्धाः असङ्खयेयगुणाः, उक्तं च-

"ओगाहणा जहन्ना थोवा उक्कोसिया असंखगुणा।
तत्तोवि असंखगुणा नायव्वा मज्झिमाएवि॥"

अत्रैव सिद्धप्राभृतटीकाकारोपदर्शितो विशेष उपदर्श्यते-सर्वस्तोकाः सप्तहस्तप्रमाणावगाह-नासिद्धाः तेभ्यः पञ्चधनुःशतप्रमाणावगाहनासिद्धाः सङ्खयेयगुणाः ततो न्यूनपञ्चधनुःशत-प्रमाणावगाहनासिद्धाः सङ्खयेयगुणाः तेभ्योऽपि सातिकरेकसप्तहस्तप्रमाणावगाहनासिद्धा विशेषाधिकाः उत्कृष्टद्वारे-सर्वस्तोकाः अप्रतिपतितसिद्धाः तेभ्यः सङ्खयेयकालप्रतिपतित-सिद्धा असङ्खयेयगुणाः तेभ्योऽप्यसङ्खयेयकालप्रतिपतितसिद्धाः सङ्खयेयगुणाः तेभ्योऽप्यनन्तर-कालप्रतिपतितसिद्धाः असङ्खयेयगुणाः, उक्तं च-

"अप्पडिवाईयसिद्धा संखासंखअनंतकाला य।
थोव असंखेज्जगुणा संखेज्जगुणा असंज्ज(ख)गुणा॥"

अन्तरद्वारे-सर्वस्तोकाः षण्मासान्तरसिद्धाः तत एकसमयान्तरसिद्धाः सङ्खयेयगुणाः ततो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्विसमयान्तरसिद्धाः सङ्ख्येयगुणाः ततोऽपि त्रिसमयान्तरसिद्धाः सङ्ख्येयगुणाः एवं तावद्वाच्यं यावद्यवमध्यं, ततः सङ्ख्येयगुणहीनास्तावद्वक्तव्या यावदेकसमयहीनषण्मासान्तरसिद्धेभ्यः षण्मासान्तरसिद्धाः सङ्ख्येगुणहीनाः, अनुसमयद्वारे-सर्वस्तोकाः अष्टसमयसिद्धाः तत सप्त-समयसिद्धाः सङ्ख्येयगुणाः तेभ्यः षट्समयसिद्धाः सङ्ख्येयगुणा एवं समयसमयहान्या तावद्वाच्यं यावद् द्विसमयसिद्धाः सङ्ख्येयगुणाः, उक्तं च-

"अट्ठसमयंमि थोवा संखेज्जगुणा उ सत्तसमया उ।
एवं पडिहायंते जाव पुणो दोन्नि समया उ॥"

अत्र 'अट्ठसमयंमी'त्यादौ द्विगुसमाहारत्वादेकवचनं, गणनाद्वारे-सर्वस्तोकाअष्टशतसिद्धाः ततः सप्ताधिकशतसिद्धा अनन्तगुणाः तेभ्योऽपि षडधिकशतसिद्धाः अनन्तगुणाः तेभ्यः पञ्चा-धिकशतसिद्धा अनन्तगुणा एवमेकैकहान्या अनन्तगुणाः तावद्वाच्या यावदेकपञ्चाशत्सिद्धेभ्यः पञ्चाशत्सिद्धा अनन्तगुणाः, ततः तेभ्य एकोनपञ्चाशत्सिद्धा असङ्ख्येयगुणाः तेभ्योऽप्यष्टचत्वा-रिंशत्सिद्धा असङ्ख्येयगुणाः एवमेकैकपरिहान्या तावद्वाच्यं यावत्षड्विंशतिसिद्धेभ्यः पञ्चविंशतिसिद्धा असङ्ख्येयगुणाः, ततः तेभ्यश्चतुर्विंशतिसिद्धाः सङ्ख्येयगुणाः, तेभ्योऽपि त्रयोविंशतिसिद्धाः, सङ्ख्येयगुणाः एवमेकैकहान्या सङ्ख्येयगुणाः तावद्वाच्या यावद्द्विसिद्धेभ्य एकैकसिद्धाः सङ्ख्येयगुणाः, उक्तं च-

"अट्ठसयसिद्ध थोवा सत्तहियसया अनंतगुणिया य।
एवं परिहायंते सवगाओ जाव पन्नासं॥
तत्तो पन्नासाओ असंखगुणिया उ जाव पणवीसं।
पणवीसा आरंभा संखगुणा होंति एगं जा॥"

सम्प्रति अस्मिन्नेवाल्पबहुत्वद्वारे यो विशेषः सिद्धप्राभृते दर्शितः स विनेयजनानुग्रहाय दर्श्यते-तत्र सर्वस्तोका अधोमुखसिद्धाः, ते च पूर्ववैरिभिः पादेनोत्पाट्य नीयमाना अधोमुख-कायोत्सर्गव्यवस्थिता वा वेदितव्याः, तेभ्य ऊर्द्धवस्थितकायोत्सर्गस्थिताः सङ्ख्येयगुणाः, तेभ्योऽपि उत्कटिकासनसिद्धाः सङ्ख्येयगुणाः, तेभ्योऽपि वीरासनसिद्धाः सङ्ख्येययगुणाः तेभ्योऽपि न्युब्जासनसिद्धाः सङ्ख्येयगुणाः, न्युब्जोपविष्टा एवाधोमुखा द्रष्टव्याः, तेभ्योऽपि पार्श्वस्थितसिद्धा सङ्ख्येयगुणाः, तेभ्योऽप्युत्तानस्थितसिद्धाः सङ्ख्येयगुणाः, तथा चैतदेव पश्चानुपूर्व्याऽभिहितं-

"उत्तानग पासल्लिग्ग निउज्ज वीरासने य उक्कडिए।
उद्धट्ठिय ओमंथिय संखेज्जगुणेण हीना उ॥"

तदेवमुक्तमल्पबहुत्वद्वारं। सम्प्रति सर्वद्वारगताल्पबहुत्वविशेषोपदर्शनाय सन्नि-कर्षद्वारमुच्यते-सन्निकर्षो नाम संयोगः, हृस्वदीर्घयोरिव, विवक्षितं किञ्चित्प्रतीत्य विवक्षितस्या-ल्पतया बहुत्वेन वाऽवस्थानरूपः सम्बन्धः, उक्तं च-

"संजोग सन्निगासो पडुच्च सम्बन्ध एगट्ठा" तत्रेयं व्याप्तिः-यत्र यत्राष्टशतमुपलभ्यते तत्र तत्रोपरितनमष्टकरूपमङ्कमपनीय शेषस्य शतस्य चतुर्भिर्भागो ह्रियते, हृते च भागे लब्धाः पञ्च-विंशतिः, तत्र पञ्चविंशतिसङ्ख्येयप्रथमचतुर्थभागे क्रमेण सङ्ख्येयगुणहानिर्वक्तव्या, तद्यथा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सर्वबहव एकैकसमयसिद्धाः, ततो द्विकद्विकसिद्धाः सङ्ख्येयगुणहीनाः तेभ्योऽपि त्रिकत्रिक-सिद्धाः सङ्ख्येयगुणहीनाः, एवं तावद्वाच्यं यावत्पञ्चविंशतिसिद्धाः सङ्ख्येयगुणहीनाः, उक्तं च

"पढमो चउत्थभागो पणवीसा तत्थ संखेज्जगुणहानी दट्ठवत्ति" द्वितीये पुनश्चतुर्थभागे क्रमेणासङ्ख्येयगुणहानिर्वक्तव्या, तद्यथा-पञ्चविंशतिसिद्धेभ्यः षड्विंशतिसिद्धाः सङ्ख्येय-गुणहीनाः, एवमेकैकवृद्धा असङ्ख्येयगुणहानिः तावद्वक्त्व्या यावतपञ्चाशत्, तदुक्तं-"बिइए चउत्थभागे असंखगुणहानि जाव पन्नासं"ति, तृतीयस्माचतुर्थभागादराम्य सर्वत्रापि अनन्त-गुणहानिर्वक्तव्या, तद्यथा-पञ्चाशत्सिद्धेभ्य एकपञ्चाशत्सिद्धा अनन्तगुणहीनाः तेभ्योऽपि द्विप-ञ्चाशत्सिद्धा अनन्तगुणहीनाः एवमेकैकवृद्धा अनन्तगुणहानिस्तावद्वक्तव्या यावदष्टाधिक-शतसिद्धा अनन्तगुणहीनाः, उक्तं च- "तइयपयं आइकाऊण चउत्थपयं जाव अट्ठसयं ताव अनंतगुणहानी एगवन्नाओ आरंभ दट्ठवा।"

सिद्धप्राभृतसूत्रेऽप्युक्तं-"पढमे भागे संखा बिईए असंख अनंत तइयाए।" तथा यत्र यत्र विशंतिसिद्धाः तत्र तत्रापि व्याप्तिरियमनुसर्त्तव्या, प्रथमे चतुर्थभागे सङ्ख्येयगुणहानिः द्वितीये असङ्ख्येयगुणहानिः तृतीये चतुर्थे वा चानन्तगुणहानिः, तद्यथा-एकैकसिद्धाः सर्वबहवः तेभ्योऽपि द्विकद्विकसिद्धाः सङ्ख्येयगुणहीनाः एवं तावद्वाच्यं यावत्पञ्च, ततः षडादिसिद्धा असङ्ख्येयगुणहीना यावद्दश, तत एकादशादयः सर्वेऽप्यनन्तगुणहीनाः, एवमधोलोकादिष्वपि विंशतिपृथक्त्वासिद्धौ प्रथमे चतुर्थभागे सङ्ख्येयगुणहानिः, द्वितीयचतुर्थभागेऽसङ्ख्येयगुणहानिः, तृतीयस्माचतुर्थभागादारभ्य पुनः सर्वत्राप्यनन्तगुणहानिः, येषु तु हरिवर्षादिषु स्थानेषूत्कर्षतो दश दश सिध्यन्ति तत्रैवं व्याप्तिः-त्रिकं यावत्सङ्ख्येयगुणहानिः, ततश्चतुष्के पञ्चके चासङ्ख्येय-गुणहानिः, तत षट्कारदारभ्य सर्वत्रापि अनन्तगुणहानिः, तद्यथा-

एककसिद्धाः सर्वबहवः, ततो द्विकद्विकसिद्धाः सङ्ख्येयगुणहीनाः, तेभ्योऽपि त्रिकत्रिक-सिद्धाः सङ्ख्येयगुणहीनाः, तेभ्योऽपि चतुश्चतुःसिद्धाः असङ्ख्येयगुणहीनाः, तेभ्योऽपि पञ्च २ सिद्धा असङ्ख्येयगुणहीनाः, ततः षडादयः सर्वेऽप्यनन्तगुणहीनाः, यत्र पुनरवगाहनायवम-ध्यादावुत्कर्षतोऽष्टौ सिध्यन्तः प्राप्यन्ते तत्रैवं व्याप्तिः-चतुष्कं यावत्सङ्ख्येयगुणहानिः, ततः परमनन्तगुणहानिः, तद्यथा-एककसिद्धाः सर्वबहवः तेभ्याऽपि द्विकद्विकसिद्धाः सङ्ख्येय-गुणहीनाः, तेभ्योऽपि त्रिकत्रिकसिद्धाः सङ्ख्येयगुणहीनाः, तेभ्योऽपि चतुश्चतुःसिद्धाः सङ्ख्येय-गुणहीनाः, परं पञ्चपञ्चादयोऽनन्तगुणहीनाः अत्रासङ्ख्येयगुणहानिर्न विद्यते, यत्र पुनरुर्द्ध-लोकादावुत्कर्षतश्चत्वारः सिध्यन्तः प्राप्यन्ते तत्र एवं व्याप्तिः-एककसिद्धाः सर्वबहवः, तेऽभ्यो द्विकद्विकसिद्धा असङ्ख्येयगुणहीनाः, तेभ्योऽपि त्रिकत्रिकसिद्धा अनन्तगुणहीनाः, तेभ्योऽपि चतुश्चतुस्सिद्धा अनन्तगुणहीनाः, अत्र सङ्ख्येयगुणहानिर्न विद्यते, तदुक्तं-"जत्थ चत्तारि सिद्धा दिट्ठा तत्थ संखेज्जगुणहाथी नत्थि 'संखेज्जविवज्जिय चउक्के' इति वचना"दिति।

यत्र पुनर्लवणादौ द्वौ द्वावुत्कर्षतः सिध्यन्तौ दृष्टौ तत्रैवं व्याप्तिः-एककसिद्धाः सर्वबहवः, ततो द्विकद्विकसिद्धा अनन्तगुणहीनाः, तदुक्तं-"लवणादौ दो सिद्धा दिट्ठा तत्थ एक्कगसिद्धा बहुगा, दुगसिद्धा अनंतगुणहीणा।" तदेवमिह सन्निकर्षो द्रव्यप्रमाणे सप्रपञ्चं चिन्तितः, शेषेषु तु द्वारेषु सिद्धप्राभृतटीकातो भावनीयः, इह तु ग्रन्थगौरवभयान्नोच्यते-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सिद्धप्राभृतसूत्रं तद्वृत्तिं चोपजीव्य मलयगिरिः ।
सिद्धस्वरूपमेतन्निरवोचच्छिष्यबुद्धिहितः ॥

सम्प्रति विशेषान्तरं जिज्ञासुरनन्तरसिद्धस्वरूपं शिष्यः प्रश्नयन्नाह–

*मू. (८७) से किं तं अनंतरसिद्धकेवलनाणं ?, अनंतरसिद्धकेवलनाणं पन्नरसविहं पन्नत्तं, तंजहा-तित्थसिद्धा १ अतित्थसिद्धा २ तित्थयरसिद्धा ३ अतित्थयरसिद्धा ४ संयबुद्धसिद्धा ५ पत्तेयबुद्धसिद्धा ६ बुद्धबोहियसिद्धा ७ इत्थिलिंगसिद्धा ८ पुरिसलिंगसिद्धा ९ नपुंसगसिद्धा १० सलिंगसिद्धा ११ अन्नलिंगसिद्धा १२ गिहिलिंगसिद्धा १३ एगसिद्धा १४ अनेगसिद्धा १५ से त्तं अनंतरसिद्धकेवलनाणं ।*

वृ. अथ किं तदनन्तरसिद्धकेवलज्ञानं ?, सूरिराह–अनन्तरसिद्धकेवलज्ञानं पञ्चदशविधं प्रज्ञप्तं, पञ्चदशविधता च तस्यानन्तरसिद्धानामनन्तरपाश्चात्यभवरूपोपाधिभेदापेक्षया पञ्चदशविधत्वात्, ततोऽनन्तरसिद्धानामेवानन्तरभवोपाधिभेदतः पञ्चदशविधतां मुख्यत आह-'तद्यथे'-त्युपप्रदर्शने 'तित्थसिद्धा' इत्यादि, तीर्यते संसारसागरोऽनेनेति तीर्थंयथावस्थितसकलजीवाजीवादिपदार्थसार्थप्ररूपकं परमगुरुप्रणीतं प्रवचनं, तच्च निराधारं न भवतीतिकृत्वा सङ्घः प्रथमगणधरो वा वेदितव्यं, उक्तं च–

"तित्थं भंते ! तित्थं तित्थकरे तित्थं ?, गोअमा ! अरहा ताव नियमा तित्थंकरे, तित्थं पुण चाउवण्णो समणसंघो पढमगणहरो वा" तस्मिनुत्पन्ने ये सिद्धाः ते तीर्थसिद्धाः, तथा तीर्थस्याभावोऽतीर्थं तीर्थस्वाभावश्चानुत्पादोऽपान्तराले व्यवच्छेदो वा तस्मिन् ये सिद्धाः तेऽतीर्थसिद्धाः, तत्र तीर्थस्यानुत्पादेसिद्धा मरुदेवीप्रभृतयः, न हि मरुदेव्यादिसिद्धिगमनकाले तीर्थमुत्पन्नमासीत्, तथा तीर्थस्य व्यवच्छेदश्चन्द्रप्रभस्वामिसुविधिस्वाम्यपान्तराले तत्र ये जातिस्मरणादिनाऽपवर्गमवाप्य सिद्धाः ते तीर्थव्यवच्छेदसिद्धाः, तथा तीर्थकराः सन्तो ये सिद्धाः ते तीर्थकरसिद्धाः, अन्ये सामान्यकेवलिनः, तथा स्वयम्बुद्धाः सन्तो ये सिद्धाः ते स्वयम्बुद्धसिद्धाः, प्रत्येकबुद्धाः सन्तो ये सिद्धाः ते प्रत्येकबुद्धसिद्धाः, अथ स्वयम्बुद्धप्रत्येकबुद्धानां कः प्रतिविशेषः ?, उच्यते, बोध्युपधिश्रुतलिङ्गकृतो विशेषः, तथाहि-स्वयम्बुद्धा बाह्यप्रत्ययमन्तरेणैव बुध्यन्ते, स्वयमेव-बाह्यप्रत्ययमन्तरेणैव निजजातिस्मरणादिना बुद्धाः स्वयम्बुद्धा इति व्युत्पत्तेः, ते च द्विधा-तीर्थकराः तीर्थकरव्यतिरिक्ताश्च, इह तीर्थकरव्यतिरिक्तैरधिकारः, आह च चूर्णिकृत्–"ते दुविहा-तित्थयरा तित्थयरवइरित्ता वा, इह वइरित्तेहिं अहिगारो" इति ।

प्रत्येकबुद्धास्तु बाह्यप्रत्ययमपेक्ष्य बुध्यन्ते, प्रत्येकं-बाह्यं वृषभादिकं कारणमभिसमीक्ष्य बुद्धाः प्रत्येक बुद्धाः इति व्युत्पत्तेः, तथा च श्रूयते-बाह्यवृषभादिप्रत्ययसापेक्षा करण्ड्वादीनां बोधिः, बोधिप्रत्ययमपेक्ष्य च बुद्धाः सन्तो नियमतः प्रत्येकमेव विहरन्ति, न गच्छवासिन इव संहताः, आह च चूर्णिकृत्–"पत्तेयं-बाह्यं वृषभादिकारणमभिसमीक्ष्य बुद्धाः प्रत्येकबुद्धाः बहिःप्रत्ययप्रतिबुद्धानां च पत्तेयं नियमा विहारो जम्हा तम्हा य ते पत्तेबुद्धा इति, तथा स्वयम्बुद्धानामुपधिर्द्वादशविध एव पात्रादिकः, प्रत्येकबुद्धानां तु द्विधा-जघन्यत उत्कर्षश्च, तत्र जघन्यतो द्विविधः उत्कर्षतो नवविधः प्रावरणवर्जः, आह च चूर्णिकृत्–"पत्तेयबुद्धाणं जहन्नेणं दुविहो उक्कोसेण नवविहो नियमा पाउरणवज्जो भवइ"

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथा स्वयम्बुद्धानां पूर्वाधीतं श्रुतं भवति वा न वा, यदि भवति ततो लिङ्गं देवता वा प्रयच्छति गुरुसन्निधौ वा गत्वा प्रतिपद्यते, यदि चैकाकी विहरणसमर्थ इच्छा च तस्य तथारूपा जायते तत एकाकी विहरत्यन्यथा गच्छवासेऽवतिष्ठते, अथ पूर्वाधीतं श्रुतं न भवति तर्हि नियमाद्गुरुसन्निधौ गत्वा लिङ्गं प्रतिपद्यते, गच्छं चावश्यं न मुञ्चति, उक्तं च चूर्णिकृत्-पुव्वाधीतं से सुयं हवइ वा न वा, जइ से नत्थि तो लिंगं नियमा गुरूसन्निहे पडिवज्जइ, गच्छे य विहरइत्ति, अहवा पुव्वाधीतसुयसंभवो अत्थि तो से लिंगं देवया पयच्छइ गुरुसन्निधे वा पडिवज्जइ, जइ य एगविहारविहरणजोगो इच्छा वा से तो एक्को चेव विहरइ, अन्नहा गच्छे विहरइ'त्ति ।

प्रत्येकबुद्धानां तु पूर्वाधीतं श्रुतं नियमतो भवति, तच्च जघन्यत एकादशाङ्गानि उत्कर्षतः किञ्चिन्न्यूनानि दश पूर्वाणि, तथा लिङ्गं तस्मै देवता प्रयच्छति, लिङ्गरहितो वा कदाचिद्भवति, तथा चाह चूर्णिकृत्-"पत्तेयबुद्धाणं पुव्वाधीतं सुयं नियमा भवइ, जहन्नेणं एकारस अंगा, उक्कोसेणं भिन्नदसपूव्वी, लिंगं च से देवया पयच्छइ लिंगवज्जिओ वा भवति, जतो भणियं-'रूप्पं पत्तेयबुद्धा' इति" तथा बुद्धाः-आचार्यास्तैर्बोधिताः सन्तो ये सिद्धाः ते बुद्धबोधितसिद्धा, एते च सर्वेऽपि केचित् स्त्रीलिङ्गसिद्धाः, स्त्रिया लिङ्गं स्त्रिलिङ्गं, स्त्रीत्वस्योपलक्षणमित्यर्थः, तच्च त्रिधा, तद्यथा-वेदः शरीरनिर्वृत्तिर्नेपथ्यं च, तत्रेह शरीरनिर्वृत्त्या प्रय्जनं, न वेदनेपथ्याभ्यां, वेदे सति सिद्धत्वाभात्, नेपथ्यस्य चाप्रमाणत्वात्, आह च चूर्णिकृत्-"इत्थिए लिंगं इत्थि-लिंगं, इत्थिए उवलक्खणंति वृत्तं भवति, तं च तिविहं-वेयो सरीरनिवत्ती नेवत्थं च, इह सरीरनिव्वत्तीए अहिगारो, न वेयनेवत्थेहिं"ति ।

तस्मिन् स्त्रीलिङ्गे वर्त्तमानास्सन्तो ये सिद्धाः ते स्त्रीलिङ्गसिद्धाः एतेन यदाहुराशाम्बराः-न स्त्रीणां निर्वाणामिति, तदपास्तं द्रष्टव्यम्, स्त्रीनिर्वाणस्य साक्षादनेन सूत्रेणाभिधानात्, तत्प्रतिषेधस्य च युक्तयनुपपन्नत्वात्, तथाहि-मुक्तिपथो ज्ञानदर्शनचारित्राणि, "सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः" इति वचनात्, सम्यग्दर्शनादीनि च पुरुषाणामिव स्त्रीणामपि अविकलानि, तथाहि-दृश्यन्ते स्त्रियोऽपि सकलमपि प्रवचनार्थमभिरोचयमानाः, जानते च षडावश्यककालिकोत्का-लिकादिभेदभिन्नं श्रुतं परिपालयन्ति च सप्तदशविधमकलङ्कं संयमं धारयन्ति च देवसुराणामपि दुर्द्धरं ब्रह्मचर्यं तप्यन्ते च तपांसि मासक्षमणादीनि, ततः कथमिव तासां न मोक्षसम्भवः ?, स्यादेतद्-अस्ति स्त्रीणां सम्यग्दर्शनं ज्ञानं च न पुनश्चारित्रं, संयमाभावात्,

तथाहि-स्त्रीणामवश्यं वस्त्रपरिभोगेन भवितव्यम्, अन्यथा विवृताङ्गयस्ताः तिर्यक्स्त्रिय इव पुरुषाणामभिभवनीया भवेयुः, लोके च गर्होपजायते, ततोऽवश्यं ताभिर्वस्त्र परिभोक्तव्यं, वस्त्रपरिभोगे च सपरिग्रहता, सपरिग्रहत्वे च संयमाभाव इति, तदसमीचीनं, सम्यक् सिद्धान्ता-परिज्ञानात्, परिग्रहो हि परमार्थतो मूर्च्छाऽभिधीयते, 'मुच्छा परिग्गहो वृत्तो' इति वचनप्रामा-ण्यात्, तथाहि-मूर्च्छारहितो भरतचक्रवर्ती सान्तःपुरेऽप्यादर्शकगृहेऽवतिष्ठमानो निष्परिग्रहो गीयते, अन्यथा केवलोत्पादासम्भवात्, अपिच-

यदि मूर्च्छाया अभावेऽपि वस्त्र संसर्गमात्रं परिग्रहो भवेत् ततो जिनकल्पं प्रतिपन्नस्य कस्यचित साधोस्तुषारकणानुषक्ते प्रपतति शीते केनाप्यविषह्योपनिपातमद्य शीतमिति वि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भाव्य धर्म्मार्थिना शिरसि वस्त्रे परिक्षिप्ते तस्य सपरिग्रहता भवेत्, न चैतदिष्टं, तस्मान्न संसर्गमात्रं परिग्रहः, किन्तु मूर्च्छा, सा च स्त्रीणां वस्त्रादिषु न विद्यते, धर्मोपकरणमात्रतया तस्योपादानात्, न खलु ता वस्त्रमन्तरेणात्मानं रक्षितुमीशते, नापि शीतकालादिष्ववर्वाग्दशायां स्वाध्यायादिकं कर्त्तुं, ततो दीर्घतरसंयमपरिपालनाय यतनया वस्त्र परिभुञ्जाना न ताः परिग्रहवत्यः, अथोच्येत-सम्भवति नाम स्त्रीणामपि सम्यग्दर्शनादिकं रत्नत्रयं, परं न तत् सम्भवमात्रेण मुक्तिपदप्रापकं भवति, किन्तु प्रकर्षप्राप्तं, अन्यथा दीक्षानन्तरमेव सर्वेषामप्यविशेषेण मुक्तिपदप्राप्तिप्रसक्तेः, सम्यग्दर्शनादिरत्नत्रयप्रकर्षश्च स्त्रीणामसम्भवी, ततो न निर्वाणामिति, तदप्युक्तम्, स्त्रीषुरत्नत्रय-प्रकर्षासम्भवग्राहकस्य प्रमाणस्याभावात्, न खलु सकलदेशकालव्याप्त्या स्त्रीषु रत्नत्रयप्रकर्षा-सम्भवग्राहकं प्रत्यक्षमनुमानं वा प्रमाणं विजृम्भते, देशकालविप्रकृष्टतया तत्र प्रत्यक्षस्याप्रवृत्तेः, तदप्रवृत्तौ चानुमानस्याप्यसम्भवात्, नापि तासु रत्नत्रयप्रकर्षासम्भवप्रतिपादकः कोऽप्यागमो विद्यते, प्रत्युत सम्भवप्रतिपादकः स्थाने स्थानेऽस्ति, यथा इदमेव प्रस्तुतं सूत्रं, ततो न तासां रत्नत्रयप्रकर्षासम्भवः, यथ मन्येथाः,-स्वभावत एवातपेनेव छाया विरुध्यते स्त्रीत्वेन रत्नप्रकर्षः ततस्तदसम्भवोऽनुमीयते, तदयुक्तं, युक्तिविरोधात्, तथाहि-

रत्नत्रयप्रकर्षः स उच्यते यतोऽनन्तरं मुक्तिप्रदप्राप्तिः, स चायोग्यवस्थाचरमसमये, अयोग्या-वस्था चास्माद्दशामप्रत्यक्षा, ततः कथं विरोधगतिः ?, न हि अदृष्टेन सह विरोधः प्रतिपत्तुं शक्यते, मा प्रापत् पुरुषेष्वतिप्रसङ्गः, ननु जगति सर्वोत्कृष्टपदप्राप्तिः सर्वोत्कृष्टेनाध्यवसायेना-वाप्यते, नान्यथा, एतच्चोभयोरप्यावयोरागमप्रामाण्यबलतः सिद्धं, सर्वोत्कृष्टे च द्वे पदे-सर्वोत्कृष्टं दुःखस्थानं सर्वोत्कृष्टं सुखस्थानं च, तत्र सर्वोत्कृष्टदुःखस्थानं सप्तमनरकपृथिवी, अतः परं परमदुःखस्थानस्याभावात्, सर्वोत्कृष्टसुखस्थानं तु निःश्रेयसं, ततः परमन्यस्य सुखस्थानस्या-सम्भवात्, ततः स्त्रीणां सप्तनरकपृथिवीगमनमागमे निषिद्धं, निषेधस्य च कारणं तद्गमन-योग्यतथाविधसर्वोत्कृष्टमनोवीर्यपरिणत्यभावः, ततः सप्तमपृथिवीगमननिषेधादवसीयते-नास्ति स्त्रीणां निर्वाणं, निर्वाणहेतोः तथारूपसर्वोत्कृष्टमनोवीर्यपरिणामस्यासम्भवात्, तथा चात्र प्रयोगः असम्भवनिर्वाणा स्त्रियः, सप्तमपृथिवीगमनत्वाभावात्, सम्मूर्च्छिमादिवत्, तदेतदयुक्तं, यतो यदि नाम स्त्रीणां सप्तमनरकपृथिवीगमनं प्रति सर्वोत्कृष्टमनोवीर्यपरिणत्यभावः, तत एतावता कथमवसीयते ? निःश्रेयसमपि प्रति पासां सर्वोत्कृष्टमनोवीर्यपरिणत्यभावो, न हि यो भूमि-कर्षणादिकं कर्म कर्त्तुं न शक्नोति स शास्त्राण्यप्यवगाढुं न शक्नोतीति प्रत्येतुं शक्यं प्रत्यक्ष-विरोधात्, अथ सम्मूर्च्छिमादिषूभयमपि प्रति सर्वोत्कृष्टमनोवीर्यपरिणत्यभावो दृष्टः, ततोऽत्रा-प्यवसीयते, ननु यदि तत्र दृष्टस्तर्हि कथमत्रावसीयते ?, न खलु बहिर्व्याप्तिमात्रेण हेतुर्गमको भवति, किन्त्वन्तर्व्याप्त्या, अन्तर्व्याप्तिश्च प्रतिबन्धबलेन सिध्यति, न चात्र प्रतिबंधो विद्यते, न खलु सप्तमपृथिवीगमनं निर्वाणगमनस्य कारणं, नाप्येवमेवाविनाभावप्रतिबन्धतः सप्तमपृथिवी-गमनाविनाभावि निर्वाणगमनं, चरमशरीरिणां सप्तमपृथिवीगमनमन्तरेणैव निर्वाणागमनभावात्, न च प्रतिबन्धमन्तरेण एकस्याभावेऽन्यस्याभावो, मा प्रापद्यस्य तस्य वा कस्यचिदेकस्याभावे सर्वस्याभावप्रसङ्गः, यद्येवं तर्हि कथं सम्मुर्च्छिमादिषु निर्वाणगमनाभाव इति ?, उच्यते, तथाभव-स्वाभाव्यात्, तथाहि-ते सम्मूर्च्छिमादयो भवस्वभावत एव न सम्यग्दर्शनादिकं यथावत् प्रतिपत्तुं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शक्नुवन्ति, ततो न तेषां निर्वाणसम्भवः, स्त्रियस्तु प्रागुक्तप्रकारेण यथावत्सम्यग्दर्शनादिरत्न-त्रयसम्पद्योग्या, ततस्तासां न निर्वाणाभावः।

अति च-भुजपरिसर्पा द्वितीयामेव पृथिवीं यावद्गच्छन्ति, न परतः, परपृथिवीगमन-हेतुतथारूपमनोवीर्यपरिणत्यभावात्, तृतीयां यावत् पक्षिणः, चतुर्थी चतुष्पदाः, पञ्चमीमुरगाः अथ च सर्वेऽप्यूर्द्धमुत्कर्षतः सहस्रारं यावद्गच्छन्ति, तन्नाधोगतिविषये मनोवीर्यपरिणतिवै-पम्यदर्शनादूर्द्धगतावपि तद्वैषम्यं, तथा च सति सिद्धं स्त्रीपुंसामधोगतिवैषम्येऽपि निर्वाणं सममिति कृतं प्रसङ्गेन, तथा पुल्लिङ्गे शरीरनिर्वृत्तिरूपे व्यवस्थिताः सन्तो ये सिद्धास्ते पुंलि-ङ्गसिद्धाः, एवं नपुंसकलिङ्गसिद्धाः, तथा स्वलिङ्गे-रजोहरणादिरूपे व्यवस्थिताः सन्तो ये सिद्धास्ते स्वलिङ्गसिद्धाः, तथा अन्यलिङ्गे-परिव्राजकादिसम्बन्धिनि वल्कलकषायादिवस्त्रा-दिरूपे द्रव्यलिङ्गे व्यवस्थिताः सन्तो ये सिद्धास्तेऽन्यलिङ्गसिद्धाः, गृहिलिङ्गे सिद्धा गृहिलिङ्ग-सिद्धा मरुदेवीप्रभृतयः, तथा एकसिद्धा इति एकस्मिन् २ समये एकका: सन्तो ये सिद्धास्ते एकसिद्धाः, 'अनेगसिद्धा इति' एकस्मिन् समये अनेके सिद्धाः अनेकसिद्धाः अनेके चैकस्मिन् समये सिध्यन्त उत्कर्षतोऽष्टोत्तरशतसङ्ख्या वेदितव्याः।

आह-ननु तीर्थसिद्धातीर्थसिद्धरूपभेदद्वये एव शेषभेदा अन्तर्भवन्ति तत्किमर्थं शेषभेदो-पादानमुच्यते?, सत्यम्, अन्तर्भवन्ति परं न तीर्थसिद्धातीर्थसिद्धभेदद्योपादानमात्रात् शेषभेद-परिज्ञानं भवति, विशेषपरिज्ञानार्थं चैष शास्त्रारम्भप्रयास इति शेषभेदोपादानं।

**मू.** *(८८) से किं तं परम्परसिद्धकेवलनाणं?, परंपरसिद्धकेवलनाणं अणेगविहं पण्णत्तं, तंजहा-अपढमसमयसिद्धा दुसमयसिद्धा तिसमयसिद्धा चउसमयसिद्धा जाव दससमयसिद्धा संखिज्जसमयसिद्धा असंखिज्जसमयसिद्धा अनंतसमयसिद्धा, से तं परंपरसिद्धकेवलनाणं, से तं सिद्धकेवलनाणं॥*

**वृ.** 'से किं तं परम्परसिद्धकेवलनाणमि'त्यादि, न प्रथमसमयसिद्धा अप्रथमसमयसिद्धाः, परम्परसिद्धविशेषणं, अप्रथमसमयवर्त्तिनः सिद्धत्वसमयाद्वितीयसमयवर्त्तिन इत्यर्थः, स्त्र्यादिषु तु द्वितीयसमयसिद्धादय उच्यन्ते, यद्वा सामान्यतः अप्रथमसमयसिद्धा इत्युक्तं, तत एतदेव विशेषणे व्याचष्टे-द्विसमयसिद्धाः त्रिसमयसिद्धा इत्यादि। 'से त्तमि'-त्यादि निगमनं'

**मू.** *(८९) तं समासओ चउव्विहं पन्नत्तं, तंजहा-दव्वओ खित्तओ कालओ भावओ, तत्थ दव्वओ णं केवलनाणी सव्वदव्वाइं जाणइ पासइ, खित्तओ णं केवलनाणी सव्वं खित्तं जाणइ पासइ, कालओ णं केवलनाणी सव्वं कालं जाणइ पासइ, भावओ णं केवलनाणी सव्वे भावे जाणइ पासइ।*

**वृ.** 'तं समासतो' इत्यादि, तदिदं सामान्येन केवलज्ञानमभिगृह्यते, 'समासतः' संक्षेपेण चतुर्विधं प्रज्ञप्तं तद्यथा-द्रव्यतः क्षेत्रतः कालतो भावतश्च, तत्र द्रव्यतो 'णमिति' वाक्याल-ङ्कारे केवलज्ञानी सर्वद्रव्याणि-धर्मास्तिकायादीनि साक्षाज्जानाति पश्यति, क्षेत्रतः केवलज्ञानी सर्वं क्षेत्रं-लोकालोकभेदभिन्नं जानाति पश्यति, इह यद्यपि सर्वद्रव्यग्रहणेनाकाशास्तिकायोऽपी गृह्यते तथापि तस्य क्षेत्रत्वेन रूढत्वात् भेदेनोपन्यासः, कालतः केवलज्ञानी सर्वं कालम्-अतीतानागतवर्त्तमानभेदभिन्नं जानाति पश्यति, भावतः केवलज्ञानी सर्वान् जीवाजीवगतान्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भावान्-गतिकषायागुरुलघुभृतीन् जानाति पश्यति। इह केवलज्ञानकेवलदर्शनोपयोगचिन्तायां क्रमोपयोगादिविषया सूरीणामनेकधा विप्रतिपत्तिः, सा चूर्णिकृता मूलटीकाकृता च दर्शिता, ततो वयमपि संक्षेपतो विनेयजनानुग्रहाय तां प्रदर्शयामः-

'केई भणंति जुगवं जाणइ पासइ य केवली नियमा।
अन्ने एगंतरियं इच्छंति सुओवएसेणं ॥
अन्ने न चेव वीसुं दंसणमिच्छंति जिणवरिंदस्स।
जं चिय केवलनाणं तं चिय से दंसणं विंति ॥'

'केचन' सिद्धसेनाचार्यादयो 'भणंति' ब्रूवते, किमित्याह-'युगपद्' एकस्मिन् काले 'केवली' केवलज्ञानवान् न त्वन्यश्छद्मस्थो जानाति पश्यति च 'नियमात्' नियमेन, अन्ये पुनराचार्या जिनभद्रगणिक्षमाश्रमणप्रभृतयः 'इच्छंति' मन्यन्ते, किमिति ?, आह-एकान्तरितं केवली जानाति पश्यति चेति, एकस्मिन् समये जानाति एकस्मिन्समये पश्यतीत्यर्थः। कथमेतदिच्छन्तीति ?, अत आह- श्रुतोपदेशेन, आगमानुसारेणेत्यर्थः। 'अन्ने' इत्यादि, अन्ये केचिद्वृद्धाचार्या न चैव ज्ञानदर्शनं विष्वक्-पृथगिच्छन्ति जिनवरेन्द्रस्य, जिनाः-उपशान्त-रागादिदोषसमूहाः तेषां वराः-प्रधाना निर्मूलत एव क्षीणसकलरागादिदोषोद्भवनिबन्धन-मोहनीयकर्म्माणः, क्षीणमोहा इत्यर्थः, तेषामिन्द्रो-भगवान् उत्पन्नकेवलज्ञानः तस्य, न त्वन्यस्य, किन्तु यदेव केवलज्ञानं तदेव 'से' तस्य केवलिनो दर्शनं ब्रुयते, क्षीणसकलाबरणस्य देशज्ञाना-भावात् केवलदर्शनस्याप्यभावात्, तस्यापि वस्त्वेकदेशभूतसामान्यमात्रग्राहितया देशज्ञान-कल्पत्वादिति भावना।

तत्र 'यथोद्देशं निर्देश' इति न्यायात् प्रथमं युगपदुपयोगवादिमतं प्रदर्श्यते-

'जं केवलाइं साई अपज्जवसियाइं दोवि भणियाइं।
तो बिंति केइ जुगवं जाणइ पासइ य सव्वन्नू ॥'

'यत्' यस्मात् कारणात् 'द्वे अपि' केवलज्ञानकेवलदर्शने समये-सिद्धान्ते साद्यपर्यवसिते भणिते, ततो ब्रुवते केचन सिद्धसेनाचार्यादयः, किमित्याह-'युगपद्' एकस्मिन् समये काले जानाति पश्यति च सर्वज्ञ इति। विपक्षे बाधामाह-

''इहराऽऽईनिहणत्तं मिच्छावरणक्खओत्ति व जिनस्स।
इयरेवयरावरणया अहवा निक्कारणावरणं ॥''

'इतरथा' युगपत्केवलज्ञानदर्शनभावानभ्युपगमे 'आदिनिधनत्वं' सादिसपर्यवसितत्वं केवलज्ञानकेवलदर्शनयोः प्राप्नोति, तथाहि-उत्पत्तिसमयभाविकेवलज्ञानोपयोगानन्तरमेव केवलदर्शनोपयोगसमये केवलज्ञानाभावः पुनस्तदनन्तरं केवलज्ञानोपयोगसमये केवलदर्शनाभाव इति द्वे अपि केवलज्ञानकेवलदर्शने सादिसपर्यवसिते, तथा मिथ्या-अलीकः आवरणक्षयः-केवलज्ञानावरणकेवलदर्शनावरणक्षयो जिनस्य प्राप्नोति; न ह्यपनीतावरणौ द्वौ प्रदीपो क्रमेण प्रकाश्यं प्रकाशयतः, तद्वत् इहापि केवलज्ञानदर्शने युगपन्निर्मूलतोऽपनीतस्वस्वावरणे ततः कथं ते क्रमेण स्वप्रकाश्यं प्रकाशयतः ? क्रमेणेति चेदभ्युपगमः तर्हि मिथ्या तदावरणक्षयेति



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथा इतरेतरावरणता प्राप्नोति, तथाहि-यदि स्वावरणे निःशेषतः क्षीणेऽपि अन्यतरभावेऽन्तरभावो नेष्यते तर्हि ते एव परस्परमावरणे जाते, तथा च सति सिद्धान्तपक्षक्षितिरिति। अथवा निष्कारणावरणं, यदि हि साकल्येन स्वावरणापगमेऽप्यन्यतरोपयोगकालेऽन्यतरस्य भावो नेष्यते तर्हि तस्यान्यतरस्यावरणमकारणमेव जातं, कारणस्य कर्मलक्षणस्य प्रागेव सर्वथापगमात्, तथा च सति सदैव भावाभावप्रसङ्गः, तथा चोक्तं-

"नित्यं सत्त्वमसत्त्वं वाऽहेतोरन्यानपेक्षणादिति"

'तह य असव्वन्नुत्तं असव्वदरिसित्तणप्पसंगो य। एगंतरोवयोगे जिनस्स दोसा बहुविहा य॥'

तथा चति समुच्चये, यदि क्रमेणोपयोग इष्यते तर्हि भगवतोऽसर्वज्ञत्वमसर्वदर्शित्वप्रसङ्गश्च प्राप्नोति, तथाहि-यदि क्रमेण केवलज्ञानकेवलदर्शनोपयोगाभ्युपगमस्तर्हि न कदाचिदपि भगवान् सामान्यविशेषावेककालं जानाति पश्यति वा, ततोऽसर्वज्ञत्वासर्वदर्शित्वप्रसङ्गः, पाक्षिकं वा सर्वज्ञत्वं सर्वदर्शित्वं च प्रसज्यते, तथाहि-यदा सर्वज्ञो न तदा सर्वदर्शी, दर्शनोपयोगाभावात्, यदा तु सर्वदर्शी न तदा सर्वज्ञो, ज्ञानोपयोगाभावदिति।

एवमेकान्तरोपयोगेऽभ्युपगम्यमाने सति जिनस्य दोषा बहुविधाः प्राप्नुवन्ति। एवं परेणोक्ते सति आगमवादी जिनभद्रगणिक्षमाश्रमण आह-

'भण्णइ भिन्नमुहुत्तोवओगकालेऽवि तो तिनाणस्स।
मिच्छा छावट्ठी सागरोवमाइं खओवसमे॥'

यदुक्तम्-इतरथा आदिनिधनत्वं प्राप्नोति, तदसमीचीनं, उपयोगमनपेक्ष्य लब्धिमात्रापेक्षया केवलज्ञानकेवलदर्शनोः साद्यपर्यवसितत्वस्याभिधानात्, मत्यादिषुषट्षष्टिसागरोपमाणामिव, यदप्युक्तं-'मिथ्यावरणक्षय' इति तत्रापि भण्यते, यदि साद्यपर्यवसितं कालमुपयोगाभावत आवरणक्षयस्य मिथ्यात्मापद्यते 'तो' त्ति ततः 'त्रिज्ञानिनो' मतिश्रुततावधिज्ञानवतो भिन्नमुहूर्त्तलक्षणोपयोगकालेऽपि यो नाम मत्यादीनां षट्षष्टिसागरोपमाणि यावत् क्षयोपशमः सूत्रेऽभिहितः स मिथ्या प्राप्नोति, तावन्तं कालं मत्यादीनामुपयोगासम्भवात् युगपुद्भावासम्भवाच्च, याति इतरेतरावरणता पूर्वमासज्जिता साऽप्यसमीचीना, यतो जीवस्वाभाव्यादेव मत्यादीनामिव केवलज्ञानकेवलदर्शनयोर्युगपदुपयोगासम्भवः, ततः सा कथमुपपद्यते ?, मा प्रापदन्यथा मत्यादीनामपि परस्परमावरणत्प्रसङ्गः, योऽपि निष्कारणावरणदोष उद्भावितः सोऽपि जीवस्वाभाव्यादेव तथोपयोगप्रवृत्तेरपास्तो दृष्टव्यः, अन्यथा मत्यादीनामपि प्रसज्जेत, तेषामप्युत्कर्षतः षट्षष्टिसागरोपमाणि यावत् क्षयोपशमस्याभिधानात्, तावत्कालं चोपयोगाभावादिति। वादिमतमाशङ्क्य दूष्यति-

'अह नवि एवं तो सुण जहेव खीणंतरायो अरिहा।
संतेवि अंतरायक्खयम्मि पंचप्पयारंमि॥
समयं न देइ लहइ व भुंजइ उवभुंजइ व सव्वण्णू।
कज्जंमि देइ लहइ व भुंजइ व तहेव इहइंपि॥'

'अपिः' अवधारणे, अथ नैवमुक्तेन प्रकारेण मन्यसे क्षायोपशमिकक्षायिकयादृष्टान्तदार्ष्टान्तिकभावासम्भवात्, यथैव खलु क्षीणान्तरायकोऽर्हन् सत्यप्यन्तरायक्षये पञ्चप्रकारे,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इहान्तरायकर्मणो दानान्तरायादिभेदेन पञ्चप्रकारत्वात् तत्क्षयोऽपि पञ्चप्रकारः उक्तः, सततं न ददाति लभते वा भुंक्ते उपभुंक्ते वा सर्वज्ञः, किन्तु कार्ये समुत्पन्ने सति ददाति लभते वा भुंक्ते वा उपलक्षणमेतत् उपभुंक्ते वा, तथैव 'इहापि' केवलज्ञानदर्शनविषये सत्यपि तदावरणक्षये न युगपत्तदुपयोगसम्भवः, तथाजीवस्याभाव्यादिति। स्यादेतद्, यदि पञ्चविधान्तरायक्षये सत्यपि भगवान् न सततं दानादिक्रियासु प्रवर्त्तते ततः किं तत्क्षयस्य फलमित्यत आह–

'दिंतस्स लभंतस्स व भुंजंतस्स व जिणस्स एस गुणो।
खीणंतरायवत्ते जं से विग्घं न संभवइ॥'

जिनस्य क्षीणसकलघातिकर्मणः क्षीणान्तरायत्वे सत्येष गुणो जायते, यदुत–'से' तस्य जिनस्य ददतो लभमानस्य वा भुञ्जानस्य वकारस्यानुक्तसमुच्चयार्थत्वादुपभुञ्जानस्य च यद्विघ्नो न भवति, प्राकृतत्वाच्च विघ्नशब्दस्य नपुंसकनिर्देशः। अमुमेव गुणं प्रकृतेऽपि योजयन्नाह–

'उवउत्तस्सेमेव य नाणंमि व दंसणंमि व जिनस्स।
खीणावरणगुणोऽयं जं कसिणं मुणइ पासइ वा॥''

'एवमेव' दानादिक्रियासु प्रवृत्तस्येव ज्ञाने दर्शने चोपयुक्तस्य जिनस्य केवलिनाऽयं क्षीणावरणत्वे सति गुणो यत् कृत्स्नं लोकालोकात्मकं जगज्जानाति पश्यति वा, न तु जानतः पश्यतो वा विघ्नः सम्भवतीति। वाद्याह–

'पासंतोऽवि न जाणइ जाणं व न पासई जइ जिणिंदो।
एवं न कयाऽवेसो सव्वण्णू सव्वदरिसी य॥'

यदि पश्यन्नपि भगवान् न जानाति, दर्शनकाले ज्ञानोपयोगानभ्युपगमात्, जानन् वा यदि न पश्यति, ज्ञानोपयोगकाले दर्शनोपयोगानभ्युपगमात्, तत एवं सति न कदाचिदप्यसौ सर्वज्ञः सर्वदर्शी च प्राप्नोतीति। सिद्धान्तवाद्याह–

'जुगवमयाणंतोऽवि हु चउहिवि नाणेहि जह व चउनाणी।
भन्नइ तहेव अरिहा सव्वण्णू सव्वदरिसी य॥'

यथा मत्यादीभिः मनःपर्यायान्तैश्चतुर्भिर्ज्ञानैर्युगपदजानन्नपि जीवस्वाभाव्यादेव युगपदुपयोगाभावात् लब्ध्यपेक्षया चतुर्ज्ञानी भण्यते, तथैवार्हन्नपि भगवन् युगपत्केवलकज्ञानदर्शनोपयोगाभावेऽपि निःशेषतदावरणक्षयात् शक्त्यपेक्षया सर्वज्ञः सर्वदर्शी चोच्यते इत्यदोषः।

पुनरप्यत्र वाद्याह–

'तुल्ले उभयावरणक्खयंमि पुव्वं समुब्भवो कस्स।
दुविहुवयोगाभावे जिनस्स जुगवंति चोएइ॥'

'तुल्ये' समाने, एककालमित्यर्थः, 'उभयावरणक्षये' केवलज्ञानकेवलदर्शनावरणक्षये 'पूर्वं' प्रथमं 'समुद्भवः' उत्पादः कस्य भवेत्? किं ज्ञानस्य? उत दर्शनस्य? यदि ज्ञानस्य स किंनिबन्धन इति वाच्यं, तदावरणक्षयनिबन्धन इति चेत्, ननु स दर्शनेऽपि तुल्य इति तस्याप्युद्भप्रसङ्गः, एवं दर्शनपक्षेऽपि वाच्यं, अतः प्रथमसमये स्वावरणक्षयेऽपि अन्यतरस्याभावेऽप्यन्यतरस्याप्यभाव एव विपर्ययो वा प्राप्नोतीति युगद्विविधोपयोगाभावभ्युपगमे जिनस्य वादी चोदयतीति। अत्र सिद्धान्तवाद्याह–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'भन्नइ न एस नियमो जुगवुप्पन्नेण जुगवमेवेह।
होयव्वं उवयोगेण एत्थ सुण ताव दिट्ठंतं॥'

'भण्यते' अत्रोत्तरं दीयते, न एष नियमो यदुत शक्त्यपेक्षया युगपदुत्पन्नेनापि ज्ञानेन युगपदेवेह उपयोगेन-उपयोगरूपतयाऽपि भवितव्यमिति। कुत इति चेत्, तथादर्शनात्, आह च-'एत्थ सुण ताव दिट्ठंतं' 'अत्र' अस्मिन् विचारप्रक्रमे शृणु तावत् दृष्टान्तं। तमेव दर्शयति -

'जह जुगवुप्पत्तीएऽवि सुत्ते सम्मत्तमइसुयाईणं।
नत्थि जुगवोवओगो सव्वेसु तहेव केवलिणो॥'

यथा सम्यक्त्वमतिश्रुतादीनाम्, आदिशब्दादवधिज्ञानपरिग्रहः, युगपदुत्पत्तावपि 'सूत्रे' आगमेऽभिहितायां न सर्वेष्वेव मत्यादिषु युगपदुपयोगो भवति, ''जुगवं दो नत्थि उवओगा' इति वचनप्रामाण्यात्, तथैव केवलिनोऽपि शक्त्यपेक्षया युगपत्केवलज्ञानकेवलदर्शनोत्पत्तौ अपि न द्वयोरपि युगपदुपयोगो भवति। अमुमेवार्थं सूत्रेण संवादयन्नाह-

'भणियं चिय पन्नत्तीपन्नवणाईसु जह जिनो समयं।
जं जाणइ नवि पासइ तं अनुरयणप्पभाईणं॥'

भणितं चैतदनन्तरोदितं प्रज्ञप्तौ प्रज्ञापनादिषु-यथा यं समयं केवली जानाति अण्वादिकं रत्नप्रभादिकं च न तमेव समयं पश्यतीति, 'अनुरयणप्पभाईणं' इत्यत्र प्राकृतत्वाद्वितीयार्थे षष्ठी, ततः क्रमेणैव केवलज्ञानकेवलदर्शनयोरुपयोगो न युगपदिति स्थितं।

साम्प्रतं ये केवल-ज्ञानकेवलदर्शनाभेदवादिनस्तन्मतकमुपन्यस्यन्नाह-

'जह किर खीणावरणे देसन्नाणाण सम्भवो न जिने।
उभयावरणातीते तह केवलदंसणस्सावि॥'

यथा 'किले'-त्यासोक्तौ क्षीणावरणे भगवति जिने 'देशज्ञानानां' मत्यादीनां न सम्भवः तथा 'उभयावरणातीते' केवलज्ञानकेवलदर्शनावरणातीते भगवति केवलदर्शनस्यापि न सम्भवः। कथमिति चेदुच्यते-इह तावद् यगुपदुपयोगद्वयं न जायते, सूत्रे तत्र तत्र प्रदेशे निषेधात्, न चैतदपि समीचीनं यत्तदावरणं क्षीणं तथापि तन्न प्रादुर्भवति, ऊर्द्धर्वमपि तद्भावप्रसङ्गात्, ततः केवलदर्शनस्यापि न सम्भवः। कथमिति चेदुच्यते-इह तावद् युगपदुपयोगद्वयं न जायते, सूत्रे तत्र तत्र प्रदेशे निषेधात्, न चैतदपि समीचीनं यत्तदावरणं क्षीणं तथापि तन्न प्रादुर्भवति, ऊध्र्वमपि तदभावप्रसङ्गात्, ततः केवलदर्शनावरणक्षयादुपजायमानं केवलदर्शनं सामान्य-मात्रग्राहकं केवलज्ञान एव सर्वात्मना सर्ववस्तुग्राहकेऽन्तर्भवतीति तदेवैकं केवलज्ञानं चकास्ति, न ततः पृथग्भूतं केवलदर्शनमिति। अत्र सिद्धान्तवादी केवलदर्शनस्य स्वरूपतः पार्थक्यं सिसाधयिषुरिदमाह-

'देसन्नाणोवरमे जह केवलनाणसंभवो भणिओ।
देसद्दंसणवि गमे तह केवलदंसणं होऊ॥'

यथा भगवति मत्यादिदेशज्ञानोपरमे केवलज्ञानसम्भवः स्वरूपेण भणितस्त्वया तथा चक्षुद्दर्शनादिदेशदर्शनविगमे सति केवलदर्शनमपि ततः पृथक् स्वरूपतो भवतु, न्यायस्य समानत्वात्, अन्यथा पृथक् तदावरणकल्पनानैरर्थक्यापत्तेः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'अह देसनाणंदसणविगमे तव केवलं मयं नाणं।
न मयं केवलदंसणमिच्छामित्तं ननु तवेदं॥'

अथ देशज्ञानदर्शनविगमे तव केवलज्ञानमेवैकं मतं, न मतं केवलदर्शनमिति, अत्राह-ननु तवेदमिच्छमात्राम्-अभिप्रायमात्रं, न त्वत्र काचनापि युक्तिः, न चेच्छामात्रतो वस्तुसिद्धिः, सर्वस्य सर्वेष्वर्थेषु सिद्धिप्रसक्ततेः, यदप्युक्तं 'न चैतदपि समीचीनमित्यादि' तदपि न समीचीनं, क्षयोपशमाविशेषेऽपि मत्यादीनामिव जीवस्वाभाव्यादेव केवलज्ञानवरणकेवलदर्शनावरण-क्षयेऽपि सततं तयोरप्रादुर्भावाविरोधात्, अथोच्येत "दव्वतो णं केवलनाणी सव्वदव्वाइं जाणइ पासइ" इत्यादि सूत्रं केवलज्ञानकेवलदर्शनाभेदप्रतिपादनपरं, केवलज्ञानिन एव सतो ज्ञान-दर्शनयोरभेदेन विषयनिर्देशात्, सूत्रं च युष्माकमपि प्रमाणं, तत्कथमत्र विप्रतिपद्यते इति ?,

'भन्नइ जहोहिनाणी जाणइ पासइ य भासियं सुत्ते।
न य नाम ओहिदंसणनाणेगत्तं तह इहंपि॥'

'भण्यते' अत्रोत्तरं दीयते-यथा अवधिज्ञानी जानाति पश्यति चेति सूत्रे भाषितं, तदुक्तं-"दव्वओ णं ओहिनाणी उक्कोसेणं सव्वाइं रूविदव्वाइं जाणइ पासइ" इत्यादि, न च तथा सूत्रे भाणितमपि नामावधिज्ञानावधिदर्शनयोरेकत्वं, तथा इहापि केवलज्ञानकेवलदर्शनयोरेकत्वं सूत्रवशादासज्यमानं न भविष्यति, सूत्रस्य सामान्यतः, प्रवृत्तेः, अपि च-जानाति पश्यति चेति द्वावपि शब्दावेकार्थौ न भवतो, नापि तत्र सूत्रे एकार्थिकवक्तव्यताधिकारः, किन्तु सामान्य-विशेषविषयाधिगमाधिधानपरौ। ततश्च -

'जह पासइ तह पासउ पासइ जेणेह दंसणं तं से।
जाणइ जेणं अरिहा तं से नाणंति घेतव्वं॥'

'यथा' येन प्रकारेण ज्ञानादभेदेन भेदेन वा पश्यति तथा पश्यतु, एवावत्तु वयं ब्रूमो-येन सामान्यावगमाकारेणार्हन् पश्यति तद्दर्शनमितिज्ञातव्यं, येन पुनर्विशेषावगमरूपेणाकारेण जानाति तत् 'से' तस्यार्हतो ज्ञानमिति, न च युगपदुपयोगद्वयं, अनकेशः सूत्रे निषेधात्, ततः क्रमेण भगवतो ज्ञानं दर्शनं चेति। एतदेव सूत्रेण दर्शयति-

"नाणंमि दंसणंमि व एत्तो एगयरयंमि उवउत्ता।
सव्वस्स केवलिस्स जुगवं दो नत्थि उवओगा॥"

ज्ञाने तथा दर्शने वाशब्दो विकल्पार्थः, अनयोरेककालम् एकतरस्मिन् कस्मिंश्चिदुपयुक्ताः केवलिनो, न तु द्वयोः यतः सर्वस्य केवलिनो युगपत् द्वावुपयोगौ न स्त इति। तस्मादेत्सूत्रबलादपि क्रमेण ज्ञानं दर्शनं च सिद्धं। अपि च-

'उवओगो एगयरो पणवीसइमे सए सिणायस्स।
भणियो विडत्थयोच्चिय छट्ठुद्देसे विसेसेणं॥'

भगवत्यां पञ्चविंशतितमे शते अध्ययनापरपर्याये षष्ठोद्देशके स्नावकस्य केवलिनो 'विशेषेण' विशेषतः एकतर उपयोगो भणितः, तत्कथमेवमागमार्थमुपलभ्यात्मानं विप्रलम्भेमहि ?।

साम्प्रतं सिद्धान्तवाद्येव जिनभद्रगणिक्षमाश्रमण आत्मनोऽद्धतत्वमागमभक्तिं च परां ख्यापयन्नाह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'कस्स व नाणुमयमिणं जिनस्स जइ होज्ज दोन्नि उवयोगा।
नूनं न होंति जुगवं जओ निसिद्धा सुए बहुसो ॥'

निगदसिद्धेत्यलं प्रसङ्गेन, प्रकृतं प्रस्तुमः-

मू. (९०) *अह सव्वदव्वपरिणामभावविण्णत्तिकारणमणंतं।*
*सासयमप्पडिवाइ एगविहं केवलं नाणं ॥*

**वृ.** अथशब्द इहोपन्यासार्थः, पूर्वमुद्देशसूत्रे मनःपर्यवज्ञानानन्तरं केवलज्ञानमुक्तं, तत्सम्प्रति तात्पर्यनिर्देशार्थमुपन्यस्यते इत्यर्थः, सर्वाणि च तानि द्रव्याणि च सर्वद्रव्याणिजीवादिलक्षणानि, तेषां परिणामाः-प्रयोगविस्रसोभयजन्या उत्पादादयः पर्यायाः सर्वद्रव्यपरिणामास्तेषां भावः-सत्ता स्वलक्षणं स्वं स्वमसाधारणं रूपं तस्य विशेषेण ज्ञापनं विज्ञप्तिः विज्ञानं वा विज्ञप्तिः, परिच्छेद इत्यर्थः, तस्याः कारणं-हेतुः सर्वद्रव्यपरिणामविज्ञप्तिकारणं केवलज्ञानमिति सम्बध्यते,

"सव्वदव्वाण पओगवीससामीसया जहाओगं।
परिणामा पज्जाया जम्मविनासादओ नेओ ॥
तेसिं भावो सत्ता सलक्खणं वा विसेसओ तस्स।
नाणं विन्नत्तीए कारणं केवलं नाणं ॥"

तच्च ज्ञेयानन्तरत्वादनन्तं, तथा शश्वद्भवं शाश्वतं, सदोपयोगवदिति भावार्थः, तथा प्रतिपतनशीलं प्रतिपाति न प्रतिपाति अप्रतिपाति, सदाऽवस्थायीत्यर्थः, ननु यत् शाश्वतं तदप्रतिपात्येव ततः किमनेन विशेषणेन ?, तदयुक्तं, सम्यक्शब्दार्थापरिज्ञानात्, शाश्वतं हि नाम अनवरतं भवदुच्यते, तच्च कियत्कालमपि भवति, यावद्भवति तावन्निरन्तरं भवनात्, ततः सकलकालभावप्रतिपत्त्यर्थमप्रतिपातिविशेषणोपादानं, ततोऽयं तात्पर्यार्थः- अनवरतं-सकलकालं भवतीति, अथवा एकपदव्यभिचारेऽपि विशेषविशेष्यभावो भवतीति ज्ञापनार्थं विशेषणद्वयोपादानं, तथाहि-शाश्वमप्रतिपात्येव अप्रतिपाति तु शाश्वतमशाश्वतं च भवति, यथा अप्रतिपातित्यवधिज्ञानमिति।

तथा एकविधम्-एकप्रकारं, तदावरणक्षयस्यैकरूपत्वात्, केवलं च तज्ज्ञानं च (केवलज्ञानं) ॥ इह तीर्थकृत् समुपजातकेवलालोकस्तीर्थकरनामकर्मोदयतः तथास्वाभाव्यादुपकार्यकृतोपकारानपेक्षं सकलसत्त्वानुग्रहाय सवितेव प्रकाशं देशनामातनोति, तत्राव्युत्पन्नविनेयानां केषाञ्चिदेवमाशङ्का भवेद् भगवतोऽपि तीर्थकृतस्तावद्द्रव्यश्रुतं ध्वनिरूपं वर्त्तते, द्रव्यश्रुत च भावश्रुतपूर्वकं, ततो भगवानपि श्रुतज्ञानीति, ततस्तदाशङ्कापनोदार्थमाह-

मू. (९१) *केवलनाणेणऽत्थे नाउं जे तत्थ पन्नवणजोगे।*
*ते भासइ तित्थयरो वइजोग सुअं हवइ सेसं ॥*

**वृ.** इह तीर्थंकरः केवलज्ञानेन 'सर्वं वाक्यं सावधारण'मिति न्यायात्, केवलज्ञानेनैव, न श्रुतज्ञानेन, तस्य क्षयोपशमिकत्वात्, केवलिनश्च क्षायोपशमिकभावातिक्रमात्, सर्वक्षये देशक्षयाभावादिति भावः, अर्थान्-धर्मास्तिकायादीन् अभिलाप्यानभिलाप्यान् 'ज्ञात्वा' विनिश्चित्य ये 'तत्र' तेषामर्थानामभिलप्यानभिलप्यानां मध्ये प्रज्ञापनायोग्याः अभिलाप्या इत्यर्थः, तान् भाषते, नेतरान्, तानपि प्रज्ञापनायोग्यान् भाषते, न सर्वान्, तेषामनन्तत्वने सर्वेषां भाषितुम-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शक्यत्वात्, आयुषस्तु परिमितत्वात्, किन्तु ?-कतिपयानेव, अनन्तभागमात्रान्, आह च-

"पन्नवणिज्जा भावा अनंतभागो तु अनभिलप्पाणं।
पन्नवणिज्जाणं पुण अनंतभागो सुयनिबद्धो ॥"

तत्र केवलज्ञानोपलब्धार्थभिधायकः शब्दराशिः प्रोच्यमानस्तस्य भगवतो वाग्योग एव भवति, न श्रुतं, तस्य भाषापर्याप्त्यदिनामकर्मोदयनिबन्धनत्वात्, श्रुतस्य च क्षायोपशमिकत्वात्, स च वाग्योगो भवति श्रुतं 'शेषम्' अप्रधानं द्रव्यश्रुतमित्यर्थः, श्रोतॄणां भावश्रुतकारणतया द्रव्यश्रुतं व्यवह्रियते इति भावः, अन्ये त्वेवं पठन्ति-"वइजोग सुयं हवइ तेसिं" तस्यायमर्शः-तेषां-श्रोतॄणां भावश्रुतकारणत्वात् स वाग्योगः श्रुतं भवति, श्रुतमिति व्यवह्रियते इत्यर्थः।

*मू. (१२) से तं केवलनाणं, से तं पच्चक्खनाणं॥*

**वृ.** 'सेत्त'मित्यादि निगमनं, तदेतत्केवलज्ञानं, तदेतत्प्रत्यक्षं। एवं प्रत्यक्षे प्रतिपादिते सति परोक्षस्य स्वरूपमनवच्छन्नाह शिष्यः-

*मू. (१३) से किं तं परुक्खनाणं ?, परुक्खनाणं दुविहं पन्नत्त, तंजहा-आभिनिबोहिअनाणपरोक्खं च सुअनाणपरोक्खं च, जत्थ आभिनिबोहियनाणं तत्थ सुयनाणं, जत्थ सुअनाणं तत्थाभिनिबोहियनाणं, दोऽवि एयाइं अन्नमन्नमनुगयाइं, तहवि पुण इत्थ आयरिआ नाणत्तं पन्नवयंति-अभिनिबुज्झइत्ति आभिनिबोहिअनाणं सुणेइत्ति सुअं, मइपुव्वं जेण सुअं न मइसुअपुव्विआ।*

**वृ.** 'से किं तमि'त्यादि, अथ किं तत्परोक्षं ?, सूरिराह-परोक्षं द्विविधं प्रज्ञप्तं, तद्यथा-आभिनिबोधिकज्ञानपरोक्षं च श्रुतज्ञानपरोक्षं च, चशब्दौ स्वगतानेकभेदसूचको परस्परसहभावसूचकौ च, परस्परभावमेवानयोर्दर्शयति-'जत्थे' त्यादि, 'यत्र' पुरुषे आभिनिबोधिकं ज्ञानं तत्रैव श्रुतज्ञानमपि, तथा यत्र श्रुतज्ञानं तत्रैवाभिनिबोधिकज्ञानं।

आह-यत्राभिनिबोधिकज्ञानं तत्र श्रुतज्ञानमित्युक्ते यत्र श्रुतज्ञानं तत्राभिनिबोधिकज्ञानमिति गम्यत एव ततः किमनेनोक्तेनेति ?, उच्यते, नियमतो न गम्यते, ततो नियमावधारणार्थमेतदुच्यते इत्यदोषः, नियमावधारणमेव स्पष्टयति-द्वे अप्येते-आभिनिबोधिकश्रुते अन्योऽन्यानुगते-परस्परप्रतिबद्धे, स्यादेतद्-अनयोर्येदि परस्परमनुगमस्तर्हि अभेद एव प्राप्नोति कथं भेदेन व्यवहारः ?, तत आह-'तहऽवी'त्यादि, 'तथापि' परस्परमनुगमेऽपि पुनरत्र-आभिनिबोधिकश्रुतयोराचार्याः-पूर्वसूरयो नानात्वं भेदं प्ररूपयन्ति, कथमिति चेदुच्यते-लक्षणभेदात्, दृष्टश्च परस्परमनुगतयोरपि लक्षणभेदाद्भेदो, यथैकाकाशस्थयोर्धर्मास्तिकायाधर्मास्तिकाययोः, तथाहि-

धर्माधर्मास्तिकायौ परस्परं लोलीभावेनैकस्मिन्नाकाशदेशे व्यवस्थितौ, तथापि यो गतिपरिणामपरिणतयोर्जीवपुद्गयोर्गत्युपष्टम्भहेतुर्जलमिव मत्स्यस्य स खलु धर्मास्तिकायो यः पुनः स्थितिपरिणामपरिणतयोर्जीवपुद्गलयोरेव स्थित्युपष्टम्भहेतुः क्षितिरिव झषस्य स खलु अधर्मास्तिकाय इति लक्षणभेदाद्भेदो भवति, एवमाभिनिबोधिकश्रुतयोरपि लक्षणभेदाद्भेदो वेदितव्यः, लक्षणभेदमेव दर्शयति-

'अभिनिबुज्झई'त्यादि, अभिमुखं-योग्यदेशे व्यवस्थितं नियतमर्थमिन्द्रियमनोद्वारेण बुध्यतेपरिच्छिनत्ति आत्मा येन परिणामविशेषेण स परिणामविशेषो ज्ञानापरपर्याय आभिनि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बोधिकं, तथा शृणोति वाच्यवाचकभावपुरस्सरं श्रवणविषयेन शब्देन सह संस्पृष्टमर्थं परिच्छिन-त्यात्मा येन परिणामविशेषेण स परिणामविशेषः श्रुतं, ननु यद्येवंलक्षणं श्रुतं तर्हि य एव श्रोत्रेन्द्रियलब्धिमान् भाषालब्धिमान् वा तस्यैव श्रुतमुपपद्यते न शेषस्यैकेन्द्रियस्य, तथाहि-

यः श्रोत्रेन्द्रियलब्धिमान्, भवति स विवक्षितं शब्दं श्रुत्वा तेन शब्देन वाच्यमर्थं प्रतिपत्तुमीष्टे न शेषः, शेषस्य तथारूपशक्त्यभावात्, योऽपि च भाषालब्धिमान् भवति सोऽपि द्वीन्द्रियादिः प्रायः स्वचेतसि किमपि विकल्प्य तदभिधानानुमानतः शब्दमुदिगरति नान्यथा, ततस्तस्यापि श्रुतं सम्भाव्यते, यस्त्वेकेन्द्रियः स न तावत् श्रोत्रेन्द्रियलब्धिमान् नापि भाषालब्धिमान् तः कथं तस्य श्रुतसम्भवः ?, अथ च पवचने तस्यापि श्रुतमुपवर्ण्यते, तत्कथं प्राक्तनं श्रुतलक्षणं समीचीनमिति ?, नैष दोषो, यत इह तावदेकेन्द्रियाणामाहारादिसंज्ञा विद्यन्ते, तथा सूत्रेऽनेक-शोऽभिधानात्, संज्ञा चाभिलाष उच्यते, यत उक्तमावश्यकटीकायाम्- 'आहारसंज्ञा आहारभि-लाषः क्षेद्वेदनीयप्रभावः खल्वात्मपरिणामविशेषः' इति, अभिलाषश्च ममैवरूपं वस्तु पुष्टिकारि तद्यदीदमवाप्यते ततः समीचीनं भवतीत्येवं शब्दार्थोल्लेखानुविद्धः स्वपुष्टिनिमित्तभूतप्रति-नियतवस्तुप्राप्त्यध्यवसायः, स च श्रुतमेव, तस्य शब्दार्थपर्यालोचनात्मकत्वात्, शब्दार्थ-पर्या-लोचनात्मकत्वं च ममैवंरूपं वस्तु पुष्टिकारे तद्यदीदमवाप्यते इत्येवमादीनां शब्दानामन्त-र्जल्पाकाररूपाणामपि विवक्षितार्थवाचकतया प्रवर्त्तमानत्वात्, श्रुतस्य चैवंलक्षणत्वात्, उक्तं

इन्दियमनोनिमित्तं जं विन्नाणं सुयानुसारेणं।
नियअत्थोत्तिसमत्थ तं भावसुयं मई सेसं॥"

'सुयानुसारेणं'ति शब्दार्थपर्यालोचनानुसारेण, शब्दार्थपर्यायलोचनं च नाम वाच्यवाचक-भावपुरस्सरीकारेण शब्दसंस्पृष्टस्यार्थस्य प्रतिपत्तिः, केवलमेकेन्द्रियाणामव्यक्तमेव, किं च-नाप्यनिर्वचनीयं तथारूपक्षयोपशमभावतो वाच्यावाचकभावपुरस्सरीकारेण शब्द-संस्पृष्टार्थग्रहणमवसेयम्, अन्यथाऽऽहारादिसंज्ञाऽनुपपत्तेः, यदप्युच्यते-यद्येवंलक्षणं श्रुतं तर्हि य एव श्रोत्रेन्द्रियलब्धिमान् भाषालब्धिमान् वा तस्यैव श्रुतमुपपद्यते न शेषस्यैकेन्द्रियस्येति, तदप्यसमीक्षितार्थाभिधानं, सम्यक् प्रवचनार्थापरिज्ञानात्, तथाहि-बकुलादीनां स्पर्शने-न्द्रियातिरिक्तद्रव्येन्द्रियलब्धिविकलत्वेऽपि तेषां किमपि सूक्ष्मं भावेन्द्रियपञ्चकविज्ञान-मभ्युपगम्यते, 'पंचिंदिओवि वउलो' इत्यादिभाष्यकारवचनप्रामाण्यात्, तथा भाषाश्रोत्रेन्द्रिय-लब्धिविकलत्वेऽपि तेषां किमपि सूक्ष्मं श्रुतं भविष्यति, अन्यथाऽऽहारादिसंज्ञाऽनुपपत्तेः, आह च भाष्यकृत-

"जह सुहुमं भाविंदियनाणं दव्विंदियावरोहेऽवि।
तह दव्वसुयाभावे भावसुयं पत्थिवाईणं॥"

ततः प्राक्तनमेव श्रुतलक्षणं समीचीनं, नान्यदिति स्थितं।

तदेवं लक्षणभेदाद्भेदमभिधाय सम्प्रति प्रकारान्तरणे भेदमभिधित्सुराह- 'मइपुव्व'मित्यादि, पृ पालनपूरणयो'रित्यस्य धातोः पूर्यते प्राप्यते पाल्यते च येन कार्यं तत्पूर्वं, औणादिको वक्प्रत्ययः, कारणमित्यर्थः, मतिः पूर्वं यस्य तन्मतिपूर्वं श्रुतं-श्रुतज्ञानं, तथाहि-

मत्या पूर्यते प्राप्यते श्रुतं, न खलु मतिपाटवविभवमन्तरेण श्रुतविभवमुत्तरोत्तरमासादयति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जन्तुः, तथाऽदर्शनात्, यच्च यदुत्कर्षापकर्षवशादुत्कर्षापकर्षभाक् तत्तस्य कारणं, यथा घटस्य मृत्पिण्डः, मत्युत्कर्षापकर्षवशाच्च श्रुतस्योत्कर्षापकर्षौ, ततः कारणं मतिः श्रुतज्ञानास्य, तथा पाल्यते- अवस्थितिं प्राप्यते मत्या श्रुतं, श्रुतस्य हि दलं मतिर्यथा घटस्य मृत्, तथाहि- श्रुतेष्वपि बहुषु ग्रन्थेषु यद्विषयं स्मरणमीहापोहादि वा अधिकतरं प्रवर्त्तते स ग्रन्थः स्फुटतरः प्रतिभाति, न शेषाः, एतच्च प्रतिप्राणि स्वसंवेदनप्रमाणसिद्धं, ततो यथोत्पन्नोऽपि घटो मृदभावे न भवति तथास्वभावायां च मृदि तिष्ठन्त्यामवतिष्ठते इति सा तस्य कारणम्, एवं श्रुतस्यापि मतिः कारणं, ततो युक्तमुक्त मतिपूर्वं श्रुतमिति, मतिपूर्वकता च श्रुतस्योपयोगापेक्षया द्रष्टव्या न तु लब्ध्यपेक्षया, लब्धेः समकालतया भवनात्, एतच्च प्रागेवोक्तं, न मतिः श्रुतपूर्विका, तथानुभवाभावात्, ततो महान् मतिश्रुतयोर्भेदः।

इतश्च भेदो भेदभेदात्, तथाहि- चतुर्द्धा व्यञ्जनावग्रहः, षोढाऽर्थावग्रहः अवग्रहेहापाय-धारणाभेदादष्टाविंशतिविधमाभिनिबोधिकज्ञानम् अङ्गानङ्गप्रविष्टादिभेदभिन्नं च श्रुतज्ञान-मिति। तथा इन्द्रियविभागतश्च भेदः, तत्प्रतिपादिका चेयं पूर्वान्तर्गता गाथा -

"सोइंदियओवलद्धी होइ सुयं सेसयं तु मइनाणं।
मोत्तूणं दव्वसुयं अक्खरलंभो य सेसेसुं॥"

अस्या व्याख्या- श्रोत्रेन्द्रियेणोपलब्धिः श्रोत्रेन्द्रियोपलब्धिर्भवति श्रुतं, 'सर्वं वाक्यं सावधारण-मिष्टितश्चावधारणविधिः' तत एवमिहावधारणं द्रष्टव्यं- श्रुतं श्रोत्रेन्द्रियेणोपलब्धिरेव, न तु श्रोत्रे-न्द्रियेणोपलब्धिः श्रुतमेव, कस्मादिति चेत्, उच्यते, इह श्रोत्रेन्द्रियोपलब्धिरपि या श्रुतग्रन्थानु-सारिणी सैव श्रुतमुच्यते, या पुनरवग्रहेहापायरूप सा मतिः, ततो यदि श्रोत्रेन्द्रियेणोपलब्धिः श्रुतमेवेत्युच्यते तर्हि मतेरपि श्रुतत्वमापद्यते तच्चायुक्तमतः श्रोत्रेन्द्रियेणोपलब्धिरेव श्रुतमित्यव-धारणीयं, आह च भाष्यकृत्-

"सोइंदियावलद्धी चेव सुयं न उतई सुयं चेव।
सोइंदिआवलद्धीऽवि काइ जम्हा मईनाणं॥"

तथा 'सेसयं तु मइनाणमिति' शेषं यत् चक्षुरादीन्द्रियोपलब्धिरूपं विज्ञानं तत् मतिज्ञानं भवतीति सम्बध्यते, तुशब्दोऽनुक्तसमुच्चयार्थः, तत आस्तां शेषं विज्ञानं श्रोत्रेन्द्रियेणोपलब्धि-रपि काचिदवग्रहेहापायरूपा मतिज्ञानमिति समुच्चिनोति, उक्तं च-

"तु समुच्चयवयणाओ काई सोइंदिओवलद्धीऽवि।
मइ एवं सइ सोउग्गहादयो होंति मइभेया॥"

तदेवं सर्वस्याः शेषेन्द्रियोपलब्धेरुत्सर्गेण मतिज्ञानत्वे प्राप्ते सत्यपवादमाह- 'मोत्तूणं दव्वसुयं' मुक्त्वा द्रव्यश्रुतं, किमुक्तं भवति- मुक्त्वा पुस्तकपत्रकादिन्यस्ताक्षररूपद्रव्यश्रुतविषयां शब्दार्थपर्यालोचनात्मिकां शेषेन्द्रियोपलब्धिं, तस्याः श्रुतज्ञानरूपत्वात्, यच्च द्रव्य-श्रुतव्यतिरेकेणान्योऽपि शेषेन्द्रियेष्वक्षरलाभः- शब्दार्थपर्यालोचनात्मकः सोऽपि श्रुतं, न तु केवलोऽक्षरलाभः, केवलो ह्यक्षरलाभो मतावपीहादिरूपायां भवति, न च सा श्रुतज्ञानं, अत्राह- ननु यदि शेषेन्द्रियेष्वक्षरलाभः श्रुतं तर्हि यदधावरणमुक्तं- श्रोत्रेन्द्रियेणोपलब्धिरेव श्रुतमिति तद्विघटते, शेषेन्द्रियोपलब्धेरपि सम्प्रति श्रुतत्वेन प्रतिपन्नत्वात्, नैष दोषः, यतः शेषेन्द्रियाक्षर-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लाभः स इह गृह्यते यः शब्दार्थपर्यायलोचनात्मकः, शब्दार्थपर्यालोचनानुसारी चाक्षरलाभः श्रोत्रेन्द्रियोपलब्धिकल्प इति न कश्चिद्दोषः ।

इतश्च मतिश्रुतयोर्भेदो-वल्कसमं मतिज्ञानं, कारणत्वात्, शुम्बसमं श्रुतज्ञानं, तत्कार्यत्वात्, ततो यथा वल्कशुम्बयोर्भेदस्तथा मतिश्रुतयोरपि। इतश्च भेदो-मतिज्ञानमनक्षरं साक्षरं च, तथाहि-अवग्रहज्ञानमनक्षरं, तस्यानिर्देश्यसामान्यमात्रप्रतिभासात्मकतया निर्विकल्पकत्वाद्, ईहादिज्ञानं साक्षरं, तस्य परामर्शादिरूपतयाऽवश्यं वर्णारुषितत्वात्, श्रुतज्ञानं पुनः साक्षरमेव, अक्षरमन्तरेण शब्दार्थपर्यालोचनस्यानुपपत्तेः ।

इतश्च मतिश्रुतयोर्भेदो-मूककल्पं मतिज्ञानं, स्वमात्रप्रत्यायनफलत्वात्, अमूककल्पं श्रुतज्ञानं, स्वपरप्रत्यायकत्वान्, तथा चामूनेव भेदहेतून् भाष्यकृत् संगृहीतवान्-

"लक्खणभेया हेऊफलभावा भेयइंदियविभागा।
वागक्खरमूयेयरभेया भेओ मइसुयाणं॥"

यथा च मतिश्रुतयोः कार्यकारणभावात् मिथो भेदः तथा सम्यग्दर्शनमिथ्यादर्शनपरिग्रहभेदात् स्वरूपतोऽपि तयोः प्रत्येकं भेदः, तथा चाह-

*मू. ( १४ )अविसेसिआ मई मइनाणं च मइअन्नाणं च, विसेसिआ सम्मद्दिट्ठिस्स मई मइनाणं मिच्छदिट्ठिस्स मई मइअन्नाणं, अविसेसिअं सुयं सुयनाणं च सुयअन्नाणं च, विसेसिअं सुयं सम्मदिट्ठिस्स सुयं सुअनाणं मिच्छद्दिट्ठिस्स सुअं सुयअन्नाणं ॥*

**वृ.** स्वामिना अविशषिता-स्वामिविशेषपरिग्रहमन्तरेण विवक्ष्यमाणा मतिर्मतिज्ञानं मत्यज्ञानं चोच्यते, सामान्येनोभयत्रापि मतिशब्दप्रवृत्तेः, विशेषता-स्वामिना विशेष्यमाणा सम्यग्-दृष्टेर्मतिर्मतिज्ञानमुच्यते, तस्या यथावस्थितार्थग्राहकत्वात्, मिथ्यादृष्टेर्मतिर्मत्यज्ञानं, तस्य एकान्तावलम्बितया यथावस्थितार्थग्रहणाभावात्, एवं श्रुतसूत्रमपि व्याख्येयं।

आह-मिथ्यादृष्टेरपिमतिश्रुते सम्यग्दृष्टेरिव तदावरणक्षयोपशमसमुद्भवे सम्यग्दृष्टेरिव च पृथुबुध्नोदराद्याकारं घटादिकं च संविदाते तत्कथं मिथ्यादृष्टेरज्ञाने ? उच्यते, सदसद्विवेक-परिज्ञानाभावात्, तथाहि-मिथ्यादृष्टिः सर्वमप्येकान्तपुरस्सरं प्रतिपद्यते, न भगवदुक्तस्याद्वाद-नीत्या, ततो घट एवायमिति सदा ब्रूते तदा तस्मिन् घटे घटपर्यायव्यतिरेकेण शेषान् सत्त्वज्ञेयत्व-प्रमेयत्वादीन् सतोऽपि धर्मानपलपति, अन्यथा घट एवायमित्येकान्तेनावधारणानुपपत्तेः, घटः सन्नेवेति च ब्रुवाणः पररूपेण नास्तित्वस्यानभ्युपगमात् पररूपतामसतीमपि तत्र प्रतिपद्यते, ततः सन्तमसन्तं प्रतिपद्यते असन्तं च सन्तमिति सदसद्विशेषपरिज्ञानाभावादज्ञाने मिथ्या-दृष्टेर्मतिश्रुते, इतश्च ते मिथ्यादृष्टेरज्ञाने, भवहेतुत्वात्, तथाहि-

मिथ्यादृष्टीनां मतिश्रुते पशुवधमैथुनादीनां धर्म्मसाधकत्वेन परिच्छेदके, ततो दीर्घतरसंसार-पथप्रवर्त्तिनी, तथा यदृच्छोपलम्भादुन्मत्तकविकल्पवत्, यथा हि उन्मत्तकविकल्पावस्त्वन-पेक्ष्यैव यथाकथञ्चित् प्रवर्त्तन्ते, यद्यपि च ते कचिद्यथावस्थितवस्तुसंवादिनस्तथापि सम्यग्-यथावस्थितवस्तुतत्त्वपर्यालोचनाविरहेण प्रवर्त्तमानत्वात्, परमार्थतोऽपारमार्थिकाः, तथा मिथ्यादृष्टीनां मतिश्रुते यथावस्थितं वस्त्वविचार्यैव प्रवर्त्तेते, ततो यद्यपि च ते कचिद्रसोऽयं स्पर्शोऽयमित्यादावधारणाध्यवसायभावे संवादिनी तथापि न ते स्याद्वादमुद्रापरिभावना-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्तथाप्रवृत्ते, किन्तु यथाकथञ्चिद्, अतस्तं अज्ञाने, तथा ज्ञानफलाभावात्, ज्ञानतस्य हि फलं हेयस्य हानिः उपादेयस्य चोपादानं, न च संसारात्परं किञ्चिद्धेयमस्ति न च मोक्षात्परं किञ्चिदु-पादेयं, ततो भवमोक्षावेकान्तेन हेयोपादेयौ, भवमोक्षयोश्च हान्युपादाने सर्वसङ्गविरतेर्भवतः, ततः साऽवश्यं तत्त्ववेदिना कर्त्तव्या, सैव च परमार्थतो ज्ञानस्य फलं, तथा चाह भगवानु-मास्वातिवाचकः-"ज्ञानस्य फलं विरति"रिति, सा च मिथ्यादृष्टेर्न विद्यते इति ज्ञानफलाभा-वादज्ञाने मिथ्याष्टेर्मतिश्रुते, तथा चामूनेवाज्ञानत्वे हेतून् भाष्यकृदपि पठति-

"सयसयविसेसणाओ भवहेउजहिच्छिओवलंभाओ।
नाणफलाभावाओ मिच्छद्दिट्ठिस्स अन्नाण ॥"

इह मतिपूर्वं श्रुतमित्युक्तं, ततो मतिज्ञानमेवाधिकृत्य शिष्यः प्रश्नयति-

*मू. ( १५ )से किं तं आभिनिबोहिअनाणं ?, आभिनिबोहियनाणं दुविहं पन्नत्तं, तंजहा-सुयनिस्सियं च अस्सुयनिस्सिअं च ॥ किं तं असुअनिस्सिअं ?, असुअनिस्सिअं चउव्विहं पन्नत्तं, तंजहा-*

**वृ.** 'से किं त'मित्यादि, अथ किं तदाभिनिबोधिकज्ञानं ?, सूरिराह-आभिनिबोधिकज्ञानं द्विविधं प्रज्ञप्तं, तद्यथा-श्रुतनिश्रितं च अश्रुतनिश्रितं च, तत्र शास्त्रपरिकर्मितमतेरुत्पादकाले शास्त्रार्थपर्यालोचनमनपेक्ष्यैव यदुपजायते मतिज्ञानं तत् श्रुतनिश्रितम्-अवग्रहादि, यत्पुनः सर्वथा शास्त्रसंस्पर्शरहितस्य तथाविधक्षायोपशमभावात एवमेव यथावस्थितवस्तुसंस्पर्शि मति-ज्ञानमुपजायते तत् अश्रुतनिश्रितमौत्पत्तिक्यादि, तथा चाह भाष्यकृत-

"पुव्वं सुअपरिकम्मियमइस्स जं संपयं सुयाईयं।
तन्निस्सियमियरं पुण अनिस्सियं मइचउक्कं तं ॥"

आह- औत्पत्तिक्यादिकमप्यवग्रहादिरूपमेव तत्कोऽनयोर्विशेषः ?, उच्यते, अवग्रहादि-रूपमेव, परं शास्त्रानुसारमन्तरेणोत्पद्यते इति भेदोनोपन्यस्तं ॥ तत्राल्पतरवक्तव्यत्वात् प्रथमम-श्रुतनिश्रितमतिज्ञानप्रतिपादनायाह- 'से किं त'मित्यादि, अथ किं तत् अश्रुतनिश्रितं ?, सूरिराह-अश्रुतनिश्रितं चतुर्विधं प्रज्ञप्तं, तद्यथा 'उप्पत्तिआ'गाहा,

*मू. ( १६ ) उप्पत्तिआ १ वेणइआ २ कम्मया ३ परिणामिआ ४ ।*
*बुद्धी चउव्विहा वुत्ता, पंचमा नोवलब्भइ ॥*

**वृ. ( १६ )** उत्पत्तिरेव न शास्त्राभ्यासकर्मपरिशीलनादिकं प्रयोजनं-कारणं यस्याः सा औत्पत्तिकी, 'तदस्य प्रयोजन'मितीकन्, ननु सर्वस्या बुद्धेः कारणं क्षयोपशमः तत्कथमुच्यते-उत्पत्तिरेव प्रयोजनमस्या इति ?, उच्यते, क्षयोपमशः सर्वबुद्धिसाधारणः, ततो नासौ भेदेन प्रतिपत्तिनिबन्धनं भवति, अथ च बुद्धन्तराद्भेदेन प्रतिपत्त्यर्थं व्यपदेशान्तरं कर्त्तुमारब्धं, तत्र व्यपदेशान्तरनीमित्तमत्र न किमपि विनयादिकं विद्यते, केवलमेवमेव तथोत्पत्तिरिति सैव साक्षान्निर्दिष्टा।

तथा विनयो-गुरुशुश्रूषा सप्रयोजनमस्या इति वैनयिकी।

तथा अनाचार्यकं कर्म साचार्यकं शिल्पं, अथवा कादाचित्कं शिल्पं सर्वकालिकं कर्म, कर्मणो जाता कर्मजा।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथा परि-समन्तान्नमनं परिणामः-सुदीर्घकालपूर्वापरपर्यालोचनजन्य आत्मनो धर्मविशेषः स प्रयोजनमस्याः सा पारिणामिकी।

बुध्यतेऽनयेति बुद्धिः, सा चतुर्विधा उक्ता तीर्थंकरगणधरैः, किमिति ?, यस्मात्, पञ्चमी केवलिनाऽपि नोपलभ्यते, सर्वस्याप्यश्रुतनिश्रितमतिविशेषस्यौत्पत्तिक्यादिबुद्धिचतुष्टय एवान्तर्भावात्। तत्र 'यथोद्देशं निर्देश' इति न्यायात्प्रथममौत्पत्तिक्या लक्षणमाह-

*मू. (९७) पुव्वं अदिट्ठमस्सुअमवेइयतक्खणविसुद्धगहिअत्था।*
*अव्वाहयफलजोगा बुद्धी उप्पत्तिआ नाम॥*

वृ. आसामर्थः कथानकेभ्योऽवसेयः, तानि च कथानकानि विस्तरतोऽभिधीयमानानि ग्रन्थगौरवमापादयन्ति ततः संक्षेपेणोच्यन्ते।

उज्जयनी नाम पुरी, तस्याः समीपवर्त्ती कश्चिन्नटानामेको ग्रामः, तत्र च ग्रामे भरतो नाम नटः, तस्य भार्या परासुरभूत्, तनयश्चास्य रोहकाभिधोऽद्याप्यल्पवयाः, ततः सत्वरमेव स्वस्य स्वतनस्य च शुश्रूषाकरणायान्या समानिव्ये वधूः, सा च रोहकस्य सम्यग् न वर्त्तते, ततो रोहकेण सा प्रत्यपादि-मातर्न मे त्वं सम्यग् वर्त्तसे ततो ज्ञास्यसीति, ततः सो सेर्ष्यमाह-रे रोहक ! किं करिष्यसि ?, रोहकोऽप्याह-तत्करिष्यामि येन त्वं मम पादयोरागत्य लगिष्यसीति, ततः सा तमवज्ञानय तूष्णीमतिष्ठत्, रोहकोऽपि तत्कालादारभ्य गाढसञ्जाताभिनिवेशोऽन्यदा निशि सहसा पितरमेवमभाणीत्-भो भोः पितरेष पलायमानो गोहो याति, तत एवं बालकवचःश्रुत्वा पितुराशङ्का समुदपादि-नूनं विनष्टा मे महेलेति, तत एवमाशङ्कावशात्तस्यामनुरागः शिथिलीबभूव, ततो न तां सम्यक् संभाषते, नापि विशेषतस्तस्यै पुष्पताम्बूलादिकं प्रयच्छति दूरतः पुनरपास्तं शयनादि, ततः सा चिन्तयामास-नूनमिदं बालकविचेष्टितम्, अन्यथा कथमकाण्ड एवैष दोषा-भावे पराङ्मुखो जातः ?, ततो बालकमेवमवादीत्,-वत्स ?, रोहक किमिदं त्वया चेष्टितं ?, तव पिता मे सम्प्रति दूरं पराङ्मुखीभूतः,

रोहक आह-किमिति तर्हि न सम्यग् मे वर्त्तसे !, तयोक्तम्-अत ऊर्ध्वं सम्यग् वर्त्तिष्ये, ततो बालक आह-भव्यं, तर्हि मा खेदं कार्षीः तथा करिष्ये यथा मे पिता तथैव त्वयि वर्त्तते इति, ततः सा तत्कालादारभ्य सम्यग्वर्त्तितुं प्रवृत्ता, रोहकोऽप्यन्यदा निशि निशाकरप्रकाशितायां प्राक्तनकदाशङ्कापनोदाय बालभावं प्रकटयन् निजच्छायामंगुल्यग्रेण दर्शयन् पितरमेवाह-भोः पितरेष गोहो याति गोहो यातीति, तत एवमुक्ते स पिता परपुरुषप्रवेशाभिमानतो निष्प्रत्याकारं कृपाणमुद्गीर्य प्राधावत्, रे कथय कुत्र यातीति ?, ततः स रोहको बालको बालक्रीडां प्रकटयन्नंगुल्यग्रेण निजच्छायां दर्शयति-पतिरेष गोहो यातीति, ततः स पिता व्रीडीत्वा प्रत्यावृत्य चिन्तयति स्म च स्वचेतसि-प्राक्तनोऽपि पुरुषो नूनमेवंविध एवासीदिति धिग्मया बालक-वचनादलीकं संभाव्य विप्रियमेतावन्तककालं कृतमस्यां भार्यायामिति पश्चात्तापाद्गाढतर-मस्यामनुरक्तो बभूव, सोऽपि रोहको मया विप्रियं कृतमास्तेऽ(मस्त्य)स्या इति कदाचिदेषां मां विषादिना मारयिष्यतीति विचिन्त्य सदैव पिता सह भुंक्ते न कदाचिदपि केवलः, अन्यदा पित्रा सहोज्जयिनीं पुरीमगमत्, दृष्टा च तेन त्रिदशपुरीवोज्जयिनी, सविस्मचेतसा च सकलाऽपि यथावत्परिभाविता, ततः पित्रैव सह नगर्या निर्यातुमारेभे,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पिता च किमपि मे विस्मृतमिति रोहकं सिप्रानदीतटेऽवस्थाप्य तदानयनाय भूयोऽपि नगरीं प्राविक्षत्, रोहकोऽपि च तत्र सिप्राभिधसिन्धुसैकते बालचापलवशात् सप्राकारां परिपूर्णामपि पुरीं सिकताभिरालिखत्, इतश्च राजा अश्ववाहनिकायामश्वं वाहयान् कथञ्चिदेकाकीभूतस्तेन पथा समागन्तुं प्रावर्त्तत, तं च स्वलिखितनगरीमध्येन समागच्छन्तं रोहकोऽवादीत्-भो राजपुत्र! माऽनेन पथा समागमः, तेनोक्तं-किमिति?, रोहक आह-किं त्वं राजकुलमिदं न पश्यसि ?, स राजा कौतुकवशात् सकलामपि नगरीं तदालिखितामवेक्षत, पप्रच्छ च तं बालकं-रे अन्यदा त्वया नगरी दृष्टाऽऽसीन्न वा?, रोहक आह-नैव कदाचित् केवलमहमद्यैव स्वग्रामादिहागतः, ततश्चिन्तयामास राजा-अहो बालकस्य प्रज्ञातिशय इति, ततः पृष्टो रोहकोवत्स! किं ते नाम क्व वा ग्राम इति ?, तेनोक्तं-रोहक इति मे नाम, प्रत्यासन्ने च पुरो ग्रामे वसामीति, अत्रान्तरे समागतो रोहकस्य पिता, चलितौ च स्वग्रामं प्रति द्वावपि,

राजा च स्वस्थानमगमत्, चिन्तयति स्म च-ममैकोनानि मन्त्रिणां पञ्च शतानि विद्यन्ते, तद्यदि सकलमन्त्रिमण्डलमूर्धाभिषिक्तो महाप्रज्ञाऽतिशायी परमो मन्त्री सम्पद्यते ततो मे राज्यं सुखेनैधते, बुद्धिबलोपेतो हि राजा प्रायः शेषबलैरल्पबलोऽपि न पराजयस्थानं भवति परांश्च राज्ञो लीलया विजयते, एवं च चिन्तयित्वा कतिपयदिनान्तरं रोहकबुद्धिपरीक्षानिमित्तं सामान्यतो ग्रामप्रधानपुरुषानुद्दिश्यैवमादिष्टवान्-यथा युष्मद्ग्रामस्य बहिरतीव महती शिला वर्त्तते तामनुत्पाट्य राजयोग्यमण्डपाच्छादनं कुरुत, तत एवमादिष्टे सकलोऽपि ग्रामो राजादेशं कर्त्तुमशक्यं परिभावयन्नाकुलीभूतमानसो बहिः सभायामेकत्र मिलितवान्, पृच्छति स्म परस्परं-किमिदानीं कर्त्तव्यं ?, दुष्टो राजादेशोऽस्माकमापतितो, राजादेशाकरणे च महाननर्थोपनिपातः, एवं च चिन्तया व्याकुलीभूतानां तेषां मध्यन्दिनमागतं, रोहकश्च पितरमन्तरेण न भुंक्ते, पिता च ग्राममेलापके मिलितो वर्त्तते, ततः स क्षुधा पीडितः पितुः समीपे समागत्य रोदितुं प्रावर्त्ततपीडितोऽहमतीव क्षुधा, ततः समागच्छ गृहे भोजनायेति, भरतः प्राह-वत्स! सुखितोऽसि त्वं, न किमपि ग्रामकष्टं जानासि, स प्राह-पितः! किं किं तदिति ?,

ततो भरतो राजादेशं सविस्तरमचीकथत्, ततो निजबुद्धिप्रागल्भ्यवशात्, झटिति कार्यस्य साध्यतां परिभाव्य तेनोक्तं-माऽऽकुलीभवत यूयं, खनत शिलाया राज्ञोचितमण्डनिष्पादनायाधस्तात् स्तम्भांश्च यथास्थानं निवेशयत भित्तीश्चोपलेपनादिना प्रकारेणातीव रमणीयाः प्रगुणीकुरुत, तत एवमुक्ते सर्वैरपि ग्रामप्रधानपुरुषैर्भव्यमिति प्रतिपन्नः, गतः सर्वोऽपि ग्रामलोकः स्वस्वगृहे भोजनाय, भुक्त्वा च समागतः शिलाप्रदेशे, प्रारब्धं तत्र कर्म, कतिपयदिनैश्च निष्पादितः परिपूर्णो मण्डपः, कृता च शिला तस्याच्छादनं, निवेदितं च राज्ञे राजनियुक्तैः पुरुषैः-देव! निष्पादितो ग्रामेण देवादेशः, राजा प्राह-कथमिति!, ततस्ते सर्वमपि मण्डपनिष्पादनप्रकारं कथमायासुः, राजा प्रपच्छ-कस्येयं बुद्धिः ?, तेऽवादिषुः-देव! भरतपुत्रस्य रोहकस्य, एषा रोहकस्यौत्पत्तिकी बुद्धिः।

एवं सर्वेष्वपि संविधानकेषु योजनीयं, ततो भूयोऽपि राजा रोहकबुद्धिपरीक्षार्थं मेण्ढकमेकं प्रेषितवान्, एष यावत्पलप्रमाणः सम्प्रति वर्त्तते पक्षातिक्रमेऽपि तावत्पलप्रमाण एव समर्पणीयो, न न्यूनो नाप्यधीक इति, तत एवं राजादेशे समागते सति सर्वोऽपि ग्रामो व्याकुलीभूतचेता

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वहिः सभायामेकत्र मिलितवान्, सगौरवमाकारितो रोहकः, आभाषितश्च ग्रामप्रधानैः पुरुषैः-वत्स! प्राचीनमपि दुष्टराजादेशसिन्धुं त्वयैव निजबुद्धिसेतुबन्धेन समुत्तारितः सर्वोऽपि ग्रामः, ततः सम्प्रत्यपि प्रगुणीकुरुनिजबुद्धिसेतुबन्धं येनास्यापि दुष्टराजादेशसिन्धोः पारमधिगच्छाम इति, तत उवाच रोहको-वृकं प्रत्यासन्नं धृत्वा मेण्ढकमेनं यवसदानेन पुष्टीकुरुत, यवसं हि भक्षयन्नेष न दुर्बलो भविष्यति, वृकं च दृष्ट्वा न बलवृद्धिमाप्स्यतीति, ततस्ते तथैव कृतवन्तः, पक्षातिक्रमे च तं राज्ञः समर्प्पयामासुः, तोलने च स तावत्पलप्रमाण एव जातः।

ततो भूयोऽपि कतिपयदिनानन्तरं राज्ञा कुर्कुटः प्रेषितः, एष द्वितीयं कुर्कुटं विना योधितव्य इति, एवं सम्प्राप्ते राजादेशे मिलितः सर्वोऽपि ग्रामो बहिः सभायाम् आकारितो रोहकः कथितश्च तस्य राजादेशः, ततो रोहकेणादर्शको महाप्रमाण आनायितो निमृष्टश्च भूत्या सम्यक्, ततो धृतः पुरो राजकुर्कुटस्य, ततः स राजकुर्कुटः प्रतिबिम्बमात्मीयमादर्शे दष्टवा मत्प्रतिपक्षोऽयमपरः कुर्कुट इति मत्वा साहङ्कारं योद्धुं प्रवृत्तो, जडचेसो हि प्रायस्तिर्यञ्चोअ भवन्ति, एवं चापरकुर्कुट-मन्तरेण योधिते काजकुर्कुटे विस्मितः सर्वोऽपि ग्रामलोकः, सम्पादितो राजादेशः, निवेदितं च राज्ञो निजपुरुषैः। ततो भूयोऽपि कतिपयदिवसातिक्रमे राजा निजादेशं प्रेषितवान्युष्मद्-ग्रामस्य सर्वतः समीपे अतीव रमणीया वालुका विद्यन्ते, ततः स्थूला वालुकामयाः कतिपये दवरकाः कृत्वा शीघ्रं प्रेषणीया इति, एवं राजादेशे समागते मिलितः सर्वोऽपि बहिः सभायां ग्रामः पृष्टश्च रोहकः, ततो रोहकेण प्रत्युत्तरमदायि-नटा वयं, ततो नृत्तमेव वयं कर्त्तुं जानीमो न दवरकादि, राजादेशश्चावश्यं कर्त्तव्यः, ततो बृहद्राजकुलमिति चिरन्तना अपि कतिचिद्वालु-कामया दवरका भविष्यन्तीति तन्मध्यादेकः कश्चित् प्रतिच्छन्दभूतः प्रेषणीयो येन तदनुसारेण वयमपि वालुकामयान् दवरकान् कुर्म इति, ततो निवेदितमेतद्राज्ञे नियुक्तपुरुषैः, राजा च निरुत्तरीकृतस्तूष्णीमास्ते।

ततः पुनरपि कतिचिद्दिनानन्तरं जीर्ण्णहस्ती रोगग्रस्तो मुमूर्षुर्ग्रामे राज्ञा प्रेषितो, यथाऽयं हस्ती मृत इति न निवेदनीयो, अथ च प्रतिदिवसमस्य वार्त्ता कथनीया, अकथने महान् ग्रामस्य दण्डः, एवं च राजादेशे समागते तथैव मिलितः सर्वोऽपि बहिः सभायां ग्रामः, पृष्टश्च रोहकः, ततो रोहकेणोक्तं-दीयतामस्मै यवसः पश्चाद् यद्भविष्यति तत्करिष्यामि, ततो रोहकादेशेन दत्तो यवसस्तस्मै, रात्रौ च स हस्ती पञ्चत्वमुपागमत्, ततो रोहकवचनतो ग्रामेण गत्वा राज्ञे निवदितंदेव! अद्य हस्ती न निषीदति नोत्तिष्ठति न कवलं गृह्णाति नापि नीहारं करोति नाप्युच्छ्वा-सनिश्वासौ विदधाति, किं बहुना?, देव! कामपि सचेतनचेष्टां न करोति, ततो राज्ञा भणितं-किं रे मृतो हस्ती?, ततो ग्राम आह-देव! देवपादा एवं ब्रुवते, न वयमिति, तत एवमुक्ते राजा मौनमाधाय स्थितः आगतो ग्रामलोकैः स्वग्रामे। ततो भूयोऽपि कतिपयदिनातिक्रमो राजा समादिष्टवान्-अस्ति यौषमाकीणे ग्रामे सुस्वादुजलसम्पूर्णः कूपः, स इह सत्वरं प्रेषितव्यः तत एवमादिष्टे ग्रामो रोहकं पृष्टवान्, रोहकश्चोवाच-एष ग्रामयेकः कूपो, ग्रामयेकश्च स्वभावाद्-भीरुर्भवति न च सजातीयमन्तरेण विश्वासमुपगच्छति, ततो नागरिकः कश्चिदेकः कूपः प्रेष्यतां येन तत्रैष विश्वस्य तेन सह समागच्छतीति, एवं निरुत्तरीकृत्य मुत्कलिता राजनियुक्ताः पुरुषाः, तैश्च राज्ञो निवेदितं, राजा स्वचेतसि रोहकस्यबुद्ध्यतिशयं परिभाव्य मौनमवलम्ब्य स्थितः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततो भूयोऽपि कतिपयवासरातिक्रमेऽभिहितवान्-वनखण्डो ग्रामस्य पूर्वस्यां दिशिवर्त्तमानः पश्चिमायां दिशि कर्त्तव्य इति, अस्मिन्नपि राजादेशे समागते ग्रामो रोहकबुद्धिमुपजीव्य वनखण्डस्य पूर्वस्यां दिशि व्यवतिष्ठत, ततो जातो ग्रामस्य पश्चिमायां दिशि वनखण्डः, निवेदितं राज्ञो राजनियुक्तैः पुरुषैः । ततः पुनरपि कालान्तरे राजा अदिष्टवान्-वह्निसम्पर्कमन्तरेण पायस् पक्तव्यमिति, तत्रापि सर्वो ग्राम एकत्र मिलित्वा रोहकमपृच्छत्, रोहकश्चोक्तवान्-तन्दुलानतीव जलेन भिन्नान् कृत्वा दिनकरकरनिकरसन्तप्तकरीषपपलालादीनामूष्मणि तन्दुलपयोभृता स्थाली निवेश्यतां येन परमान्नं सम्पद्यते, तथैव कृतं, जातं परपान्नं, निवेदितं राज्ञो, विस्मितं तस्य चेतः

ततो राज्ञा रोहकस्य बुद्ध्यतिशयमवगम्य तदाकारणाय समादिष्टं-येन बालकेन ममादेशाः सर्वेऽपि प्रायः स्वबुद्धिवशात् सम्पादिताः तेन चावश्यमागन्तव्यं, परं न शुक्लपक्षे नापि कृष्णपक्षे न रात्रौ न दिवा न छायायां नाप्यातपेन नाकाशेन नापि पादाभ्याम् न पथा नाप्युत्पथेन न स्नातेन नास्नातेन, तत एवमादिष्टे स रोहकः कण्ठस्नानं कृत्वा गन्त्रीचक्रस्य मध्यभूमिभागेन ऊरणमारूढो घृतचालनीरूपातपत्रः सन्ध्यासमयेऽमावास्याप्रतिपत्सङ्गमे नरेन्द्र पार्श्वमगमत्, स च 'रिक्तहस्तो न पश्येच्च, राजानं देवतां गुरु' मिति लोकश्रुतिं परिभाव्य पृथिवीपिण्डमेकमादाय गतः, प्रणतो राजा, मुक्तश्च तत्पुरतः पृथिवीपिण्डः, ततः स पृष्टो राज्ञा रोहकः रे रोहक ! किमेतत् ?, रोहकोऽवादीत्देव ! देवपादा ! पृथिवीपतयस्ततो मया पृथिवी समानीता, श्रुत्वा चेदं प्रथमदर्शने मङ्गलवचस्तुतोष राजा, मुत्कलितः शेषो ग्रामलोकः, रोहकः पुनरात्मपार्श्वे शायितः, गते च यामिन्याः प्रथमयामे रोहकः शब्दितो राज्ञा-रे जागर्षि किं वा स्वपिषि ?, स प्राह-देव ! जागर्मि, रे तर्हि किं चिन्तयसि ?, स प्राह-देव ! अश्वत्थपत्राणां किं दण्डो महान् उत शिखेति ?,

तत एवमुक्ते राजा संशयमापन्नो वदति-साधु चिन्तितं, कोऽत्र निर्णयः ?, ततो राजा तमेव पृष्टवान्-रे कथय कोऽत्र निर्णय इति ?, तेनोक्तं-देव ! यावदद्यापि शिखाग्रभागो न शोषमुपयाति तावद्वे अपि समे, ततो राज्ञा पार्श्ववर्त्ती लोकः पृष्टः, तेन च सर्वेणाप्यविगानतः प्रतिपन्नं । ततः भूयोऽपि रोहकः सुप्तवान्, पुनरपि द्वितीये यामेऽपगते राज्ञा शब्दितः पृष्टश्च-किं जागर्षि किं वा स्वपिषि ?, स प्राह-देव ! जागर्म्मि, रे किं चिन्तयसि ?, देव ! छागिकाया उदरे कथं भ्रम्युत्तीर्णा इव वर्त्तुलगुलिका जायन्ते ?, तत एवमुक्ते राजा संशयापन्नस्तमेव पृष्टवान्- कथय रे रोहक ! कथमिति ?, स प्राह-देव ! संवर्त्तकाभिधवातविशेषात् । तः पुनरपि रोहकः सुष्वाप, तृतीये च रजन्या यामेऽपगते भूयोऽपि राज्ञा शब्दितः-किं रे जागर्षि किं वा स्वपिषि ?, सोऽवादीत्-देव ! जागर्मि, किं रे चिन्तयसि ?, देव ! षाडहिलाजीवस्य यावन्मात्रं शरीरं तावन्मात्रं पुच्छमुत न्यूनाधिकमिति ?, तत एवमुक्तो राजा निर्णयं कर्त्तुमशक्तस्तमेवापृच्छत्-कोऽत्र निर्णयः ?, साऽवादीद्-देव ! सममिति । ततो रोहकः सुप्तः प्राभातिके च मङ्गलपटहनिस्वने सर्वत्र प्रसरमधिरोहित राजा प्रबोधमुपजगाम, शब्दितवांश्च रोहकं, स च निद्राभरमुपारूढो न प्रतिवाचं दत्तवान्, ततो राजा लीलाकम्बिकया मनाक् तं स्पृष्टवान्,

ततः सोऽपगतनिद्रो जातः, पृष्टश्च किं रे स्वपिषि ?, स प्राह-देव ! जागर्मि, किं रे तर्हि कुर्वंस्तिष्ठसि ?, देव ! चिन्तयन्, किं चिन्तयसि ?, देव ! एतच्चिन्तयामि-कतिभिर्जातो देव

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति, तत एवमुक्ते राजा सव्रीडं मनाक् तूष्णीमतिष्ठान्, ततः क्षणानन्तरं पृष्टवान् कथय रे कतिभिरहं जात इति ? स प्राह-देव ! पञ्चभिः, राजा भूयोऽपि पृष्टवान्-केन केनेति ?, रोहक आह-देव ! एकेन तावद्वैश्रवणेन, वैश्रवणस्येव भवतो दानशक्तिदर्शनात्, द्वितीयेन चाण्डालने, वैरिसमूहं प्रति चाण्डालस्येव कोपदर्नात्, तृतीयेन रजकेन, यतो रजक इव वस्त्र परं निष्पीड्य तस्य सर्वस्वमुपहरन् दृश्यते, चतुर्थेन वृश्चिकेन, यन्मामपि बालकं निद्राभरसुप्तं लीलाकम्बिकाग्रेण वृश्चिक इव निर्दयं तुदसि, पञ्चमेन निजपित्रा, येन यथावस्थितं न्यायं सम्यक् परिपालयसि, एवमुक्ते राजा तूष्णीमास्थाय प्राभातिकं कृत्यमकार्षीत्, जननी च नमस्कृत्यैकान्ते पृष्टवान्-कथय मातः ! कतिभिरहं जात इति, सा प्राह-वत्स ! किमेतत् प्रष्टव्यं ?, निजपित्रा त्वं जातः,

ततो राजा रोहकोक्तं कथितवान्, वदति च-मातः ! स रोहकः प्रायोऽलीकबुद्धिर्न भवति ततः कथय सम्यक् तत्त्वमिति, तत एवमतिनिर्बन्धे कृते सति सा कथयामास-यदा त्वद्-गर्भाधानमासीत् तदाऽहं बहिरुद्याने वैश्रवणपूजनाय गतवती, वैश्रवणं च यक्षमतिशायिरूपं दृष्ट्वा हस्तसंस्पर्शेन सञ्जातमन्मथोन्मादा भोगाय तं स्पृहितवती, अपान्तराले च समागच्छन्ती चण्डालयुवानमेकमतिरूपमपश्यं, ततस्तमपि भोगाय स्पृहयामि स्म, ततोऽर्वाक्तने भागे समागच्छन्ती तथैव च रजकंदृष्ट्वाऽभिलषितवती, ततो गृहमागता सती तथाविधोत्सववशाद्वृश्चिकं कणिक्कामयं भक्षणाय हस्ते न्यस्तवती, ततस्तत्संस्पर्शतो जातकाभोद्रेका तमपि भोगायासंशितवती, तत एवं यदि स्पृहामात्रेण तेऽपि पितरः सम्भवन्ति तत्र जाने, परमार्थतः पुनरेक एव ते पिता सकलजगत्प्रसिद्ध इति, तत एवमुक्ते राजा जननीं प्रणम्य रोहकबुद्धिविस्मितचेता, स्वावासप्रासादमगमत्, रोहकं च सर्वेषां मन्त्रिणां मूर्द्धाभिषिकं मन्त्रिणमकार्षित् ॥

*मू. ( १८ ) भरहसिल पणिय रुक्खे खुड्डग पड सरड काय उच्चारे*
*गय घयण गोल खंभे खुड्डग मग्गित्थि पइ पुत्ते ॥*

**वृ.** तदेवं 'भरहसिलेति' व्याख्यातं । सम्प्रति **पणियंति** व्याख्यायते-द्वौ पुरुषौ-एको ग्रामेयकोऽपरो नागरिकः, तत्र ग्रामयेकः, तत्र ग्रामयेकः स्वग्रामाच्चिर्भटिका आनयन् प्रतोलीद्वारे वर्त्तते, तं प्रति नागरिकः प्राह-यद्येताः सर्वा अपि तव चिर्भटिका भक्षयामि ततः किं मे प्रयच्छसीति ?, ग्रामेयकः प्राह-योऽनेन प्रतोलीद्वारेण मोदको न याति तं प्रयच्छामि, ततो बद्धं द्वाभ्यमपणि पणितं, कृताः साक्षिणो जनाः, ततो नागरिकेण ताः सर्वा अपि चिर्भटिका मनाक् २ भक्षयित्वा मुक्ताः, उक्तं च ग्रामेयकं प्रति-भक्षिताः सर्वा अपि त्वदीयाश्चिर्भटिकाः, ततः प्रयच्छ मे यथाप्रतिज्ञातं मोदकमिति, ग्रामेयक आह-न मे चिर्भटिका भक्षिताः, ततः कथं ते प्रयच्छामि मोदकमिति ?, नागरिकः प्राह-भक्षिता मया सर्वा अपि तव चिर्भटिकाः, यदि न प्रत्येषि तर्हि प्रत्ययमुत्पादयामि ते, तेनोक्तम्,-उत्पादय प्रत्ययं, ततो द्वाभ्यामपि विपणि-वीथ्यां विस्तारिता विक्रयाय चिर्भटिकाः, समागतो लोकः क्रयाय, ताश्च चिर्भटिका निरीक्ष्य लोको वक्ति-ननु भक्षितास्त्वदियाः सर्वा अपी चिर्भटिकास्तकथं वयं गृह्णीमः ?, एवं च लोकेनोक्ते साक्षिणां ग्रामेयकस्य च प्रतीतिरुदपादि, क्षुभितो ग्रामेयकः-हा कथं न नाम मया तावत्प्रमाणो मोदको दातव्य ?, ततः स भयेन कम्पमनो विनयनम्रो रूपकमेकं प्रयच्छति, नागरिको नेच्छति, ततो द्वे रूपके दातुं प्रवृत्तः तथापि नेच्छति, एवं यावत् शतमपि रूपकाणां

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नेच्छति, ततस्तेन ग्रामेयकेण चिन्तितं, हस्ती हस्तिना प्रेर्यते, ततो धूर्त्त एव नागरिको वचनेन मां छलितवान् नापरनागरिकधूर्त्त पश्चात्कर्त्तुं, शक्यते, इत्यनेन सह कतिपयदिनानि व्यवस्थां कृत्वा नागरिकधूर्त्तानवलगामि, तथैव कृतवान्, दत्ता चैकेन नागरिकधूर्त्तेन तस्मै बुद्धिः, ततस्तद्बुद्धिबलेनापूपिकापणे मोदकमेकमादाय प्रतिद्वन्द्विनं धूर्त्तमाकारितवान्, साक्षिणश्च सर्वेऽप्याकारिताः, ततस्तेन सर्वसाक्षिसमक्षमिन्द्रकीलके मोदकोऽस्थाप्यत, भणितश्च मोदको-याहि २ मोदक!, स न प्रयाति, ततस्तेन साक्षिणोऽधिकृत्योक्तं - मयैवं युष्मत्पसक्षमं प्रतिज्ञातं-यद्यहं जितो भविष्यामि तर्हि स मोदको मया दातव्यो यः प्रतलाद्वारेण न निर्गच्छति, एषोऽपि न याति, तदस्मादहं मुत्कल इति, एतच्च साक्षिभिरन्यैश्च पार्श्ववर्त्तिभिर्नागरिकैः प्रतिपन्नमिति प्रतिजितः प्रतिद्वंदी धूर्त्तः द्यूतकारः, नागरिकधूर्त्तस्यौत्कपत्तिकी बुद्धिः । २

'**रुक्खे**त्ति' वृक्षोदाहरणं, तद्भावना-कचित्पथिकानां सहकारफलान्यादातुं प्रवृत्तानाम-न्तरायं मर्कटका विदधते, ततः पथिकाः स्वबुद्धिवशाद्वस्तुतत्त्वं पर्यालोच्य मर्कटानां सम्मुखं लोष्टकान् प्रेषयामासुः, ततो रोषाबद्धचेतसो मर्कटाः पथिकानां सम्मुखं सहकारफलानि प्रचि-क्षिपुः । पथिकानामौत्पत्तिकी बुद्धिः ३ ।

तथा '**खुड्डग**'त्ति अंगुलीयकाभरणं, तदुदाहरणभावना-राजगृहं नगरं, तत्र रिपुसमूहविजेता राजा प्रसेनजित्, भूयांसस्तस्य सूनवः, तेषां च सर्वेषामपि मध्ये श्रेणिको राज्ञा नृपलक्षणसम्पन्नः स्वचेतसि परिभावितः, अत एव च तस्मै न किञ्चिदपि ददाति, नापि वचसाऽपि संस्पृशति, मा शेषेरेप परासुर्विधीयेतेति बुद्धया, स च किञ्चिदप्यलभमानो मन्युभरवशात् प्रस्थितो देशान्तरं जगाम, क्रमेण वेन्नातटं नगरं, तत्र च क्षीणविभवस्य श्रेष्ठिनो विपणौ समुपविष्टः, तेन च श्रेष्ठिना तस्यामेव रात्रौ स्वप्ने रत्नाकरो निजदुहितरं परिणयन् दृष्ट आसीत्, तस्य च श्रेणिक-पुण्यप्रभावतस्तस्मिन् दिवसे चिरसंचितप्रभूतक्रयाणकविक्रेण महान् लाभः समुदपादि, म्लेच्छहस्ताच्चानर्घ्याणि महारत्नानि स्वल्पमूल्येन समपद्यन्त, ततः सोऽचिन्तयत्-अस्य महात्मानो मम समीपमुपविष्टस्य पूण्यप्रभाव एष यत् मया महति विभूतिरेतावती समासादिता, आकृतिं च तस्यातीवसमुनोहरामवलोक्य स्वचेतसि कल्पयामास-स एष रत्नाकरो यो मया रात्रौ स्वप्ने दृष्टः, ततस्तेन कृतकराञ्जलीसम्पुटेन विनयपुरस्सरमाभाषितः श्रेणिकः-कस्य यूयं प्राधूर्णकाः ?, श्रेणिक उवाच-भवतामिति, ततः स एवंभूतवचनश्रवणतो धाराहतकदम्बपुष्पमिव पुलकितसमस्ततनुयष्टिः सबहुमानं स्वगृहं नीतवान् श्रेणिकं, भोजनादिकं च सकलम-प्यात्मनोऽधिकतरं सम्पादयामास, पुण्यप्रभावं च तस्य प्रतिदिवसमात्मनो धनलाभवृद्धि-सम्भवेनासाधारणमभिसमीक्षमाणः कतिपयदिनातिक्रमे तस्मै स्वदुहितरं नन्दां दत्तवान्, श्रेणि-कोऽपि तया सह पुरन्दर इव पौलोम्या मन्मथमनोरथानापूरयन् पञ्चविधभोगलालसो बभूव ।

कतिपयवासरातिक्रमे च नन्दाया गर्भाधानं बभूव, इतश्च प्रसेनजित् स्वान्तसमयं विभाव्य श्रेणिकस्य परम्परया वार्त्तामधिगम्य तदाकारणाय सत्वरमुष्ट्रवाहनान् पुरुषान् प्रेषयामास, ते च समागत्य श्रेणिकं विज्ञप्तवन्तो-देव! शीघ्रं समागम्यतां, देवः सत्वरमाकारयति, ततो नन्दामाप-त्रसत्त्वामापृच्छय 'अम्हे रायगिहि पंडरकुडा गोवाला जइ अम्हेहिं कज्जं तो एज्जह'त्ति एतद्वाक्यं



Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्वचिल्लिखित्वा श्रेणिको राजगृहं प्रति चलितवान्, नन्दायाश्च देवलोकच्युतमहानुभावगर्भ-सत्त्वप्रभावतः एवं दौहृदमुदपादि यदहं यदि प्रवरकुञ्जरमधिरूढा निखिलजनेभ्यो धनदान-पुरस्सरमभयदानं करोमीति, पिता च तदित्थम्भूतं दौहृदमुत्पन्नं ज्ञात्वा राजानं विज्ञप्य पूरितवान्, कालक्रमेण च प्रवृत्ते प्रसवसमये प्रातरादित्यबिम्बमिव दश दिशः प्रकाशयन्नजायत परमसूनुः, तस्य च दौहृदानुसारेभाभय इति नाम चक्रे, सोऽपि चाभयकुमारो नन्दनवनान्तगर्तकल्पपादय इव तत्र सुखेन परिवर्द्धते, शास्त्रग्रहणादिकमपि यथाकालं कृतवान्,

अन्यदा च स्वमातरं पप्रच्छ-मातः ! कथं मे पिताऽभूदिति ?, ततः सा कथयामास मूलत आरभ्य सर्वं यथावस्थितं वृत्तान्तं, दर्शयामास च लिखितान्यक्षराणि, ततो मातृवचनतात्पर्या-वगमतो लिखिताक्षरार्थावगमतश्च ज्ञातमभयकुमारेण-यथा मे पिता राजगृहे राजा वर्त्तते इति, एवं च ज्ञात्वा मातरमभाणीत्-व्रजामो राजगृहे सार्थेन सह वयमिति, सा प्रत्यादीत्-वत्स ! यद्भणसि तत्करोमीति, ततोऽभयकुमारः स्वमात्रा सह सार्थेन समं चलितः, प्राप्तो राजगृहस्य बहिःप्रदेशं, ततोऽभयकुमारः तत्र मातरं विमुच्य किं वर्त्तते सम्प्रति पुरे ? कथं वा राजा दर्शनीय ? इति विचिन्त्य राजगृहपरं प्रविष्टः, तत्र च पुरप्रवेश एव निर्जलकूपतटे समन्ततो लोकः समुदायेनावतिष्ठते, पुष्टं चाभयकुमारेण-किमित्येष लोकमेलापकः ?, ततो लोकेनोक्तं-कूपस्य मध्ये राज्ञोऽंगुल्याभरणमास्ते तद्यो नाम तटे स्थितः स्वहस्तेन गृह्णाणी तस्मै राजा महतं वृत्तिं प्रयच्छतीति, तत एवं श्रुते पृष्टाः प्रत्यासन्नवर्त्तिनो राजनियुक्ताः पुरुषाः तैरप्येवमेव कथितं, तताऽभवकुमारेणोक्तम्-अहं तटे स्थितो ग्रहीष्यामि, राजनियुक्तैः पुरुषैरुक्तं-गृहाण त्वं, यत्प्रतिज्ञातं राज्ञा तदवश्यं करिष्यते, ततोऽभयकुमारेण परिभावितमंगुल्याभरणं दृष्ट्या सम्यक्, तत आर्द्रगोमयेनाहतं, संलग्नं तत्तत्र, ततस्तस्मिन् शुष्के मुक्तं कूपान्तरात् पानीयं, भृतो जलेन, परिपूर्णः स कूपः, तरति चोपरि सांगुल्याभरणः शुष्कगोमयः, ततस्तटस्थेन सता गृहीतमंगुल्याभरणमभयकुमारेण, कृतश्चानन्दकोलाहलो लोकेने, निवेदितं राज्ञो राजनियुक्तैः, पुरुषैः, आकारितोऽभयकुमारो राज्ञा, गतो राज्ञः समीपं, मुमोच पुरतोऽंगुल्याभरणं,

पृष्टश्च राज्ञा-वत्स ! कोऽसि त्वं ?, अभयकुमारेणोक्तं-देव ! युष्मदपत्यं, राजा प्राह-कथं ?, ततः प्राक्तनं वृत्तान्तं कथितवान्, ततो जगाम महाप्रमोदं राजा, चकारोत्सङ्गेऽभयकुमारं, चुम्बितवान् सस्नेहं शिरसि, पृष्टश्च श्रेणिकेनाभयकुमारो-वत्स ! क्व ते माता वर्त्तते ?, तेनोक्तं-देव ! बहिःप्रदेशे, ततो राजा सपरिच्छदस्तस्याः सम्मुखमुपागमत्, अभयकुमारश्चाग्रे समागत्य कथयामास सर्वं नन्दायाः, ततः साऽऽत्मानं मण्डयितुं प्रवृत्ता, निषिद्धा चाभयकुमारेणमातर्न कल्पते कुलस्त्रीणां निजपतिविरहितानां निजपतिदर्शनमन्तरेण भूषणं कर्त्तुमिति, समागतो राजा, पपात राज्ञः पादयोः नन्दा, सन्मानिता च भूषणादिप्रदानेनातीव राज्ञा, सस्नेहं प्रवेशिता महाविभूत्या नगरं सपुत्रा, स्थापितश्चाभयकुमारोऽमात्यपदे। अभयकुमारस्यौत्पत्तिकी बुद्धिः ४

तथा 'पड 'त्ति पटोदाहरणं, तद्भावना-द्वौ पुरुषौ, एकस्याच्छादनपटः सौत्रिकः अपरस्यो-र्णामयः, तौ च सह गत्वा युगपत् स्नातुं प्रवृत्तौ, तत्रोर्णामयपटस्वामी स्वपटं विमुच्य द्वितीस्य सत्कं सौत्रिकं पटं गृहीत्वा गन्तुं प्रस्थितो, द्वितीयो याचते स्वपटं, स न प्रयच्छति, ततो राजकुले व्यवहारो जातः, ततः कारणिकैर्द्वयोरपि शिरसी कङ्कतिकयाऽवलेखिते, ततोऽवलेखने कृते

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उर्णामयपटस्वामिनः शिरसि उर्णावयवा निर्जग्मुः, ततो ज्ञातं-नूनमेष न सौत्रिकपटस्य स्वामीति निगृहीतः, परस्य समर्प्पितः सौत्रिकः पटः । कारणिकानामौत्पत्तिकी बुद्धिः ५ ।

'**सरड**'त्ति सरटोदाहरणं, तद्भावना-कस्यचित्पुरुष्स्य पुरीषमुत्सृजतः सरटो गुदस्याधस्ताद्बिलं प्रविशन् पुच्छेन गुदं स्पृष्टवान्, ततस्तस्यैवमजायत शङ्का-नूनमुदरे मे सरटः प्रविष्टः, ततो गृहं गतो महतीमधृतिं कुर्वन्नतीव दुर्बलो बभूव, वैद्यं च प्रपच्छ, वैद्यश्च ज्ञातवान्, असम्भवमेतत्, केवलमस्य कथञ्चिदाशङ्का समुदपादि, ततः सोऽवादीत्-यदि मे शतं रूपकाणां प्रयच्छसि ततोऽहं त्वां निराकुलीकरोमि, तेन प्रतिपन्नं, ततो वैद्यो विरेचकौषधं तस्य प्रदाय लाक्षारसखरण्टितं सरटं घटे प्रक्षिप्य तस्मिन् घटे पुरीषोत्सर्गं कारितवान्, ततो दर्शितो वैद्येन तस्य पुरपखरण्टितो घटे सरटो, व्यपगता तस्य शङ्का, जातो बलिष्ठशरीरः । वैद्यस्यौत्पत्तिकी बुद्धिः ६ ।

'**काय**'त्ति काकोदाहरणं, तद्भावना-बेन्नातटपुरे केनापि सौगतेन कोऽपि श्वेतपटक्षुल्लकः पृष्टो-भोः क्षुल्लक ! सर्वज्ञाः किल तवार्हन्तः तत्पुत्रकाश्च यूयं तत् कथय-कियन्तोऽत्र पुरे वसन्ति वायसाः ?, ततः क्षुल्लकश्चिन्तयामास-शठोऽयं प्रतिशठाचरणेन निर्लोठनीयः, ततः स्वबुद्धिवशादिदं पठितवान्-

"सट्ठिं कागसहस्सा इह (यं) बिन्नायडे परिवसंति ।
जइ ऊणगा पवसिया अब्भहिया पाहुणा आया ॥"

ततः स भिक्षुः प्रत्युत्तरं दातुमशक्नुवन् लकुटाहतशिरस्क इव शिरः कण्डूयन् मौनमाधाया गतः । क्षुल्लकस्यौत्पत्तिकी बुद्धिः ।

अथवा अपरो वायसदृष्टान्तः-कोऽपि क्षुल्लकः केनापि भागवतेन दुष्टबुद्ध्या पृष्टो-भोः क्षुल्लक ! किमेष काको विष्ठामितस्ततो विक्षिपति ?, क्षुल्लकोऽपि तस्य दुष्टबुद्धितामवगम्य तन्मर्मवित् प्रत्युत्तरं दत्तवान्-युष्मत्सिद्धान्ते जले स्थले च सर्वत्र व्यापी विष्णुरभ्युपगम्यते, ततो यौष्माकीणं सिद्धान्तमुपश्रुत्य एषोऽपि वायसोऽचिन्तयत्-किमस्मिन् पुरीषे समस्ति विष्णुः किं वा नेति ?, ततः स एवमुक्तो बाणाहतमर्मप्रदेश इव धूर्णितचेतसो मौनमवलम्ब्य रुषा धूमायमानो गतः । क्षुल्लकस्यौत्पत्तिकी बुद्धिः ७ ।

'**उच्चारे**'त्ति उच्चारोदाहरणं, तद्भावना-क्वच्चित् पुरि कोऽपि धिग्जातीयः, तस्य भार्याऽभिनवयौवनोद्भेदरमणीया लोचनयुगलवक्रियावलोकनमहाभल्लीनिपातताडितसकलकामिकुरङ्गहृदया प्रबलकामोन्मत्तमानसा, सोऽन्यदा धिग्जातीयस्तया भार्यया सह देशान्तरं गन्तुं प्रवृत्तः, अपान्तराले च धूर्त्तः कोऽपि पथिको मिलितः, सा च धिग्जातीयभार्या तस्मिन् रतिं बद्धवती, ततो धूर्त्तः प्राह-मदीया एषा भार्या, धिग्जातीयः प्राह-मदीयेति, ततो राजकुले व्यवहारो जातः, कारणिकैर्द्वयोरपि पृथक् २ ह्यस्तनदिने भुक्त आहारः पृष्टो, धिग्जातीयेनोक्तं-मया ह्यस्तनदिने तिलमोदका भक्षिता मद्भार्यया च, धूर्त्तेनान्यत्किमप्युक्तं, ततो दत्तं तस्याः कारणिकैर्विरेकौषधं, जातो विरेको, दृष्टाः पुरीषान्तर्गतास्तिलाः, दत्ता सा धिग्जातीयाय, निर्धाटितो धूर्त्तः । कारणिकानामौत्पत्तिकी बुद्धिः ८ ।

'**गय**'त्ति गजोदाहरणं, तद्भावनावसन्तपुरे नगरे कोऽपि राजा बुद्ध्यतिशयसम्पन्नं मन्त्रिणमेकमन्वेषमाणश्चतुष्पथे हस्तिनमालानस्तम्भे बन्धयित्वा धोषणामचीकरत्-योऽमुं हस्तिनं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तोलयति तस्मै राजा महतीं वृत्तिं प्रयच्छतीति, इमां च घोषणां श्रुत्वा कश्चिदेकः पुमान्, तं हस्तिनं महासरसि नावमारोहयामास, अस्मिंश्चारूढे यावत्प्रमाणा नौर्जले निमग्ना तावत्प्रमाणां रेखामदात्, ततः समुत्तारितो हस्ती तटे, प्रक्षिप्ता गण्डशैलकल्पा नावि ग्रावाणः, ते च तावत्प्रक्षिप्ता यावद्रेखां मर्यादीकृत्य जले निमग्ना नौः ततस्तोलिताः सर्वे ते पाषाणाः, कृतमेकत्र पलप्रमाणं निवेदितं च राज्ञे-देव ! एतावत्पलप्रमाणो हस्ती वर्त्तते, ततस्तुतोष राजा, कृतो मन्त्रिमण्डल-मूर्द्धाभिषिकः परममन्त्री । तस्यौत्पत्तिकी बुद्धिः ९ ।

'**घयण**'त्ति भाण्डः, तदुदाहरणं-विटो नाम कोऽपि पुरुषो राज्ञः प्रत्यासन्नवर्त्ती, तं प्रति राजा निजदेवीं प्रशंसति-अहो निरामया मे देवी या न कदाचिदपि वातनिसर्गं विदधाति, विटः प्राह-देव ! न भवतीदं जातुचित्, राजाऽवादीत्कथं ?, विट आह-देव ! धूर्त्ता देवी, ततो यदा सुगन्धीनि पुष्पाणि चूर्णयित्वा वासान् समर्प्पयति नासिकाग्रे तदा ज्ञातव्यं-वातं विमुञ्चतीति, ततोऽन्यदा राज्ञा तथैव परिभावितं, सम्यगवगते च हसितं, ततो देवी हसननिमित्तकथनाय निर्बन्धं कृतवती, ततो राजाऽतिनिर्बन्धे कृते पूर्ववृत्तान्तमचीकथत्, ततश्चुकोप देवी तस्मै विटाय, आज्ञप्तो देशत्यागेन, तेनापि जज्ञे-नूनमकथयत् पूर्ववृत्तान्तं देवो देव्याः, तेन मे चुकोप देवी, ततो महान्तमुपानहा भरमादया मतो देवीसकाशं, विज्ञापयामास देवीं-देवि ! यामो देशान्तराणि, देवी उपानहां भरं पार्श्वे स्थितं दृष्ट्वा पृष्टवती -रे किमेष उपानहाम्भरः ?, सोऽवा-दीत्-देवि ! यावन्ति देशान्तराण्येतावतीभिरुपानद्भिर्गन्तुं शक्ष्यामि तावत्सु देव्याः कीर्त्ति-र्विस्तारणीया, तत एवमुक्ते मा मे सर्वत्रापकीर्त्तिर्जायेतेति परिभाव्य देवी बलात्तं धारयामास विटस्यौत्पत्तिकी बुद्धिः १० ।

'**गोलो**'त्ति गोलकोदाहरणं, तद्भावना-लाक्षागोलकः कस्यपि बालकस्य कथमपि नासिकामध्ये प्रविष्टः, ततस्तन्मातापितरावत्तीवार्तौ बभूवतुः, दर्शितो बालकः सुवर्णकारस्य, तेन सुवर्णकारेण प्रतप्ताग्रभागया लोहशकलाकया शनैः शनैर्यत्नतो लाक्षागोलको मनाक् प्रताप्य सर्वोऽपि समाकृष्टः । सुवर्णकारस्यौत्पत्तिकी बुद्धिः ११ ।

'**खंभ**'त्ति स्तम्भोदाहरणं, तद्भावना-राजा मन्त्रिणमेकं गवेषयन् महाविस्तीर्णतटाकमध्ये स्तम्भमेकं निक्षेपयामास, तत एवं घोषणां कारितवान्-यो नाम तटे स्थितोऽमुं स्तम्भं दवरकेण बन्धाति तस्मै राजा शतहस्त्रं प्रयच्छतीति, तत एवं घोषणां श्रुत्वा कोऽपि पुमान् एकस्मिन् तटप्रदेशे कीलकं भूमौ निक्षिप्य दवरकेण बद्ध्वा तेन दवरकेण सह सर्वतस्तटे परिभ्रमन् मध्यस्थितं तं स्तम्भं बद्धवान्, लोकेन च बुद्ध्यतिशयसम्पन्नतया प्रशंसितो, निवेदितश्च राज्ञो राजनियुक्तैः पुरुषैः, तुतोष राजा, ततस्तं मन्त्रिणमकार्षीत् । तस्य पुरुषस्यौत्पत्तिकी बुद्धिः

'**खुड्डग**'त्ति क्षुल्लकोदाहरणं, तद्भावना-कस्मिंश्चित्पुरे काचित् परिव्राजिका, सा यो यत्क-रोति तदहं कुशलकर्मा सर्वं करोमीति राज्ञः समक्षं प्रतिज्ञां कृतवती, राजा च तत्प्रतिज्ञासूचकं पटहमुद्घोषयामास, तत्र च कोऽपि क्षुल्लको भिक्षार्थमटन् पटहशब्दं श्रुतवान्, श्रुतश्च प्रतिज्ञार्थः, ततो धृतवान् पटहं, प्रतिपन्नो राजसमक्षं व्यवहारो, गतो राजकुलं क्षुल्लकः, ततस्तं लघुं दृष्ट्वा सा परिव्राजिकाऽऽत्मीयं मुखं विकृत्यावज्ञयाऽभिधत्ते-कथय कुतो मिलाभि ?, तत एवमुक्ते क्षुल्लकः स्वं मेण्ढ्रं दर्शितवान्, ततो हसितं सर्वैरपि जनैः, उद्घुष्टं च-जिता जिता परिव्राजिका,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्या एवं कर्त्तुमशक्यत्वात्, ततः क्षुल्लकः कायिक्या पद्ममालिखितवान्, सा कर्त्तुं न शक्नोति, ततो जिता परिव्राजिका। क्षुल्लकस्यौत्पत्तिकी बुद्धिः १३।

'**मग्ग**'त्ति मार्गोदाहरणं, तद्भावना कोऽपि पुरुषो निजभार्यां गृहीत्वा वाहनेन ग्रामान्तरं व्रजति, अपान्तराले च कचित् प्रदेशे शरीरचिन्तानिमित्तं तद्भार्या वाहनादुत्तीर्णवती, तस्यां च शरीरचिन्तानिमित्तं कियद्भूभागं गतायां तत्प्रदेशवर्त्तिनी काचिद्व्यन्तरी पुरुषस्य रूपसौभाग्यादिकमवलोक्य कामानुरागतस्तद्रूपेणागत्य वाहनं विलग्ना, सा च तद्भार्या शरीरचिन्तयां विधाय यावद्वाहनसमीपमागच्छति तावदन्यां स्त्रियमात्मसमानरूपां वाहनमधिरूढां पश्यति, सा च व्यन्तरी पुरुषं प्रत्याह-एषा काचिद्व्यन्तरी मदीयं रूपमारचय्य तव सकाशमभिलपति ततः खेटय २ सत्वरं सौरभेयाविति, ततः स पुरुषस्तथैव कृतवान्, सा चारटन्ती पश्चाल्लग्ना समागच्छति, पुरुषोऽपि तामारटन्तीं दृष्ट्वा मूढचेता मन्दं मन्दं खेटयामास, ततः प्रावर्त्तत तयोस्तद्भार्याव्यन्तर्योर्निष्ठुरभाषणादिकः परस्परं कलहः, ग्रामे च प्राप्ते जातस्तयो राजकुले व्यवहारः, पुरुषश्च निर्णयमकुर्वन्नुदासीनो वर्त्तते, ततः कारणिकैः पुरुषो दूरे व्यवस्थापितो, भणितो च ते द्वे अपि च स्त्रियौ-युवयोर्मध्ये या काचिदमुं प्रथमं हस्तेन संस्पृश्यति तस्याः पतिरेष न शेषायाः, ततो व्यन्तरी हस्तं दूरतः प्रसार्य प्रथमं स्पृष्टवती, ततो ज्ञातं कारणिकैरेषा व्यन्तरीति, ततो निर्द्धाटिता, द्वितीया च समर्पिता स्वपतेः। कारणिकानामौत्पत्तिकी बुद्धिः १४।

'**इत्थि**'त्ति स्त्र्युदाहरणं, तद्भावना-मूलदेवपुण्डरीकौ सह पन्थानं गच्छतः इतश्च कोऽपि सभार्यकः पुरुषस्तेनैव पथा गन्तुं प्रावर्त्तत, पुण्डरीकश्च दूरस्थितस्तद्भार्यागतमतिशायिरूपं दृष्ट्वा साभिलाषो जातः, कथितं च तेन मूलदेवस्य-यदीमां मे सम्पादयसि तदहं जीवामि, नान्यथेति, ततो मूलदेवोऽवादीम्-मा आतुरीभूः, अहं ते नियमतः सम्पादयिष्यामि, ततस्तौ द्वावप्यलक्षितौ सत्वरं दूरतो गतौ, ततो मूलदेवः पुण्डरीकमेकस्मिन् वननिकुञ्जे संस्थाप्य पथि ऊर्द्धवस्थितो वर्त्तते, ततः क्षणमात्रं निजमहेलां विसर्जय, विसर्जिता तेन, गता सा पुण्डरीकपार्श्वं, ततः क्षणमात्रं स्थित्वा समागता-

"आगंतूण य तत्तो पडयं धेत्तूण मूलदेवस्य।

धुत्ती भणइ हसन्ती पियं खु ते दारओ जाओ॥' द्वयोरपि तयोरौत्पत्तिकी बुद्धिः १५"।

'**पइ**'त्ति पतिदृष्टान्त, तद्भावना-द्वयोर्भ्रात्रोरेका भार्या, लोके च महत्कौतुमकम्-अहो द्वयोरप्येषा समानरागेति, एतच्च श्रुतिपरम्परया राज्ञाऽपि श्रुतं, परं विस्मयमुपागतो राजा, मन्त्री ब्रूते-देव ! न भवति कदाचिदप्येतद्, अवश्यं विशेषः कोऽपि भविष्यति, राज्ञोक्तं-कथमेतदवसेयं ?, मन्त्री ब्रूते-देव ! अचिरादेव यथा ज्ञास्यते तथा यतिष्यते, ब्रूतो मन्त्रिणा तस्याः स्त्रिया लेखः प्रेषितो यथा-तौ द्वावपि निजपती ग्रामद्वये प्रेषणीयौ-एकः पूर्वस्यां दिशि विवक्षिते ग्रामेऽपरोऽपरस्यां दिशि, तस्मिन्नेव च दिने द्वाभ्यामपि स्वगृहे समागन्तव्यं, ततस्तया यो मन्दवल्लभः स पूर्वस्यां दिशि प्रेषितोऽपरोऽपरस्यां दिशि, पूर्वस्यां च दिशि यो गतस्तस्य गच्छत आगच्छतश्च संमुखः सूर्यो, यः पुनरपरस्यां गतस्तस्य गच्छत आगच्छतश्च पृष्ठतः, एवं कृते च मन्त्रिणा ज्ञातम्-अयं मन्दवल्लभः अपरोऽत्यन्तवल्लभः, ततो निवेदितं च

Jain Education International For Private & Personal Use Only www.jainelibrary.org

राज्ञे, राज्ञा च न प्रतिपन्नं, यतोऽवश्यमेकः पूर्वस्यां दिशि प्रेषणीयोऽपरोऽपरस्यां दिशि, ततः कथमेष विशेषो गम्यते ?, ततः पुनरपि मन्त्रिणा लेखप्रदानेन सा महेलोक्ता-द्वावपि निजपति तयोरेव ग्रामयोः समकं प्रेषणीयौ, तया च तौ तथैव प्रेषितौ, मन्त्रिणा च द्वौ पुरुषौ तस्याः समीपे समकं तयोः शरीरापाटवनिवेदकौ प्रेषितौ, द्वाभ्यामपि च सा समकमाकारिता, ततो यो मन्दवल्लभशरीरापाटवनिवेदकः पुरुषस्तं प्रत्याह-सदैवमन्दशरीरो द्वितीयोऽत्यातुरश्च वर्त्तते प्रत्यहं गमिष्यामि, तथैव कृतं, ततो निवेदितं राज्ञो मन्त्रिणा, प्रतिपन्नं राज्ञा तथेति। मन्त्रिणः औत्पत्तिकी बुद्धिः १६।

'**पुत्त**'त्ति पुत्रदृष्टान्तः, तद्भावना-कोऽपि वणिक् तस्य द्वे पत्न्यौ, एकस्याः पुत्रोऽपरा वन्ध्या, परं सापि तं पुत्रं सम्यक् पालयति, ततः स पुत्रो विशेषं न जानीते-यथा इयं मे जननी इयं नेति, सोऽपि वणिक् सभार्यापुत्रो देशान्तरं गतो, गतमात्र एव परासुरभूत, ततो द्वयोरपि तयोः कलहोऽजायत, एका भणति-ममैष पुत्रस्ततोऽहं गृहस्वामिनी, द्वितीया ब्रूते-का त्वं ?, ममैष पुत्रः ततोऽहमेव गृहस्वामिनीति, एवं च तयोः परस्परं कलहे जाते राजकुले व्यवहारो बभूव, ततोऽमात्यः प्रतिपादयामास निजपुरुषान्-भोः पूर्वं द्रव्यं समस्तं विभजत, विभज्य ततो दारकं करपत्रेण कुरुत द्वौ भागौ, कृत्वा चैकं खण्डमेकस्यै समर्प्पयत द्वितीयं द्वितीयस्यै, तत एतदमात्यवाक्यं शिरसि महाज्वालासहस्त्रावलीढवज्रोपनिपातकल्पं पुत्रमाता श्रुत्वा सोत्कम्पहृदया हृदयान्तःप्रविष्टतिर्यक्शल्येव सदुःखं वक्तुं प्रवृत्ता-हा स्वामिन्! महामात्य! न ममैष पुत्रो, न मे किञ्चिदर्थेन प्रयोजनं, एतस्या एव पुत्रो भवतु गृहस्वामिनी च, अहं पुनरमुं पुत्रं दूरस्थितापि परगृहेषु दारिद्र्यमपि कुर्वंति जीवन्तं द्रक्ष्यामि, तावता च कृतकृत्यमात्मानं प्रपत्स्ये, पुत्रेण विना पुनरधुनापि समस्तोऽपि मे जीवलोकोऽस्तमुपयाति, इतरा च न किमपि वक्ति, ततोऽमात्येन तां सदुःखां परिभाव्योक्तम्-तस्याः पुत्रो नास्या इति, सेव सर्वस्वस्वामिनी कृता, द्वितीया तु निर्द्धाटिता। अमात्यस्यौत्पत्तिकी बुद्धिः १७।

*मू. (९९)* *भरह सिल मिंढ कुक्कुड वालुअ हत्थी अगड वनसंडे*
*पयस अइआ पत्ते खाडहिला पंच पिअरो अ ॥*

**वृ.** '**भरहसिलमेंढे**'त्यादिका च गाथा रोहकसंविधानसूचीका, सा च प्रागुक्तकथानकानुसारेण स्वयमेव व्याख्येया।

*मू. (१००)* *महुसित्थ मुद्दि अंके नाणए भिक्खु चेडगनिहाणे*
*सिक्खा अत्थसत्थे इच्छा य महं सयसहस्से ॥*

**वृ.** मधयुक्तं सित्थं-**मधुसित्थं** तद्दृष्टान्तभावना-कश्चित्कौलकस्तस्य भार्या स्वैरिणी, सा चान्यदा केनापि पुरुषेण सह कस्मिंश्चित्प्रदेशे जालिमध्ये मैथुनं सेवितवती, मैथुनस्थितया च तया उपरि भ्रामरं समुत्पन्नं दृष्टं, क्षणमात्रानन्तरं च समागता गृहे, द्वितीये च दिवसे स्वभर्त्ता मदनं क्रीणंस्तया निवारितो-मा क्रीणाहि मदनं, अहं ते भ्रामरमुत्पन्नं दर्शयिष्यामि, ततः स क्रयाद्विनिवृत्तो, गतौ च तौ द्वावपि तां जालिं, न पश्यति सा कथमपि कौलिकी, भ्रामरं, ततो येन संस्थानेन मैथुनं सेवितवती तेनैव संस्थानेन स्थिता, ततो दृष्टवती भ्रामरं, दर्शयामास च कौलिकाय, कौलिकोऽपि तथारूपं संस्थानमवलोक्य ज्ञातवान्-नूनमेषा दुश्चारिणीति।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कौलिकस्यौत्पत्तिकी बुद्धिः १८।

'**मुद्दिय**'त्ति मुद्रिकोदाहरणं, तद्भावना-कस्मिंश्चित्पुरे कोऽपि पुरोधाः सर्वत्र ख्यात-सत्यवृत्तिः-यथा परकीयान्निक्षेपानादायादाय प्रभूतकालातिक्रमेऽपि तथास्थितानेव समर्प्पयतीति, एतच्च ज्ञात्वा कोऽपि द्रमकः तस्मै स्वनिक्षेपं समर्प्य देशान्तरमगमत्, प्रभूतकालातिक्रमे च भूयोऽपि तत्रागतो याचते च स्वं निक्षेपं पुरोधसं, पुरोधाश्च मूलत एवापलपति-कस्त्वं कीदृशो वा तव निक्षेप इति ?, ततः स रङ्को वराकः स्वं निक्षेपमलभमानः शून्यचित्तो बभूव, अन्यदा च तेनामात्यो गच्छन् दृष्टो याचितश्च-देहि मे पुरोहित! सुवर्ण्णसहस्रप्रमाणं निक्षेपमिति, तत एतदाकर्ण्य अमात्यस्तद्विषयकृपापरीतचेता बभूव, ततो गत्वा निवेदितं राज्ञः, कारितश्च दर्शनं द्रमको, राज्ञापि भणितः पुरोधाः-देहि तस्मै द्रमकाय स्वं निक्षेपमिति, पुरोहितोऽवादीत्-देव ! न किमपि तस्याहं गृह्णामि, ततो राजा मौनमधात्, पुरोधसि च स्वगृहं गते राजा विजने तं द्रमकमाकार्य पृष्टवान्-रे! कथय सत्यमिति, ततस्तेन सर्वं दिवसमुहूर्त्तस्थानपार्श्ववर्त्तिमानुषादिकं कथितं, ततोऽन्यदा राजा पुरोधसा समं रन्तुं प्रावर्त्तत, परस्परं नाममुद्रा च सञ्चारिता, ततो राजा यथा पुरोधा न वेत्ति तथा कस्यापि मानुषस्य हस्ते नाममुद्रां समर्प्य तं प्रति बभाण-रे पुरोधसो गृहं गत्वा तद्भार्यामेवं ब्रूहि-यथाऽहं पुरोधसा प्रेषितः, इयं च नाममुद्राऽभिज्ञानं, तस्मिन् दिने तस्यां वेलायां यः सुवर्णसहस्रनवलको द्रमकसत्कस्त्वत्समक्षममुकप्रदेशे - मुक्तोऽस्ति झटिति मे समर्प्पय, तेन पुरुषेण तथैव कृतं, सापि च पुरोधसो भार्या नाममुद्रां दृष्ट्वाऽभिज्ञानमिलनतश्च सत्यमेष पुरोधसा प्रेषित इति प्रतिपन्नवती, ततः समर्प्पयामास तं द्रमकनिक्षेपं, तेन च पुरुषेणानीय राज्ञः समर्प्पितो, राज्ञा चान्येषां बहूनां नवलकानां मध्ये स द्रमकनवलकः प्रक्षिप्तः, आकारितो द्रमकः, पार्श्वे चोपवेशितः पुरोधाः द्रमकोऽपि तमात्मीयं नवलकं दृष्ट्वा प्रमुदितहृदयो विकसितलोचनोऽपगतचित्तशून्यताभावः सहर्षो राजानं विज्ञपयितुं प्रवृत्तःदेव ! देवपादानां पुरत एवमाकारो मदीयो नवलकः, ततो राजा तं तस्मै समर्प्पयामास, पुरोधसश्च जिह्वाच्छेदमचीकरत्। राज्ञ औत्पत्तिकी बुद्धिः १९।

'**अंके**'त्ति अङ्कदृष्टान्तभावना, कोऽपि कस्यापि पार्श्वे रूपकसहस्रनवलकं निक्षिप्तवान्, तेन च निक्षेपग्राहिणा तं नवलकमधःप्रदेशे छित्त्वा कूटरूपकाणां सहस्रेण स भृतः, तथैव च सीवितः, ततः कालान्तरे तस्य पार्श्वान्निक्षेपस्वामिना स्वनिक्षेपो गृहीतः, परिभावितः, सर्वतस्तथैव दृश्यते मुद्रामिकं, तत उद्घाटीता मुद्रा यावत् रूपकान् परिभावयति तावत्सर्वानपि कूटान् पश्यति, ततो जातो राजकुले तयोर्व्यवहारः, पृष्टः कारणिकैर्निक्षेपस्वामी-भोः! कतिसङ्ख्यास्तव नवलके रूपका आसीरन् ?, स प्राह-सहस्रं, ततो गणयित्वा रूपकाणां सहस्रं तेन भृतः स नवलकः स च परिपूर्णं भृतः केवलं यावन्मात्रमधस्ताच्छिन्नस्तावन्त्यन् इत्युपरि सीवितुं न शक्यते, ततो ज्ञातं कारणिकैः, नूनमस्यापहृता रूपकाः, ततो दापितो रूपकसहस्रमितरो नवलकस्वामिनः। कारणिकानामौत्पत्तिकी बुद्धिः २०।

'**नाणं**'ति कोऽपि कस्यापि पार्श्वे सुवर्णपणभृतं नवलकं निक्षिप्तवान्, ततो गतो देशान्तरं, प्रभूते च कालेऽतिक्रान्ते निक्षेपग्राही तस्मान्नवलकात् जात्यसुवर्णमयान् पणान् गृहीत्वा हीनवर्णकसुवर्ण्णपणान् तावत्सङ्ख्याकान् तत्र प्रक्षिप्तवान्, तथैव च स नवलकस्तेन सीवितः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कतिपयदिनान्तरं स नवलकस्वामी देशान्तरादागतः, तं च नवलकं तस्य पार्श्वे याचितवान्, सोऽपि नवलकं समर्प्पयमास, परिभावितं तेन मुद्रादिकं, तथैव दृष्टं, ततो मुद्रां स्फोटयित्वा यावत्पणान् परिभावयति तावद्धीनवर्णकसुवर्णमयान् पश्यति, ततो बभूव राजकुले व्यवहारः, पृष्टः कारणिकैः-कः कालः आसीत् ? यत्र त्वया नवलको मुक्त इति, नवलकस्वामी आह-अमुक इति, ततः कारणिकैरुक्तं-स चिरन्तनकालोऽधुनातनकालकृताश्च दृश्यन्तेऽमी पणाः, ततो मिथ्याभाषी नूनमेष निक्षेपग्राहीति दण्डितो, दापितश्चेतरस्य तावतः पणानिति। कारणिकानामौत्पत्तिकी बुद्धिः २१।

'**भिक्खु**'त्ति भिक्षूदाहरणं, तद्भावना-कोऽपि कस्यापि भिक्षोः पार्श्वे सुवर्णसहस्र निक्षिप्तवान्, कालान्तरे च याचते, स च भिक्षुर्न प्रयच्छति, केवलमद्य कल्ये वा ददामीति प्रतारयति, ततस्तेन द्यूतकारा अवलगिताः ततस्तैः प्रतिपन्नं-निश्चितं तव दापयिष्यामः, ततो द्यूतकारा रक्तपटवेषेण सुवर्णखुट्टिका गृहीत्वा भिक्षुसकाशं गता वदन्ति च-वयं चैत्यवन्दनाय देशान्तरं यियासवो यूयं च परमसत्यतापात्रमत एताः सुवर्णखोटिका युष्मत्पार्श्वे स्थास्यन्ति, एतावति चावसरे पूर्वसंकेतितः स पुरुष आगतो, याचते स्म च-भिक्षो ! समर्प्पय मदीयां स्थापनिकामिति, ततो भिक्षुणाऽभिनवमुच्यमानसुवर्णखुट्टिकालम्पटतया समर्प्पिता तस्य स्थापनिका तस्मै मा एतासामहमनाभागी जायेयतिबुद्धया, तेऽपि च द्यूतकाराः किमपि भिषान्तरं कृत्वा स्वसुवर्णखुट्टिका गृहीत्वा गताः। द्यूतकारणामौत्पत्तिकी बुद्धिः २२।

'**चेडगनिहाण**'न्ति चेटका-बालकाः निधानं-प्रतीतं, दृष्टान्तभावना-द्वौ पुरुषौ परस्परं प्रतिपन्नसखिभावौ, अन्यदा क्वचित्प्रदेशे ताभ्यां निधानमुपलेधे, तत एको मावायी ब्रूते-श्वस्तनदिवसे शुभे नक्षत्रे गृहीष्यामो, द्वितीयेन च सरलमनस्कतया तथैव प्रतिपन्नं, ततस्तेन मायविना तस्मिन् प्रदेशे रात्रावागत्य निधानं हृत्वा तत्राङ्गारकाः प्रक्षिप्ताः, ततो द्वितीये दिने तौ द्वावपि सह भूत्वा गतौ, दृष्टवन्तौ तत्राङ्गारकान्, ततो मायावी मायया सोरस्ताडमाक्रन्दितुं प्रावर्त्तत, वदति च-हा हीनपुण्या वयं दैवेन चक्षुषी दत्त्वाऽस्माकं समुत्पाटिते यन्निधानमुपदिश्याङ्गारका दर्शिताः, पुनः पुनश्च द्वितीयस्य मुखमवलोकते, ततो द्वितीयेन जज्ञे-नूनमनेन हृतं निधानमिति, ततस्तेनाप्या-कारसंवरणं कृत्वा तस्यानुशासनार्थमूचेमा वयस्य ! खेदं कार्षीः, न खलु खेदः पुनर्निधान-प्रत्यागमनहेतुः, ततो गतौ द्वावपि स्वं स्वं गृहं, ततो द्वितीयेन तस्य मायाविनो लेप्यमयी सजीवेव प्रतिमा कारिता, द्वौ च गृहीतौ मर्कटकौ, प्रतिमायाश्चोत्सङ्गे हस्ते शिरसि चान्यत्र च यथायोगं तयोर्मर्कटयोर्योग्यं भक्ष्यं मक्तवान्, तौ च मर्कटौ क्षुधापीडितौ तत्रागत्य प्रतिमाया उत्सङ्गादौ भक्ष्यं भक्षितवन्तौ, एवं च प्रतिदिनं करणे तयोस्तादृश्येव शैली समजनि, ततोऽन्यदा किमपि पर्वाधिकृत्य मायाविनो द्वावपि पुत्रौ भोजनाय निमन्त्रितौ, समागतौ च भोजनवेलायां तद्गृहे, भोजितौ च तौ तेन महागौरवेण, भोजनानन्तरं च तौ महता सुखेनान्यत्र सङ्गोपितौ, ततः स्तोक-दिनावसाने मायावी स्वपुत्रसाराकरणाय तद्गृहमागतः,

ततो द्वितीयस्तं प्रति ब्रूते-मित्र ! तौ तव पुत्रौ मर्कटावभूतां, ततः सखेदं विस्मितचेता गृहमध्यं प्राविशत्, ततो लेप्यमयीं प्रतिमामुत्सार्य तत्स्थाने समुपवेशितो, मुक्तौ स्वस्थानात् मर्कटकौ, तौ च किलकिलायमानौ तस्योत्सङ्गे शिरसि स्कन्धे हस्ते चागत्य विलग्नौ, ततो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मित्रमवादीत्-भो ! वयस्य ! तावेतौ तव पुत्रौ, तथा च पश्य तव स्नेहमात्मीयं दर्शयतः, ततः स मायावी प्राह-वयस्य ! किं मानुषावकस्मात् मर्कटौ भवतः ?, वयस्य आह-भवतः कर्म्मप्रातिकूल्यवशात्, तथाहि-किं सुवर्णमङ्गारीभवति ?, परमावयोः कर्मप्रातिकूल्यादेतदपि जातं, तथा तव पुत्रावपि मर्कटावभूतामिति, ततो मायावी चिन्तयामास-नूनमहं ज्ञातोऽनेन, यद्युच्चैः शब्दं करिष्ये ततोऽहं राजग्राह्यो भविष्यामि, पुत्रौ चान्यथा मे न भवतः, ततस्तेन सर्वं यथावस्थितं तस्मै निवेदितं, दत्तश्च भागः, इतरेण च समर्प्पितौ पुत्रौ । तस्यौत्पत्तिकी बुद्धिः २३ ।

'**सिक्ख**'त्ति शिक्षा-धनुर्वेदः, तदुदाहरणभावना-कोऽपि पुमान् अतीव धनुर्वेदकुशलः, स परिभ्रमन् एकत्रेश्वरपुत्रान् शिक्षयितुं प्रावर्त्तत, तेभ्यश्चेश्वरपुत्रेभ्यः प्रभूतं द्रव्यं प्राप्तवान्, ततः पित्रादयस्तेषां चिन्तयामासुः प्रभूतमेतस्मै कुमारा दत्तवन्तः, ततो यदाऽसौ यास्यति तदैनं मारयित्वा सर्वं ग्रहीष्यामः, एतच्च कथमपि तेन ज्ञातं, ततः स्वबन्धूनां ग्रामान्तरवासिनां कथमपि ज्ञापितं भणितं च-यथाहममुकस्यां रात्रौ नद्यां गोमयपिण्डान् प्रक्षेप्स्यामि भवद्भिस्ते ग्राह्या इति, ततस्तैस्तथैव प्रतिपन्नं, ततो द्रव्येण संवलिता गोमयपिण्डास्तेन कृताः, आतपेन च शोषिताः, तत ईश्वरपुत्रानित्युवाच-यथैषोऽस्माकं विधिः-विवक्षिततिथिपर्वणि स्नानमन्त्रपुरस्सरं गोमयपिण्डा नद्यां प्रक्षिप्यन्ते इति, तैरपि यथा गुरवो व्याचक्षते तथेति प्रतिपन्नं, ततो विवक्षितरात्रौ तैरीश्वरपुत्रैः, समं स्नानमन्त्रपुरस्सरं ते सर्वेऽपि गोमयपिण्डा नद्यां प्रक्षिप्ताः, ततः समागतो गृहं, तेऽपि गोमयपिण्डा नीताबन्धुभिः स्वग्रामे, ततः कतिपयदिनातिक्रमे तानीश्वरपुत्रान् तेषां च पित्रादीन् प्रत्येकं मुत्कलाप्यात्मानं च वस्त्रमात्रपरिग्रहोपेतं दर्शयन् सर्वजनसमक्षं स्वग्रामं जगाम, पित्रादिभिश्च परिभावितो नास्य पार्श्वे किमप्यस्तीति न मारितः । तस्यौत्पत्तिकी बुद्धिः २४ ।

'**अत्थसत्थे**'त्ति अर्थशास्त्रम्-अर्थविषयं नीतिशास्त्रं, दृष्टान्तभावना-काऽपि वणिक्, तस्य द्वे पत्न्यौ, एकस्याः पुत्रोऽपरा बन्ध्या, परं साऽपि पुत्रं सम्यक् पालयति, ततः पुत्रो विशेषं नावबुध्यते-यथेवं मे जननी नेयमिति, सोऽपि वणिक् सभार्यापुत्रो देशान्तरमगमत् यत्र सुमतिस्वामिनस्तीर्थकृतो जन्मभूमिः, तत्र च गतमात्र एव दिवं गतः, सपत्न्योश्च परस्परं कलहोऽभूत्, एका ब्रूते-ममैष पुत्रस्ततोऽहं गृहस्वामिनी, द्वितीया ब्रूते-अहमिति, ततो राजकुले व्यवहारो जातः, तथापि न निर्बलति, एतच्च भगवति तीर्थकरे सुमतिस्वामिनि गर्भस्थे तज्जनन्या मङ्गलादेव्या जज्ञे, अत आकारिते द्वे अपि सपत्न्यौ, ततो देव्या प्रतिपादितं-कतिपयदिनानन्तरं मे पुत्रो भविष्यति ?, स च वृद्धिमधिरूढोऽस्याशोकपादपस्याधस्तादुपविष्टो युष्माकं व्यवहारं छेत्स्यति, तत एतावन्तं कालं यावदविशेषेण स्वादतां पिबतामिति, ततो न यस्याः, पुत्रः साऽचिन्तयत्-लब्धस्तावदेतावान् कालः पश्चात् किमपि यद्भविष्यति तन्न जानीमः, ततो हृष्टवदनया तया प्रतिपन्नं, ततो देव्या जज्ञे-नैषा पुत्रस्य मातेति निर्भर्त्सिता, द्वितीया च गृहस्वामिनी कृता । देव्या औत्पत्तिकी बुद्धिः २५ ।

'**इच्छा य मह**'त्ति काचित् स्त्री, तस्या भर्ता पञ्चत्वमधिगतः, सा च वृद्धिप्रयुक्तं द्रव्यं लोकेभ्यो न लभते, ततः प्रतिमित्रं भणितवती-मम दापय लोकेभ्यो धनमिति, ततस्तेनोक्तं-यदि मम भागं प्रयच्छसि, ततोनयोक्तं-यदिच्छसि तन्मह्यं दद्या इति, ततस्तेन लोकेभ्यः सर्वं द्रव्यमुद्ग्राहितं, तस्यै स्तोकं प्रयच्छति, सा नेच्छति, ततो जातो राजकुले व्यवहारः, ततः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कारणिकैर्यदुद्ग्राहितं द्रव्यं तत्सर्वमानायितं, कृतौ द्वौ भागौ, एको महान् द्वितीयोऽल्प इति, ततः पृष्टः कारणिकैः स पुरुषः-कं भागं त्वमिच्छसि ?, स प्राह-महान्तं इति, ततः कारणिकैरक्षरार्थो विचारितो यदिच्छसि तन्मह्यं दद्या इति, त्वमिच्छसि महान्तं भागं ततो महान् भाग एतस्याः, द्वितीयस्तु तवेति । कारणिकानामौत्पत्तिकी बुद्धिः २६ ।

'**सयसहस्से**'त्ति काऽपि परिव्राजकः, तस्य रूप्यमयं महाप्रमाणं भाजनं खोरयसंज्ञं, स च यदेकवारं शृणोति तत्सर्वं तथैवावधारयति, ततः स निजप्रज्ञागर्वमुद्वहन् सर्वसमक्षं प्रतिज्ञां कृतवान्-यो नाम मामपूर्वं श्रावयति तस्मै ददामीदं भाजनमिति, न च कोऽप्यपूर्वं श्रावयितुं शक्नोति, स हि यत्किमपि शृणोति तत्सर्वमस्खलितं तथैवानुवदती, वदते च-अग्रेऽपीदं मया श्रुतं, कथमन्यथाऽहमस्खलितं भणामीति, तत्सर्वत्र ख्यातिमगमत्, ततः केनापि सिद्धपुत्रकेण ज्ञाततत्प्रतिज्ञेन तं प्रत्युक्तम्-अहमपूर्वं श्रावयिष्यामि, ततो मिलितो भूयान् लोको राजसमक्षं व्यवहारो बभूव, ततः सिद्धपुत्रोऽपाठीत्-

"तुज्झ पिया मह पिउणो धारेइ अनूनगं सयहस्सं ।
जइ सुयपुव्वं दिज्जउ अह न सुयं खोरयं देसु ॥"

जितः परिव्राजकः । सिद्धपुत्रस्यौत्पत्तिकी बुद्धिः २७ ।

तदेवमुक्ता बुद्धिरौत्पत्तिकी, सम्प्रति वैनयिक्या लक्षणं प्रतिपादयति –

**मू. ( १०१ )** *भरनित्थरणसमत्था तिवग्गसुत्तत्थगहिअपेआला ।*
*उभओ लोगफलवई विणयसमुत्था हवइबुद्धि ॥*

**वृ.** इहातिगुरु कार्यं दुर्निवहत्वाद्भर इव भरस्तन्निस्तरणे समर्थाः भरनिस्तरसमर्था त्रयो वर्गास्त्रिवर्गाः-लोकरूढ्य धर्मार्थकामास्तदर्जनोपायप्रतिपादकं यत्सूत्रं यश्च तदर्थस्तौ त्रिवर्गसूत्रार्थौ तयोर्गृहीतं 'पेयालं' प्रमाणं सारो वा यया सा तथाविधा, अत्राह-नन्वश्रुतनिश्रिता बुद्धयो वक्तुमभिप्रेताः, ततो यद्यस्यास्त्रिवर्गसूत्रार्थगृहीतसारत्वं ततोऽश्रुतनिश्रितत्वं नोपपद्यते, न हि श्रुताभ्यासमन्तरेण त्रिवर्गसूत्रार्थगृहीतसारत्वं संभवति, अत्रोच्यते, इह प्रायोवृत्तिमाश्रित्याश्रुतनिश्रित्वमुक्तं, ततः स्वल्पश्रुतभावेऽपि न कश्चिद्दोषः । तथा 'उभयलोकफलवती' ऐहिके आमष्यिके च लोके फलदायिनी विनयसमुत्था बुद्धिर्भवति ।

सम्प्रत्यस्या एव विनेयजनानुग्रहार्थमुदाहरणैः स्वरूपं दर्शयति-

गाथाद्वयार्थः कथानेकेभ्योऽवसेवः, तानि च ग्रन्थगौरवभयात्संक्षेपेणोच्यते-

**मू. ( १०२ )** *निमित्ते १ अत्थसत्थे अ २ लेहे ३ गणिघ अ ४ कूव ५ अस्से अ ६ ।*
*गद्दभ ७ लक्खण ८ गंठी ९ अगए १० रहिए अ ११ गणिया य १२ ॥*

**वृ.** तत्र 'निमित्ते' इति, कचित्पुरे कोऽपि सिद्धपुत्रकः, तस्य द्वौ शिष्यौ निमित्तशास्त्रमधीतवन्तौ, एको बहुमानपुरस्सरं गुरोर्विनयपरायणो यत्किमपि गुरुरुपदिशति तत्सर्वं तथेतिप्रतिपद्य स्वचेतसि निरन्तरं विमृशति, विमृशतश्च यत्र कापि सन्देह उपजायते तत्र भूयोऽपि विनयेन गुरुपादमूलमागत्य पृच्छति, एवं निरन्तरं विमर्शपूर्वं शास्त्रार्थं तस्य चिन्तयतः प्रज्ञा प्रकर्षमुपजगाम, द्वितीयस्त्वेतद्गुणविकलः, तौ चान्यदा गुरुनिर्देशात् कचित्प्रत्यासन्ने ग्रामे गन्तुं प्रवृत्तौ, पथि च कानिचित् महान्ति पदानि तावदर्शतां, तत्र विमृश्यकारिणा पृष्टं-भोः कस्यामूनि पदानि ?,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हस्तिन्या अमूनि पदानि, सा च हस्तिनी वामेन चक्षुषा काणा, तां चाधिरूढा गच्छति काचिद्राज्ञी, सा च सभर्तृका गुर्वी च प्रजने कल्या, अद्य श्वो वा प्रसविष्यति, पुत्रश्च तस्या भविष्यति, तत एवमुक्ते सोऽविमृश्यकारी ब्रूते-कथमेतदवसीयते ?,

विमृश्यकारी प्राह-'ज्ञानं प्रत्ययसार'मित्यग्रे प्रत्ययतो व्यक्तं भविष्यति, ततः प्राप्तौ तौ विवक्षितं ग्रामं, दृष्टा चावसिता तस्य ग्रामस्य बहिःप्रदेशे महासरस्तटे राज्ञी, परिभाविता च हस्तिनी वामेन चक्षुषा काणा अत्रान्तरे च काचिद्दासचेडी महत्तमं प्रत्याह-वर्द्धाप्यसे राज्ञः पुत्रलाभेनेति, ततः शब्दितो विमृश्यकारिणा द्वितीयः-परिभावय दासचेडीवचनमिति, तेनोक्तं-परिभावितं मया सर्वं, नान्यथा तव ज्ञानमिति, ततस्तौ हस्तपादान् प्रक्षाल्य तस्मिन् महातरस्तटे न्यग्रोधतरोरधो विश्रामाय स्थितौ, दृष्टौ च कयाचिच्छिरोन्यस्तजलभृतधटिकया वृद्धस्त्रिया, परिभाविता च तयोराकृतिः, ततश्चिन्तयामास-नूनमेतौ विद्वांसौ, ततः पृच्छामि देशान्तर-गतनिजपुत्रागमनमिति, पृष्टं तया, प्रश्नसमकालमेव च शिरसो निपत्य भूमौ धटः शतखण्डशो भग्नः, ततो झटित्येवाविमृश्यकारिणा प्रोचे-गतस्ते पुत्रो धट इव व्यापत्तिमिति,

विमृश्यकारी ब्रूते स्म-मा वयस्यैवं वादीः, पुत्रोऽस्या गृहे समागतो वर्त्तते, याहि मात-र्वृद्धे ! स्त्रि ! स्वपुत्रमुखमवलोकय, तत एवमुक्ता सा प्रत्युज्जीवितेवाशीर्वादशतानि विमृश्य-कारिणः प्रयुञ्जाना स्वगृहं जगाम, दृष्टश्चोद्धूलितजङ्घः स्वपुत्रो गृहमागतः, ततः प्रणता स्वपुत्रेण, सा चाशीर्वादं निजपुत्राय प्रायुंक्त, कथयामास च नैमित्तिकवृत्तान्तं, ततः पुत्रमापृच्छ्य वस्त्रयुगलं रूपकांश्च कतिपयानादाय विमृश्यकारिणः समर्पयामास, अविमृश्यकारी च खेदमावहन् स्वचेतसि अचिन्तयत्-नूनमहं गुरुणा न सम्यक् परिपाठितः, कथमन्यथाऽहं न जानामि ?, एष जानातीति, गुरुप्रयोजनं कृत्वा समागतौ द्वौ गुरोः पार्श्वे, तत्र विमृश्यकारी दर्शनमात्र एव शिरो नमयित्वा कृताञ्जलिपुटः सबहुमानमानन्दाश्रुप्लावितलोचनो गुरोः पादावन्तरा शिरः प्रक्षिप्य प्राणिपपात, द्वितीयोऽपि च शैलस्तम्भ इव मनागप्यनमितगात्रयष्टिर्मात्सर्यवह्निसम्पर्कतो धूमायमानोऽवतिष्ठते, ततो गुरुस्तं प्रत्याह-रे किमिति पादयोर्न पतसि ?, स प्राह-य एव सम्यक् पाठितः स एव पतिष्यति, नाहमिति, गुरुराह-कथं त्वं न सम्यक् पाठितः ?, ततः स प्राचीनं वृत्तान्तं सकलमचीकथत्, यावदेतस्य ज्ञानं सर्वं सत्यं न ममेति, ततो गुरुणा विमृश्यकारी पृष्टः-कथय वत्स ! कथं त्वयेदं ज्ञातमिति ?,

ततः स प्राह-मया युष्मत्पादादेशेन विमर्शः कर्त्तुमारब्धो-यथैतानि हस्तिरूपस्य पदानि सुप्रतीतान्येव, विशेषचिन्तायां तु किं हस्तिन उत हस्तिन्याः ?, तत्र कायिकीं दृष्ट्वा हस्तिन्या इति निश्चितं, दक्षिणे च पार्श्वे वृत्तिसमारूढवल्लीवितामआलूनविशीर्णो हस्तिनीकृतो दृष्टो न वामपार्श्वे ततो निश्चिक्ये-नूनं वामेन चक्षुषा काणेति, तथा नान्य एवंविधपरिकरोपेतो हस्ति-न्यामधिरूढो गन्तुमर्हति ततोऽवश्यं राजकीयं किमपि मानुषं यातीति निश्चितं, तच्च मानुषं क्वचित्प्रदेशे हस्तिन्या उत्तीर्य शरीरचिन्तां कृतवत्, कायिकीं दृष्ट्वा राज्ञीति निश्चितं, वृक्षावलग्न-रक्तवस्त्रदशालेशदर्शनात्, सभर्तृका, भूमौ हस्तं निवेश्योत्थानाकारदर्शनाद्गुर्व्वी, दक्षिणचरण-निस्सहमोचननिवेशदर्शनात्प्रजने कल्येति। वृद्धस्त्रियाः प्रश्नानन्तरं घटनिपते चैवं विमर्शः कृतो-यथैव घटो यत उत्पन्नस्तत्रैव मिलितस्तथा पुत्रोऽपीति । तत एवमुक्ते गुरुणा च विमृश्यकारी

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चक्षुपा सानन्दमीक्षितः प्रशंसितश्च, द्वितीयं प्रत्युवाच-तव दोषो यन्न विमर्शं करोषि, न मम, वयं हि शास्त्रार्थमात्रोपदेशेऽधिकृताः विमर्शे तु यूयमिति। विमृश्यकारिणो वैनयिकी बुद्धिः १।

'**अत्थसत्थे**'त्ति अर्थशास्त्रे कल्पको मन्त्री दृष्टान्तो, 'दहिकुंडग उच्छुकलावओ य' इति संविधानकें'**लेह**'त्ति लिपिपरिज्ञानं,'**गणिए**'त्ति गणितपरिज्ञानं, एते च द्वे अपि वैनयिक्यौ बुद्धी २-३-४।'**कूवे**'त्ति खातपरिज्ञानकुशलेन केनाप्युक्तं यथैतद्दूरे जलमिति, ततस्तावत्प्रमाणं खातं परं नोत्पन्नं जलं, ततस्ते, खातपरिज्ञाननिष्णाताय निवेदयामासुः-नोत्पन्नं जलमिति, ततस्तेनोक्तं-पार्ष्णिप्रहारेण पार्श्वान्याहत, आहतानि तैः, ततः पार्ष्णिप्रहारसमकालमेव समुच्छलितं तत्र जलं, खातपरिज्ञानकुशलस्य पुंसो वैनयिकी बुद्धिः ५।

'**अस्से**'त्ति बहवोऽश्ववणिजो द्वारवतीं जग्मुः, तत्र सर्वे कुमाराः स्थूलान् बृहतश्चाश्वान् गृह्णन्ति, वासुदेवेन पुनर्यो लघीयान् दुर्बलो लक्षणसम्पन्नः स गृहीतः, स च कार्यनिर्वाही प्रभूताश्वावहश्च जातः। वासुदेवस्य वैनयिकी बुद्धिः ६।

'**गद्दभे**'त्ति कोऽपि राजा प्रथमयौवनिकामधिरूढस्तरुणिमानमेव रमणीयं सर्वकार्यक्षमं न मन्यमानस्तरुणानेव निजकटके धारितवान्, वृद्धांस्तु सर्वानपि निषेधयामास, सोऽन्यदा कटकेन गच्छन्नापान्तरालेऽटव्यां पतितपावन्, तत्र च समस्तोऽपि जनस्तृषा पीड्यते, ततः किंकर्त्तव्यता-मूढचेता राजा केनाप्युक्तो-देव! न वृद्धपुरुषशेमुषीपोतमन्तरेणायमापत्समुद्रस्तरीतुं शक्यते, ततो गवेषयन्तु देवपादाः कापि वृद्धमिति, ततो राज्ञा सर्वस्मिन्नपि कटके पटह उद्घोषितः, तत्र चैकेन पितृभक्तेन प्रच्छन्नो निजपिता समानीतो वर्त्तते, ततस्तेनोक्तं-मम पिता वृद्धोऽस्तीति, ततो नीतो राज्ञः पार्श्वे, राज्ञा च सगौरवं पृष्टः-कथय महापुरुष! कथं मे कटके पानीयं भवि-ष्यति?, तेनोक्तं-देव! रासभाः स्वैरं मुच्यन्तां, यत्र ते भुवं जिघ्रन्ति तत्र पानीयमतिप्रत्यासन्नमव-गन्तव्यं, तथैव कारितं राज्ञा, समुत्पादितं पानीयं, स्वस्थीबभूव च समस्तं कटकमिति। स्थविरस्य वैनयिकी बुद्धिः, ७।

'**लक्खण**'त्ति पारसीकः कोऽप्यश्वस्वामी कस्याप्यश्वरक्षकस्यो कालनियमनं कृत्वा अश्व-क्षणमूल्यं द्वावश्वौ प्रतिपन्नवान्, सोऽपि चाश्वस्वामिनो दुहित्रा समं वर्त्तते, ततः सा तेन पृष्टा-कावश्वौ भव्याविति?, तयोक्तम्-अमीषामश्वानां विश्वस्तानां मध्ये यः पाषाणभृतकुतपानां वृक्ष-शिखरान्मुक्तानामपि शब्दामाकर्ण्य नो त्रस्यतस्तौ भव्यौ, तेन तथैवैतौ परीक्षितौ, ततो वेतन-प्रदानकाले सोऽभिधत्ते-मह्यममुकममुकं वाऽश्वं देहि, अश्वस्वामी प्राह-सर्वानप्यन्यान् अश्वान् गृहाण, किमेताभ्यां तवेति?, स नेच्छति, ततोऽश्वस्वामिना स्वभार्यायै न्यवेदि, भणितं च-गृहजामाता क्रियतामेष इति, अन्यथा प्रधानावश्वावेष गृहीत्वा यास्यति, सा नैच्छत्, ततोऽश्वस्वामी प्राह-लक्षणयुक्तेनाश्वेनान्येऽपि बहवोऽश्वाः सम्पद्यन्ते कुटुम्बं च परिवर्द्धते, लक्षणयुक्तौ चेमावश्वौ, तस्मात्क्रियतामेतदिति, ततः प्रतिपन्नं तया, दत्ता तस्मै स्वदुहिता, कृतो गृहजामातेति। अश्वस्वामिनो वैनयिकीबुद्धिः ८।

'**गंठि**'त्ति पाटलिपुरे नगरे मुरुण्डो राजा, तत्र परराष्ट्रराजेन त्रीणि कौतुकनिमित्तं प्रेषितानि, तद्यथा-'मूढं सूत्रं समा यष्टिरलक्षितद्वारः समुद्गको जतुना घोलितः' तानि च मरुण्डेन राज्ञा सर्वेषामप्यात्मपुरुषाणां दर्शितानि, परं केनापि न ज्ञातानि, तत आकारिताः पादलिप्ताचार्याः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुष्टं राज्ञा-भगवन्! यूयं जानीत ?, सूरय उक्तवन्तो-बाढं, ततः सूत्रमुष्णोदके क्षिप्तम्, उष्णोदक-सम्पर्काच्च विलीनं मदनमिति लब्धः सूत्रस्यान्तः, यष्टिरपि पानीये क्षिप्ता, ततो गुरुभागो मूलमिति ज्ञातं, समुद्गकेऽप्युष्णोदके क्षिप्ते जतु सर्वं गलितमिति द्वारं प्रगटं बभूव, ततो राजा सूरिन् प्रत्यवादीत्-भगवन्! यूयमपि दुर्विज्ञेयं किमपि कौतुकं कुरुत येन तत्र प्रेषयामि, ततः सूरिभिस्तु-म्बकमेकस्मिन् प्रदेशे खण्डमेकमपहाय रत्नानां भृतं, ततस्तथा तत्खण्डं सीवितं यथा न केनापि लक्ष्यते, भणिताश्च परराष्ट्रजकीयाः पुरुषाः-एतद्भंक्त्वा इतो रत्नानि गृहीतव्यानि, न शक्तं तैरेवं कर्त्तुं। पादलिप्तसूरीणां वैनयिकी बुद्धिः ९।

'**अगए**'त्ति क्वच्चिपुरे कोऽपि राजा, स च परचक्रेण सर्वतो रोद्धुमारब्धः, ततस्तेन राज्ञा सर्वाण्यपि पानीयानि विनाशयितव्यानीति विषकरः सर्वत्र पातितः, ततः कोऽपि कियद्विषमान-यति, तत्रैको वैद्यो यवमात्रं विषमानीय राज्ञः समर्प्पितवान्-देव! गृहाण विषमिति, राजा च स्तोकुकं विषं दृष्ट्वा चुकोप तस्मै, वेद्यो आनाय्यतां कोऽपि जीर्णो हस्ती, आनायितो राज्ञा हस्ती, ततो वैद्येन तस्य हस्तिनः पुच्छदेशे वालकमेकमुत्पाट्य तदीयरन्ध्रे विषं सञ्चारितं, विषं च प्रसरमाददानं यत्र यत्र प्रसरति तत्तत्सर्वं विपन्नं कुर्वत् दृश्यते, वैद्यश्च राजानमभिधत्ते-देव! सर्वोऽप्येष हस्ती विषमयो जातः, योऽप्येनं भक्षयति सोऽपि विषमयो भवति, एवमेतद्विषं सहस्रवेधि, ततो राजा हस्तिहानिदूनचेतासं प्रत्युवाच-अस्ति कोऽपि हस्तिनः प्रतिकारविधिः ?, सोऽवादीत्-बाढमस्ति, ततस्तस्मिन्नेव वालरन्ध्रेऽगदः प्रदत्तः, ततः सर्वोऽपि झटित्येव प्रशान्तो विषविकारः, प्रगुणीबभूव हस्ती, तुतोष राजा तस्मै वैद्याय। वैद्यस्य वैनयिकी बुद्धिः १०।

'**रहिए गणिया य**'त्ति स्थूलभद्रकथानके रथिकस्य यत् सहकारफललुम्बित्रोटनं यच्च गणिकायाः सर्षपराशेरुपरि नर्त्तनं ते द्वे अपि वैनयिकीबुद्धिफले ११-१२।

*मू. (१०३) सीआ साडी दीहं च तणं अवसव्वयं च कुंचस्स १३।*
*निव्वोदए अ १४ गोणे घोडगपडणं त रुक्खओ १५॥*

**वृ.** '**सीये**'त्यादि, क्वचित्पुरे कोऽपि राजा, तत्पुत्राः केनाप्याचार्येण शिक्षयितुमारब्धा, ते च तस्मै आचार्यय प्रभूतं द्रव्यं दत्तवन्तः, राजा च द्रव्यलोभी तं मारयितुमिच्छति, तैश्च पुत्रैः कथञ्चि-देतज्ज्ञात्वा चिन्तितम्-अस्माकमेष विद्यादायी परमार्थपिता, ततः कथमप्येनमापदो निस्तारयामः, ततो यदा भोजनाय समागतः स्नानशाटिकां याचते तदा ते कुमाराः शुष्कमपि शार्टी वदन्ति-"अहो सीया साडी" द्वारसम्मुखं च तृणं कृत्वा वदन्ति-अहो दीर्घं तृणं, पूर्वं च क्रौञ्चकेन सदैव प्रदक्षिणीक्रियते, सम्प्रति तु स तस्यापसव्यं भ्रमितः, तत आचार्येण ज्ञातं-सर्वं मम विरक्तं, केवलमेते कुमारा मम भक्तिवशात् ज्ञापयन्ति, ततो यथा न लक्ष्यते तथा पलाययामास, कुमाराणामाचार्यस्य च वैनयिकी बुद्धिः १३।

'**निव्वोदएणं**'ति काऽपि वणिग्भार्या चिरं प्रोषिते भर्त्तरि दास्या निजसद्भावं निवेदयति-आनय कमपि पुरुषमति, ततस्तवा समानीतो, नखप्रक्षालनादिकं च सर्वं तस्य कारितं, रात्रौ च तौ द्वावपिसम्भोगाय द्वितीयभूमिकामारूढौ, मेघश्च वृष्टिं कर्तुमारब्धवान्, ततस्तेन तृषा पीडितेन पुरुषेण नीव्रोदकं पीतं तदपि च त्वग्विषभुजङ्गसंस्पृष्टमिति तत्पानेन पञ्चत्वमुपगतः, ततस्तया वणिग्भार्यया निशापश्चिमयाम एव शून्यदेवकुलिकायां मोचितः, प्रभाते च दृष्टो दाण्डपाशिकैः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परिभावितं सद्यः तत्तस्य नखादिकर्म्म, ततः पृष्टाः सर्वेऽपि नापिताः-केनेदं भोः कृतमस्य नखादिकं कर्म्मेति ?, तत एकेन नापितेनोक्तं-मया कृतममुकाभिधवणिग्भार्यादासचेट्यदेशेन, ततः सा पृष्टा-सापि च पूर्वं न कथितवती, ततो हन्यमाना यथावस्थितं कथयामास। दाण्डापाशिकानां वैनयिकी बुद्धिः १४।

'**गोणे घोडगपडणं च रुक्खाओ**' कोऽप्यकृतपुण्यो यद्यत्करोति तत्सर्वमापदे प्रभवति, ततोऽन्यदा मित्रं बलीवर्दौ याचित्वा हलं वाहयति, अन्यदा च विकालवेलायां तावानीया वाटके क्षिप्तौ, स च वयस्यो भोजनं कुर्वन्नास्ते, ततः स तस्य पार्श्वे न गतः केवलं तेनापि तौ दृष्ट्याऽवलोकिताविति स स्वगृहं गतः, तौ च बलीवर्दौ वाटकान्निःसृत्यान्यत्र गतौ, ततोऽप्यपहृतौ तस्करैः, स च बलीवर्दस्वामी तमकृतपुण्यं वराकं बलिवर्दौ याचते, स च दातुं न शक्नोति, ततो नीयते तेन राजकुलं, पथि च गच्छतस्यस्य कोऽप्यश्वारूढः पुरुषः सम्मुखमागच्छति, स चाश्वेन पातितः अश्वश्च पलायमानो वर्त्तते, ततस्तेनोक्तम्-आहन्यमतामेष दण्डेनाश्व इति, तेन चाकृतपुण्येन सोऽश्वो मर्मण्याहतः, ततो मृत्युमुपागमत्, ततस्तेनापि पुरुषेण स वराको गृहीतः, ते च यावन्नगरमायातास्तावत्करणमुत्थितमितिकृत्वा ते नगरबहिष्प्रदेशे एवोषिताः,

तत्र च बहवो नटाः सुप्ता वर्त्तन्ते, स चाकृतपुण्योऽचिन्तयत्-यथा नास्मादापत्समुद्रान् मे निस्तारोऽस्तीति वृक्षे गलपाशेनात्मानं बद्धा म्रियेयेति तेन तथैव कर्त्तमारब्धं, परं जीर्ण्णदण्डिवस्त्रखण्डेन गले पाशो बद्धः, तच्च दण्डीवस्त्रखण्डमतिदुर्बलमिति त्रुटितं, ततः स वराकोऽधस्तात्सुप्तनटमहप्रातः सर्वेऽपि राजकुलं, कथितः सर्वैरपि स्वः स्वः व्यतिकरः, ततः कुमारामात्येन स वराकः पृष्टः सोऽपि दीनवदनोऽवादीद्-देव! यदेते ब्रुवते तत्सर्वं सत्यमपि, ततः तस्योपरि सञ्जातकृपः कुमारामात्योऽवादीत्-एष बलीवर्दौ तुभ्यं दास्यति, तव पुनरक्षिणी उत्पाटयिष्यति, एष हि तदैवानृणो बभूव यदा त्वया चक्षुर्भ्यामवलोकितौ बलिवर्दौ, यदि पुनस्त्वया चक्षुर्भ्यां नावलोकितौ बलीवर्दौ स्यातां तदैषोऽपि स्वगृहं न यायात्, न हि यो यस्मै यस्य समर्प्पणायागतः स तस्यानिवेदने समर्प्पणीयमेवमेव मुक्त्वा स्वगृहं याति, तथा द्वितीयोऽश्वस्वामी शब्दितः, एषोऽश्वं तुभ्यं दास्यति, तव पुनरेष जिह्वां छेत्स्यति, यदा हि त्वदीयजिह्वयोक्तम्-एवमश्वं दण्डेन ताडयेति तदाऽनेन दण्डेनाहतोऽश्वो, नान्यदा, तत एष दण्डेनाऽऽहन्ता दण्डयन्ते तव न पुनर्जिह्वेति कोऽयं नीतिपथः ?, तथा नटान् प्रत्याह-अस्य पार्श्वे न किमप्यस्ति ततः किं दापयामः ?, एतावत्पुनः कारयामः-एषोऽधस्तात् स्थास्यति, त्वदीयः पुनः कोऽपि प्रधानो यथैष वृक्षे गलपाशेनात्मानं बद्ध्वा मुक्तवान तथाऽऽत्मानं मुञ्चत्विति, ततः सर्वैरपि मुक्तः। कुमारामात्यस्य वैनयिकी बुद्धिः १५। उक्ता वैनयिकी बुद्धिः कर्म्मजाया बुद्धेर्ल्लक्षणमाह-

*मू. ( १०४ ) उवओगदिट्ठसारा कम्मपसंगपरिघोलणविसाला।*
*साहुक्कारफलवई कम्मसमुत्था हवइ बुद्धि॥*

*मू. ( १०५ ) हेरण्णिए १ करिसए २ कोलिअ ३ डोवे अ ४ मुत्ति ५ घय ६ पवए ७।*
*तुन्नाए ८ वड्डइय ९ पूयइ १० घड ११ चित्तकारे अ १२॥*

वृ. 'उवओगे'त्यादि, उपयोजनमुपयोगो-विवक्षितकर्म्मणि मनसोऽभिनिवेशः सारः-तस्यैव विवक्षितः परमार्थः, उपयोगेन दृष्टः सारो यया सा उपयोगदृष्टसारा, अभिनिवेशोपलब्धकर्म्मपरमार्था

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्यर्थः, तथा कर्मणि प्रसङ्गः-अभ्यासः परिघोलनं-विचारस्ताभ्यां विशाला-विस्तारमुपगता कर्म्मप्रसङ्गपरिघोलनविशाला, तथा साधुकृतं-सुष्ठुकृतमिति विद्वद्भिः प्रशंसा साधुकारः तेन युक्तं फलं साधुकारफलं तद्वती, साधुकारपुरस्सरं वेतनादिलाभरूपं तस्याः फलमित्यर्थः, सा तथा कर्मसमुत्था बुद्धिर्भवति।

अस्या अपि विनेयजनानुग्रहार्थमुदाहरणैः स्वरूपं दर्शयति-'हेरण्णिए' इत्यादौ षष्ठ्यर्थे सप्तमी, ततोऽयमर्थो-**हैरण्यके** हैरण्यकस्य कर्मजा बुद्धिः, एवं सर्वत्रापि योजना कार्या, हैरण्यको हि स्वविज्ञानप्रकर्षप्राप्तोऽन्धकारेऽपि हस्तस्पर्शविशेषण रूपकं यथावस्थितं परीक्षते।

'**करिसग**' त्ति अत्रोदाहरणं-कोऽपि तस्करो रात्रौ वणिजो गृहे पद्माकारं खातं खातवान्, ततः प्रातरलक्षितस्तस्मिन्नेव गृहे समागत्य जनेभ्यः प्रशुसामाकर्ण्णयति, तत्रैकः कर्षकोऽब्रवीत्-किं नाम शिक्षितस्य दुष्करत्वं ?, यद्येन सदैवाभ्यस्तं कर्म स तत्प्रकर्षप्राप्तं करोति, नात्र विस्मयः, ततः स तस्कर एतद्वाक्यममर्षवैश्वानरसन्धुक्षणसममाकर्ण्य जज्वाल कोपेन, ततः पृष्टवान् कमपि पुरुषं-कोऽपं कस्य वा सत्क इति ?, ज्ञात्वा च तमन्यदा क्षुरिकामाकृष्य गतः क्षेत्रे तस्य पार्श्वे, रे! मारयामि त्वां सम्प्रति, तेनोक्तं-किमिति ?, सोऽब्रवीत्-त्वया तदानीं न मम खातं प्रशंसितमिति-कृत्वा, सोऽब्रवीत्-सत्यमेतत्, यो यस्मिन् कर्मणि सदैवाभ्यासपरः स तद्विषये प्रकर्षवान् भवति, तत्राहमेव दृष्टान्तः, तथाहिअमून् मुद्गान् हस्तगतान् यदि भणसि तर्हि सर्वानप्यधोमुखान् पातयामि यद्वा ऊर्ध्वमुखान् अथवा पार्श्वस्थितानिति, ततः सोऽधिकतरं विस्मितचेताः प्राह-पातय सर्वानप्यधोमुखानिति, विस्तारितो भूमौ पटः, पातिताः सर्वेऽप्यधोमुखा मुद्गाः, जातो महान् विस्मश्चौरस्य, प्रशंसितं भूयो भूयस्तस्य कौशलमहो विज्ञानमहो विज्ञानमिति, वदति चोरो-यदि नाधोमुखाः पातिता अभविष्यन् ततो नियमात् त्वामहममारयिष्यमिति। कर्षकस्य चौरस्य च कर्म्मजा बुद्धिः।

'**कोलिय**' त्ति कौलिकस्तन्तुवायः, स मुष्टया तन्तूनादाय जानाति-एतावद्भिः कण्डकैः पटो भविष्यति।

'**डोए**' त्ति दर्वी वर्द्धकिर्जानाति-एतावदत्र मास्यतीति।

'**मुत्ति**' त्ति मणिकारो मौक्तिकमाकाशे प्रक्षिप्य शूकरवालं तथा धारयति यथा पतितो मौक्तिस्य रन्ध्रे स प्रविशतीति।

'**घय**' त्ति धृतविक्रयी स्वविज्ञानप्रकर्षप्राप्तो यदि रोचते तर्हि शकटे स्थितोऽधस्तात् कुण्डिकानालेऽपि धृतं प्रक्षिपति।

'**पवय**' त्ति प्लवकः, स चाकाशस्थितानि करणानि करोति।

'**तुण्णाग**' त्ति सीवनकर्म्मकर्त्ता, स च स्वविज्ञानप्रकर्षप्राप्तस्तथा सीवति यथा प्रायो यत्केनापि न लक्ष्यते। 'वड्डइ' ति**वर्द्धकिः**, स च स्वविज्ञानप्रकर्षप्राप्तोऽमित्वापि देवकुलरथादीनां प्रमाणं जानाति।

'**पूयइ**' त्ति आपूपिकः, स चामित्वाप्यपूपानां दलस्य मानं जानाति।

'**धड**' त्ति घटकारः स्वविज्ञानप्रकर्षप्राप्तः प्रथमत एव प्रमाणयुक्तां मृदं गृह्णाति।

'**चित्तकारे**' त्ति चित्रकारः, स च रूपकभूमिकाममित्वाऽपि रूपकप्रमाणं जानाति तावन्मात्रं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वा वर्ण्णं कुञ्चिकायां गृह्णाति यावन्मात्रेण प्रयोजनमिति।

उक्ता कर्मजा बुद्धिः, सम्प्रति पारिणामिक्या लक्षणमाह-

*मू.( १०६ ) अनुमानहेउदिट्ठंतसाहिआ वयविवागपरिणामा।*
*हिअनिस्सेअसफलवई बुद्धी परिणामिआ नाम॥*

**वृ.** 'अणुमाणे'त्यादि, लिङ्गाल्लिङ्गिनि ज्ञानमनुमानं, तच्च स्वार्थानुमानमिह द्रष्टव्यं, अन्यथा हेतुग्रहणस्य नैरर्थक्यापत्तेः, अनुमानप्रतिपादकं वचो हेतुः, परार्थानुमानमित्यर्थः, अथवा ज्ञापक-मनुमानं, कारकं हेतुः, दृष्टान्तः प्रतीतः, आहअनुमानग्रहणेन दृष्टान्तस्य गतत्वादलमस्योपन्यासेन, उच्यते, अनुमानस्य कचिद्दृष्टान्तमन्तरेणान्यथानुपपत्तिग्राहकप्रमाणबलेन प्रवृत्तेः, यथा सात्मकं जीवच्छरीरं, प्राणादिमत्त्वान्यथानुपपत्तेः, न च दृष्टान्तोऽनुमानस्याङ्गं, यत उक्तम्-"अन्यथाऽनुप-पन्नत्वं, यत्र तत्र त्रयेण किम्?" ततः पृथग् दृष्टान्तस्योपादानं, तत्र साध्यस्योपमाभूतो दृष्टान्तः, तथा चोक्तम्-"यः साध्यस्योपमाभूतः, (स) दृष्टान्त इति कथ्यते।"

अनुमानहेतुदृष्टान्तैः साध्यमर्थं साधयतीति अनुमानहेतुदृष्टान्तसाधिका, तथा कालकृतो देहावस्थाविशेषो वयस्तद्विपाके परिणामः-पुष्टता यस्याः सा वयोविपाकपरिणामा, तथा हितम्-अभ्युदयो निःश्रेयसं-मोक्षस्ताभ्यां फलवती ते द्वे अपि तस्याः फले इत्यर्थः, बुद्धिः परिणामिकी नाम।

अस्या अपि शिष्यगणहितायोदाहरणैः स्वरूपं प्रकटयति-'अभये' इत्यादिगाथात्रयं, अस्यार्थः कथानकेभ्योऽवसेयः, तानि च कथानकानि प्रायोऽतीव गुरूणि प्रसिद्धानि च ततो ग्रन्थान्तरे-भ्योऽवसेयानि, इह त्वक्षरयोजनामात्रमेव केवलं करिष्यते।

*मू.( १०७ ) अभए १ सिट्ठि २ कुमारे ३ देवी ४ उदिओदए हवइ राया ५।*
*साहू य नंदिसेने ६ धनदत्ते ७ सावग ८ अमच्चे ९॥*

**वृ.**तत्र' **अभय** 'त्ति अभयकुमारस्य यच्चण्डप्रद्योताद्वरचतुष्टयमार्ग्गणं यच्चण्डप्रद्योतं बद्ध्वा नगरमध्येनारटन्तं नीतवानित्यादि सा परिणामकी बुद्धिः।

'**सेट्ठि**'त्ति काष्ठश्रेष्ठी, तस्य यत्स्वभार्यादुश्चरितमवलोकस्य प्रव्रज्याप्रतिपत्तिकरणं, यच्च पुत्रे राज्यमनुशासति वर्षाचतुर्मासिकानन्तरं विहारक्रमं कुर्वतः पुत्रसमक्षं धिग्जातीयैरुपस्थापिताया द्व्यक्षरिकाया आपन्नसत्त्वायास्त्वदीयोऽयं गर्भस्त्वं च ग्रामान्तरं प्रति चलितः ततः कथमहं भविष्या-मीति वदन्त्याः प्रवचनापयशोनिवारणाय यदि मदीयो गर्भस्ततो योनेर्विनिर्गच्छतु नो चेदुदरं भित्त्वा विनिर्गच्छत्विति यत् शापप्रदानं, सा परिणामिकी बुद्धिः।

'**कुमारे**'त्ति मोदकप्रियस्य कुमारस्य प्रथमे वयसि वर्त्तमानस्य कदाचिद्गुणन्यां गतस्य प्रमादादिभिः सह यथेच्छं मोदकान् भक्षितवतोऽजीर्णरोगप्रादुर्भावादतिपूतिगन्धि वातकाय-मुत्सृजतो या उद्गता चिन्ता, यथा अहो! तादृशान्यपि मनोहराणि कणिकादीनि द्रव्याणि शरीर-सम्पर्कवशात्पूतिगन्धीनि जातानि, तस्माद् धिगिदमशुचि शरीरं, धिग्मोहो, यदेतस्यापि शरीरस्य कृते जन्तुः पापान्यारभते, इत्यादिरूपा सा पारिणामिकी बुद्धिः, तत ऊर्ध्वं तस्य शुभशुभतरा-ध्यवसायभावतोऽन्तमुहूर्तेन केवलज्ञानोत्पत्तिः।

'**देवि**'त्ति देव्याः पुष्पवत्यभिधानायाः प्रव्रज्यां परिपाल्य देवत्वेनोत्पन्नाया यत्पुष्पचूला-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भिधानायाः स्वपुत्र्याः स्वप्ने नरकदेवलोकप्रगटनेन प्रबोधकरणं सा पारिणामिकी बुद्धिः ।

'**उदिओदए**' त्ति उदितोदयस्य राज्ञः श्रीकान्तापतेः पुरिमतालपुरे राज्यमनुशासतः श्रीकान्ता-निमित्तं वाणारसीवास्तव्येन धर्मरुचिना राज्ञा सर्वबलेन समागत्य निरुद्धस्य प्रभूतजनपरिक्षयभयेन यद्वैश्रवणमुपवासं कृत्वा समाहूय सनगरस्यात्मनोऽन्यत्र संक्रामणं सा पारिणामिकी बुद्धधिः ।

'**साहूय नंदिसेण**' त्ति साधोः श्रेणिकपुत्रस्य नन्दिषेणस्य स्वशिष्यस्य व्रतमुज्झितुकामस्य स्थिरीकरणाय भगवद्वर्द्धमानस्वामिवन्दननिमित्तं चलितमुक्ताभरणश्वेताम्बरपरिधान-रूपरामणीयकविनिर्जतामरसुन्दरीकस्वान्तः पुरदर्शनं कृतं सा परिणामिकी बुद्धिः, स हि नन्दि-षेणस्य तादृशमन्तः पुरं नन्दिषेणपरित्यक्तं दृष्ट्वा दृढतरं संयमे स्थिरीबभूव ।

'**धणदत्ते**' त्ति धनदत्तस्य सुंसमाया निजपुत्र्याः चिलातीपुत्रेण मारितायाः कालमुपेक्ष्य यत्पललभक्षणं सा पारिणामिकी बुद्धिः ।

'**सावगो**' त्ति कोऽपि श्रावकः प्रत्याख्यातपरस्त्रीसम्भोगः कदाचिन्निजजायासखीमवलोकस्य तत्रातीवाध्युपपन्नः, तं च तादृशं दृष्ट्वा तद्भार्याऽचिन्तयत्-नूनमेष यदि कथमप्येतस्मिन्नध्यवसाये वर्तमानो म्रियते तर्हि नरकगतिं तिर्यग्गतिं वा यति तस्मात्करोति कश्चिदुपायमिति, ततं एवं चिन्तयित्वा स्वपतिमभाणित्-मा त्वमातुरीभूः, अहं ते तां विकालवेलायां सम्पादयिष्यामि, तेन प्रतिपन्नं, ततो विकालवेलायामीपदन्धकारे जगति प्रसरति स्वसख्या वस्त्राभरणानि परिधाय सा स्वसखीरूपेण रहसि तमुपासृपत्, स च सेयं मद्भार्यासखीत्वगम्य तां परिभुक्तवान्, परिभोगे कृते चापगतकामाध्यवसायोऽस्मरच्च प्रागगृहीतं व्रतं, ततो व्रतभङ्गो मे समुदपादीति खेदं कर्त्तुं प्रवृत्तः, ततस्तद्भार्या तस्मै यथावस्थितं निवेदयामास, ततो मनाक् स्वस्थीबभूव, गुरुपादमूलं च गत्वा दुष्टमनः सङ्कल्पनिमित्तव्रतभङ्गविशुद्ध्यर्थं प्रायश्चित्तं प्रतिपन्नवान्, श्राविकायाः पारिणामिकी बुद्धिः ।

'**अमच्चे**' त्ति वरधनुः पितुरमात्यस्य ब्रह्मदत्तकुमारविनिर्गमनाय यत सुरङ्गाखाननं, सा पारिणामिकी बुद्धिः ।

'**खमए**' त्ति क्षपकस्य कोपवेशन मृत्वा सर्प्पत्वेनोत्पन्नस्य ततोऽपि मृत्वा जातराजपुत्रस्य प्रव्रज्याप्रतिपत्तौ चुतरः क्षपकान् पर्युपासीनस्य यद्भोजनवेलायां तैः क्षपकैः पात्रे निष्ठयूतनिक्षेपेऽपि क्षमाकरणमात्मनिन्दनं क्षपकगुणप्रशंसा सा पारिणामिकी बुद्धिः ।

*मू. ( १०८ ) अमच्चपुत्ते ११ चाणक्के १२ चेव थूलभद्दे अ १३ ।*
*नासिकसुंदरनिंदे १४ वइरे १५ परिणामबुद्धीए ॥*

वृ. '**अमच्चपुत्ते**' त्ति अमात्यपुत्रस्य वरधनुर्नाम्नो ब्रह्मदत्तकुमारविषये दीर्घपृष्ठस्वरूप-ज्ञापनादिषु तेषु २ प्रयोजनेषु पारिणामिकी बुद्धिः ।

'**चाणक्के**' त्ति चाणक्यस्य चन्द्रगुप्तस्य राज्यमनुशासतो भाण्डागारे निष्ठिते सति यदेक दिवस जाता श्वादियाचनं सा पारिणामिकी बुद्धिः ।

'**थूलभद्दे**' त्ति स्थूलभद्रस्वामिनः पितरि मारिते नन्देनामात्यपदपरिपालनाय प्रार्थ्यमानस्यापि यत्प्रव्रज्याप्रतिपत्तिकरणं सा पारिणामिकी बुद्धिः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

'**नासिकसुंदरिनंदे**'त्ति नासिक्यपुरे सुन्दरीभर्तृनन्दस्य भ्रात्रा साधुना यन्मेरुशिरसि नयनं यच्च देवमैथुनकं दर्शितं सा पारिणामिकी बुद्धिः। '**वइर**'त्ति वज्रस्वामिनो बालभावेऽ वर्त्तमानस्य मातरमवगणय्य सङ्घबहुमानकरणं सा पारिणामिकी बुद्धिः।

*मू. ( १०९ ) चलणाहण १६ आमंडे १७ मणी अ १८ सप्पे अ १९ खग्गि २० थूभिंदे २१। परिणामियबुद्धीए एवमाई उदाहरणा॥*

**वृ.** '**चलणाहण**'त्ति कोऽपि राजा तरुणैर्व्युद्ग्राह्यते-यथा देव! तरुणा एव पार्श्वे ध्रियन्तां, किं स्थविरैः वलिपलितविशोभितरीरैः ?, ततो राजा तान् प्रति परीक्षानिमित्तं ब्रूते-यो मां शिरसि पादेन ताडयति तस्य को दण्ड इति ?, ते प्राहुः-तिलकमात्राणि खण्डानि स विकृत्य मार्यते इति, ततः स्थाविरान् पप्रच्छ-तेऽवोचत्त-देव! परिभाव्य कथयामः, ततस्तैरेकान्ते गत्वा चिन्तितं-को नाम हृदयवल्लभां देवीमतिरच्यान्यो देवं शिरसि ताडयितुमीष्टे, हृदयवल्लभा च विशेषतः सन्मान-नीयेति, ततस्ते समागत्य राजानं विज्ञपयामासुः-देव! स विशेषतः सत्कारणीय इति, तत्तो राजा परितोषमुपागतस्तान् प्रशंसतिवान्-को नाम वृद्धान् विहायान्य एवंविधबुद्धिभाग् भवति, ततः सदैव स्थविरान् पार्श्वे धारयामास न तरुणानिति। राज्ञः स्थविराणां च पारिणामिकी बुद्धिः।

'**आमंडे**'त्ति कृत्रिममालकमिति, कठिनत्वादकालत्वाच्च केनापि यथावस्थितं ज्ञातं तस्य पारिणामिकी बुद्धिः।

'**मणि**'त्ति कोऽपि सर्प्पो वृक्षमारुह्य सदैव पक्षिणामण्डानि भक्षयति, अन्यदा च स वृक्षस्थितो निपतितः, मणिश्च तस्य तत्रैव कचित् प्रदेशे स्थितः, तस्य च वृक्षस्याधस्तान् कूपोऽस्ति, उपरि-स्थितमणिप्रभाविच्छुरितं च सकलमपि कूपोदकं रक्तीभूतमुपलक्ष्यते, कूपादाकृष्टं च स्वाभाविकं दृश्यते, एतच्च बालकेन केनापि निजपितुः स्थविरय निवेदितं, सोऽपि तत्र समागत्य सम्यक्-परिभाव्य मणिं गृहीतवान्, तस्य पारिणामिकी बुद्धिः।'**सप्पे**'त्ति सर्प्पस्य चण्डकौशिकस्य भगवन्तं प्रति या चिन्ताऽभूत-ईदृगयं महात्मेत्यादिका सा पारिणामिकी बुद्धिः।

'**खग्ग**'त्ति कोऽपि श्रावकः प्रथमयौवनमदमोहितमना धर्मकृत्वा पञ्चत्वमुपागतः खड्गः समुत्पन्नः, यस्य गच्छतो द्वयोरपि पार्श्वयोश्चर्म्माणि लम्बन्ते स जीवविशेषः खड्गः, स चाटव्यां चतुष्पथे जनं मारयित्वा खादति, अन्यदा च तेन पथा गच्छतः साधून् दृष्ट्वान्, स चाक्रमितुं न शक्नोति, ततस्तस्य जातिस्मरणं भक्तप्रत्याख्यानं देवलोकगमनं, तस्य पारिणामिकी बुद्धिः।

'**थूभ**'(भिंदे)त्ति विशालायां पुरि कूलवालकेन विशालाभङ्गाय यन्मुनिसुव्रतस्वामिपादुका-स्तूपोत्खातनं सा तस्य पारिणामिकी बुद्धिः। पारिणामिक्या बुद्धेरेवमादीन्युदाहरणानि।

*मू. ( ११० ) से तं असुअनिस्सियं॥*

**वृ.** 'सेत्तमि'त्यादि, तदेतदश्रुतनिश्रितं।

***मू. ( १११ ) से किं तं सुअनिस्सिअं ?, २ चउव्विहं पन्नत्तं, तंजहा-उग्गह १ ईहा २ अवाओ ३ धारणा ४***

**वृ.** 'से किं तमि'त्यादि, अथ किं तच्छ्रुतनिश्रितं मतिज्ञानं ?, गुरुराह-श्रुतनिश्रितं मतिज्ञानं चतुर्विधं प्रज्ञप्तं, तद्यथा-अवग्रह ईहा अपायो धारणा च, तत्र अवग्रहणमवग्रहः-अनिर्देश्यसामान्य-मात्ररूपार्थग्रहणमित्यर्थः, यदाह चूर्णिकृत्-''सामान्यस्स रूवादिविसेसणरहियस्स अनिद्देसस्स

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अवग्गहणमवग्गह" इति।

तथा ईहनमीहा, सद्भूतार्थपर्यालोचनरूपा चेष्टा इत्यर्थः, किमुक्तं भवति-अवग्रहादुत्तरकालमवायात्पूर्वं सद्भूतार्थविशेषोपादानाभिमुखोऽद्भूतार्थविशेषपरित्यागाभिमुखः-प्रायोऽत्र मधुरत्वादयः शङ्खादिशब्दधर्म्मा दृश्यन्ते न खरकर्कशनिष्ठुरतादयः शार्ङ्गादिशब्दधर्म्मा इत्येवंरूपो मतिविशेष ईहा, आह च भाष्यकृत् भूयो भूयः-"विसेसादानच्चायाभिमुहमीहा" तथा तस्यैवावगृहीतस्येहितस्यार्थस्य निर्णयरूपोऽध्यवसायोऽवायः शाङ्ख एवायं शार्ङ्ग एवा (व वा)-यमित्यादिरूपोऽवधारणात्मकः प्रत्ययोऽवाय इत्यर्थः, तस्यैवार्थस्य निर्णीतस्य धरणं धारणा, सा च त्रिधा-अविच्युतिर्वासना स्मृतिश्च, तत्र तदुपयोगादविच्यवनमविच्युतिः, सा चान्तर्मुहूर्त्तप्रमाणा ततस्तयाऽऽहितो यः संस्कारः स वासना, सा च सङ्ख्येयमसङ्ख्येयं वा कालं यावद्भवति, ततः कालान्तरे कुतश्चित्तादृशार्थदर्शनादिककारणात् संस्कारस्य प्रबोधे यज्ज्ञानमुदयते-तदेवेदं यत् मया प्रागुपलब्धमित्यादिरूपं सा स्मृतिः, उक्तं च-

"तदनंतरं तदत्थाविच्चवणं जो उ वासनाजोगो।
कालंतरेण जं पुन अनुसरणं धारणा सा उ॥"

एताश्चाविच्युतिवासनास्मृतयो धारणालक्षणसामान्यन्वर्थयोगाद्धारणाशब्दवाच्याः॥

*मू. (११२) से किं तं उग्गहे?, उग्गहे दुविहे पन्नत्ते, तंजहा- अत्थुग्गहे अ वंजणुग्गहे अ।*

**वृ.** 'से किं तमि'त्यादि, अथ कोऽयमवग्रहः?, सूरिराह-अवग्रहो द्विविधः प्रज्ञप्तः, तद्यथा-अर्थावग्रहश्च व्यञ्जनावग्रहश्च, तत्र अर्थ्यते इत्यर्थः अर्थस्यावग्रहणं अर्थावग्रहः-सकलरूपादिविशेषनिरपेक्षानिर्देश्यसामान्यमात्ररूपार्थग्रहणमेकसामयिकमित्यर्थः। तथा व्यज्यते अनेनार्थः प्रदीपेनेव घट इति व्यञ्जनं, तच्चोपकरणेन्द्रियस्य श्रोत्रादेः शब्दादिपरिणतद्रव्याणां च परस्परं सम्बन्धः, सम्बन्धे हि सति सोऽर्थः शब्दादिरूपः श्रोत्रादीन्द्रियेण व्यञ्जयितुं शक्यते, नान्यथा, ततः सम्बन्धो व्यञ्जनं च, तथा चाह भाष्यकृत्-

"वंजिज्जइ जेनऽत्थो घडोव्व दीवेन वंजणं तं च।
उवगरणिंदियसद्दाइपरिणयद्दव्वसंबंधो॥"

व्यञ्जनेन-सम्बन्धेनावग्रहणं सम्बध्यमानस्य शब्दादिरूपस्यार्थस्याव्यक्तरूपः परिच्छेदो व्यञ्जनावग्रहः, अथवा व्यज्यन्ते इति व्यञ्जनानि, 'कृद्बहुल'मिति वचनातए कर्मण्यनट्, व्यञ्जनानां शब्दादिरूपतया परिणतानां द्रव्याणामुपकरणेन्द्रियसम्प्राप्तानामवग्रहः-अव्यक्तरूपः परिच्छेदो व्यञ्जनावग्रहः, व्यज्यतेऽनेनार्थः प्रदीपेनेव घट इति व्यञ्जनं-उपकरणेन्द्रियं तेन स्वसम्बद्धस्यार्थस्य-शब्दादेरवग्रहणम्-अव्यक्तरूपः परिच्छेदो व्यञ्जनावग्रहः, इयमत्र भावना-उपकरणेन्द्रियशब्दादिपरिणतद्रव्यसम्बन्धे प्रथमसमयादारभ्यार्थावग्रहात् प्राक् या सुप्तमत्तमूर्च्छितादिपुरुषाणामिव शब्दादिद्रव्यसम्बन्धमात्रविषया काचिदव्यक्ता ज्ञानमात्रा सा व्यञ्जनावग्रहः, स चान्तर्मुहूर्त्तप्रमाणः।

अत्राह-ननु व्यञ्जनावग्रहवेलायां न किमपि संवेदनं संवेद्यते, तत्कथमसौ ज्ञानरूपो गीयते?, उच्यते, अव्यक्तत्वान्ना संवेद्यते, ततो न कश्चिद्दोषः, तथाहि-यदि प्रथमसमयेऽपि शब्दादिपरिणतद्रव्यैरुपकरणेन्द्रियस्य सम्पृक्तौ काचिदपि न ज्ञानमात्रा भवेत् ततो द्वितीयेऽपि समये न भवेत्,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विशेषाभावात्, एवं यावच्चरमसमयेऽपि, अथ च चरमसमये ज्ञानमर्थावग्रहरूपं जायमान-मुपलभ्यते ततः प्रागपि कापि कियती ज्ञानमात्रा द्रष्टव्या, अथ मन्येथाः-मा भूत्प्रथमसमयादिषु शब्दादिपरिणतद्रव्यसम्बन्धेऽपि काचिदपि ज्ञानमात्रा, शब्दादिपरिणतद्रव्याणां तेषु समयेषु स्तोकत्वात्, चरमसमये तु भविष्यति, शब्दादिरूपपरिणतद्रव्यसमूहस्य तदानीं भूयसो भावात्, तदयुक्तं, यतो यदि प्रथमसमयादिषु शब्दादिद्रव्याणां स्तोकत्वात् सम्पृक्तावव्यक्ताऽपि काचिदपि ज्ञानमात्रा न समुल्लसेत् तर्हि प्रभूतसमुदायसम्पर्केऽपि न भवेत्, न खलु सिकताकणेषु प्रत्येकमसति तैललेशे समुदायेऽपि तैलं समुद्भवदुपलभ्यते, अस्ति च चरमसमये प्रभूतशब्दादिद्रव्यसम्पृक्तौ ज्ञानं ततः प्राक्तनेष्वपि समयेषु स्तोकस्तोकतरैरपि शब्दादिपरिणतद्रव्यैः सम्बन्धे काचिदव्यक्ता ज्ञानमात्राऽभ्युपगन्तव्या, अन्यथा चरमसमयेऽपि ज्ञानानुपपत्तेः, तथ चोक्तं-

"जं सव्वहा न वीसुं सव्वेसुवि तं न रेणुतेल्लंव।
पत्तेयमनिच्छंतो कहमिच्छसि समुदये नाणं ?॥"

ततः स्थितमेतत्-व्यञ्जनावग्रहो ज्ञानरूपः, केवलं तेषु ज्ञानमव्यक्तमेव बोद्धव्यं। चशब्दौ स्वगतानेकभेदसूचकौ, ते च स्वगता अनेकभेदा अग्रे स्वयमेव सूत्रकृता वर्णयिष्यन्ते, आह-प्रथमं व्यञ्जनावग्रहो भवति ततोऽर्थावग्रहः ततः कस्मादिह प्रथममर्थावग्रह उपन्यस्तः ?, उच्यते, स्पष्टतयोपलभ्यमानत्वात्, तथाहि-अर्थावग्रहः स्पष्टरूपतया सर्वैरपि जन्तुभिः संवेद्यते, शीघ्रतर-गमनादौ सकृत्सत्वरमुपलम्भे मया किञ्चिद् दृष्टं परं न परिभावितं सम्यगिति व्यवहारदर्शनात्, अपि च-अर्थावग्रहः सर्वेन्द्रियमनोभावी व्यञ्जनावग्रहस्तु नेति प्रथममर्थावग्रह उक्तः, सम्प्रति तु व्यञ्जनावग्रहादूर्द्ध्वमर्थावग्रह इति क्रममाश्रित्य प्रथमं व्यञ्जनावग्रहस्वरूपं प्रतिपिपादयिषुः शिष्यः प्रश्नं कारयति-

*मू.(११३) से किं तं वंजणुग्गहे?, वंजणुग्गहे चउव्विहे पन्नत्ते, तंजहा-सोइंदिअवंजणुग्गहे घाणिंदियवंजणुग्गहे जिब्भिंदियवंजणुग्गहे फासिंदिअवंजणुग्गहे। से तं वंजणुग्गहे।*

**वृ.** 'से किं तमि'त्यादि, अथ कोऽयं व्यञ्जनावग्रहः ?, आचार्य आह-व्यञ्जनावग्रहश्चतुर्विधः प्रज्ञप्तः, तद्यथा-'श्रोत्रेन्द्रियव्यञ्जनावग्रह' इत्यादि, अत्राह-सत्सु पञ्चस्विन्द्रियेषु षष्ठे च मनसि कस्मादयं चतुर्विधो व्यावर्ण्यते ?, उच्यते, इहव्यञ्जनमुपकरणेन्द्रियस्य शब्दादिद्रव्याणां च परस्परं सम्बन्ध उच्यते, सम्बन्धश्चतुर्णामेव श्रोत्रेन्द्रियादीनां, न नयनमनसोः, तयोरप्राप्यकारित्वात्, आह-

कथमप्राप्यकारित्वं तयोरवसीयते ?, उच्यते, विषयकृतानुग्रहोपघाताभावात्, तथाहि-यदि प्राप्तमर्थं चक्षुर्मनो वा गृह्णीयात् तर्हि स्पर्शनेन्द्रियं स्रक्चन्दनादिकं अङ्गारादिकं च प्राप्तमर्थं परिच्छिन्दत्तत्कृतानुग्रहोपघातभाग् भवति तथा चक्षुर्मनसी अपि भवेतां, विशेषाभावात्, न च भवतः तस्मादप्राप्यकारिणी ते, ननु दृश्येते एव चक्षुषोऽपि विषयकृतावनुग्रहोपघातौ, तथाहि-घनपटलविनिर्मुक्ते नभसि सर्वतो निबिडजरठिमोपेतं करप्रसरमभिसर्प्पयन्तमंशुमालिनमनवर-तमवलोकमानस्य भवति चक्षुषो विघातः, शशाङ्ककरकदम्बकं यदिवा तरङ्गमालोपशोभितं जलं तरुमण्डलं च शाड्वलं निरन्तरं निरीक्षमाणस्य चानुग्रहः, तदेतदपरिभावितभाषितं, यतो न ब्रूमः-सर्वथा विषयकृतानुग्रहोपघातौ न भवतः, किन्त्वेतावदेव वदामो-

यदा विषयं विषयतया चक्षुरवलम्बते तदा तत्कृतावनुग्रहोपघातौ तस्य न भवत इति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तदप्राप्यकारि, शेषकालं तु प्राप्तेनोपघातकेनोपघातो भविष्यति अनुग्राहकेण चानुग्रहः, तत्रांशु-मालिनो रश्मयः सर्वत्रापि प्रसरमुपददाना यदाऽंशुमालिनः सम्मुखमीक्षते तदा ते चक्षुर्देशमपि प्राप्नुवन्ति, ततश्चक्षुःसम्प्राप्तास्ते स्पर्शनेन्द्रियमिव चक्षुरुपघ्नन्ति, शीतांशुरश्मयश्च स्वभावत एव शीतलत्वादनुग्राहकास्ततस्ते चक्षुःसम्प्राप्ताः सन्तस्ते स्पर्शनेन्द्रियमिव चक्षुरनुगृह्णन्ति, तदङ्गमाला-संकुलजलावलोकने च चलकणसम्पृक्तसमीरावयवसंस्पर्शतोऽनुग्रहो भवति, शाड्वलतरु-मण्डलावलोकनेऽपि शाड्वतरुच्छायासम्पर्कशीतीभूतसमीरणसंस्पर्शात्, शेषकालं तु जलाव-लोकनेऽनुग्रहाभिमान उपघाताभावादवसेयः, भवति चोपघाताभावेऽनुग्रहाभिमानो यथाऽति-सूक्ष्माक्षरनिरीक्षणाद्विनिवृत्त्य यथासुखं नीलीरक्तवस्त्राद्यवलोकने, इत्थं चैतदङ्गीकर्त्तव्यं, अन्यथा समाने सम्पर्के यथा सूर्यमीक्षमाणस्य सूर्येणोपघातो भवति तथा हुतवहजलशूलाद्यालोकने दाहक्लेदपाटनादयोऽपि कस्मान्न भवन्तीति ?, अपिच-यदि चक्षुः प्राप्यकारि तर्हि स्वदेश-गतरजोमलाञ्जनशिलाकादिकं किं न पश्यति ?, तस्मादप्राप्यकार्येव चक्षुः।

ननु यदि चक्षुरप्राप्यकारि तर्हि मनोवत्कस्मादविशेषेण सर्वानपि दूरव्यवहितादीनर्थान् न गृह्णाति, यदि हि प्राप्तं परिच्छिन्द्यात्तर्हि यदेवानावृतमदूरदेशं वा तदेव गृह्णीयात् नावृतं दूरदेशं वा, तत्र चक्षुरश्मीनां गमनासम्भवः सम्पर्काभावात्, ततो युज्यते चक्षुषो ग्रहणाग्रहणे, नान्यथा, तथा चोक्तम्-प्राप्तयकारि चक्षुः, उपलब्ध्यनुपलब्ध्योरनावरणेतराप्रेक्षणात् अदूरेतराप्रेक्षणाच्च, यदि हि चक्षुरप्राप्यकारित् भवेत्तदाऽऽवरणभावादनुपलब्धिः अन्यथोपलब्धिरिति न स्यात्, न हि तदावरणमुपघातककरणसमर्थं, प्राप्यकारित्वे तु मूर्त्तद्रव्यप्रतिघातावदुपपत्तिमान् व्याघातोऽतिदूरे च गमनाभावादिति, प्रयोगश्चात्र-न चक्षुषो विषयपरिमाणं, अप्राप्यकारित्वात्, मनोवत्, तदेतदयुक्ततरं, दृष्टान्तस्य साध्यविकलत्वात्, न खलु मनोऽप्यशेषान् विषयान् गृह्णाति, तस्यापि सूक्ष्मेष्वागमगम्यादिष्वर्थेषु मोहदर्शनात्, तस्माद् यथा मनोऽप्राप्यकार्यपि स्वावरणक्षयो-पशमसापेक्षत्वात् नियतविषयं तथा चक्षुरपि स्वावरणक्षयोपशमसापेक्षत्वादप्राप्यकार्यपि योग्यदेशावस्थितनियतविषयमिति न व्यवहितानामुपलम्भप्रसङ्गो नापि दूरदेशस्थितानामिति।

अपि च दृष्टमप्राप्यकारित्वेऽपि तथास्वभावविशेषाद्योग्यदेशापेक्षणं, यथाऽयस्कान्तस्य, न खल्वयस्कान्तोऽयसोऽप्राप्यकर्षणे प्रवर्त्तमानः सर्वस्याप्ययसो जगद्वर्त्तिन आकर्षको भवति, किन्तु प्रतिनियतस्यैव, (यत्तु) शङ्करस्वामी प्राह-"अयस्कान्तोऽपि प्राप्यकारी, अयस्कान्त-च्छायाणुभिः सह समाकृष्यमाणवस्तुनः सम्बन्धभावात्, केवलं ते छायाणवः सूक्ष्मत्वान्नोपलभ्यन्ते" इति, तदेतदुन्मत्तप्रलपितं, तद्ग्राहकप्रमाणाभावात्, न हि तत्र छायाणुसम्भवग्रहाकं प्रमाणमस्ति, न चाप्रमाणकं प्रतिपत्तुं शक्नुमः, अथास्ति ग्राहकं प्रमाणमनुमानं, इह यदाकर्षणं तत्संगर्पूर्वकं, यथाऽयोगोलकस्य सन्दंशेन, आकर्षणं चायसोऽयस्कान्तेन, तत्र साक्षादयस्कान्ते संसर्गः प्रत्यक्ष-बाधित इत्यर्थात् छायाणुभिः सह द्रष्टव्य इति, तदपि बालिशजल्पितं, हेतोरनैकान्तिकत्वात्, मन्त्रेण व्यभिचारात्, तथाहि-मन्त्रः स्मर्यमाणोऽपि विवक्षितं वस्त्वाकर्षति, न च तत्र कोऽपि संसर्ग इति, अपि च- यथा छायाणवः प्राप्तमयः समाकर्षन्ति तथा काष्ठादिकमपि प्राप्तं कस्मान्ना-कर्षन्ति ?, शक्तिप्रतिनियमादिति चेत् ननु स शक्तिप्रतिनियमोऽप्राप्तावपि तुल्य एवेति व्यर्थं छायाणुपरिकल्पनं। अन्यस्त्वाह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अस्ति चक्षुषः प्राप्यकारित्वे व्यवहितार्थानुपलब्धिरनुमानं प्रमाणं, तदयुक्तं, अत्रापि हेतोरनैकान्तिकत्वात्, काचाभ्रपटलस्फटिकैरन्तरितस्याप्युपलब्धेः, अथेदमाचक्षीथाःनायना रश्मयो निर्गत्य तमर्थं गृह्णन्ति, नायनाश्च रश्मयस्तैजसत्वान्न तेजोद्रव्यैः प्रतिस्खल्यन्ते ततो न कश्चिद्दोषः, तदपि न मनोरमं, महाज्वालादौ स्खलनोपलब्धेः, तस्मादप्राप्यकारी चक्षुरिति स्थितं।

एवं मनसोऽप्राप्यकारित्वं भावनीयं, तत्रापि विषयकृतानुग्रहोपघाताभावाद्, अन्यथा तोयादिचिन्तायामनुग्रहोऽग्निशस्त्रादिचिन्ताया चोपघाते भवेत्, ननु दृश्यते मनसोऽपि हर्षादिभिरनुग्रहः, शरीरोपचयदर्शनात्, तथाहि-हर्षप्रकर्षशान्मनसोऽपि पुष्टता भवति, तद्वशाच्च स्वशरीरस्योपचयः, तथोपघातोऽपि शोकादिभिर्दश्यते, शरीरदौर्बल्योरःक्षतादिदर्शनात्, अतिशोककरणतो हि मनसो विघातः सम्भवति, ततस्तद्वशाच्छरीरदौर्बल्यमितिचिन्तावशाच्च हृद्रोग इति, तदेतदतीवासम्बद्धं, यत इह मनसोऽप्राप्यकारित्वं साध्यमानं वर्त्तते, विषयकृतानुग्रहोपघाताभावात्, न चेह विषयकृतानुग्रहोपघातौ त्वया मनसो दर्श्येते, तत्कथं व्यभिचारः ?, मनस्तु स्वयं पुद्गलमत्वाच्छरीरस्यानुग्रहोपघातौ करिष्यति, यथेष्टानिष्टरूप आहारः, तथाहि-इष्टरूप आहारः परिभुज्यमानः शरीरस्य पोषमाधत्ते, अनिष्टरूपस्तूपसङ्घातं, तथा मनोऽप्यनिष्टपुद्गलोपचितमतिशोकादिचिन्तानिबन्धनं शरीरस्य हानिमादधाति, इष्टपुद्गलोपचितं च हर्षादिकारणं पुष्टिं, उक्तं च -

"इट्ठानिट्ठाहारब्भवहारे होंति पुट्ठिहानीओ।
जह तह मनसो ताओ पुग्गलगुणउत्ति को दोसो ॥"

तस्मात् मनोऽपि विषयकृतानुग्रहोपघाताभावादप्राप्यकारीति स्थितं। इह सुगतमतानुसारिणः श्रोत्रमप्यप्राप्यकारि प्रपद्यन्ते, तथा च तद्ग्रन्थः- "चक्षुः श्रोत्रं मनोऽप्राप्यकारी"ति, तदयुक्तं, इहाप्राप्यकारि तत्प्रतिपत्तुं शक्यते यस्य विषयकृतानुग्रहोपघाताभावो, यथा चक्षुर्मनसोः, श्रोत्रस्य च शब्दकृत उपघातो दृश्यते, सद्योजातबालकस्य समीपे महाप्रयत्नताडितझल्लरीझात्कारश्रवणतो यद्वा विद्युत्प्रपाते तत्प्रत्यासन्नदेशवर्त्तिनां निर्घोषश्रवणतो बधिरीभावदर्शनात्, शब्दपरमाणवो हि उत्पत्तिदेशादारभ्य सर्वतो जलतरङ्गन्यायेन प्रसरमभिगृह्णानाः श्रोत्रेन्द्रियदेशमागच्छन्ति, ततः सम्भवत्युपघातः, ननु यदि श्रोत्रेन्द्रियं देशं प्राप्तमेव शब्दं गृह्णाति नाप्राप्तं तर्हि यथा गन्धादौ गृह्यमाणे न तत्र दूरासन्नादितया भेदप्रतीतिरेवं शब्देऽपि न स्यात्, प्राप्तो हि विषयः परिच्छिद्यमानः सर्वोऽपि सन्निहित एव, तत्कथं तत्र दूरासन्नादिभेदप्रतीतर्भवितुर्महति ?, अथ च प्रतीयते शब्दो दूरासन्नादितया, तथा च लोके वक्तारः श्रूयन्ते-कस्यापि दूरे शब्द इति,

अन्यच्च-यदि प्राप्तः शब्दो गृह्यते श्रोत्रेन्द्रियेण तर्हि चाण्डालोक्तोऽपि शब्दः श्रोत्रेन्द्रियेण श्रोत्रेन्द्रियसंस्पृष्टो गृह्यते इति श्रोत्रेन्द्रियस्य चाण्डालस्पर्शदोषप्रसङ्गः, तन्न श्रेयः श्रोत्रेन्द्रियस्य प्राप्यकारित्वं, तदेतदतिमहामोहस्य मलीमसभाषितं, त (य) तो यद्यपि शब्दः प्राप्तो गृह्यते श्रोत्रेन्द्रियेण तथापि यत उत्थितः शब्दस्तस्य दूरासन्नत्वे शब्देऽपि स्वभाववैचित्र्यसम्भावद्दूरासन्नादिभेदप्रतीतिर्भवति, तथाहि-दूरादागतः शब्दः क्षीणशक्तिकत्वात्स्विन्न उपलक्ष्यते अस्पष्टरूपो वा, ततो लोको वदति-दूरे शब्दः श्रूयते, अस्य च वाक्यस्यायं भावार्थो -दूरादागतः शब्दः श्रूयते इति, स्यादेतद्-एवमतिप्रसङ्गः प्राप्नोति, तथाहि--एतदपि वक्तुं शक्यते-दूरे रूपमुपलभ्यते, किमुक्तं भवति ? दूरागतं रूपमुपलभ्यते इति, ततश्चक्षुरपि प्राप्यकारि प्राप्नोति, न चेष्यते,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्मान्नैतत्समीचीनमिति, तदयुक्तं, यत इह चक्षुषो रूपकृतावनुग्रहोपघातौ नोपलभ्येते, श्रोत्रेन्द्रियस्य तु शब्दकृत उपघातोऽस्ति, एतच्च प्रागेवोक्तं, ततो नातिप्रसङ्गापादनमुपपत्तिमत्, अन्यच्च-प्रत्यासन्नोऽपि जनः पवनस्य प्रतिकूलमवतिष्ठमानः शब्दं न शृणोति, पवनवर्त्मनि तु वर्त्तमानो दूरदेशस्थितोऽपि शृणोति, तथा च लोको वक्तारो-न वयं प्रत्यासन्ना अपी त्वदीयं वचः शृणुमः, पवनस्य प्रतिकूलमवस्थानात्, यदि पुनरप्राप्तमेव शब्दं रूपमिव जनाः प्रमिणुयुः तर्हि वातस्य प्रतिकूलमप्यवतिष्ठमाना रूपमिव शब्दं प्रमिणुयुः, न च प्रमिण्वन्ति, तस्मात्प्राप्ता एव शब्दपरमाणवः श्रोत्रेन्द्रियेण गृह्यन्ते इति अवश्यमभ्युपगन्तव्यं, तथा च सति पवनस्य प्रतिकूलमवतिष्ठमानानां श्रोत्रेन्द्रियं न शब्दपरमाणवो वैपुल्येन प्राप्नुवन्ति, तेषामन्यथा वातेन नीयमानत्वात्, ततो न ते शृण्वन्तीति न काचित्क्षितिः, यदपि चोक्तं-'चाण्डालस्पर्शदोषः प्राप्नोति'ति, तदपि चेतना-विकलपुरुषभाषितमिवासमीचीनं, स्पर्शास्पर्शव्यवस्थाया लोके काल्पनिकत्वात्, तथाहि-न स्पर्शव्यवस्था लोके पारमार्थिकी,

तथाहि-यामेव भुवमग्ने चाण्डालः स्पृशन् प्रयाति तामेव पृष्ठतः श्रोत्रियोऽपि, तथा यामेव नावमारोहति स्म चाण्डालस्तामेवारोहति श्रोत्रियोऽपि, तथा स एव मारुतश्चाण्डालमपि स्पृष्ट्वा श्रोत्रियमपि स्पृशति, न च तत्र लोके स्पर्शदोषव्यवस्था, तथा शब्द पुद्गलस्पर्शेऽपि न भवतीति न कश्चिद्दोषः, अपि च-यथा केतकीदलनिचयं शतपत्रादिपुष्पनिचयं वा शिरसि निबध्य वपुषि वा मृगमदचन्दनाद्यवलेपनमारचय्य विपणिवीथ्यामागत्य चाण्डालोऽवतिष्ठते तदा तद्गत-केतकीदलादिगन्धपुद्गलाः श्रोत्रियादिनासिकास्वपि प्रविशन्ति, ततस्तत्रापि चाण्डाल-स्पर्शदोषः प्राप्नोतीति तद्दोषभयान्नासिकेन्द्रियमप्राप्यकारि प्रतिपत्तव्यं, न चैतद्भवतोऽप्यागमे प्रतिपाद्यते, ततो बालिशजल्पितमेतदिति कृतं प्रसङ्गेन।

केचित्पुनः श्रोत्रेन्द्रियस्याप्राप्यकारित्वमभ्युपगच्छन्तः शब्दस्याम्बरगुणत्वं प्रतिपद्यन्ते, तदयुक्तं, आकाशगुणतयां शब्दस्यामूर्त्तत्वप्रसक्तेः, यो हि यद्गुणः स तत्समानधर्मा, यथा ज्ञान-मात्मनः, तथा हि-अमूर्त्त आत्मा, ततस्तद्गुणो ज्ञानमप्यमूर्त्तमेव, एवं शब्दोऽपि यद्याकाशगुणस्त-र्ह्याकाशस्यामूर्त्तत्वाच्छब्दस्यापि तद्गुणत्वेनामूर्त्तता भवेत्, न चासौ युक्तिसङ्गता, तल्लक्षणायोगात्, मूर्त्तिविरहो ह्यमूर्त्तताया लक्षणं, न च शब्दानां मूर्त्तिविरहः, स्पर्शवत्त्वात्, तथाहि-स्पर्शवन्तः शब्दाः, तत्सम्पर्कादुपघातदर्शनाल्लोष्टवत्, न चायमसिद्धो हेतुः, यतो दृश्यते सद्योजातबालकानां कर्णदेशाभ्यर्णीकृतगाढास्फालितझल्लरीझात्कारश्रवणतः श्रवणस्फोटो, न चेत्थमुप-घातकृत्त्वमस्पर्शवत्त्वे सम्भवति, यथा विहायसः, ततो विपक्षे गमनासम्भवान्नानैकान्तिकोऽपि, अतश्च स्पर्शवन्तः शब्दाः, तैरभिघाते गिरिगह्वरभित्त्यादिषु शब्दोत्थानाल्लोष्टवत्, अयमपि हेतुरुभ-योरपि सिद्धः, तथाहि-श्रूयन्ते तीव्रप्रयत्नोच्चारितशब्दाभिघाते गिरिगह्वरादिषु प्रतिशब्दाः प्रतिदिक्, ततः स्पर्शवत्त्वान्मूर्त्ता एव शब्दाः, 'रूपस्पर्शादिसन्निवेशो मूर्त्ति'रिति वचनप्रामाण्यात्, ततः कथमिवाकाशगुणत्वं शब्दानामुपपत्तिमत्?, अपि च-

तदाकाशमेकमनेकं वा?, यद्येकं तर्हि योजनलक्षादपि श्रूयते, आकाशस्यैकत्वेन शब्दस्य च तद्गुणतया दूरासन्नादिभेदाभावात्, अथानेकमेवं सति वदनदेश एव स विद्यते इति कथं भिन्नदेशवर्त्तिभिः श्रोतृभिः श्रूयते?, वदनदेशाकाशगुणतया तस्य श्रोतृगतश्रोत्रेन्द्रियाकाश-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सम्बन्धाभावात्, अथ च श्रोत्रेन्द्रियाकाशसम्बन्धतया तच्छ्रवणमभ्युपगम्यते, तत्राकाश-गुणत्वाभ्युपगमः शब्दस्य श्रेयान् नन्वाकाशगुणत्वमन्तरेण शब्दस्यावस्थानमेव नोपपद्यते, अवश्य हि पदार्थेन स्थितिमता भवितव्यं, तत्र रूपरसस्पर्शगन्धानां पृथिव्यादिमहाभूतचतुष्टयमाश्रयः, शब्दस्य त्वाकाशमिति, तदयुक्तम्, एवं सति पृथिव्यादीनामप्याकाशगुणत्वप्रसक्तेः, तेषा-मप्याकाशाश्रितत्वात्, न खल्वाकाशमन्तरेण पृथिव्यादीनामप्यन्यदाश्रयः, अगुणत्वात्पृथि-व्यादीनामाकाशगुणत्वमनुपपन्नमिति चेत् न आकाशाश्रितत्वेन भवन्नीत्या बलादपि तद्गुणत्व-प्रसक्तेः, अथ नाश्रयणमात्रं तद्गुणत्वनिबन्धनं किन्तु समवायः स चास्ति शब्दस्याकाशे न तु पृथिव्यादीनामिति, ननु कोऽयं समवायो नाम ?, एकत्र लोलीभावेनावस्थानं यथा पृथिव्यादि-रूपाद्योरिति चेत्, न तर्हि शब्दस्याकाशगुणत्वमाकाशेन सहैकत्र लोलीभावेन तस्याप्रतिपत्तेः, अथाऽऽकाशे उपलभ्मयानत्वात्तद्गुता शब्दस्य, तूलकादेरपि तर्ह्याकाशे उपलभ्यमानत्वात्तद्गुणत्वं प्राप्नोति, अथ तूलकादेः परमार्थतः पृथिव्यादिस्थानमाकाशे तूपलम्भो वायुना सञ्चार्यमाण-त्वादवसेयं, तथाहि- यतो यतो वायुः सञ्चरति ततस्ततः शब्दोऽपि गच्छति, वातप्रतिकूल-शब्दस्याश्रवणात्, उक्तं च-

"यथा च प्रेर्यते तूलमाकाशे मातरिश्वना।
तथा शब्दोऽपि किं वायोः, प्रतीपं कोऽपि शब्दवित् ? ॥"

तत्राकाशगुणः शब्दः, किन्तु पुद्गलमय इति स्थितं।

*मू. ( ११४ )से किं तं अत्थुग्गहे ?, अत्थुग्गहे छव्विहे पन्नत्ते, तंजहा- सोइंदिअअत्थुग्गहे चक्खिदिअअत्थुग्गहे घाणिंदिअअत्थुग्गहे जिब्भिदियअत्थुग्गहे फासिंदिअअत्थुग्गहे नोइंदिअअत्थुग्गहे।*

वृ. अथ कतिविधोऽयमर्थावग्रहः ?, सूरिराह- अर्थावग्रहः षड्विधः प्रज्ञप्तः, तद्यथा- श्रोत्रेन्द्रि-यार्थावग्रह इत्यादि श्रोत्रेन्द्रियार्थावग्रहः, ( श्रोत्रेन्द्रियेण) व्यञ्जनावग्रहोत्तरकालमेकसामायिक-निर्देश्यसामान्यरूपार्थावग्रहणं श्रोत्रेन्द्रियार्थावग्रहः, एवं घ्राणजिह्वास्पर्शनेन्द्रियार्थावग्रहेष्वपि वाच्यं, चक्षुर्मनसोस्तु व्यञ्जनावग्रहो न भवति, ततस्तयोः प्रथममेव स्वरूपद्रव्यगुणक्रिया-विकल्पनातीतमनिर्देश्यं सामान्यमात्ररूपार्थावग्रहणमर्थावग्रहोऽवसेयः।

तत्र 'नोइंदियअत्थावग्गहो'त्ति नोइन्द्रियं-मनः, तच्च द्विधा-द्रव्यरूपं भावरूपं च, तत्र मनः पर्याप्तिनामकर्मोदयतो यत् मनःप्रायोग्यवर्गणादलिकमादाय मनस्त्वेन परिणमितं तद्रव्यरूपं मनः, तथा चाह चूर्णिकृत- "मनपज्जत्तिनामकम्मोदयओ तज्जोग्गे मनोदव्वे घेत्तुं मनत्तेण परिणामिया दव्वा दव्वमनो भण्णइ।"

तथा द्रव्यमनोऽवष्टम्भेन जीवस्य यो मननपरिणामः स भावमनः, तथा चाह चूर्णिकार एव- "जीवो पुण मननपरिणामकिरियापन्नो भावमनो, किं भणियं होइ ?, मनदव्वालंबणो जीवस्य मननवावारो भावमनो भण्णइ" तत्रेह भावमनसा प्रयोजनं, तद्ग्रहणे ह्यवश्यं द्रव्यमनसोऽपि ग्रहणं भवति, द्रव्यमनोऽन्तरेण भावमनसोऽसम्भवात्, भावमनो विनापि च द्रव्यमनो भवति, यथा भवस्थकेवलिनः, तत उच्यते- भावमनसेह प्रयोजनं, तत्र नोइन्द्रियेण- भावमनसाऽर्थावग्रहो द्रव्येन्द्रिव्यापारनिरपेक्षो घटाद्यर्थस्वरूपपरिभावनाभिमुखः प्रथममेकसामयिको रूपाद्यर्था-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कारादिविशेषचिन्ताविकलोऽनिर्देश्यसामान्यमात्रचिन्तात्मको बोधो नोइन्द्रियार्थावग्रहः ॥

*मू. ( ११५ ) तस्स णं इमे एगट्ठिआ नानाघोसा नानावंजणा पंच नामधिज्जा भवंति, तंजहा-ओगेण्हणया उवधारणया सवणया अवलंबणया मेहा। से त्तं उग्गहे।*

वृ. 'तस्य' सामान्येनावग्रहस्य 'ण'मिति वाक्यालङ्कारे 'अमूनि' वक्ष्यमाणानि एकार्थिकानि 'नानाघोसाणि'त्ति घोषाः-उदात्तादयः स्वरविशेषाः, आह च चूर्णिकृत्-"घोसा उदात्तादओ सरविसेसा" नाना घोषा येषां तानि नानाघोषाणि, तथा नाना व्यञ्जनानि-कदानि येषां तानि नानाव्यञ्जनानि, पञ्च नामान्येव नामधेयानि भवन्ति. 'तद्यथे'ति तेषामेवोपदर्शने, 'ओगिण्हणया' इत्यादि, यदा पुनरवग्रहविशेषानपेक्ष्यामूनि पञ्चापि नामधेयानि चिन्त्यन्ते तदा परस्परं भिन्नार्थानि वेदितव्यानि, तथाहि-इहावग्रहस्त्रिधा, तद्यथा-व्यञ्जनावग्रहः सामान्यार्थावग्रहो विशेष-सामान्यार्थावग्रहश्च, तत्र विशेषसामान्यार्थावग्रह औपचारिकः, स चानन्तरमेवाग्रे दर्शयिष्यते, तत्र 'ओगिण्हय'त्ति अवगृह्यतेऽनेति अवग्रहणं, करणेऽनट्, व्यञ्जनावग्रहः-प्रथमसमयप्रविष्ट-शब्दादिपुद्गलादानपरिणामः, तद्भावोऽवग्रहणता।

तथा 'उवधारणय'त्ति धार्यतेऽनेनेति धारणं, उप सामीप्येन धारणं उपधारणं व्यञ्जनावग्रहेऽपि द्वितीयादिसमयेषु प्रतिसमयपूर्वापूर्वशब्दादिपुद्गलादानपुरस्सरं प्राक्तनप्राक्तनसमयगृहीत-शब्दादिपुद्गलधारणपरिणामः तद्भाव उपधारणता, तथा 'सवणय'त्ति श्रूयतेऽनेनेति श्रवणमेक-सामयिकः सामान्यर्थावग्रहरूपो बोधपरिणामः तद्भावः श्रवणता, तथा 'अवलंबणय'त्ति अव-लम्ब्यते इति अवलम्बनं, 'कृद्बहुल'मिति वचनात्कर्मण्यनट्, विशेषसामान्यार्थावग्रहः, कथं विशेषसामान्यार्थावग्रहोऽवलम्बनमिति ?, चेत्, उच्यते-इह शब्दोऽयमित्यपि ज्ञानं विशेषावगमन-रूपत्वादवायज्ञानं, तथाहि-शब्दोऽयं नाशब्दो रूपादिरिति शब्दस्वरूपावधारणं विशेषावगमः, ततोऽस्मात् यत्पूर्वमनिर्देश्यसामान्यमात्रग्रहणमेकसामयिकं स पारमार्थिकार्थावग्रहः, तत ऊर्ध्वं तु यत्किमिदमिति विमर्शनं सा ईहा, तदनन्तरं तु यच्छब्दस्वरूपावधारणं शब्दोऽयमिति तदवायज्ञानं, तत्रापि यदा उत्तरधर्म्मजिज्ञासा भवति-किमयं शब्दः शाङ्खः किंवा शार्ङ्गः ?

इति तदा पाश्चात्यं शब्द इति ज्ञानं विशेषावगमापेक्षया सामान्यमात्रालम्बनमित्यवग्रह इत्युपचर्यते, स च परमार्थतः सामान्यविशेषरूपार्थालम्बन इति विशेषसामान्यार्थावग्रह इत्युच्यते, इदमेव च शब्द इति ज्ञानमवलम्ब्य किमयं शाङ्खः ? किंवा शार्ङ्गः ? इति ज्ञानमुदयते, ततो विशेषसामान्यार्थावग्रहोऽवलम्बन इत्युक्तः ततोऽवलम्बनस्य भावोऽवलम्बनता ततोऽप्यूर्द्धं किमयं शाङ्खः ? किंवा शार्ङ्गः इतीहित्वा यच्छाङ्ख एव शार्ङ्गः एव वेति ज्ञानं तदवायज्ञानं, तदपि च किमयं शाङ्खोऽपि शब्दः मन्द्रः किं वा तार ? इत्युत्तरविशेषजिज्ञासायां पाश्चात्यं पाश्चात्यमवाय-ज्ञानमुत्तरोत्तरविशेषावगापेक्षया सामान्यार्थावलम्बनमित्यवग्रह इत्युपचर्यते, किं मन्द्रः ?, किंवा तारः ? इतीह मन्द्र एवायं तार एवायमित्यवायः, एवमुत्तरोत्तरविशेषजिज्ञासायां पाश्चात्यं पाश्चात्य-मवायज्ञानमुत्तरोविशेषावगमापेक्षया सामान्यर्थावलम्बनमित्यवग्रह इत्युपचर्यते, यदा उत्तरधर्म-जिज्ञासा न भवति तदा तदत्यन्तविशेषज्ञानमवायज्ञानमेव, नावग्रह इत्युपचर्यते, उपचारनिबन्धना-भावात्, उत्तरविशेषाकांक्षाया अपगमात्,

ततस्तदनन्तरमविच्युतिरूपा धारणा प्रवर्त्तते, वासनास्मृती तु सर्वेष्वपि विशेषावगमेषु द्रष्टव्ये,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथा चाह प्रवचनोपनिषद्वेदी भगवान् जिनभद्रगणिक्षमाश्रमणः-

''सामन्नमेत्तगहणं निच्छयओ समयमोग्गहो पढमो।
तत्तोऽनंतरमीहियवत्थुविसेसस्स जोऽवाओ ॥१॥
सो पुनरीहावायाविक्खाओ उग्गहत्ति उवयरिओ।
एस विसेसावेक्खा सामन्नं गेण्हए जेन ॥२॥
तत्तोऽनंतरमीहा तओ अवाओ य तव्विसेसस्स।
इह सामन्नविसेसाऽवेक्खा जावंतिमो भेओ ॥३॥
सव्वत्थेहावाया निच्छयओ मोत्तुमाइसामन्नं।
संववहारत्थं पुन सव्वत्थावग्गहोऽवाओ ॥४॥
तरतमजोगाभावेऽवाओ च्चिय धारणा तदंतंमि।
सव्वत्थ वासना पुन भणिया कालंतरसइय ॥५॥ त्ति,

तथा 'मेह'त्ति मेधा प्रथमं विशेषसामान्यार्थावग्रहमतिरिच्योत्तरः सर्वोऽपि विशेषसामान्यार्थावग्रहः। तदेवमुक्तानि पञ्चापि नामधेयानि भिन्नार्थानि, यत्र तु व्यञ्जनावग्रहो न घटते तत्राद्यं भेदद्वयं न द्रष्टव्यं, 'से त्तं उग्गहो'त्ति निगमनं।

**मू. ( ११६ )** *से किं तं ईहा ?, ईहा छव्विहा पन्नत्ता, तंजहा-सोइंदिअईहा चक्खिदियईहा घाणिंदिअईहा जिब्भिदिअईहा फासिंदिअईहा नोइंदिअईहा, तीसे णं इमे एगट्ठिआ नानाघोसा नानावंजणा पंच नामधिज्जा भवंति, तंजहा-आभोगणया मग्गणया गवेसणया चिंता विमंसा, से त्तं ईहा ॥*

**वृ.** अथ केयमीहा ?, ईहा षड्विधा प्रज्ञप्ता, तद्यथा- श्रोत्रेन्द्रियेहा इत्यादि, तत्र श्रोत्रेन्द्रियेणेहा श्रोत्रेन्द्रियेहा श्रोत्रेन्द्रियार्थावग्रहमधिकृत्य या प्रवृत्ता ईहा सा श्रोत्रेन्द्रियेहा इत्यर्थः, एवं शेषा अपि साधनीयाः, 'तीसे ण'मित्यादि सुगमं, नवरं सामान्यत एकार्थिकानि, विशेषचिन्तायां पुनर्भिन्नार्थानि, तत्र 'आभोगणय'त्ति आभोग्यतेऽनेनेति आभोगनं-अर्थावग्रहसमनन्तरमेव सद्भूतार्थविशेषाभिमुखामालोचनं तस्य भाव आभोगनता, तथा मार्ग्यतेऽनेनेति मार्गणं-सद्भूतार्थविशेषाभिमुखमेव व्यतिरेकधर्मत्यागतोऽन्वयधर्माध्यासालोचनं तद्भावो गवेषणता, ततो मुहुर्मुहुः क्षयोपशमविशेषतः स्वधर्मानुगतसद्भूतार्थविशेषचिन्तनं चिन्ता, तत ऊर्ध्वं क्षयोपशमविशेषात्स्पष्टतरं सद्भूतार्थविशेषभिमुखमेव व्यतिरेकधर्मपरित्यागतोऽन्वयधर्मापरित्यागतोऽन्वयधर्म्मविमर्शनं विमर्शः। 'से त्तं ईहे'ति निगमनम्।

**मू. ( ११७ )** *से किं तं अवाए ?, अवाए छव्विहे पन्नत्ते, तंजहा-सोइंदिअअवाए, चक्खिदिअअवाए घाणिंदिअअवाए जिब्भिदिअअवाए फासिंदिअअवाए नोइंदिअअवाए, तस्स णं इमे एगट्ठिआ नानाघोसा नानावंजणा पंच नामधिज्जा भवंति, तंजहा-आउट्टणया पच्चाउट्टणया अवाए बुद्धि विन्नाणे, से तं अवाए ॥*

**वृ.** अत्र श्रोत्रेन्द्रियेणावायः श्रोत्रेन्द्रियावायः, श्रोत्रेन्द्रियनिमित्तमर्थावग्रहमधिकृत्य यः प्रवृत्तोऽपायः स श्रोत्रेन्द्रियापाय इत्यर्थः, एवं शेषा अपि भावनीयाः। 'तस्स ण' मित्यादि प्राग्वत्, अत्रापि सामान्यत एकार्थिकानि, विशेषचिन्तायां पुनर्नानार्थानि, तत्र आवर्त्तते -ईहाओ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निवृत्यापायभावं प्रत्यभिमुखो वर्त्तते येन बोधपरिणामेन स आवर्त्तनस्तद्भाव आवर्त्तनता, तथा आवर्त्तनं प्रति ये गता अर्थविशेषेपूत्तरोत्तरेषु विवक्षिता अपायप्रत्यासन्नतरा बोधविशेषास्ते प्रत्यावर्त्तना: तद्भाव: प्रत्यावर्त्तनता, तथा अपायो-निश्चय: सर्वथा ईहाभावद्विनिवृत्तस्यावधारणा-अवधारितमर्थमवगच्छतो यो बोधविशेष: सोऽपाय इत्यर्थ:, ततस्तमेवावधारितमर्थं क्षयोपशम-विशेषात्स्थिरतया पुन:, पुन: स्पष्टतरमवबुध्यमानस्य वा बोधपरिणति: सा बुद्धि:, तथा विशिष्टं ज्ञानं विज्ञानं-क्षयोपशमविशेषादेवावधारितार्थविषय एव तीव्रतरधारणाहेतुर्बोधविशेष:, 'से त्तं अवाए'। इति निगमनम्।

*मू. ( ११८ ) से किं तं धारणा ?, धारणा छव्विहा पन्नत्ता, तंजहा-सोइंदिअधारणा चक्खिंदिअधारणा घाणिंदिअधारणा जिब्भिंदिअधारणा फासिंदिअधारणा नोइंदिअधारणा, तीसे णं इमे एगट्ठिआ नानाधोसा नानावंजणा पंच नामधिज्जा भवंति, तंजहा-धारणा साधारणा ठवणा पइट्ठा कोट्ठे, से तं धारणा ॥*

**वृ.** 'से किं तं'मित्यादि सुगमं, यावद्धारणा इत्यादि, अत्रापि सामान्यत एकार्थानि विशेषार्थ-चिन्तायां पुनर्भिन्नार्थानि तत्रापायानन्तरमवगतस्यार्थस्याविच्युत्याऽन्तर्मुहूर्तकालं यावद्धरणं धारणा, ततस्तमेवार्थमुपयोगात् च्युतं जघन्यतोऽन्तर्मुहूर्त्तादुत्कर्षतोऽसंख्येययकालात् परतो यत्स्मरणं सा धारणा, तथा स्थापना, अपायावधारितस्यार्थस्य हृदि स्थापनं, वासनेत्यर्थ:, अन्ये तु धारणा-स्थापनयोर्व्यत्यासेन स्वरूपमाचक्षते, तथा प्रतिष्ठापनं प्रतिष्ठा-अपायावधारितस्यैवार्थस्य हृदि प्रभेदेन प्रतिष्ठापनमित्यर्थ:, कोष्ठ इव कोष्ठ: अविनष्टसूत्रार्थधारणामित्यर्थ:। 'सेत्तं धारणा' सेयं धारणा। सम्प्रति अवग्रहादे: कालप्रमाणप्रतिपादनार्थमाह-

*मू. ( ११९ ) उग्गहे इक्कसमइए, अंतोमुहुत्तिआ ईहा, अंतोमुहुत्तिए अवाए, धारणा संखेज्जं वा कालं असंखेज्जं वा कालं ॥*

**वृ.** अवग्रह:-अर्थावग्रह एकसामयिक:, आन्तर्मुहूर्त्तिकी ईहा, आन्तर्मुहूर्त्तिकोऽवाय:, धारणा संङ्खयेयं वा कालमसङ्खयेयं वा, तत्र सङ्खयेयवर्षायुषां सङ्खयेयकालमसङ्खयेयं कालं, सा च धारणा सङ्खयेयमसङ्खयेयं वा कालं यावद्वासनारूपा द्रष्टव्या, अविच्युतिस्मृत्योरजघन्योत्कर्षेणा-न्तर्मुहूर्त्तप्रमाणत्वात्, यत उक्तं भाष्यकृता-

"अत्थोग्गहो जहन्नं समओ सेसोग्गहादओ वीसुं।
अंतोमुहुत्तमेगं तु वासना धारणं मोत्तुं॥"

*मू. ( १२० ) एवं अट्ठावीसइविहस्स आभिनिबोहिअनाणस्स, वंजणुग्गहस्स परूवणं करिस्सामि पडिबोहगादिट्ठंतेण मल्लगदिट्ठंतेण य।*

*से किं तं पडिबोहगादिट्ठंतेणं ?, पडिबोहगदिट्ठंतेण से जहानामाए केइ पुरिसे कंचि पुरिसं सुत्तं पडिबोहिज्जा अमुगा अमुगत्ति, तत्थ चोअगे पन्नवगं एवं वयासी-किं एगसमयपविट्ठा पुग्गला गहणमागच्छंति दुसमयपविट्ठा पुग्गला गहणमागच्छंति जाव दससमयपविट्ठा पुग्गला गहणमागच्छंति संखिज्जासमयपविट्ठा पुग्गला गहणमागच्छंति असंखिज्जसमयपविट्ठा पुग्गला गहणमागच्छंति ?, एवं वदंतं चोअगं पन्नवए एवं वयासी-नो एगसमयपविट्ठा पुग्गला गहणमागच्छंति नो दुसमयपविट्ठा पुग्गला गहणमागच्छंति जाव नो दससमयपविट्ठा पुग्गला*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*गहणमागच्छंति नो संखिज्जसमयपविट्ठा पुग्गला गहणमागच्छंति असंखिज्जासमयपविट्ठा पुग्गला गहणमागच्छंति, से तं पडिबोहगदिट्ठंतेणं।*

*से किं तं मल्लगदिट्ठंतेणं ?, मल्लगदिट्ठंतेणं से जहानामए केइ पुरिसे आवागसीसाओ मल्लगं गहाय तत्थेगं उदगबिंदुं पक्खेविज्जा, से नट्ठे, अन्नेऽवि, पक्खित्ते सेऽवि नट्ठे, एवं पक्खिप्पमाणेसु पक्खिप्पमाणेसु होही से उदगबिंदू जे णं तं मल्लगं रावेहिइत्ति, होही से उदगबिंदू जे णं तंसि मल्लगंसि ठाहिति होही से उदगबिंदू जे णं तं मल्लगं भरिहिति होही से उदगबिंदू जे णं तं मल्लगं पवाहेहिति, एवामेव पक्खिप्पमाणेहिं पक्खिप्पमाणेहिं अनंतेहिं पुग्गलेहिं जाहे तं वंजणं पूरिअं होइ ताहे हुंति केरइ, नो चेव णं जाणइ केवि एस सद्दाइ ?, तओ ईहं पविसइ तओ जाणइ अमुगे एस सद्दाइ, तओ अवायां पविसइ, तओ से उवगयं हवइ, तओ णं धारणं पविसइ, तओ णं धारेइ संखिज्जं वा कालं असंखिज्जं वा कालं।*

*से जहानामए केइ पुरिसे अव्वत्तं सद्दं सुणिज्जा तेणं सद्दोत्ति उग्गहिए, नो चेव णं जाणइ केवेस सद्दाइ तओ ईहं पविसइ तओ जाणइ अमुगे एस सद्दे तओ णं अवायं पविसइ तओ से उवगयं हवइ तओ धारणं पविसइ तओ णं धारेइ संखेज्जं वा कालं असंखेज्जं वा कालं।*

*से जहानामए केई पुरिसे अव्वत्तं रूवं पासिज्जा तेणं रूवत्ति उग्गहिए नो चेव णं जाणइ केवेस रूवत्ति तओ ईहं पविसइ तओ जाणइ अमुगे एस रूवेति तओ अवायं पविसइ तओ से उवगयं हवइ तओ धारणं पविसइ तओ णं धारेइ संखेज्जं वा कालं असंखिज्जं वा कालं।*

*से जहानामए केई पुरिसे अव्वत्तं गंधं अग्घाइज्जा तेणं गंधत्ति उग्गहिए नो चेव णं जाणइ केवेस गंधेत्ति तओ ईहं पविसइ तओ जाणइ अमुगे एस गंधे तओ अवायं पविसइ तओ से उवगयं हवइ तओ धारणं पविसइ तओ णं धारेइ संखेज्जं वा कालं असंखेज्जं वा कालं।*

*से जहानामए केई पुरिसे अव्वत्तं रसं आसाइज्जा तेणं रसोत्ति उग्गहिए नो चेव णं जाणइ केवेस रसेत्ति तओ ईहं पविसइ तओ जाणइ अमुगे एस रसे तओ अवायं पविसइ तओ से उवगयं हवइ तओ धारणं पविसइ, तओ णं धारेइ संखिज्जं वा कालं असंखिजज्जजं वा कालं।*

*से जहानामए केई पुरिसे अव्वत्तं फासं पडिसंवेइज्जा तेणं फासेत्ति उग्गहिए नो चेव णं जाणइ के वेस फासओत्ति तओ ईहं पविसइ तओ जाणइ अमुगे एस फासे तओ अवायं पविसइ तओ से उगवयं हवइ तओ धारणं पविसइ तओ णं धारेइ संखेज्जं वा कालं असंखेज्जं वा कालं।*

*से जहानामए केई पुरिसे अव्वत्तं सुमिणं पासिज्जा तेणं सुमिणोत्ति उग्गहिए नो चेव णं जाणइ के वेस सुमिणेत्ति तओ ईहं पविसइ तओ जाणइ अमुगे एस सुमिणे तओ अवायं पविसइ तओ से उवगयं हवइ तओ धारणं पविसइ तओ धारेइ संखेज्जं वा कालं असंखेज्जं वा कालं।*

*से त्तं मल्लगदिट्ठंतेणं॥*

**वृ.**एवं 'अट्ठावीसे'त्यादि, 'एवम्' उक्तेन प्रकारेणाष्टाविंशतिविधस्य, कथमष्टाविंशतिविध-तेति, उच्यते, चतुर्द्धा व्यञ्जनावग्रहः षोढा अर्थावग्रहः षोढा ईहा षड्विधोऽपायः षोढा धारणा इत्यष्टाविंशतिविधता, एवमष्टाविंशतिविधस्याभिनिबोधिकज्ञानस्य सम्बन्धी यो व्यञ्जनावग्रहः तस्य स्पष्टतरस्वरूपप्रतिज्ञापनाय प्ररूपणां करिष्यामि।

कथं ? इत्याह-प्रतिबोधकदृष्टान्तेन मल्लकदृष्टान्तेन च, तत्र प्रतिबोधयतीति प्रतिबोधकः-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सुप्तस्योत्थापकः स एव दृष्टान्तः प्रतिबोधकदृष्टान्तस्तेन, मल्लकं-शरावं तदेव दृष्टान्तो मल्लक-दृष्टान्तस्तेन च, अथ केयं प्रतिबोधकदृष्टान्तेन, व्यञ्जनावग्रहस्य प्ररूपणेति शेषः, आचार्य आह-प्रतिबोधकदृष्टान्तेनेयं व्यञ्जनावग्रहप्ररूपणा, स यथानामको-यथासम्भवनामधेयकः कोऽपि पुरुषः, अत्र सर्वत्राप्येकारो मागधिकभाषालक्षणानुसरणात्, तच्च प्रागेवानेकश उक्तं, कञ्चिद-निर्दिष्टनामानं यथासम्भवनामकं पुरुषं सुप्तं सन्तं प्रतिबोधयेत्, कथमित्याह-

'अमुक अमुकं' इति, अत्र एवमुक्ते सति 'चोदको' ज्ञानावरणकर्मोदयतः कथितमपि सूत्रार्थमनवगच्छन् प्रश्नं चोदयतीति चोदकः, यथावस्थितं सूत्रार्थं प्रज्ञापयतीति प्रज्ञापको-गुरुः, तं 'एवं' वक्ष्यमाणेन प्रकारेणावादीत्, भूतकालनिर्देशोऽनादिमानागम इति ख्यापनार्थो, वदनप्रकारमेव दर्शयति-किमेकसमयप्रविष्टाः पुद्गला ग्रहणमागच्छन्ति ?-ग्राह्यतामुपगच्छन्ति, किं वा द्विसमयप्रविष्टाः ? इत्यादि सुगमं, एवं वदन्तं चोदकं प्रज्ञापकः (एवं-वक्ष्यमाणेन प्रकारेण) 'अवादीत्' उक्तवान्-'नो एकसमयप्रविष्टा' इत्यादि, प्रकटार्थं यावन्नो सङ्ख्येयसमयप्रविष्टाः पुद्गला ग्रहणमागच्छन्ति, नवरमयं प्रतिषेधः स्फुटप्रतिभासरूपार्थावग्रहलक्षणविज्ञानग्राह्यता-मधिकृत्य वेदितव्यो, यावता पुनः प्रथमसमयादप्यारभ्य किञ्चित्किञ्चिदव्यक्तं ग्रहणमागच्छन्ति प्रतिपत्तव्यं ? 'जं वंजणोग्गहणमिति भणियं विन्नाणं अव्वत्त'मिति वचनप्रामाण्यात्, 'असंखेज्जे'-त्यादि, आदित आरभ्य प्रतिसमयप्रवेशनेनासङ्ख्येयान् समयान् यावत् ये प्रविष्टास्तेऽसङ्ख्ये-यसमयप्रविष्टाः पुद्गला ग्रहणमागच्छन्ति-अर्थावग्रहरूपविज्ञानग्राह्यतामुपपद्यन्ते, असङ्ख्येय-समयप्रविष्टेषु तेषु चरमसमये प्रविष्टाः पुद्गला अर्थावग्रहविज्ञानमुपजनयन्तीत्यर्थः।

अर्थावग्रहविज्ञानाच्च प्राक् सर्वोऽपि व्यञ्जनावग्रहः एषा प्रतिबोधकदृष्टान्तेन व्यञ्जनावग्रहस्य प्ररूपणा। व्यञ्जनावग्रहस्य च कालो जघन्यत आवलिकाऽसङ्ख्येयभागः, उत्कर्षतः सङ्ख्येया-वलिकाः, ता अपि सङ्ख्येया आवलिका आनपानपृथक्त्वकालमाना वेदितव्याः, यत उक्तम्-

"वंजणवग्गहकालो आवलियासंखभागतुल्लो उ।
थोवा उक्कोसा पुण आणापाणूपहुत्तंति॥"

'सेत्त'मित्यादि निगमनं, सेयं प्रतिबोधकदृष्टान्तेन व्यञ्जनावग्रहस्य प्ररूपणा।

'से किं त'मित्यादि, अथ केयं मल्लकदृष्टान्तेन व्यञ्जनावग्रहस्य प्ररूपणा ?, सोऽनिर्दिष्टस्वरूपो यथानामकः कश्चित्पुरुषः 'आपाकशिरसः' आपाकः प्रतीतः तस्य शिरसो मल्लकं-शरावं गृहीत्वा, इदं हि किल रूक्षं भवति ततोऽस्योपादानं, तत्र मल्लके एवमुदकबिन्दुं प्रक्षिपेत् स नष्टः, तत्रैव तद्भावपरिणतिमापन्न इत्यर्थः, ततो द्वितीयं प्रक्षिपेत्सोऽपि विनष्टः, एवं प्रक्षिप्यमाणेषु २ भविष्यति स उदकबिन्दुर्यस्तन्मल्लकं 'रावेहिइ'इति देश्योऽयं शब्दः आर्द्रतां नेष्यति, शेषं सुगमं 'यावदेव'-मित्यादि, एवमेव उदकबिन्दुभिरिव निरन्तरं प्रक्षिप्यमाणैः प्रक्षिप्यमाणैरनन्तैः शब्दरूपतापरिणतैः पुद्गलैर्यदा तद्व्यञ्जनं पूरितं भवति तदा हुङ्कारं मुञ्चति-तदा तान्पुद्गलाननिर्दिश्यरूपतया परिच्छिनत्तीति भावार्थः। अत्र व्यञ्जनशब्देनोपकरणेन्द्रियं शब्दादिपरिणतं वा द्रव्यं तयोः सम्बन्धो वा गृह्यते, तेन न कश्चिद्विरोधः, आह च-भाष्यकृत्-

"तोएण मल्लगंपिव वंजणमापूरियंति जं भणियं।
तं दव्वमिंदियं वा तस्संबंधो व न विरोहो॥"

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्र यदा व्यञ्जनं उपकरणेन्द्रियमधिक्रियते तदा पूरितमिति कोऽर्थः ?-परिपूर्णं भृतं व्याप्तमित्यर्थः, यदा व्यञ्जनं द्रव्यमभिगृह्यते तदा पूरितमिति-प्रभूतीकृतं स्वप्रमाणमानीतं स्वव्यक्तौ समर्थीकृतमित्यर्थः, यदा तु व्यञ्जनं द्वयोरपि सम्बन्धो गृह्यते तदा पूरितमिति किमुक्तं भवति ?-तावत् सम्बन्धोऽभूत् यावति सति ते शब्दादिपुद्गला ग्रहणमागच्छन्ति, आह चूर्णिकृत्-"यदा पुग्गलदव्वा वंजणं तया पूरियंति-पभूया ते पुग्गलदव्वा जाया-स्वं प्रमाणमानीताः सविसय-पडिबोहसमत्था जाया" इत्यादि, जया उवगरणिंदियं वंजणं तया पूरियंति कहं ?, उच्यते, जाहे तेहिं पोग्गलेहिं तं दव्विंदियं आवूतं भरियं वापितं तया पूरियंति भण्णइ, जया उभयसंबंधो वंजणं तया पूरियंति कहं ?, उच्यते, दव्विंदियस्स पोग्गला अंगीभावमागता, पोग्गला दव्विंदिये अभिषिक्ता इत्यर्थः, तदा पूरियंति भन्नइ इति, एवं च यदा पूरितं भवति व्यञ्जनं तदा हुं इति करोति-अर्थावग्रहरूपेण ज्ञानेन तमर्थं गृह्णाति, किं च ?, नामजात्यादिकल्पनारहितं, तथा चाह-

'नो चेव णं जाणइ के वेस सद्दाइ' त्ति न पुनरेवं जानाति क एव शब्दादिरर्थ इति, स्वरूप-द्रव्यगुणक्रियाविशेषकल्पनारहितमनिर्देश्यं सामान्यमात्रं गृह्णातीत्यर्थः, एवंरूपसामान्यमात्र-ग्रहणकारणत्वादर्थावग्रहस्य, एतस्माच्च पूर्वः सर्वोऽपि व्यञ्जनावग्रहः, एषा मल्लकदृष्टान्तेन व्यञ्जनावग्रहस्य प्ररूपणा, हुंकारकरणं चार्थावग्रहबलप्रवर्त्तितं, तत ईहां प्रविशति-किमिदं किमिदमिति विमर्शं कर्त्तुमारभते, 'ततः ईहानन्तरं क्षयोपशमविशेषभावात् जानाति-अमुक एष शब्दादिरिति, 'ततः' एवंरूपे ज्ञानपरिणामे प्रादुर्भवति सति सोऽपायं प्रविशति, ततोऽपा-यानन्तरमन्तर्मुहूर्त्तकालं यावदुपगतं भवति-सीमाप्येनात्मनि शब्दादिज्ञानं परिणतं भवति, अविच्युतिरन्तर्मुहूर्त्तकालं यावत्प्रवर्त्तते इत्यर्थः, ततो धारणां प्रविशति, सा च धारणा वासनारूप द्रष्टव्या, अत आह-'तत्तो ण' मित्यादि, ततो धारणायां प्रवेशात् 'ण' मिति वाक्यालङ्कारे संङ्ख्येयं वा असङ्ख्येयं वा कालं हृदि धारयति, तत्र सङ्ख्येयवर्षायुषः सङ्ख्येयकालं, असङ्ख्येयवर्षायुषस्त्व-सङ्ख्येयं कालम्।

अत्राह-सुसमङ्गीकृत्य पूर्वोक्तः प्रकार सर्वोऽपि घटते, जाग्रतस्तु शब्दश्रवणसमनन्तरमेवा-वग्रहेहाव्यतिरेकेणावायज्ञानमुपजायते, तथाप्रतिप्राणिसंवेदनात्, तन्निषेधार्थमाह-'से जहानामए' इत्यादि, स यथानामकः कश्चिज्जाग्रदपि पुरुषोऽव्यक्तं शब्दं शृणुयात्, अव्यक्तमेव प्रथमं शब्दं शृणोति, अव्यक्तं नाम अनिर्देश्यस्वरूपं नामजात्यादिकल्पनारहितं, अनेनावग्रहमाह, अर्थावग्रहश्च श्रोत्रेन्द्रियस्य सम्बन्धी व्यञ्जनावग्रहमन्तरेण न भवति ततो व्यञ्जनावग्रहोऽप्युक्तो वेदितव्यः, अत्राह-नन्वेवं क्रमो न कोऽप्युपलभ्यते, किन्तु प्रथमत एव शब्दापायज्ञानमुपजायते, सूत्रेऽपि चाव्यक्तमिति शब्दविशेषणं कृतं, ततोऽयमर्थो व्याख्येयः- अव्यक्तम्-अनवधारितशा-ङ्खशार्ङ्गादिविशेषं शब्दं शृणुयादिति, इदं च व्याख्यानमुत्तरसूत्रमपि संवादयति-

'तेण सद्दोत्ति उग्गहिए' तेन-प्रमात्रा शब्द इत्यवगृहीतं, 'नो चेव णं जाणइ के वेस सद्दाइ' न पुनरेवं जानाति-कः एष शब्दः शाङ्खः शार्ङ्ग इति वा ?, शब्द इत्यत्रादिशब्दाद्रसादिष्वप्ययमेव न्याय इति ज्ञापयति, तत ईहां प्रविशति तत्यादि सर्वं सम्बद्धमेव, तदेतयुक्तं, सम्यग् वस्तु-तत्त्वापरिज्ञानात्, इह हि यत्किमपि वस्तु निश्चीयते तत्सर्वमीहापूर्वकम्, अनीहितस्य सम्यग्-निश्चितत्वायोगात्, न खलु प्रथमाक्षिसन्निपाते सत्यधूदर्शनेऽपि यावत् न विनिश्चिनोति तावत् स

Jain Education International For Private & Personal Use Only www.jainelibrary.org

धूमो निश्चितो भवति, अनिवर्त्तितशङ्कतया तस्य सम्यग्निश्चितत्वायोगात्, तस्मादवश्यं स वस्तुविशेषनिश्चयः स ईहापूर्वकः, शब्दोऽयमिति च निश्चयो वस्तुविशेषनिश्चयो, रूपादिव्यवच्छेदात्, ततोऽवश्यमितः पूर्वमीहया भवितव्यं, ईहा च प्रथमतः सामान्यरूपेणावगृहीते भवति, नानवगृहीते, न खलु सर्वथा निरालम्बनमीहनं क्वापि भवदुपलभ्यते, न चानुपलभ्यमानं प्रतिपत्तुं शक्नुमः, सर्वस्या अपि प्रेक्षावतां प्रतिपत्तेः प्रमाणमूलत्वाद्, अन्यथा प्रेक्षावत्ताक्षितिप्रसक्तेः, तस्मादीहायाः प्रागवग्रहोऽपि नियमात्प्रतिपत्तव्यः, अमुमेवार्थं भाष्यकारोऽपि द्रढयति-

"ईहिज्जइ नागहियं नज्जइ नानीहियं न यानायं।
धारिज्जइ तं वत्थुं तेन कमो उग्गहाईओ॥"

अवग्रहश्च शब्दोऽयमिति ज्ञानात्पूर्वं प्रवर्त्तमानोऽनिर्देश्यसामान्यमात्रग्रहणरूप एवोपपद्यते, नान्यः, अत एवोक्तं सूत्रकृता-'अव्यक्तं शब्दं शृणुयादि'ति, स हि परमार्थतः शब्द एव, ततः प्रज्ञापकस्तं शब्दमनूद्य तद्विशेषणमाचष्टे-अव्यक्तमिति, तं शब्दमव्यक्तं शृणोति, किमुक्तं भवति?-शब्दव्यक्त्यापि व्यक्तं न शृणोति, किन्तु सामान्यमात्रनिर्देश्यं गृह्णातीत्यर्थः, यदपि चोक्तं-तेन प्रमात्रा शब्द इत्यवगृहीतमिति, तत्र शब्द इति प्रतिपादयति प्रज्ञापकः सूत्रकारो, न पुनः तेन प्रमात्रा शब्द इति अवगृह्यते, शब्द इति ज्ञानस्यापायरूपत्वात्, तथाहि-शब्दोऽयमिति, किमुक्तं भवति?-न शब्दाभावो, न च रूपादिः, किन्तु शब्द एवायमिति, ततो विशेषनिश्चयरूपत्वादयमवगमोऽपायरूप एव, नावग्रहरूपः, अथ च अवग्रहप्रतिपादनार्थमिदमुच्यमानं वर्त्तते ततः शब्द इति प्रज्ञापकः सूत्रकारो वदति, न पुनस्तेन प्रमात्रा शब्द इत्यवगृह्यते इति स्थितं, तथा चाह सूत्रकृत्-'नो चेव णमि'त्यादि, न पुनरेवं जानाति-क एष शब्दादिरर्थ इति, शब्दादिरूपतया तमर्थं न जानातीति भावार्थः, अनिर्देश्यसामान्यमात्रप्रतिभासात्मकत्वादर्थावग्रहस्य, अर्थावग्रहश्च श्रोत्रेन्द्रियघ्राणेन्द्रियादीनां व्यञ्जनावग्रहपूर्वक इति पूर्वं व्यञ्जनावग्रहोऽपि द्रष्टव्यः, तदेवं सर्वत्राप्यवग्रहेहापूर्वमवायज्ञानमुपजायते, केवलमभ्यासदशामापन्नस्य शीघ्रं शीघ्रतरमवग्रहादयः प्रवर्त्तन्ते इति कालसौक्ष्म्यात्ते स्पष्टं न संवेद्यन्ते इति स्थितं।

तत ईहां प्रविशति, इह केचिदीहां संशयमात्रं मन्यन्ते, तदयुक्तं, संशयो हि नामाज्ञानमिति, ज्ञानांशरूपा चेहा, ततः सा कथमज्ञानरूपा भवितुमर्हति?, नन्वीहापि किमयं शाङ्खः किंवा शार्ङ्गः? इत्येवंरूपतया प्रवर्त्तते, संशयोऽपि चैवमेव, ततः कोऽनयोः प्रतिविशेषः?, उच्यते, इह यत् ज्ञानं शाङ्खशार्ङ्गादिविशेषाननेकानालम्बते न चासद्भूतं विशेषमपासितुं शक्नोति, किन्तु सर्वात्मना शयानमिव वर्त्तते-कुण्ठीभूतं तिष्ठतीत्यर्थः, तदसद्भूतविशेषापर्युदासपरिकुण्ठितं संशयज्ञानमुच्यते, यत्पुनः सद्भूतार्थविशेषविषये हेतूपपत्तिव्यापारतया सद्भूतार्थविशेषोपादानाभिमुखमसद्भूतविशेषत्यागाभिमुखं च तदीहा, आह च भाष्यकृत-

"जमणेगत्थालंबणमपज्जुदासकुंठियं चित्तं।
सयइव सव्वप्पणओ तं संसयरूवमन्नाणं॥१॥
जं पुन सयत्थहेऊववत्तिवाबारतप्परममोहं।
भूयाभूयविसेसादानच्चायाभिमुहमीहा॥२॥"

इह यदि वस्तु सुबोधं भवति विशिष्टश्च मतिज्ञानावरणक्षयोपशमो वर्त्तते ततोऽन्तर्मुहूर्त्तकालेन

नियमात्तद्वस्तु निश्चिनोति, यदि पुनर्वस्तु दुर्बोधं न च तथाविधो विशिष्टो मतिज्ञानावरणक्षयोपशमस्सत ईहोपयोगदच्युतः पुनरप्यन्तर्मुहूर्त्तकालमीहते, एवमीहोपयोगविच्छेदेन प्रभूतान्यन्तर्मुहूर्त्तानि यावदीहते तत ईहानन्तरं जानाति-अमुक एषोऽर्थः शब्द इति, इदं च ज्ञानमवायरूपं, ततोऽस्मिन् ज्ञाने प्रादुर्भवति 'ण'मिति वाक्यालङ्कारेऽपायं प्रविशति, ततः 'से' तस्य उपगतम्-अविच्युत्या सामीप्येनात्मनि परिणतं भवति, ततो धारणां-वासनारूपा प्रविशति, सङ्ख्येयसङ्ख्येयं वा कालम्।

'एवम्' अनेन क्रमप्रकारेण एतेन पूर्वदर्शितेनाभिलापेन शेषेष्वपि चक्षुरादिष्विन्द्रियेषु अवग्रहादयो वाच्याः, नवरं अभिलापविषये 'अवत्तं सद्दं सुणेज्जा' इत्यस्य स्थाने 'अवत्तं रूवं पासेज्जा' इति वक्तव्यं, उपलक्षणमेतत् तेन सर्वत्रापि शब्दस्थाने रूपमिति वक्तव्यं, तद्यथा-'तेणं रूवित्ति उग्गहिए नो चेव णं जाणइ के वेस रूवित्ति ?, ततो ईहं पविसइ, ततो जाणइ अमुगे एस रूवेत्ति, ततो अवायं पविसइ' इत्यादि तदवस्थमेव, नवरमिह व्यञ्जनावग्रहो न व्याख्येयः, अप्राप्यकारित्वाच्चक्षुषः, घ्राणेन्द्रियादिषु तु व्याख्येयः, एवं तु घ्राणेन्द्रियविषये-'अव्वत्तं गंधं अग्घाइज्जा' इत्यादि वक्तव्यं, जिह्वेन्द्रियविषये 'अव्वत्तं रसं आसाइज्जा' इत्यादि, स्पर्शनेन्द्रियविषये 'अव्वत्तं फासं पडिसंवेइज्जा' इत्यादि, यथा च शब्द इति निश्चिते तदुत्तरकालमुत्तरधर्मजिज्ञासायां किं शाङ्खः ? किं वा शार्ङ्गः ? इत्येवंरूपा ईहा प्रवर्त्तते तथा रूपमिति निश्चिते तदुत्तरकालमुत्तरधर्मजिज्ञासायां स्थाणुः किं वा पुरुषः ? इत्यादिरूपा(सा) प्रवर्त्तते, एवं घ्राणेन्द्रियादिष्वपि समानगन्धादीनि वस्तूनि ईहाऽऽलम्बनानि वेदितव्यानि, आह च भाष्यकृत-

"सेसेसुवि रूवाइसु विसएसु होंति रूवलक्खाइं।
पायं पच्चासन्नत्तणेण ईहाए वत्थूणि॥१॥
थाणुपुरिसाइ कुट्ठुप्पलादि संभियकरिल्लमंसाइ।
सप्पुप्पलनालाइ व समाणरूवाइ विसयाइं॥२॥"

'से जहानामए'त्यादि, स यथानामकः कोऽपि पुरुषोऽव्यक्तं स्वप्नं प्रतिसंवेदयेत्, व्यक्तं नाम सकलविशेषविकलनिर्देश्यमितियावत् स्वप्नमिति प्रज्ञापकः सूत्रकारो वदति, स तु प्रतिपत्ता स्वप्नादिव्यक्तिविकलं किञ्चिदनिर्देश्यमेव तदानीं गृह्णाति, तथाऽनेन प्रतिपन्त्रा 'सुविणोत्ति उग्गहिए'त्ति स्वप्नमिति अवगृहीतं, अत्रापि स्वप्न इति प्रज्ञापको वदति, स तु प्रतिपत्ता अशेषविशेषवियुक्तमेवावगृहीतवान्, तथा चाह-न पुनरेवं जानाति-क एष स्वप्न इति ?, स्वप्न इत्यपि तमर्थं न जानातीति भावः, तत ईहां प्रविशतीत्यादि प्राग्वत्, एवं स्वप्नमधिकृत्य नोइन्द्रियस्यार्थावग्रहादयः प्रतिपादिताः।

अनेन चोल्लेखेनान्यत्रापि विषये वेदितव्याः, तदेवं मल्लकदृष्टान्तेन व्यञ्जनावग्रहप्ररूपणां कुर्वता प्रसङ्गतोऽष्टविंशतिसङ्ख्या अपि मतिज्ञानस्य भेदाः सप्रपञ्चमुक्ताः, सम्प्रति मल्लकदृष्टान्तमुपसंहरति-'सेत्तं मल्लगदिट्ठंतेणं' एवं मल्लकदृष्टान्तेन व्यञ्जनावग्रहस्य प्ररूपणा। एते चावग्रहादयोऽष्टविंशतिभेदाः प्रत्येकं बह्वादिभिः सेतरैः सर्वसङ्ख्यया द्वादशसङ्ख्यैर्भेदैर्भिद्यमाना यदा विवक्ष्यन्ते तदा षट्त्रिंशदधिकं भेदानां शतत्रयं भवति, तत्र बह्वादयः शब्दमधिकृत्य भाव्यन्ते-शङ्खपटहादिनानाशब्दसमूहं पृथगेकैकं यदाऽवगृह्णाति तथा बह्ववग्रहः, यदा त्वेकमेव कञ्चिच्छब्दमवगृह्णाति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तदाऽबह्ववग्रहः, तथा शङ्खपटहादिनानाशब्दसमूहमध्ये एकैकं शब्दमनेकैः पर्यायैः स्निग्धगाम्भीर्यादिभिर्विष्टं यथावस्थितं यदाऽवगृह्णाति तदा स बहुविधावग्रहः, यदा त्वेकमनेकं वा शब्दमेकपर्यायविशिष्टमवगृह्णाति तदा सोऽबहुविधावग्रहः, यदा तु अचिरेण जानाति तदा स क्षिप्रावग्रहः, यदा तु चिरेण तदाऽक्षिप्रावग्रहः, तमेव शब्दं स्वरूपेण यदा जानाति न लिङ्गपरिग्रहात् तदाऽनिश्रितावग्रहः, लिङ्गपरिग्रहेण त्ववगच्छतो निश्रितावग्रहः, अथवा परधर्मैर्विमिश्रितं यद्ग्रहणं तन्मिश्रितावग्रहः, यत्पुनः परधर्मैरमिश्रितस्य ग्रहणं तदमिश्रितावग्रहः, तथा निश्चितमवगृह्णतो निश्चितावग्रहः, सन्दिग्धमवगृह्णतः सन्दिग्धावग्रहः, सर्वदैव बह्वादिरूपेणावगृह्णतो ध्रुवावग्रहः, कदाचिदेव पुनर्बह्वादिरूपेणावगृह्णतोऽध्रुवावग्रहः, एष च बहुबहुविधादिरूपोऽवग्रहो विशेषसामान्यावग्रहरूपे द्रष्टव्यः, नैश्चयिकस्यावग्रहस्य सकलविशेषनीरपेक्षानिर्देश्यसामान्यमात्रग्राहिण एकसामायिकस्य बहुविधादिविशेषग्राहकत्वासम्भवात्, बह्वादीनामनन्तरोक्तं व्याख्यानं भाष्यकारोऽपि प्रमाणयति-

"नाणासद्दसमूहं बहुविहं सुणेइ भिन्नजातीयं।
बहुविहमनेगभूयं एक्केक्कं निद्धमहुराइ ॥१॥
खिप्पमचिरेण तं चिय सरूवओ जमनिस्सियमलिंगं।
निच्छियमसंसयं जं धुवमच्चंतं न उ कयाइ ॥२॥
एत्तो च्चिय पडिवक्खं साहेज्जा निस्सिए विसेसोऽयं।
परधम्मेहिं विमिस्सं मिस्सियमविमिस्सियं इयरं ॥३॥

यदा पुनरालोकस्य मन्दमन्दतरमन्दतमस्पष्टस्पष्टतरस्पष्टतमत्वादिभेदतो विषयस्याल्पत्वमहत्त्वसन्निकर्षादिभेदतः क्षयोपशमस्य च तारतम्यभेदतो भिद्यमानं मतिज्ञानं चिन्त्यते तदा तदनन्तभेदं प्रतिपत्तव्यम्।

सम्प्रति पुनर्द्रव्यादिभेदतश्चतुःप्रकारतामाह -

*मू. (१२१) तं समासओ चउव्विहं पन्नत्तं, तंजहा-दव्वओ खित्तओ कालओ भावओ, तत्थादव्वओ णं आभिनिबोहिअनाणी आएसेणं सव्वाइं दव्वाइं जाणइ न पासइ, खेत्तओ णं आभिनिबोहिनाणी आएसेणं सव्वं खेत्तं जाणइ न पासइ, कालओ णं आभिनिबोहिअनाणी आएसेणं सव्वकालं जाणइ न पासइ, भावओ णं आभिनिबोहिअनाणी आएसेणं सव्वे भावे जाणइ न पासइ।*

**वृ.** 'तं समासओ' इत्यादि, 'तत्' मतिज्ञानं 'समासतः' संक्षेपेण चतुर्विधं, तद्यथा-द्रव्यतः क्षेत्रतः कालतो भावतश्च, तत्र द्रव्यतो 'ण'मिति वाक्यालङ्कारे, आभिनिबोधिकज्ञानी 'आदेसेणं'ति आदेशः-प्रकारः, स च द्विधा--सामान्यरूपो विशेषरूपश्च, तत्रेह सामान्यरूपो ग्राह्यः, तत आदेशेन--द्रव्यजातिरूपसामान्यादेशेन सर्वद्रव्याणि-धर्मास्तिकायादीनी जानाति किञ्चिद्विशेषतोऽपि, यथा धर्म्मास्तिकायो धर्म्मास्तिकायस्य प्रदेशः तथा धर्म्मास्तिकायो गत्युपष्टम्भहेतुरमूर्त्तो लोकाकाशप्रमाण इत्यादि, न पश्यति-सर्वात्मना धर्म्मास्तिकायादीन्न पश्यति, घटादींस्तु योग्यदेशावस्थितान् पश्यत्यपि, अथवा आदेश इति-सूत्रादेशस्तस्मात्सूत्रादेशात्सर्वद्रव्याणि धर्म्मास्तिकायादीनि जानाति, न तु साक्षात् सर्वाणि पश्यति, ननु यत्सूत्रादेशतो ज्ञानमुपजायते तच्छ्रुतज्ञानं भवति तस्य



Jain Education International For Private & Personal Use Only www.jainelibrary.org

शब्दार्थपरिज्ञानरूपत्वादथ च मतिज्ञानमभिधीयमानं वर्त्तत तत्कथमादेश इति सूत्रादेशो व्याख्यातः ?, तदयुक्तं, सम्यगवस्तुतत्त्वापरिज्ञानात्, इह हि श्रुतभावितमतेः श्रुतोपलब्धेष्वपि अर्थेषु सूत्रानुसारमात्रेण येऽवग्रहेहापायादयो बुद्धिविशेषाः प्रादुष्ष्यन्ति ते मतिज्ञानमेव, न श्रुतज्ञानं, सूत्रानुसारनिपेक्षत्वात्, आह च भाष्यकृत्-

"आदेसोत्ति व सुत्तं सुओवलद्धेसु तस्स मइनाणं।
पसरइ तब्भावणया विणावि सुत्तानुसारेणं ॥"

एवं क्षेत्रादिष्वपि वाच्यं, नवरं तान् सर्वथा न पश्यति, तत्र क्षेत्रं लोकालोकात्मकं, कालः सर्वाद्धारूपोऽतीतानागनवर्त्तमानरूपो वा, भावाश्च पञ्चसङ्ख्या औदयिकादयः, तथा चाह-भाष्यकृत्-

"आएसोत्ति पगारो ओघाएसेण सव्वदव्वाइं।
धम्मत्थिकाइआइं जाणइ न उ सव्वभावेणं ॥१॥
खेत्तं लोकालोकं कालं संबुद्धमहव तिविहं वा।
पंचोदइयाईए भावे जं नेयमेवइयं ॥२॥"

सम्प्रति संग्रहगाथां प्रतिपादयति-

**मू. (१२२)** *उग्गह ईहाऽवाओ य धारणा एव हुंति चत्तारि।*
*आभिनिबोहियनाणस्स भेयवत्थू समासेणं।*

**वृ.** 'उग्गहो' इत्यादि. अवग्रहः-प्राग्निरूपितशब्दार्थस्तथा ईहा अपायश्च, चशब्दः पृथगवग्रहादिस्वरूपस्वातन्त्र्यप्रदर्शनार्थः, अवग्रहादयः परस्परं पर्याया न भवन्तीति भावार्थः, अथवा चशब्दः समुच्चये, तस्य च व्यवहितः प्रयोगो धारणा चेत्येवं द्रष्टव्यः, एवकारः क्रमप्रदर्शनार्थः, 'एवम्' एतेन क्रमेण 'समासेन' संक्षेपेण चत्वारि आभिनिबोधिकज्ञानस्य भिद्यन्ते इति भेदा विकल्प अंशा इत्यर्थः त एव वस्तूनि भवन्ति, तथाहि-नानवगृहीतमीह्यते नानीहितं निश्चीयते नानिश्चितं धार्यते इति। इदानीमेतेषामवग्रहादीनां स्वरूपं प्रतिपिपादयिषुराह-

**मू. (१२३)** *अत्थाणं उग्गहणंमि उग्गहो तह विआलणे ईहा।*
*ववसायंमि अवाओ धरणं पुन धारणं बिंति ॥*

**वृ.** 'अत्थाण'मित्यादि, अर्थानां-रूपादीनामवग्रहणं चशब्दोऽवग्रहणस्य अव्यक्तत्वसामान्यमात्रसामान्यविशेषविषयत्वापेक्षया स्वगतभेदबाहुल्यसूचकः, अवग्रहं ब्रुवते इति योगः, 'तथे'-त्यानन्तर्ये विचारणं-पर्यालोचनमर्थानामिति वर्त्तते ईहां ब्रुवते, तथा विविधोऽवसायो व्यवसायो-निर्णयस्तं चार्थानामिति वर्त्तत अपायं ब्रुवते इति संसर्गः, धरणं पुनरर्थानामविच्युतिस्मृति-वासनारूपां धारणां ब्रुवते तीर्थकरगणधराः, अनेन स्वमनीषिकाव्यदासमाह-

अन्ये त्वेवं पठन्ति-"'अत्थाणं' उग्गहणंमि उग्गहो" इत्यादि, तत्रैवं व्याख्यानम्-अर्थानामवग्रहणे सत्यवग्रहो नाम मतिविशेषो भवतीत्येवं ब्रुवते, एवमीहादिष्वपि योजना कार्या, भावार्थः प्राग्वदेव। इदानीमभिहितस्वरूपाणामवग्रहादीनां कालप्रमाणमभिधित्सुराह-

**मू. (१२४)** *उग्गह इक्कं समयं ईहावाया मुहुत्तमद्धं तु।*
*कालमसंखं संखं च धारणा होइ नायव्वा ॥*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. 'उग्गहो' इत्यादि, अवग्रहः-अर्थावग्रहो नैश्चयिक एकसमयं यावद् भवति, समयः परम-निकृष्टः कालविभागः, स च प्रवचनप्रतिपादितादुत्पलपत्रशतव्यतिभेदोदाहरणात्, जरत्पट्ट-शाटिकापाटनदृष्टान्तच्चावसेयः, व्यञ्जनावग्रहविशेषसामान्यार्थावग्रहौ तु पृथक् २ अन्तर्मुहूर्त-प्रमाणौ ज्ञातव्यौ, ईहा चापायश्च ईहापायौ मुहूर्त्तार्द्धं ज्ञातव्यौ, मुहूर्त्तो घटिकाद्वयप्रमाणः कालविशेषः तस्यार्द्धं मुहूर्त्तार्द्धं, तुशब्दो विशेषणार्थः, स चैतद्विशिनष्टि-व्यवहारापेक्षया एतन्मुहूर्त्तार्द्धमित्युच्यते, परमार्थतः पुनरन्तर्मुहूर्त्तमवसेयं, अन्ये पुनरेवं पठन्ति-"मुहुत्तमंतं तु" तत्र मकारोऽलाक्षणिकः, तत एवं द्रष्टव्यं-मुहूर्त्तान्तः-मुहूर्त्तस्यान्तः-मध्यं मुहूर्त्तान्तः, अन्तर्मुहूर्त्तमित्यर्थः, इह 'पारे मध्येऽ-ग्रेऽन्तः षष्ठ्या वे'ति विकल्पेनान्तः-शब्दस्य प्राग् निपातो भवति, ततः सूत्रेऽन्तःशब्दस्य प्राग्नि-पातो न विहितः, तथा धारणा कालमसङ्ख्य-पल्योपमादिलक्षणं सङ्ख्येयं च-वर्षादिरूपं यावद्-भवति ज्ञातव्या, धारणा चेह वासनारूपा द्रष्टव्या, अविच्युतिस्मृति तु प्रत्येकमन्तुर्मुहूर्त्तप्रमाणे वेदितव्ये।

*मू. (१२५)* *पुट्ठं सुणेइ सद्दं रूवं पुण पासइ अपुट्ठं तु।*
*गंधं रसं च फासं च बद्धपुट्ठं वियागरे॥*

**वृ.** तदेवमवग्रहादीनां स्वरूपमभिधाय श्रोत्रेन्द्रियादीनां प्राप्ताप्राप्तविषयतां प्रतिपिपादयिषुराह-'पुट्ठं सुणेइ' इत्यादि, इह श्रोत्रेन्द्रियेण शब्दं शृणोति स्पृष्टं-स्पृष्टमात्रं, स्पृष्टं नाम आलिङ्गितं यथा तनौ रेणुसङ्घातः, अथ कथं स्पृष्टमात्रमेव शब्दं शृणोति ?, उच्यते, इह शेषेन्द्रियगणापेक्षया श्रोत्रेन्द्रियमतिशयेन पटु, तथा गन्धादिद्रव्यापेक्षया शब्दद्रव्याणि सूक्ष्माणि प्रभूतानि भावुकानि च, अत एव सर्वतस्तदिन्द्रियं प्राप्नुवन्ति, ततस्तानि स्पृष्टमात्राण्यपि श्रोत्रेन्द्रियेण गृहीतं शक्यन्ते, रूपं पुनः पश्यति अस्पृष्टमेव, तुरेवकारार्थः, अप्राप्यकारित्वाच्चक्षुषः, तथा गन्धं रसं च स्पर्शं च, चशब्दौ समुच्चयार्थौ, बद्धस्पृष्टं घ्राणादिभिरिन्द्रियैर्विनिश्चिनोतीति व्यागृणीयात्, इह बद्ध-स्पृष्टमिति स्पृष्टबद्धमिति विज्ञेयं, प्राकृतशैल्या चान्यथा सूत्रे उपन्यासः, तत्र स्पृष्टमित्या-नाऽऽलिङ्गितं बद्धं-तोयवदात्मप्रदेशैरात्मीकृतं आलिङ्गितानन्तरमात्मप्रदेशैरागृहीतमित्यर्थः।

इह शब्दमुत्कर्षतो द्वादशयोजनेभ्य आगतं शृणोति, न परतः, शेषाणि तु गन्धादिद्रव्याणि प्रत्येकं नवभ्यो २ योजनेभ्य आगतानि घ्राणादिभिरन्द्रियैर्गृह्णाति जीवो, न परतः, परतः समागतानां द्रव्याणां मन्दपरिणामतया इन्द्रियग्राह्यत्वासम्भवात्, जघन्यतस्तु शब्दादिद्रव्याणि अंगुला-सङ्ख्येयभागादागतानि, चक्षुषस्तु जघन्यतो योग्यो विषयोऽगुलसङ्ख्येयभागवर्त्ती वेदितव्यः, उत्कर्षतस्त्वात्मांगुलेन सातिरेको योजनलक्षः, एतदपि चाभासुरद्रव्यमधिकृत्योच्यते, भासुरं तु द्रव्यमेकविंशतियोजनलक्षेभ्योऽपि परतः पश्यंति, यथा पुष्करवरद्वीपार्द्धे मानुषोत्तरनगप्रत्या-सन्नवर्त्तिनः कर्कसंक्रान्तौ सूर्यबिम्बं, तथा चोक्तम्-

"लक्खेहिं एगवीसाए सातिरेगेहिं पुक्खरद्धंमि।
उदए पेच्छंति नरा सूरं उक्कोसए दिवसे॥"

अत्राह-ननु स्पृष्टं शृणोति शब्दमित्यक्तं, तत्र शब्दप्रयोगोत्सृष्टान्येव केवलानि शब्दद्रव्याणि शृणोति उतान्यान्येव तद्भावितानि आहोश्विन्मिश्राणीति ?, उच्यते, न तावत्केवलानि, यतो वासकानि शब्दद्रव्याणि शब्दयोग्यानि च द्रव्याणि सकललोकव्यापीनि ततोऽवश्यं तद्वासितानि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शृणोति मिश्राणि वा, न केवलान्येवोत्सृष्टानि, तथा चाह-

*मू. ( १२६ ) भासासमसेढीओ सद्दं जं सुणइ मीसियं सुणइ।*
*वीसेढी पुन सद्दं सुणेइ नियमा पराघाए॥*

**वृ.** 'भासासमे'त्यादि, भाष्यत इति भाषा-वाक् शब्दरूपतया उत्सृज्यमाना द्रव्यसन्ततिः सा च वर्णात्मिका भेरीभाङ्कारादिरूपा वा द्रष्टव्या तस्याः समाः श्रेणयः, श्रेणयो नाम क्षेत्रप्रदेश-पंक्तयोऽभिधीयन्ते, ताश्च सर्वस्यैव भाषामाणस्य षट्सु दिक्षु विद्यन्ते यासूत्सृष्टा सती भाषा प्रथमसमय एव लोकान्तमनुधावति, भाषासमश्रेणयः, समश्रेणिग्रहणं विश्रेणिव्यवच्छेदार्थं, भाषासमश्रेणीः इतो-गतः प्राप्तो भाषासमश्रेणीतः, भाषासमश्रेणिव्यवस्थित इत्यर्थः, यं शब्दं पुरुषादिसम्बन्धिनं भेर्यादिसम्बन्धिनं वा शृणोति यत्तदोर्नित्याभिसम्बन्धात्तं मिश्रं शृणोति, उत्सृष्टशब्दद्रव्यभाविता-पान्तरालस्थद्रव्यमिश्रं शृणोतीति भावार्थः।

'वीसेढी'त्यादि, अत्रेत इति वर्त्तते, ततोऽयमर्थः-विश्रेणिं पुनरितः-प्राप्तो, विश्रेणिव्यवस्थितः पुनरित्यर्थः, अथवा विश्रेणिस्थितो विश्रेणिरित्युच्यते, शब्दं शृणोति नियमात्पराघाते सति, नान्यथा, किमुक्तं भवति? -उत्सृष्टशब्दद्रव्यशब्दा (शब्दाद्रव्या) भिघातेन यानि वासितानि शब्दद्रव्याणि तान्येव केवलानि शृणोति, न कदाचिदपि उत्सृष्टानि, कुत इति चेद्, उच्यते, तेषामनुश्रेणिगमना-त्प्रतिघाताभावाच्च। सम्प्रति विनेयजनसुखप्रतिपत्तये मतिज्ञानस्य पर्यायशब्दानिभिधित्सुहार-

*मू. ( १२७ ) ईहा अपोह वीमंसा, मग्गणा य गवेसणा।*
*सन्ना सई मई पन्ना, सव्वं आभिनिबोहिअं॥*

**वृ.** 'ईह'त्यादि, एते ईहादयः शब्दा सर्वेऽपि परमार्थतो मतिवाचकाः पर्यायशब्दाः, परं विनेयजनबुद्धिप्रकाशनाय किञ्चिद्भेदाद् भेदोऽमीषां प्रदर्श्यते-ईहनमीहा-सदर्थपर्यालोचनं अपोहनमपोहः निश्चय इत्यर्थः, विमर्शनं विमर्शः-अपायादर्वागीहायाः परिणामविशेषः, मार्गणं मार्गणा-अन्वयधर्मान्वेषणं, चः समुच्चये, गवेषणं गवेषणा-व्यतिरेकधर्मालोचनं, तथा संज्ञानं संज्ञा व्यञ्जनावग्रहोत्तरकालभावी मतिविशेष इत्यर्थः, तथा स्मरणं स्मृतिः-पूर्वानुभूतालम्बनः प्रत्ययविशेषः, मननं मति-कथञ्चिदर्थपरिच्छित्तावपि सूक्ष्मधर्म्मालोचनरूपा बुद्धिः, प्रज्ञापनं प्रज्ञा-विशिष्टक्षयोपशमजन्या प्रभूतवस्तुगतयथावस्थितधर्मालोचनरूपा संवित्, सर्वमिदमा-भिनिबोधिकं, मतिज्ञानामित्यर्थः,

*मू. ( १२८ ) से तं आभिनिबोहिअनाणपरोक्खं॥*

**वृ.** 'से त्तमि'त्यादि, तदेतदाभिनिबोधिकज्ञानं।

साम्प्रतं प्रागुपन्यस्तसकलचरणकरणक्रियाधारश्रुतज्ञानस्वरूपजिज्ञासया शिष्यः प्रश्नयति-

*मू. ( १२९ ) से किं तं सुयनाणपरोक्खं?, सुयनाणपरोक्खं चोद्दसविहं पन्नत्तं, तंजहा-अक्खरसुयं १ अनक्खरसुयं २ सण्णिसुयं ३ असण्णिसुअं ४ सम्मसुअं ५ मिच्छसुअं ६ साइअं ७ अनाइअं ८ सपज्जवसिअं ९ अपज्जवसिअं १० गमिअं ११ अगमिअं १२ अंगपविट्ठं १३ अनंगपविट्ठं १४।*

**वृ.** अथ किं तच्छ्रुतज्ञानं?, आचार्य आह-श्रुतज्ञानं चतुर्दशविधं प्रज्ञप्तं, तद्यथा-अक्षर-श्रुतमनक्षरश्रुतं संज्ञिश्रुतमसंज्ञिश्रुतं सम्यक्श्रुतं मिथ्याश्रुतं सादि अनादि सपर्यवसितमपर्यवसितं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गमिकमगमिकमङ्गप्रविष्टमनङ्गप्रविष्टं च। ननु अक्षरश्रुतानक्षरश्रुतरूप एव भेदद्वये अन्तर्भवन्ति तत्किमर्थं तेषां भेदोपन्यासः?, उच्यते, इहाव्युत्पन्नमतीनां विशेषावगमसम्पादनाय महात्मनां शास्त्रारम्भप्रयासो, न चाक्षरश्रुतानक्षरश्रुतरूपभेदद्वयोपन्यासमात्रादव्युत्पन्नमतयः शेषभेदानवगन्तुमीशते, ततोऽव्युत्पन्नमतिविनेयजनानुग्रहाय शेषभेदोपन्यास इति।

साम्प्रतमुपन्यस्ताना भेदानां स्वरूपमनवगच्छन् आद्यं भेदमधिकृत्य शिष्यः प्रश्नं करोति-

*मू.(१३०) से किं तं अक्खरसुअं?, अक्खरसुअं तिविहं पन्नत्तं, तंजहा-सन्नक्खरं वंजणक्खरं लद्धिअक्खरं, से किं तं सन्नक्खरं?, २ अक्खरस्स संठाणागिई, सेत्तं सन्नक्खरं। से किं तं वंजणक्खरं?, वंजणक्खरं अक्खरस्स वंजणाभिलावो, से तं वंजणक्खरं। से किं तं लद्धिअक्खरं?, लद्धिअक्खरं अक्खरलद्धियस्स लद्धिअक्खरं समुप्पज्जइ, तंजहा-सोइंदिअलद्धिअक्खरं चक्खिंदियलद्धिअक्खरं रसनिंदियलद्धिअक्खरं फासिंदियलद्धिअक्खरं नोइंदियलद्धिअक्खरं, से तं लद्धिअक्खरं, से तं अक्खरसुअं। से किं तं अनक्खरसुअं?, अनक्खरसुअं अनेगविहं पन्नत्तं, तंजहा-*

वृ. अथ किं तदक्षरश्रुतं?, सूरिराह-अक्षरश्रुतं त्रिविधं प्रज्ञप्तं, तद्यथा-सञ्ज्ञाक्षरं व्यञ्जनाक्षरं लब्ध्यक्षरं च, तत्र 'क्षर सञ्चलने' न क्षरति-न चलतीत्यक्षरं-ज्ञानं, तद्धि जीवास्वाभाव्यादनुपयोगेऽपि तत्त्वतो न प्रच्यवते, यद्यपि च सर्वं ज्ञानमविशेषेणाक्षरं प्राप्नोति तथाऽपीह श्रुतज्ञानस्य प्रस्तावादक्षरं श्रुतज्ञानमेव द्रष्टव्यं, न शेषं, इत्थम्भूतभावाक्षरकारणं वाऽकारादि वर्णजातं ततस्तदप्युपचारादक्षरमुच्यतेप ततश्चाक्षरं च तच्छ्रुतं च श्रुतज्ञानं च अक्षरश्रुतं, भावश्रुतमित्यर्थः, तच्च लब्ध्यक्षरं वेदितव्यं, तथाऽक्षरात्मकमकारादिवर्णात्मकं श्रुतमक्षरश्रुतं द्रव्यश्रुतमित्यर्थः, तच्च सञ्ज्ञाक्षरं व्यञ्जनाक्षरं च द्रष्टव्यं,

अथ किं तत्सञ्ज्ञाक्षरं?, अक्षरस्याकारादेः, संस्थानाकृतिः-संस्थानाकारः, तथाहि-सञ्ज्ञायतेऽनयेति सञ्ज्ञा-नाम तन्निबन्धनं-तत्कारणमक्षरं संज्ञाक्षरं संज्ञाक्षरं संज्ञायाश्च निबन्धनमाकृतिविशेषः, आकृतिविशेष एव नाम्नः करणाद्व्यवहरणाच्च, ततोऽक्षरस्य पट्टिकादौ संस्थापितस्य संस्थानाकृतिः संज्ञाक्षरमुच्यते, तच्च ब्राह्यादिलिपिभेदतोऽनेकप्रकारं, तत्र नागरीं लिपिमधिकृत्य किञ्चित्प्रदर्श्यते-मध्ये स्फाटितचुल्लीसन्निवेशसदृशो रेखासन्निवेशो मकारो वक्रीभूतश्वपुच्छसन्निवेशसदृशो ढकार इत्यादि, 'से त्तमि'त्यादि, तदेतत् संज्ञाक्षरं।

अथ किं तद्व्यञ्जनाक्षरं?, आचार्य आह-व्यञ्जनाक्षरमक्षरस्य व्यञ्जनाभिलापः, तथाहि-व्यज्यतेऽनेनार्थः प्रदीपेनेव घट इति व्यञ्जनं-भाष्यमाणमकारादिकं वर्णजातं, तस्य विवक्षितार्थाभिव्यञ्जकत्वात्, व्यञ्जनं च तदक्षरं च व्यञ्जनाक्षरं, ततो युक्तमुक्तं व्यञ्जनाक्षरमक्षरस्य व्यञ्जनाभिलापः, अक्षरस्याकारदेर्वर्णजातस्य व्यञ्जनेन-अत्र भावे अनट् व्यञ्जकत्वेनाभिलापः-उच्चारणं, अर्थव्यञ्जकत्वेनोच्चार्यमाणमकारादिवर्णजातमित्यर्थः।

'से किं तमि'त्यादि, अथ किं तल्लब्ध्यक्षरं?, लब्धिः-उपयोगः स चेह प्रस्तावात् शब्दार्थपर्यालोचनानुसारी गृह्यते, लब्धिरूपमक्षरं लब्ध्यक्षरं, भावश्रुतमित्यर्थः, 'अक्खरलद्धियस्से'त्यादि, अक्षरे-अक्षरस्योच्चारणेऽवगमे वा लब्धिर्यस्य सोऽक्षरलब्धिकः तस्य, अकाराद्यक्षरानुविद्धश्रुतलब्धिसमन्वितस्येत्यर्थः, लब्ध्यक्षरं भावश्रुतं समुत्पद्यते, शब्दादिग्रहणसम-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नन्तरमिन्द्रियमनोनिमित्तं शब्दार्थपर्यालोचनानुसारि शाङ्खोऽयमित्याद्यक्षरानुविद्धं ज्ञानमुपजायते इत्यर्थः, नन्विदं लब्ध्यक्षरं सञ्ज्ञिनामेव पुरुषादीनामुपपद्यते नासञ्ज्ञिनामेकेन्द्रियादीनां, तेषामकारादीनां वर्णानामवगमे उच्चारणे वा लब्ध्यसम्भवात्, न हि तेषां परोपदेशश्रवणं सम्भवति येनाकारादिवर्णानामवगमादि भवेत् अथचैकेन्द्रियादीनामपि लब्ध्यक्षरमिष्यते, तथाहि-पार्थिवादीनामपि भावश्रुतमुपवर्ण्यते-

'दव्वसुयाऽभावंमिवि भावसुयं पत्थिवाईण'मिति वचनप्रामाण्याद्, भावश्रुतं च शब्दार्थपर्यालोचनानुसारि विज्ञानं, शब्दार्थपर्यालोचनं चाक्षरमन्तरेण न भवतीति, सत्यमेतत्, किन्तु यद्यपि तेषामेकेन्द्रियादीनां परोपदेशश्रवणासम्भवस्तथापि तेषां तथाविधयक्षयोपशमभावात: कश्चिदव्यक्तोऽक्षरलाभो भवति यद्वशादक्षरानुपक्तं श्रुतज्ञानमुपजायते, इत्थं चैतदङ्गीकर्त्तव्यं, तथाहि-तेषामप्याहाराद्यभिलाप उपजायते, अभिलापश्च प्रार्थना, सा च यदीदमहं प्राप्नोमि ततो भव्यं भवतीत्याद्यक्षरानुविद्धैव, ततस्तेषामपि काचिदव्यक्ताक्षरलब्धिरवश्यं प्रतिपत्तव्या, ततस्तेषामपि लब्ध्यक्षरं सम्भवतीति न कश्चिद्दोषः।

तथा लब्ध्यक्षरं पोढा, तद्यथा-'श्रोत्रेन्द्रियलब्ध्यक्षर'मित्यादि, इह यच्छ्रोत्रेन्द्रियेण शब्दश्रवणे सति शाङ्खोऽयमित्याद्यक्षरानुविद्धं शब्दार्थपर्यालोचनानुसारि विज्ञानं तच्छ्रोत्रेन्द्रियलब्ध्यक्षरं, तस्य श्रोत्रेन्द्रियनिमित्तत्वात्, यत्पुनश्चक्षुपा आम्रफलाद्युपलभ्याम्रफलमित्याद्यक्षरानुविद्धं शब्दार्थपर्यालोचनात्मकं विज्ञानं तच्चक्षुरिन्द्रियलब्ध्यक्षरं, एवं शषेन्द्रियलब्ध्यक्षरमपि भावनीयं, 'से त्त'मित्यादि, तदेतत्, लब्ध्यक्षरं, तदेतदक्षरश्रुतं।

अथ किं तदनक्षरश्रुतं?, अनक्षरात्मकं श्रुतमनक्षरश्रुतं, आचार्य आह-अनक्षरश्रुतमनेकविधम्-अनेकप्रकारं प्रज्ञप्तं, तद्यथा-

*मू. (१३१) ऊससिअं नीससिअं निच्छूढं, खासिअं च छीअं च।*
*निस्सिंघिअमनुसारं अनक्खरं छेलिआईअं॥*

वृ. 'ऊससिय'मित्यादि, उच्छ्वसनमुच्छ्वसितं, भावे निष्ठाप्रत्ययः, तथा निःश्वसनं निःश्वसितं निष्ठीवनं निष्ठ्यूतं, कासनं कासितं, चशब्दः समुच्चयार्थः, क्षवणं क्षुतं, एषोऽपि चशब्दः समुच्चार्थः परमस्य व्यवहितः प्रयोगः, सेंटितादिकं चेत्येवं द्रष्टव्यः, तथा 'निस्सिंघनं निस्सिङ्घितं, अनुस्वारवदनुस्वारं, सानुस्वारमित्यर्थः, तथा सेंटितादिकं चानक्षरश्रुतं, इह उच्छ्वसितादि द्रव्यश्रुतं द्रष्टव्यं, ध्वनिमात्रत्वाद्भावश्रुतस्य कारणत्वात्कार्यत्वाच्च, तथाहि-यदाऽभिसन्धिपूर्वकं स विशेषतरमुच्छ्वसितादि कस्यापि पुंसः कस्यचिदर्थस्य ज्ञप्तये प्रयुंक्ते तदा तदुच्छ्वसितादि प्रयोक्तुर्भावश्रुतस्य फलं श्रोतुश्च भावश्रुतस्य कारणं भवति ततो द्रव्यश्रुतमित्युच्यते, अथ ब्रवीथाः-एवं तर्हि करादिचेष्टाया अपि द्रव्यश्रुतत्वप्रसङ्गः, साऽपि हि बुद्धिपूर्विका क्रियमाणा तत्कर्त्तुर्भावश्रुतस्य फलं द्रष्टुश्च भावश्रुतस्य कारणमिति, नैष दोषः, श्रुतमित्यन्वर्थाश्रयणात्, तथाहि-यच्छ्रूयते तच्छ्रुतमित्युच्यते, न च करादिचेष्टा श्रूयते ततो न तत्र द्रव्यश्रुतत्वप्रसङ्गः, उच्छ्वसितादिकं तु श्रूयते अनक्षरात्मकं च ततस्तदनक्षरश्रुतमित्युक्तं,

*मू. (१३२) से तं अनक्खरसुअं॥*

वृ. 'से त्तमि'त्यादि, तदेतदनक्षरश्रुतं।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*मू. ( १३३ ) से किं तं सण्णिसुअं ?, २ तिविहं पन्नत्तं, तंजहा-कालिओवएसेणं हेऊवएसेणं दिट्ठिवाओवएसेणं, से किं तं कालिओवएसेणं ?, कालिओवएसेणं जस्स णं अत्थि ईहा अवोहो मग्गणा गवेसणा चिंता वीमंसा से णं असन्नीति लब्भइ, से तं कालिओवएसेणं। से किं तं हेऊवएसेणं ?, जस्स णं अत्थि अभिसंधारणपुव्विआ करणसत्ती से णं सण्णीति लब्भइ, जस्स णं नत्थि अभिसंधारणपुव्विआ करणसत्ती से णं असण्णीत्ति लब्भइ, से तं हेऊवएसेणं। से किं तं दिट्ठिवाओवएसेणं ?, दिट्ठिवाओवएसेणं सण्णिसुअस्स खओवसमेणं सण्णी लब्भइ, असण्णिसुअस्स अखोवसमेणं असण्णी लब्भइ, से तं दिट्ठिवाओवएसेणं, से तं सण्णिसुअं से तं असण्णिसुअं।*

वृ. 'से किं त'मित्यादि, अथ किं तत्संज्ञिश्रुतं ?, संज्ञानं संज्ञा साऽस्यास्तीति संज्ञी तस्य श्रुतं संज्ञिश्रुतं, आचार्य आह-संज्ञिश्रुतं त्रिविधं प्रज्ञप्तं, संज्ञिनस्त्रिभेदत्वात्, तदेव त्रिभेदत्वं संज्ञिनो दर्शयति, तद्यथा-कालिक्युपदेशेन १ हेतुपदेशेन २ दृष्टिवादोपदेशेन ३, तत्र कालिक्युपदेशेने-त्यत्रादिपदलोपाद्दीर्घकालिक्युपदेशेनेति द्रष्टव्यं।

'से किं त'मित्यादि, अथ कोऽयं कालिक्युपदेशेन संज्ञी ?, इह दीर्घकालिकीसंज्ञा कालिकीति व्यपदिश्यते, आदिपदलोपादुपदेशनमुपदेशः-कथनमित्यर्थः दीर्घकालिक्या उपदेशः दीर्घकालि-क्युपदेशस्तेन, आचार्य आह-कालिक्युपदेशेन संज्ञी स उच्यते यस्य प्राणिनोऽस्ति-विद्यते ईहा-सदर्थपर्यालोचनमपोहो-निश्चयो मार्गणा-अन्वयधर्म्मान्वेषणरूपा गवेषणा-व्यतिरेकधर्म्मस्व-रूपपर्यालोचनं चिन्ता-कथमिदं भूतं कथं चेदं सम्प्रति कर्त्तव्यं कथं चैतद्भविष्यतीति पर्यालोचनं विमर्शनं विमर्शः-इतमित्थमेव घटते इत्थं वा तद्भूतमित्थमेव वा तद्भावीति यथावस्थित-वस्तुस्वरूपनिर्णयः स प्राणी 'ण'मिति वाक्यालङ्कारे संज्ञीति लभ्यते, स च गर्भव्युत्क्रा-न्तिकपुरुषादिरौपपातिकश्च देवादिर्मनःपर्याप्तियुक्तो विज्ञेयः, तस्यैव त्रिकालविषयचिन्ता-विमर्शादिसम्भवाद्, आह च भाष्यकृत्-

"इह दीहकालिगि कालिगित्ति सन्ना जया सुदीहंपि।
संभरइ भूयमेस्सं चिंतेइ य किह नु कायव्वं ॥१॥
कालियसन्नित्ति तओ जस्स मई सो य तो मनोजोग्गे।
खंधेऽनंते धेत्तुं मन्नइ तल्लद्धिसंपत्तो ॥२॥"

एष च प्रायः सर्वमप्यर्थं स्फुटरूपलभते, तथाहि-यथा चक्षुष्मान् प्रदीपादिप्रकाशेन स्फुट-मर्थमुपलभते तथैषोऽपि मनोलब्धिसम्पन्नो मनोद्रव्यावष्टम्भसमुत्थविमर्शवशतः पूर्वापरानुसन्धानेन यथावस्थितं स्फुटमर्थमुपलभते, यस्य पुनर्नास्ति ईहा अपोहो मार्गणा गवेषणा चिन्ता विमर्शः सोऽसंज्ञीति लभ्यते, स च सम्मूर्च्छिमपञ्चेन्द्रियविकलेन्द्रियादिर्विज्ञेयः, सहि स्वल्पस्वल्प-तरमनोलब्धिसम्पन्नत्वादस्फुटमस्फुटतरमर्थं जानाति, तथाहि-संज्ञिपञ्चेन्द्रियापेक्षया सम्मूर्च्छिम-पञ्चेन्द्रियोऽस्फुटमर्थं जानाति, ततोऽप्यस्फुटं चतुरिन्द्रियः, ततोऽप्यस्फुटतरं त्रीन्द्रियः, ततोऽप्य-स्फुटतमं द्वीन्द्रियः, ततोऽप्यस्फुटतममेकेन्द्रियः, तस्य प्रायो मनोद्रव्यासम्भवात्, केवलमव्यक्तमेव किञ्चिदतीवाल्पतरं मनो द्रष्टव्यं, यद्वशादाहारादिसंज्ञा अव्यक्तरूपाः प्रादुष्यन्ति, 'सेत्त'मित्यादि, सोऽयं कालिक्युपदेशेन संज्ञी।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'से किं त'मित्यादि, अथ कोऽयं हेतूपदेशेन संज्ञी ?, हेतुः कारणं निमित्तमित्यनर्थान्तरं उपदेशनमुपदेशः हेतोरुपदेशनं हेतूपदेशस्तेन, किमुक्तं भवति ? कोऽयं संज्ञित्वनिबन्धन-हेतुमुपलभ्य कालिक्युपदेशेनासंज्ञ्यपि संज्ञीति व्यवह्रियते ?, आचार्य आह-हेतूपदेशेन संज्ञा यस्य प्राणिनोऽस्ति-विद्यतेऽभिसन्धारणम्-अव्यक्तेन व्यक्तेन वा विज्ञानेनालोचनं तत्पूर्विका-तत्कारणिका 'करणशक्तिः' करणं क्रिया तस्यां शक्तिः-प्रवृत्तिः स प्राणी 'ण'मिति वाक्यालङ्कारे हेतूपदेशेन संज्ञीति भण्यते, एतदुक्तं भवति-यो बुद्धिपूर्वकं स्वदेहपरिपालनार्थमिष्टेष्वाहारादिषु वस्तुषु प्रवर्त्तते अनिष्टेभ्यश्च निवर्त्तते स हेतूपदेशेन संज्ञी, स च द्वीन्द्रियादिरपि वेदितव्यः, तथाहि-इष्टानिष्टविषयप्रवृत्तिनिवृत्तिसङ्चिन्तनं न मनोव्यापारमन्तरेण सम्भवति, मनसा पर्यालोचनं संज्ञा, सा च द्वीन्द्रियादेरपि विद्यते, तस्यापि प्रतिनियतेष्टानिष्टविषयप्रवृत्तिनिवृत्तिदर्शनात्, ततो द्वीन्द्रि-यादिरपि हेतूपदेशेन संज्ञी लभ्यते, नवरमस्य चिन्तनं प्रायो वर्त्तमानकालविषयं न भूतभविष्य-द्विषयमिति न कालिक्युपदेशेन संज्ञी लभ्यते, यस्य पुनर्नास्त्यभिसन्धारणपूर्विका करणशक्तिः स प्राणी 'ण'मिति वाक्यालङ्कारे हेतूपदेशेनाप्यसंज्ञी लभ्यते, स च पृथिव्यादिरेकेन्द्रियो वेदितव्यः, तस्याभिसन्धिपूर्वकमिष्टानिष्टप्रवृत्तिनिवृत्त्यसम्भवात्, या अपि चाहारादिसंज्ञाः पृथिव्यादीनां वर्त्तन्ते ता अप्यत्यन्तमव्यक्तरूपा इति तदपेक्षयाऽपि न तेषां संज्ञित्वव्यपदेशः, उक्तं च भाष्यकृता-

"'जे' पुन संचितेउं इट्ठानिट्ठेसु विसयवत्थूसुं।
वत्तंति नियत्तंति य सदेहपरिपालनाहेउं ॥१॥
पाएण संपइ च्चिय कालंमि न याइदीहकालण्णू।
ते हेउवायसण्णी निच्चिट्ठा होंति अस्सण्णी ॥२॥"

अन्यत्रापि हेतूपदेशेन संज्ञित्वमाश्रित्योक्तं-

कृमिकीटपतङ्गाद्याः समनस्काः जङ्गमाश्चतुर्भेदाः।
अमनस्काः पञ्चविधाः पृथिवीकायादयो जीवाः ॥"

'सेत्त'मित्यादि, सोऽयं हेतूपदेशेन संज्ञी। 'से किं त'मित्यादि, अथ कोऽयं दृष्टिवादोपदेशेन संज्ञी ?, दृष्टिः दर्शनं-सम्यक्त्वादि वदनं वादः दृष्टीनां वादो दृष्टिवादस्तदुपदेशेन, तदपेक्षयेत्यर्थः, आचार्य आह-दृष्टिवादोपदेशेन संज्ञि श्रुतस्य क्षयोपशमेन संज्ञी लभ्यते, संज्ञानं संज्ञा-सम्यग्ज्ञानं तदस्यास्तीति(स) संज्ञी-सम्यग्दृष्टिस्तस्य यच्छ्रुतं तत्संज्ञिश्रुतं, सम्यक्श्रुतमिति भावार्थः तस्य क्षयोपशमेन-तदावारकस्य कर्म्मणः क्षयोपशमभावेन संज्ञी लभ्यते, किमुक्तं भवति ? सम्यग्दृष्टिः क्षायोपशमिकज्ञानयुक्तो दृष्टिवादोपदेशेन संज्ञी भवति, स च यथाशक्ति रागादिनिग्रहपरो वेदितव्यः, स हि सम्यग्दृष्टिः सम्यग्ज्ञानी वा यो रागादीन् निगृह्णाति, अन्यथा हिताहितप्रवृत्तिनिवृत्त्यभावतः सम्यग्दृष्टिवाद्ययोगात्, उक्तं च-

"तज्ज्ञानमेव न भवति यस्मिन्नुदिते विभाति रागगणः।
तमसः कुतोऽस्ति शक्तिर्दिनकरकिरणाग्रतः स्थातुम् ॥"

अन्यस्तु मिथ्यादृष्टिरसंज्ञी, तथा चाह-'असंज्ञिश्रुतस्य' मिथ्याश्रुतस्य क्षयोपशमेनासंज्ञीति लभ्यते, 'से त्त'मित्यादि निगमनं, सोऽयं दृष्टिवादोपदेशेन संज्ञी। तदेवं संज्ञिनस्त्रिभेदत्वात् श्रुतमपि तदुपाधिभेदात् त्रिविधमुपन्यस्तं।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत्राह-ननु प्रथमं हेतूपदेशेन संज्ञी वक्तुं युज्यते, हेतूपदेशेनाल्पमनोलब्धिसम्पन्नस्यापि द्वीन्द्रियादेः संज्ञित्वेनाभ्युपगतत्वात् तस्य चाविशुद्धतरत्वात्, ततः कालिक्युपदेशेन, हेतूपदेशसंज्ञापेक्षया कालिक्युपदेशेन संज्ञिनो मनःपर्याप्तियुक्ततया विशुद्धत्वात्, तत्किमर्थमुत्क्रमोपन्यासः ?, उच्यते, इह सर्वत्र सूत्रे यत्र क्वचित् संज्ञी असंज्ञी वा परीगृह्यते तत्र सर्वत्रापि प्रायः कालिक्युपदेशेन गृह्यते न हेतूपदेशेन नापि दृष्टिवादोपदेशेन, तत एतत्सम्प्रत्ययार्थं प्रथमं कालिक्युपदेशेन संज्ञिनो ग्रहणं, उक्तं च-

"सन्निति असन्निति य सव्वसुए कालिओवएसेणं।
पायं संववहारो कीरइ तेणाइओ स कओ ॥"

ततोऽनन्तरमप्रधानत्वाद्धेतूपदेशेन संज्ञिनो ग्रहणं, ततः सर्वप्रधानत्वादन्ते दृष्टिवादोपदेशेनेति। 'सेत्त'मित्यादि, तदेतत्संज्ञिश्रुतम्, असंज्ञिश्रुतमपि प्रतिपक्षाभिधानादेव प्रतिपादितं, तत आह-'सेत्तं असण्णिसुयं' तदेतदसंज्ञिश्रुतं।

*मू. (१३४) से किं तं सम्मसुअं ?, जं इमं अरहंतेहिं भगवंतेहिं उप्पन्ननाणदंसणधरेहिं तेलुक्कनिरिक्खिअमहिअपूइएहिं तीयपडुप्पन्नमनागयजाणएहिं सव्वण्णूहिं सव्वदरिसीहिं पणीअं दुवालसंगं गणिपिडग तंजहा-आयारो १ सूयगडो २ ठाणं ३ समवाओ ४ विवाहपन्नत्ती ५ नायाधम्मकहाओ ६ उवासगदसाओ ७ अंतगडदसाओ ८ अनुत्तरोववाइयदसाओ ९ पण्हावागरणाइं १० विवागसुअं ११ दिट्ठिवाओ १२, इच्चेअं दुवालसंगं गणिपिडगं चोद्दसपुव्विस्स सम्मसुअं अभिन्नदसपुव्विस्स सम्मसुअं तेन परं भिन्नेसु भयणा, से तं सम्मसुअं।*

**वृ.** 'से किं त'मित्यादि, अथ किं तत्सम्यक्श्रुतं ?, आचार्य आह-सम्यक्श्रुतं यदिदमर्हद्भिः अशोकाद्यष्टमहाप्रातिहार्यरूपां पूजामर्हन्तीत्यर्हन्तः- तीर्थकरास्तैरर्हद्भिः, ते चार्हन्तः केश्चिच्छुद्धद्रव्यास्तिकनयमतानुसारिभिरनादिसिद्धा एव मुक्तात्मानोऽभ्युपगम्यन्ते, तथा च ते पठन्ति-

"ज्ञानमप्रतिघं यस्य, वैराग्यं च जगत्पतेः।
ऐश्वर्यं चैव धर्म्मश्च, सहसिद्धं चतुष्टयम् ॥

इत्यादि, एवंरूपाश्चापि ते बहव इष्यन्ते स्थापनादिद्वारेण च विशिष्टां पूजामर्हन्ति ततोऽर्हन्तोऽप्युच्यन्ते ततस्तद्व्यवच्छेदार्थं विशेषणान्तरमाह-'भगवद्भिः' भगः-समग्रैश्वर्यादिरूपः,

"ऐश्वर्यस्य समग्रस्य, रूपस्य यशसः श्रियः।
धर्मस्याथ प्रयत्नस्य, षण्णां भग इतीङ्गना ॥"

भगो विद्यते येषां ते भगवन्तः तैर्भगवद्भिः, इहानादिसिद्धानां रूपमात्रमपि नोपपद्यते किं पुनः समग्रं रूपम्, अशरीरत्वात्, शरीरस्य च रागादिकार्यतया तेषां रागादिरहितानामसम्भवात्, ततो भगवद्भिरित्यनेन परपरिकल्पितानादिसिद्धार्हद्व्यवच्छेदमाह।

अथ मन्येथाः-अनादिशुद्धा अप्यर्हन्तो यदा स्वेच्छया समग्ररूपादिगुणोपेतं शरीरमारचयन्ति तदा तेऽपि भगवन्तो भवन्ति ततः कथं तेषां व्युदास इत्याशङ्कापनोदार्थं भूयोऽपि विशेषणान्तरमाह 'उत्पन्नज्ञानदर्शनधरैः' उत्पन्नं ज्ञानं-केवलज्ञानं दर्शनं-केवलदर्शनं धरन्तीति उत्पन्नज्ञानदर्शनधराः, 'लिहादिभ्य' इत्यच्प्रत्ययः, न च येऽनादिविशुद्धास्ते उत्पन्नज्ञानदर्शनधरा भवन्ति, 'ज्ञानमप्रतितं यस्य' त्यादिवचनविरोधात्, तत उत्पन्नज्ञानदर्शनधरैरिति विशेषणेन तेषां व्यवच्छेदो भवति, ननु

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यद्येवं तर्हि उत्पन्नज्ञानज्ञानदर्शनधरैरत्येतावदेवास्तमलं भगवद्भिरितिविशेषणोपादानेन, तदयुक्तम्, उत्पन्नज्ञानदर्शनधरा हि सामान्यकेवलिनोऽपि भवन्ति न च तेषामवश्यं समग्ररूपादिसम्भवः ततस्तत्कल्पनाहंतो मा ज्ञासिपुरभीविनेयजना इति समग्ररूपादिगुणप्रतिपत्त्यर्थं भगवद्भिरिति विशेषणोपादानं, तदेवं शुद्धद्रव्यास्तिकनयमतानुसारिकल्पितमुक्तव्यवच्छेदः कृतः, सम्प्रति पर्यायास्तिकनयमतानुसारिपरिकल्पितमुक्तव्यवच्छेदार्थं विशेषणान्तरमाह-

'त्रैलोक्यनिरीक्षितमहितपूजितैः' त्रयो लोकास्त्रिलोकाः-भवनपतिव्यन्तरविद्याधरज्योतिष्कवैमानिकाः त्रिलोका एव त्रैलोक्यं, भेषजादित्वात् स्वार्थे ष्यण् प्रत्ययः, निरीक्षिताश्च ते महिताश्च ते पूजिताश्च ते निरीक्षितमहितपूजिताः, त्रैलोक्येन निरीक्षितमहितपूजिताः त्रैलोक्यनिरीक्षितमहितपूजिताः, तत्र निरीक्षिताः-मनोरथपरम्परासम्प्राप्तिसम्भवविनिश्चयसमुत्थसम्मदविकाशिलोचनैरालोकिता महिता-यथावस्थितानन्यसाधारणगुणोत्कीर्त्तनलक्षणेन भावस्तवेनार्चिताः पूजिताः-सुगन्धिपुष्पप्रकरप्रक्षेपादिना द्रव्यस्तवेन, तत्र सुगता अपि पर्यायास्तिकनयमतानुसारिभिस्त्रैलोक्यनिरीक्षितमहितपूजिता इष्यन्ते, तथा चाह स्वयम्भूः-

"देवागमनभोयानचामरादिविभूतयः।
मायाविष्वपि दृश्यन्ते, नातस्त्वमसि नो महान्॥" इति,

ततस्तद्व्यवच्छेदार्थं विशेषणान्तरमाह-'अतीतप्रत्युत्पन्नानागतज्ञैः' न चातीतानागतज्ञाः सुगताः सम्भवन्ति, तेषामेकान्तक्षणिकत्वाभ्युपगमेन सर्वथाऽतीतानागतयोरसत्त्वाद्, असतां च ग्रहणासम्भवादित्यत्र बहु वक्तव्यं तच्च प्रायः प्रागेवोक्तमन्यत्र(च) धर्म्मसंग्रहणीटीकादाविति नोच्यते, इह व्यवहारनयमतानुसारिभिः कैश्चिदृषयोऽप्यतीतप्रत्युत्पन्नानागतज्ञा इष्यन्ते, तथा च तद्ग्रन्थः-

"ऋषयः संयतात्मानः, फलमूलानिलाशनाः।
तपसैव प्रपश्यन्ति, त्रैलोक्यं सचराचरम्॥१॥
अतीतानागतान् भावान्, वर्त्तमानांश्च भारत!।
ज्ञानालोकेन पश्यन्ति, त्यक्तसङ्गा जितेन्द्रियाः॥२॥"

इत्यादि, ततस्तद्व्यवच्छेदार्थमाह-'सर्वज्ञैः सर्वदर्शिभिः' ते तु ऋषयः सर्वज्ञाः सर्वदर्शिनश्च न भवन्ति, ततस्तेषां व्युदासः।

तदेवं द्रव्यास्तिकपर्यायास्तिकनयमतव्यवच्छेदफलतया विशेषणसाफल्यमुक्तं, विचित्रनयमताभिज्ञैन तु अन्यथापि विशेषणसाफल्यं वाच्यं, न कश्चिद्विरोधः, प्रणीतम्- अर्थकथनद्वारेण प्ररूपितं, किं तदित्याह-

'द्वादशाङ्गं' श्रुतरूपस्य परमपुरुषस्याङ्गानीवाङ्गानि द्वादशाङ्गानि-आचाराङ्गादीनि यस्मिन् तत् द्वादशाङ्ग 'गणिपिडगं'ति गणो-गच्छो गुणगणो वाऽस्यास्तीति गणी-आचार्यस्तस्य पिटकमिव पिटकं, सर्वस्वमित्यर्थः, गणिपटिकं, अथवा गणिशब्दः परिच्छेदवचनाऽ(प्य)स्ति, तथा चोक्तम्-

"आयारंमि अहीए जं नाओ होइ समणधम्मो उ।
तम्हा आयारधरो भन्नइ पढमं गणिट्ठाणं॥"

ततश्च गणीनां पिटकं गणिपिटकं परिच्छेदसमूह इत्यर्थः, तद्यथा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'आयारो' इत्यादि पाठसिद्धं यावत् दृष्टिवादः, अनङ्गप्रविष्टमप्यावश्यकादि तत्त्वतोऽर्हत्प्रणीतत्वात्परमार्थतो द्वादशाङ्गातिरिक्तार्थाभावाच्च द्वादशाङ्गग्रहणेन गृहीतं द्रष्टव्यं, इदं च द्वादशाङ्गादि सर्वमेव द्रव्यास्तिकनयमतापेक्षया तदभिधेयपञ्चास्तिकायभाववन्नित्यं स्वाम्यसम्बन्धचिन्तायां च स्वरूपेण चिन्त्यमानं सम्यक्श्रुतं स्वामिसम्बन्धचिन्तायां तु सम्यग्दृष्टेः सम्यक्श्रुतं मिथ्यादृष्टेर्मिथ्याश्रुतं, एतदेव श्रुतपरिमाणतो व्यक्तं दर्शयति-

इत्येतद् द्वादशाङ्गं गणिपिटकं यश्चतुर्दशपूर्वी तस्य सकलमपि सामायिकादि बिन्दुसारपर्यवसानं नियमात् सम्यक्श्रुतं, ततोऽधोमुखपरिहान्या नियमतः सर्वं सम्यक्श्रुतं तावद्वक्तव्यं यावदभिन्नदशपूर्विणः-सम्पूर्णदशपूर्वधरस्य, सम्पूर्णदशपूर्वधरत्वादिकं हि नियमतः सम्यग्दृष्टेरेव, न मिथ्यादृष्टेः, तथास्वाभाव्यता, तथाहि- यथा अभव्यो ग्रन्थिदेशमुपागतोऽपि तथास्वाभावत्वात् न ग्रन्थिभेदमाधातुमलम्, एवं मिथ्यादृष्टिरपि श्रुतमवगाहमानः प्रकर्षतोऽपि तावदवगाहते यावत्किञ्चिन्न्यूनानि दश पूर्वाणि भवन्ति, परिपूर्णानि तु तानि नावगाढुं शक्नोति, तथास्वाभावत्वादिति, 'तेन परं भन्नइ भयणा' अत्र 'तेने'ति 'व्यत्ययोऽप्यासामि'ति प्राकृतलक्षणवशात्पञ्चम्यर्थे तृतीया, ततोऽयमर्थः-

ततः सम्पूर्णदशपूर्वधरत्वात्पश्चानुपूर्व्या परं-भिन्नेषु दशसु पूर्वेषु भजना-विकल्पना कदाचित् सम्यक्श्रुतं कदाचिन्मिथ्याश्रुतमित्यर्थः, इयमत्र भावना-सम्यग्दृष्टेः प्रशमादिगुणगणोपेतस्य सम्यक्श्रुतं, यथावस्थितार्थतया तस्य सम्यक् परिणमनात्, मिथ्यादृष्टेस्तु मिथ्याश्रुतं, विपरीतार्थतया तस्य परिणमनात् 'से त्त'मित्यादि, तदेतत्सम्यक्श्रुतं।

*मू. ( १३५ ) से किं तं मिच्छासुअं ?, २ जं इमं अन्नाणिएहिं मिच्छादिट्ठिएहिं सच्छंदबुद्धिमइविगप्पिअं, तंजहा- भारहं रामायणं भीमासुरुक्खं कोडिल्लयं सगडभद्दिआओ खोड ( घोडग) मुहं कप्पासिअं नागसुहुमं कनगसत्तरी वइसेसिअं बुद्धवयणं तेरासिअं काविलिअं लोगाययं सट्ठितंतं माढरं पुराणं वागरणं भागवं पायंजली पुस्सदेवयं लेहं गणिअं सउणरुअं नाडयाइं, अहवा बावत्तरिकलाओ चत्तारि अ वेआ संगोवंगा, एआइं मिच्छदिट्ठिस्स मिच्छत्तपरिग्गहिआइं मिच्छासुअं, एयाइं चेव सम्मदिट्ठिस्स सम्मत्तपरिग्गहिआइं सम्मसुअं, अहवा मिच्छादिट्ठिस्सवि एयाइं चेव संमसुअं, कम्हा ?, सम्मत्तहेउत्तणओ, जम्हा ते मिच्छदिट्ठिआ तेहिं चेव समएहिं चोइआ समाणा केइ सपक्खदिट्ठीओ चयंति, से तं मिच्छासुअं।*

**वृ.** 'से किं त'मित्यादि, अथ किं तन्मिथ्याश्रुतं ?, आचार्य आह-मिथ्याश्रुतं यदिदमज्ञानिकैः, तत्र यथाऽल्पधनालोकेऽधना उच्यन्ते एवं सम्यग्दृष्टयोऽप्यल्पज्ञानभावादज्ञानिका उच्यन्ते तत आह-मिथ्यादृष्टिभिः, किंवि० ?, 'स्वच्छन्दबुद्धिमतिविकल्पितं' तत्रावग्रहेहे तु बुद्धिः, अपायधारणे मतिः, स्वच्छन्देन-स्वाभिप्रायेण तत्त्वतः सर्वज्ञप्रणीतानुसारमन्तरेणेत्यर्थः, बुद्धिमतिभ्यां विकल्पितं स्वच्छन्दबुद्धिमतिविकल्पितं, स्वबुद्धिकल्पनाशिल्पनिर्मितमित्यर्थः, तद्यथा- 'भारतमित्यादि यावच्चत्तारि वेया संगोवंगा' भारतादयश्च ग्रन्था लोके प्रसिद्धास्ततो लोकत एव तेषां स्वरूपमवगन्तव्यं, ते च स्वरूपतो यथावस्थितवस्त्वभिधानविकलतया मिथ्याश्रुतमवसेयाः, एतेऽपि च स्वामिसम्बन्धचिन्तायां भाज्याः, तथा चाह-

'एयाइं' इत्यादि, एतानि-भारतादीनि शास्त्राणि मिथ्यादृष्टेर्मिथ्यात्वपरिगृहीतानि भवन्ति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततो विपरीताभिनिवेशवृद्धिहेतुत्वान्मिथ्याश्रुतं, एतान्येव च भारतादीनि शास्त्राणि सम्यग्दृष्टेः सम्यक्त्वपरिगृहीतानि भवन्ति सम्यक्त्वेन-यथावस्थितताऽसारतापरिभावनरूपेण परिगृहीतानि तस्य सम्यक् श्रुतं, तद्गतासारतादर्शनेन स्थिरतरसम्यक्त्वपरिणामहेतुत्वात्, 'अहवे'त्यादि, अथवा मिथ्यादृष्टेरपि सतः कस्यांचदेतानि भारतादीनि शास्त्राणि सम्यक् श्रुतं, शिष्य आह-कस्मात् ?, आचार्य आह- सम्यक्त्वहेतुत्वात्, सम्यक्त्वहेतुत्वमेव भावयति -यस्मात्ते मिथ्यादृष्टयः तैरेव समग्रैः सिद्धान्तैर्वेदादिभिः पूर्वापरविरोधेन-यथा रागादिपरीतः पुरुषस्तावन्नातीन्द्रियमर्थमवबुध्यते रागादिपरीतत्वाद् अस्मादृशवद्, वेदेषु चातीन्द्रियाः प्रायोऽर्था व्यावर्ण्यन्ते अतीन्द्रियार्थदर्शी च वीतरागः सर्वज्ञो नाभ्युपगम्यते ततः कथं वेदार्थप्रतीतिरित्येवमादिलक्षणेन नोदिताः सन्तः केचन विवेकिनः सत्या(त्यक्त्या)दय इव स्वपक्षदृष्टीः-स्वदर्शनानि त्यजन्ति, भगवच्छासनं प्रतिपद्यन्ते इत्यर्थः, तत एवं सम्यक्तहेतुत्वाद्वेदादीन्यपि शास्त्राणि केषाञ्चिन्मिथ्यादृष्टीनामपि सम्यक् श्रुतं। 'सेत्त'मित्यादि, तदेतन्मिथ्याश्रुतं॥

*मू. ( १३६ ) से किं तं साइअं सपज्जवसिअं अनाइअं अपज्जवसिअं च ?, इच्चेइयं दुवालसंगं गणिपिडगं वुच्छित्तिनयट्टयाए साइअं सपज्जवसिअं, अवुच्छित्तिनयट्टयाए अनाइअं अपज्जवसिअं,*

*तं समासओ चउव्विहं पन्नत्तं, तंजहा-दव्वओ खित्तओ कालओ भावओ,*

*तत्थ दव्वओ णं सम्मसुअं एगं पुरिसं पडुच्च साइअं सपज्जवसिअं बहवे पुरिसे य पडुच्च अनाइयं अपज्जवसिअं, खेत्तओ णं पंच भरहाइं पंचेरवयाइं, पडुच्च साइअं सपज्जवसिअं, पंच महाविदेहाइं पडुच्च अनाइयं अपज्जवसिअं,*

*कालओ णं उस्सप्पिणीं ओसप्पिणिं च पडुच्च साइअं सपज्जवसिअं, पंच महाविदेहाइं पडुच्च अनाइयं अपज्जवसिअं,*

*भावओ णं जे जया जिनपन्नत्ता भावा आघविज्जंति पन्नविज्जंति परूविज्जंति दंसिज्जंति निदंसिज्जंति उवदंसिज्जंति तया(ते) भावे पडुच्च साइअं सपज्जवसिअं, खाओवसमिअं पुन भावं पडुच्च अनाइअं अपज्जवसिअं।*

*अहवा भवसिद्धियस्स सुयं साइयं सपज्जवसिअं च, अभवसिद्धियस्स सुयं अनाइयं अपज्ज-वसिअं(च), सव्वागासपएसग्गं सव्वागासपएसेहिं अनंतगुणिअं पज्जवक्खरं निप्फज्जइ, सव्वजीवाणंपि अ णं अक्खरस्स अनंतभागो निच्चुग्घाडिओ, जइ पुण सोऽवि आवरिज्जा तेणं जीवो अजीवत्तं पाविज्जा, 'सुट्ठुवि मेहसमुदए होइ पभा चंदसूराणं'।*

*से तं साइअं सपज्जवसिअं, से तं अनाइयं अपज्जवसिअं।*

**वृ.** अथ किं तत्सादि सपर्यवसितमनादि अपर्यवसितं च ?, तत्र सहादिना वर्त्तते इति सादि, तथा पर्यवसानं पर्यवसितं, भावे क्तप्रत्ययः, सह पर्यवसितेन वर्त्तते इति सपर्यवसितं, आदि-रहितमनादि, न पर्यवसितमपर्यवसितं, आचार्य आह-भावे क्तप्रत्ययः, सह पर्यवसितेन वर्त्तते इति सपर्यवसितं, आदिरहितमनादि, न पर्यवसितमपर्यवसितं, आचार्य आह-इत्येतद्द्वादशाङ्गं गणिपटिकं 'वोच्छित्तिनयट्ठयाए' इत्यादि, व्यवच्छित्तिप्रतिपादनपरो नयो व्यवच्छित्तिनयः, पर्यायास्तिकनय इत्यर्थः, तस्यार्थो व्यवच्छित्तिनयार्थः, पर्याय इत्यर्थः, तस्य भावो व्यवच्छित्ति-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यार्थता, तया पर्यायापेक्षयेत्यर्थः, किमित्याह -सादिसपर्यवसितं नारकादिभवपरिणत्यपेक्षया जीव इव, 'अवुच्छित्तिनयट्ठयाए' त्ति अव्यवच्छित्तिप्रतिपादनपरो नयोऽव्यवच्छित्तिनयस्त-स्यार्थोऽव्यवच्छित्तिनयार्थो, द्रव्यमित्यर्थः, तद्भावस्तत्ता तया, द्रव्यापेक्षया इत्यर्थः, किमित्याह-अनादिअपर्यवसितं त्रिकालावस्थायित्वाज्जीववद्, अधिकृतमेवार्थं द्रव्यक्षेत्रादिचतुष्टमधिकृत्य प्रतिपादयति--

'तत्' श्रुतज्ञानं 'समासतः' संक्षेपेण चतुर्विधं प्रज्ञप्तं, तद्यथा-द्रव्यतः क्षेत्रतः कालतो भावतश्च, तत्र द्रव्यतो 'ण'मिति वाक्यालङ्कारे सम्यक् श्रुतमेकं पुरुषं प्रतीत्य सादिसपर्यवसितं, कथमिति चेत्?, उच्यते, सम्यक्तवावाप्तौ ततः प्रथमपाठतो वा सादि पुनर्मिथ्यात्वप्राप्तौ सति वा सम्यक्त्वे प्रमादभावतो महाग्लानत्वभावतो वा सुरलोकगमनसम्भवतो वा विस्मृतिमुपागते केवलज्ञानो-त्पत्तिभावतो वा सर्वथा विप्रनष्टे सपर्यवसितं, बहून् पुरुषान् कालत्रयवर्त्तिनः पुनः प्रतीत्यानाद्य-पर्यवसितं, सन्तानेन प्रवृत्तत्वात्, कालवत्, तथा क्षेत्रतो 'ण'मिति वाक्यालङ्कारे पञ्च भरतानि पञ्चैरवतानि प्रतीत्य सादिसपर्यवसानं, कथं?, उच्यते, तेषु क्षेत्रेष्ववसर्प्पिण्यां सुषमदुष्षमापर्यवसाने उत्सर्प्पिण्यां तु दुष्षमसुषमाप्रारम्भे तीर्थकरधर्म्मसङ्घानां प्रथमतयोत्पत्तेः सादि, एकान्तदुष्षमादौ च काले तदभावात् सपर्यवसितं, तथा महाविदेहान् प्रतीत्यानाद्यपर्यवसितं, तत्र प्रवाहापेक्षया तीर्थकरादीनामव्यवच्छेदात् तथा कालतो 'ण'मिती वाक्यालङ्कारे, अवसर्प्पिणीमुत्सर्प्पिणीं च प्रतीत्य सादिसपर्यवसितं, तथाहि-अवसर्प्पिण्यां तिसृष्वेव समासु सुषमदुष्षमादुष्षमसुषमा-दुष्षमारूपासूत्सर्प्पिण्यां तु द्वयोः समयोः दुष्षमसुषमासुषमदुष्षमारूपयोर्भवति, न परतः, ततः सादिसपर्यवसितं, अत्र चोत्सर्प्पिणीस्वरूपज्ञापनार्थं कालचक्रं विंशतिसागरोपकोट्यकोटीप्रमाणं विनेयजनानुग्रहार्थं यथा मूलवृत्तिकृता दर्शितं तथा वयमपि दर्शयामः-

"चत्तारि सागरोवमकोडि कोडीउ संतईए उ।
एगंतसुस्समा खलु जिनेहि सव्वेहि निद्दिट्ठा ॥१॥
तीए पुरिसाणमाऊ तिन्नि य पलियाइं तह पमाणं च।
तिन्नेव गाउयाई आइए भणंति समयन्नू ॥२॥
उवभोगपरीभोगा जम्मंतरसुकयबीयजाया उ।
कप्पतरुसमूहाओ होंति किलेसं विना तेसिं ॥३॥
ते पुन दसप्पयारा कप्पतरू समणसमयकेऊहि
धीरेहिं विनिदिट्ठा मनोरहापूरगा एए ॥४॥
मत्तंगया य भिंगा तुडिअंगा दीव जोइ चित्तङ्गा।
चित्तरसा मणियंगा गेहागारा अनिय(गि)णा य ॥५॥
मत्तंगएसु मज्जं सुहपेज्जं भायणाणि भिंगेसु।
तुडियंगेसु य संगमयतुडियाणि बहुप्पगाराणि ॥६॥
दीवसिहा जोइसनामया य निच्चं करंति उज्जोयं।
चित्तगंसु य मल्लं चित्तरसा भोयणट्ठाए ॥७॥
मणियंगेसु य भूसणवराणि भवनानि भवणरुक्खेसुं।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आइण्णे(अनिगिणे)सु य इच्छियवत्थाणि बहुप्पगाराणि ॥८॥
एएसु य अन्नेसु य नरनारिगणाण ताणमुवभोगा।
भवियपुनब्भवरहिया इय सव्वण्णू जिना बिंति ॥९॥
तो तिन्नि सागरोवमकोडाकोडीउ वीयरागेहिं।
सुसमतत्ति समक्खाया पवाहरूपेण धीरेहिं ॥१०॥
तीए पुरिसाणमाउं दोन्नि उ पलियाइं तह पमाणं च।
दो चेव गाऊयाइं आईए भणंति समयन्नू ॥११॥
उवभोगपरिभोगा तेसिंपि य कप्पपायवेहिंतो।
होंति किलेसेन विना पायं पुण्णानुभावेणं ॥१२॥
तो सुसमदुस्समाए पवाहरूवेण कोडिकोडीओ।
अयराण दोन्नि सिट्ठा जिनेहिं जियरागदोसेहिं ॥१३॥
तीए पुरिसाणमाउं एगं पलिअं तहा पमाणं च।
एगं च गाउयं तीए आईए भणंति समयन्नू ॥१४॥
उवभोगपरिभोगा तेसिंपि य कप्पपायवेहिंतो।
होंति किलेसेण विना नवरं पुण्णानुभावेणं ॥१५॥
सुसमदुस्समावसेसे पढमजिनो धम्मनायगो भयवं।
उप्पन्नो सुहपुण्णो सिप्पकलादंसओ उसभो ॥१६॥
तीए पुरिसाणमाउं पुव्वपमाणेण तह पमाणं च।
धनुसंखा निद्दिट्ठं विसेस सुत्ताओ नायव्वं ॥१८॥
उवभोगपरिभोगा पवरोसहिमाइएहिं विन्नेया।
जिनचक्किवासुदेवा सव्वेऽवि इमाइ वोलीणा ॥१९॥
इगवीससहस्साइं वासाणं दूसमा इमीए उ।
जीवियमानुवभोगाइयाइं दीसंति हायंति ॥२०॥
एत्तो य किलिट्ठयरा जीयपमाणाइएहिं निद्दिट्ठा।
अइदूसमत्ति घोरा वाससहस्साइ इगवीसा ॥२१॥
ओसप्पिणीए एसो कालविभागो जिनेहि निद्दिट्ठो।
एसो च्चिय पडिलोभं विन्नेओस्सप्पिणीएऽवि ॥२२॥
एयं तु कालचक्कं सिस्सजनानुग्गहट्ठि(ट्ठ) या भणियं।
संखेवेण महत्थो विसेस सुत्ताओ नायव्वो ॥२३॥"

'नोउसप्पिणी' त्यादि, नोत्सर्प्पिणीमवसर्प्पिणी प्रतीत्यानाद्यपर्यवसितं, महाविदेहेषु ही नोत्सर्प्पिण्यवसर्प्पिणीरूपः कालः, तत्र च सदैवावस्थितं सम्यक्श्रुतमित्यनाद्यपर्यवसितं, तथा भावतो 'ण' मिति वाक्यालङ्कारे, 'ये' इत्यनिर्द्दिष्यनिर्देशे ये केचन यदा पूर्वाह्णादौ जिनैः प्रज्ञप्ता जिनप्रज्ञप्ता भावाः--पदार्थाः 'आघविज्जंति' तन्नति प्राकृतत्वादाख्यायन्ते, सामान्यरूपतया विशेषरूपतया वा कथ्यन्ते इत्यर्थः, प्रज्ञाप्यन्ते नामादिभेदप्रदर्शनेनाख्यायन्ते, तेषां नामादीनां

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भेदाः प्रदर्श्यन्ते इत्यर्थः, प्ररूप्यन्ते नामादिभेदस्वरूपकथनेन प्रख्याप्यन्ते नामादीनां भेदानां स्व-रूपाख्यायते इति भावार्थः, यथा-

"पज्जायाणाभिधेयं ठियमन्नत्थे तदत्थनिरवेक्खं।
जाईच्छियं च नामं जाव दव्वं च पाएणं ॥१॥
जं पुन तदत्थसुन्नं तदभिप्पाएण तारिसागारं।
कीरइ व निरागारं इत्तरमियरं च सा ठवणा ॥२॥"

इत्यादि, तथा दर्श्यन्ते उपमानमात्रोपदर्शनेन प्रकटीक्रियन्ते, यथा गौरिव गवय इत्यादि, तथा निदर्श्यन्ते-हेतुदृष्टान्तोपदर्शनेन स्पष्टतरीक्रियन्ते, उपदर्श्यन्ते-उपनयनिगमनाभ्यां निःशङ्कं शिष्यबुद्धौ स्थाप्यन्ते, अथवा उपदर्श्यन्ते-सकलनयाभिप्रायावतारणतः पटुप्रज्ञशिष्यबुद्धिषु व्य-वस्थाप्यन्ते, तान् भावान् 'तदा' तस्मिन् काले तथाऽऽख्यायमानान् प्रतीत्य सादिसपर्यवसितं, एतदुक्तं भवति-तस्मिन् काले तं तं प्रज्ञापकोपयोगं स्वरविशेषं प्रयत्नविशेषमासनविशेष-मङ्गविन्यासादिकं च प्रतीत्य सादिसपर्यवसितम्, उपयोगादेः प्रतिकालं अन्यथाऽन्यथाभवनात्,

"उवयोगसरपयत्ता आसनभेयाइया य पइसमयं।
भिन्ना पन्नवगस्सा साइयसपज्जंतयं तम्हा ॥"

क्षायोपशमिकभावं पुनः प्रतीत्यानाद्यपर्यवसितं, प्रवाहरूपेण क्षायोपशमिकभावस्यानाद्य-पर्यवसितत्वात्, अथवाऽत्र चतुर्भङ्गिकाः, तद्यथा-सादिसपर्यवसितं १ साद्यपर्यवसित २ मनादि-सपर्यवसित ३ मनाद्यपर्यवसितं च ४, तत्र प्रथमभङ्गप्रदर्शनायाह-'अथवे'त्यादि, अथवेति प्रकारा-न्तरोपदर्शने भवसिद्धिको-भव्यस्तस्य सम्यक्श्रुतं सादि (स) पर्यवसितं, सम्यक्त्वलाभे प्रथमतया भावात् भूयो मिथ्यात्वप्राप्तौ केवलोत्पत्तौ वा विनाशात्, द्वितीयस्तु भङ्गः शून्यो, न हि सम्यक्श्रुतं मिथ्याश्रुतं वा सादि भूत्वाऽपर्यवसितं सम्भवति, मिथ्यात्वप्राप्तौ केवलोत्पत्तौ वाऽवश्यं सम्यक्-श्रुतस्य विनाशात्, मिथ्याश्रुतस्यापि च सादेरवश्यं कालान्तरे सम्यक्त्वावाप्तावभावादिति, तृतीयभङ्गस्तु मिथ्याश्रुतपेक्षया वेदितव्यः, तथाहि-भव्यस्यानादिमिथ्यादृष्टेर्मिथ्याश्रुतमनादि सम्यक्त्वावाप्तौ च तदपयातीति सपर्यवसितं, चतुर्थभङ्गकं पुनरुपदर्शयति-'अभवे'त्यादि, अभवसिद्धिकः-अभव्यस्तस्य श्रुतं मिथ्याश्रुत मनाद्यपर्यवसतितं, तस्य सदैव सम्यक्त्वादि-गुणहीनत्वात्, एषा चतुर्थभङ्गिका यथा श्रुतस्योक्ता तथा मतेरपि द्रष्टव्या, मतिश्रुतयोरन्योऽन्यानुग-तत्वात्, केवलमिह श्रुतस्य प्रक्रान्तत्वात्साक्षात्तस्यैव दर्शिता, अत्राह-ननु तृतीयभङ्गे चतुर्थभङ्गे वा श्रुतस्यानादिभाव उक्तः, स च जघन्य उत मध्यम आहोश्विदुत्कृष्टः ?, उच्यते, जघन्यो मध्यमो वा न तूत्कृष्टो, यतस्तस्येदं मानं-

'सव्वागासे'त्यादि, सर्वं च तदाकाशं च-सर्वाकाशं, लोकालोकाकाशमित्यर्थः, तस्य प्रदेशाः-निर्विभागा भागाः सर्वाऽऽकाशप्रदेशास्तेषामग्रं-प्रमाणं सर्वाकाशप्रदेशाग्रं तत्सर्वाकाशप्रदेशैर-नन्तगुणितमनन्तशो गुणितमेकैकस्मिन्नाकाशप्रदेशेऽनन्तागुरुलघुपर्यायभावात् पर्यायाग्राक्षरं निष्पद्यते-पर्यायपरिमाणाक्षरं निष्पद्यते, इयमत्र भावना-सर्वाकाशप्रदेशपरिमाणं सर्वाकाशप्रदेशैर-नन्तशो गुणितं यावत्परिमाणं भवति तावत्प्रमाणं सर्वाकाशपर्यायाणामग्रं भवति, एकैकस्मिन्ना-काशप्रदेशे यावन्ताऽगुरुलघुपर्यायास्ते सर्वेऽपि एकत्र पिण्डिता एतावन्तो भवन्तीत्यर्थः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एतावत्प्रमाणं चाक्षरं भवति, इह स्तोकत्वाद्धर्मास्तिकायादयः साक्षात्सूत्रे नोक्ताः, परमार्थतस्तु तेऽपि गृहीता द्रष्टव्याः, ततोऽयमर्थः-सर्वद्रव्यप्रदेशाग्रं सर्वद्रव्यप्रदेशैरनन्तशो गुणितं यावत्परिमाणं भवति तावत्प्रमाणं-सर्वद्रव्यपर्यायपरिमाणं, एतावत्परिमाणं चाक्षरं भवति.

तदपि चाक्षरं द्विधा-ज्ञानमकारादिवर्ण्णजातं च, उभयत्रापि अक्षरशब्दप्रवृत्ते रूढत्वात्, द्विविधमपि चेह गृह्यते, विरोधाभावात्, ननु ज्ञानं सर्वद्रव्यपर्यायपरिमाणं सम्भवतु, यतो ज्ञानमिहा-विशेषोक्तौ सर्वद्रव्य पर्यायपरिमाणतुल्यताऽभिधानात्, प्रकमाद्वा केवलज्ञानं गृहीष्यते, तच्च सर्वद्रव्यपर्यायपरिमाणं घटत एव, तथाहि-यावन्तो जगति रूपिद्रव्याणां ये गुरुलघुपर्याया ये च रूपिद्रव्याणामरूपिद्रव्याणां वाऽगुरुलघुपर्यायास्तान् सर्वानपि साक्षात्करतकलकलितमुक्ता-फलमिव केवलालोकेन, प्रतिक्षणमवलोकेत भगवान्, स च येन स्वभावेनैकं पर्यायं परिच्छिनत्ति तेनैव स्वभावेन पर्यायान्तरमपि, तयोः पर्याययोरेकत्वप्रसक्तेः, तथाहि-

घटपर्यायपरिच्छेदनस्वभावं यज्ज्ञानं तद्यदा पटपर्यायं परिच्छेत्तुमलं तदा पटपर्यायस्यापि घटपर्यायरूपताऽऽपत्तिः, अन्यथा तस्य तत्परिच्छेदनकत्वानुपपत्तेः, तथारूपस्वभावाभावत्, ततो यावन्तः परिच्छेद्याः पर्यायास्तावन्तः परिच्छेदकास्तस्य केवलज्ञानस्य स्वभावा वेदितव्याः, स्वाभावश्च पर्यायास्ततः पर्यायानधिकृत्य सर्वद्रव्यपर्यायपरिमाणं केवलज्ञानमुपपद्यते, यदकारा-दिकं वर्ण्णजातं तत्कथं सर्वद्रव्यपर्यायपरिमाणं भवितुमर्हति ?, तत्पर्यायराशेः सर्वद्रव्यपर्यायाणा-मनन्ततमे भागे वर्त्तमानत्वात्, तदयुक्तं, अकारादेरपि स्वपरपर्यायभेदभिन्नतया सर्वद्रव्यपर्यायपरि-माणतुल्यत्वाद्, आह च भाष्यकृत-

"एक्केक्कमक्खरं पुण सपरपज्जायभेयओ भिन्नं।
तं सव्वदव्वपज्जायरासिमाणं मुनेयव्वं॥"

अथ कथं स्वपरपर्यायापेक्षया सर्वद्रव्यपर्यायराशितुल्यता ?, उच्यते, इह अ अ अ इत्युदा-त्तोऽनुदात्तः स्वरितश्च, पुनरप्येकैको द्विधा-सानुनासिको निरनुनासिकश्चेत्यकारस्य षड् भेदातांश्च षड् भेदानकारः केवलो लभते, एवं ककारेणापि संयुक्तो लभते षडे भेदानेवं खकारेण एवं यावद्धकारेण, एवमेकैककेवलव्यञ्जनसंयोगे यथा षट् २ भेदान् लभते तथा सजातीयविजाती-व्यञ्जनद्विकसंयोगेऽपि, एवं स्वरान्तरसंयुक्ततत्तद्व्यञ्जनसहितोऽप्यनेकान् भेदान लभते, अपिच-एकैकोऽप्युदात्तादिको भेदः स्वरविशेषादनेकभेदो भवति, वाच्यभेदादपि च समानवर्ण्ण-श्रेणीकस्यापि शब्दस्य भेदो जायते, तथाहि-न येनैव स्वभावेन करशब्दः हस्तमाचष्टे तेनैव स्वभावेन किरणमपि, किन्तु स्वभावभेदेन, तथाऽकाराऽपि तेन तेन ककारादिना संयुज्यमानस्तं तमर्थं ब्रुवाणो भिन्नस्वभावो वेदितव्यः, ते च स्वभावा अनन्ता ज्ञातव्याः, वाच्यस्यानन्तत्वात्, एते च सर्वेऽप्यकारस्य स्वपर्यायाः, शेषास्तु सर्वेऽपि घटादिपर्याया आकारादिपर्यायाश्च परपर्यायाः, ते च स्वपर्यायेभ्योऽनन्तगुणाः, तेऽपि चाकारस्य सम्बन्धिनो द्रष्टव्याः, आह-

ये स्वपर्यायास्ते तस्य सम्बन्धिनो भवन्तु, ये तु परपर्यायास्ते विभिन्नवस्त्वाश्रयत्वात् कथं तस्य सम्बन्धिनो व्यपदिश्यन्ते ?, उच्यते, इह द्विधा सम्बन्धः-अस्तित्वेन नास्तित्वेन च, तत्रास्ति-त्वेन सम्बन्धः स्वपर्यायैर्यथा घटस्य रूपादिभिः, नास्तित्वेन सम्बन्धः परपर्यायैः, तेषां तत्रासम्भ-वात्, यथा घटावस्थायां मृदः पिण्डाकारेण पर्यायेण, यत एव च ते तस्य न सन्तीति नास्तित्व-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सम्बन्धेन सम्बद्धाः अत एव च ते परपर्याया इति व्यपदिश्यन्ते, अन्यथा तेषामपि तत्रास्तित्वसंभवात् स्वपर्याया एव ते भवेयुः, ननु ये यत्र न विद्यन्ते ते कथं तस्येति व्यपदिश्यन्ते ?, न खलु धनं दरिद्रस्य न विद्यते इति तत्तस्य सम्बन्धि व्यपदेष्टुं शक्यं, मा प्रापत् लोकव्यवहारातिक्रमः, तदेतत् महामोहमूढमनस्कतासूचकं, यतो यदि नाम ते नास्तित्वसम्बन्धमधिकृत्य तस्येति न व्यपदिश्यन्ते तर्हि सामान्यतो न सन्तीति प्राप्तं, तथा च स्वरूपेणापि न भवेयुः, न चैतद्दृष्टमिष्टं वा, तस्मादवश्यं ते नास्तित्वसम्बन्धमङ्गीकृत्य तस्येति व्यपदेश्याः, धनमपि च नास्तित्वसम्बन्धमधिकृत्य दरिद्रस्येति व्यपदिश्यत एव,

तथा च लोके वक्तारो-धनमस्य दरिद्रस्य न विद्यते इति, यदपि चोक्तं-'न तत्तस्येति व्यदेष्टुं शक्य'मिति तत्रापि तदस्तित्वेन तस्येति व्यपदेष्टुं न शक्यं, न पुनर्नास्तित्वेनापि, ततो न कश्चिल्लौकिकव्यवहारातिक्रमः, ननु नास्तित्वमभावः अभावश्च तुच्छरूपः तुच्छत्वेन च सह कथं सम्बन्धः ?, तुच्छस्य सकलशक्तिविकलतया सम्बन्धशक्तेरप्यभावात्, अन्यच्च-यदि परपर्यायाणां तत्र नास्तित्वं तर्हि नास्तित्वेन सह सम्बन्धो भवतु, परपर्यायैस्तु सह कथं ?, न खलु घटः पटाभावेन सम्बद्धः पटेनापि सह सम्बद्धौ भवितुमर्हति, तथाप्रतीतेरभावात्, तदेतदसमीचीनं, सम्यक्वस्तुतत्त्वापरिज्ञानात्, तथाहि-नास्तित्वं नाम तेन तेन रूपेणाभवनमिष्यते, तच्च तेन तेन रूपेणाभवनं वस्तुनो धर्मः, ततो नैकान्तेन तत्तुच्छरूपमिति न तेन सह सम्बन्धाभावः, तदपि च तेन तेन रूपेणाभवनं तं तं पर्यायमपेक्ष्य भवति, नान्यथा तथाहि-

यो यो घटादिगतः पर्यायस्तेन तेन रूपेण मया न भवितव्यमिति सामर्थ्यात्तं तं पर्यायमपेक्षते इति सुप्रतीतमेतत्, ततस्तेन तेन पर्यायेणाभवनस्य तंत तं पर्यायमपेक्ष्य सम्भवात्तेऽपि परपर्यायस्तस्योपगोगिन इति तस्येति व्यपदिश्यन्ते, एवंरूपायां च विवक्षायां पटोऽपि घटस्य सम्बन्धी भवत्येव, पटमपेक्ष्य घटे पटरूपेणाभवनस्य भावात्, तथा च लौकिका अपि घटपटादीन् परस्परमितरेतराभावमधिकृत्य सम्बद्धान् व्यवहरन्तीत्यविगीतमेतत्, इतश्च ते परपर्यायास्तस्येति व्यपदिश्यन्ते-स्वपर्यायविशेषणत्वेन तेषामुपयोगात्, इह ये यस्य स्वपर्यायविशेषणत्वेनोपयुज्यन्ते ते तस्य पर्याया यथा घटस्य रूपादयः पर्यायाः परस्परविशेषकाः, उपयुज्यन्ते चाकारस्य पर्यायाणां विशेषकतया घटादिपर्यायास्तानन्तरेण तेषां स्वपर्यायव्यपदेशासम्भवात्, तथाहि-यदि ते परपर्याया न भवेयुस्तर्ह्यकारस्य स्वपर्यायाः स्वपर्याया इत्येवं न व्यपदिश्येरन्, परापेक्षया स्वस्वपदेशस्य भावात्, ततः स्वपर्यायव्यपदेशकारणतया तेऽपि परपर्यायाः तस्योपयोगिन इति तस्येति व्यपदिश्यन्ते, अपिच-

सर्वं वस्तु प्रतिनियतस्वभावं, सा च प्रतिनियतस्वभावता प्रतियोग्यभावात्मकतोपनिबन्धना, ततो यावन्न प्रतियोगिविज्ञानं भवति तावन्नाधिकृतं वस्तु तदभावात्मकं तत्त्वतो ज्ञातुं शक्यते, तथा च सति घटादिपर्यायाणामपि अकारस्य प्रतियोगित्वात्तदपरिज्ञाने नाकारो याथात्म्येनावगन्तुं शक्यते इति घटादिपर्याया अपि अकारस्य पर्यायाः, तथा चात्र प्रयोगः-यदनुपलब्धौ यस्यानुपलब्धिः स तस्य सम्बन्धी, यथा घटस्य रूपादयः, घटादिपर्यायानुपलब्धौ चाकारस्य न याथात्म्येनोपलब्धिरिति ते तस्य सम्बन्धिनः, न चायमसिद्धो हेतुः, घटादिपर्यायरूपप्रतियोग्यपरिज्ञाने तदभावा-



Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्मकस्याकारस्य तत्त्वतो ज्ञातत्वायोगादिति, आह च भाष्यकृत्-

"जेसु अनाएसु तओ न नज्जए नज्जए य नाएसुं ।
कह तस्य ते न धम्मा ?, घडस्स रूवाइधम्मव्व ॥"

तस्माद् घटादिपर्याया अपि अकारस्य सम्बन्धिन इति स्वपरपर्यायापेक्षयाऽकारः सर्वद्रव्य-पर्यायपरिमाणः, एवमाकारादयोऽपि वर्णाः सर्वे प्रत्येकं सर्वद्रव्यपर्यायपरिमाणा वेदितव्याः, एवं घटादिकमपि प्रत्येकं सर्वं वस्तुजातं परिभावनीयं, न्यायस्य समानत्वात्, न चैतदनार्षं, यत उक्तमाचाराङ्गे- "जे एगं जाणइ से सव्वं जाणइ, जे सव्वं जाणइ से एगं जाणइ" अस्यायमर्थः-य एकं वस्तूपलभत सर्वपर्यायैः स नियमात्सर्वमुपलभते, सर्वोपलब्धिमन्तरेण विवक्षितस्यैकस्य स्वपरपर्यायभेदभिन्नतया सर्वात्मनाऽवगन्तुमशक्यत्वात्, यश्च सर्वं सर्वात्मना साक्षादपलभते स एकं स्वपरपर्यायभेदभिन्नं जानाति, तथाऽन्यत्राप्युक्तम्-

"एको भावः सर्वथा येन दृष्टः, सर्वे भावाः सर्वथा तेन दृष्टाः ।
सर्वे भावाः सर्वथा येन दृष्टा, एको भावः सर्वथा तेन दृष्टः ॥"

तदेवमकारादिकमपि वर्णजातं केवलज्ञानमिव सर्वद्रव्यपर्यायपरिणाममिति न कश्चिद्वि-रोधः । अपिच-केवलज्ञानमपि स्वपरपर्यायभेदभिन्नं, यतस्तदात्मस्वभावरूपं न घटादिवस्तु-स्वभावात्मकं, ततो ये घटादिस्वपर्यायस्ते तस्य परपर्यायाः, ये तु परिच्छेदकत्वस्वभावास्ते स्व-पर्यायाः, परपर्याया अपी च पूर्वोक्तयुक्तेस्तस्य सम्बन्धिन इति स्वपरपर्यायभेदभिन्नं, तथा चाह भाष्यकृत्-

"वत्थुसहावं पइ तंपि सपरपज्जायभेदभिन्नं तु ।
तं जेन जीयभावो भिन्ना य तओ घडाईया ॥"

ततः पर्यायपरिमाणचिन्तायां परमार्थतो न कश्चिदकारादिश्रुतकेवलज्ञानयोर्विशेषः, अयं तु विशेषः-केवलज्ञानं स्वपर्यायैरपि सर्वद्रव्यपर्यायपरिमाणतुल्यमकारादिकं तु स्वपरपर्यायैरेव, तथाहि-अकारस्य स्वपर्यायाः सर्वद्रव्यपर्यायाणामनन्ततमभागकल्पाः, परपर्यायास्तु स्वपर्याय-रूपानन्ततमभागोनाः सर्वद्रव्यपर्यायाः, ततः स्वपरपर्यायैरेव सर्वद्रव्यपर्यायपरिमाणमकारा-दिकं भवति, आह च भाष्यकृत्-

"सय पज्जाएहि उ केवलेन तुल्लं न होइन परेहिं ।
सयपरपज्जाएहिं तु तं तुल्लं केवलेनेव ॥"

यथा चाकारादिकं सर्वद्रव्यपर्यायपरिमाणं तथा मत्यादीन्यपि ज्ञानानि द्रष्टव्यानि, न्यायस्य समानत्वात्, इह यद्यपि सर्वं ज्ञानमविशेषेणाक्षरमुच्यते सर्वद्रव्यपर्यायपरिमाणं च भवति तथापि श्रुताधिकारादिहाक्षरश्रुतज्ञानमवसेयं, श्रुतज्ञानं च मतिज्ञानाविनाभूतं ततो मतिज्ञानमपि, तदेवं यतः श्रुतज्ञानमकारादिकं चोत्कर्षतः सर्वद्रव्यपर्यायपरिमाणं तच्च सर्वोत्कृष्टश्रुतकेवलिनो द्वादशाङ्गविदः सङ्गच्छते, न शेषस्य, ततोऽनादिभावः श्रुतस्य जन्तूनां जघन्यो मध्यमो वा द्रष्टव्यो, न तूत्कृष्ट इति स्थितम् ।

अपरआह-नन्वनादिभाव एव श्रुतस्य कथमुपपद्यते ?, यावता याद प्रबलश्रुतज्ञानावरण-स्त्यानर्द्धिनिद्रारूपदर्शनावरणादयः सम्भवन्ति तदा सम्भाव्यते साकल्येन श्रुतस्यावरणं, यथाऽव-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ध्यादिज्ञानस्य, ततोऽवध्यादिज्ञानमिवादिमदेवु युज्यते श्रुतमपि नानादिमदिति कथं तृतीयचतुर्थ-भङ्गसम्भवः ?, तत आह-'सव्वजीवाणंपि' सर्वजीवानामपिणमिति वाक्यालङ्कारे अक्षरस्य-श्रुतज्ञानस्य (श्रुतसंलुलितकेवलस्येति तु भाष्यकृत) श्रुतज्ञानं च मतिज्ञानाविनाभावि ततो मतिज्ञान-स्यापि अनन्तभागो 'नित्योद्घाटितः' सर्वदैवानावृतः सोऽपि च-अनन्तमो भागोऽनेकविधः, तत्र सर्वजघन्यश्चैतन्यमात्रं तत्पुनः सर्वोत्कृष्टश्रुतावरणस्त्यानर्द्धिनिद्रोदयभावेऽपि नाव्रियते, तथा-जीवस्वाभाव्यात्, तथा चाह-

'जइ पुन'इत्यादि, यदि पुनः सोऽपि अनन्तमो भाग आव्रियते तेन तर्हि जीवोऽजीवत्वं प्राप्नुयात्, जीवो हि नाम चैतन्यलक्षणस्ततो यदि प्रबलश्रुतावरणस्त्यानर्द्धिनिद्रोदयभावे चैतन्यमात्रमप्याव्रियेत तर्हि जीवस्य स्वस्वभावपरित्यागादजीवतैव सम्पनीपद्येत, न चैतद्दृष्टमिष्टं वा, सर्वस्य सर्वथा स्वभावातिरस्काराद्, अत्रैव दृष्टान्तमाह-'सुट्ठुवी'त्यादि, सुष्ठुवी मेघसमुदये भवति प्रभा चन्द्रसूर्ययोः, इयमत्र भावना-यथा निबिडनिबिडतरमेघपटलैराच्छादितयोरपि सूर्याचन्द्रमसोर्नैकान्तेन तत्प्रभानाशः सम्पद्यते, सर्वस्य सर्वथा स्वभावापनयनस्य कर्तुमशक्यत्वात्, एवमनन्तानन्तैरपि ज्ञानदर्शनावरणकर्मपरमाणुभिरेकैकस्यात्प्रदेशस्याऽऽवेष्टितपरिवेष्टितस्यापि नैकान्तेन चैतन्यमात्रस्या(प्य)भावो भवति, ततो यत्सर्वजघन्यं तन्मतिश्रुतात्मकमतः सिद्धोऽक्षर-स्यानन्ततमो भागो नित्योद्घाटितः, तथा च सति मतिज्ञानस्य श्रुतज्ञानस्य चानादिभावः प्रतिपद्यमानो न विरुध्यते इति स्थितं। 'सेत्त'मित्यादि, तदेतत् सादि सपर्यवसितमनाद्यपर्यवसितं च॥

*मू. (१३७) से किं तं गमिअं ?, दिट्ठिवाओ, अगमिअं कालिअं सुअं, सेत्तं गमिअं, सेत्तं अगमिअं।*

अहवा तं समासओ दुविहं पन्नत्तं, तंजहा-अंगपविट्ठं अंगबाहिरं च।

से किं तं अंगबाहिरं ?, अंगबाहिरं दुविहं पन्नत्तं, तंजहा-आवस्सयं च आवस्सयवइ-रित्तं च।

से किं तं आवस्सयं ?, आवस्सयं छव्विहं पन्नत्तं, तंजहा-सामाइअं चउवीसत्थओ वंदनयं पडिक्कमणं काउस्सग्गो पच्चक्खाणं, सेत्तं आवस्सयं।

से किं तं आवस्सयवइरित्तं ?, आवस्सयवइरित्तं दुविहं पण्णत्तं, तंजहा-कालिअं च उक्का-लिअं च।

से किं तं उक्कालिअं ?, उक्कालिअं अनेगविहं पन्नत्तं, तंजहा-दसवेआलिअं कप्पिआकप्पिअं चुल्लकप्पसुअं महाकप्पसुअं उववाइअं रायपसेणिअं जीवाभिगमो पन्नवणा महापन्नवणा पमाय-प्पमायं नंदी अनुओगदाराइं देविंदत्थओ तंदुलवेआलिअं चंदाविज्झयं सूरपन्नत्ती पोरिसिमंडलं मंडलपवेसो विज्जाचरणविनिच्छओ गणिविज्जा झाणविभत्ती मरणविभत्ती आयविसोही वीयरागसुअं संलेहणासुअं विहारकप्पो चरणविही आउरपच्चक्खाणं महापच्चक्खाणं एवमाइ, सेत्तं उक्कालिअं।

से किं तं कालिअं ?, कालिअं अनेगविहं पन्नत्तं, तंजहा-उत्तरज्झयणाइं दसाओ कप्पो ववहारो निसीहं महानिसीहं इसिभासिआइं जंबूदीवपन्नत्ती दीवसागरपन्नत्ती चंदपन्नत्ती खुड्डीआ-विमानपविभत्ती महल्लिआविमानपविभत्ती अंगचूलिआ वग्गचूलिआ विवाहचूलिया अरुणो-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ववाए वरुणोववाए गुरुलोववाए धरणोववाए वेसमणोववाए वेलंधरोववाए देविंदोववाए उट्ठाणसुए समुट्ठाणसुए नागपरिआवणिआओ निरयावलियाओ कप्पिआओ कप्पवडिंसिआओ पुप्फिआओ पुप्फचूलिआओ वण्हीदसाओ।

एवमाइयाइं चउरासीइं पइन्नगससहस्साइं भगवओ अरहओ उसहसामिस्स आइतित्थयरस्स तहा संखिज्जाइं पइन्नगसहस्साइं मज्झिमगाणं जिनवराणं चोद्दसपइन्नगसहस्साणि भगवओ वद्धमाणसामिस्स,

अहवा जस्स जत्तिआ सीसा उप्पत्तिआए वेणइआए कम्मयाए पारिणामिआए, चउव्विहाए बुद्धीए उववेआ तस्स तत्तिआइं पइन्नगसहस्साइं, पत्तेअबुद्धावि तत्तिआ चेव,

सेत्तं कालिअं, सेत्तं आवस्सयवइरित्तं, से तं अनंगपविट्ठं।

वृ. अथ किं तद्गमिकं ?, इहादिमध्यावसानेषु किञ्चिद्विशेषतो भूयो भूयस्तस्यैव सूत्रस्योच्चारणं गमः, तत्रादौ-"सुयं मे आउसंतेणं भगवया एवमक्खायं इह खलु" इत्यादि, एवं मध्यावसनायोरपि यथासम्भवं द्रष्टव्यं, गमा अस्य विद्यन्ते इति गामिकं, 'अतोऽनेकस्वरा'दिति मत्वर्थीय इकप्रत्ययः, उक्तं च चूर्णौ-"आई मज्झेऽवसाने वा किंचिविसेसजुत्तं दुगाइसयग्गसो तमेव पढिज्जमाणं गमियं भन्नइ"त्ति, तच्च गमिकं प्रायो दृष्टिवादः, तथा चाह-'गमियं दिट्ठीवाओ' तद्विपरीतमगमिकं तच्च प्राय आचारादि कालिकश्रुतम्, असदृशपाठात्मकत्वात्, तथा चाह-'अगमियं कालियसुयं' 'सेत्त'मित्यादि, तदेतद्गमिकमगमिकं च।

'तं समासओ'इत्यादि, तद्गमिकमगमिकं च, अथवा तत्-सामान्यतः श्रुतमर्हदुपदेशानुसारि समासतः -संक्षेपेण द्विविधं प्रज्ञप्तं, तद्यथा-अङ्गप्रविष्टमङ्गबाह्यं च, अत्राह-ननु पूर्वमेव चतुर्दश-भेदोद्देशाधिकारेऽङ्गप्रविष्टमङ्गबाह्यं चेत्युपन्यस्तं, तत्किमर्थं भूयस्तत्समासत इत्याद्युपन्यासेन तदेव न्यस्यते इति ?, उच्यते, इह सर्व एव श्रुतभेदा अङ्गानङ्गप्रविष्टरूपे भेदद्वय एवान्तर्भवन्ति, तत एतदर्थख्यापनार्थं भूयोऽप्युद्देशेनाभिधानं, अथवाऽङ्गानङ्गप्रविष्टमर्हदुप्रदेशानुसारि ततः प्राधान्यख्यापनार्थं भूयोऽपि तस्योद्देशेनाभिधानमित्यदोषः, तत्राङ्गप्रविष्टमिति-

इह पुरुषस्य द्वादशाङ्गानि भवन्ति, तद्यथा-द्वौ पादौ द्वै जङ्घे द्वे उरुणी द्वे गात्रार्द्धे द्वौ बाहू ग्रीवा शिरश्च, एवं श्रुतरूपस्यापि परमपुरुषस्याऽऽचारादीनि द्वादशाङ्गनि क्रमेण वेदितव्यानि, तथा चोक्तं-

"पायदुगं जंघोरू गायदुगद्धं तु दो य बाहू य।
गीवा सिरं च पुरिसो बारस अङ्गो सुयविसिट्ठो ॥"

श्रुतपुरुषस्याङ्गेषु प्रविष्टमङ्गप्रविष्टम्-अङ्गभावेन व्यवस्थितमित्यर्थः, यत्पुनरेतस्यैव द्वाद-शाङ्गात्मकस्य श्रुतपुरुषस्य व्यतिरेकेण स्थितमङ्गबाह्यत्वेन व्यवस्थितं तदनङ्गप्रविष्टं, अथवा यद्गणधरदेवकृतं तदङ्गप्रविष्टं मूलभूतमित्यर्थः, गणधरदेवा हि मूलभूतमाचारादिकं श्रुतमुपरच-यन्ति, तेषामेव सर्वोत्कृष्टश्रुतलब्धिसम्पन्नतया तद्रचयितुमीशत्वात्, न शेषाणां, ततः तत्कृतं सूत्रं मूलभूतमित्यङ्गप्रविष्टमुच्यते, यत्पुनः शेषैः श्रुतस्थविरैस्तदेकदेशमुपजीव्य विरचितं तदनङ्गप्रविष्टं, अथवा यत्सर्वदैव नियतमाचारादिकं श्रुतं तदङ्गप्रविष्टं, तथाहि-

आचारादिकं श्रुतं सर्वेषु क्षेत्रेषु सर्वकालं चार्थं क्रमं चाधिकृत्यैवमेव व्यवस्थितं ततस्त-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दङ्गप्रविष्टमुच्यते. अङ्गप्रविष्टमङ्गभूतं मूलभूतमित्यर्थः, शेषं तु यच्छ्रुतं तदनियतमतस्तदनङ्गप्रविष्ट-मुच्यते, उक्तं च-

"गणहरकयमङ्गकयं जं कय थेरेहिं बाहिरं तं तु।
नियमं चऽङ्गपविट्ठं अनियमसुय बाहिरं भणियं ॥"

तत्राल्पवक्तव्यत्वात्प्रथममङ्गबाह्यमधिकृत्य प्रश्नसूत्रमाह-

'से किं त'मित्यादि, अथ किं तदङ्गबाह्यं ?, सूरिराह- अङ्गबाह्यं श्रुतं द्विविधं प्रज्ञप्तं, तद्यथा-आवश्यकं चावश्यकव्यतिरिक्तं च, तत्रावश्यं कर्म्म आवश्यकं, अवश्यकर्त्तव्यक्रियाऽनुष्ठान-मित्यर्थः, अथवा गुणानामभिविधिना वश्यमात्मानं करोती'त्यावश्यकम्-अवश्यकर्त्तव्यसामा-यिकादिक्रियानुष्ठानं तत्प्रतिपादकं श्रुतमपि आवश्यकं, चशब्दः स्वगतानेकभेदसूचकः

'से किं त'मित्यादि, अथ किं तदावश्यकं ?, सूरिराह- आवश्यकं षड्विधं प्रज्ञप्तं, तद्यथा-'सामायिक'मित्यादि निगदसिद्धं, 'सेत्त'मित्यादि तदेतदावश्यकं।

'से किं त'मित्यादि, अथ किं तदावश्यकव्यतिरिक्तं ?, आचार्य आह- आवश्यकव्यतिरिक्तं द्विविधं प्रज्ञप्तं तद्यथा-कालिकमुत्कालिकं च, तत्र यद्दिवसनिशाप्रथमपश्चिमपौरुषीद्वय एव पठ्यते तत्कालिकं, कालेन निर्वृत्तं कालिकमितिव्युत्पत्तेः, यत्पुनः कालवेलावर्ज्जं पठ्यते तदुत्कालिकं, आह च चूर्णिकृत्-"तत्थ कालियं जं दिनराई(ए)न पढमचरमपोरिसीसु पढि-ज्जई। जं पुन कालवेलावज्जं पढिज्जइ तं उक्कालियं"ति, तत्राल्पवक्तव्यत्वात्प्रथममुत्कालिक-मधिकृत्य प्रश्नसूत्रमाह-

'से किं त'मित्यादि, अथ किं तदुत्कालिकं श्रुतं ?, सूरिराह-उत्कालिकं श्रुतमनेकविधं प्रज्ञप्तं, तद्यथा-दशवैकालिकं तच्च सुप्रतीतं, तथा कल्पाकल्पप्रतिपादकमध्ययनं कल्पाकल्पं, तथा कल्पनं कल्पः-स्थविरादिकल्पः तत्प्रतिपादकं श्रुतं कल्पश्रुतं, तत्पुनर्द्विभेदं, तद्यथा-'चुलकप्पसुयं महाकप्पसुयं' एकमल्पग्रन्थमल्पार्थं च द्वितीयं महाग्रन्थं महार्थं च, शेषा ग्रन्थविशेषाः प्रायः सुप्रतीताः, तथापि लेशतोऽप्रसिद्धान् व्याख्यास्यामः, तत्र 'पन्नवण'त्ति जीवादीनां पदार्थानां प्रज्ञापना, सैव बृहत्तरा महाप्रज्ञापना, तथा प्रमादाप्रमादस्वरूपभेदफल-विपाकप्रतिपादकमध्ययनं प्रमादाप्रमादं, तत्र प्रमादस्वरूपमेवं-प्रचुर कर्म्मेन्धनप्रभव-निरन्तरविध्यातशारीरमानसानेकदुःखहुतवहज्वालाकलापपरीतमशेषमेव संसारवासगृहं पश्यंस्तन्मध्यवर्त्त्यपि सति च तन्निर्गमनोपाये वीतरागप्रणीतधर्म्मचिन्तामणौ यतो विचित्रक-र्मोदयसाचिव्यजनितान् परिणामविशेषादपश्यन्निव तद्भवमविगणय्य विशिष्टपरलोक-क्रियाविमुख एवास्ते जीवः स खलु प्रमादः, तस्य च प्रमादस्य ये हेतवो मद्यादयस्तेऽपि प्रमादा-स्तत्कारणत्वात्, उक्तं च-

"मज्जं विसय कसाया निद्दा विगहा य पंचमी भणिया।
एए पंच पमाया जीवं पाडंति संसारे ॥"

एतस्य च पञ्चप्रकारस्यापि प्रमादस्य फलं दारुणो विपाकः, उक्तं च-

"श्रेयो विषमुपभोक्तुं क्षमं भवेत् क्रीडितुं हुताशेन।
संसारबन्धनगतैर्न तु प्रमादः क्षमः कर्त्तुम् ॥१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अस्यामेव हि जातौ नरमुपहन्याद्विषं हुताशो वा।
आसेवितः प्रमादो हन्याज्जन्मान्तरशतानि ॥२॥
यत्र प्रयान्ति पुरुषाः स्वर्गं यच्च प्रयान्ति विनिपातम् ।
तत्र निमित्तमनार्यः प्रमाद इति निश्चितमिदं मे ॥३॥
संसारबन्धनगतो जातिजराव्याधिमरणदुःखार्त्तः ।
यत्रोद्विजते सत्त्वः सोऽप्यपराधः प्रमादस्य ॥४॥
आज्ञाप्यते यदवशस्तुल्योदरपाणिपादवदनेन ।
कर्म च करोति बहुविधमेतदपि फलं प्रमादस्य ॥५॥
इह हि प्रमत्तमनसः सोन्मादमदनिभृतेन्द्रियाश्चपलाः ।
यत्कृत्यं तदकृत्वा सततमकार्येऽप्वभिपतन्ति ॥६॥
तेषामभिपतितानामुद्भ्रान्तानां प्रमत्तहृदयानाम् ।
वर्द्धन्त एव दोषा वनतरव इवाम्बुसेकेन ॥७॥
दृष्टवाऽप्यालोकं नैव विश्रम्भितव्यं, तीरं नीतापि भ्राम्यति वायुना नौः ।
लब्ध्वा वैराग्यं भ्रष्टयोगः प्रमादाद्भूयो भूयः संसृतौ बम्भ्रमीति ॥८॥

एवं प्रतिपक्षद्वारेणाप्रमादस्यापि स्वरूपादयो वाच्याः, 'नन्दी'त्यादि सुगमं, सूरियपन्नत्ति'त्ति सूर्यचर्याप्रज्ञपनं यस्यां ग्रन्थपद्धतौ सा सूर्यप्रज्ञप्तिः, तथा 'पौरुषीमण्डल'मिति पुरुषः- शंकुः पुरुषशरीरं वा तस्मान्निष्पन्ना पौरुषी 'तत आगत' इत्यण्, आह च चूर्णिकृत्- 'पुरिसोत्ति संकू पुरिससरीरं वा, तत्र पुरिसाओ निप्फन्ना पोरिसी' इति, इयमत्र भावना सर्वस्यापी वस्तुनो यदा स्वप्रमाणाच्छाया जायते तदा पौरुषी भवति, एतच्च पौरुषीप्रमाणमुत्तरायणस्यान्ते दक्षिणायन-स्यादौ चैकं दिनं भवति, ततः परमंगुलस्याष्टावैकषष्टिभागा दक्षिणायने वर्द्धन्ते उत्तरायणे च हसन्ति, एवं मण्डले २ अन्याऽन्या पौरुषी यत्राध्ययने व्यावर्ण्यते तदध्ययनं पौरुषीमण्डलं, तथा यत्राध्ययने चन्द्रस्य सूर्यस्य च दक्षिणेषु उत्तरेषु च मण्डलेषु सञ्चरतो यथा मण्डलात् मण्डले प्रवेशो भवति तथा व्यावर्ण्यते तदध्ययनं मण्डलप्रवेशः, तथा 'विद्याचरणविनिश्चय' इति, विद्येति-ज्ञानं, तच्च सम्यग्दर्शनसहितमवगन्तव्यं, अन्यथा ज्ञानत्वायोगात्, चरणं-चारित्रमेतेषां फल-विनिश्चयप्रतिपादको ग्रन्थो विद्याचरणविनिश्चयः, तथा 'गणिविज्जे'ति सबालवृद्धो गच्छो गणः सोऽस्यास्तीति गणी-आचार्यस्तस्य विद्या-ज्ञानं गणिविद्या, सा चेह ज्योतिष्कनिमित्तादि-परिज्ञानरूपा वेदितव्या, ज्योतिष्कनिमित्तादिकं सम्यक् परिज्ञाय प्रव्राजनसामायिकरोपणो-पस्थापनोत्तोद्देशानुज्ञागणारोपणादिशानुज्ञाविहारक्रमादिषु प्रयोजनपूपस्थितेषु प्रशस्ते तिथिकरणमुहूर्त्तनक्षत्रयोगे यत् यत्र कर्त्तव्यं भवति तत्तत्र सूरिणा कर्त्तव्यं, तथा चेन्न करोति तर्हि महान् दोषः, उक्तं च-

"जोइसनिमित्तनाणं गणिणो पव्वावणाइकज्जेसु ।
उवजुज्जइ तिहिकरणाइजाननट्ठऽन्नहा दोसो ॥"

ततो यानि सामायिकादीनि प्रयोजनानि यत्र तिथिकरणादौ कर्त्तव्यानि भवन्ति तानि तत्र यस्यां ग्रन्थपद्धतौ व्यावर्ण्यन्ते सा गणिविद्या, तथा 'ध्यानविभक्ति'रिति ध्यानानिआर्त्तध्यानादीनि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तेषां विभजनं विभक्तिर्यस्यां ग्रन्थपद्धतौ सा ध्यानविभक्तिः, तथा मरणानि-प्राणत्यागलक्षणानि, तानि च द्विधा-प्रशस्तान्यप्रशस्तानि च, तेषां विभजनं-पार्थक्येन स्वरूपप्रकटनं यस्यां ग्रन्थपद्धतौ सा मरणविभक्तिः, तथाऽऽत्मनो-जीवस्यालोचनप्रायश्चित्तप्रतिपत्तिप्रवृत्तिप्रकारेण विशुद्धिः-कर्मविगमलक्षणा प्रतिपाद्यते यस्यां ग्रन्थपद्धातौ साऽऽत्मविशुद्धिः, तथा 'वीतरागश्रुत'मिति सरागव्यपोहेन वीतरागस्वरूपं प्रतिपाद्यते यत्राध्ययने तद्वीतरागश्रुतं, तथा 'संलेखनाश्रुत'मिति द्रव्यभावसंलेखना यत्र श्रुते प्रतिपाद्यते तत्संलेखनाश्रुतं, तत्रोत्सर्गत इयं द्रव्यसंलेखना-

"चत्तारि विचित्ताइं विगईनिज्जूहियाइ चत्तारि।
संवच्छरे उ दोन्नि उ एगंतरियं च आयामं ॥१॥
नाइविगिट्ठो य तवो छम्मासे परिमियं च आयामं।
अन्नेवि य छम्मासे होइ विगिट्ठं तवोकम्मं ॥२॥
वासं च कोडिसहियं आयामं कट्टु आनुपुव्वीए।
गिरिकंदरंमि गंतुं पायवगमनं अह करेइ ॥३॥

भावसंलेखना तु क्रोधादिकषायप्रतिपक्षाभ्यासः, तथा 'विहारकल्प' इति विहरणं विहारः तस्य कल्पो-व्यवस्था स्थविरकल्पादिरूपा यत्र वर्ण्यते ग्रन्थे स विहारकल्पः, तथा ('चरण-विधि'रिति) चरणं-चारित्रं तस्य विधिर्यत्र वर्ण्यते स चरणविधिः, तथा 'आतुरप्रत्ययाख्यान'मिति, आतुरः-चिकित्साक्रियाव्यपेतस्तस्य प्रत्याख्यानं यत्राध्ययने विधिपूर्वकमुपवर्ण्यते तदातुर-प्रत्याख्यानं, विधिश्चातुरस्य प्रत्याख्यानदानविषये चूर्णिकृतैवमुपदर्शितः-"गिलाणकिरियातीयं गीयत्था पच्चक्खावेंति दिने २ दव्वहासं करेता अंते य सव्वदव्वदायणाए भत्तवेरग्गं जणइत्ता भत्ते वितिण्हस्स भवचरिमपच्चक्खाणं कारवेंति" त्ति

तथा ('महाप्रत्याख्यान'मिति) महत्प्रत्याख्यानं यत्र वर्ण्यते तन्महाप्रत्याख्यानं, इह चूर्णिकारेण कृता भावना दर्श्यते-"थेरकप्पेण जिणकप्पेण वा विहरित्ता अंते थेरकप्पिया बारस वासे संलेहणं करेत्ता जिनकप्पिया पुन विहारेणेव संलीढा तहावि जहाजुत्तं संलेहणं करेत्ता निव्वाधायं सचेट्ठा चेव भवचरिमं पच्चक्खंति, एवं सवित्थरं जत्थज्झयणे वणिज्जइ तमज्झयणं महापच्चक्खाणं' (बृहट्टीकासत्कमेतत्) 'एवं तावदमूल्यध्ययनानि-एतान्यध्ययनानि जहाभिहाणत्थाणि भणियाणि' 'से त्त'मित्यादि, निगमनं, तदेतदुत्कालिकमुपलक्षणं चैतदिति उक्तमुत्कालिकं,

'से किं त'मित्यादि, अथ किं तत्कालिकं?, कालिकमनोकविधं प्रज्ञप्तं, तद्यथेत्यादि, 'उत्तराध्ययनानि' सर्वाण्यपि चाध्ययनानि प्रधानान्येव तथाऽप्यमून्येव रूढ्योत्तराध्ययन-शब्दवाच्यत्वेन प्रसिद्धानि 'दसाओ' इत्यादि प्रायो निगदसिद्धं, 'निशीथ'मिति निशीथवन्निशीथं, इदं प्रतीतमेव, तस्मात्परं यद्ग्रन्थार्थाभ्यां महत्तरं तन्महानिशीथं, तथा आवलिकाप्रविष्टानामितरेषां वा विमानानां वा प्रविभक्तिः-प्रविभजनं यस्यां ग्रन्थपद्धतौ सा विमानप्रविभक्तिः, सा चैका स्तोकग्रन्थार्था द्वितीया महाग्रन्थार्था, तत्राऽऽद्या क्षुल्लिका विमानप्रविभक्तिः द्वितीया महा-विमनाप्रविभक्तिः, तथा 'अङ्गचूलिके'ति अङ्गस्य-आचारादेश्चूलिकाऽङ्गचूलिका, चूलिका नाम उक्तानुक्तार्थसंग्रहात्मिका ग्रन्थपद्धतिः, तथा 'वर्गचूलिके'ति वर्गः-अध्ययनानां समूहो यथाऽन्तकृद्दशास्वष्टौ वर्ग्गा इत्यादि तेषां चूलिका, तथा व्याख्या-भगवती तस्याचूलिका

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्याख्याचूलिका, तथा 'अरुणोपपात' इति, अरुणो नाम देवः तद्वक्तव्यताप्रतिपादको यो ग्रन्थः परावर्त्त्यमानश्च तदुपपापहेतुः सोऽरुणोपपातः, तथा चात्र चूर्णिकारो भावनामकर्षित्-'जाहे तमज्झयणं उवउत्ते समाणे अनगारे परियट्टेइ ताहे से अरुणदेवे समयनिबद्धत्तणो चलियास-नसंभमुब्भंतलोयणे पउत्तावही वियाणियट्ठे पहट्ठे चलचललकुंडलधरे दिव्वाए जुईए दिव्वाए विभूईए दिव्वाए गईए जेणमेव से भयवं समणे निग्गंथे अज्झयणं परियट्टेमाणे अच्छइ तेनामेव उवागच्छइ, उवागच्छित्ता भत्तिभरोणयवयणे विमुक्कवरकुसुमगंधवासे ओवयइ, ओवइत्ता तहे से समणस्स पुरओ ठिच्चा अंतिट्ठिए(० रिक्खट्ठिए) कयंजली उवउत्ते संवेगविसुझमाणज्झवसाणे तं अज्झयणं सुणमाणे चिट्ठइ, समत्ते अज्झयणे भणइ-भवयं! सुसज्झाइयं २ नरं वरेहित्ति, ताहे से इहलोयनिप्पिवासे समतिणमुत्ताहललेट्ठुकंचणे सिद्धिवररमणिपडिबद्धनिब्भराणुरागे समणे पडिभणइ-न मे नं भो! वरेणं अट्ठोत्ति, ततो से अरुणे देवे अहिगयरजायसंवेगे पयाहिणं करेत्ता वंदइ नमंसइ वंदित्ता नमंसित्ता पडिगच्छइ" एवं गरुडोगपातादिष्वपि भावना कार्या,

तथा 'उत्थानश्रुत'मिति उत्थानम्-उद्वसनं तद्धेतुः श्रुतमुत्थानश्रुतं, तच्च शृङ्गनादिते कार्ये उपयुज्यते, अत्र चूर्णिकारकृता भावना-"सज्जोगस्स कुलस्स वा गामस्स वा नगरस्स वा रायहानीए वा समणे कयसंकप्पे आसुरुत्ते चंडक्किए अप्पसन्ने अप्पसन्नलेसे विसमासुहासणत्थे उवउत्ते समाणे उट्ठाणसुयज्झयणं परियट्टेइ तं च एक्कं दो व तिन्नि वा वारे ताहे से कुले वा गामे वा जाव रायहानी वा ओहयमनसंकप्पे बिलवंते दुयं २ पहावेंते उट्टेइ-उव्वसतित्ति भणियं होइ"त्ति, तथा 'समुत्थानश्रुत'मिति समुपस्थानं-भूयस्तत्रैव वासनं तद्धेतुः श्रुतं समुपस्थानश्रुतं, वकार-लोपाच्च सूत्रे समुट्ठाणसुयंति, पाठः, तस्य चेयं भावना-"तओ समत्ते कज्जे तस्सेव कुलस्स वा जाव रायहानीए वा से चेव समणे कयसंकप्पे तुट्ठे पसन्ने पसन्नलेसे समुसहासणत्थे उवउत्ते समाणे समुट्ठाणसुयज्झयणं परियट्टेइ, तं च एक्कं दो तिन्नि वा वारे ताहे से कुले वा गामे वा जाय रायहाणी वा पहट्ठचित्ते पसत्थं मंगलं कलयलं कुणमाणे मंदाए गईए सललियं आगच्छइ समुवट्ठिए-आवासइत्तिवुत्तं भवइ, सम्मं उ(मु) वट्ठाणसुयंति वत्तव्वे वकारलोवाओ समुट्ठाण-सुयंति भणियं, तहा जइ अप्पणावि पुव्वुट्ठियं गामाइ भवइ तहावि जइ से समणे एवंकयसंकप्पे अज्झयणं परियट्टेइ तओ पुनरवि आवासेइ" तथा

'नागपरियावणिय'त्ति नागाः-नागकुमारास्तेषां परिज्ञा यस्यां ग्रन्थपद्धतौ भवति सा नागपरिज्ञा, तस्याश्चेयं चूर्णिकृतोपदर्शिता भावना-"जाहे तं अज्झयणं समाणे निग्गथं परियट्टेइ ताहे अकयसंकप्पस्सवि ते नागकुमारा तत्थत्था चेव तं समणं परियाणंति-वंदंति नमंसंति बहुमानं च करेंति, सिंगनादितकज्जेसु य वरदा भवंति"

तथा 'निरयावलियाओ'त्ति, यत्रावलिकाप्रविष्या इतरे च नरकावासाः प्रसङ्गतस्तद्गामिनश्च नरास्तिर्यञ्चो वा वर्ण्यन्ते ता निरयावलिकाः, एकस्मिन्नपि ग्रन्थे वाच्ये बहुवचनशब्दः शक्ति-स्वाभाव्यात्, यथा पाञ्चाला इत्यादौ, तथा 'कल्पिका' इति् याः सौधर्म्मादिकल्पगतवक्तव्यता-गोचरा ग्रन्थपद्धतस्ताः कल्पिकाः, एवं कल्पावतंसिका द्रष्टव्याः, नवरं तासामियं चूर्णिकृतो-पदर्शिता भावना-'सोहम्मीसानकप्पेसु जाणि कप्पविमानानि ताणि कप्पवडिंसताणि जासु वण्णिज्जंति तेसु कप्पवडिसएसु विमानेसु देवी जा जेण तवोविसेसेण उववन्ना एयंपि वण्णिज्जइ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ताओ कप्पडिंसियाओ वुच्चंति' तथा 'पुष्पिता' इती यासु ग्रन्थपद्धतिषु गृहवासमुत्कलनपरित्यागेन प्राणिनः संयमभावपुष्पिताः सुखिता उषिता भूयः संयमभावपरित्यागो दुःखात्कवसांसिमुकुलेन मुकुलिताः पुनस्तत्परित्यागेन पुष्पिताः प्रतिपाद्यन्ते ताः पुष्पिता उच्यन्ते, अधिकृतार्थविशेष-प्रतिपादिकाः पुष्पचूडाः, तथा 'वृष्णिदशा' इति, 'नाम्न्युत्तरपदस्य वे'ति लक्षणवशादादिपद-स्यान्धकशब्दरूपस्य लोपः, ततोऽयं परिपूर्णः शब्दः-अन्धकवृष्णिदशा इति, अयं चान्वर्थः-अन्धकवृष्णिनराधिपकुले ये जातास्तेऽपि अन्धकवृष्णयः तेषां दशाः-अवस्थाश्चरितगतिसिद्धि-गमनलक्षणा यासु ग्रन्थपद्धतिषु वर्ण्यन्ते ता अन्धकवृष्णिदशाः, अथवाऽन्धवृष्णिवक्तव्यता-प्रतिपादिका दश-अध्ययनानि अन्धकवृष्णिदशाः, आह च चूर्णिकृत-"अंधकविण्हणो जे कुले अंधगसद्दलोवाओ वण्हिणो भणिया तेंसी चरियं गती सिज्झणा य जत्थ भणिया ता वण्हिसाओ, दसत्ति अवत्था अज्झयणा वा' इति।

'एवमाइया' इत्यादि, कियन्ति नामग्राहमाख्यातुं शक्यन्ते प्रकीर्ण्णकानि?, तत एवमादीनि चतुरशीतिः प्रकीर्ण्णकसहस्राणि भागवतोऽर्हतः श्रीऋषभस्वामिनस्तीर्थकृतः, तथा सङ्ख्येयानी प्रकीर्ण्णकसहस्राणि मध्यमानामजितादीनां जिनवरेन्द्राणां तीर्थकारणाम्, एतानि च यस्य यावन्ति भवन्ति तस्य तावन्ति प्रथमानुयोगतो वेदितव्यानि, तथा चतुर्द्दश प्रकीर्ण्णकसहस्राणि भगवतोऽर्हतो वर्द्धमानस्वामिनः, इयमात्र भावभा-

इह भागवत ऋषभस्वामिनश्चतुरशीतिसहस्रसङ्ख्याः श्रमणा आसीरन्, ततः प्रकीर्ण्णकरूपाणि चाध्ययनानि कालिकोत्कालिकभेदभिन्नानि सर्वसङ्ख्यया चतुरशीतिसहस्रसङ्ख्यान्यभवन्, कथमिति चेत्?, उच्यते, इह यदभगवदर्हदुपदिष् श्रुतमनुसृत्य भगवन्तः श्रमणा विरचयन्ति तत्सर्वं प्रकीर्ण्णकमुच्यते, अथवा श्रुतमनुसरन्तो यदात्मनो वचन कौशलेन धर्म्मदेशनादिषु ग्रन्थ-पद्धतीरूपतया भापन्ते तदपि सर्वं प्रकीर्ण्णकं, भगवत ऋषभस्वामिन उत्कृष्टा श्रमणसम्पदा आसीत् चतुरशीतिसहस्रप्रमाणा, ततो घटन्ते प्रकीर्ण्णकान्यपि भगवतश्चरशीतिसहस्रसङ्ख्यानि, एवं मध्यमतीर्थकृतामपि सङ्ख्येयानि प्रकीर्ण्णकसहस्राणि भावनीयानि, भगवतस्तु वर्द्धमान-स्वामिनश्चतुर्द्दश श्रमणसहस्राणि, तेन प्रकीर्ण्णकान्यपि भगवतश्चतुर्द्दश सहस्राणि। अत्र द्वे मते-एके सूरयः प्रज्ञापयन्ति-इ किल चतुरशीतिसहस्रादिक ऋषभादीन तीर्थकृतां श्रमणपरिमाणं प्रधानसूत्रविरचनसमर्थान् श्रमणानधिकृत्य वेदितव्यं, इतरथा पुनः सामान्यश्रमणाः प्रभूतता अपि तस्मिन् २ ऋषभादिकाले आसीरन्, अपरे पुनरेवं प्रज्ञापयन्ति-ऋषभादितीर्थकृतां जीवतामिदं चतुरशीतिसहस्रादिमं श्रमणपरिमाणं प्रवाहतः पुनरेकेकस्मिन् तीर्थे भूयांसः श्रमणा वेदितव्याः तत्र ये प्रधानसूत्रविरचनशक्तिसमन्विताः सुप्रसिद्धतदग्रन्था अतत्कालिका अपि तीर्थे वर्त्तमानास्तत्राधिकृता द्रष्टव्याः, एतदेव मतान्तरमुपदर्शयन्नाह-

'अथवे'त्यादि, अथवेति प्रकारान्तरोपदर्शने यस्य ऋषभादेस्तीर्थकृतो यावन्तः शिष्यास्तीर्थे औत्पत्तिक्या वैनयिक्या कर्म्मजया पारिणामिक्या चतुर्विधया बुद्ध्या उपेताः-समन्विता आसीरन् तस्य-ऋषभादेस्तावन्ति प्रकीर्ण्णकसहस्राण्यभवन्, प्रत्येकबुद्धा अपि तावन्त एव, अत्रैके व्याचक्षेते-इह एकैकस्य तीर्थकृतस्तीर्थेऽपरिमाणानि प्रकीर्ण्णकानि भवन्ति, प्रकीर्ण्णक-कारिणमपरिमाणत्वात्, केवलमिह प्रत्येकबुद्धरचितान्येव प्रकीर्ण्णकानि द्रष्टव्यानि, प्रकीर्ण्णक-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परिमाणेन प्रत्येकबुद्धपरिमाणप्रतिपादनात्, स्यादेतत्-प्रत्येकबुद्धान शिष्यभावो विरुध्यते तदेतदसमीची, यतः प्रव्राजकाचार्यमेवाधिकृत्य शिष्यमानवो निपिध्यते, न तु तीर्थकरोप-दिष्टशासनप्रतिपन्नत्वेनापि, ततो न कश्चिदोषः,

तथा च तेषां ग्रन्थः-''इह तित्थे अपरिमाणा पइन्नगा, पइन्नगसामिअपरिमाणत्तणओ, किं तु इह सुत्ते पत्तेयबुद्धपणीयं पइन्नगं भाणियव्वं, कम्हा ?, जम्हा पइन्नगपरिमाणेण चेव पत्तेय-बुद्धपरिमाणं कीरइ, (इति) भणियं 'पत्तेयबुद्धावि तत्तिया चेव'त्ति, चोयग आह-'ननु पत्तेयबुद्धा सिस्सभावो य विरुज्झए' आयरिओ आहतित्थयरपणीयसासनपडिवन्नत्तणओ तस्सीसा हवंती'ति, अन्ये पुनरेवमाहुः- सामान्येन प्रकीर्णकैस्तुल्यत्वात् प्रत्येकबुद्धानामत्राभिधानं, न तु नियोगतः प्रत्येकबुद्धरचितान्येव प्रकीर्णकानीति, 'सेत्त'मित्यादि, तदेतत्कालिकं, तेदतदावश्यकव्यति-रिक्तं, तदेतदनङ्गप्रविष्टमिति।

*मू. ( १३८ ) से किं तं अंगपविट्ठं ?, अंगपविट्ठं दुवालसविहं पन्नत्तं, तंजहा- आयारो १ सूयगडो २ ठाणं ३ समवाओ४ विवाहपन्नत्ती५ नायाधम्मकहाओ ६ उवासगदसाओ ७ अंतग-डदसाओ ८ अनुत्तरोववाइअदसाओ ९ पण्हावागरणाइं १० विवागसुअं ११ दिट्ठिवाओ १२,*

**वृ.** अथ किं तदङ्गप्रविष्टं ?, सूरिराह- अङ्गप्रविष्टं द्वादशविधं प्रज्ञप्तं, तद्यथा-'आचारः सूत्रकृत' मित्यादि,

*मू. ( १३९ ) से किं तं आयारे ?, आयारे नं समणाणं निग्गंथाणं आयारगोअरविनयवेनइय-सिक्खाभासाअभासाचरणकरणजायामायावित्तीओ आघविज्जंति, से समासओ पंचविहे पन्नत्ते, तंजहा- नाणायारे दंसणायारे चरित्तायारे तवायारे वीरियाआरे,*

*आयारे णं परित्ता वायणा संखेज्जा अनुओगदारा संखिज्जा वेढा संखेज्जा सिलोगा संखिज्जाओ निज्जुत्तीओ संखिज्जाओ पडिवत्तीओ, से णं अंगट्ठयाए पढमे अंगे, दो सुअक्खंधा, पणुवीसं अज्झयणा, पंचासीइ उद्देसणकाला, पंचासीई समुद्देसणकाला,*

*अट्ठारस पयसहस्साणि पयग्गेणं, संखिज्जा अक्खरा अनंता गमाअनंता पज्जवा परित्ता तसा अनंता थावरा सासयकडनिबद्धनिकाइआ जिनपन्नत्ता भावा आघविज्जंति परूविज्जंति दंसिज्जंति निदंसिज्जंति उवदंसिज्जंति , से एवं आया से एवं नाया एवं विन्नाया एवं चरणकरणपरूवणा आघविज्जइ, से तं आयारे।*

**वृ.** अथ किं तदाचार इति ?, अथवा कोऽयमाचारः ?, आचार्य आह-'आयारेण'मित्यादि, आचरणमाचारः आचर्यते इति वा आचारः, पूर्वपुरुषाचरितो ज्ञानाद्यासेवनविधिरित्यर्थः, तत्प्रति-पादको ग्रन्थोऽप्याचार एवोच्यते, अनेनाचारेण करणभूतेन अथवा आचारे-आधारभूते 'ण'मिति वाक्यालङ्कारे श्रमणानां प्रागनिरूपितशब्दार्थानां बाह्याभ्यन्तरग्रन्थरहितानाम्, आह- श्रमणा निर्ग्रन्था एव भवन्ति तत्किमर्थं निर्ग्रन्थानामिति विशेषणं ?, उच्यते, शाक्यादिव्यवच्छेदार्थं, शाक्यादयोऽपि हि लोके श्रमणा व्यपदिश्यन्ते, तदुक्तम्-''निग्गथं सक्क तावस गेरुय आजीव पंचहा समणा'' इति, तेषामाचारो व्याख्यायते, तत्राऽऽचारो-ज्ञानाचाराद्यनेकभेदभिन्नो गोचरो-भिक्षाग्रहणविधि-लक्षणः विनयो-ज्ञानादिविनयः वैनयिकं-विनयफलं कर्मक्षयादि शिक्षा-ग्रहणशिक्षा आसेवनशिक्षा च, विनेयशिक्षेति चूर्णिकृत्, तत्र विनेयाः-शिष्याः, तथा भाषा-सत्याऽसत्यामृषा च अभाषा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मृषा सत्यामृषा च, चरणं-व्रतादि, करणं-पिण्डविशुद्धादि, उक्तं च-

"वय (१) समणधम्म (१०) संजम (१७) वेयावच्चं (१०) च बंभगुत्तीओ (९)।
नाणाइतियं (३) तव (१२) कोहनिग्गहाई (४) चरणमेयं ॥
पिंडविसोही (४) समिई (५) भावन (१२) पडिमा (१२) य इंदियनिरोहो (५)।
पडिलेहण (२५) गुत्तीओ (३) अभिग्गहा (४) चेव करणं तु ॥"

'जायामायवित्तीउ'त्ति यात्रा संयममात्रा मात्रा-तदर्थमेव परिमिताहारग्रहणं वृत्तिः-विविधैरभिग्रहविशेषैर्वर्त्तनं, 'आचारश्च गोचरश्चे' त्यादिर्द्वन्दः, आचारगोचरविनयवैनयिकशिक्षा-भाषाऽभाषाचरणकरणयात्रामात्रावृत्तयः आख्यायन्ते, इह यत्र कचिदन्यतरोपादानेऽन्तर्गतार्थाभिधानं तत्सर्व्वं तत्प्राधान्यख्यापनार्थमवसेवं,

'से समासओ' इत्यादि, स आचारः 'समासतः' संक्षेपतः पञ्चविधः प्रज्ञप्तः, तद्यथा-'ज्ञानाचार' इत्यादि, तत्र ज्ञानाचारः-

"काले विनए बहुमानुवहाणे तह अनिण्हवणे।
वंजणअत्थतदुभए अट्ठविहो नाणमायारो ॥"

दर्शनाचारः-

"निस्संकिय निक्कंखिय निव्वितिगिच्छा अमूढदिट्ठी य।
उववूह थिरीकरणे वच्छल्लपभावणे अट्ठ ॥"

प्रभावकाश्चतीर्थस्वामी द्रष्टव्याः-

'अइसेस इड्ढियायरिय वाई धम्मकहिखवग नेमित्ति।
विज्जा रायागणसंमया य तित्थं पभावंति ॥"

चारित्राचारः-

'पणिहाणजोगजुत्तो पंचहिं समिईहिं तिहि उ गुत्तीहिं।
एस चरित्तायारो अट्ठविहो होइ नायव्वो ॥"

तपआचारः-

'बारसविहंमिवि तवे अब्भितरबाहिरे जिनुवइट्ठे।
अगिलाए अनाजीवी नायव्वो सो तवायारो ॥'

वीर्याचारः-

'अनिगूहिअबलविरिओ परक्कमइ जो जहुत्तमाउत्तो।
जुंजइ य जहाथामं नायव्वो वीरियायारो ॥'

'आयारेण'मित्यादि, आचारे 'ण'मिति वाक्यालङ्कारे 'परित्ता' परिमिता तं तं प्रज्ञापकं पाठकं चाधिकृत्याद्यन्तोपलब्धिः अथवा उत्सर्प्पिणीमवसर्प्पिणीं वा प्रतीत्य परीता वा द्रष्टव्याः, काऽसावित्याह-'वाचना' वाचना नाम सूत्रस्यार्थस्य वा प्रदानं, यदि पुनः सामान्यतः प्रवाहमधिकृत्य चिन्त्यते तदाऽनन्ता, तथा चाह चूर्णिकृत-"सुत्तस्य अत्थस्स वा पयाणं वायणा, सापरित्ता, अनंता न भवति, आइअंतोवलंभणओ, अहवा उस्सप्पिणीओसप्पिणीकालं पडुच्च परित्ता, तीयाना गयसव्वद्धं च पडुच्च अनंता" इति, तथा सङ्ख्येयान्यनुयोगद्वाराणि-उपक्रमादीनि,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तानि ह्यध्ययनमध्ययनं प्रति प्रवर्त्तन्ते, अध्ययनानि च सङ्ख्येयानीतिकृत्वा, तथा सङ्ख्येया वेढा, वेढो नाम छन्दोविशेषः, तथा सङ्ख्येयाः श्लोकाः-सुप्रतीताः, तथा सङ्ख्येया निर्युक्तयः, तथा सङ्ख्येयाः प्रतिपत्तयः, प्रतिपत्तयो नाम द्रव्यादिपदार्थाभ्युपगमाः प्रतिमाद्यभिग्रहविशेषा वा ताः सूत्रनिबद्धाः सङ्ख्येयाः, आह च चूर्णिकृत-''दव्वाइपयत्थब्भुवगमा पडिमादिभिग्गहविसेसा वा पडिवत्तीओ सुत्तपडिबद्धा संखेज्ज'' त्ति 'से ण' मित्यादि, स आचारो 'ण' मिति वाक्यालङ्कारे अङ्गार्थतयाअङ्गार्थत्वेन, अर्थग्रहणं परलोकचिन्तायां सूत्रादर्थस्य गरीयस्त्वख्यापनार्थं, अथवा सूत्रार्थोभयरूप आचार इति ख्यापनार्थं, प्रथममङ्गम्, एकारान्तता सर्वत्र मागधभाषालक्षणानुसरणाद्वेदितव्या, स्थापनामधिकृत्य प्रमणमङ्गमित्यर्थः,

तथा द्वौ श्रुतस्कन्धौ-अध्ययनसमुदायरूपौ, पञ्चविंशतिरध्ययनानि, तद्यथा-

''सत्थपरिन्ना (१) लोगविजओ (२) सीओसणिज्ज (३) संमत्तं (४)।
आवंति (५) धुय (६) विमोहो (७) महापरिन्नो (८) वहाणसुयं (९)॥''

एतानि नवाध्ययनानि प्रथमश्रुतस्कन्धे

''पिंडसण (१) सेज्जि (२) रिया (३) भासज्जाया (४) य वत्थ (५) पाएसा (६)।
उग्गहपडिमा (७) सत्तसत्तिक्कया (१४) य भावन (१५) विमुत्ती (१६)॥''

अत्र 'सेज्जिरिय' त्ति शय्याऽध्ययनमीर्याऽध्ययनं च 'वत्थपाएस' त्ति वस्त्रैषणाध्ययनं पात्रैषणाध्ययनं च, अमूनि षोडशाध्ययनानि द्वितीयश्रुतस्कन्धे, एवमेतानि निशीथवर्ज्जानि पञ्चविंशतिरध्ययनानि भवन्ति, तथा पञ्चाशीतरुद्देशनकालाः, कथमिति चेत्?, उच्यते, इहाङ्गस्य श्रुतस्कन्धस्याध्ययनस्योद्देशकस्य चैक एवोद्देशनकालः, एवं शस्त्रपरिज्ञायां सप्तोद्देशनकालाः लोकविजये षट् शीतोष्णीयाध्ययने चत्वारः सम्यक्त्वाध्ययने चत्वारः लोकसाराध्ययने षट् धुताध्ययने पञ्च विमोहाध्ययनेऽष्टौ महापरिज्ञायां सप्त उपधानश्रुते चत्वारः पिण्डैषणायामेकादश शय्यैषणाध्ययने त्रयः ईर्याध्ययने त्रयः भाषाध्ययने द्वौ वस्त्रैषणाध्ययने द्वौ पात्रैषणाध्ययने द्वौ अवग्रहप्रतिमाध्ययने द्वौ सप्त सप्तकिकाऽध्ययनेषु भावनायमेको विमुक्तावेकश्च, एवमेते सर्वेऽपि पिण्डिताः पञ्चाशीतिर्विभन्ति, अत्र संग्रहगाथा-

''सत्त य छ चउ चउरो य छ पंच अट्ठेव सत्त चउरो य।
एक्कार त्तिय तिय दो तिय दो सत्ते क्को (क्क) एक्को य॥''

एवं समुद्देशनकाला अपि पञ्चाशीतिर्भावनीयाः, तथा पदाग्रेहण-पदपरिमाणेनाष्टादश पदसहस्राणि, इह यत्रार्थोपलब्धिस्तत्पदं, अत्र पर आह-यदाऽऽचारे द्वौ श्रुतस्कन्धौ पञ्चविंशतिरध्ययनानि पदाग्रेण चाष्टादश पदसहस्राणि तर्हि यद् भणितं-''नवबंभचेरमइओ अट्ठारसपयसहस्सिओ वेओ'' इति तद्विरुध्यते, अत्र ही नवब्रह्मचर्याध्ययनमात्र एवाष्टादशपदसहस्रप्रमाण आचार उक्तः, अस्मिंस्त्वध्ययने श्रुतस्कन्धद्वयात्मकः पञ्चविंशत्यध्ययनरूपोऽष्टादशपदसहस्रप्रमाण इति, ततः कथं न परस्परविरोधः?, तदयुक्तं, अभिप्रायापरिज्ञानात्।

इह द्वौ श्रुतस्कन्धौ पञ्चविंशतिरध्ययनानि एतत्समग्रस्याचारस्य परिमाणयुक्तं, अष्टादश पदसहस्राणि पुनः प्रथमश्रुतस्कन्धस्य नवब्रह्मचर्याध्ययनस्य, विचित्रार्थनिबद्धानि हि सूत्राणि भवन्ति, अत एव चैषां सम्यगर्थावगमो गुरूपदेशतो भवति, नान्यथा, तथा चाह चूर्णिकृत्-''दो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सुयखंधा पणवीसं अज्झयणाणि एयं आयारग्गसहियस्स आयारस्स पमाणं भणियं, अट्ठारसपय-सहस्सा पुण पढमसुयक्खंधस्स नवबंभचेरमइयस्स पमाणं, विचित्तअत्थनिबद्धाणि य सुत्ताणि गुरूवएसओ सिं अत्थो जाणियव्वो''त्ति

तथा सङ्ख्येयानि अक्षराणि, पदानां सङ्ख्येयत्वात्, तथा 'अनंतागमा' इति इह गमाः-अर्थगमा गृह्यन्ते, अर्थगमा नाम अर्थपरिच्छेदाः, ते चानन्ताः, एकस्मादेव सूत्रादतिशायिमतिमेधादिगुणानां तत्तद्धर्म्मविशिष्टानन्तधर्मात्मकवस्तुप्रतिपत्तिभावात्, एतच्च टीकाकृतो व्याख्यानं, चूर्णिकृत् पुनराह-अभिधानाभिधेयवशतो गमा भवन्ति, ते चानन्ताः, अनेन च प्रकारेण ते वेदितव्याः, तद्यथा-'सुयं मे आउसंतेणं भगवया एवमक्खाय'मिति, इदं च सुधर्मस्वामी जम्बूस्वामिनं प्रत्याह तत्रायमर्थः-श्रुतं मया हे आयुष्यमन्! तेन-भगवता वर्द्धमानस्वामिना एवमाख्यातं, अथवा श्रुतं मया 'आयुष्मदन्ते' आयुष्यमतो-भगवतो वर्द्धमानस्वामिनोऽन्ते-समीपे 'ण'मिति वाक्यालङ्कारे, तथा च भगवता एवमाख्यातं, अथवा श्रुतं मयाऽयुष्मता, अथवा श्रुतं मया भगवत्पादारविन्द-युगलमामृशता, अथवा श्रुतं मया गुरुकुलवासमावसता, अथवा श्रुतं मया हे आयुष्यमन्! 'तेणं'ति प्रथमार्थे तृतीया तद् भगवता एवमाख्यातं, अथवा श्रुतं मयाऽयुष्मन्! 'तेणं'ति तदा भगवता एवमाख्यातं, अथवा श्रुतं मया हे आयुष्यमन्! 'ते नं'ति षड्जीवनिकायविषये तत्र वा विवक्षिते समवसरणे स्थितेन भगवता एवमाख्यातं, अथवा श्रुतं मम हे आयुष्यमन्! वर्त्तते, यतस्तेन भगवता एवमाख्यातं, एवमादयस्तं तमर्थमधिकृत्य गमा भवन्ति, अभिधानवशतः पुनरेवं गमाः-

''सुयं मे आउसं आउसं सुयं मे मे सुयं आउस'' मित्येवमर्थभेदेन तथा २ पदानां संयोज-नतोऽभिधानगमा भवन्ति, एवमादयः किल गमाः अनन्ता भवन्ति, तथा अनन्ताः पर्यायाः ते च स्वपरभेदभिन्ना अक्षरार्थगोचरा वेदितव्याः, तथा परीताः-परिमितास्त्रसा-द्वीन्द्रियादयः, अनन्ताः स्थावराः-वनस्पतिकायादयः, 'सासयकडनिबद्धनिकाइय'त्ति शाश्वता-धर्मास्तिकायादयः कृताः-प्रयोगविस्रसाजन्या घटसन्ध्याभ्ररागादयः, एते सर्वेऽपि त्रासदयो निबद्धाः-सूत्रे स्वरूपतः उक्ता निकाचिताः-निर्युक्तिसंग्रहणिहेतूदाहरणादिभिरनेकधा व्यवस्थापिता जिनप्रज्ञप्ता भावाः-पदार्थाः आख्यायन्ते-सामान्यरूपतया विशेषरूपतया वा कथ्यन्ते प्रज्ञाप्यन्ते-नामादिभेदोपन्यासेन प्ररूप्यन्ते नामादीनामेव भेदानां सप्रपञ्चस्वरूपकथनेन पृथग्विभक्ताः ख्याप्यन्ते प्रदर्श्यन्ते-उपमाप्रदर्शनेन यथा गौरिव गवय इत्यादि निदर्श्यन्ते-हेतुदृष्टान्तोपदर्शनेन उपदर्श्यन्ते-निगमनेन शिष्यबुद्धौ निःशङ्कं व्यवस्थाप्यन्ते।

साम्प्रतमाचाराङ्गग्रहणे फलं प्रतिपादयति-'से एव'मित्यादि, 'स' इति आचाराङ्गग्राह-कोऽभिसम्बध्यते, एवमात्मा-एवंरूपो भवति, अयमात्र भावः-अस्मिन्नाचाराङ्ग भावतः सम्यगधीते सति तदुक्तक्रियानुष्ठानपरिपालनात्साक्षान्मूर्त्त इवाऽऽचारो भवतीति, आह च टीकाकृत-''तदुक्तक्रियापरिणामाव्यतिरेकात्स एवाचारो भवतीत्यर्थः'' इति, तदेवं क्रियाम-धिकृत्योक्तं, सम्प्रति ज्ञानमधिकृत्याह-

'एवं नाय'त्ति यथाऽऽचाराङ्गे, निबद्धा भावास्तथा तेषां भावानां ज्ञाता भवति, तथा 'एवं विन्नाय'त्ति यथा निर्युक्तिसंग्रहणिहेतूदाहरणादिभिर्विविधं प्ररूपितास्तथा विविधं ज्ञाता भवति, एवं चरणकरणप्ररूपणाऽऽचारे आख्यायते, 'सेत्तं आयारे'त्ति सोऽयमाचारः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*मू. ( १४० ) से किं तं सूअगडे ?, सूअगडे णं लोए सूइज्जइ अलोए सूइज्जइ लोआलोए सूइज्जइ जीवा सूइज्जंति अजीवा सूइज्जंति जीवाजीवा सूइज्जंति ससमए सूइज्जइ परसमए सूइज्जइ ससमयपरसमए सूइज्जइ, सूअगडे णं असीअस्स किरियावाइसयस्स चउरासीइए अकिरिआवाईणं सत्तट्ठीए अन्नाणि अवाईणं बत्तीसाए वेणइअवाईणं तिण्हं तेसट्ठाणं पासंडि-असयाणं वूहं किच्चा समसए ठाविज्जइ,*

*सूअगडे णं परित्ता वायणा संखिज्जा अनुओगदारा सखेज्जा वेढा संखेज्जा सिलोगा संखिज्जाओ निज्जुत्तीओ संखिज्जाओ पडिवत्तीओ,*

*से णं अंगट्ठयाए बिइए अंगे दो सुअक्खंधा तेवीसं अज्झयणा तित्तीसं उद्देसणकाला तित्तीसं समुद्देसणकाला छत्तीसं पयसहस्साणि पयग्गेणं संखिज्जा अक्खरा अनंता गमा अनंता पज्जवा परित्ता तसा अनंता थावरा सासयकडनिबद्धनिकाइया जिनपन्नत्ता भावा आघविज्जंति परू-विज्जंति दंसिज्जंति निदंसिज्जंति उवदंसिज्जंति,*

*से एवं आया से एवं नाया से एवं विन्नाया एवं चरणकरणपरूवणा आघविज्जइ सेत्तं सूअगडे॥*

**वृ.** 'से किं त'मित्यादि, अथ किं तत्सूत्रकृतं ?, 'सूच पैशून्ये' सूचनात्सूत्रं निपातना-द्रूपनिष्पत्तिः, भावप्रधानश्चायं सूत्रशब्दः, ततोऽयमर्थः-सूत्रेण कृतं, सूत्ररूपतया कृतमित्यर्थः, यद्यपि च सर्वमङ्गं सूत्ररूपतया कृतं तथापि रूढिवशादेतदेव सूत्रकृतमुच्यते, न शेषमङ्गं, आचार्य आह-सूत्रकृतेन अथवा सूत्रकृते 'ण'मिति वाक्यालङ्कारे लोकः सूच्यते इत्यादि निगदसिद्धं यावत् 'असीयस्स किरियावाइसयस्से'त्यादि, अशीत्यधिकस्य क्रियावादिशतस्य चतुरशीतेर-क्रियावादिनां सप्तषष्टेरज्ञानिकानां द्वात्रिंशतो वैनयिकानां सर्वसङ्ख्यया त्रयाणां त्रिषष्ट्यधिकानां पाखण्डिशतानां 'व्यूह' प्रतिक्षेपं कृत्वा स्वसमयः स्थाप्यते।

तत्र न कर्त्तारमन्तरेण क्रिया पुण्यबन्धादिलक्षणा सम्भवति तत एवं परिज्ञाय तां क्रियाम्-आत्मसमवायिनीं वदन्ति तच्छीलाश्च ये ते क्रियावादिनः, ते पुनरात्माद्यस्तित्वप्रतिपत्ति-लक्षणेनामुनोपायेनाशीत्यधिकशतसङ्ख्या विज्ञेयाः जीवाजीवाश्रवबन्धसंवरनिर्जरापुण्या-पुण्यमोक्षरूपान् नव पदार्थान् परिपाट्य पट्टिकादौ विरचय्य जीवपदार्थस्याधः स्वपरभेदावु-पन्यसनीयौ, तयोरधो नित्यानित्यभेदौ, तयोरप्यधः कालेश्वरात्मनियतिस्वभावभेदाः पञ्चन्यसनीयाः, पुनश्चैवं विकल्पाः कर्त्तव्याः, तद्यथा-अस्ति जीवः स्वतो नित्यः कालत इत्येको विकल्पः, अस्य च विकल्पस्यायमार्थः-विद्यते खल्वयमात्मा स्वेन रूपेण नित्यश्च कालतः कालवादिनो मते, कालवादिनश्च नाम ते मन्तव्या य कालकृतमेव सर्वं जगत् मन्यन्ते, तथा च ते आहुः-न कालन्तरेण चम्पकाशोकसहकारादिवनस्पतिकुसुमोद्गमफलबन्धादयो हिमकणानुषक्तशीत-प्रपातनक्षत्रगर्भाधानवर्षादयो वा ऋतुविभागसम्पादिता बालकुमारयौवनवलिपलितागमादयो वाऽवस्थाविशेषा घटन्ते, प्रतिनियमतकालविभाग एव तेषामुपलभ्यमानत्वात्, अन्यथा सर्व-मव्यवस्थया भवेत्, न चैतद् दृष्टमिष्टं वा, अपिच-मुदगपक्तिरपि न कालमन्तरेण लोके भवन्ति दृश्यते, किन्तु कालक्रमेण, अन्यथा स्थालीन्धनादिसामग्रीसम्पर्कसम्भवे प्रथमसमयेऽपि तस्या भावप्रसङ्गो, न च भवति, तस्माद्यद्यत्कृतकं तत्सर्वं कालकृतमिति, तथा चोक्तम्-

''न कालव्यतिरेकेण, गर्भबालशुभादिकम्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यत्किञ्चिज्जायते लोके, तदसौ कारणं किल ॥१॥
किञ्च कालादृते नैव, मुद्गपक्तिरपीक्ष्यते।
स्थाल्यादिसन्निधानेऽपि, ततः कालादसौ मता ॥२॥
कालाभावे च गर्भादि, सर्वं स्यादव्यवस्थया।
परेष्टहेतुसद्भावमात्रादेव तदुद्भवात् ॥३॥
कालः पचति भूतानि, कालः संहरति प्रजाः।
कालः सुप्तेषु जागर्त्ति, कालो हि दुरतिक्रमः ॥४॥"

अत्र 'परेष्टहेतुसद्भावमात्रादि'ति पराभिमतवनितापुरुषसंयोगादिमात्ररूपहेतुसद्भावमात्रादेव 'तदुद्भवादि'ति गर्भाद्युद्भवप्रसङ्गादिति, तथा कालः पचति-परिपाकं नयति परिणतिं नयति 'भूतानि' पृथिव्यादीनि, तथा कालः संहरति प्रजाः-पूर्वपर्यायात् प्रच्याव्य पर्यायान्तरेण प्रजालोकान् स्थापयति, तथा कालः सुप्तेषु जनेषु जागर्त्ति, काल एवं तं तं सुप्तं जनमापदो रक्षतीति भावः, तस्माद् हिः-स्फुटं दुरतिक्रमः अपाकर्तुमशक्यः काल इति।

उक्तेनैव प्रकारेण द्वितीयोऽपि विकल्पो वक्तव्यो, नवरं कालवादिन इति वक्तव्ये ईश्वरवादिन इति वक्तव्यं, तद्यथा-अस्ति जीवः स्वतो नित्य ईश्वरतः, ईश्वरवादिनश्च सर्वं जगदीश्वरकृतं मन्यन्ते, ईश्वरं च सहसिद्धज्ञानवैराग्यधर्म्मैश्वर्यरूपचतुष्टयं प्राणिनां स्वर्गापवर्गयोः प्रेरकमिति, तदुक्तम्-

"ज्ञानमप्रतिघं यस्य, वैराग्यं च जगत्पतेः
ऐश्वर्यं चैव धर्म्मश्च, सहसिद्धं चतुष्टयम् ॥१॥
अन्यो (ज्ञो) जन्तुरनीशोऽयमात्मनः सुखदुःखयो।
ईश्वरप्रेरितो गच्छेत्स्वर्गं वा श्वभ्रमेण वा ॥२॥"

इत्यादि, एवं तृतीयो विकल्प आत्मवादिनां, आत्मवादिनो नाम 'पुरुष एवेदं सर्व' मित्यादि प्रतिपन्नाः। चतुर्थो विकल्पो नियतिवादिनां, ते ह्येवमाहुः-नियतिर्नाम तत्त्वान्तरमस्ति यद्वशादेते भावाः सर्वेऽपि नियतेनैवरूपेण प्रादुर्भावमश्नुवते, नान्यथा, तथाहि-यद्यदा यतो भवति तत्तदा तत एव नियतेनैव रूपेण भवदुपलभ्यते, अन्यथा कार्यकारणभावव्यवस्था प्रतिनियतरूपव्यवस्था च न भवेत्, नियामकाभावात्, तत एव कार्यनैयत्यतः प्रतीयमानामिमां नियतिं को नाम प्रमाणकुशलो बाधितुं क्षमते ?, मा प्रापदन्यत्रापि प्रमाणपथव्याघातप्रसङ्गः, तथा चोक्तम्-

"नियतेनैव रूपेण, सर्वे भावा भवन्ति यत्।
ततो नियतिजा ह्येते, तत्स्वरूपानुवेधतः ॥१॥
यद्यदैव यतो यावत्तत्तदैव ततस्तथा।
नियतं जायते न्यायात् (नान्यात्), क एनां बाधितुं क्षमः ? ॥२॥"

पञ्चमो विकल्पः स्वभाववादिना, ते हि स्वभाववादिन एवमाहुः-इह सर्वे भावाः स्वभाववशादुपजायन्ते, तथाहि-मृदः कुम्भो भवति न पटादि, तन्तुभ्योऽपि पट उपजायते न कुम्भादि, एतच्च प्रतिनियतभवनं न तथास्वभावतामन्तरेण घटाकोटीसण्डङ्कमाटीकते, तस्मात् सकलमिदं स्वभावकृतमवसेयं, अपिच-आस्तामन्यत् कार्यजातं इह मुद्गपक्तिरपि न स्वभावमन्तरेण भवितुमर्हति, तथाहि-स्थालीन्धनकालादिसामग्रीसम्भवेऽपि न काङ्कटुकमुद्गानां पक्तिरुप-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लभ्यते, तस्माद्यद्यद्भावे भवति यदभावे च न भवति तत्तदन्वयव्यतिरेकानुविधायि तत्कृतमिति स्वभावकृता मुद्गपक्तिरप्येष्टव्या, ततः सकलमेवेदं वस्तुजातं स्वभावहेतुकमवसेयमिति।

तत एवं स्वत इति पदेन लब्धाः पञ्च विकल्पाः, एवं परत इत्यनेनापि पञ्च लभ्यन्ते, परत इति-परेभ्यो व्यावृत्तेन रूपेण विद्यते खल्वयमात्मेत्यर्थः, एवं नित्यत्वापरित्यागेन दश विकल्पा लब्धाः, एवमनित्यपदेनापि दश, सर्वे मिलिता विंशति, एते च जीवपदार्थेन लब्धाः, एवमजीवादिष्वष्टसु पदार्थेषु प्रत्येकं विंशतिविंशतिर्विकल्पा लभ्यन्ते, ततो विंशतिर्नवगुणिताः शतमशीत्युत्तरं क्रियावादिनां भवति।

तथा न कस्यचित्प्रतिक्षणमनवस्थितस्य पदार्थस्य क्रिया सम्भवति उत्पत्त्यनन्तरमेव विनाशादित्येवं ये वदन्ति तेऽक्रियावादिनः, तथा चाहुः एके-

"क्षणिकाः सर्वसंस्कारा, अस्थिराणां कुतः क्रिया ?।
भूतिर्येषां क्रिया सैव, कारकं सैव चोच्यते ॥"

एते चात्मादिनास्तित्वप्रतिपत्तिलक्षणा अमुनोपायेन चतुरशीतीसङ्ख्या द्रष्टव्याः, पुण्यापुण्य-वर्जितशेषजीवाजीवादिपदार्थसप्तकन्यासस्तथैव च जीवादिसप्तकस्याधः प्रत्येकं स्वपरवि-कल्पोपादानं, असत्त्वादात्मनो नित्यानित्यविकल्पौ न स्तः, कालादीनां च पञ्चानामधस्तात्षष्ठी यदृच्छा न्यस्यते, इह यदृच्छावादिनः सर्वेऽप्यक्रियावादिन एव न केचिदपि क्रियावादिनः ततः प्राक् यदृच्छा नोपन्यस्ता, तत एवं विकल्पाभिलापः-नास्ति जीवः स्वतः कालत इति इत्येको विकल्पः, एवमीश्वरादिभिरपि यदृच्छापर्यन्तैः, सर्वे मिलिताः षड् विकल्पाः, अमीषां च विकल्पानामार्थः प्राग्वद्भावनीयः, नवरं यदृच्छात इति यदृच्छावादिनां मते, अथ के ते यदृच्छावादिनः ?, उच्यते, इह ये भावानां सन्तानापेक्षया न प्रतिनियतं कार्यकारणभावमिच्छन्ति किन्तु यदृच्छया ते यदृच्छावादिनः, तथा च ते एवमाहुः-

"न खलु प्रतिनियतो वस्तूनां कार्यकारणभावः, तथाप्रमाणेनाग्रहणात्, तथाहि-शालूकादपि जायते शालूको गोमयादपि जायते शालूकः वह्नेरपि वह्निरुपजायते अरणिकाष्ठादपि धूमादपि जायते धूमोऽग्नीन्धनसम्पर्कादपि जायते कन्दादपि जायते कदली बीजादपि वटादयो बीजादुप-जायन्ते शाखैकदेशादपि, ततो न प्रतिनियतः क्वचिदपि कार्यकारणभाव इति यदृच्छातः क्वचि-त्किञ्चिद्भवतीति प्रतिपत्तव्यं, न खल्वन्यथा वस्तुसद्भावं पश्यन्तोऽन्यथाऽऽत्मानं प्रेक्षावन्तः परिक्लेशयन्तीति, यथा च स्वतः, षड्विकल्पा लब्धाः तथा नास्ति परतः कालत इत्येवमपि षड्विकल्पा लभ्यन्ते, सर्वेऽपि मिलिता द्वादश विकल्पा जीवपदे लब्धाः, एवमजीवादिषु षट्सु पदार्थेषु प्रत्येकं द्वादश २ विकल्पा लभ्यन्ते ततो द्वादशभिः सप्त गुणिताश्चतुरशीतिर्भवन्ति अक्रियावादिनां विकल्पाः।

तथा कुत्सितं ज्ञानमज्ञानं तदेषामस्तीति अज्ञानिकाः, 'अतोऽनेकस्वारा'दिति मत्वर्थीत एकप्रत्ययः, अथवाऽज्ञानेन चरन्तीति अज्ञानिकाः-असञ्चिन्त्यकृतबन्धवैफल्यादिप्रति-पत्तिलक्षणाः, तथाहि ते एवमाहुः-न ज्ञानं श्रेयः, तस्मिन् सति परस्परं विवादयोगतश्चित्तकालु-ष्यादिभावतो दीर्घतरसंसारप्रवृत्तेः, तथाहि-केनचित्पुरुषेणान्यथा देशिते सति वस्तुनि विवक्षितो ज्ञानी ज्ञानगर्वाध्मातरमानसस्तस्योपरि कलुषचित्तस्तेन सह विवादमारमते, विवादे च क्रियमाणे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तीव्रतीव्ररचित्तकालुष्यभाव(स्त)तोऽहङ्कारः ततश्च प्रभूततराशुभकर्मबन्धसम्भवः, तस्माच्च दीर्घतरः संसारः, तथा चोक्तम्-

"अन्नेण अन्नहा देसियंमि भावंमि नाणगव्वेणं।
कुणइ विवायं कलुसियचित्तो तत्तो य से बंधो ॥"

यदा पुनर्न ज्ञानमाश्रीयते तदा नाहङ्कारसम्भवो नापि परस्योपरि चित्तकालुष्यभावः, ततो न कर्मबन्धसम्भवः, अपिच-सञ्चिन्त्य क्रियते कर्मबन्धः, स दारुणविपाकः, अत एव चावश्यंवेद्यः, तस्य तीव्राध्यवसायतो निष्पन्नत्वात्, यस्तु मनोव्यापारमन्तरेण कायवाक्कर्मवृत्तिमात्रतो विधीयते न तत्र मनसोऽभिनिवेशस्ततो नासाववश्यंवेद्यो, नापि तस्य दारुणो विपाकः, केवलमतिशुष्क-सुधापङ्कधवलितभित्तिगतरजोमल इव स कर्मसङ्गः स्वत एव शुभाध्यवसायपवनविक्षोभि-तोऽपयाति, मनसोऽभिनिवेशाभावश्चाज्ञानाभ्युपगमे समुपजायते, ज्ञाने सत्यभिनिवेशसम्भवात्, तस्मादज्ञानमेव मुमुक्षुणा मुक्तिपथप्रवृत्तेनाभ्युपगन्तव्यं न ज्ञानमीति, अन्यच्च-भवेद्युक्तो ज्ञानस्याभ्युपगमो यदि ज्ञानस्य निश्चयः कर्त्तुं पार्येत यावता स एव न पार्यते, तथाहि-सर्वेऽपि दर्शनिनः परस्परं भिन्नमेव ज्ञानं प्रतिपन्नाः ततो न निश्चयः कर्त्तुं शक्यते-किमिदं ज्ञानं सम्यग् नेदमिति ?, उक्तं च-

"सव्वे य मिहो भिन्नं नाणं इह नाणिणो जओ बिंति।
तीरइ न तओ काउं विनिच्छओ एवमेयंति ॥"

अथोच्येत-इह यत्सकलवस्तुस्तोमसाक्षात्कारिभगवदुपदेशादुपजायते ज्ञानं तत्सम्यग् नेतरत्, असर्वज्ञमूलत्वादिति, सत्यमेतत्, किन्तु स एव सकलवस्तुस्तोमसाक्षात्कारीति कथं ज्ञायते ?, तद्ग्राहकप्रमाणाभावात्, अपिच-सुगतादयोऽपि सौगतदिभिः सकलवस्तुस्तोमसाक्षात्कारिण इष्यन्ते, तत्किं सुगतादिः सकलवस्तुस्तोमसाक्षात्कारीति प्रतिपद्यतामस्वाभिः किंवा भगवद्व-र्द्धमानस्वामीति तदवस्थ एव निश्चयाभावः ?, स्यादेतत्-किमत्र संशयेन ?, यस्य पादारविन्दयुगलं प्रणिणंसवो दिवौकसः परस्परमहमहमिकया विशिष्टविशिष्टरविभूतिद्युतिपरिकलिताः शत-सहस्रसङ्ख्येन विमाननिवहेन सकलमपि नभोमण्डलमाच्छादयन्तो महीमवतीर्य पूजादिक-मातन्वन्ति स्म च भगवान् वर्द्धमानस्वामी सर्वज्ञो न शेषाः सुगतादयः, मनुष्या हि मूढमनस्का अपि सम्भाव्यन्ते न देवाः, ततो यदि शेषा अपि सुगतादयः सर्वज्ञा अभविष्यन् तर्हि तेषामपि देवाः पूजामकरिष्यन् न च कृतवन्तस्तस्मान्न ते सर्वज्ञाः तदेतत्स्वदर्शनानुरागतरलितमन-स्कतासूचकं, यतो वर्द्धमानस्वामिनो दिवः समागत्य देवास्तथा पूजां कृतवन्त इत्येतदपि कथमवीसयते ?, भगवतश्चिरातीतत्वेनेदानीं तद्भावग्राहकप्रमाणाभावात्, सम्प्रदायादवसीयते इति चेत् ननु सोऽपि सम्प्रदायो न धूर्त्तपुरुषप्रवर्त्तितः किन्तु सत्यपुरुषप्रवित्तत एवेति कथमवगन्तव्यं ?, तद्ग्राहकप्रमाणाभावात्, न चाप्रमाणकं वयं प्रतिपत्तुं क्षमाः, मा प्रापद-प्रेक्षावत्ताप्रसङ्गः, अन्यच्च-मायाविनः स्वयमसर्वज्ञा अपि जगति स्वस्य सर्वज्ञभावं प्रचिकट-यिषवस्तथाविधेन्द्रजालवशाद्दर्शयन्ति देवानितस्ततः सञ्चरतः स्वस्य च पूजादिकं कुर्वतः, ततो देवागमदर्शनादपि कथं तस्य सर्वज्ञत्वनिश्चयः ?, तथा चाह भावत्क एव स्तुतिकारः समन्तभद्रः -



Jain Education International For Private & Personal Use Only www.jainelibrary.org

"देवागमनभोयानच्चामरादिविभूतयः।
मायाविष्वपि दृश्यन्ते, नातस्त्वमसि नो महान्॥"

भवतु वा वर्द्धमानस्वामी सर्वज्ञः तथापि तत्सत्कोऽयमाचारादिक उपदेशो न पुनः केनापि धूर्त्तेन स्वयं विरचय्य प्रवर्त्ति इति कथमवसेयं?, अतीन्दियत्वेनैतद्विषये प्रमाणाभावात्, अथवा भवत्वेषोऽपि निश्चयो यथाऽयमाचारादिके उपदेशो वर्द्धमानस्वामिन इति, तथापि तस्योपदेशस्यायमर्थो नान्य इति न शक्यः प्रत्येतुं, नानार्था हि शब्दा लोके प्रवर्त्तन्ते, तथादर्शनात्, ततोऽन्यथाऽप्यर्थसम्भावनायां कथं विवक्षितार्थनियमनिश्चयः?, अथ मन्येथास्तदात्वे तत एव सर्वज्ञात् साक्षाच्छ्रवणतो गौतमादेरर्थनियमनिश्चयोऽभूत तत आचार्यपरम्परयेदानीमपि भवतीति, तदप्युक्तं, यतो नाम गौतमादिरपि छद्मस्थः, छद्मस्थस्य च परचेतोवृत्तिरप्रत्यक्षा, तस्या अतीन्द्रियत्वेनैतद्विषये चक्षुरादीन्द्रियप्रत्यक्षप्रवृत्तेरभावात्, अप्रत्यक्षायां च सर्वज्ञस्य विवक्षायां कथमिदं ज्ञायते-एष सर्वज्ञस्याभिप्रायोऽनेन चाभिप्रायेण शब्दः प्रयुक्तो नाभिप्रायान्तरेण?, तत एवं सम्यक्परिज्ञानाभावात् यामेव वर्णावलीमुक्तवान् भगवान् तामेव केवलां पृष्ठतो लग्नो गौतमादिरभिभाषते, न पुनः परमार्थतस्तस्योपदेशस्यार्थमवबुध्यते, यथाऽऽर्यदेशोत्पन्नोक्तस्यानुवादकोऽपरिज्ञातशब्दार्थो म्लेच्छः, उक्तं च-

"मिलक्खू अमिलक्खुस्स, जहा वुत्तानुभासए।
न हेउं से वियाणाइ, भासियं तऽनुभासए॥१॥
एवमन्नाणिया नाणं, वयंता भासियं सयं।
निच्छयत्थं न याणन्ति, मिलक्खू अबोहिए॥२॥"

तदेवं दीर्घतरसंसारकारणत्वात् सम्यग्निश्चयाभावाच्च न ज्ञानं श्रेयः, किन्त्वज्ञानमेवेति स्थितं, ते चाज्ञानिकाः सप्तषष्टिसङ्ख्या अमुनोपायेन प्रतिपत्तव्याः, इह जीवाजीवादीन् नव पदार्थान् क्वचित्पट्टिकादौ व्यवस्थाप्य पर्यन्ते उत्पत्तिः स्थाप्यते, तेषां च जीवाजीवादीनां नवानां पदार्थानां प्रत्येकमधः सप्त सत्त्वादयो न्यस्यन्ते, तद्यथा-सत्त्वमसत्त्वं सदसत्त्वमवाच्यत्वं सदवाच्यत्वमसदवाच्यत्वं सदसदावाच्यत्वं चेति।

तत्र सत्त्वं स्वरूपेण विद्यमानत्वं, असत्त्वं पररूपेणविद्यमानत्वं, सदसत्त्वं स्वरूपपररूपाभ्यां विद्यमानाविद्यमानत्वं, तत्र यद्यपि सर्वं वस्तु स्वरूपपररूपाभ्यां सर्वदैव स्वभावत एव सदसत् तथापि कचित् किञ्चित्कदाचिदुद्भूतं प्रमात्रा विवक्ष्यते तत एवं त्रयो विकल्पा भवन्ति, तथा तदेव सत्त्वमसत्त्वं च यदा युगपदेकेन शब्देन वक्तुमिष्यते तदा तद्वाचकः शब्दः कोऽपि न विद्यते इति अवाच्यत्वं, एते चत्वारोऽपि विकल्पाः सकलादेश इति गीयन्ते, सकलवस्तुविषयत्वात्, यदा त्वेको भागः सन्नपरश्चावाच्यो युगपद्विक्ष्यते तदा सदवाच्यत्वं यदा त्वेको भागोऽसन्नपरश्चावाच्यस्तदाऽसदवाच्यत्वं, यदा त्वेको भागः सन्नपरश्चासन् परतश्चावाच्यस्तदा सदसदवाच्यत्वमिति, न चैतेभ्यः सप्तविकल्पेभ्योऽन्यो विकल्पः सम्भवति, सर्वस्यैतेष्वेव मध्येऽन्तर्भावात्, ततस्सप्त विकल्पा उपन्यस्ताः, सप्त विकल्पा नवभिर्गुणिता जातास्त्रिषष्टिः, उत्पत्तेश्चत्वार एवाऽऽद्या विकल्पाः, तद्यथा-सत्त्वमसत्त्वं सदसत्त्वमवाच्यत्वं चेति, एते चत्वारोऽपि विकल्पास्त्रिषष्टिमध्ये प्रक्षिप्यन्ते ततः सप्तषष्टिर्भवति, तत्र को जानाति जीवः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संनित्येको विकल्पः, न कश्चिदपि जानाति, तद्ग्राहप्रमाणाभावादिती भावः, ज्ञातेन वा किं तेन प्रयोजनं ?, ज्ञानस्याभिनिवेशहेतुतया लोके प्रतिपन्थित्वात्, एवमसदादयाऽपि विकल्पा भावनीयाः, उत्पत्तिरपि किं सतोऽसतः सदसतोऽवाच्यस्य वेति को जानाति ?, ज्ञातेन वा किं ?, न कश्चिदपि प्रयोजनमिति ॥

तथा विनयेन चरन्तीति वैनयिकाः एते चानवधृतलिङ्गाचारशास्त्रा विनयप्रतिपत्तिलक्षणा वेदितव्याः, ते च द्वात्रिंशत्सङ्ख्या अमुनोपायेन द्रष्टव्याः-सुरनृपतियतिज्ञातिस्थविराधममातृपितृरूपेष्वष्टसु स्थानेषु कायेन वाचा मनसा दानेन देशकालोपपन्नेत विनयः कार्य इति चत्वारः कायादयः स्थाप्यन्ते, चत्वारश्चाष्टभिर्गुणिना जाता द्वात्रिंशत् ॥

एतेषां च त्रयाणां त्रिषष्ट्यधिकानां पाखण्डिकशतानां प्रतिक्षेपः सूत्रकृताङ्गे शेषेषु च प्रकरणेषु पूर्वाचार्यैरनेकधा युक्तिभिः कृतस्ततो वयमपि स्थानाशून्यार्थं पूर्वाचार्यकृतं तेषां प्रतिक्षेपं संक्षेपतो दर्शयामः-तत्र ये कालवदानिः सर्वं कालवादिनः सर्वं कालकृतं मन्यन्ते तान् प्रति ब्रूमः कालो नाम किमेवस्वभावो नित्यो व्यापी ? किंवा समयादिरूपतया परिणामि ?, तत्र यद्याद्यः पक्षः तदयुक्तं तथाभूतकालग्राहकप्रमाणाभावात्, न खलु तथाभूतं कालं प्रत्यक्षेणोपलभामाहे, नाप्यनुमानेन, तदविनाभाविलिङ्गगाभावात्, अथ कथं तदविनाभाविलिङ्गाभावो ?, यावता दृश्यते भरतमादिषु पूर्वापरव्यवहारः, स च न वस्तुस्वरूपमात्रनिमित्तो, वर्त्तमानो च काले वस्तुस्वरूप विद्यमानतया तथाव्यवहारप्रवृत्तिप्रसक्तेः, ततो यन्निमित्तोऽयं भरतरामादिषु पूर्वाव्यवहारः स काल इति, तथाहि-पूर्वकालयोगी पूर्वो भारत चक्रवर्ती अपरकालयोगी चापरो रामादिरिति, ननु यदि भरतरामादिषु पूर्वापरकालयोगतः पूर्वापरव्यवहारस्तर्हि कालस्यैव कथं स्वयं पूर्वापरव्यवहारः ?, तदन्यकालयोगादिति चेत्, न, तत्रापि स एव प्रसङ्ग इत्यनवस्था, अथ मा भूदेष दोष इति तस्य स्वयमेव पूर्वत्वमपरत्वं चेष्यते नान्यकालयोगादिति, तथा चोक्तम्-

"पूर्वकालादियोगी यः, स पूर्वाद्यपदेशभाक् ।
पूर्वापरत्वं तस्यापी, स्वरूपादेव नान्यतः ॥"

तदप्यकण्ठपीतासवप्रलापदेशीयं, यत एकान्तेनैको व्यापी नित्यः कालोऽभ्युपगम्यते, ततः कथं तस्य पूर्वादित्वसम्भवः ?, अथ सहचारिसम्पर्कवशादेकस्यापि तथात्वकल्पना, तथाहि-सहचारिणो भरतादयः पूर्वाः अपरे च रामादयोऽपरास्ततस्तत्सम्पर्कवशात्कालस्यापि पूर्वापरव्यपदेशः, भवति च सहचारिणो व्यपदेशो यथा मञ्चाः क्रोशन्तीति, तदेतदपि बालिशजल्पितम्, इतरेतराश्रयदोषपसङ्गात्, तथाहि-सहचारिणां भरतादीनां पूर्वादित्वं कालगतपूर्वादित्वयोगात् कालस्य च पूर्वादित्यं सहचारिभरतादिगतपूर्वादित्ययोगतः, तत एकासिद्धावन्यतरस्याप्यसिद्धिः, उक्तं च-

"एकत्वव्यापितायां हि, पूर्वादित्वं कथं भवेत् ? ।
सहचारिवशात्तच्चेदन्योऽन्याश्रयताऽऽगमः ॥१॥
सहचारिणां हि पूर्वत्वं, पूर्वकालसमागमात् ।
कालस्य पूर्वादित्वं च, सहचार्यवियोगतः ॥२॥"

प्रागसिद्धावेकस्य कथमन्यस्य सिद्धिरिति तन्नायं पक्षः श्रेयान्, अथ द्वितीयः, पक्षः, सोऽप्यु-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्तो, यतः समयादिरूपे परिणामिनि कालेऽविशिष्टेऽपि फलवैचित्र्यमुपलभ्यते, तथाहि-समकालमारभ्यमाणाऽपि मुद्गपक्तिरविकला कस्यचिद् दृश्यते अपरस्य तु कालान्तरेऽपि न, ता समकालमेकस्मिन्नेव राजनि सेव्यमाने सेवकस्यैकस्य फलमचिराद् भवति अपरस्य तु कालान्तरेऽपि न, तथा समकालमपि क्रियमाणे कृष्यादिकर्म्मण्येकस्य परिपूर्णा धान्यसम्पदुपजायते अन्यस्य तु खण्डस्फुटिता न वा किञ्चिदपि, ततो यदि काल एव केवलः कारण भवेत् तर्हि सर्वेषामपि सममेव मुद्गपक्त्यादि फलं भवेत् न च भवति तस्मान्न कालमात्रकृतं विश्ववैचित्र्यं, किन्तु कालादिसामग्रीसापेक्षं तत्तत्कर्म्मनिबन्धनमिति स्थानं।

यदपि चेश्वरवादिनो ब्रुवते-ईश्वरकृतं जगदि'ति, तदप्यसमीचीनं, ईश्वरग्राहकप्रमाणाभावात्, अथास्ति तद्ग्राहकं प्रमाणमनुमानं, तथाहि-यत्स्थित्वा स्थित्वाऽभिमतफलसम्पादनाय प्रवर्त्तते तद्बुद्धिमत्कारणाधिष्ठितं, यथा वास्यादि द्वैधीकरणादौ, प्रवर्त्तते च स्थित्वा स्थित्वा सकलमपि विश्वं स्वफलसाधनायेति, न खलु वास्यादयः, स्वयमेव प्रवर्त्तन्ते, तेषामचेतनत्वात्, स्वभावत एव चेत्प्रवर्त्तन्ते तर्हि सदैव तेषां प्रवर्त्तनं भवेत्, न च भवति, तस्मादवश्यं स्थित्वा स्थित्वा प्रवर्त्तने केनचित्प्रेक्षावता प्रवर्त्तकेन भवितव्यं, सकलस्यापि च जगतः स्थित्वा २ फलं साधयतः प्रवर्त्तकः ईश्वर एवोपपद्यते, नान्य इतीश्वरसिद्धिः,

तथाऽपरमनुमानं-यत्पारिमण्डल्यादिलक्षणसन्निवेशविशेषभाक् तच्चेतनावत्कृतं, यथा घटादि, पारिमण्डल्यादिलक्षणसन्निवेशविशेषभाक् च भूभूधरादिकमिति, तदेतदयुक्तं, सिद्धसाधनेन पक्षस्य प्रसिद्धसम्बन्धत्वात्, तथाहि-सकलमपीदं विश्ववैचित्र्यं वयं कर्म्मनिबन्धनमिच्छामो, यतोऽमी वैताढ्यहिमवदादयः पर्वता भरतैरावतविदेहान्तद्वीपादीनि क्षेत्राणि तथा तथा प्राणिनां सुखदुःखादिहेतुतया यत्परिणमन्ते तत्र तथापरिणमने तत्तन्निवासिनामेव तेषां जन्तूनां कर्म्म कारणमवसेयं, नान्यत्, तथा च दृश्यन्ते एव पुण्यवति राज्यमनुशासति भूपतौ तत्कर्म्मप्रभावतः सुभिक्षादयः प्रवर्त्तमानाः, कर्म च जीवाश्रितं, जीवाश्च बुद्धिमन्तश्चेतनावत्त्वात्, ततो बुद्धिमत्कारणाधिष्ठितत्वे चेतनावत्कृतत्वे च साध्यमाने सिद्धसाधनं, अथ बुद्धिमान् चेतनावान् वा विशिष्ट एवेश्वरः कश्चित्साध्यते तेन न सिद्धसाधनं, तर्हि दृष्टान्तस्य साध्यविकलता, वास्यादौ न घटादौ चेश्वरस्याधिष्ठायकत्वेन कारणत्वेन वा व्याप्रियमाणस्यानुपलभ्यमानत्वाद्, वार्द्धकिकुम्भकारादीनामेव तत्रान्वयतो व्यतिरेकतो वा व्याप्रियमाणान निश्चीयमानत्वात्, अथ वार्द्धक्यादयोऽपि ईश्वरप्रेरिता एव तत्र २ कर्मणि प्रवर्त्तन्ते न स्वतः ततो न दृष्टान्तस्य साध्यविकलता नन्वेवं तर्हि ईश्वरोऽप्यन्येनेश्वरेण प्रेरितः स्वकर्मणि प्रवर्त्तते, न स्वतो, विशेषाभावात्, सोऽप्यन्येनेश्वरेण प्रेरित इति विकालसन्ध्यायां तमःसन्ततिरिवादृष्टपर्यन्ता ध्यान्ध्यमापादयन्ती प्रसरत्वनवस्था, अथ मन्येथा वार्द्धक्यादिको जन्तुः सर्वोऽपि स्वरूपेणाज्ञस्ततः स प्रेरित एव स्वकर्मणि प्रवर्त्तते भगवांस्त्वीश्वरः सकलपदर्थज्ञाता ततो नासौ स्वकर्मण्यन्यं स्वप्रेरकमपेक्षते तेन नानवस्था, तदप्यसत्, इतरेतराश्रयदोषप्रसङ्गात्, तथाहि-

सकलपदार्थयथाऽवस्थितस्वरूपज्ञातृत्वे सिद्धे सत्यन्याप्रेरितत्वासिद्धिः, अन्याप्रेरितत्वसिद्धौ च सकलजगत्करणतः सर्वज्ञत्वसिद्धिरित्येकासिद्धावन्यतरस्याप्यसिद्धिः, अपिच-यद्यसौ सर्वज्ञो वीतरागश्च तत्किमर्थमन्यं जनमसद्व्यवहारे प्रवर्त्तयति ?, मध्यस्था हि विवेकिनः सद्व्यवहार

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एव प्रवर्त्तयन्ति, नासद्व्यवहारे, स तु विपर्ययमपि करोती, ततः कथमसौ सर्वज्ञो वीतरागो वा ?, अथोच्येत-सद्व्यवहारविषयमेव भगवानुपदेशां ददाति तेन सर्वज्ञो वीतरागश्च, यस्त्वधर्मकारी जनसमूहस्तं फलमसदनुभावयति येन न तस्माद्धर्माद् व्यावर्त्तते, तद् उचितफलदायित्वा-द्विवेकवानेव भगवानीति न कश्चिदोषः, तदप्यसमीक्षिताभिधानं, यतः पापेऽपि प्रथमं स एव प्रवर्त्तयति नान्यो, न च स्वयं प्रवर्त्तते, तस्याज्ञत्वेन पापे धर्म्मे वा स्वयंप्रवृत्तेरयोगात्, ततः पूर्वं पापे प्रवर्त्त्य तत्फलमनुभाव्य पश्चाद्धर्म्मे प्रवर्त्तयतीति केयमीशश्वरस्य प्रेक्षापूर्वकारिता ?, अथ पापेऽपि प्रथमं प्रवर्त्तयति तत्कर्माधिष्ठित एव, तथाहि-

तदेव तेन जन्तुना कृतं कर्म यद्वशात्पाप एव प्रवर्त्तते, ईश्वरोऽपि च भगवान् सर्वज्ञस्तथारूपं तत्कर्म साक्षात् ज्ञात्वा तं पाप एव प्रवर्त्तयति, तत्र उचितफलदायित्वान्नाप्रेक्षापूर्वकारीति, ननु तदपि कर्म तेनैव कारितं, ततस्तदपि कस्मात्प्रथमं कारयतीति स एवाप्रेक्षापूर्वकारिताप्रसङ्गः, अथाधर्ममसौ न कारयति, किन्तु स्वत एवासौ अधर्म्ममाचरति, अधर्मकारिणं तु तं तत्फलम-सदनुभावयति, तदन्येश्वरवत्, तथाहि-तदन्ये ईश्वरा राजादयो नाधर्मे जनं प्रवर्त्तयन्ति अधर्मफलं तु प्रेष्यादिकमनुभावयन्ति तद्वद्भगवानीश्वरोऽपि, तदप्ययुक्तं, अन्ये हि ईश्वरा न पापप्रतिषेधं कारयितुमीशाः, न हि नाम राजानोऽपि उग्रशासनाः पाप मनोवाक्यनिमित्ते (प्रवृत्तं) सर्वथा प्रतिषेधयितुं प्रभविष्णवः, स तु भगवान् धर्माधर्मविधिप्रतिषेधविधापनसमर्थ इष्यते ततः कथं पापे प्रवृत्तं न प्रतिषेधयति ?, अप्रतिषेधतश्च परमार्थतः स एव कारयति, तत्फलशश्च(स्य) पश्चादनुभावनादिति तदवस्थ एव दोषः, अथ पापे प्रवर्त्तमानं प्रतिषेधयितुमशक्त इष्यते तर्हि नैवोच्चकैरिदमभिधातव्यं-सर्वमीश्वरेण कृतमिति, अपिच-यद्यसौ स्वयमधर्म्मं करोति तथा धर्म्ममपि करिष्यति फलं च स्वयमेव भोक्ष्यते ततः किमीश्वरकल्पनया विधेयमिति ?,

"स्वशक्त्याऽन्येश्वराः पापप्रतिषेधं न कुर्वते।
स त्वत्यन्तमशक्तेभ्यो, व्यावृत्तमतिरिष्यते ॥१॥
अथाप्यशक्त एवासौ, तथा सति परिस्फुटम्।
नेश्वरेण कृतं सर्वमिति वक्तव्यमुच्चकैः ॥२॥
पापवस्त्वर्जकारित्वाद्धर्मादिरपि किं ततः" ॥ इति,

अथ ब्रवीथाः-स्वयमसौ धर्म्माधर्म्मौ करोति, तत्फलं त्वीश्वर एव भोजयति, तस्य धर्माधर्मफलभोगे स्वयमशक्तत्वादिति, तदप्यसत्, यतो यो नाम स्वयं धर्माधर्मौ विधातुमलं स कथं तत्फलं स्वयमेव न भोक्तुमीशः ?, न हि पक्तुमोदनं समर्थो न भोक्तुमिति लोके प्रतीतं, अथवा भवत्वेतदपि तथाऽप्यसौ धर्मफलमुन्यत्तदेवाङ्गनासंस्पर्शादिरूपमनुभावयतु, तस्येष्टत्वात्, अधर्मफलं तु नरक प्रपातादिरूपु कस्मादनुभावयति ?, न हि मध्यस्थभावमवलम्बमानाः परम-करुणापरितचेतसः, प्रेक्षावन्तो निरर्थके परपीडाहेतौ कर्मणि प्रवर्त्तन्ते, क्रीडार्था भगवतस्तथा प्रवृत्तिरिति चेत्, यद्येवं तर्हि कथमसौ प्रेक्षावान् ?, तस्य हि प्रवर्त्तने क्रीडामात्रमेव फलं, ते पुनः प्राणिनः स्थाने २ प्राणैर्वियुज्यन्ते, उक्तं च-

"क्रीडार्था तस्य वृत्तिश्चेत्, प्रेक्षापूर्वक्रिया कुतः ?।
एकस्य क्षणिका तृप्तिरन्यः प्राणैर्विमुच्यते ॥"

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अपिच-क्रीडा लोके सरागस्योपलभ्यते भगवांश्च वीतरागः ततः कथं तस्य क्रीडा सङ्गति-मङ्गति ?, अथ सोऽपि सराग इष्यते तर्हि शेषजन्तुरिवावीतरागत्वात् न सर्वज्ञो नापि सर्वस्य कर्त्तेत्यापतितं, अथ रागादियुतोऽपि सर्वज्ञः सर्वस्य कर्त्ता च भवति तथास्वभावत्वात् ततो न कश्चिद्दोषो, न हि स्वभावे पर्यनुयोगो घटनामुपपद्यते, उक्तं च-

"इदमेव न वेत्येत्कस्य पर्यनुयोज्यातम् ?।
अग्निर्दहति नाकाशं, कोऽत्र पर्यनुयुज्यताम् ?॥"

तदेतदसम्यक्, यतः प्रत्यक्षतस्तथारूपस्वभावेऽवगते यदि पर्यनुयोगो विधीयते तत्रेदमुत्तरं विजृम्भते-यथा स्वभावे पर्यनयोगो न भवतीति, यथा प्रत्यक्षेणोपलभ्यमाने वह्नेर्दाह्यं दहतो दाहकत्वरूपे स्वभावे, तथाहि-यदि तत्र कोऽपि पर्यनुयोगमाश्रत्ते-यथा कथमेष वह्निर्दाहकस्वभावो जातो ?, यदि वस्तुत्वेन तर्हि व्योमापि किं न दाहकस्वभावं भवति ?, वस्तुत्वाविशेषादिति, तत्रेदमुत्तरं विधीयते, दाहकत्वरूपो हि स्वभावो वह्नेः प्रत्यक्षत एवोपलभ्यते, ततः कथमेष पर्यनुयोगमर्हति ?, न हि दृष्टेऽनुपपन्नता नाम, तथा चोक्तम्-

"स्वभावेऽध्यक्षतः सिद्धे, यदि पर्यनुयुज्यते।
तत्रेदमुत्तरं वाच्यं, न दृष्टेऽनुपपन्नता॥"

ईश्वरस्तु सर्वजगत्कर्तृत्वेन सर्वज्ञत्वेन च नोपलब्धः, ततस्तत्र तथास्वभावत्वकल्पनाऽवश्यं पर्यनुयोगमाश्रयते, यदि पुनरदृष्टेऽपि तथास्वाभावत्वकल्पना पर्यनुयोगमाश्रयाऽभ्युपगम्येत तर्हि सर्वोऽपि वादी तं तं पक्षमाश्रयन् परेण विक्षोभितस्तत्र तत्र तथास्वभावताकल्पनेन परं निरुत्तरीकृत्य लब्धजयपताक एव भवेत्, उक्तं च -

"यत्किञ्चिदात्माऽभिमतं विधाय, निरुत्तरस्तत्र कृतः परेण।
वस्तुस्वभावैरिति वाच्यमित्थं, तदोत्तरं स्याद्विजयी समस्तः॥"

किंच-सर्वं यदि जगदीश्वरकृतं मन्यते तर्हि सर्वाण्यपि शास्त्राणि सकलदर्शनगतानि तेन प्रवर्त्तितानीति प्राप्तं, तानि च शास्त्राणि परस्परविरुद्धार्थानि, ततोऽवश्यं कानिचित्त सत्यानि कानिचिदसत्यानि, ततः सत्यासत्योपदेशदानात् कथमसौ प्रमाणम् ?, उक्तं च -

"शास्त्रान्तराणि सर्वाणि, यदीश्वरविकल्पतः।
सत्यासत्योपदेशश्च (स्य) प्रमाणं दानतः कथम् ?॥"

अथ न सकलानि शास्त्राणीश्वरेण कारितानि किन्तं सत्यान्येव ततो न कश्चिद्दोषावकाशः, तर्हि शास्त्रान्तरदेव नेश्वरेणान्यदपि व्यधायीति हता तव पक्षसिद्धिरिति। अन्यच्च-यादृग्भूतं संस्थानादि बुद्धिमत्कारणपूर्वकत्वेनोपलब्धं तादृग्भूतमेवान्यत्रापि बुद्धिमन्तमात्मनो हेतुमनुमापयति, तथाप्रतीतेरभावात्, तद्गतस्य संस्थानदेर्बुद्धिमत्कारणत्वेवन निश्चयाभावात्, तथा भूभूधरादिगतमपि संस्थानादिकं न बुद्धिमत्कारणपूर्वकत्वेन निश्चितमिति कथं तद्वशाद्बुद्धिमतः, कर्त्तुरनुमानम् ?, अथ मन्येथाः-तदपि संस्थानादि तादृग्भूतमेव संस्थानादिशब्दावाच्यत्वात्, न चैवं तत्कर्त्तुर्बुद्धिमतोऽनुमाने काञ्चिदपि बाधामुपलभामहे ततः सर्वं सुस्थमिति, तदयुक्तं, शब्दा हि रूढिवशाज्जात्यन्तरेऽपि प्रवर्त्तन्ते, ततः शब्दसाम्याद्यदि तथारूपवस्त्वनुमानं तर्हि गोत्वाद्वागादी-नामपि विषाणिताऽनुमीयतां, विशेषाभावात्, अथ तत्र प्रत्यक्षेण बाधोपलभ्यते ईश्वरानुमाने तु न

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तता न कश्चिद्दोष इति, तदेतदतीव प्रमाणमार्गानभिज्ञतासूचकं, यतो यत एव तत्र प्रत्यक्षेण बाधोपलम्भोऽत एव नान्यत्रापि शब्दसाम्यात्तथारूपवस्त्वनुमानं कर्त्तव्यं, प्रत्यक्षत एव शब्दसाम्यस्य वस्तुतथारूपेण सहाविनाभावित्वस्याभावावगमात्, न च बाधकमत्र नोपलभ्यते इत्येवानुमानं प्रवर्त्तते, किन्तु वस्तुसम्बन्धबलात्, तथा चोक्तम्-

"न न बाध्यत इत्येवमनुमानं प्रवर्त्तते।
सम्बन्धदर्शनात्तस्य, प्रवर्त्तनमिहेयष्यते॥"

इति, च सम्बन्धोऽत्र न विद्यते, तद्ग्राहकप्रमाणाभावात्, ततोऽनैकान्तिकता हेतोः, इत्थं चैतदङ्गीकर्त्तव्यं अन्यथा यो यो मृद्विकारः स स कुम्भकारकृतो यथा घटादिः, मृद्विकारश्चायं वल्मीकः तस्मात् कुम्भकारकृत इत्यनुमानं समीचीनतामाचीनस्कन्द्यते, बाधकलभ्यते तस्मादेतदयुक्तमिति, तदेतदीश्वरानुमानेऽपि समानं, यदि हि सर्वस्यापि वस्तुजातस्येश्वरः कर्त्ता तर्हि कचित्कदाचिदुपलभ्येत न चोपलभ्यते तस्मात्तदप्यलीकमिति कृतं प्रसङ्गेन।

येऽपि चात्मवादिनः 'पुरुष एवेदं सर्व'मिति प्रतिपन्नास्तेऽपि महामोहमहोरगगरलपूरमूर्च्छितमानसा वेदितव्याः, तथाहि-यदि नाम पुरुषमात्ररूपमद्वैतं तत्त्वं तर्हि यदेतदुपलभ्यते सुखित्वदुःखत्वादि तत्सर्वं परमार्थतोऽसत् प्राप्नोति, ततश्चैवं स्थिते यदेतदुच्यते-'प्रमाणतोऽधिगम्यं संसारनैर्गुण्यं तद्विमुखया प्रज्ञया तदुच्छेदाय प्रवृत्ति'रित्यादि तदेतदाकाशकुसुमसौरभवर्णनोपमानमवसेयं, अद्वैतरूपे हि तत्त्वे कुतो नरकादिभवभ्रमणरूपः संसारो? यन्नैर्गुण्यमवगम्य तदुच्छेदाय प्रवृत्तिरुपपद्यते, यदप्युच्यते-'पुरुषमात्रमेवाद्वैतं तत्त्वं, यत्तु संसारनैर्गुण्यं भावभेददर्शनं च तत्सर्वदा सर्वेषामविगानप्रतिपत्तावपि चित्रे निम्नोन्नतभेददर्शनमिव भ्रान्तमवसेयमिति, तदप्यचारु, एतद्विषयवास्तवप्रमाणाभावात्, तथाहि-नाद्वैताभ्युपगमे किञ्चिदद्वैतग्राहकं ततः पृथग्भूतं प्रमाणमस्ति, द्वैतत्वप्रसक्तेः, न च प्रमाणमन्तरेण निष्प्रतिपक्षा तत्त्वव्यवस्था भवति, मा प्रापत्सर्वस्य सर्वेष्टार्थसिद्धिप्रसङ्गः, तथा भ्रान्तिरपि प्रमाणभूतादद्वैताद् भिन्नाऽभ्युपगन्तव्या, अन्यथा प्रमाणभूतमद्वैतमप्रमाणमेव भवेत्, तदव्यतिरेकात्, तत्स्वरूपवत्, तथा च कुतस्तत्त्वव्यवस्था?, भिन्नायां च भ्रान्तावभ्युपगम्यमानायां द्वैतं प्रसक्तमित्यद्वैतहानिः, अपि च-यदीदं स्तम्भाभःकुम्भाम्भोरुहादिभावभेददर्शनं भ्रान्तमुच्यते तर्हि नियमात्तदपि कचित्सत्यमवगन्तव्यं, अभ्रान्तदर्शनमन्तरेण भ्रान्तेरयोगात्, न खलु येन पूर्वमासीविषो न दृष्टस्तस्य रज्ज्वामासीविषभ्रान्तिरुपजायते, यदुक्तं-

"नादृष्टपूर्वसर्पस्य, रज्ज्वां सर्पमतिः क्वचित्।
ततः पूर्वानुसारित्वाद्भ्रान्तिरभ्रान्तिपूर्विका॥"

तत एवमप्यव्याहतो भेदः, अन्यच्च 'पुरुषाद्वैतरूपं तत्त्वमवश्यं परस्मै निवेदनीयं, नात्मने, आत्मनो व्यामोहाभावात्, विमोहश्चेदद्वैतप्रतिपत्तिरेव न भवेत्, अथोच्येत-यत एव व्यामोहोऽत एव तन्निवृत्त्यर्थमात्मनोऽद्वैतप्रतिपत्तिरास्थेया, तदयुक्तम्, एवं सत्यद्वैतप्रतिपत्त्याधानेनात्मनो व्यामोहे निवर्त्यमानेऽवश्यं पूर्वरूपत्यागोऽपररूपस्य चाव्यामूढतालक्षणस्योत्पत्तिरित्यद्वैतप्रतिज्ञाहानिः, परस्मै च प्रतिपादयन्नियमतः परमभ्युपगच्छेत्, परं चाभ्युपगच्छन् तस्मै चाद्वैतरूपं तत्त्वं निवेदयन् पिता मे कुमारब्रह्मचारीत्यादि वदन्निव कथं नोन्मत्तः?, स्वपराभ्युपगमेनाद्वैतवचसो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बाधनादिति यत्किञ्चिदेतत्।

यदपि च नियतिवादिन उक्तवन्तो-नियतिर्नाम तत्त्वान्तरमस्तीति, तदपि तायमानाऽति-जीर्णघट इव विचारताडनमसहमानं शतशो विशरारुभावमाभजते, तथाहि-तन्नियतिरूपं नाम तत्त्वान्तरं भावरूपं वा स्यादभावरूपं वा ?, यदि भावरूपं तर्हि किमेकरूपमनेकरूपं वा ?, यद्येकरूपं ततस्तदपि नित्यमनित्यं वा ?, यदि नित्यं कथं भावानां हेतुः ?, नित्यस्य कारणत्वायोगात्, तथाहि-नित्यमाकालमेकरूपमुपवर्ण्यते, अप्रच्युतानुत्पन्नस्थिरैकस्वभावतया नित्यत्वस्य व्यावर्ण्णनात्, ततो यदि तेन रूपेण कार्याणि जनयति तर्हि सर्वदा तेन रूपेण जनयेत्, विशेषाभावात्, न च सर्वदा तेन रूपेण जनयति, कचित्कदाचित्तस्य भावस्य दर्शनात्, अपिच-यानि द्वितीयादिषु क्षणेषु कर्त्तव्यानि कार्याणि तान्यपि प्रथमसमय एवोत्पादयेत्, तत्कारणस्वभावस्य तदानीमपि विद्यमानत्वात्, मा वा द्वितीयादिष्वपि क्षणेषु, विशेषाभावात्, विशेषे वा बलादनित्यत्वं, 'अतादवस्थ्यमनित्यतां ब्रूम' इति वचनप्रामाण्यात्, अथाविशिष्टमपि नित्यं तं तं सहकारिणमपेक्ष्य कार्यं विधत्ते, सहकारिश्च प्रतिनियतदेशकालभाविनः, ततः सहकारिभावाभावाभ्यां कार्यस्य क्रम इति, तदप्यसमीचीनं, यतः सहकारिणोऽपि नियतिसम्पाद्याः, नियतिश्च प्रथमक्षणेऽपि तत्करणस्वभावा, द्वितीयादिषु क्षणेषु तत्वकरणस्वभावताऽभ्युपगमे नित्यत्वक्षितिप्रसङ्गात्, ततः प्रथमेऽपि क्षणे सर्वसहकारिणां सम्भवात् सकलकार्यकरणप्रसङ्ग, अपिच-सहकारिषु सत्सु भवति कार्यं तदभावे च न भवति ततः सहकारिणामेवान्वयव्यतिरेकदर्शनात् कारणता परिकल्पनीया न नियतेः, तत्र व्यतिरेकासम्भवात्, उक्तं च-

"हेतुताऽन्वयपूर्वेण व्यतिरेकेण सिध्यति।
नित्यस्याव्यतिरेकस्य, कुतो हेतुत्वसम्भवः ?॥"

अथैतद्दोषभयादनित्यमिति पक्षाश्रयणं तर्हि तस्य प्रतिक्षणमन्यान्यरूपतया भवनं ततो बहुत्व-भावादेकरूपमिति प्रतिज्ञाव्याघातप्रसङ्गः, न च क्षणक्षयित्वे कार्यकारणभाव इति प्रागेवोप-पादितम्।

अन्यच्च यदि नियतिरेकरूपा ततस्तन्निबन्धननिखिलकार्याणामेकरूपताप्रसङ्गः, न हि कारणभेदमन्तरेण कार्यस्य भेदो भवितुमर्हति, तस्य निर्हेतुकत्वप्रसक्तेः, अथानेकरूपमिति पक्षा, ननु साऽनेकरूपता न तदन्यनानारूपविशेषणमन्तरेणोपपद्यते, न खलु ऊपरेतरादिधराभेदमन्तरेण विहायसः पतताम्भसामनेकरूपता भवति 'विशेषणं विना यस्मान्न तुल्यानां विशिष्टते'ति वचन-प्रामाण्यात्, ततोऽवश्यं तदन्यानि नानारूपाणि विशेषणानि नियतेर्भेदकान्यभ्युपगन्तव्यानि, तेषां च नानारूपाणां विशेषणानां भावः किं तत एव नियतेर्भवेदुतान्यतः ?, यदि नियतेस्यस्याः स्वत एकरूपत्वात्कथं तन्निबन्धनानां विशेषणानां नानारूपता ?, अथ विचित्रकार्यान्यथाऽनुपपत्त्या सा विचित्ररूपाऽभ्युपगम्यते, ननु सा विचित्ररूपता विशेषणबाहुल्यसम्पर्कमन्तरेण न घटामञ्चति, ततस्तत्रापि विशेषणबाहुल्यमभ्युपगन्तव्यं, तेषामपि विशेषणानां भावः किं तत एव नियतेर्भवे-दुतान्यत इत्यादि तदेवावर्त्तते इत्यनवस्था, अथान्यत इति पक्षः, तदप्युक्तं, नियतिव्यतिरेकेणान्यस्य हेतुत्वेनानभ्युपगमादिति यत्किञ्चिदेतत्, किंच-

अनेकरूपमिति पक्षाभ्युपगमे भवतः प्रतिपन्थि विकल्पयुगलमुपढौकते-तद्धि मूर्त्तं वा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्यादमूर्त्तं वा ?, यदि मूर्त्तं तर्हि नामान्तरेण कर्म्मैव प्रतिपन्नं, यस्मात्तदपि कर्म्म पुद्गलरूपत्वात् मूर्त्तमनेकं चास्माकमभिप्रेतं, भवताऽपि च नियतिरूपं तत्त्वान्तरमनेकं मूर्त्तं चाभ्युपगम्यते इत्यावयोरविप्रतिपत्तिः, अथामूर्त्तमित्यभ्युपगमस्तर्हि न तत्सुखदुःखनिबन्धनम्, अमूर्त्तत्वात्, न खल्वाकाशममूर्त्तमनुग्रहायोपघाताय वा जायते, पुद्गलानामेवानुग्रहोपघातविधानसमर्थत्वात्, "जमणुग्गहोवघाया जीवाणं पुग्गलेहिंतो" इति वचनात्, अथ मन्येथाः-दृष्टमाकाशमपि देशभेदेन सुखदुःखनिबन्धनं, तथाहि-मरुस्थलीप्रभृतिषु देशेषु दुखं शेषेषु तु सुखमिति, तदप्यसत्, तत्रापि तदाकाशस्थितानामेव पुद्गलानामनुग्रहोपघातकारित्वात्, तथाहि-मरुस्थलीप्रायासु भूमिषु जलविकलतया न तथाविधा धान्यसम्पत्, बालुकाकुलतया चाध्वनि प्राणिनां गमनागमनविधावतिशायी पदे २ खेदो निदाघे च खरकिरणतीव्रकरनिकरसम्पर्क्कतो भूयान् सन्तापो जलाभ्यवहरणमपि स्वल्पीयो महाप्रयत्नसम्पाद्यं चेति महत्तत्र दुःखं, शेषे, तद्विपर्ययात्सुखमिति तत्रापि पुद्गलानामनुग्रहोपघातकारित्वं नाकाशस्येति, अथाभावरूपमिति पक्षस्यदप्ययुक्तं, अभावस्य तुच्छरूपतया सकलशक्त्ययोगतः कार्यकारित्वायोगात्, नहि कटककुण्डलाद्यभावतः कटककुण्डलाद्युपजायते, तथादर्शनाभावात्, अन्यथा तत एव कटककुण्डलाद्युत्पत्तेर्विश्वस्यादरिद्रताप्रसङ्गः, नन्विह घटाभावो मृत्पिण्ड एव तस्माच्चोपजायमानो दृश्यते घटस्ततः किमिहायुक्तं ?, न खलु मृत्पिण्डस्तुच्छरूपः, स्वरूपभावात, ततः कथमिव तस्य हेतुता नोपपत्तिमर्हति ?, तदप्यसमीचीनं, यतो न य एव मृत्पिण्डस्य स्वरूपभावः स एवाभावो भवितुमर्हति, भावोभावविरोधात्, तथाहि-

यदि भावः कथमभावः ? अथाभावः कथं भाव इति ?, अथोच्येत-स्वरूपापेक्षया भावरूपता पररूपापेक्षया चाभावरूपता ततो भावाभावयोर्भिन्ननिमित्तवत्त्वान्न कश्चिद्दोष इथि, नन्वेवं मृत्पिण्डस्य भावाभावात्मकत्वाभ्युपगमेऽनेकान्तात्मकमभिमन्यन्ते न भवादृशा एकान्तग्रहग्रस्तमनसः, स्यादेतत्-परिकल्पितस्तत्र पररूपाभावः स्वरूपभावस्तु तात्त्विकः ततो नानेकान्तात्मकत्वप्रसङ्ग इति, यद्येवं तर्हि कथं ततो मृत्पिण्डाद् घटभावः ?, तत्र परमार्थतो घटप्रागभावस्याभावात्, यदि पुनः प्रागभावाभावेऽपि ततो घटो भवेत् तर्हि सूत्रपिण्डादेरपि कस्मान्न भवति ?, प्रागभावाभावाविशेषात्, कथं वा ततो न खरविषाणमिति यत्किञ्चिदेतत्, यदप्युक्तं-यद्यदा यतो भवति कालान्तरेऽपि तत्तदा तत एव नियतेनैव रूपेण भवदुपलभ्यते इति, तदप्ययुक्तमेव, कारणसामग्रीशक्तिनियमतः कार्यस्य तदा तत एव तेनैव रूपेण भावसम्भवात्, ततो यदुक्तं-'अन्यथा कार्यकारणभावव्यवस्था प्रतिनियतरूपव्यवस्था च न भवेत्, नियामकाभावादि'ति तद्बहिः प्लवते, कारणशक्तिरूपस्य नियामकस्य भावात्, एवं च कारणशक्तिनैयत्यतः कार्यस्य नैयत्ये कथं प्रेक्षावान् प्रमाणपथकुशलः प्रमाणोपपन्नयुक्तिबाधितां नियतिमङ्गीकुरुते ?, मा प्रापदप्रेक्षावत्ताप्रसङ्गः,

एतेन यदाहुः स्वभाववादिनः-'इह सर्वे भावाः स्वभाववशादुपजायन्ते' इति, तदपि प्रतिक्षिप्तमवगन्तव्यं, उक्तरूपाणां प्रायस्तत्रापि समानत्वात्, तथाहि-स्वभावो भावरूपो वा स्यादभावरूपो वा ?, भावरूपोऽप्येकरूपोऽनेकरूपो वेत्यादि सर्वं तदवस्थमेवात्रापि दूषणजालमुपढौकते, अपिच--यः स्वो भावः स्वभावः, आत्मीयो भाव इत्यर्थः, स च कार्यगतो वा हेतुर्भवेत्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कारणगतो वा ?, न तावत्कार्यगतां, यतः कार्ये परिनिष्पन्ने सति स कार्यगतः स्वभावो भविष्यति, नानिष्पन्ने, निष्पन्ने च कार्ये कथं स तस्य हेतुः ? यो हि यस्यालब्धलाभसम्पादनाय प्रभवति स तस्य हेतुः, कार्यं च परिनिष्पन्नतया लब्धात्मलाभं, अन्यथा तस्यैव स्वभावस्या भावप्रसङ्गात्, ततः कथं च कार्यस्य हेतुर्भवति ?, कारणगतस्तु स्वभावः कार्यस्य हेतुरस्माकमपि सम्मतः, स च प्रतिकारणं विभिन्नस्तेन मृदः कुम्भो भवति न पटादिः, मृदः पटादिकरणस्वभावाभावात्, तन्तुभ्योऽपि पट एव भवति न घटादिः, तन्तूनां घटादिकरणे स्वभावाभावात्, ततो यदुच्यते-'मृदः कुम्भो भवति न पटादि'रित्यादि तत्सर्वं कारणगतस्वभावाभ्युपगमे सिद्धसाध्यतामध्य-मध्यासीनमिति न नो बाधामादधाति, यदपि चोक्तम्-'आस्तामन्यत्कार्यजात'मित्यादि, तदपि कारणगतस्वभावाङ्गीकारेण समीचीनमेवावसेयं, तथाहि-ते कङ्कटुकमुद्गाः स्वकारण-वशतस्त-थारूपा एव जाता ये स्थालीन्धनकालादिसामग्रीसम्पर्केऽपि न पाकमश्नुवते इति, स्वभावश्च कारणादभिन्न इति सर्वं सकारणमेवेति स्थितम्, उक्तं च -

"कारणगओ उ हेऊ केन व निट्टोत्ति नियकज्जस्स ?।
न य सो तओ विभिन्नो सकारणं सव्वमेव तओ॥

यदपि च यदृच्छावादिनः प्रलपन्ति-'न खलु प्रतिनियतो वस्तूनां कार्यकारणभाव' इत्यादि तदपि च कार्याकार्यादिविवेचनपटीयाःशेमुषीविकलतासूचकमवगन्तव्यं, कार्यकारणभावस्य प्रतिनियततया सम्भवात्, तथाहि-यः शालूकादुपजायते शालूकः स सदैव शालूकादेव न गोमया-दपि, योऽपि च गोमयादुपजायते शालूकः सोऽपि सदैव गोमयादेव न शालूकादपि, न चानयोरेक-रूपता, शक्तिवर्णादिवैचित्र्यतः परस्परं जात्यन्तरत्वात्, योऽपि च वह्नेरुपजायते वह्निः सोऽपि सदैव वह्नेरेव नारणिकाष्ठादपि, योऽपि चारणिकाष्ठादुपजायते सोऽपि सर्वदाऽरण-काष्ठादेव न वह्नेरपि, यदपि चोक्तं-'बीजादपि जायते कदली'त्यादि, तत्रापि परस्परं विभिन्नत्वात् एतदेवोत्तरम्, अपिच-या कन्दादुपजायते कदली साऽपि परमार्थतो बीजादेव वेदितव्या, परम्परया बीजस्यैव कारणत्वात्, एवं वटादयोऽपि शाखैकदेशादुपजायमानाः परमार्थतो बीजादवगन्तव्याः, तथाहि-शाखातः शाखा प्रभवति, न च शाखा शाखाहेतुका लोके व्यवह्रियते, बटबीजस्यैव सकलशाखादि-समुदायरूपवटहेतुत्वेन प्रसिद्धत्वात्, एवं शाखैकदेशादपि जायमानो वटः परमार्थतो मूलवट-प्रशाखारूप इति मूलवटबीजहेतुक एव सोऽपि वेदितव्यः, तस्मान्न क्वचिदपि कारण-कार्य-व्यभिचारः, निपुणविचारप्रवीणेन च प्रतिपन्ना भवितव्यं, ततो न कश्चिद्दोषः, एवं च यदुच्यते-'न खल्वन्यथा वस्तुसद्भावं पश्यन्तोऽन्यथाऽऽत्मानं प्रेक्षावन्तः परिक्लेशयन्ती'ति, तद्वाङ्मात्र-मिति स्थितं,

येऽपि चाज्ञानवादिनो 'न ज्ञानं श्रेयः, तस्मिन् सति परस्परं विवादयोगतश्चित्तकालुष्यादिभावतो दीर्घतरसंसारप्रवृत्ते'रित्याद्युक्तवन्तः तेऽप्यज्ञानमहानिद्रोप्लुतमनस्कतया यत्किञ्चिद्भाषितवन्तो वेदितव्याः, तथाहि-आस्तमामन्यद् एतावदेव वयं पृच्छामः-ज्ञाननिषेधकं ज्ञानं वा स्यादज्ञानं वा ?, तत्र यदि ज्ञानं ततः कथमभाषिष्ट-अज्ञानमेव श्रेयो ?, नन्वेवं ज्ञानं श्रेयस्तामाचनीस्कन्द्यते, तदन्तरेणाज्ञानस्य प्रतिष्ठापयितुमशक्यत्वात्, तथा च प्रतिज्ञाव्याघातप्रसङ्गः, अथाज्ञानमिति पक्षः सोऽप्ययुक्तः, अज्ञानस्य ज्ञाननिषेधनसामर्थ्यायोगात्, न खलु अज्ञानं साधनाय बाधनाय वा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कस्यापि प्रभवति, अज्ञानत्वादेव, ततोऽप्रतिषेधादपि सिद्धं ज्ञानं श्रेयः, आह च-

"नाणनिसेहणहेऊ नाणं इयरं व होज्ज ? जइ नाणं।
अब्भुवगमम्मि तस्या कहं नु अन्नाणमो सेयं ? ॥१॥
अह अन्नाणं न तयं नाणनिसेहणसमत्थमेवंपि।
अप्पडिसेहाउ च्चिय संसिद्धं नाणमेवन्ति॥२॥"

यदप्युक्तं-'ज्ञाने सति परस्परं विवादयोगश्चित्तकालुष्यादिभाव' इति, तदप्यपरिभावितभाषितं, इह हि ज्ञानी परमार्थतः स एवोच्यते यो विवेकपूतात्मा ज्ञानगर्वमात्मानि सर्वथा न विधत्ते, यस्तु ज्ञानलवमासाद्याकण्ठपीतासव इवोन्मत्तः सकलमपि जगत्तृणाया मन्यते स परमार्थेनाज्ञानी वेदितव्यो, ज्ञानफलाभावात्, ज्ञानफलं हि रागादिदोषगणनिरासः, स चेन्न भवति तर्हि न परमार्थतस्तत् ज्ञानं, उक्तं च-

"तज्ज्ञानमेव न भवति यस्मिन्नुदिते विभाति रागगणः।
तमसः कुतोऽस्ति शक्तिर्दिनकरकिरणाग्रतः स्थातुम् ?॥"

तत इत्थम्भूतो ज्ञानी विवेकपूतात्मा परहितकरणैकरसिको वादमपि परेषामुपकारार्थमाधत्ते, न यथाकथञ्चित्, तमपि च वादं वादिनरपतिपरीक्षकेषु निपुणबुद्धिषु मध्यस्थेषु सत्सु विधत्ते, नान्येषु, तथा तीर्थकरगणधरैरनुज्ञानात्, उक्तं च-

"वादोऽपि वाइनरवइपरिच्छगजणेसु निउणबुद्धीस।
मज्झत्थेसु य विहिणा उस्सग्गेणं अणुन्नाओ॥"

तत एवं स्थिते कथं नु नाम चित्तकालुष्यभावो ? यद्वशात् तीव्रतीव्रतरकर्मबन्धयोगतो दीर्घदीर्घतरसंसारप्रवृत्तिः सम्भवेत्, केवलं वादिनरपतिपरीक्षकाणामज्ञानापगमतः सम्यग्ज्ञानोन्मीलनं जायते, तथा च महदुपकारि ज्ञानमिति तदेव श्रेयः।

यत्पुनरुच्यते-'तीव्राध्यवसायनिष्पन्नः कर्मबन्धो दारुणविपाको भवती'ति तदभ्युपगम्यते एव, न च तीव्रोऽध्यवसायो ज्ञाननिबन्धनः, अज्ञानिनोऽपि तस्य दर्शनात्, केवल ज्ञाने सति यदि कथञ्चित्कर्म्मदोषतोऽकार्येऽपि प्रवृत्तिरुपजायते तथापि ज्ञानवशतः प्रतिक्षणं संवेगभावतो न तीव्रः परिणामो भवति, तथाहि-यथा कश्चित्पुरुषो राजादिदुष्टनियोगतो विषमिश्रमन्नं जानानोऽपि भयभीतमानसो भुंक्ते तथा सम्यग्ज्ञान्यपि कथञ्चित्कर्मदोषतोऽकार्यमाचरन्नपि संसारदुःखभयभीतमानसः समाचरति, न निःशङ्कं, संसारभयभीतता च संवेग उच्यते, ततः संवेगशान्न तीव्रः परिणामो भवति, उक्तं च -

"जाणंतो सविसण्णं पवत्तमाणोऽवि बीहए जह उ।
न उ इयरो तह नाणी पवत्तमाणोऽवि संविग्गो॥१॥
जं संवेगपहाणो अच्चंतसुहो य होइ परिणामो।
पावनिवित्ती य परा नेयं अन्नाणिणो उभयं॥२॥

ततो यदुक्तम्-'अज्ञानमेव मुमुक्षुणा मुक्तिपथप्रवृत्तेनाभ्युपगन्तव्यं, न ज्ञान'मिति, तत्तेषां मूढमनस्कतासूचकमवगन्तव्यं, यदप्युक्तं-'भवेत् युक्तो ज्ञानस्याभ्युपगमो यदि ज्ञानस्य निश्चयः कर्त्तुं पार्यते'इत्यादि, तदपि बालिशजल्पितं, यतो यद्यपि सर्वेऽपि दर्शनिनः परस्परं भिन्नमेव

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ज्ञानं प्रतिपन्नाः तथापि यद्वचो दृष्टेष्टाबाधितं पूर्वापराव्याहतं च तत्सम्यग्रूपमवसेयं, तादृग्भूतं च वचो भगवत्प्रणीतमेवेति तदेव प्रमाणं न शेषमिति, यदप्युक्तं-'सुगतादयोऽपि सौगतादिभिः सर्वज्ञा इष्यन्ते' इत्यादि, तदप्यसत्, दृष्टेष्टबाधितवचनतया सुगतादीनामसर्वज्ञत्वात्, यथा च दृष्टेष्टबाधितवचनता सुगतादीनां तथा प्रागेव सर्वज्ञसिद्धौ लेशतो दर्शिता, ततो भगवानेव सर्वज्ञः, उक्तं च-

"सव्वण्णुविहाणंमिवि दिट्ठिट्ठाबाहियाउ वयणाओ।
सव्वण्णू होइ जिनो सेसा सव्वे असव्वण्णू॥"

एतेन यदुक्तं, 'भवतु वा वर्द्धमानस्वामी सर्वज्ञस्तथापि तस्य सत्कोऽयमाचारादिक उपदेश इति कथं प्रतीयते?' इति, तदपि दूरापास्तं, अन्यस्येत्थम्भूतदृष्टेष्टाबाधितवचनप्रवृत्तेरसम्भवात्, यदप्युक्तं-'भवत्वेषोऽपि निश्चयो यथाऽयमाचारादिक उपदेशो वर्द्धमानस्वामिन इति, तथापि तस्योपदेशस्यायमर्थो नान्य इति न शक्यं प्रत्येतु'मित्यादि, तदप्युक्तं, भगवान् हि वीतरागस्ततो न विप्रतारयति, विप्रतारणाहेतुरागादिदोषगणासम्भवात्, तथा सर्वज्ञत्वेन विपरीतं सम्यग् वाऽर्थमवबुध्यमानं शिष्यं जानाति ततो यदि विपरीतमर्थमवबुध्यते श्रोता तर्हि निवारयेत्, न च निवारयति, न च विप्रातरयति, करोति च देशानां कृतकृत्योऽपि तीर्थकरनामकर्मोदयात्, ततो ज्ञायते एष एवास्योपदेशस्यार्थ इति, उक्तं च-

"नाएऽपि तदुवएसे एसेवत्थो मउत्ति से एवं।
ज्जइ पवत्तमाणं जं ज निवारेइ तह चेव॥१॥
अन्नह य पवत्तंतं निवारई न य तओ पवंचेई।
जम्हा स वीयरागो कहणे पुण कारणं कम्मं॥२॥"

एवं च भगवद्विवक्षायाः परोक्षत्वेऽपि सम्यगुपदेशस्यार्थनिश्चये जाते यदुक्तं-'गौतमादिरपि छद्मस्थ' इत्यादि, तदप्यसारमवसेयं, छद्मस्थस्याप्युक्तप्रकारेण भगवदेपदेशार्थनिश्चयोपपत्तेः, तथा चित्रार्था अपि शब्दा भगवतैव समयिताः, ते च प्रकरणाद्यनुरोधेन तत्तदर्थप्रतिपादकाः प्रतिपादितास्ततो न कश्चिद्दोषः, तत्प्रकरणाद्यनुरोधेन तत्तदर्थनिश्चयोपपत्तेः, भगवताऽपि च तथा तथाऽर्थावगमे प्रतिपेधाकरणादिति, एवं च तदानीं गौतमादीनां सम्यगुपदेशार्थस्यावगतावाचार्यपरम्परात इदानीमपि तदर्थावगमो भवति, न चाचार्यपरम्परा न प्रमाणं, अविपरीतार्थव्याख्यातृत्वेन तस्याः प्रामाण्यस्यापाकर्तुमशक्यत्वात्, अपिच-भवद्दर्शनमपि किमागममूलमनागममूलं वा?, यद्यागममूलं तर्हि कथमाचार्यपरम्परामन्तरेण?, आगमार्थस्यावबोद्धुमशक्यत्वात्, अथानागममूलं तर्हि न प्रमाणं, उन्मत्तकविरचितदर्शनवत्, अथ यद्यपि नागममूलं तथापि युक्त्युपपन्नमितिकृत्वा समाश्रीयते, अहो! दुरन्तः स्वदर्शनानुरागो य एवमपि पूर्वापरविरुद्धं भाषयति, अथवा भूषणमेतदज्ञानपक्षाभ्युपगमस्य यदित्थं पूर्वापरविरुद्धार्थभाषणं, कथं पूर्वापरविरुद्धार्थभाषितेति चेत्?, उच्च्यते, युक्तयो हि ज्ञानमूला भवतां चाज्ञानाभ्येपगमः ततः कथं तास्तत्र घटन्ते? इति पूर्वापरविरुद्धार्थभाषितेति यत्किञ्चिदेतद्।

येऽपि च विनयवादिनो विनयप्रतिपत्तिलक्षणास्तेऽपि मोहान्मुक्तिपथपरिभ्रष्टाः वेदितव्याः, तथाहि-विनयो नाम मुक्त्यङ्गं यो मुक्तिपथानुकूलो न शेषः, मुक्तिपथश्चज्ञानदर्शनचारित्राणि,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः' इतिवचनात्, ततो ज्ञानादीनां ज्ञानाद्याधारणां च बहुश्रुतादिपुरुषाणां यो विनयो ज्ञानादिबहुमानप्रतिपत्तिलक्षणः स ज्ञानादिसम्पद्वृद्धिहेतुत्वेन परम्परया मुक्त्यङ्गमुपजायते, यस्तु सुरनृपत्यादिषु विनयः स नियमात् संसारहेतुः, यतः सुरनृपत्यादिषु विनयो विधीयमानः सुरनृपत्यादिभावविषयं बहुमानमापादयति, अन्यथा विनयकरणाप्रवृत्तेः, सुरनृपत्यादिभावश्च भोगप्रधानः, तद्बहुमाने च भोगबहुमानमेव कृतं परमार्थतो भवतीति दीर्घसंसारपथप्रवृत्तिः, येऽपि च यतिविनयवादिनस्तेऽपि यदि साक्षाद्विनयमेव केवलं मुक्तङ्गमिच्छन्ति तर्हि तेऽप्यसमीचीनवादिनो वेदितव्याः, ज्ञानादिरहितस्य केवलस्य विनयस्य साक्षान्मुक्त्यङ्गत्वाभावात्, न खलु ज्ञानदर्शचारित्ररहिताः, केवलपादपतनादिविनयमात्रेण मुक्तिमार्गमश्नुवते जन्तवः, किन्तु ज्ञानादिसहिताः, ततो ज्ञानादिकमेव साक्षान्मुक्त्यङ्गं, न विनयः, कथमेतदवसीयते ?,

इति चेदुच्यते, इह मिथ्यात्वाज्ञानाविरतिप्रत्ययं कर्म्मजालं, कर्मजालक्षवाच्च मोक्षः 'मुक्तिः कर्मक्षयादिष्टे'तिवचनप्रामाण्यात् कर्मजालक्षयश्च न निर्मूलकारणोच्छेदमन्तरेण सर्वथा सम्भवति, ततो मिथ्यात्वप्रतिपक्षं सम्यग्दर्शनमज्ञानप्रतिपक्षं च ज्ञानमविरतिप्रतिपक्षं च चारित्रं सम्यक् सेव्यमानं यदा प्रकर्षप्राप्तं भवति तदा सर्वथा कारणापगमतो निर्मलकर्म्मोच्छेदो भवतीति ज्ञानादिकं साक्षान्मुक्त्यङ्गं, न विनयमात्रं, केवलं विनयो ज्ञानादिषु विधीयमानः परम्परा मुक्त्यङ्गं साक्षात्तु ज्ञानादिहेतुरिति सर्वकल्याणभाजनं तत्र २ प्रदेशे गीयते, यदि पुनर्यतिविनयवादिनोऽपि ज्ञानादिवृद्धिहेतुतया मुक्त्यङ्गं विनियमिच्छन्ति तदा तेऽप्यस्मत्पथवर्त्तिन एवेति न कदा(का)-चिद्विप्रतिपत्तिरिति कृतं प्रसङ्गेन, प्रकृतमनुसन्धीयते।

'सूयगडस्स णं परित्ता' इत्यादि सर्वं प्राग्वत्, उद्देशानां च परिमाणं कृत्वा उद्देशसमुद्देशकालासङ्ख्या भावनीया, 'सेत्तं सूयगडे' तदेतत्सूत्रकृतं॥

*मू. ( १४१ ) से किं तं ठाणे ?, ठाने नं जीवा ठाविज्जंति, अजीवा ठाविज्जंति, ससमए ठाविज्जइ परसमए ठाविज्जइ ससमयपरसमए ठाविज्जइ लोए ठाविज्जइ अलोए ठाविज्जइ लोआलोए ठाविज्जइ, ठाणे नं टंका कूडा सेला सिहरिणो पब्भारा कुंडाइं गुहाओ आगरा दहा नईओ आघविज्जाओ निज्जुत्तीओ संखेज्जाओ संगहणीओ संखेज्जाओ पडिवत्तीओ,*

*से णं अंगट्ठयाए तइए अंगे एगे सुअक्खंधे, दस अज्झयणा एगवीसं उद्देसणकाला एक्कवीसं समुद्देसणकाला बावत्तरि पयहस्सा पयग्गेणं संखेज्जा अक्खरा अनंता गमा अनंता पज्जवा परित्ता तसा अनंता थावरा सासयकडनिबद्धनिकाइआ जिनपन्नत्ता भावा आघविज्जंति पन्नविज्जंति परूविज्जंति दंसिज्जंति निदंसिज्जंति उवदंसिज्जंति, से एवं आया एवं नाया एवं विण्णाया एवं चरणकरणपरूवणा आघविज्जइ, से तं ठाणे॥*

**वृ.** 'से किं त'मित्यादि, अथ किं तत्स्थानं ?, तिष्ठन्ति, प्रतिपाद्यतया जीवदयः, पदार्था अस्मिन्निति स्थानं, तथा चाह सूरिः-'ठाणे न'मित्यादि, स्थानेन स्थाने वा 'ण'मिति वाक्यालङ्कारे, जीवाः स्थाप्यन्ते-यथाऽवस्थितस्वरूपप्ररूपणा व्यवस्थाप्यन्ते, शेषं प्रायो निगदसिद्धं, नवरं 'टंक'त्ति छिन्नतटं टङ्कं, कूटानि पर्वतस्योपरि, यथा वैताढ्यस्योपरि सिद्धायतनकूटादीनि नव कूटानि, शैला हिमवदादयः, शिखरिणः-शिखरेण समन्विताः, ते च वैताढ्यदयः तथा यत्कूटमुपरि कुब्जाग्रवत् कुब्जं तत्प्राग्भारं, यद्वा यत्पर्वतस्योपरि हस्तिकुम्भाकृति कुब्जं विनर्गतं तत्प्राग्भारं,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कुण्डानि-गङ्गाकुण्डादीनि गुहाः-तिमिश्रगुहादयः आकराः-रूप्यसुवर्णाद्युत्पत्तिस्थानानि, हृदाः-पौण्डरीकादयः, नद्यो-गङ्गासिन्ध्वादय आख्यायन्ते, तथा स्थानेनाथवा स्थाने 'ण'मितिवाक्यालङ्कारे एकाद्येकोत्तरिकया वृद्धया दशस्थानकं यावद्विवर्द्धितानां भावानां प्ररूपणा आख्यायते, किमुक्तं भवति?

एकसङ्ख्यायां द्विसङ्ख्यायां यावद्दशसङ्ख्यायां ये ये भावा यथा यथाऽन्तर्भवन्ति तथा तथा ते प्ररूप्यन्ते इत्यर्थः, यथा 'एगे आया' इत्यादि, तथा 'जं इत्थं च नं लोके तं सव्वं दुपडोयारं, तंजहा-जीया चेव अजीवा चेव' इत्यादि, 'ठाणस्स नं परित्ता वायणा' इत्यादि, सर्वं प्राग्वत् परिभावनीयं, पदपरिमाणं च पूर्वस्मात् पूर्वस्मादङ्गादुत्तरस्मिन्नुत्तरस्मिन्नङ्गे द्विगुणमवसेयं, शेषं पाठसिद्धं, यावन्निगमनं।

*मू. ( १४२ ) से किं तं समवाए?, समवाए णं जीवा समासिज्जंति, अजीवा समासिज्जंति, जीवाजीव समासिज्जंति ससमए समासिज्जइ परसमए समासिज्जइ ससमयपरसमए समासिज्जइ लोए समासिज्जइ अलोए समासिज्जइ लोआलोए समासिज्जइ, समवाए नं एगाइआणं एगुत्तरिआणं ठाणसयविवड्ढिआणं भावाणं परूवणा आघविज्जइ दुवालसविहस्स य गणिपडिगस्स पल्लवग्गे समासिज्जइ,*

*समवायस्स णं परित्ता वायणा संखिज्जा अनुओगदारा संखेज्जा वेढा संखेज्जा सिलोगा संखिज्जाओ निज्जुत्तीओ संखिज्जाओ पडिवत्तीओ,*

*से नं अंगट्ठयाए चउत्थे अंगे एगे सुअक्खंधे, एगे अज्झयणे एगे उद्देसणकाले एगे समुद्देसणकाले एगे चोआले सयसहस्से पयग्गेणं संखेज्जा अक्खरा अनंता गमा अनंता पज्जवा परित्ता तसा अनंता थावरा सासयकडनिबद्धनिकाइआ जिनपन्नत्ता भावा आघविज्जंति पन्नविज्जंति परूविज्जंति दंसिज्जंति निदंसिज्जंति उवदंसिज्जंति, से एवं आया से एवं नाया एवं विण्णाया एवं चरणकरणपरूवणा आघविज्जइ, से तं समवाए॥*

वृ. 'से किं त'मित्यादि, अथ कोऽयं समवायः?, सम्यगवायो-निश्चयो जीवादीनां पदार्थानां यस्मात्म समवायः, तथा चाह सूरिः-'समवाए न'मित्यादि, समवायेन यद्वा समवाये 'ण'मिति वाक्यालङ्कारे, जीवाः 'समाश्रीयन्ते' समिति-सम्यग् यथाऽवस्थिततया आश्रीयन्ते-बुद्धा स्वीक्रियन्ते, अथवा जीवाः समास्यन्ते-कुप्ररूपणाभ्यः समाकृष्य सम्यक्प्ररूपणायां प्रक्षिप्यन्ते शेषमानिगमनं निगदसिद्धं, नवरकेमादिकानामेकोत्तराणां शतस्थानकं यावद्विवर्द्धितानां भावानां प्ररूपणा आख्यायते, अयमत्र भावार्थः-एकसङ्ख्यायां द्विसङ्ख्यायां यावच्छतसङ्ख्यायां ये ये भावा यथा २ यत्र यत्रान्तर्भवन्ति ते ते तत्र तत्र तथा २ प्ररूप्यन्ते, यथा 'एगे आया' इत्यादि॥

*मू. ( १४३ ) से किं ते विवाहे?, विवाहे णं जीवा विआहिज्जंति अजीवा विआहिज्जंति जीवाजीव विआहिज्जंति ससमए विआहिज्जंति परसमए विआहिज्जंति ससमयपरसमए विआहिज्जंति लोए विआहिज्जंति अलोए विआहिहिज्जंति लोयालोए विआहिज्जंति,*

*विवाहस्स णं परित्ता वायणा संखिज्जा अनुओगदारा संखिज्जा वेढा संखिज्जा सिलोगा संखिज्जाओ निज्जुत्तीओ संखिज्जाओ संगहणीओ संखिज्जाओ पडिवत्तीओ,*

*से नं अंगट्ठयाए पंचमे अंगे एगे सुअक्खंधे, एगे साइरेगे अज्झयणसए दस उद्देसगसहस्साइं*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*दस समुद्देसगसहस्साइं छत्तीसं वागरणसहस्साइं दो लक्खा अट्ठासीइं पयसहस्साइं पयग्गेणं संखिज्जा अक्खरा अनंता गमा अनंता पज्जवा परित्ता तसा अनंता थावरा सासयकडनिबद्ध-निकाइआ जिनपन्नत्ता भावा आघविज्जंति पन्नविज्जंति जाव उवदंसिज्जंति, से एवं आया एवं नाया एवं विण्णाया एवं चरणकरणपरूवणा आघविज्जइ, से तं विवाहे॥*

**वृ.** अथ केयं व्याख्या ?, व्याख्यान्ते जीवादयः पदार्था अनयेति व्याख्या, 'उपसर्गादात इत्यङ्प्रत्ययः' तथा चाह सूरिः-'विवाहे ण'मित्यादि, व्याख्यायां जीवा व्याख्यान्ते शेषमानि-गमनं पाठसिद्धं।

*मू. ( १४४ ) से किं तं नायाधम्मकहाओ ?, नायाधम्मकहासु नं नायाणं नगराइं उज्जाणाइं चेइआइं वनसंडाइं समोसरणाइं रायाणो अम्मापियरो धम्मायरिया धम्मकहाओ इहलोइयपरलोइया इड्डिविसेसा भोगपरिच्चाया पव्वज्जाओ परिआया सुअपरिग्गहा तवोवहाणाइं संलेहणाओ भत्तपच्चक्खाणाइं पाओवगमणाइं देवलोगगमणाइं सुकलपच्चायाईओ पुणबोहिलाभा अंतकिरिआओ अ आघविज्जंति, दस धम्मकहाणं वग्गा, तत्थ नं एगमेगाए धम्मकहाए पंच-पंचअक्खाइआसायाइं एगमेगाए अक्खाइआए पंचपंचउवक्खाइआसयाइं एगमेवाए उवक्खाइ-आए पंचपंचअक्खाइउवकक्खाइआसयाइं एवमेव सपुव्वावरेणं अद्धुट्ठाओ कहाणगकोडीओ हवंतित्ति समक्खायं,*

*नायाधम्मकहाणं परित्ता वायणा संखिज्जा अनुओगदारा संखिज्जा वेढा संखिज्जा सिलोगा संखिज्जाओ निज्जुत्तीओ संखिज्जाओ संगहणीओ संखिज्जाओ पडिवत्तिओ,*

*से णं अंगट्ठयाए छट्ठे अंगे दो सुअक्खंधा एगूणवीसं अज्झयणा एगूणवीसं उद्देसणकाला एगूणवीसं समुद्देसणकाला संखेज्जा पयसहस्सा पयग्गेणं संखेज्जा अक्खरा अनंता पज्जवा परित्ता तसा अनंता थावरा सासयकडनिबद्धनिकाइआ, जिनपन्नत्ता भावा आघविज्जन्ति पन्नविज्जंति परूविज्जंति दंसिज्जंति निदंसिज्जंति उवदंसिज्जंति, से एवं आया एवं नाया एवं विण्णाया एवं चरणकरणपरूवणा आघविज्जइ, से तं नायाधम्मकहाओ॥*

**वृ.** 'से किं त'मित्यादि, अथकास्ता ज्ञातधर्मकथाः ?, ज्ञातानि-उदाहरणनि तत्प्रधाना धर्मकथा ज्ञातधर्मकथाः, अथवा ज्ञातानि-ज्ञाताध्ययनानि प्रथमश्रुतस्कन्धे धर्मकथा द्वितीयश्रतस्कन्धे यासुग्रन्थपद्धतिषु (ता) ज्ञाताधर्मकथाः पृषोदरादित्वात्पूर्वपदस्य दीर्घान्तता, सूरिराह-

ज्ञाताधर्मकथासु 'ण'मिति वाक्यालङ्कारेज्ञातानाम्-उदाहरणभूतानां नगरादीनि व्याख्यायन्ते, तथा 'दस धम्मकहाणं वग्गा' इत्यादि, इह प्रथमश्रुतस्कन्धे एकोनविंशतिर्ज्ञाताध्ययनानि ज्ञातानि-उदाहरणानि तत्प्रधानानि अध्ययनानि द्वितीयश्रुतस्कन्धे दश धर्मकथाः धर्मस्य-अहिंसादिलक्षण-स्य प्रतिपादिकाः कथा धर्मकथाः, अथवा धर्मादनपेता धर्म्याः धर्म्याश्च ताः कथाश्च धर्म्यकथाः,

तत्र प्रथमे श्रुतस्कन्धे योन्येकोनविंशतिर्ज्ञाताध्ययनानि तेष्वादिमानि दश ज्ञातानि ज्ञातान्येव न तेष्वाख्यायिकादिसम्भवः, शेषाणि पुरन्यानि नव ज्ञातानि तेष्वेकैकस्मिन् चत्वारिंशानि पञ्च पञ्चाख्यायिकाशतानि [च] भवन्ति ४८६० एकैकस्यां चाख्यायिकायां पञ्च पञ्च उपाख्यायिका-शतानि २४३००००एकैकस्यां चोपाख्यायिकायां पञ्च पञ्च आख्यायिकोपाख्यायिकाशतानि सर्वसङ्ख्या १२१५०००००० एकविंशं कोटिशतं लक्षाः पञ्चाशत्, तत एवं कृते सति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रस्तुतसूत्रस्यवतारः, आह चटीकाकृत्

"इगवीसं कोडिसयं लक्खा पन्नास चेव बोद्धव्वा।
एवं कए समाणे अहिगयसुत्तस्स पत्थावो ॥

द्वितीये श्रुतस्कन्धे दशधर्मकथानां वर्गाः, वर्गः- समूहः, दश, धर्म्मकथासमुदाया इत्यर्थः, त एव च दशाध्ययनानि, एकैकस्यां धर्म्मकथायां-कथासमूहरूपायामध्यनप्रमाणायां पञ्च पञ्चा-ख्यायिकाशतानि, एकैकस्यां चाख्यायिकायां पञ्च पञ्च उपाख्यायिकाशतानि एकैकस्यां चोपाख्यायिकायां पञ्च पञ्च आख्यायिकोपाख्यायिकाशतानि सर्वसङ्ख्यया पञ्चविंशं कोटिशतं, इह नव ज्ञाताध्ययनसम्बन्ध्याख्यायिकादिसदृशा या आख्यायिकादयः पञ्चाशल्लक्षाधिकैकविंश-कोटिशतप्रमाणास्ता अस्मात्पञ्चविंशतिकोटिशतप्रमाणाद्राशे शोध्यन्ते, ततः शेषा अपुनरुक्ता अर्द्धचतुर्थाः कथानककोट्य भवन्ति, तथा चाह-

'एवमेव' उक्तप्रकारेणैव गुणिते शोधने च कृते 'सपूर्वापरेण' पूर्वश्रुतस्कन्धापरश्रुतस्कन्ध-कथाः समुदिता अनुपरुक्ता 'अद्धुट्ठाओ'त्ति अर्द्धचतुर्थाः कथानक कोट्य भवन्तीत्याख्यातं तीर्थकरणगणधरैः, आह च टीकाकृत्-

"पुनवीसं कोडीसयं एत्थ य समलक्खणाइगा जम्हा।
नवनायासम्बद्धा अक्खाइयमाइया तेणं ॥
ता सोहिज्जंति फुडं इमाओ रासीउ वेगलाणं तु।
पुणरुत्तवज्जियाणं पमाणमेयं विनिद्दिट्ठं ॥

तथा 'नायाधम्मकहाणं परित्ता वायणा' इत्यादि सर्वं प्राग्वद्भावनीयं यावन्निगगनं, नवरं सङ्ख्येयानि पदसहस्राणि पदाग्रेण-पदपरिमाणेन, तानि च पञ्च लक्षाः षट्सप्ततिः सहस्राः पदमपि चात्रौपसर्गिकं नैपातिकं नामिकमाख्यातिकं मिश्रं च वेदितव्यं, तथा चाह चूर्णिकृत्- "पयग्गेणंति उवसग्गपयं निवायपयं नामियपयं अक्खाइयपयं मिस्सपयं च पए पए अधिकिश्च पंच लक्खा छावत्तरिसहस्सा पयग्गेणं भवंति" अथवेह पदं सूत्रालापकरूपमुपगृह्यते, ततस्तथारूपपदापेक्षया सङ्ख्येयानि पदसहस्राणि भवन्ति, न लक्षाः, आह च चूर्णिकृत्- "अहवा सुत्तालावगपयग्गेणं संखेज्जाइं पयसहस्साइं भवंति" एवमुत्तरत्रापि भावनीयं ६ ॥

*मू. ( १४५ ) से किं तं उवासगदसाओ ?, उवासगदसासु णं समणोवासयाणं नगराइं उज्जाणाइं चेइआइं वनसंडाइं समोसरणाइं रायणो अम्मापियरो धम्मायरिआ धम्मकहाओ इहलोइअपरलोइआ इड्डिविसेसा भोगपरिच्चाया पव्वज्जाओ परिआगा सुअपरिग्गहा तवोवहाणाइं सीलव्वयगुण-वेरमणपच्चक्खाणपोसहोववासपडिवज्जणया पडिमाओ उवसग्गा संलेहणाओ भत्तपच्चक्खाणाइं पाओवगमनाइं देवलोगगमनाइं सुकुलपच्चायाईओ पुनबोहिलाभा अंतकिरिआओ अ आघविज्जंति,*

*उवासगदसाणं परित्ता वायणा संखेज्जा अनुओगदारा संखेज्जा वेढा संखेज्जा सिलोगा संखेज्जाओ निज्जुत्तीओ संखेज्जाओ संगहणीओ संखेज्जाओ पडिवत्तीओ,*

*से णं अंगट्ठयाए सत्तमे अंगे एगे सुअक्खंधे दस अज्झयणा दस उद्देसणकाला दस समुद्देस-णकाला संखेज्जा पयसहस्सा पयग्गेणं सङ्खेज्जा अक्खरा अनंता गमा अनंता पज्जवा परित्ता*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*तसा अनंता थावरा सासयकडनिबद्धनिकाइआ जिनपन्नत्ता भावा आघविज्जंति पन्नविज्जंति परूविज्जंति दंसिज्जंति निदंसिज्जंति उवदंसिज्जंति, से एवं आया एवं नाया एवं विन्नाया एवं चरणकरणपरूवणा आघविज्जइ, से तं उवासगदसाओ ॥*

वृ. 'से किं त'मित्यादि, अथ कास्ता उपासकदशाः ?, उपासकाः-श्रावकाः तद्गताणुव्रतगुण-व्रतादिक्रियाकलापप्रतिबद्धा दशा-अध्ययनानि उपासकदशाः, तथा चाह सूरिः-'उवासगदसासु ण'मित्यादि पाठसिद्धं यावन्निगमनं, नवरं सङ्ख्येयानि पदसहस्राणि पदाग्रेणेति एकादश लक्षा द्विपञ्चाशत्सहस्राणि इत्यर्थः, द्वितीयं तु व्याख्यानं प्रागिव भावनीयं।

*मू. ( १४६ ) से किं तं अंतगडदसाओ ?, अंतगडदसासु णं अंतगडाणं नगराइं उज्जाणाइं चेइआइं वणसंडाइं समोसरणाइं रायाणो अम्मापियरो धम्मायरिआ धम्मकहाओ इहलोइअपर-लोइआ इड्ढिविसेसा भोगपरिच्चागा पव्वज्जाओ परिआगा सुअपरिग्गहा तवोवहाणाइं संलेहणाओ भत्तपच्चक्खाणाइं पाओवगमपाइं अंतकिरिआओ आघविज्जंति,*

*अंतगडदसासु णं परित्ता वायणा संखिज्जा अनुओगदारा संखेज्जा वेढा संखेज्जा सिलोगा संखेज्जाओ निज्जुत्तीओ संखेज्जाओ संगहणीओ संखेज्जाओ पडिवत्तीओ,*

*से णं अंगट्ठयाए अट्ठमे अंगे एगे सुअक्खन्धे अट्ठ वग्गो अट्ठ उद्देसणकाला अट्ठ समुद्देसणकाला संखेज्जा पयग्गेणं संखेज्जा अक्खरा अनंता गमा अनंता पज्जवा परित्ता तसा अनंता थावरा सासयकडनिबद्धनिकाइआ जिनपन्नत्ता भावा आधविज्जंति पन्नविज्जंति परूविज्जंति दंसिज्जंति निदंसिज्जंति उवदंसिज्जंति, से एवं आया एवं नाया एवं विन्नाया एवं चरणकरणपरूवणा आघविज्जइ, सेतं अंतगडदसाओ ॥*

वृ. 'से किं त'मित्यादि, अथ कास्ता अन्तकृद्दशाः ?, अन्तो विनाशस्तं कर्मणस्तत्फलभूतस्य वा संसारस्य ये कृतवन्तस्तेऽन्तकृतः- तीर्थकरादयःतद्वक्तव्याप्रतिबद्धा दशा-अध्ययनानि अन्तकृद्दशाः, तथा चाह सूरिः-'अंतकड(कृद्)दशासु' 'ण'मिति वाक्यालङ्कारे, पाठसिद्धं यावद् 'अन्तकिरियाओ'त्ति भवापेक्षया अन्त्याश्च ताः क्रियाश्चान्त्यक्रियाः शैलेश्यवस्थादिका गृह्यन्ते, शेषं प्रकटार्थं यावद् 'अट्ठ वग्ग'त्ति वर्गःसमूहः, स चान्तकृतामध्ययनानां वा वेदितव्यः, सर्वाणि चाध्ययनानि वर्गवर्गान्तर्गतानि युगपदुद्दिश्यन्ते अत आह-अष्टावद्देशनकाला अष्टौ समुद्देशन-कालाः, सङ्ख्येयानि पदसहस्राणि पदाग्रेण तानि च किल त्रयोविंशतिः लक्षाश्चत्वारश्च सहस्राः, शेषं पाठसिद्धं यावन्निगमनम् ॥

*मू. ( १४७ ) से किं तं अनुत्तरोववाइअदसाओ ?, अनुत्तरोववाइअदसासु णं अनुत्तरोववाइआणं नगराइं उज्जाणाइं चेइआइं वनसंडाइं समोसरणाइं रायाणो अम्मापिअरो धम्मायरिआ धम्मकहाओ इहलोइअपरलोइआ इड्ढिविसेसा भोगपरिच्चागा पव्वज्जाओ परिआगा सुअपरिग्गहा तवोवहा-णाइं पडिमाओ उवसग्गा संलेहणाओ भत्तपच्चक्खाणाइं पाओवगमणाइं अनुत्तरोववाइयत्ते उववत्ती सुकुलपच्चायाईओ पुणबोहिलाभा अंतकिरिआओ आघविज्जंति,*

*अनुत्तरोववाइअदसासुणं परिता वायणा संखेज्जा अनुओगदारा संखेज्जा वेढा संखेज्जा सिलोगा संखेज्जाओ निज्जुत्तीओ संखेज्जाओ संगहणीओ संखेज्जाओ पडिवत्तीओ,*



Jain Education International For Private & Personal Use Only www.jainelibrary.org

*से णं अंगट्ठयाए नवमे अंगेएगे सुअक्खंधे तिन्नि वग्गा तिन्नि उद्देसणकाला तिन्नि समुद्देसणकाला संखेज्जाइं पयसहस्साइं पयग्गेणं संखेज्जा अक्खरा अनंता गमा अनंता पज्जवा परित्ता तसा अनंता थावरा सासयकडनिबद्धनिकासआ जिनंपत्रत्ता भावा आघविज्जंति पन्नविज्जंति परूविज्जंति दंसिज्जंति निदंसिज्जंति उवदंसिज्जंति, से एवं आया एवं नाया एवं विन्नाया एवं चरणकरणपरूवणा आघविज्जइ, से तं अनुत्तरोववाइअदसाओ॥*

**वृ.** 'से किं त'मित्यादि, अथ कास्ता अनुत्तरोपपातिकदशाः ?, न विद्यते उत्तरः-प्रधानो येभ्यस्तेऽनुत्तराः-सर्वोत्तमा इत्यर्थः, उपपातेन निर्वृत्ता औपपातिका अनुत्तराश्च ते औपपातिकाश्च अनुत्तरोपपातिकाः, विजयाद्यनुत्तरविमानवासिन इत्यर्थः, तद्वक्तव्यताप्रतिबद्धा दशा अनुत्तरोपपातिकदशाः, तथा चाह सूरिः-'अनुत्तरोववाइयदसासु न'मित्यादि पाठसिद्धं यावन्निगमनं, नवरमध्ययनसमूहो वर्गः, वर्गे २ च दश दशाध्ययनानि, वर्गश्च युगपदेवोद्दिश्यते इति त्रय एव उद्देशनकालास्त्रय एवं समुद्देशनकालाः, सङ्ख्येयानि च पदसहस्राणि-पदसहस्राष्टाधिकषट्चत्वारिंशल्लक्षप्रमाणानि वेदितव्यानि।

**मू. ( १४८ )** *से किं तं पण्हावागारणाइं ?, पण्हावागारणेसु णं अट्ठुत्तरं पसिणसयं अट्ठुत्तरं अपसिणसयं अट्ठुत्तरं पसिणापसिणसयंतंजहा-अंगुट्ठपसिणाइं बाहुपसिणाइं अद्दागपसिणाइं अन्नेवि विचित्ता विज्जाइसया नागसुवण्णेहिं सद्धिं दिव्वा संवाया आघविज्जंति,*

*पण्हावागारणाणं परित्ता वायणा संखेज्जा अनुओगदारा संखेज्जा वेढा संखेज्जा सिलोगा संखेज्जाओ निज्जुत्तीओ संखेज्जाओ संगहणीओ संखेज्जाओ पडिवत्तीओ,*

*से णं अंगट्ठयाए दसमे अंगे एगे सुअक्खंधे पणयालीसं अज्झयणा पणयालीसं उद्देसणकाला पणयालीसं समुद्देसणकाला संखेज्जाइं पयसहस्साइं पयग्गेणं संखेज्जा अक्खरा अनंता गमा अनंता पज्जवा परित्ता तसा अनंता थावरा सासयगडनिबद्धनिकाइआ जिनपन्नत्ता भावा आघविज्जंति पन्नविज्जंति परूविज्जंति द्रसिज्जंति निदंसिज्जंति उवदंसिज्जंति, से एवं आया से एवं नाया एवं विनाया एवं चरणकरणपरूवणा आघविज्जइ, सेत्तं पण्हावागरणाइं ॥*

**वृ.** 'से किं त'मित्यादि, अथ कानि प्रश्नव्याकरणानि ?, प्रश्नः-प्रीतीतः तद्विषयं निर्वचनं-व्याकरणं, तानि च बहूनि ततो बहुवचनं, तेषु प्रश्नव्याकरणेषु अष्टोत्तर प्रश्नशतं-या विद्या मन्त्रा वा विधिना जप्यमानाः पृष्टा एव सन्तः शुभाशुभं कथयन्ति ते प्रश्नाः तेषामष्टोत्तरं शत्तं, या पुनर्विद्या मन्त्रा वा विधिना जप्यमाना अपृष्टा एव शुभाशुभं कथयन्ति तेऽप्रश्नां तेषामष्टोत्तरं शतं, तथा ये पृष्टा अपृष्टाश्च कथयन्ति ते प्रश्नाप्रश्नाः तेषामप्यष्टोत्तरं शतमाख्यायते, तथाऽन्येऽपि च विविधा विद्यातिशयाः कथ्यन्ते, तथा नागकुमारैः सुपर्णकुमारैरन्यैश्च भवनपतिभिः सह साधूनां दिव्याः संवादा-जल्पविधयः कथ्यन्ते, यथा भवन्ति तथा कथ्यन्ते इत्यर्थः, शेषं निगदसिद्धं, नवरं सङ्ख्येयानि पदसहस्राणि द्विनवतिर्लक्षाः षोडश सहस्रा इत्यर्थः।

**मू. ( १४९ )** *से किं तं विवागसुअं ?, विवागसुए नं सुकडदुक्कडाणं कम्माणं फलविवागे आघविज्जइ, तत्थ नं दस दुहवावागा, दस सुवहिवागा,*

*से किं तं दुहविवागा ?, दुहविवागेसु नं दुहविवागाणं नगराइं उज्जाणाइं वनसंडाइं चेइआइं समोसरणाइं रायणो अम्मापिअरो धम्माअरिआ धम्मकाहाओ इहलोइअपरलोइआ इड्ढिविसेसा*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*निरयगमणाइं संसारभवपवंचा दुहपरंपराओ दुकुलपच्चायाईओ दुलहबोहिअत्तं आघविज्जइ से तं दुहंविवागा।*

*से किं तं सुहविवागा ?, सुहविवागेसु नं सुहविवागाणं नगराइं उज्जाणाइं वनसंडाइं चेइआइं समोसरणाइं रायणो अम्मापिअरो धम्माअरिआ धम्मकाहाओ इहलोइअपरलोइआ इड्डिविसेसा भोगपरिच्चागा पव्वज्जाओ परिआगा सुअपरिग्गहा तवोवहाणाइं संलेहणाओ भत्तपच्चक्खाणाइं पाओवगमणाइं देवलोगगमणाइं सहपरंपराओ सुकुलपच्चायाीइओ पुणबोहिलाभा अंतकिरिआओ आघविज्जंति।*

*विवागसुयस्स नं परित्ता वायणा संखिज्जा अनुओगदारा संखेज्जा सिलोगो संखेज्जाओ निज्जुत्तीओ संखेज्जाओ संगहणीओ संखेज्जाओ पडिवत्तीओ,*

*से णं अंगट्ठयाए इक्कारसमे अंगे दो सुअक्खन्धा वीसं अज्झयणा वीसं उद्दसणकाला वीसं समुद्देसणकाला संखिज्जाइं पयसहस्साइं पयग्गेणं संखेज्जा अक्खरा अनंता गमा अनंता पज्जवा परित्ता तसा अनंता थावरा सासयकडनिबद्धनिकाइआ जिणपन्नत्ता भावा आघविज्जंति पन्नविज्जंति परूविज्जंति दंसिज्जंति निदंसिज्जंति उवदंसिज्जंति,*

*से एवं आया एवं नाया एवं विन्नाया एवं चरणकरणपरूवणा आघविज्जइ, से तं विवागसुयं ११ ॥*

**वृ.**अथ किं तद्विपाकश्रुतं ?, विपचनं विपाकः शुभाशुभकर्मपरिणाम इत्यर्थः तत्प्रतिपादकं श्रुत विपाकश्रुतं, शेषं सर्वमानिगमनं पाठसिद्धं, नवरं सङ्ख्येयानि पदसहस्राणीति एका कोटी चतुरशीतिर्लक्षा द्वात्रिंशच्च सहस्राणि।

***मू.( १५० )***से किं तं दिट्ठिवाए ?, दिट्ठिवाए णं सव्वभावपरूवणा आघविज्जइ, से समासओ पंचविहे पन्नते, तंजहा- परिकम्मे १ सुत्ताइं २ पुव्वगए ३ अनुओगे ४ चूलिआ ५,*

*से किं तं परिकम्मे ?, परिकम्मे सत्तविहे पन्नत्ते, तंजहा-सिद्धसेणिआपरिकम्मे १ मनुस्स-सेणिआपरिकम्मे २ पुट्ठसेणिआपरिकम्मे ३ ओगाढसेणिआपरिकम्मे ४ उवसंपज्जण-सेणिआपरिकम्मे ५ विप्पजहणसेणिआपरिकम्मे ६ चुआचुअसेणिआपरिकम्मे ७,*

*से किं तं सिद्धसेणिआपरिकम्मे ?, २ चउदसविहे पन्नत्ते, तंजहा- माउगापयाइं १ एगट्ठिअपयाइं २ अट्ठपयाइं ३ पाढोआमासपयाइं ४ केउभूअं ५ रासिबद्धं ६ एगगुणं ७ दुगुणं ८ तिगुणं ९ केउभूअं १०, पडिग्गहो ११ संसारपडिग्गहो १२ नंदावत्तं १३ सिद्धावत्तं १४ ते सं सिद्ध-सेणिआपरिकम्मे १,*

*से किं तं मनुस्ससेणिआपरिकम्मे ?, मनुस्ससेणिआपरिकम्मे चउदसविहे पन्नत्ते, तंजहा-माउयापयाइं १ एगट्ठिअपयाइं २ अट्ठापयाइं ३ पाढोआमासपयाइं ४ केउभूअं ५ रासबद्धं ६ एगगुणं ७ दुगुणं ८ तिगुणं ९ केउभूअं १० पडिग्गहो ११ संसारपडिग्गहो १२ नंदावत्त १३ मणुस्सावत्तं १४, सेत्तं मणुस्ससेणिआपरिकम्मे २.*

*से किं तं पुट्ठसेणिआपरिकम्मे ?, पुट्ठसेणिआपरिकम्मे इक्कारसविहे पन्नत्ते, तंजहा-पाढोआमासपयाइं १ केउभूअं २ रासिबद्धं ३ एगगुणं ४ दुगुणं ५ तिगुणं ६ केउभूअं ७ पडिग्गहो ८ संसारपडिग्गहो ९ नंदावत्तं १० पुट्ठावत्तं ११. से त्तं पुट्ठसेणिआ परिकम्मं ३।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

से किं तं ओगाढ सेणिआपरिकम्मे ? ओगाढ सेणिआ परिकम्मे एक्कारसविहेपन्नते तंजहा पाढोआमास पयाइं १ केउभूअं २, रासिबद्धं ३ एगगुणं ४ दुगुणं ५ तिगुणं ६ केउभूएं ७, पडिग्गहो ८ संसार पडिग्गहो ९ नंदावत्तं १० ओगाढावत्तं ११ से तं ओगाढसेणिया परिकम्मे ४ ।

से किं तं उवसंपज्जणसेणियापरिकम्मे १ इक्कारसविहे पन्नत्ते तंजहा- पाढोआमासपयाइं १ केउभूयं २ रासीबद्धं ३ एगगुणं ४ दुगुणं ५ तिगुणं ६ केउभूएं ७ पडिग्गहो ८ संसारपडिग्गहो ९ नंदावत्तं १० उवसंपज्जणावत्तं ११ से त्तं उवसंपज्जणसेणिआ परिक्कम्मे ५ ।

से किं तं विप्पज्ज-हणसेणिआ परिकम्मे १ विप्पजहणसेणिया परिकम्मे एक्कारसविहे पन्नत्ते तंजहा- पाढोआमासपयाइं १ केउभूएं २ रासिबद्धं ३ एगगुणं ४ दुगुणं ५ तिगुणं ६ केउभूए ७ पडिग्गहो ८ संसार पडिग्गहो ९ नंदावत्तं १० विप्पजहणावत्तं ११, से तं विप्पजहणसेणिआ-परिकम्मे ६ ।

से किं तं चुआचुअसेणिआपरिकम्मे ? चुअअचुअसेणिआपरिकम्मे एक्कारसविहे पन्नत्ते, तंजहा- पाढोआमासपयाइं १ केउभूअं २ रासिबद्धं ३ एगगुणं ४ दुगुणं ५ तिगुणं ६ केउभूअं ७ पडिग्गहो ८ संसारपडिग्गहो ९ नंदावत्तं १० चूआचूअवत्तं ११, से तं चूआचूअसेणिआपरिकम्मे ७ छ चउक्कनइआइं सत्त तेरासियाइं, सेत्तं परिकम्मे १ ।

से किं तं सुत्ताइं ?, सुत्ताइं बावीसं पन्नत्ताइं, तंजहा, उज्जुसुयं १ परिणयापरिणयं २ बहुभंगिअं ३ विजयचरियं ४ अनंतरं ५ परंपरं ६ मासाणं ७ संजूहं ८ संभिण्णं ९ आहव्वायं १० सोवत्थिअवत्तं ११ नंदावत्तं १२ बहुलं १३ पुट्ठापुट्ठं १४ विआवत्तं १५ एवंभूअं १६ दुयावत्तं १७ वत्तमाणप्पयं १८ सम्मिरूढं १९ सव्वओभद्दं २० पस्सासं २१ दुप्पडिग्गहं २२

इच्चेइआइं बावीसं सुत्ताइं छिन्नच्छेअनइआणि ससमयसुत्तपरिवाडीए इच्चेआइं बावीसं सुत्ताइं छिन्नच्छेअनइआणि आजीविअसुत्तपरिवाडीए इच्चेआइं बावीसं सुत्ताइं तिगणइयाणि तेरासिअसुत्तपरिवपरिवाडीइ इच्चेइ आइं बावीसं सुत्ताइं चउक्कनइआणि ससमयसुत्तपरिवाडीए एवामेव सपुव्वावरेणं अट्ठासीईं सुत्ताइं भवंतीति मक्खायं, से तं सुत्ताइं २ ।

से किं तं पुव्वगए ?, २ चउद्दसविहे पन्नत्ते, तंजहा-उप्पायपुव्वं १ अग्गाणीयं २ वीरिअं ३ अत्थिनत्थिप्पवायं ४ नाणप्पवायं ५ सच्चप्पवायं ६ आयप्पवायं ७ कम्मप्पवायं ८ पच्चक्खाण-प्पवायं ९ विज्जुणुप्पवायं १० अवंझं ११ पाणाऊ १२ किरिआविसालं १३ लोकबिंदुसारं १४

उप्पायपुव्वस्स णं दसं वत्थू चत्तारि चूलिआवत्थू पन्नत्ता, अग्गेणीयपुव्वस्स णं चोद्दस वत्थू दुवालस चुलिआवत्थू पन्नत्ता, वीरियपुव्वस्स णं अट्ठ वत्थू चूलिआवत्थू पन्नत्ता, अत्थिनत्थि-प्पवायपुव्वस्स णं अट्ठारस वत्थू दस चूलिआवत्थू पन्नत्ता, नाणप्पवायपुव्वस्स णं बारस वत्थू पन्नत्ता, सच्चप्पवायपुव्वस्स णं दोण्णि वत्थू पन्नत्ता, आयप्पवायपुव्वस्स णं सोलस वत्थू पन्नत्ता, कम्मप्पवायपुव्वस्स णं तीसं वत्थू पन्नत्ता, पच्चक्खाणपुव्वस्स णं वीसं वत्थू पन्नत्ता, विज्जाणुप्प-वायपुव्वस्स णं पन्नरस वत्थू पन्नत्ता, अवंझपुव्वस्स णं बारस वत्थू पन्नत्ता, पाणाउपुव्वस्स णं तेरस वत्थू पन्नत्ता, किरिआविसालपुव्वस्स णं तीसं वत्थू पन्नत्ता, लोकबिंदुसारपुव्वस्स णं पणवीस वत्थू पन्नत्ता,

**मू. ( १५१ )** "दस १ चोद्दसं २ अट्ठ ३ [अ]ट्ठारसेव ४ बारस ५ दुवे ६ अ वत्थूणि ।
सोलस ७ तीसा ८ वीसा ९ पन्नरस १० अनुप्पवायंमि ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*मू. ( १५२ )* *बारस इक्कारसमे बारसमे तेरसेवे वत्थूणि।*
*तीसा पुण तेरसमे चोद्दसमे पण्णवीसाओ॥*

*मू. ( १५३ )* *चत्तारि १ दुवालस २ अट्ठ ३ चेव दस ४ चेव चुल्लवत्थूणि।*
*आइल्लाण चउण्हं सेसाणं चूलिआ नत्थि॥*

**वृ.** 'से किं त'मित्यादि, अथ कोऽयं दृष्टिवादः ?, दृष्टयो-दर्शनानि वंदन वादः दृष्टीनां वादो दृष्टिवादः, अथवा पतनं पातो दृष्टीनां पातो यत्र स दृष्टिपातः, तथाहि-तत्र सर्वनयदृष्टय आख्यायन्ते, तथा चाह सूरिः 'दिट्ठिवाए ण'मित्यादि, दृष्टिवादेन अथवा दृष्टिपातेन यद्वा दृष्टिवाजे दृष्टिपाते 'ण'मिति वाक्यालङ्कारे सर्वभावप्ररूपणा आख्यायते, 'से सभासतो पंचविहे पन्नते' इत्यादि, सर्वमिदं प्रायो व्यवच्छिन्न तथापि लेशतो यथाऽऽगतसम्प्रदायं किञ्चिद्याख्यायते, स दृष्टिवादो दृष्टिपातो वा समासतः पञ्चविधः प्रज्ञप्तः, तद्यथा-परिकर्म १ सूत्राणि २ पूर्वगतं ३ अनुयोग ४ श्चूलिका ५,

तत्र परिकर्म नाम योग्यतापादनं तद्धेतुः शास्त्रमपि परिकर्म, किमुक्तं भवति ?-सूत्रादि-पूर्वगतानुयोगसूत्रार्थग्रहण-योग्यतासम्पादनसमर्थानि परिकर्माणि, यथा गणितशास्त्रे सङ्कलनादी-न्याद्यानि षोडश परिकर्माणि शेषगणितसूत्रार्थग्रहणे योग्यतासम्पादनसमर्थानि, तथाहि-यथा गणितशास्त्रे गणितशास्त्रगताद्यषोडशपरिकर्मगृहीतसूर्तार्थः सन् शेषगणितसूत्रार्थग्रहणयोग्यो भवति, नान्यथा, तथा गृहीतविवक्षितपरिकर्मसूत्रार्थः सन् शेषसूत्रादिरूपपिष्टवादश्रुतग्रहणयोग्यो भवति, नेतरथा, तथा चोक्तं चूर्णौ-"परिकम्मेति योग्यताकरणं, तह गणियस्स सोलस परिकम्मा, तग्गहियसुत्तत्थो सेसगणियस्स जोग्गो भवइ, एवं गहियपरिकम्मसुत्तत्थो सेससुत्ताइदिट्ठिवायस्स जोग्गो भवइ"त्ति।

तच्च परिकर्म सिद्धश्रेणिकापरिकर्मदिमूलभेदापेक्षया सप्तविधं, मातृकापदाद्युत्तरभेदा-पेक्षया-त्र्यशीतिविधं, तच्च समूलोत्तरभेदं सकलमपि सूत्रताऽर्थतश्च व्यवच्छिन्नं, यथागतसम्प्रदायतो वा वाच्यं, एतेषां च सिद्धश्रेणिकापरिकर्मादीनां सप्तानां परिकर्मणामाद्यानि षट्परिकर्माणि स्वसमय-वक्तव्यतानुगतानि स्वसिद्धान्तप्रकाशकानीत्यर्थः, ये तु गोशालप्रवर्तिता आजीविकाः पाषंडिन-स्तन्मतेन च्युताच्युतश्रेणिका षट्परिकर्मसहि(ता)तानि सप्तापि परिकर्माणि प्रज्ञाप्यन्ते, सम्प्रत्येष्वेव परिकर्मसु नयचिन्ता, तत्र नयाः सप्त नैगमादयः, नैगमोऽपि द्विधा-सामान्यग्राही विशेषग्राही च, तत्र यः सामान्यग्राही स सङ्ग्रहं प्रविष्टो यस्तु विशेषग्राही स व्यवहारं, आह च भाष्यकृत्-

जो सामन्नगाही स नेगमो संगहं गओ अहवा।
इयरो ववहारमिओ जो तेण समाणनिद्देसो॥

शब्दादयश्च त्रयोऽपि नया एक एव नयः परिकल्प्यते, तत एवं चत्वार एव नयाः, एतैश्चतुर्भि-र्नयैराद्यानि षट् परिकर्माणि स्वसभयवक्तव्यतया परिचिन्त्यन्ते, तथा चाह चूर्णिकृत्-"इयाणिं परिकम्मे नयचिंता, नेगमो दुविहो-संगहिओ असंगहिओ य, तत्थ संगहिओ संगहं पविट्ठो असंगहिओ ववहारं, तम्हा संगहो ववहारो उज्जुसुओ सद्दाइया य एक्को, एवं चउरो नया, एएहिं चउहिं नएहिं छ ससमइगा परिकम्मा चिंतिज्जंति"

तथा चाह सूत्रकृत्-छ 'चउक्कनइयाइं'ति आद्यानि षट् परिकर्माणि चतुर्नयिकानि-चतुर्नयो-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पेतानि, तथा त एव गोशालप्रवर्त्तिता आजीविकाः पाखण्डिनस्त्रैराशिका उच्यन्ते, कस्मादिति चेदुच्यते ?,

इह ते सर्वं वस्तु त्र्यात्मकमिच्छन्ति, तद्यथा-जीवोऽजीवो जीवाजीवश्च, लोका अलोका लोकालोकाश्च, सदसत्सदसत्, नयचिन्तायामपि त्रिविधं नयमिच्छन्ति, तद्यथा-द्रव्यास्तिकं पर्यायास्तिकमुभयास्तिकं च, ततस्त्रिभी राशिभिश्चरन्तीति त्रैराशिकाः तन्मतेन सप्तापि परिकर्माणि उच्यन्ते, तथा चाह सूत्रकृत-'सत्त तेरासिया' इति, सप्त परिकर्माणि त्रैराशिकमतानुयायीनि, एतदुक्तं भवति-पूर्वं सूरयो नयचिन्तायां त्रैरासिकमतमवलम्बमानाः सप्तापि परिकर्माणि त्रिर्विधयायि नयचिन्तया चिन्तयन्ति स्मेति, 'से त्तं परिकम्मे' तदेतत्परिकर्म।

'से किं तं सुत्ताइ' अथ कानि सूत्राणि ?, पूर्व(स)स्य पूर्वगतसूत्रार्थस्य सूचनात्सूत्राणि, तथाहि-तानि सूत्राणि सर्वद्रव्याणां सर्वपर्यायाणां सर्वनयानां सर्वभङ्गविकल्पानां प्रदर्शकानि, तथा चोक्तं चूर्णिकृता-''तानि य सुत्ताइं सव्वदव्वाण सव्वपज्जवाण सव्वनयाण सव्वभंगविक-प्पाण य पदंसगाणि। सव्वस्स पुव्वगयस्स सुयस्स अत्थस्स य सूयगत्ति सूयणत्ताउ(वा) सुया भणिया जहाभिहाणत्था'' इति, आचार्य आह-

सूत्राणि द्वाविंशतिः प्रज्ञप्तानि, तद्यथा, 'ऋजुसूत्र'मित्यादि, एतान्यपि सम्प्रति सूत्रतोऽर्थतश्च व्यवच्छिन्नानि यथागतसम्प्रदायतो वा वाच्यानि, एतानि च सूत्राणि नयविभागतो विभज्यमानानि अष्टाशीतिसङ्ख्यानि भवन्ति, कथमिति चेत् ? अत आह-'इच्चेइयाइं बावीसं सुत्ताइं' इत्यादि,

इह यो नाम नयः सूत्रं छेदेन छिन्नमेवाभिप्रैति न द्वितीयेन सूत्रेण सह सम्बन्धयति यथा 'धम्मो मंगलमुक्किट्ठ'मिति श्लोकं, तथाहि-अयं श्लोकः छिन्नच्छेदनयमतेन व्याख्यायमानो न द्वितीयादीन् श्लोकानपेक्षते नापि द्वितीयादयः श्लोका अमुं, अयमत्राभिप्रायः-तथा कथञ्चनाप्यमुं श्लोकं पूर्वसूरयः छिन्नच्छेदनयमतेन व्याख्यान्ति स्म यथा न मनागपि द्वितीयादिश्लोकानामपेक्षा भवति, द्वितीयादीनपि श्लोकान् तथा व्याख्यान्ति स्म यथा न तेषां प्रथमश्लोकस्यापेक्षा, तथा सूत्राण्यपि यन्नयाभिप्रायेण परस्परं निरपेक्षाणि व्याख्यान्ति स्म स छिन्नच्छेदनयः, छिन्नो-द्विधाकृतः पृथक्कृतः छेदः-पर्यन्तो येन स छिन्नच्छेदः प्रत्येकं विकल्पित-पर्यन्त इत्यर्थः, स चासौ नयश्च छिन्नच्छेदन-य(:)श्च, इत्येतानि द्वाविंशतिः सूत्राणि स्वसमयसूत्र-परिपाट्यां-स्वसमयवक्तव्यतामधिकृत्य सूत्रपरिपाट्यां विवक्षितायां छिन्नछेदनयिकानि, अत्र 'अतोऽनेकस्वरा'दिति मत्वर्थीय इकप्रत्ययः, ततोऽयमर्थः-छिन्नच्छेदनयवन्ति द्रष्टव्यानि, तथा 'इच्चेइयाइं' इत्यादि, इत्येतानि द्वाविंशतिः सूत्राणि आझीविकसूत्रपरिपाट्य-गोशाल-प्रवर्त्तिताजीविकपाखण्डिमतेन सूत्रपरिपाट्य विवक्षितायामच्छिन्नच्छेदनयिकानी, इयमत्र भावना-

अच्छिन्नच्छेदनयो नाम यः सूत्रं सूत्रान्तरेण सहाच्छिन्नमर्थतः सम्बद्धमभिप्रैति, यथा 'धम्मो मंगलमुक्किट्ठ'मिति श्लोकं, तथाहि-अयं श्लोकोऽच्छिन्नच्छेदनयमतेन व्याख्यायमानो द्वितीयादीन् श्लोकानपेक्षते द्वितीयादयोऽपि श्लोका एनं श्लोकं, एवमेतान्यपि द्वाविंशतिः सूत्राणि अक्षर-रचनामधिकृत्य परस्परं सूत्राणां सम्बन्धासम्बन्धावधिकृत्य भेदो दर्शितः,

सम्प्रत्यन्यथा नयविभागमधिकृत्य भेदं दर्शयति-'इच्चेइयाइं' इत्यादि, इत्येतानि द्वाविंशतिः सूत्राणि त्रैराशिकसूत्रपरिपाट्यां-त्रैराशिकनयमतेन सूत्रपरिपाट्यां विवक्षितायां त्रकनयिकानि,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्रिकेति प्राकृतत्वात् स्वार्थे कः प्रत्ययः, ततोऽयमर्थः,त्रिनयिकानि-त्रिनयोपेतानि, किमुक्तं भवति ?-त्रैराशिकमतमवलम्ब्य द्रव्यास्तिकायादिनयत्रिकेण चिन्त्यन्ते इति, तथा इत्येतानि द्वाविंशतिः सूत्राणि स्वसमयसूत्रपरिपाट्यां-स्वसमयवक्तव्यतामधिकृत्य सूत्रपरिपाट्यां विवक्षितायां चतुर्नयिकानिसङ्ग्रहव्यवहारऋजुसूत्रशब्दरूपनयचतुष्टयोपेतानि सङ्ग्रहादिनयचतुष्टयेन चिन्त्यते इत्यर्थः, एवमेव-उक्तेनैव प्रकारेण 'पुव्वावरेणं'ति पूर्वाणि चापराणि च पूर्वापरं समाहारप्रधानो द्वन्द्वः, पूर्वापरसमुदाय इत्यर्थः, ततः, एकदुक्तं भवति-नयविभागतो विभक्तानि पूर्वाण्यपराणि च सूत्राणि समुदितानि सर्वसङ्ख्यया ऽष्टाशीतिः सूत्राणि भवन्ति, चतसृणां द्वाविंशतीनामष्टाशीतिमानत्वात, इत्याख्यातं तीर्थकरगणधरैः, 'से तं सुत्ताइं' तान्येतानि सूत्राणि २।

'से किं त'मित्यादि, अथ किं तत्पूर्वगतं ?, इह तीर्थकरस्तीर्थप्रवर्त्तनकाले गणधरान् सकलश्रुतार्थावगाहनसमर्थानधिकृत्य पूर्वं पूर्वगतं सूत्रार्थं भाषते, ततस्तानि पूर्वाण्युच्यन्ते, गणधराः पुनः सूत्ररचनां विदधतः आचारादिक्रमेण विदधति स्थापयन्ति वा, अन्ये तु व्याचक्षते-पूर्वं पूर्वगतसूत्रार्थमर्हन् भाषते, गणधरा अपि पूर्वं पूर्वगतसूत्रं विरचयन्ति पश्चादाचारादिकम्, अत्र चोदक आह-नन्विदं पूर्वापरविरुद्धं यस्मादादौ निर्युक्तावुक्तं-'सव्वेसिं आयारो पढमो' इत्यादि, सत्यमुक्तं, किन्तु तत्स्थापनामधिकृत्योक्तमक्षररचनामधिकृत्य पुनः पूर्वं पूर्वाणि कृतानि ततो न कश्चित् पूर्वापरविरोधः, सूरिराह-

'पुव्वगयं' इत्यादि, पूर्वगतं श्रुतं चतुर्दशविधं प्रज्ञप्तं, तद्यथा-'उत्पादपूर्व'मित्यादि, तत्र उत्पादप्रतिपादकं पूर्वमुत्पादपूर्वं, तथाहि-तत्र सर्वद्रव्याणां सर्वपर्यायाणां चोत्पादमधिकृत्य प्ररूपणा क्रियते, आह चूर्णिकृत्-"पढमं उप्पायपुव्वं, तत्थ सव्वदव्वाणं पज्जवाण य उप्पायभंगीकाउं पन्नवणा कया" इति, तस्य पदपरिमाणमेका पदकोटी। द्वितीयमग्रायणीयं, अग्रं परिमाणं तस्यायनं गमनं परिच्छेदनमित्यर्थः तस्मै हितमग्रायणीयं, सर्वद्रव्यादिपरिमाणपरिच्छेदकारीति भावार्थः, तथाहि-तत्र सर्वजीवद्रव्याणां सर्वपर्यायाणां सर्वजीवविशेषाणां च परिमाणमुपवर्ण्यते, यत उक्तं चूर्णिकृता-

"बिइयं अग्गाणीयं, तत्थ सव्वदव्वाण पज्जवाण सव्वजीवाण य अग्गं-परिमाणं वन्निज्जइ"त्ति, अग्रायणीयं, तस्य पदपरिमाणं षण्णवतिः पदशतसहस्राणि, तृतीयं पूर्वं 'वीरियं'न्ति पदैकदेशे पदसमुदायोपचाराद्वीर्यप्रवादं, तत्र सकर्मेतराणां जीवानामजीवानां च वीर्यं प्रवदन्तीति वीर्यप्रवादं, 'कर्मणोऽणि'ति अण्प्रत्ययः, तस्य पदपरिमाणं सप्ततिः पदशतसहस्राणि,

चतुर्थमस्तिनास्तिप्रवादं, तत्र यद्वस्तु लोकेऽस्ति धर्मास्तिकायादि यच्च नास्ति खरशृङ्गादि तत्प्रवदतीत्यस्तिनास्तिप्रवादं, अथवा सर्वं वस्तु स्वरूपेणास्ति पररूपेण नास्तीति प्रवदतीति अस्तिनास्तिप्रवादं, तस्य पदपरिमाणं षष्टिः पदशतसहस्राणि।

पञ्चमं ज्ञानप्रवादं, ज्ञानं-मतिज्ञानादिभेदभिन्नं पञ्चप्रकारं तत्सप्रपञ्चं वदतीति ज्ञानप्रवादं, तस्य पदपरिमाणमेका पदकोटी पदेनैकेन न्यूना।

षष्ठं सत्यप्रवादं, सत्यं-संयमो वचनं वा तत्सत्यं संयमं वचनं वा प्रकर्षेण सप्रपञ्चं वदतीति सत्यप्रवादं, तस्य पदपरिमाणमेका पदकोटी षड्भिः पदैरभ्यधिका।

सप्तमं पूर्वमात्मप्रवादं, आत्मानं-जीवमनेकधा नयमतभेदेन यत्प्रवदति तदात्मप्रवादं, तस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पदपरिमाणं षड्विंशतिः पदकोटयः। अष्टमं कर्म्मप्रवादं, कर्म्म-ज्ञानावरणीयादिकमष्टप्रकारं तत्प्रकर्षेण-प्रकृतिस्थित्यनुभागप्रदेशादिभिर्भेदैः सप्रपञ्चं वदतीति कर्मप्रवादं, तस्य षदपरिमाण-मेका पदकोटी अशीतिश्च पदसहस्राणि।

नवमं 'पञ्चक्खाणं'त्ति अत्रापि षदैकदेशे पदसमुदायोपचारात्प्रत्याख्यानप्रवादमिति दृष्टव्यं, प्रत्याख्यानं सप्रभेदं यद्वदति तत्प्रत्याख्यानप्रवादं, तस्य पदपरिमाणं चतुरशीतिः पदलक्षाणि। दशमं विद्यानुप्रवादं, विद्या-अनेकातिशयसम्पन्ना अनुप्रवदति-साधनानुकूल्येन सिद्धि-प्रकर्षेणवदतीति विद्यानुप्रवादं तस्य पदपरिमाणमेका पदकोटी दश च पदलक्षाः।

एकादशमबन्ध्यं, बन्ध्यं नाम निष्फलं न विद्यते वन्ध्यं यत्र तदवन्ध्यं, किमुक्तं भवति :-यत्र सर्वेऽपि ज्ञानतपःसंयमादयः शुभफला सर्वे च प्रमादादयोऽशुभफला यत्र वर्ण्यन्ते तदवन्ध्यं नाम, तस्य पदपरिमाणं षड्विंशतिः पदकोट्यः। द्वादशं प्राणायुः, प्राणाःपञ्चेन्द्रियाणि त्रीणि मानसादीनि बलानि उच्छ्वासनिश्वासौ चायुश्च प्रतीतं, ततो यत्र प्राणा आयुश्च सप्रभेदमुपवर्ण्यन्ते तदुपचारतः प्राणायुरित्युच्यते, तस्य पदपरिमाणमेका पदकोटी षट्पञ्चाशच्च पदलक्षाणि।

त्रयोदशं क्रियाविशालं, क्रियाः-कायिक्यादयः संयमक्रियाश्च ताभिः प्ररूप्यमाणाभिर्विशालं क्रियाविसालं, तस्य पदपरिमाणं नव कोटयः चतुर्दशं लोकबिन्दुसारं, लोके जगति श्रुतलोके च अक्षरस्योपरि बिन्दुरिव सारं सर्वोत्तमं सर्वाक्षरसन्निपातलब्धिहेतुत्वात् लोकबिन्दुसारं, तस्य पदपरिमाणमर्द्धत्रयोदशकोटयः।

''उप्पायपुव्वस्स न'मित्यादिकं कण्ठ्य, नवरं वस्तु-ग्रन्थविच्छेदविशेषः तदेव लघुतरं चुल्लकं वस्तु, तानि चादिमेष्वेव चतुर्षु, न शेषेषु, तथा चाह-'आइल्लाण चउण्हं सेसाणं चुल्लिया नत्थि',

*मू.( १५४ ) से तं पुव्वगए से किं तं अनुओगे ?, अनुओगे दुविहे पन्नत्ते, तंजहा-मूलपढ-मानुओगे गंडिआणुओगे य,*

*से किं तं मूलपढमाणुओगे ?, मूलपढमाणुओगे नं अरहंताणं भगवंताणं पुव्वभवा देवगमनाइं आउं चवणाइं जम्मणाणि अभिसेआ रायवरसिरीओ पव्वज्जाओ तवा य उग्गा केवलनाणुप्पयाओ तित्थपवत्तणाणि अ सीसा गणा गणहरा अज्जपवत्तिणीओ संघस्स चउव्विहस्स जं च परिमाणं जिनमनपज्जवओहिनाणी सम्मत्तसुअनाणिणो अ वाई अनुत्तरगई अ उत्तरवेउव्विणों अ मुणिणो जत्तिआ सिद्धा सिद्धीपहो जह देसिओ जच्चिरं च कालं पाओवगया जे जहिं जत्तिआइं भत्ताइं छेइत्ता अंतगडे मुणिवरुत्तमे तमरओघविप्पमुक्के मुक्खसुहमणुत्तरं च पत्ते एवमन्ने अ एवमाइभावा मूलपढमाणुओगे कहिआ, से तं मूलपढमाणुओगे*

*से किं तं गंडिअनुओगे ?, २ कुलगरगंडिआओ तित्थयरगंडिआओ चक्कवट्टिगंडिआओ दसारगंडिआओ बलदेवगंडिआओ वासुदेवगंडिआओ गणधरगंडिआओ भद्दबाहुगंडिआओ तवोकम्मगंडिआओ हरिवंसगंडिआओ उस्सप्पिणीगंडिआओ ओसप्पिणीगंडिआओ चित्तंतरगंडिआओ अमरनरतिरिअनिरयगइगमणविविहपरियट्टणेसु एवमाइआओ गंडिआओ आघविज्जंति पन्नविज्जंति से तं गंडिआणुओगे, से तं अनुओगे४*

*से किं तं चूलिआओ ? चूलिआओ आइल्लाणं चउण्ह पुव्वं चूलिआ सेसाइं पुव्वाइं अचूलिआइं से तं चूलिआओ*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*दिट्ठिवायस्स नं परित्ता वायणा संखेज्जा अनुओगदारा संखेज्जा वेढा संखेज्जा सिलोगा संखेज्जाओ पडिवत्तीओ संखेज्जाओ निज्जुत्तीओ संखेज्जाओ संगहणीओ,*

*से णं अंगट्ठयाए बारसमे अंगे एगे सुअक्खधे चोद्दस पुव्वाइं संखेज्जा वत्थू संखेज्जा चूलवत्थू संखेज्जा पाहुडा संखेज्जा पाहुडपाहुडा संखेज्जाओ पाहुडिआओ संखेज्जाओ पाहुडपाहुडिआओ संखेज्जाइं पयगोणं संखेज्जा अक्खरा अनंता गमा अनंता पज्जावा परित्ता तसा अनंता थावरा सासयकडनिबद्धनिकाइया जिणपन्नत्ता भावा आघविज्जंति पन्नविज्जंति परूविज्जंति दंसिज्जंति निदंसिज्जंति उवदंसिज्जंति*

*से एवं आया एवं नाया एवं विन्नाया एवं चरणकरणपरूवणा आधविज्जति, से तं दिट्ठिवाए १२ ॥*

**वृ.** 'सेत्तं पुव्वगए' तदेवत्पूर्वगतं। से किं त'मित्यादि, अथ कोऽयमनुयोगः ? अनुरूपोऽनुकूलो वा योगोऽनुयोगः सूत्रस्य खेनाभिधेयेन सार्द्धमनुरूपः सम्बन्धः, स च द्विधामूलप्रथमानुयोगो गण्डिकानुयोगश्च, इह मूलं-धर्मप्रणयनात्तीर्थकरास्तेषां प्रथमः-सम्यक्त्वावाप्तिलक्षण-पूर्वभवादिगोचरोऽनुयोगो मूलप्रथमानुयोगः, इक्ष्वादीनां पूर्वापरपूर्व परिच्छिन्नो मध्यभागो गण्डिका हण्डिकेव गण्डिका-एकार्थाधिकारा ग्रन्थपद्धतिरित्यर्थः, तस्या अनुयोगो-गण्डिकानुयोगः

'से किं त'मित्यादि, अथ कोऽयं मूलप्रथमानुयोगः ? आचार्य आह-मूलप्रथमानुयोगेन अथवा मूलप्रथमानुयोगे 'ण'मिति वाक्यालङ्कारे अर्हतां भगवतां सम्यक्त्वाभवादारभ्य पूर्वभवा देवलोकगमनानि तेषु पूर्वभवेषु देवभवेषु चायुर्देवलोकेभ्यश्च्यवनं तीर्थकरभवत्वेनोत्पादस्ततो जन्मानि ततः शैलराजे सुरासुरैर्विधीयमाना अभिषेका इत्यादि पाठसिद्धं यावन्निगमनं

'से किं त'मित्यादि, अथ कोऽयं गण्डिकानुयोगः ?, सूरिराह-गण्डिकानुयोगेन अथवा गण्डिकानुयोगे 'ण'मिति वाक्यालङ्कारे, कुलकरगण्डिकाः, इह सर्वत्राप्यपान्तरालवर्त्तिन्यो बह्वयः प्रतिनियतैकार्थाधिकाररूपा गण्डिकास्ततो बहुवचनं, कुलकराणां गण्डिकाः कुलकरगण्डिकाः, तत्र कुलकराणां विमलवाहनादीना पूर्वभवजन्मानामादीनि सपप्रञ्चमुपवर्ण्यन्ते, एवं तीर्थकर-गण्डिकादिष्वभिदानवशतो भावनीयं, 'जाव चित्तंतरगण्डिआउ'त्ति चित्रा-अनेकार्था अन्तरे-ऋषभाजिततीर्थकरापान्तराले गण्डिकाः चित्रान्तरगण्डिकाः, एतदुक्तं भवति-ऋषभाजित-तीर्थकरान्तरे ऋषभवंशसमुद्‌भूतभूपतीनां शेषगतिगमनव्युदासेन शिवगतिगमनानुत्तरोप-पातप्राप्तिप्रतिपादिका गण्डिकाश्चित्रान्तरगण्डिकाः, तासां च प्ररूपणा पूर्वाचार्यैरेवमकारि-इह सुबुद्धिनामा सगरचक्रवर्त्तिनो महामात्योऽष्टापदपर्वते सगरचक्रवर्त्तिसुतेभ्य आदित्ययशःप्रभृतीना भगवदृषभवंशराजानां भूपतीनामेवं सङ्ख्यामाख्यातुमुपक्रमते स्म, आह च-

'आइच्चजसाईणं उसभस्स परंपरा नरवईणं।
सगरसुयाण सुबुद्धी इणमो संखं परिकहेइ॥

आदित्ययशःप्रभृतयो भगवन्नाभेयवंशजास्त्रिखण्डभरतार्द्धमनुपाल्य पर्यन्ते पारमेश्वरीं दीक्षामभिगृह्य तत्प्रभावतः सकलकर्म्मक्षयं कृत्वा चतुर्द्दश लक्षा निरन्तरं सिद्धमगमन्, तत एकः सर्वार्थसिद्धो, ततो भूयोऽपि चतुर्द्दश लक्षा निरन्तरं निर्वाणे, ततोऽप्येकः सर्वार्थसिद्धे महाविमाने, एवं चतुर्द्दश लक्षान्तरितः सर्वार्थसिद्धावेकैकस्तावद्वक्तव्यो यावत्तेऽप्येकका असङ्ख्येया भवन्ति,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततो भूयश्चतुर्दश लक्षा नरपतीनां निरन्तरं निर्वाणे ततो द्वौ सर्वार्थसिद्धे, ततः पुनरपि चतुर्दश लक्षा निरन्तरं निर्वाणे ततो भुयोऽपि द्वौ सर्वार्थसिद्धे, ततः पुनरपि चतुर्दश लक्षा निरन्तरं निर्वाणे ततो भुयोऽपि द्वौ सर्वार्थसिद्धे, एवं चतुर्दश २ लक्षान्तरितौ द्वौ २ सर्वार्थसिद्धे तावद्वक्तव्यौ यावत्तेऽपि द्विक २ सङ्ख्यया असङ्ख्यया भवन्ति, एवं त्रिक २ सङ्ख्यादयोऽपि प्रत्येकमसङ्ख्येयास्तावद्वक्तव्यां यावन्निरन्तरं चतुर्दश लक्षा निर्वाणे ततः पञ्चाशत्सर्वार्थसिद्धे ततो भुयोऽपि चतुर्दश लक्षा निरन्तरं निर्वाणे ततः पुनरपि पञ्चाशत्सर्वार्थसिद्धे, पञ्चाशत्सङ्ख्याका अपि चतुर्दश २ लक्षान्तरितास्तावद्वक्तव्या यावत्तेऽप्यसङ्ख्येया भवन्ति, उक्तं च- .

"चोद्दस लक्खा सिद्धा निवईणेक्को य होइ सव्वट्टे।
एवेक्केक्के ठाणे पुरिसजुगा होंतिऽसंकेज्जा॥
पुनरवि चोद्दस लक्खा सिद्धा निवईण दोवि सव्वट्ठे।
दुगठाणेऽवि असंखा पुरिसजुगा होंति नायव्वा॥
जाव य लक्खा लक्खा चोद्दस सिद्धा पन्नास होंति सव्वट्ठे।
पन्नासट्ठाणेवि उ पुरिसजुगा होंतिऽसंखेज्जा॥
एगुत्तरा उ ठाणा सव्वट्ठे चेव जाव पन्नासा।
एक्केक्कंतरठाणे पुरिसजुगा होंतिऽसंखेज्जा॥

ततोऽनन्तरं चतुर्दश लक्षा नरपतीनां निरन्तरं सर्वार्थसिद्धे एकः सिद्धौ, भूयः चतुर्दश लक्षाः सर्वार्थ एकः सिद्धौः, एवं चतुर्दशचतुर्दशलक्षान्तरित एकैकः सिद्धौ तावद्वक्तव्यो यावत्तेऽप्येकका असङ्ख्येया भवन्ति, ततो भूयोऽपि चतुर्दश लक्षा नरपतीनां निरन्तरं सर्वार्थसिद्धौ, ततो द्वौ निर्वाणे, ततः पुनरपि चतुर्दश लक्षाः सर्वार्थसिद्धे ततो भूयोऽपि द्वौ निर्वाणे एवं चतुर्दशलक्षान्तरितौ २ द्वौ २ निर्वाणे तावद्वक्तव्यौ यावत्तेऽपि द्विकसङ्ख्यया असङ्ख्येया भवन्ति, एवं त्रिक २ सङ्ख्यादयोऽपि यावत्पञ्चाशत्सङ्ख्याश्चतुर्दशचतुर्दशलक्षान्तरिताः सिद्धौ प्रत्येकमसङ्ख्येया वक्तव्याः, उक्तं च-

"विवरीयं सव्वट्ठे चोद्दसलक्खा उ निव्वुओ एगो।
सव्वे य परिवाडी पन्नासा जाव सिद्धीए॥

ततः परं द्वे लक्षे नरपतीनां निरन्तरं निर्वाणे, ततो द्वे लक्षे निरन्तरं सर्वार्थसिद्धौ, ततस्तिस्त्रो लक्षा निर्वाणे, ततो भूयोऽपि तिस्त्रो लक्षाः सर्वार्थसिद्धे, ततश्चतस्त्रो लक्षा निर्वाणे, ततः पुनरपि चतस्त्रो लक्षाः सर्वार्थसिद्धे, एवं पञ्च पञ्च षट् २ यावदुभयत्राप्यसङ्ख्येया लक्षा वक्तव्याः,

"तेन परं दुलक्खाइं दो दो ठाणा य समग वच्चंति।
सिवगइसव्वट्ठेहिं इणमो तेसिं विही होई॥
दो लक्खा सिद्धीए दो लक्खा नरवईण सव्वट्ठे।
एवं तिलक्ख चउ पंच जाव लक्खा असंखेज्जा॥

ततः परं चतस्त्रिश्चित्रान्तरगण्डिकाः, तद्यथा-प्रथमा एकादिका एकोत्तरा द्वितीया एखादिका द्युत्तरा, तृतीया एकादिका त्र्युत्तरा, चतुर्थी त्र्यादिका द्वयादिविषमोत्तरा, आह च-

"सिवगइसव्वट्ठेहिं चित्तंतरगंडिया तओ चउरो।
एगो एगुत्तरिया एगाइ बिउत्तरा बिइया॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एगाइतिउत्तराए गाइ विसमुत्तरा चउत्थी उ।"

प्रथमा भाव्यतेप्रथममेक: सिद्धौ ततो द्वौ सर्वार्थसिद्धे ततस्त्रय: सिद्धौ ततश्चत्वार: सर्वार्थे ततः पञ्च सिद्धौ ततः षट् सर्वार्थ एवमेकोत्तरया वृद्धा शिवगतौ सर्वार्थे च तावद्वक्तव्या: यावदुभयत्राप्यसङ्ख्येया भवन्ति, उक्तं च-

"पढमाए सिद्धेको दोन्नि उ सव्वट्ठसिद्धंभि॥
तत्तो तिन्नि नरिंदा सिद्धा चत्तारि होंति सव्वट्ठे।
इय जाव असंखेज्जा सिवगइसव्वट्ठसिद्धेहिं॥

सम्प्रति द्वितीया भाव्यते, ततः उध्र्ध्वमेक: सिद्धौ त्रय: सर्वार्थे ततः पञ्च सिद्धौ सप्त सर्वार्थे ततो नव सिद्धौ एकादश सर्वार्थे ततः त्रयोदश सिद्धौ पञ्चदश सर्वार्थे एवं द्व्युत्तरया वृद्धा शिवगतौ सर्वार्थे च तावद्वक्तव्यौ यावदुभयत्रापसङ्ख्येया भवन्ति, उक्तं च-

"ताहे दिउत्तराए सिद्धेक्को तिन्नि होंति सव्वट्ठे।
एवं पंच य सत्त य जाव असंखेज्ज दोण्णिवि॥

सम्प्रति तृतीया भाव्यते, ततः परमेक: सिद्धौ चत्वार: सर्वार्थे ततः सप्त सिद्धौ दश सर्वार्थे, ततत्रयोदश सिद्धौ षोडश सर्वार्थे एवं त्र्युत्तरया वृद्धा शिवगतौ सर्वार्थे च क्रमेण तावदवसेयं यावदुभयत्राप्यसङ्ख्येया गता भवन्ति, उक्तं च-

"एग चउ सत्त दसगं जाव असंखेज्ज होंति ते दोवि।
सिवगयसव्वट्ठेहिं तिउत्तराए उ नायव्वा॥

सम्प्रति चतुर्थी भाव्यते, सा च विचित्रा, ततस्तस्या: परिज्ञानार्थमयमुपाय: पूर्वोचार्यैर्दर्शित:, इह एकोनत्रिंशत्सङ्ख्यास्त्रिका ऊर्ध्वाध:परिपाट्या पट्टिकादौ स्थाप्यन्ते, तत्र प्रथमे त्रिके न किञ्चिदपि प्रक्षिप्यते, द्वितीये द्वौ प्रक्षिप्येते तृतीये पञ्च चतुर्थे नव पञ्चमे त्रयोदश षष्ठे सप्तदश सप्तमे द्वाविंशति: अष्टमे षट् नवमे अष्टौ दशमे द्वादश एकादशे चतुर्दश द्वादशोऽष्टाविंशति: त्रयोदशे षड्विंशति: चतुर्दशे पञ्चविंशति: पञ्चदेशे एकादश षोडशे त्रयोविंशति: सप्तदशे सप्तचत्वारिंशत् अष्टादशे सप्तति: एकोनविंशे सप्तसप्तति: विंशतौ एक: एकविंशे द्वौ द्वाविंशे सप्ताशीति: त्रयोविंशे एकसप्तति: चतुर्विंशे द्विषष्टि: पञ्चविंशे एकोनसप्तति: षड्विं चतुर्विंशति: सप्तविंशे षट्चत्वारिंशत् अष्टाविंशे शतं एकोनत्रिंशे षड्विंशति:, उक्तं च-

"[ताहे] तियगाइविसमुत्तराए अउणतीसं तु तियग ठावेउं।
पढमे नत्थि उखेवो सेसेसु इमो भवे खेवो॥
दुग पण नवगं तेरस सत्तरस दुवीसं च छच्च अट्ठेव।
बारस चउदस तह अट्ठवीस छव्वीस पणुवीसा॥
एक्कारस तेवीसा सीयाला सत्तरि सत्तहत्तरिया।
इग दुग सत्तासीई एगुत्तरमेव बावट्ठी॥
अउणत्तरि चउवीसा छायाल सयं तहेव छव्वीसा।
एए रासिक्खेगा तिगअंतंता जहाकमंसो॥

एतेषु च राशिषु प्रक्षिप्तेषु यद्भवति तावन्तस्तावन्त: क्रमेण सिद्दो सर्वार्थे विंशति: ततः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पञ्चविंशतिः सिद्धौ नव सर्वार्थे तत एकादश सिद्धौ पञ्चदश सर्वार्थे ततः सप्तदश सिद्धौ एकत्रिंशत्सर्वार्थे तत एकोनत्रिंशत्सिद्धौ अष्टाविंशतिः सर्वार्थे ततः सिद्धो चतुर्दश षड्विंशतिः सर्वार्थे ततः पञ्चाशत्सिद्धो त्रिसप्ति सर्वार्थे ततोऽशीतिः सिद्धो चत्वारः सर्वार्थे ततः पञ्च सिद्धो नवतिः सर्वार्थे ततश्चतुःसप्ततिर्मुक्तौ पञ्चषष्टिः सर्वार्थसिद्धे ततः सिद्धौ द्विसप्ततिः सप्तविंशतिः सर्वार्थे एकोनपञ्चाशत् मुक्तौ त्र्युत्तरं शत्तं सर्वार्थे तत एकोनत्रिंशत्सिद्धौ, उक्तं च-

"सिवगइसव्वट्ठेहिं दो दो ठाण विसमुत्तरो नेया।
जाव उणतीसट्ठाणे गुणतीसं पुण छवीसाए॥

अत्र 'जावे'त्यादि यावदेकोनत्रिंशत्तमे स्थाने त्रिकरूपे षड्विंशतौ प्रक्षिप्तायामेकोनत्रिंशद्भवति,

एवं द्व्यादिविषमोत्तरा गण्डिका असङ्ख्येयास्तावद्वक्तव्या यावदजितस्वामिपिता जितशत्रुः समुत्पन्नः नवरं पाश्चात्यायां २ गण्डिकायां यदन्त्यमङ्कस्थानं तदुत्तरस्यामादिमं द्रष्टव्यं, तथा प्रथमायां गण्डिकायामादिममङ्कस्थानं सिद्धौ द्वितीयस्यां सर्वार्थे तृतीयस्यां सिद्दौ चतुर्थ्यां सर्वार्थे, एवमसङ्ख्यास्वपि गण्डिकास्वादिमान्त्यान्यङ्कस्थानानि क्रमेणैकान्तरितानी शिवगतौ सर्वार्थे च वेदितव्यानि, एतदेव दिग्मात्रप्रदर्शनतो भाव्यते, तत्र प्रथमायां गण्डिकायामन्त्यमङ्कस्थानमेकोनत्रिंशत्तत एकोनत्रिंशद्वारान् सा एकोनत्रिंशदूर्ध्वाधःक्रमेण स्थाप्यते, तत्र प्रथमेऽङ्के नास्ति प्रक्षेपः, द्वितीयादिषु चाङ्केषु 'दुग पण नवगं तेरसे'त्यादयः त्रणेण प्रक्षेपणीया राशयः प्रक्षिप्यन्ते, तेषु प्रक्षिप्तेषु च सत्सु पद्यत् क्रमेण भवति तावन्तस्तावन्तः क्रमेण सिद्धौ सर्वार्थे इत्येवं वेदितव्याः, तद्यथा-एकोनत्रिंशत्सर्वार्थे सिद्धावेकत्रिंशत्ततश्चतुस्त्रिंशत्सर्वार्थे सिद्धावष्टात्रिंशत्ततो द्विचत्वारिंशत्सर्वार्थे षट्चत्वारिंशत्सिद्धौ तत एकपञ्चाशत्सर्वार्थे पञ्चत्रिंशत्सिद्धौ सप्तत्रिंशत्सर्वार्थे सिद्धावेकचत्वारिंशत्रिचत्वारिंशत्सर्वार्थे सप्तपञ्चाशत्सिद्धौ ततः पञ्चपञ्चाशत्सर्वार्थे चतुःपञ्चाशत्सिद्धौ चत्वारिंशत्सर्वार्थे द्विचत्वारिंशत्सिद्धौ सर्वार्थे षट्सप्ततिः सिद्धो नवनवतिः षडुत्तरशतं सर्वार्थे त्रिंशत्सिद्धौ एकत्रिंशत्सर्वार्थे सिद्धौ षोडशाधिकं शतं सर्वार्थे शतं सिद्धावेकनवतिः सर्वार्थेऽष्टानवतिः त्रिपञ्चाशत्सिद्धौ पञ्चसप्ततिः सर्वार्थे सिद्धावेकोनत्रिंशं शतं पञ्चपञ्चाशत्सर्वार्थे,

एषा द्वितीया गण्डिका, अस्यां च गण्डिकायामन्त्यमङ्कस्थानं पञ्चपञ्चाशत् ततस्तृतीयस्यां गण्डिकायामिदमेवादिममङ्कस्थानं, ततः पञ्चपञ्चाशदेकोनत्रिंशद्वारान् स्थाप्यते, तत्र प्रथमेऽङ्के नास्ति प्रक्षेपो, द्वितीयादिषु चाङ्केषु क्रमण द्विकपञ्चनवत्रयोदशादयः पूर्वोक्तराशयः क्रमेण प्रक्षेपणीयाः प्रक्षिप्यन्ते, इह चादिममङ्कस्थानं सिद्धो ततस्तेषु प्रक्षेपणीयेषु राशिषु प्रक्षिप्तेषु सत्सु यत् २ क्रमेण भवति तावन्तस्तावन्तः प्रथमादङ्कादारभ्य सिद्धो सर्वार्थे इत्येवं क्रमेण वेदितव्याः, एवमन्यास्वपि गण्डिकासूक्तप्रकारेण भावनीयं, उक्तं च-

"विसमुत्तरा य पढमा एवमसंखविसमुत्तरा नेया।
सव्वत्थवि अंतिल्लं अन्नाए आइमं ठाणं॥१॥
अउणत्तीसं वारा ठावेउं नत्थि पढम उक्खेवो।
सेसे अडवीसाए सव्वत्थु दुगाइउक्खेवो॥१॥
सिवगइ पढमादीए बीआए तह य होइ सव्वट्ठे।
इय एगंतरियाइं सिवगइसव्वट्ठठाणाइं॥२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवमसंखेज्जाओ चित्तंतरगंडिया मुणेयव्वा।
जाव जियसत्तुराया अजियजिणपिया समुप्पन्नो ॥३॥

तथा 'अमरे'त्यादि, विविधेषु परिवर्त्तेषु-भवभ्रमणेषु जन्तूनामवगम्यते अमरनरतिर्यग्निरय-गतिगमनं, एवमादिका गण्डिका बहव आख्यायन्ते, 'सेत्तं गंडियाणुजोगे' सोऽयं गण्डिकानुयोगः।

'से किं त'मित्यादि, अथ कास्ताश्चूलाः ?, इह चूला शिखरमुच्यते, यथा मेरौ चूला, तत्र चूला इव चूला दृष्टिवादे परिकर्मसूत्रपूर्वानुयोगेऽनुक्तार्थसङ्ग्रहपरा ग्रन्थपद्धतयः, तथा चाह चूर्णिकृत-"दिट्ठिवाए जं परिकम्मसुत्तपुव्वाणुयोगे न भणियं तं चूलासु भणियं"ति।

अत्र सूरिराह-चूला आदिमानां चतुर्ण्णां, शेषाणि पूर्वाण्यचूलकानि, ता एव चूला आदिमानां चतुर्णां पूर्वाणां प्राक् पूर्ववक्तव्यताप्रस्तावे चूलावस्तूनीति भणिताः, आह च चूर्णिकृत्-"ता एव चूला आइल्लपुव्वाणं चउण्हं चुल्लवत्थूणि भणिता" एताश्च सर्वस्यापि दृष्टिवादस्योपरि किल स्थापितास्तथैव च पठ्यन्ते, ततः श्रुतपर्व्वते चूला इव राजन्ते इति चूला इत्युक्ताः, तथा पोक्तं चूर्णिकृता-"सव्वुवरिट्ठिया पढिज्जंति, अतो तेसु य पव्वयचूला इव चूला" इति, तासां च चूलानामियं सङ्ख्या-प्रथमपूर्वसत्काश्चतस्रः द्वितीयपूर्वसत्का द्वादश तृतीयपूर्वसत्का अष्टौ चतुर्थपूर्वसत्का दश, तथा च पूर्वमुक्तं सूत्रे -

"चत्तारि दुवालस अट्ठ चेव दस चेव चूलवत्थूणि।
आइल्लाण चउण्हं सेसाणं चूलिया नत्थि॥

सर्वसङ्ख्यया चूलिकाश्चतुस्त्रिंशत्, 'से त्तं चूलियं'त्ति अथैताश्चूलिकाः। 'दिट्ठिवायस्स न'मित्यादि, पाठसिद्धं, नवरं 'सङ्खेज्जा वत्थू'त्ति सङ्ख्येयानि वस्तूनि, तानि पञ्चविंशत्युत्तरे द्वे शते, कथमिति चेत्, इह प्रथमपूर्वे दश वस्तूनि द्वितीये चतुर्दश तृतीये अष्टौ चतुर्थेऽष्टादश पञ्चमे द्वादश षष्ठे द्वे सप्तमे षोडश अष्टमे त्रिंशत् नवमे विंशतिः दशमे पञ्चदश एखादशे द्वादश द्वादशे त्रयोदश त्रयोदशे त्रिंशच्चतुर्दशे पञ्चविंशतिः, तथा सूत्रे प्राक् पूर्ववक्तव्यतायामुक्तं-

"दस चोद्दस अट्ठट्ठारसेव बारस दुवे य [मूल] वत्थूणि।
सोलस तीसा वीसा पनरस अनुप्पवायंमि॥
बारस एक्कारसमे बारसमे तेरसेव वत्थूणि।
तीसा पुण तेरसमे चोद्दसमे पन्नवीसा उ॥

सर्वसङ्ख्यया चामूनि द्वे शते पञ्चविंशत्यधिके, तथा सङ्ख्येयानि चूलावस्तूनि, तानि च चतुस्त्रिंशत्सङ्ख्याकानि। साम्प्रतमोघतो द्वादशाङ्गाभिधेयमुपदर्शयति-

*मू. (१५५) इच्चेयंमि दुवालसंगे गणिपिडगे अनंता भावा अनंता अभावा अनंता हेऊ अनंता अहेउ अनंता कारणा अनंता अकारणाअनंता जीवा अनंता अजीवा अनंता भवसिद्धिया अनंता अभवसिद्धिआ अनंता सिद्धा अनंता असिद्धा पन्नत्ता*

*मू. (१५६) 'भावमभावा हेऊमहेउ कारणमकारणे चेव।*
*जीवाजीवा भविअमभविआ सिद्धा असिद्धा य॥*

**वृ.**इत्येतस्मिन् द्वादशाङ्गे गणिपिटके' एतत्पूर्वदेव व्याख्येयं, अनन्ता भावा-दीवादयः पदार्थाः प्रज्ञप्ता इति योगः, तथा अनन्ता अभावाः- सर्वभावानां पररूपेणासत्त्वात् त एवानन्ता अभावा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दृष्ट्व्याः, तथाहि-खपरसत्ताभावाभावात्मकं वस्तुतत्त्, यथा जीवो जीवात्मना भावरूपो अजीवा-त्मना चाभावरूपः, अन्यथाऽजीवत्वप्रसङ्गात्, अत्र बहु वक्तव्यं तत्तु नोच्यते ग्रन्थगौरवभयादिति, तथाऽनन्ता 'हेतवो' हिनोति-गमयति जिज्ञासितधर्म्मविशिष्टमर्थमिति हेतुः, ते चानन्ताः, तथाहि-वस्तुनोऽनन्ता धर्मास्ते च तत्प्रतिबद्धधर्मविशिष्टवस्तुगमकास्ततोऽनन्ता हेतवो भवन्ति, यथोक्त-हेतुप्रतिपक्षभूता अहेतवः, तेऽपि अनन्तां, तथा अनन्तानि कारणानि घटपटादीनां निर्वर्त्तकानि मृत्पिण्डतन्त्वादीनि, अनन्तान्यकारणानि, स्ववेषामपि कारणानां कार्यान्तराण्यधिकृत्याकारण-त्वात्, तथा जीवा-प्राणिनः, अजीवाः-परमाणुद्व्यणुकादयः, भव्या-अनादिपारिणामिकसिद्धि-गमनयोग्यतायुक्ताः, तद्विपरिता अभव्याः, सिद्धा अपगतकर्ममलकलङ्काः, असिद्धाः संसारिणः, एते सर्वेऽप्यनन्ताः प्रज्ञप्ताः, इह भव्याभव्यानामानन्त्येऽभिहितेऽपि यत्पुनरसिद्धा अनन्ता इत्य-भिहितं तत्सिद्धेभ्यः संसारिणामनन्तगुणताख्यापनार्थं।

सम्प्रति द्वादशाङ्गविराधनाफलं त्रैकालिक-मुपदर्शयति-

**मू. ( १५७ )** *इच्चेइअं दुवालसंगं गणिपिडगं तीए काले अनंता जीवा आणाए विराहित्ता चाउरंतं संसारकंतारं अनुपरिअट्टिंसु, इच्चेइअं दुवालसंगं गणिपिडगं पडुपन्नकाले परित्ता जीवा आनाए विराहित्ता चाउरंतं संसारकंतारं अनुपरिअट्टंति, इच्चेइअं दुवालसंगं गणिपिडगं अणागए काले अनंता जीवा आणाए विराहित्ता चाउरंतं संसारकंतार अनुपरिअट्टिस्संति। इच्चेइयं दुवालसंगं गणिपिडगं तीए काले अनंता जीवा आणाए विराहित्ता चाउरंतं संसारकंतार वीइवइंसु, इच्चेइअं दुवालसंगं गणिपिडगं पडुप्पन्नकाले परित्ता जीवा आणाए विराहित्ता चाउरंतं संसारकंतार वीईवयंति, इच्चेइअं दुवालसंगं गणिपिडगं अनागए काले अनंता जीवा आणाए विराहित्ता चाउरंतं संसारकंतार वीईवइस्सति।*

*इच्चेइअं दुवालसंगं गणिपिडगं न कयाइ नासी न कयाइ न भवइ न कयाइ न भविस्सइ भुविं च भवइ अ भविस्सइ अ धुवे निअए सासए अक्खए अव्वए अवट्ठिए निच्चे से जहानामए पंचत्थिकाए न कयाए नासी न कयाइ नत्थि न कयाइ न भविस्सइ भुविं च भवइ अ भविस्सइ अ धुवे नियए सासए अक्खए अव्वए अवट्ठिए निच्चे, एवामेव दुवालसंगे गणिपिडगे न कयाइ नासी न कयाइ नत्थि न कयाइ न भविस्सइ भुविं च भवइ अ भविस्सइ अ धुवे निअए सासए अक्खए अव्वए अवट्ठिए निच्चे।*

*से समासओ चउव्विहे पन्नत्ते, तंजहा-दव्वओ खित्तओ कालओ भावओ, तत्थ दव्वओ णं सुअनाणी उवउत्ते सव्वदव्वाइं जाणइ पासइ, खित्तओ नं सुअनाणी उवउत्ते सव्वं खेत्तं जाणइ पासइ कालओ नं सुअनाणी उवउत्ते सव्वं कालं जाणइ पासइ भावओ नं सुअनाणी उवउत्ते सव्वे भावे जाणइ पासइ।*

**वृ.** 'इच्चेइय'मित्यादि, इत्येतद् द्वादशाङ्गं गणिपिटकमतीते कालेऽनन्ता जीवा आज्ञया-यथोक्ताज्ञापरिपालनाऽभावतो विराध्य चतुरन्तं संसारकान्तारं-विविधशारीरमानसानेकदुःख-विटपिशतसहस्रदुस्तरं भवगहनं 'अनुपरियट्टिसु' अनुपरावृत्तवन्त आसन्, इह द्वादशाङ्गं सूत्रार्थोभयभेदेन त्रिविधं, द्वादशाङ्गमेव चाऽऽज्ञा, आज्ञाप्यते जन्तुगणो हितप्रवृत्तौ यया साऽऽज्ञेति-व्युत्पत्तेः ततश्चाज्ञा त्रिविधा, तद्यथा-सूत्राज्ञा अर्थाज्ञा उभयाज्ञा च, सम्प्रति अमूषामाज्ञानां विराधना-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्चिन्त्यन्ते-तत्र यदाऽभिनिवेशवशतोऽन्यथा सूत्रं पठति तथा सूत्राज्ञाविराधना, सा च यथा जमालि-प्रभृतीनां, यदा त्वभिनिवेशवशतोऽन्यथा द्वादशाङ्गार्थं प्ररूपयति तदाऽर्थाज्ञाविराधना, सा च गोष्ठामाहिलादीनामवसेया, यदा पुनरभिनिवेशवशतः श्रद्धाविहीनतया हास्यादितो वा द्वादशाङ्गस्य सूत्रमर्थं च विकुट्टयति तदा उभयाज्ञाविराधना, सा च दीर्घसंसारिणामभव्यानां चानेकेषां विज्ञेया, अथवा पञ्चविधाचारपरिपालनशीलस्य परोपकारकरणैकतत्परस्य गुरोर्हितोपदेशवचनं आज्ञा, तामन्यथा समाचरन् परमार्थतो द्वादशाङ्गं विराधयति, तथा चाह चूर्णिकृत्-

'अहवा आणत्ति पञ्चविहायारायरणसीलस्स गुरुणो हियोवएसवयणं आणा, तमन्नहा आयरंतेण गिणिपिडगं विराहियं भवइत्ति" तदेवमतीते काले विराधनाफलमुपदर्श्य सम्प्रति वर्त्तमानकाले दर्शयति-

'इच्चेइय'मित्यादि, सुगमं नवरं 'परित्ता' इति परिमिता नत्वनन्ता असङ्ख्येया वा, वर्त्तमान-कालचिन्तायां विराधकमनुष्याणां सङ्ख्येयत्वात्, 'अनुपरियट्टंति'त्ति अनुपरावर्त्तन्ते-भ्रमन्तीत्यर्थः, भविष्यति काले विराधनामुपदर्शयति-'इच्चेइय'मित्यादि, इदमपि पाठसिद्धं, नवरं 'परियट्टि-स्संति'त्ति अनुपरावर्त्तिष्यन्ते-पर्यटिष्यन्तीत्यर्थः, तदेवं विराधनाफलं त्रैकालिकमुपदर्श्य सम्प्रत्याराधनाफलं त्रैकालिकं दर्शयति-'इच्चेइय'मित्यादि, सुगमं नवरं 'वीइवइंसु'त्ति व्यति-क्रान्तवन्तः संसारकान्तारमुल्लङ्घ्य मुक्तिमवाप्ता इत्यर्थः, 'वीईवइस्संति'त्ति व्यतिक्रमिष्यन्ति, एतच्च त्रैकालिकं विराधनाफलमाराधनाफलं च द्वादशाङ्गस्य सदाऽवस्थायित्वे सति युज्यते, नान्यथा, ततः सदावस्थायित्वं तस्याह-

'इच्चेइय'मित्यादि, इत्येतद्द्वादशाङ्गं गणिपिटकं न कदाचिन्नासीत्, सदैवासीदिति भाव, अनादित्वात्, तथा न कदाचिन्न भवति, सर्वदैव वर्त्तमानकालचिन्तायां भवतीति भावः, सदैव भावात्, तथा न कदाचिन्न भविष्यति, किन्तु भविष्यच्चिन्तायां सदैव भविष्यतीति प्रतिपत्तव्यं, अपर्यवसितत्वात्, तदेवं कालत्रयचिन्तायां नास्तित्वप्रतिषेधं विधाय सम्प्रत्यस्तित्वं प्रतिपादयति-'भुविं च'इत्यादि, अभूत् भवति भविष्यति चेति, एवं त्रिकोलावस्थायित्वात् ध्रुवं मेर्वादिवत्, ध्रुवत्वादेव सदैव जीवादिषु पदार्थेषु प्रतिपादकत्वेन नियतं पञ्चास्तिकायेषु लोकवचनवत् नियतत्वादेव च शाश्वतं-शश्वद्भवनस्वभावं शाश्वतत्वादेव च सततगङ्गासिन्धुप्रवाहप्रवृत्तावपि (पद्म) पुण्डरीकद्रह इव वाचनादिप्रदानेऽपि अक्षयं-नास्य क्षयोऽस्तीत्यक्षयमक्षयत्वादेव च अव्ययं मानुषोत्तराद्बहिः समुद्रवत्, अव्ययत्वादेव सदैव प्रमाणेऽवस्थितं जम्बूद्वीपादिवत्, एवं च सादऽवस्थानेन चिन्त्यमानं नित्यमाकाशवत्, साम्प्रतमत्रैव दृष्टान्तमाह-

'से जहानामे'त्यादि, तद्यथानाम पञ्चास्तिकायाः-धर्मास्तिकायादयः न कदाचिन्नासन्नित्यादि पूर्ववत्, 'एवमेवे'त्यादि निगमनं निगदसिद्धं,

'से समासओ' इत्यादि, तद्द्वादशाङ्गं समासतश्चतुर्विधं प्रज्ञप्तं, तद्यथा-द्रव्यतः क्षेत्रतः कालतो भावतश्च, तत्र द्रव्यतो 'ण'मिति वाक्यालङ्कारे श्रुतज्ञानी उपयुक्तः सर्वद्रव्याणि जानाति पश्यति, तत्राह- ननु पश्यतीति कथं ?, न हि श्रुतज्ञानी श्रुतज्ञानज्ञेयानि सकलानि वस्तूनि पश्यति, नैष दोषः, उपमाया अत्र विवक्षितत्वात्, पश्यतीव पश्यति, तथाहि-मेर्वादीन् पदार्थानदृष्टानप्याचार्यः शिष्यभ्य आलिख्य दर्शयति ततस्तेषां श्रोतृणामेवं बुद्धिरुपजायते भगवानेष गणी साक्षात्पश्यन्निव

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्याचष्टे इति, एवं क्षेत्रादिष्वपि भावनीयं, ततो न कश्चिद्दोषः, अन्ये तु न पश्यतीति पठन्ति, तत्र चोद्यस्यानवकाश एव, श्रुतज्ञानी चेहाभिन्नदशपूर्वधरादि- श्रुतकेवली परिगृह्यते, तस्यैव नियमतः श्रुतज्ञानबलेन सर्वद्रव्यादिपरिज्ञानसम्भवात्, तदारस्तु ये श्रुतज्ञानिनस्त सर्वद्रव्यादिपरिज्ञाने भजनीयाः, केचित्सर्वद्रव्यादि जानन्ति केचिन्नेति भावः, इत्थम्भूता च भजना मतिनैचित्र्या-द्वेदितव्या, आह च चूर्णिकृत्- "आरओ पुण जे सुयनाणी ते सव्वदव्वनाणपासणासु भइया, सा य मयणा मइविसेसओ जाणियव्वत्ति।" सम्प्रति सङ्ग्रहगाथामाह-

*मू. ( १५८ ) अक्खर सन्नी सम्मं साइअं खलु सपज्जवसिअं च।*
*गमिअं अंगपविट्ठं सत्तवि एए सपडिवक्खा ॥*

वृ. 'अक्खरसन्नी'त्यादि, गतार्था, नवरं सप्ताप्येते पक्षा सप्रतिपक्षा, ते चैवम्- अक्षरश्रुत-मनक्षरश्रुतमित्यादि, इदं च श्रुतज्ञानं सर्वातिशयरत्नकल्पं प्रायो गुर्व्वधीनं च ततो विनेयजनानुग्रहार्थं यो यथा चास्य लाभस्तं तथा दर्शयति-

*मू. ( १५९ ) आगमसत्थग्गहणं जं बुद्धिगुणेहिं अट्ठहिं दिट्ठं।*
*बिंति सुअनाणलंभं तं पुव्वविसारया धीरा ॥*

वृ. 'आगमे'त्यादि, आ- अभिविधिना सकलश्रुतविषयव्याप्तिरूपेण मर्यादया वा यथाव-स्थितप्ररूपया गम्यन्ते- परिच्छिद्यन्तेऽर्था येन स आगमः, स चैवं व्युत्पत्त्या अवधिकेवलादि-लक्षणोऽपि भवति ततस्तद्व्यवच्छेदार्थं विशेषणान्तरमाह- 'शास्त्रे'ति शिष्यतेऽनेनेति शास्त्रमागमरूपं शास्त्रमागमशास्त्र, आगमग्रहणेन षष्टितन्त्रादिकुशास्त्रव्यवच्छेदः, तों यथावस्थि-तार्थप्रकाशनाभावतोऽनागमत्वाद् आगमशास्त्रस्य ग्रहणं आगमशास्त्रस्यग्रहणं यद् बुद्धिगुणैर्वक्ष्य-माणैः कारणभूतेरष्टभिर्दृष्टं, तदेव ग्रहणं श्रुतज्ञानस्य लाभं ब्रुवते पूर्वेषु विशारदा- विपश्चितः धीराः- व्रतपरिपालने स्थिराः, किमुक्तं भवति ?- यदेव जिनप्रणीतप्रवचनार्थपरिज्ञानं तदेव परमार्थतः श्रुतज्ञानं, न शेषमिति ॥ बुद्धिगुणैरष्टभिरित्यक्तं, ततस्तानेव बुद्धिगुणानाह-

*मू. ( १६० ) सुस्सूसइ १ पुडिपुच्छइ २ सुणेइ ३ गिण्हइ अ ४ ईहए याऽवि*
*तत्तो अपोहए वा ६ धारेइ ७ करेइ वा सम्मं ८ ॥*

वृ. 'सूस्सूसई'त्यादि, पूर्वं तावत् शुश्रूषते- विनययुक्तो गुरुवदनारविन्दाद्विनिर्गच्छद्वचनं श्रोतुमिच्छति, यत्र शङ्कितं भवति तत्र भूयोऽपि विनयनम्रतया वचसा गुरुमनः प्रह्लादयन् पृच्छति, पृष्टे च सति यद्गुरुः कथयति तत्सम्यक्- व्याक्षेपपरिहारेण सावधानः शृणोति श्रुत्वा चार्थरूपतया गृह्णाति, गृहीत्वा च ईहतेपूर्वापराविरोधेन पर्यालोचयति, चशब्दः समुच्चायार्थः, अपिशब्दा-त्प(ब्दः प)र्यालोचयन् किञ्चित् स्वबुद्ध्याऽप्युत्प्रेक्षते इति सूचनार्थः, ततः पर्यालोचनाऽनन्तर-मपोहते- एवमेतत् यदादिष्टमाचार्येण नान्यथेत्यवधारयति, ततस्तमर्थं निश्चितं स्वचेतसि विस्मृत्य-भावार्थं सम्यग् धारयति, करोति च सम्यग्- यथोक्तमनुष्ठानं, यथोक्तमनुष्ठनमपि श्रुतज्ञानप्राप्तिहेतुः तदावरणक्षयोपशमनिमित्तत्वात्। तदेवं गुणा व्याख्याताः, सम्प्रति यच्छुश्रूषते इत्युक्तं तत्र श्रवणविधिमाह-

*मू. ( १६१ ) मूअं हुंकारं वा बाढक्कार पडिपुच्छ वीमंसा।*
*तत्तो पसंगपारायणं च परिणिट्ठ सत्तमए ॥*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**वृ.** 'मूय'मित्यादि, मूकमिति प्रथमतो मूकं शृणुयात्, किमुक्तं भवति ?-प्रथमश्रवणे संयतगात्रस्तूष्णीमासीत, ततो द्वितीये श्रवणे हुङ्कारं दद्यात्, वन्दनं कुर्यादित्यर्थः, ततस्तृतीये वाढंकारं कुर्यात्, वाढमेवमेतन्नान्यथेति, ततश्चतुर्थे श्रवणे तु गृहीतपूर्वापतसूत्राभिप्रायो मनाक् प्रतिपृच्छां कुर्यात्, कथमेतदिति ?, पञ्चमे मीमांसां-प्रमाणजिज्ञासां कुर्यादिति भावः षष्ठे श्रवणे तदुत्तरोत्तर-गुणप्रसङ्गः पारगमनं चास्य भवति, ततः सप्तमे श्रवणे परिनिष्ठा-गुरुवदनुबाषते। एवं तावच्छ्रवण-विधिरुक्तः, सम्परति व्याख्यानविधिमभिधित्सुराह-

*मू.(१६२) सुत्तत्थो खलु पढमो बीओ निज्जुत्तिमीसिओ भणिओ।*
*तइओ निरविसेसो एस विही होइ अनुओगे॥*

**वृ.** 'सुत्तत्थो' इत्यादि, प्रथमानुयोगः सूत्रार्थः सूत्रार्थप्रतिपादनपरः, खलुशब्द एवकारार्थः, स चावधारणे, ततोऽयमर्थः-गुरुणा प्रथमोऽनुयोगः सूत्रार्थाभिदानलक्षण एक कर्त्तव्यः, मा भूत् प्राथमिकविनेयानां मतिमोहः, द्वितीयोऽनुयोगः सूत्रस्पर्शिकनिर्युक्तिमिश्रितो भणितस्तीर्थ-करगणधरैः, सूत्रस्पर्शिकनिर्युक्तिमिश्रितं द्वितीयमनुयोग गुरुर्विदध्यादित्याख्यातं तीर्थकरण-गणधरैरिति भावः, तृतीयश्चानुयोगो निरवशेषः-प्रसक्तानुप्रसक्तप्रतिपादनलक्षण इत्येपः-उक्तलक्षणो विधिर्भवत्यनुयोगे व्याख्यायाम्, आह-परिनिष्ठा सप्तमे इत्युक्तं, त्रयश्चानुयोगप्रकारा-स्तदेवत्कथम्?, उच्यते, त्रयाणामनुयोगानामन्यतमेन केनचित्प्रकारेण भूयो २ भाव्यमानेन सप्तं पाराः श्रवणं कार्यते ततो न कश्चिद्दोपः, अथवा कञ्चिन्मन्दमतिविनेयमधिकृत्य तदुक्तं द्रष्टव्यं, न पुनरेष एव सर्वत्र श्रवणविधिनियमः, उद्घटितज्ञविनेयानां सकृच्छ्रवणत एवाशेषग्रहणदर्शनादिति कृतं प्रसङ्गेन।

*मू.(१६३) से तं अंगपविट्ठ, से तं सुअनाणं, से तं परोक्खनाणं, से तं नंदी॥*

**वृ.** 'से त्त'मित्यादि, तदेतच्छ्रुतज्ञानं, तदेतत्परोक्षमिति॥

नन्द्यध्ययनं पूर्वं प्रकाशितं येन विपमभावार्थम्।
तस्मै श्रीचूर्णिकृते नमोऽस्तु विदुषे परोपकृते॥१॥
मध्ये समस्तभूपीठं, यशो यस्याभिवर्द्धते।
तस्मै श्रीहरिभद्राय, नमष्टीकाविधायिने॥२॥
वृत्तिर्वा चूर्णिवा रम्याऽपि न मन्दमेधसां योग्या।
अभवदिह तेन तेषामुपकृतये पत्न एष कृतः॥३॥
बह्वर्थमल्पशब्दं नन्द्यध्ययनं विवृण्वता कुशलम्।
यदवापि मलयगिरिणा सिद्धिं तेनाश्नुतां लोकः॥४॥
अर्हन्तो मङ्गलं मे स्युः, सिद्धाश्च मम मङ्गलम्॥
साधवो मङ्गलं सम्यग्, जैनो धर्म्मश्च मङ्गलम्॥५॥

**मुनि दीपरत्नसागरेण संशोधिता सम्पादिता नन्दीसूत्रस्य**
**मलयगिरि आचार्येण विरचिता टीका परिसमाप्ता**

## ४४ प्रथमाचूलिका नन्दीसूत्रं-समाप्तं

30/16

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## परिशिष्टं-१

### "अनुज्ञानन्दी"

मू. (१) से किं तं अणुन्ना ?, अणुन्ना छव्विहा पन्नत्ता, तंजहा-नामाणुन्ना १ ठवणाणुन्ना २ दव्वाणुन्ना ३ खित्ताणुन्ना ४ कालाणुन्ना ५ भावाणुन्ना ६

से किं तं नामाणुन्ना ?, २ जस्स नं जीवस्स वा अजीवस्स वा जीवाणंवा अजीवाणं वा तदुभयस्स वा तदुभयाणं वा अनुण्णत्ति नामं कीरइ से तं नामाणुन्ना,

से किं तं ठवणाणुन्ना ?, ठवणाणुन्ना जे नं कट्ठकम्मे वा पोत्थकम्मे वा लिप्पकम्मे वा चित्तकम्मे वा गंथिमे वा वेढिमे वा पूरिमे वा संघाइमे वा अक्खे वा वराडए वा एगे वा अणेगे वा सब्भावट्ठवणाए वा असब्भावठवणाए वा अनुण्णत्ति ठवणा ठविज्जइ से तं ठवणाणुण्णा.

नामठवणाणं को पइविसेसो ?, नामं आवकहिअं ठवणा इत्तरिआ वा हुज्जा आवकहिआ वा,

से किं तं दव्वाणुन्ना ?, २ दुविहा पन्नत्ता, तंजहा-आगमओ अ नोआगमओ य, से किं तं आगमओ दव्वाणुन्ना ?, आगमओ दव्वाणुन्ना जस्स नं अणुन्नत्ति पयं सिक्खिअं ठिणं जिअं मिअं परिजिअं नामसमं धोससमं अहीणक्खरं अणच्चक्खरं अव्वाइद्धक्खरं अक्खलिअं अमिलिअं अविच्चामेलिअं पडिपुन्नं पडिपुण्णघोसं कंठोट्ठविप्पमुक्कं गुरुवायणोवगयं से नं तत्थ वाअणाए पुच्छणाए परियट्टणाए धम्मकहाए नो अनुप्पेहाए, कम्हा ? 'अनुवओगो दव्व'मितिकट्टु नेगमस्स एगे अनुवउत्ते आगमओ इक्का दव्वाणुन्ना दुन्नि अनुवउत्ता आगमओ दुन्नि दव्वाणुन्नाओ तिन्निअनुवउत्ता आगमओ तिन्नि दव्वाणुन्नाओ एवं जावइआ अनुवउत्ता तावइआओ दव्वाणुन्नाओ एवमेव ववहारस्सवि, संगहस्स एगो वा अणेगो वा अनुवउत्तो वा अनुवउत्ता वा दव्वाणुन्ना वा दव्वाणुन्नाओ वा सा एगा दव्वाणुन्ना, उज्जुसु अस्स एगे अनुवउत्ते आगमओ एगा दव्वाणुन्ना पुहुत्तं नेच्छइ, तिण्हं सद्दनयाणं जाणए अनुवउत्ते अवत्थु, कम्हा ?, जइ जाणए अनुवउत्ते न भवइ जइ अनुवउत्ते जाणए न भवइ, से तं आगमओ दव्वाणुण्णा,

से किं तं नोआगमओ दव्वाणुन्ना ?, नोआगमओ दव्वाणुण्णा तिविहा पन्नत्ता, तंजहा-जाणगसरीरदव्वाणुन्ना भविअसरीरदव्वाणुण्णा जाणगसरीरभविअसरीरवइरित्ता दव्वाणुण्णा, से किं तं जाणगसरीरदव्वाणुण्णा अणुन्नत्तिपयत्थाहिगारजाणगस्स नं जं सरीरं ववगयचुअचाविअचत्तदेहं जीवविप्पजढं सिज्जागयं वा संथारगयं वा निसीहिआगयं वा सिद्धिसिलातलगयं वा अहो नं इमेणं वा सरीरसमुस्सएणं अणुन्नत्तिपयं आघविअं पन्नविअं परूविअं दंसिअं निदंसिअं उवदंसिअं, जहा को दिट्ठंतो ?,

अयं घयकुंभे आसी अयं महुकुंभे आसी, से तं जाणगसरीरदव्वाणुण्णा, से किं तं भवियसरीरदव्वाणुण्णा ?, भवियसरीरदव्वाणुण्णा जे जीवे जोणीजम्मणनिक्खंते इमेणं चेव सरीरसमुस्सएणं आदत्तेणं जिणदिट्ठेणं भावेणं अनुण्णत्तिपयं सिअकाले सिक्खिस्सइ न ताव सिक्खइ, जहा को दिट्ठंतो ?. अयं घयकुंभे भविस्सइ अयं महुकुंभे भविस्सइ, सेत्तं भविअसरीरदव्वाणुण्णा, से किं तं जाणगसरीरभविअसरीरवइरित्ता दव्वाणुण्णा ?, जाणगसरीरभविअसरीरवइरित्ता दव्वाणुण्णा तिविहा पन्नत्ता, तंजहा-लोइआ लोउत्तरिआ कुंप्पाव(य)णिया य.

से किं तं लोइआ दव्वाणुन्ना ?, लोइआ दव्वाणुण्णा तिविहा पन्नत्ता, तंजहा-सचित्ता अचित्ता

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मीसिआ, से किं तं सचित्ता ?, सचित्ता से जहानामए राया इ वा जुवराया इ वा ईसरे इ वा तलवरे इ वा माडंविए इ वा कोडुंविए इ वा इब्भे इ वा सेट्ठीइ वा सत्थवाहे इ वा सेणावइ इ वा कस्सइ कम्मि कारणें तुट्ठे समाणे आसं वा हत्थि वा उट्टं वा गोणं वा खरं वा घोडयं वा एलयं वा अयं वा दासं वा दासिं वा अनुजाणिज्जा सेत्तं सचित्ता, से किं तं अचित्ता ?, अचित्ता से जहाना-मए राया इ वा जुवराया इ वा ईसरे इ वा तलवरे इ वा कोडुंविए इ वा माडंसयणं वा छत्तं वा चामरं वा पडगं वा मउडं वा हिरण्णं वा सुवण्णं वा कंसं वा दूसं वा मइमुत्तिअसंखसिलप्पवालरत्तर-यणमाइअं संतसारसावइज्जं अनुजाणिज्जा, से तं अचित्ता दव्वाणुण्णा

से किं तं म्मिसिआ दव्वाणुन्ना ?, मीसिआ दव्वाणुण्णा से जहानामए राय इ वा ईसरे इ वा तलवरे इ वा माडंविए इ वा कोडुंविए इ वा इब्भे इ ला सिट्ठि इ वा सेणावई इ वा सत्थवाहे इ वा कस्सइ क्मि कारणे तुट्ठे समाणे हत्थि वा मुहभंडगमंडिअं आसं वा घासगचामरमंडिअं सकडअं दासं वा दासिं वा सव्वालंकारविबूसिअं अनुजाणिज्जा, से तं मीसिआ दव्वाणुण्णा, से तं लोइआ दव्वाणुण्णा,

से किं तं कुप्पाव(य)णिया दव्वाणुन्ना ?, कुप्पाव(य)णिया दव्वाणुण्णा तिविहा पन्नत्ता, तंजहा- सचित्ता अचित्ता मीसिआ, से किं तं सचित्ता ?, सचित्ता से जहानामए आयरिए इ वा उवज्झाए इ वा कस्सइ कम्मि कारणे तुट्ठे समाणे आसं वा हत्थि वा उट्टं वा गोणं वा खरं वा घोडं वा अयं वा एलगं वा दासं वा दसिं वा अनुजाणिज्जा, से तं सचित्ता कुप्पाव(य)णिआ। से किं तं अचित्ता ? अचित्ता से जहानामए आयरिए इ वा उवज्झाए इ वा कस्सइ कम्मि कारणे तुट्ठे समाणे आसनं वा सयनं वा छत्तं वा चामरं वा पट्टं वा मउडं वा हिरण्णं वा सुवण्णं वा कंसं वा दूसं वा नणिमुत्तिअसंखसिलप्पवालरत्तरयणमाइअं संतसारसावएज्ज अनुजाणिज्जा, से तं सचित्ता कुप्पाव(य)णिआ से किं तं मीसिआ दव्वाणुण्णा ?, मिसिआ दव्वाणुण्णा, से तं कुप्पाव(य)णिआ दव्वाणुण्णा

से किं तं लोउत्तरिआ दव्वाणुण्णा ?, लोउत्तरिआ दव्वाणुण्णा तिविहा पन्नत्ता, तंजहा- सचित्ता अचित्ता मीसिआ, से किं तं सचित्ता ?, सचित्ता से जहानामए आयरिए इ वा उवज्झाए इ वा पवत्तए इ वा थेरे इ वा गणी इ वा गणहरे इ वा गणावच्छेयए इ वा सीसस्स वा सिस्सिणीए इ वा कम्मि कारणे तुट्ठे समाणे सीसं वा सिस्सिणीअं वा अनुजाणिज्जा, से तं सचित्ता, से किं तं अचित्ता ?, अचित्ता से जहानामए आयरिए इ वा उवज्झाए इ वा पवत्तए इ वा थेरे इ वा गणी इ वा गणधरे इ वा गणावच्छेयए इ वा सिसस्स वा सिस्सिणीए इ वा कम्मि कारणे तुट्ठे समाणे वत्थं वा पायं वा पडिग्गहं वा कंबलं वा पायपुच्छणं वा अनुजाणिज्जा, से तं अचित्ता, से किं तं मीसिआ ?, २ से जहानामए आयरिए इ वा उवज्झाए इ वा पवत्तए इ वा थेरे इ वा गणी इ वा गणहरे इ वा गणावच्छेयए इ वा सिस्सस्स वा सिस्सिणीए वा कम्मि य कारणे तुट्ठे सिस्सं वा सिस्सिणीअं वा सभंडमत्तोवगरणं अनुजाणिज्जा, से तं मीसिआ, से तं लोउत्तरिआ, से तं जाणगसरीरभविअसरीरवइरित्ता दव्वाणुन्ना, से नं नोआगमओ दव्वाणुन्ना, से तं दव्वाणुन्ना ३

से किं तं खित्ताणुण्णा ? खित्ताणुण्णा जण्णं जस्स खित्तं अनुजाणइ जत्तिअं वा जम्मि वा खित्ते, से तं खित्ताणुण्णा ४

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*से किं तं कालाणुन्ना? कालाणुण्णा जण्णं जस्स कालं अनुजाणइ जत्तिअं वा कालं अनुजाणइ जम्मि वा कालेअनुजाणइ, तं०-तीतं पडुप्पन्नं वा अणागतं वा वसंतं वा हेमंतं वा पाउसं वा अवत्थाणहेउं, सं तं कालाणुण्णा ५*

*से किं तं भावाणुन्ना?, भावाणुण्णा तिविहा पन्नत्ता, तंजहा-लोइआ कुप्पावयणिया लोगुत्तरिआ, से किं तं लोइया भावाणुण्णा?, २ से जहानामए राया इ वा जुवराया इ वा जाव तुट्ठे समाणे कस्सइ कोहाइभावं अनुजाणिज्जा, सं ते लीइआ भावाणुण्णा, से किं तं कुप्पावयणिआ भावाणुण्णा?, २ से जहानामए आयरिए वा जाव कम्हि कारणे तुट्ठे समाणे कालोचियनाणाइगुणो जोगिणो विणीयस्स खमाइपहाणस्स सुसीलस्स सिस्सस्स तिविहेणं तिगरणविसुद्धेणं भावेणं आयारं वा सूयगडं वा ठाणं वा समवायं वा विवाहपन्नत्तिं वा नायाधम्मकहं वा उवासगदसाओ वा अंतगडदसाओ वा अमुत्तरोववाइयदसाओ वा पण्हावागरणं वा विवाहसुयं वा दिट्ठिवायं वा सव्वदव्वगुणपज्जवेहिं सव्वाणुओगं अनुजाणिज्जा, से तं लोगुत्तरिआ भावाणुण्णा, से तं भावाणुण्णा ६*

*मू. (२) 'किमणुन्ना कस्सऽणुन्ना केवइकालं पवत्तिआणुन्ना।*
*आइगर पुरिमताले पवत्तिया उसहसेणस्स॥*

*मू. (३) अनुण्णा १ उण्णमणी २ नमणी ३ नामणी ४ ठवणा ५ पभावो ६ पभावणं ७ पयारो*
*तदुभयहिय ९ मज्जाया १० नाओ ११ मग्गो य १२ कप्पो अ १३॥*

*मू. (४) संगह १४ संवर १५ निज्जर १६ ठिइकारण चेव १७ जीववुड्ढिपयं १८॥*
*पय १९ पवरं चेव २० तहा वीसमणुण्णाइ नामाइं॥*

अनुज्ञानन्दी समाप्ता

## परिसिष्ठं-२ योगनन्दी

**वृ.** नाणं पंचविहं पन्नत्तं, तंजहा-आभिनिबोहियनाणं १ सुयनाणं २ ओहिनाणं ३ मनपज्जवनाणं ४ केवलनाणं ५, तत्थ नं चत्तारि नाणाइं ठप्पाइं ठवणिज्जाइं नो उद्दिस्सिज्जंति नो समुद्दिस्सिज्जंति नो अनुण्णविज्जंति सुयनाणस्स पुण उद्देसो १ समुद्देसो २ अणुन्ना ३ अनुओगो य पवत्तइ ४,

जइ सुयनाणस्स उद्देसो १ समुद्देसो २ अणुन्ना ३ अनुओगो ४ पवत्तइ किं अंगपविट्ठस्स उद्देसो १ समुद्देसो २ अणुन्ना ३ अनुओगो ४ पवत्तइ? किं अंगबाहिरस्स उद्देसो १ समुद्देसो २ मणुन्ना ३ अनुओगो पवत्तइ ४? गो० अंगपविट्ठस्स वि उद्देसो समुद्देसो अणुन्ना अनुओगो पवत्तइ अंगबाहिरस्सवि उद्देसो १ समुद्देसो २ अनुण्णा ३ अनुओगो ४ पवत्तइ,

इमं पुण पट्ठवणं पडुच्च अंगबाहिरस्स उद्देसो० ४, जइ अंगबाहिरस्स उद्देसो जाव अनुओगो पवत्तइ किं कालियस्स उद्देसो० ४, किं उक्कालियस्स उद्देसो० ४, ?, कालियस्स उद्देसो० ४,

इमं पुण पट्ठवणं पडुच्च उक्कालियस्स उद्देसो० ४, जइ उक्कालियस्स उद्देसो० ४, किं आवस्सगस्स उद्देसो समुद्देसो अनुण्णा अनुओगो पवत्तइ आवस्सगवइरित्तस्स० ४?, गो० आवस्सगस्सवि उद्देसो० ४ आवस्सगइरित्तस्सवि उद्देसो० ४ जइ आवस्सगस्स उद्देसो किं सामाइयस्स १ चउवीसत्थयस्स २ वंदनस्स ३ पडिक्कमणस्स ४ काउस्सग्गस्स ५ पच्चक्खाणस्स ६? सव्वेसिं एतेसिं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उद्देसो १ समुद्देसो २ अनुण्णा ३ अनुओगो पवत्तइ ४।

जइ आवस्सगवइरित्तस्स उद्देसो० ४ किं कालियसुयस्स उद्देसो० ४ उक्कालियसुयस्स उद्देसो० ४ ?, कालियस्सवि उद्देसो० ४ उक्कालियस्सवि उद्देसो० ४,

जइ उक्कालियस्स उद्देसो० ४ किं दसवेकालियस्स १ कप्पियाकप्पियस्स २ चुल्लकप्पसुयस्स ३ महाकप्पसुयस्स ४ उववाइयसुयस्स ५ रायपसेणीसुयस्स ६ जीवाभिगमस्स ७ पन्नवणाए ८ महापन्नावाए ९ पमायप्पमायस्स १० नंदीए ११ अनुओगदाराणं १२ देविदथयस्स १३ तंदुलवेयालिस्स १४ चंदाविज्झयस्स १५ सूरपन्नत्तीए १६ पोरसिमंडलस्स १७ मंडलप्पवेसस्स १८ विज्जाचरणविणिच्छियस्स १९ गणिविज्जाए २० संलेहणासुयस्स २१ विहारकप्पस्स २२ वियरागसुयस्स २३ झाणविभत्तीए २४ मरणविभत्तीए २५ मरणविसोहीए २६ आयविभत्तीए २७ आयविसोहीए २८ चरणविसोहीए २९ आउरपच्चक्खाणस्स ३० महापच्चक्खाणस्स ३१ ?, सव्वेसिं एएसिं उद्देसो १ समुद्देसो २ अनुण्णा ३ अनुओगो पवत्तइ ४।

जइ कालियस्स उद्देसो जाव अनुओगो पवत्तइ किं उत्तरज्झयणाणं १ दसाणं २ कप्पस्स ३ ववहारस्स ४ निसीहस्स ५ महानिसीहस्स ६ इसिभासियाणं ७ जंबुद्दीवपन्नत्तीए ८ चंदपन्नत्तीए ९ दीवपन्नत्तीए १० सागरपन्नत्तीए (दीवसागरप०) ११ खुड्डियाविमाणपविभत्तीए १२ महल्लियाविभाणपविभत्तीए १३ अंगचूलियाए १४ वग्गचूलियाए १५ विवाहचूलियाए १६ अरुणोववाए १७ वरुणोववाए १८ गरुलोववाए १९ धरणोववाए २० वेसमणोववाए २१ वेलंध-रोववायस्स २२ देविंदोववायस्स २३ उट्ठाणसुयस्स २४ समुट्ठाणसुयस्स २५ नागपरियावणियाणं २६ निरयावलियाणं २७ कप्पियाणं २८ कप्पवडिंसियाणं २९ पुप्फियाणं ३० पुप्फचूलियाणं ३१ [वण्हियाणं ३२] वण्हिदसाणं ३३ आसीविसभावणाणं ३४ दिट्ठिविसभावणाणं ३५ चारणभा० ३६ सुमिणभा० (चारणसुमिण) ३७ महासुमिणभा० ३८ तेयग्गिनिसग्गाणं ३९ ?, सव्वेसिंपि एएसिं उद्देसो जाव अनुओगो पवत्तइ ४।

जइ अंगपविट्ठस्स उद्देसो जाव अनुओगो ४ पवत्तेइ किं आयारस्स १ सुयगडस्स २ ठाणस्स ३ समवायस्स ४ विाहपन्नत्तीए ५ नायाधम्मकहाणं ६ उवासगदसाणं ७ अंतगडदसाणं ८ अनुत्तरोववाइयदसाणं ९ पण्हावागरणाणं १० विवागसुयस्स ११ दिट्ठिवायस्स १२ ?, सव्वेसिं एएसिं उद्देसो १ समुद्देसो २ अनुण्णा ३ अनुओगो पवत्तइ ४।

इमं पुण पट्ठवणं पडुच्च इमस्स साहुस्स इमाइ साहुणीए उद्देसो १ समुद्देसो २ अनुण्णा ३ अनुओगो ४ पवत्तइ खमासमणाणं हत्थेणं सुत्तेणं अत्थेणं तदुभएणं उद्देसामि समुद्देसामि अनुजाणामि॥

योगनन्दी समाप्ता

**मुनि दीपरत्नसागरेण संशोधिता सम्पादिता नन्दीसूत्रे**
**मलयगिरि आचार्येण विरचिता टीका परिसमाप्ता**

# ४४ | प्रथमाचूलिका "नन्दीसूत्रं"-समाप्तं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नमो नमो निम्मल दंसणस्स
पंचम गणधर श्री सुधर्मा स्वामिने नमः

# ४५ अनुयोगद्वारसूत्रम्

## सटीकं

### द्वितीयं चूलिका सूत्रं
( मूलम् + मलधारीय हेमचन्द्रसूरि विरचितावृत्तिः )

वृ. ऐं नमः । श्रीवीतरागाय नमः ।

सम्यक्सुरेन्द्रकृतसंस्तुतपादपद्म-मुद्दामकामकरिराजकठोरसिंहम् ।
सद्धर्म्मदेशकवरं वरदं नतोऽस्मि, वीरं विशुद्धतरबोधनिधिं सुधीरम् ॥१॥
अनुयोगभृतां पादान् वन्दे श्रीगौतमादिसूरीणाम् ।
निष्कारणबन्धूनां विशेषतो धर्म्मदातृणाम् ॥२॥
यस्याः प्रसादमतुलं संप्राप्य भवन्ति भव्यजननिवहाः ।
अनुयोगवेदनिस्तां प्रयतः श्रुतवेदतां वन्दे ॥३॥

इहातिगम्भीरमहानीरधिमध्यनिपतितानर्घ्यरत्नमिवातिदुर्लभं प्राप्य मानुषं जन्म ततोऽपि लब्ध्वा त्रिभुवनैकहितश्रीमज्जिनप्रणीतबोधिलाभं समासाद्य विरत्यनुगुणपरिणामं प्रतिपद्य चरण-धर्म्ममधीत्य विधिवत् सूत्रं समधिगम्य तत्परमार्थं विज्ञाय स्वपरसमयरहस्यं तथाविधकर्म्म-क्षयोपशमसंभविनीं चावाप्य विशदप्रज्ञां जिनवचनानुयोगकरणे यतितव्यं तस्यैव सकलम-नोऽभिलषितार्थसार्थसंसाधकत्वेन यथोक्तसमग्रसामग्रीफलत्वात् ।

च चानुयोगो यद्यप्यनेकग्रन्थविषयः संभवति, तथापि प्रतिशास्त्रं प्रत्यध्ययनं प्रत्येद्देशकं प्रतिवाक्यं प्रतिपदं चोपकारित्वात्प्रथममनुयोगद्वारणामसौ विधेयः । जिनवचने ह्याचारादि श्रुतं प्रायः सर्वमप्युपक्रमनिक्षेपानुगमनयद्वारैर्विचार्यते, प्रस्तुतशास्त्रे च तान्येवोपक्रमादिद्वाराण्यभि-धास्यन्ते, अतोऽस्यानुयोगकरणे वस्तुतो जिनवचनस्य सर्वस्याप्यसौ कृतो भवतीत्यतिशयोप-कारित्वात्प्रकृतशास्त्रस्यैव प्रथममनुयोगो विधेयः ।

स च यद्यपि चूर्णिटीकाद्वारेण वृद्धैरपि विहितः तथापि तद्वचसामतिगम्भीरत्वेन दुरधिगम-त्वाद् मन्दमतिनाऽपि मयाऽसाधारणश्रुतभक्तिजनितौतुसुक्यभावतोऽविचारितस्वशक्ति-त्वादल्पधियामनुग्रहार्थत्वाच्च कर्तुमारभ्यते ॥

*मू. ( १ ) नाणं पंचविहं पन्नत्तं, तंजहा-आभिनिबोहियनाणं सुयनाणं ओहिनाणं मनपज्जवनाणं केवलनाणं ॥*

वृ.अस्य च शास्त्रस्य परमपदप्राप्तिहेतुत्वेन श्रेयोभूतत्वात् संभाव्यमानविघ्नत्वात् तदुपशमार्थं शिष्टसमयपरिपालनार्थं चादौ मंगलरूपं सूत्रमाह-'नाणं पञ्चविहं' इत्यादि, व्याख्या-ज्ञातिर्ज्ञानं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'कृत्यल्युटो बहुलं' इति वचनात् भावसाधनः, ज्ञायते-परिच्छिद्यते वस्त्वनेनास्मादस्मिन्वेति वा ज्ञानं, जानाति-स्वविषयं परिच्छिनत्तीति वा ज्ञानंज्ञानावरणकर्म्मक्षयोपशमक्षयजन्यो जीव-स्वतत्त्वभूतो बोध इत्यर्थः, 'पञ्चविहं' ति पञ्चेति-सङ्ख्यावचनो विधानानि विधाः-भेदाः पञ्चविधा अस्येति पञ्चप्रकारमित्यर्थः, 'पन्नत्तं ति प्रज्ञप्तमर्थतस्तीर्थकरोः सूत्रतो गणधरैः प्ररूपितमित्यर्थः, अनेन सूत्रकृता आत्मनः स्वमनीषिका परिहृता भवति, अथवा प्राज्ञात् तीर्थकरादाप्तं-प्राप्तं गणधरैरिती 'प्राज्ञाप्तम्, अथवा प्राज्ञैः-गणधरैस्तीर्थकरादात्तं गृहीतमिति प्राज्ञात्तं, प्रज्ञया वा भव्यजन्तुभिराप्तं-प्राप्तं प्रज्ञाप्तं, न हि प्रज्ञाविकलैरिदमवाप्यत इति प्रतीतमेव, हृस्वत्वं सर्वत्र प्राकृतत्वादित्यक्षरार्थः, अक्षरयोजना त्वेत्रम्-ज्ञानं परमगुरुभिः प्रज्ञप्तमिति सम्बन्धः, कतिविधमीति, अत्रोच्यते, पञ्चविधमिति।

तस्यैव पञ्चविधत्वस्योपदर्शनार्थमाह-'तंजहे'त्यादि, तद्यथेत्युपन्यासार्थः, आभिनि-बोधिकज्ञानं श्रुतज्ञानम् अवधिज्ञानं मनःपर्यायज्ञानं केवलज्ञानं चेति। तत्र अभीत्याभिमुख्ये नीति नैयत्ये, ततश्चाभिमुखो-वस्तुयोग्यदेशावस्थानापेक्षी नियत-इन्द्रियाण्याश्रित्य स्वस्व-विषयपेक्षी बोधः अभिनिबोध इती भावसाधनः, स्वार्थिकतद्धितोत्पादात्स एवाभिनिबोधिकम्, अभिनिबुध्यते आत्मना स इत्यभिनिबोध इति कर्म्मसाधनो वा, अभिनिबुध्यते वस्त्वसा-वित्यभिनिबोध इति कर्तृसाधनो वा, स एवाभिनिबोधिकमिति तथैय, आभिनिबोधकं च तद् ज्ञानं चाभिनिबोधिकज्ञानम्-इन्द्रियपञ्चकमनोनिमित्तो बोध इत्यर्थः।

श्रवणं-श्रुतम् अभिलापप्लावितार्थग्रहणस्वरूप उपलब्धिविशेषः, श्रुतं च तद् ज्ञानं च श्रुतज्ञानम्, अथवा श्रूयति इति श्रुतं-शब्दः स चासौ कारणे कार्योपचाराद् ज्ञानं च श्रुतज्ञानं, शब्दो हि श्रोतुः साभिलापज्ञानस्य कारणं भवतीति सोऽपि श्रुतज्ञानमुच्यते। अवधानमवधिः-इन्द्रियाद्यनपेक्षमात्मनः साक्षादर्थग्रहणम्, अवधिरेव ज्ञानमवधिज्ञानम्।

अथवा अवधिः-मर्यादा तेनावधिना-रूपिद्रव्यमर्यादात्मकेन ज्ञानमवधिज्ञानं।

संज्ञिभिर्जीवैः काययोगेन मनोवर्गणाभ्यो गृहीतानि मनोयोगेन मनस्त्वेन परिणमितानि द्रव्याणि मनांसीत्युच्यन्ते, तेषां मनसां पर्यायाः-चिन्तनानुगुणाः परिणामास्तेषु ज्ञानं मनःपर्याय-ज्ञानम्, अथवा यथोक्तस्वरूपाणि मनांसि पर्येति-अवगच्छतीति मनःपर्यायमिति कर्म्मण्यण् तच्च तद् ज्ञानं च मनःपर्यायज्ञानं।

केवलं-संपूर्णज्ञेयविषयत्वात् संपूर्ण तच्च तद् ज्ञानं च केवलज्ञानमिति।

अवग्रहादिभेदचिन्ता त्वेतेषां ज्ञानानामत्र न क्रियते, सूत्रेऽनुक्तत्वेनाप्रस्तुतत्वात् नन्द्यादिषु विस्तरेणोक्तत्वाच्चेति। अनेन च शास्त्रस्यादावेव ज्ञानपञ्चकोत्कीर्त्तनेन मङ्गलं कृतं भवति, सकलक्लेशविच्छेदहेतुत्वेन ज्ञानस्य परममङ्गलत्वात्। अभिधेयं तु गुणनिष्पन्नानुयोगद्वार-लक्षणशास्त्रनामत एव सकाशात्प्रतीयते, उपक्रमाद्यनुयोगाद्वाराणामेवेहाभिधास्यामानत्वात्।

प्रयोजनं तु प्रकरणकर्तुश्रोत्रोः प्रत्येकमनन्तरपरम्भरभेदाचिन्तनीयं, तत्र प्रकरणकर्तुरनन्तरं सत्त्वानुग्रहः प्रयोजनं, श्रोतुश्चप्रकरणार्थपरिज्ञानं, परम्परं तु द्वयोरपि परमपदप्राप्तिः, इदं तु यद्यपीह साक्षान्नोक्तं तथापि सामर्थ्यादवसीयते, तथाहि-सत्त्वानुग्रहप्रवृत्ता एव परमगुरव इदमुपदिशन्ति, तदनुग्रहे च क्रमेण परमपदप्राप्तिः प्रतीतैव, श्रोताऽपि गुरुभ्यः प्रस्तुतप्रकरणार्थ विजानाति,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्परिज्ञाने च सकलजिनवचनानुयोगकरणे कुशलतामासादयति, तत्कुशलतायां च विप्रहाय हेयानुपादाय उपादेयान् संप्राप्य प्रकर्षवच्चरणकरणं कृत्वाऽतिदुष्करतपश्चरणं अनुभूय विशदकेवलालोकतः सकलत्रिलोकीतलसाक्षात्करणं प्रविश्य सकलकर्म्मविच्छेदकर्तृ शैलेशीकरणं सकलमुक्तजनशरणं परमपदमधिगच्छतीति।

सम्बन्धोऽप्युपायोपेयलक्षणो गम्यत एव, वचनरूपापन्नं हि शास्त्रमिदमुपायस्तदर्थस्तूपेय इति। एवं च समस्तशास्त्रकारणां समयः परिपालितो भवति, उक्तं च तैः-

"संबंधभिधेयपओयणाइं तह मंगलं च सत्थम्मि।
सीसपवित्तिनिमित्तं निव्विग्घत्थं च चिंतिज्जा॥"

इत्यलं विस्तरेण।

*मू. (२) तत्थ चत्तारि नाणाइं ठप्पाइं ठवणिज्जाइं नो उद्दिसंति नो समुद्दिसंति नो अणुन्नविज्जंति. सुयनाणस्स उद्देसो समुद्देसो अनुन्ना अनुओगो य पवत्तइ*

वृ. यदि नाम ज्ञानं पञ्चविधं प्रज्ञप्तं ततः किमित्याह-'तत्थे'त्यादि, 'तत्र तस्मिन् ज्ञानपञ्चके आभिनिबोधिकावधिमनःपर्यायकेवलाख्यानि चत्वारि ज्ञानानि 'ठप्पाइं'ति स्थाप्यानि-असंव्यवहार्याणि, व्यवहारनयो हि यदेव लोकस्योपकारे वर्त्तते तदेव संव्यवहार्यं मन्यते, लोकस्य च हेयोपादेयेष्वर्थेषु निवृत्तिप्रवृत्तिद्वारेण प्रायः श्रुतमेव साक्षादत्यन्तोपकारि, यद्यपि केवलादि-दृष्टमर्थं श्रुतभिधत्ते तथापि गौणवृत्त्या तानि लोकोपकारीणिति भावः।

यद्युक्तन्यायेनासंव्यवहार्याणि तानि ततः किमित्याह-'ठवणिज्जाइं'ति ततः स्थापनीयानि एतानि, तथाविधोपकाराभावतोऽसंव्यवहार्यत्वात्तिष्ठन्तु, न तैरिहोद्देशसमुद्देशाद्यवसरेऽधिकार इत्यर्थः, अथवा स्थाप्यानि - अमुखराणि स्वस्वरूपप्रतिपादनेऽप्यसमर्थानि, न हि शब्दमन्तरेण स्वस्वरूपमपि केवलादीनी प्रतिपादयितुं समर्थानि, शब्दश्चानन्तरमेव श्रुतत्वेनोक्त इति स्वपर-स्वरूपप्रतिपादने श्रुतमेव समर्थं, स्वरूपकथनं चेदमतः स्थाप्यानि, अमुखराणि यानि चत्वारि ज्ञानानि तानीहानुयोगद्वारविचारप्रक्रमे किमित्याह-अमुपयोगित्वात् स्थापनीययानि, अनधि-कृतानि, यत्रैव ह्युद्देशसमुद्देशानुज्ञानदयः क्रियन्ते तत्रैवानुयोगः तद्द्वाराणि चोपक्रमादीनि प्रवर्त्त-न्ते, एवंभूतं त्वाचारादि श्रुतज्ञानमेव इत्यत उद्देशाद्यविषयत्वादनुयोगीनि शेषज्ञानानि, इत्य-तोऽत्रानधिकृतानि।

अत्राह-अनुयोगो व्याख्यानं, तच्च शेषज्ञानचतुष्टयस्यापि प्रवर्त्तत एवेति कथमनुपयोगि-त्वं?, ननु समयचर्यानिभज्ञतासूचकमेवेदं वचो, यतो हन्त तत्रापि तद्ज्ञानप्रतिपादकसूत्रसंदर्भ एव व्याख्यायते, स च श्रुतमेवेति श्रुतस्यैवानुयोगप्रवृत्तिरिति।

अथवा स्थाप्यानि-गुर्वनधीनत्वेनोद्देशाद्यविषयभूतानि, एतदेव विवृणोति-स्थापनीयानीति, एकार्थौ द्वावपि, इदमुक्तं भवति, अनेकार्थत्वादतिगम्भीरत्वाद्विविधमन्त्राद्यतिशयसम्पन्नत्वाच्च प्रायो गुरूपदेशापेक्षं श्रुतज्ञानं, तच्च गुरोरन्तिके गृह्यमाणं परमकल्याणकोशत्वादुद्देशादिविधिना गृह्यत इति तस्योद्देशादयः प्रवर्त्तन्ते, शेषाणि तु चत्वारि ज्ञानानि तदावरणकर्मक्षयक्षयोपशमाभ्यां स्वत एव जायमानानि नोद्देशादिप्रक्रममपेक्षन्ते।

यतश्चैवमत आह-'नो उद्दिसिज्जंति'त्यादि नो उद्दिश्यन्ते नो समुद्दिश्यन्ते नो अनुज्ञायन्ते,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्र इदमध्ययनादि त्वया पठितव्यमिति गुरुवचनविशेष उद्देशः, तस्मिन्नेव शिष्येण अहीना-दिलक्षणोपेतेऽधीते गुरोर्निवेदिते स्थिरपरिचितं कुर्विदमिति गुरुवचनविशेष एव समुद्देशः, तथा कृत्वा गुरोर्निवेदिते सम्यगिदं धारयान्यांश्चाध्यापयेति तद्वचनविशेष एवानुज्ञा, 'सुयनाणस्से'त्यादि श्रुतज्ञानस्योद्देशः समुद्देशोऽनुज्ञा अनुयोगश्च प्रवर्तते ।

तत्रोद्देशादीनां त्रयाणां स्वरूपं संक्षेपत उक्तमपि विनेयानुग्रहार्थं किञ्चिद्विस्तरतः उच्यते-तत्राचाराद्यङ्गस्य उत्तराध्ययनादिकालिकश्रुतस्कन्धस्य औपपातिकाद्युत्कालिकोपाङ्गाध्ययनस्य चायमुद्देशविधिः-इहाचाराङ्गाद्यन्यतरश्रुतमध्येतुमिच्छति यो विनयः सः स्वाध्यायं प्रस्थाप्य गुरुं विज्ञपयति-भगवन्! अमुकं मम श्रुतमुद्दिशत, गुरुरपि भणति 'इच्छाम' इति, ततो विनेयो वन्दकं ददाति ?, ततो गुरुरुत्थाय चैत्यवन्दनकं करोति, तत ऊर्ध्वस्थितो वामपार्श्वीकृतशिष्यो योगोत्क्षेपनिमित्तं पञ्चविंशत्युच्छ्वासामानं कायोत्सर्गं करोति, 'चंदेसु निम्मलयरे'ति यावच्चतुर्विंशतिस्तवं चिन्तयतीत्यर्थः, ततः पारितकायोत्सर्गः संपूर्णं चतुर्विंशतिस्तवं भणित्वा तथा-स्थित एव पञ्चपरमेष्ठिनमस्कारं वारत्रयमुच्चार्य 'नाणं पञ्चविहं पन्नत्त' मित्यादि उद्देशनन्दीं भणति,

तदन्ते च 'इदं पुनः प्रस्थापनं प्रतीत्य अस्य साधोरिदमङ्गममुं श्रुतस्कंधं इदमध्ययनं वा उद्दिशामि क्षमाश्रमणानां हस्तेन सूत्रमर्थं तदुभयं च उद्दिष्ट' मित्येवं वदति, क्षमाश्रमणानामित्यादि त्वात्मनोऽहङ्कारवर्जनार्थमभिधत्ते, ततो विनेय 'इच्छामी'ति भणित्वा वन्दनकं दादति २, तत उत्थितो ब्रवीति-'संदिशत किं भणामीति,' ततो गुरुर्वदति 'वन्दित्वा प्रवेदये'ति, तयो विनये 'इच्छामी'ति भणित्वा वन्दनकं ददाति ३, ततः पुनरुत्थितः प्रतिपादयति-'भवद्भिर्ममामुकं श्रुतमुद्दिष्टमिच्छाम्यनुशास्ति' ततो गुरुः प्रत्युत्तरयति-'योगं कुर्वि'ति, एवं सन्दिष्टो विनेय 'इच्छामि'ति भणित्वा वन्दनकं ददाति, ततोऽत्रान्तरे नमस्कारमुच्चायन्नसौ गुरु प्रदक्षिणयति, तदन्ते च गुरोः पुरतः स्थित्वा पुनर्वदति-'भवद्भिर्ममामुकं श्रुतमुद्दिष्टमिच्छाम्यनुशास्ति' ततो गुरुराह-'योगं कुर्वि'ति,

एवं सन्दिष्ट इच्छामिति भणित्वा वन्दित्वा च पुनस्तथैव गुरुं प्रदक्षिणयति, तदन्ते च पुनस्तथैव गुरुशिष्ययोर्वचनप्रतिवचने, तथैव च तृतीयप्रदक्षिणां विदधाति विनेयः, एतानि च चतुर्थवन्दन-कादीनि त्रीण्यपि वन्दनकान्येकमेव चतुर्थं गण्यते, एकार्थप्रतिबद्धत्वादिति ४, ततस्तृतीय-प्रदक्षिणान्ते गुरुर्निषीदीति, निषण्णस्य च गुरोः पुरतोऽर्द्धावनतगात्रो विनेयो वक्ति-'युष्माकं प्रवेदितं संदिशत साधूनां प्रवेदयामि' ततो गुरुराह-'प्रवेदये'ति, तत इच्छामीति भणित्वा विनेयो वन्दनकं ददाति ५, प्रत्युत्थितश्चोच्चारितपञ्चपरमेष्ठिनमस्कारः पुनर्वन्दनकं ददाति ६, पुनरुत्थितो वदति-'युष्माकं प्रवेदितं साधूनां च तत् प्रवेदितं सन्दिशत करोमि कायोत्सर्गं' ततो गुरुरनु-जानीते-'कुर्वि'ति, ततः पुनरपि वन्दनकं ददाति ७, ।

एतानि सप्त थोभवन्दनकानि श्रुतप्रत्ययानि भवन्ति, ततः प्रत्युत्थितोऽभिधत्ते-'अमुक-स्योद्देशनिमित्तं करोमि कायोत्सर्गमन्यत्रोच्छ्वसितादित्यादि यावद्व्युत्सृजामीति' ततः कायो-त्सर्गस्थितः सप्तविंशतिमच्छ्वासांश्चिन्तयति 'सागरवरगम्भीरे' ति यावच्चतुर्विंशतिस्तवं चिन्तयति इत्यर्थः ।

उद्देससमुद्देसे सत्तावीसं अनुन्नवणयाए' इतिवचनात्, ततः पारितकायोत्सर्गः संपूर्ण

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चतुर्विंशतिस्तवं भणित्वा परिसमाप्तोद्देशक्रियत्वाद् गुरोः थोभवन्दनकं ददाति, तच्च न श्रुतप्रत्ययं, किं तर्हि ?, श्रुतदातृत्वादिना गुरुः परमोपकारी, तद्विनयप्रतिपत्तिनिमित्तमिति।

अङ्गादिसमुद्देशेऽप्ययमेव विधिर्वक्तव्यो, नवरं पूर्वं प्रवेदिते योगं कुर्वित्युक्तमत्र तु स्थिर-परिचितं कुर्विति वदति, योगोत्क्षेपकारयोत्सर्गो नन्द्याकर्षणं प्रदक्षिणात्रयविधिश्च न क्रियते, शेषः सप्तवन्दनकादिको विधिस्तथैव।

अनुज्ञाविधिस्तु योगोत्क्षेपकायोत्सर्गवर्ज्जः सर्वोऽप्युद्देशविधिद्वक्तव्यो, नवरं प्रवेदिते गुरुर्वदति-'सम्यग् धारयान्येषां च प्रवेदय' अन्यानपि पाठयेत्यर्थः, आवश्कादिषु तण्डुल-विचारणादिप्रकीर्णकेष्वपि चैष एव विधिः, नवरं स्वाध्यायप्रस्थापनं योगोत्क्षेपकार्योत्सर्गश्च न क्रियते, एवं सामायिकाद्यध्ययनेषूद्देशकेषु च चैत्यवन्दनप्रदक्षिणात्रयादिविशेषक्रियारहितः सप्तवन्दनप्रदानादिकः स एव विधिरिति तावदियं चूर्णिकारलिखिता सामाचारी, साम्प्रतं पुनर-न्यथापि ताः समुपलभ्यन्ते, न च तथोपलभ्य सम्मोहः कर्त्तव्यः, विचित्रत्वात्सामाचारीणामिति।

इदानीमनुयोगविधिरुच्यते-तत्रानुयोगे-वक्ष्यमाणशब्दार्थः, स यदाऽधीतसूत्रस्याचार्यप्रद-प्रस्थानयोग्यस्य शिष्यस्यानुज्ञायते तदाऽयं विधिः-प्रशस्तेषु तिथिनक्षत्रकरणमुहूर्तेषु प्रशस्ते च जिनायतनादौ क्षेत्रे भुवं प्रमार्ज्य एका गुरूणामेका त्वक्षाणामिति निषद्याद्वयं क्रियते, ततः प्राभातिककाले प्रवेदिते निषद्यानिषण्णस्य गुरोश्चोलपट्टकरजोहरणमुखवस्त्रिकामात्रोपकरणो विनेयः पुरतोऽवतिष्ठते, ततो द्वावपि गुरुशिष्यौ मुखवस्त्रिकां प्रत्युपेक्षयतः, तय च समग्रं शरीरं प्रत्युपेक्षयतः, ततो विनेयो गुरुणा सह द्वादशावर्त्तवन्दनकं दत्त्वा वदति।

'इच्छाकारेण संदिशत स्वाध्यायं प्रस्थापयामि' ततश्च द्वावपि स्वाध्यायं प्रस्थापयतः, ततः प्रस्थापिते स्वाध्याये गुरुर्निषीदति, ततः शिष्यो द्वादशावर्त्तवन्दनकं ददाति, ततो गुरुरुत्थाय शिष्येण सहानुयोगप्रस्थापननिमित्तं कायोत्सर्गं करोति, ततो गुरुर्निषीदती, ततस्तं शिष्यो द्वादशावर्त्तवन्दनकं वन्दते, ततो गुरुरक्षानभिमन्त्र्योत्तिष्ठति, उत्थाय च निषद्यां पुरतः कृत्वा वामपार्श्वीकृतशिष्यश्चैत्यवन्दनं करोति, ततः समाप्ते चैत्यवन्दने पुनः गुरुरूर्ध्वस्थित एव नमस्कारपूर्ववं नन्दिमुच्चारयति, तदन्ते चाभिधत्ते-'अस्य साधोरनुयोगमनुजानामि क्षमा-श्रवणानां हस्तेन, द्रव्यगुणपर्यायैरनुज्ञानतः' ततो विनेयच्छोभवन्दनकेन वन्दते, उत्थितश्च ब्रवीति-'संदिशत किं भणामि ?' ततो गुरुराह-'वन्दित्वा प्रवेदय' ततो वन्दते शिष्यः, उत्थितस्तु ब्रवीति-'भवद्भिर्ममानुयोगोऽनुज्ञातः, इच्छाम्यनुशास्तिं' ततो गुरुर्वदति-'सम्यग् धारयो अन्येषां च प्रवेदय' अन्येषामपि व्याख्यानं कुर्वित्यर्थः, ततो वन्दतेऽसौ, वन्दित्वा च गुरुं प्रदक्षिणयति, प्रदक्षिणान्ते च भवद्भिर्ममानुयोगोऽनुज्ञात इत्याद्युक्तिप्रत्युक्तिर्द्वितीयप्रदक्षिणा च तथैव, पुनस्तृतीयापि तथैव, ततस्तृतीयप्रदक्षिणान्ते गुरुर्निषीदति, तत्पुरः स्थितश्च विनेयो वदति-'युष्माकं प्रवेदितं सन्दिशत साधूनां प्रवेदयामी'त्यादि, शेषमुद्देशविधिद्वक्तव्यं यावदनु-योगानुज्ञानिमित्तं कायोत्सर्गं करोति, तदन्ते च सनिषद्यः शिष्यो गुरुं प्रदक्षिणयति वन्दते च, पुनः प्रदक्षिणयतिवन्दते च, एवं तिस्रो वाराः, ततो गुरोर्दक्षिणभुजासन्ने निषीदति, ततो गुरुपार-म्पर्यागतानि मन्त्रपदानि गुरुः तिस्रो वाराः शिष्यस्य कथयति, तदनन्तरं यथोत्तरे प्रवर्द्धमानाः प्रवरसुगन्धमिश्रास्तिस्रोऽक्षतमुष्टीस्तस्मै ददाति, ततो निषद्याया गुरुरुत्थाय शिष्यं तत्रोपवेश्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यथासन्निहितसाधुभिः, सह तस्मै वन्दनकं ददाति, ततो विनेयो निषद्यास्थित एव 'नाणं पंचविहं पन्नत्त' मित्यादिसूत्रमुच्चार्य यथाशक्ति व्याख्यानं करोति, तदन्ते च साधवो वन्दनकं ददति, ततः शिष्यो निषद्यातः उत्तिष्ठति, गुरुरेव पुनस्तत्र निषीदति, ततो द्वावप्यनुयोगाविसर्गार्थं कालप्रतिक्रमणार्थं च प्रत्येकं कायोत्सर्गं कुरुतः ततः शिष्यो निरुद्धं प्रवेदयते निरुद्धं करोतीत्यर्थः ।

एवं श्रुतस्यैव उद्देशादयः प्रवर्त्तन्ते, न शेषज्ञानानाम्, अत्र चानुयोगेनैवाधिकारो न शेषैः, अनुयोगद्वारविचारस्यैवेह प्रकान्तत्वाद् ॥

*मू. ( ३ ) जइ सुयनाणस्स उद्देसो समुद्देसो अणुन्ना अनुओगो य पवत्तइ, किं अंगपविट्ठस्स उद्देसो समुद्देसो अणुन्ना अनुओगो य पवत्तइ ?, किं अंगबाहिरस्स उद्देसो समुद्देसो अणुन्ना अनुओगो य पवत्तइ ?, अंगपविट्ठस्सवि उद्देसो जाव पवत्तइ, अनंगपविट्ठस्सवि उद्देसो जाव पवत्तइ, इमं पुण पट्ठवणं पडुच्च अनंगपविट्ठस्स अनुओगो ॥*

**वृ.** अत्र यथाभिहितमुपजीव्याह शिष्यो-'यदी'त्यादि, यद्युक्तक्रमेण श्रुतज्ञानस्योद्देशः समुद्देशोऽनुज्ञा अनुयोगश्च प्रवर्त्तते, तर्हि किमसावङ्गप्रविष्टस्य प्रवर्त्तते, उताङ्गबाह्यस्येति ।, तत्राङ्गेषु प्रविष्टम्-अन्तर्गतमङ्गप्रविष्टं श्रुतम्-आचारादि, तद्बाह्यं तु उत्तराध्ययनादि, अत्र गुरुर्निर्वचनमाह-'अंगपविट्ठस्सवि'त्यादि अपिशब्दौ परस्परसमुच्चायार्थौ, अङ्गप्रविष्टस्याप्युद्देशादि प्रवर्त्तते, अङ्गाद्बाह्यस्यापि, 'इदं पुनः' प्रस्तुतं 'प्रस्थापनं' प्रारम्भं 'प्रतीत्य' आश्रित्याङ्गबाह्यस्य प्रवर्त्तते नेतरस्य, आवश्यकं ह्यत्र व्याख्यास्यते, तच्चाङ्गबाह्यमेवेति भावः ॥

*मू. ( ४ ) जइ अनंगपविट्ठस्स अनुओगो, किं कालिअस्स अनुओगो ? उक्कालिअस्स अनुओगो ?, कालिअस्सवि अनुओगो उक्कालिअस्सवि अनुओगो, इमं पुन पट्ठवणं पडुच्च उक्कालिअस्स अनुओगो ।*

**वृ.** अत्राङ्गबाह्यस्येति सामान्योक्तौ सत्यां संशयानो विनेय आह-'जइ अंगबाहिरस्से'त्यादि, यद्यङ्गबाह्यस्योद्देशादिः किमसौ कालिकस्य प्रवर्त्तते उत्कालिकस्य वा ? द्विधाऽप्यङ्गबाह्यस्य संभवादितिभावः, तत्र दिवसनिशाप्रथमचरमपौरुषीलक्षणे कालेऽधीयते नान्यत्रेति कालिकम्-उत्तराध्ययनादि, यत्तु कालवेलामात्रवर्जं शेषकालानियमेन पठ्यते तदूत्कालिकम्-आवश्यकादि। अत्र गुरुः प्रतिवचनमाह-'कालियस्सवी'त्यादि, कालिकस्याप्यसौ प्रवर्त्तते, उत्कालिस्यापि, इदं पुनः प्रस्तुतं प्रस्थापनं-प्रारम्भं प्रतीत्य उत्कालिकस्यासौ मन्तव्यः, आवश्यकमेव ह्यत्र व्याख्यास्यते, तच्चोत्कालिकमेवेति हृदयम् ॥

उत्कालिकस्येति सामान्यवचने विशेषजिज्ञासुः पृच्छति-

*मू. ( ५ ) जइ उक्कालिअस्स अनुओगो किं आवस्सगस्स अनुओगो ? आवस्सगवतिरित्तस्स अनुओगो ?, आवस्सगस्सवि अनुओगो आवस्सगवतिरित्तस्सवि अनुओगो इमं पुन पट्ठवणं पडुच्च आवस्सगस्स अनुओगो ।*

**वृ.** यद्युत्कालिकस्योद्देशादिस्तत्किमावश्यकस्यायं प्रवर्त्तते यद्वाऽऽवश्यकव्यतिरिक्तस्य ?, उभयथाऽप्युत्कालिकस्य सम्भवादिति परमार्थः । तत्र श्रमणैः श्रावकैश्चयोभयसन्ध्यमवश्यंकरणादावश्यकं-सामायिकादिषडध्ययनकलापः, तस्मात्तु व्यतिरिक्तं-भिन्नं दशवैकालि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कादि, गुरुराह-'आवस्सगस्सवी' त्यादि, द्वयोरप्येतयोः सामान्येनोद्देशादिः प्रवर्त्तते, किंत्विदं प्रस्तुतं प्रस्थापनं-प्रारम्भं प्रतीत्यावश्यकस्यानुयोगी नेतरस्य, सकलसामाचारीमूलत्वादस्यैवेह शेषपरिहारेण व्याख्यानादिति भावनीयम्, उद्देशसमुद्देशानुज्ञास्त्वावश्यके प्रवर्त्तमाना अप्यत्र नाधिकृताः, अनुयोगावसरत्वाद्, अतस्तत्परिहारेणोक्तम् 'अनुओगो'त्ति, अयमत्र भावार्थः-अनुयोगस्य प्रक्रान्तत्वात् तद्वक्तव्यताप्रतिबद्धाया अस्या गाथाया इहावसरः, तद्यथा-

'निखेवेगट्ठ निरुत्ति विही पवित्ती य केन वा कस्स ?।
तद्दारभेयलक्खणतदरिहपरिसा य सुत्तत्थो ॥१॥

अस्या विनेयानुग्रहार्थं व्याख्या-इहानुयोगस्य निक्षेपो-नामस्थापनादिको वक्तव्यः १, तथाऽनुयोगस्यैकार्थिकानि वक्तव्यानि, यदाह-

''अनुओगो य निओगो भासा विभासा य वत्तियं चेव।
एए अनुओगस्सस य नामा एगट्ठिया पंच ॥२॥''

तथाऽनुयोगस्य निरुक्तं वक्तव्यं, तद्यथा-स्वाभिधायकसूत्रेण सहार्थस्य अनु-नियतः अनुकूलो वा योगः-अस्येदमभिधेयमित्येवं संयोज्य शिष्येभ्यः प्रतिपादनमनुयोगः सूत्रार्थकथनमित्यर्थः, अथवा-एकस्यापि सूत्रस्यानन्तोऽर्थ इत्यर्थो महान्, सूत्रं त्वणु, ततश्चाणुना-सूत्रेण सहार्थस्य योगो अनुयोगः, तदुक्तम्-

''नियययानुकुलो जोगो सुत्तस्सऽत्थेण जो य अनुओगो।
सुत्तं च अनुं तेणं जोगो अत्थस्स अनुओगो ॥''३,

तथाऽनुयोगस्य विधिर्वक्तव्यो, यथा-प्रथमं सूत्रार्थ एव शिष्यस्य कथनीयः, द्वितीयवारायां सोऽपि निर्युक्त्यर्थकथनमिश्रः, तृतीयवारायां तु प्रसङ्गानुप्रसङ्गागतः सर्वोऽप्यर्थो वाच्यः, तदुक्तम्-

''सुत्तत्थो खलु पढमो बीओ निज्जुत्तिमीसितो भणितो।
तइओ य निरवसेसो एस विही होइ अनुओगो ॥''

इत्याद्यन्योऽपि अत्र विधिर्वाच्यो, दिङ्मात्रत्वादस्येति ४,

तथाऽनुयोगस्य प्रवृत्तिर्यथा भवति तथा वाच्यं, तत्रोद्यमी सूरिरुद्यमिनः शिष्याः, उद्यमी सूरिरनुद्यमिनः शिष्याः, अनुद्यमी सूरिद्यमिनः शिष्याः, अनुद्यमी सूरिरनुद्यमिनः, शिष्या इति चतुर्भङ्गी, अत्र प्रथमभङ्गे अनुयोगस्य प्रवृत्तिर्भवति, चतुर्थे तु न भवति, द्वितीयतृतीययोऽस्तु काचित्कथञ्चिद्भवत्यपि ५,

तथानुयोगः केन कर्त्तव्य इति तद्योग्यः कर्त्ताऽभिधानीयो, यदाह-

''देसकुलजाइरूवी संघयणी धिइजुओ अनासंसी।
अविकत्थणो अमाई थिरपरिवाडी गहियवक्को ॥

थिरपरिवाडि'त्ति अविस्मृतसूत्रः।

''जियपरिसो जियनिद्दो मज्झत्थो देसकालभावन्नू।
आसन्नलद्ध पइभो नाणाविहदेसभाणन्नू ॥२॥
पंचविहे आयारे जुत्ते सुत्तत्थदुभयविहिन्नू।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आहरनहेउउवनयनिउणो गाहणाकुसलो ॥३॥
ससमयपरसमयविऊ गंभीरो दित्तिमं सिवो सोमो।
गुणसयकलिओ जुत्तो पवयणसारं परिकिहेउं ॥४॥"

'सिवो'त्ति मन्त्रादिसामर्थ्यादुपशमितोपद्रवः, युक्तः-उचितः प्रवचनसारं परिकथयितुं ६ तथा अयमनुयोगः कस्य शास्त्रस्यैवंभूतेन गुरुणा कर्त्तव्य इत्यपि वाच्यं ७, तथा 'तद्दार'त्ति तस्य-अनुयोगस्य द्वाराणि-उपक्रमादि यत्रैव वक्ष्यमाणस्वरूपाणि वाच्यानि ८, तथा 'भेद'त्ति तेषामेव द्वाराणामानुपूर्वीनामप्रमाणादिकोऽत्रैव वक्ष्यमाणस्वरूपो भेदो वक्तव्यः ९, तथाऽनुयोगस्य लक्षणं वाच्यं, यदाह-

"संहिया य पदं चेव, पयत्थो पयविग्गहो।
चालणा य पसिद्धि य, छव्विहं विद्धि लक्खणं ॥"

प्रश्ने कृते सति 'पसिद्धि'त्ति चालनायां सत्यां प्रसिद्धिः-समाधानं 'विद्धि'त्ति जानीहि, व्याख्येयसूत्रस्य च 'अलियमुवधायजणय' मित्यादिद्वात्रिंशद्दोषरहित्वादिकं लक्षणं वक्तव्यः १०, तथा तस्यैव अनुयोगस्य योग्या परिषद्वक्तव्या, सा च सामान्यतस्त्रिधा भवति, तद्यथा-

"जाणंतिया अजाणंतिया य तह दुव्वियड्डिया चेव।
तिविहा य होइ परिसा तीसे नाणत्तगं वोच्छं ॥१॥"
"गुणदोसविसेसण्णू अणभिग्गहिया य कुस्सुइमएसुं।
सा खलु जाणगपरिसा गुणतत्तिल्ला अगुणवज्जा ॥२॥"
"खीरमिवरायहंसा ने धुट्टंति गुणे गुणसमिद्धा।
दोसेवि य छड्डित्ता ते वसभा धीरपुरिसत्ति ॥३॥" (इति ज्ञायकपरिषत्)
"जे हुंति पगइसुद्धा भिगसावगसीहकुक्कुडगभूया।
रयणमिव असंठविया सुहसंणप्पा गुणसमिद्धा ॥४॥"

सावगशब्दः सर्वत्र संबध्यते, ततो मृगसिंहकुर्कुटशावो-लघुमृगाद्यपत्यं तद्भूता अत्यन्तार्जुत्वसाम्यात् तत्सदृशी येत्यर्थः, सहजरत्नमिवासंस्कृता 'सुहसण्णप्प'त्ति सुखप्रज्ञापनीया

"जा खलु अभाविया कुस्सुइहिं न य ससमए गहियसारा।
अकिलेसकरा सा खलु वइरं छक्कोडिसंद्धं व ॥५॥"

पट्कोणशुद्धं वज्रमिव-हीरक इव विशुद्धा या सा खल्वज्ञायकपरिषदिति वाक्यशेषः। इदानीं दुर्विदग्धपरिषदुच्यते-

"न य कत्थवि निम्माओ न य पुच्छइ परिभवस्स दोसेणं।
वत्थिव्व वायपुण्णो फुट्टइ गामिल्लगवियड्डो ॥६॥"
किंचिम्मत्तग्गाही पल्लवगाही य तुरियगाही य।
दुव्विड्डिया उ एसा भणिया तिविहा इमा परिसा ॥७॥

अत्राद्यपरिषद्द्वयमनुयोगार्हं तृतीया त्वयोग्येति ११, एतत्सर्वमभिधाय ततः सूत्रार्थो वक्तव्यः १२ इति लेशतो व्याख्यातेयं कस्य शास्त्रस्यायमनुयोग इति सप्तमं द्वारं चेतसि निधाय 'जइ सुयनाणस्स उद्देशो' इत्यादिसूत्रप्रपञ्चपूर्वकमुक्तं सूत्रकृता-'इदं पुनः प्रस्थापनं प्रतीत्या-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वश्यकस्यानुयोग' इति ॥ पुनरप्याह विनेयः-

*मू. ( ६ ) जइ आवस्सगस्स अनुओगो किं अंगं अंगाइं सुअखंधो अज्झयणं अज्झयणाइं उद्देसो उद्देसो ?, आवस्स(स्सयं)यस्स नं नो अंगं नो अंगाइं संअखंधो नो सुअखंधा नो अज्झयणं अज्झयणाइं नो उद्देसो नो उद्देसा ॥*

वृ. यद्यावश्यकस्य प्रस्तुतोऽनुयोगः, तर्हि 'किं न'मिति वाकक्यालङ्कारे, किमिति परप्रश्ने, किमेकं द्वादशाङ्गान्तर्गतमङ्गभिदम् उत बहून्यङ्गानि, अथैकः, श्रुतस्कन्धो बहवो वा श्रुतस्कन्धाः, अध्ययनं वैकं बहूनि वाऽध्ययनानि, उद्देशको वा एको बहवो वा उद्देशका इत्यष्टौ प्रश्नाः, तत्र श्रुतस्कन्धः अध्ययनानि चेदमिति प्रतिपत्तव्यं, षडध्ययनात्मकश्रुतस्कन्धरूपत्वादस्य, शेषास्तु षट् प्रश्ना अनादेयाः, अनङ्गादिरूपत्वादिति, एतदेवाह-

'आवस्सयस्स न'मित्यादि, अत्राह-नन्वावश्यकं किमङ्गमङ्गानीत्येतत् प्रश्नद्वयमत्रानव-काशमेव, नन्द्यध्ययन एवास्यानङ्गप्रविष्टत्वेन निर्णीतत्वात्, तथात्राप्यङ्गबाह्योत्कालिकक्रमेणा-नन्तरमेवोक्तत्वादिति, अत्रोच्यते यत्तावदुक्तं - 'नन्द्यध्ययन एवेत्यादि' तदयुक्तं यतो नावश्यं नन्द्यध्ययनं व्याख्याय तत इदं व्याख्येयमिति निमयोऽस्ति, कदाचिदनुयोगद्वारव्याख्यानस्यैव प्रथमं प्रवृत्तेः, अनियमज्ञापकश्चायमेव सूत्रोपन्यासः, अन्यथा ह्यङ्गबाह्यत्वेऽस्य तत्रैव निश्चिते किमिहाङ्गानङ्गप्रविष्टचिन्तासूत्रोपन्यासेनेति, मङ्गलार्थमवश्यं नन्दिरादौ व्याख्येया इति चेन्न, ज्ञानपञ्चकाभिधानमात्रस्यैव मङ्गलत्वात्तस्य चेहापि कृतत्वादिति, यच्चोक्तम् 'अत्रोप्यङ्ग-बाह्योत्कालिकक्रमेणे'त्यादि तत्रापि समुदितानामुद्देशसमुद्देशानुज्ञानयोगानां प्रश्नप्रकरणे तदुक्तम्, अत्र तु केवलोऽनुयोग एवाधिकृतः, तत्प्रस्तावे त्विदमेवोक्तमए-इदं पुनः प्रस्थापनं प्रतीत्यावश्यकस्यानुयोग' इत्यतो भिन्नप्रस्तावत्वात् पृच्छा क्रियते 'आवस्सयस्स नं किं'-मित्यादि, विस्मरणशीलाल्पबुद्धिमाषतुषादिकल्पसाध्वनुग्रहार्थं वेत्यदोषः ॥६॥

तदेवं यस्माद् 'इदं पुनः प्रस्थापनं प्रतीत्यावश्यकस्यानुयोग' इत्यनेनावश्यकमिति शास्त्रनाम निर्णीतं, यस्माच्चाष्टस्वन्तरोक्तप्रश्नेष्वावश्यकं श्रुतस्कन्धत्वेनाध्ययनकलापात्मकत्वेन च निर्णीतं तस्मात्किमित्याह-

*मू. ( ७ ) तम्हा आवस्सयं निक्खिविस्सामि सुअं निक्खिविस्सामि खंधं निक्खिविस्सामि अज्झयणं निक्खिविस्सामि ।*

वृ.यस्मात्प्रस्तुतानुयोगविषयं शास्त्रमुक्तक्रमेणावश्यकादिरूपतया निर्णीतं तस्मादावश्यकं निक्षेप्स्यामि श्रुतं निक्षेप्स्यामि स्कन्धं निक्षेप्स्यामि अध्ययनं निक्षेप्स्या, इदमुक्तं भवति-आव-श्यकादिरूपतया प्रकृतशास्त्रस्य निश्चितत्वादावश्यकादिशब्दानामर्थो निरूपणीयः, स च निक्षेप-पूर्वक एव स्पष्टतया निरूपितो भवति, अतोऽमीषां निक्षेपः क्रियते, तत्र निक्षेपणं निक्षेपो-यथासंभवमावश्यकादेर्नामादिभेदनिरूपणम् ॥

*मू. ( ८ ) जत्थ य जं जाणेज्जा निक्खेवं निक्खिवे निरवसेसं ।*
*जत्थाविअ न जाणेज्जा चउक्कगं निक्खिवेतत्थ ॥*

वृ. तत्र जघन्यतोऽप्यसौ चतुर्विधो दर्शनीय इति नियमार्थमाह-'यत्र च' जीवादिवस्तुनि यं जानीयात् 'निक्षेपं' न्यासं, यतदोर्नित्याभिसंबन्धात्तत्र वस्तुनि तं निक्षेपं' निक्षिपेत् 'निरवशेषं'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

समग्रं, यत्रापि च न जानीयान्निरवशेषं निक्षेपभेदजालं तत्रापि नामस्थापनाद्रव्यभावलक्षणं चतुष्कं निक्षिपेद्, इदमुक्तं भवति-यत्र तावन्नामस्थापनाद्रव्यक्षेत्रकालभवभावादिलक्षणा भेदा ज्ञायन्ते तत्र तैः सर्वैरपि वस्तु निक्षिप्यते, यत्र तु सर्वभेदा न ज्ञायन्ते तत्रापि नामादिचतुष्टयेन वस्तु चिन्तनीयमेव, सर्वव्यापकत्वात्तस्य, न हि किमपि तद्वस्तु अस्ति यन्नामादिचतुष्टयं व्यभिचरतीति गाथार्थः ॥

तत्र 'यथोद्देसं निर्द्देश' इत्यावश्यकनिक्षेपार्थमाह-

*मू. ( १ ) से किं तं आवस्सयं ?, आवस्सयं चउव्विहं पन्नत्तं, तंजहा-नामावस्सयं ठवणा-वस्सयं दव्वावस्सयं भावावस्सयं ।*

वृ. अत्र 'से' शब्दो मागधदेशीप्रसिद्धोऽथशब्दार्थे वर्त्तते, वाक्योपन्यासार्थः, तथा चोक्तम्-"अथ प्रक्रियाप्रश्नानन्तर्यमङ्गलोपन्यासनिर्वचनसमुच्चयेषु" इति, किमिति प्रश्ने, तदिति सर्वनाम पूर्वप्रक्रान्तपरामर्शार्थे, ततश्चायं समुदायार्थः-अथ किंस्वरूपं तदावश्यकम् ?, एवं प्रश्निते सत्याचार्यः शिष्यवचनानुरोधेन आदराधानार्थं प्रत्युच्चार्य निर्दिशति 'आवस्सयं चउव्विह'मित्यादि,

अवश्यं कर्त्तव्यमावश्यकम्, अथवा गुणानां आ-समन्ताद्वश्यमात्मानं करोतीत्यावश्यकं, यथा अन्तं करोतीति अन्तकः, अथवा-आवस्सयंति प्राकृतशैल्या आवासकं, तत्र 'वस निवासे' इति गुणशून्यमात्मानम् आसमन्तात् वासयति गुणैरित्यावासकं, 'चउव्विहं पन्नत्तं'ति चतस्रो विधा-भेदा अस्येति चतुर्विधं प्रज्ञप्तं-प्ररूपितमर्थतस्तीर्थकरैः सूत्रतो गणधरैः, तद्यथा-'नामा-वस्सय'मित्यादि, नाम-अभिधानं तद्रूपमावश्यकं नामावश्यकम् आवश्यकभिधानमेवेत्यर्थः, अथवा नाम्ना-नाममात्रेणावश्यकं नामावश्यकं जीवादीत्यर्थः, तल्लक्षणं चेदम्-

"यद्वस्तुनोऽभिधानं स्थितमन्यार्थे तदर्थनिरपेक्षम् ।
पर्यायानभिधेयं च नाम यादृच्छिकं च तथा ॥"

विनेयानुग्रहार्थमेतद्व्याख्या-यद्वस्तुनः इन्द्रादेः 'अभिधानम्' इन्द्र इत्यादिवर्णावलीमात्र-भिदमेव च आवश्यकलक्षणवर्णचतुष्टयावलीमात्रं यत्तदोर्नित्याभिसंबन्धात्तन्नामेति संटङ्कः, अथ प्रकारान्तरेण नाम्नो लक्षणमाह-'स्थितमन्यार्थे तदर्थनिरपेक्षं पर्यायानभिधेयं चेति' तदपि नाम, यत्कथंभूतमित्याह-अन्यश्चासावर्थश्चान्यार्थो गोपालदारकादिलक्षणः तत्र स्थितम्, अन्य-त्रेन्द्रादावर्थे यथार्थत्त्वेन प्रसिद्धं सदन्यत्र गोपालदारकादौ यदारोपितमित्यर्थः, अत एवाह-'तदर्थनिरपेक्षम्'इति, तस्य-इन्द्रादिनाम्नोऽर्थः-परमैश्वर्यादिरूपस्तदर्थः, स चासावर्थश्चेति वा तदर्थः, तस्य निरपेक्षं गोपालदारकादौ तदर्थस्याभावात्, पुनः किंभूतं तदित्याह-'पर्यायान-भिधेय'मिति पर्यायाणां-शक्रपुरन्दरादीनामनभिधेयम्-अवाच्यं, गोपालदारकादयो हीन्द्रादि-शब्दैरुच्यमाना अपि शचीपत्यादिरिव शक्रपुरन्दरादिशब्दैर्नाभिधीयन्ते, अतस्तन्नामापि नामतद्व-तोरभेदोपचारात्पर्यायानभिधेयमित्युच्यते, चशब्दो नाम्न एव लक्षणान्तरसूचकः, शचीपत्यादौ प्रसिद्धं तन्नाम वाच्यार्थशून्ये अन्यत्र गोपालदारकादौ यदारोपितं तदपि नामेति तात्पर्यं, तृतीय-प्रकारेणापि तल्लक्षणमाह-

"यादृच्छिकं च तथे'ति तथाविधव्युत्पत्तिशून्यं डित्थडवित्थादिरूपं 'यादृच्छिकं' स्वेच्छया

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नाम क्रियते तदपि नामेत्यायार्थः ॥

अथ नामावश्यकस्वरूपनिरूपणार्थं सूत्रकार एवाह–

*मू. ( १० ) से किं तं नामावस्सयं ?, २१ जस्स णं जीवस्स वा अजीवस्स वा जीवाण वा अजीवाण वा तदुभयस्स वा तदुभयाण वा आवस्सएत्ति नामं कज्जइ से तं नामावस्सयं।*

**वृ.** अथ किं तन्नामावश्यकम् इति प्रश्ने सत्याह–'नामावस्सयं जस्स न'मित्यादि, अत्र द्विकलक्षणेनाङ्केन सूचितं द्वितीयमपि नामावस्सयंतिपदं द्रष्टव्यम्, एवमन्यत्रापि यथासम्भवमभ्यूह्यं, नमिति वाक्यालङ्कारे, यस्य वसस्ततुनो जीवस्य वा अजीवस्य वा जीवानामजीवानां वा तदुभयस्य वा तदुभयावां वा आवश्यकमिति यन्नाम क्रियते तन्नामावश्यकमित्यादिपदेन सम्बन्धः, नाम च तदावश्यक चेति व्युत्पत्तेः, अथवा यस्य जीवादिवस्तुनः आवश्यकमिति नाम क्रियते तदेव जीवादिवस्तु नामावश्यकं नाम्ना–नाममात्रेणावश्यकं नामावश्यकमिति व्युत्पत्तेः, वाशब्दाः पक्षान्तरसूचका इति समुदायार्थः,

तत्र जीवस्य कथमावश्यकमिति नाम सम्भवतीति, उच्यते, यथा लोके जीवस्य स्वपुत्रादेः कश्चित्सीहको देवदत्त इत्यादि नाम करोति तथा कश्चित् स्वाभिप्रायवशादावश्यकमित्यपि नाम करोति, अजीवस्य कथमिति चेद्, उच्यते, इहावश्यकावासकशब्दयोरेकार्थता प्रागुक्ता, ततश्चोध्र्वशुष्कोऽचित्तो बहुकोटराकीर्णो वृक्षोऽन्यो वा तथाविधः कश्चित्पदार्थविशेषः सर्पादेरावासोऽयमिति लौकिकैर्व्यपदिश्यत एव, स च वृक्षादिर्यद्यप्यनन्तैः परमाणुलक्षणैरजीवद्रव्यैर्निष्पन्नस्तथाऽप्येकस्कन्धपरिणतिमाश्रित्य एकाजीवत्वेन विवक्षित इति स्वार्थिकप्रत्ययोपादानादेकाजीवस्यावासकनाम सिद्धं, जीवानामपि बहूनामावासकनाम दृश्यते यथा–इष्टकापाकाद्यग्निर्मूषिकावास इत्युच्यते, तत्र ह्यग्नौ किल मूषिकाः संमूर्च्छन्ति अतस्तेषामसंख्येयानाग्निजीवानां पूर्ववदावासकं नाम सिद्धम्,

अजीवानां तु यथा नीडं पक्षिणामावास इत्यच्येते, तद्धि बहुभिस्तृणाद्यजीवैर्निष्पद्यते इति बहूनामजीवानामावसाकनाम भवति, इदानीमुभयस्यावासकसंज्ञा भाव्यते–तत्र गृहदीर्घिकाऽशोकवनिकाद्युपशोभितः प्रासादादिप्रदेशो राजादेरावास उच्यते, सौधर्मादिविमानं वा देवानामावासोऽभिधीयते, अत्र च जलवृक्षादयः, सचेतनरत्नादयश्च जीवा इष्टकाकाष्ठादयोऽचेतनरत्नादयश्चाजीवास्तन्निष्पन्नमुभयं, तस्य कप्रत्ययोपादने आवासकसंज्ञा सिद्धा, उभयानां त्वावासकसंज्ञा यथा संपूर्णनगरादिकं राजादीनामावास उच्यते, संपूर्णः सौधर्म्मादिकल्पो वा इन्द्रादीनामावासोऽभिधीयते, अत्र च पूर्वोक्तप्रासादविमानयोर्लघुत्वादेकमेव जीवाजीवोभयं विवक्षितमत्र तु नगरादीनां सौधर्म्मादिकल्पानां च महत्त्वाद्बहूनि जीवाजीवोभयानि विवक्षितानीति विवक्षया भेदो द्रष्टव्यः, एवमन्यत्रापि जीवादीनामावाकसंज्ञा यथासंभवं भावनीया, दिग्मात्रपदर्शनार्थत्वादस्य। निगमयन्नाह–'सेत्त'मित्यादि, 'से त'मित्यादि वा कचित् पाठः, तदेतन्नामावश्कमित्यर्थः ॥ इदानीं स्थापनावश्यकनिरूपणार्थमाह–

*मू. ( ११ ) से किं तं ठवणावस्सयं ?, २ जण्णं कट्ठकम्मे वा पोत्थकम्मे वा चित्तकम्मे वा लेप्पकम्मे वा गंथिरो वा वेढिमे वा पूरिमे वा संघाइमे वा अक्खे वा वराडए वा, एगो वा अनेगो वा सब्भावठवणा वा असब्भावठवणा वा आवस्सएत्ति ठवणा ठविज्जइ से तं ठवणावस्सयं ॥*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. अथ किं तत् स्थापनावश्यकमिति प्रश्ने सत्याह-'ठवणावस्सयं जण्ण'मित्यादि, तत्र स्थाप्यते-अमुकोऽयमित्यभिप्रायेण क्रियते निर्वर्त्त्यत इति स्थापना-काष्ठकर्म्मादिगता-वश्यकवत्साध्वादिरूपा सा चासौ आवश्यकतद्वतोरभेदोपचारादावश्यकं च स्थापनावश्यकं, स्थापनालक्षणं च सामान्यत इदम्-

"यत्तु तदर्थवियुक्तं तदभिप्रायणे यच्च तत्करणि।
लेप्यादिकर्म्म तत्स्थापनेति क्रियतेऽल्पकालं च ॥ इति,

विनेयानुग्रहार्थमत्रापि व्याख्या-तुशब्दो नामलक्षणात् स्थापनालक्षणस्य भेदसूचकः, स चासावर्थश्च तदर्थो-भावेन्द्रभावावश्यकादिलक्षणस्तेन वियुक्तं-रहितं यद्वस्तु 'तदभिप्रायेण' भावेन्द्राद्यभिप्रायेण 'क्रियते' स्थाप्यते तत् स्थापनेति सम्बन्धः, किंविशिष्टं यदित्याह-यच्च 'तत्करणि' तेन-भावेन्द्रियादिना सह करणिः सादृश्यं यस्य(तत्) तत्करणि-तत् सादृशमित्यर्थः, चशब्दात्तदकरणि चाक्षादि वस्तु गृह्यते, असदृशमित्यर्थः, किं पुनस्तदेवंभूतं वस्त्वित्याह-'लेप्यादिकर्म्मे'ति लेप्यपुत्तलिकादित्यर्थः, आदिशब्दात् काष्ठपुत्तलिकादि गृह्यते, अक्षादि वाऽनाकारं, कियंतं कालं तत् क्रियत इत्याह-अल्पः कालो यस्य तदल्पकालम्-इत्वरकाल-मित्यर्थः, चशब्दाद्यावत्कथिकं च शाश्वतप्रतिमादि, यत्पुनर्भावेन्द्राद्यर्थरहितं साकारमनाकारं वा तदर्थाभिप्रायेण क्रियते तत् स्थापनेति तात्पर्यमित्यार्याथः।

इदानीं प्रकृतमुच्यते-'जं नं'ति 'ण'मिति वाक्यालङ्कारे, यत्काष्ठकर्मणि वा चित्रकर्म्मणि वा यावत् वराटके वा एको वा अनेको वा सद्भावस्थापनया वा असद्भावस्थापनया वा 'आव-स्सए'त्ति आवश्यकतद्वतोरभेदोपचारत्तद्वानिह गृह्यते, ततश्चैको वा अनेको वा, कथंभूताः ?, अत उच्यते-आवश्यकक्रियावानावश्यकक्रियावन्तो वा 'ठवणा ठविज्जइ'त्ति स्थापनारूपं स्थाप्यते-क्रियते, आवृत्त्या बहुवचनान्तत्वे स्थापनारूपाः स्थाप्यन्ते-क्रियन्ते, तत् स्थापनाऽऽ-वश्यकमित्यादिपदेन सम्बन्ध इति समुदायार्थः। काष्ठकर्म्मादिष्वाश्यकक्रियां कुर्व्वन्तो यत् स्थापनारूपः साध्वादयः स्थाप्यन्ते तत् स्थापनाऽऽवश्यकमिति तात्पर्यम्।

अधुना अवयवार्थ उच्यते-तत्र क्रियत इति कर्म काष्ठे कर्म काष्ठकर्म-काष्ठनिकुट्टितं रूपमित्यरथ्ः, 'चित्रकर्म चित्रलिखितं रूपकं' पोत्थम्मे व' त्ति अत्र पोत्थं-पोतं वस्तमित्यर्थः, तत्र कर्म्म-तत्पल्लवनिष्पन्नं धीउल्लिकारूपकमित्यर्थः, अथवा पोत्थं-पुस्तकं तच्चेह संपुटकरूपं गृह्यते, तत्र कर्म्म तन्मध्ये वर्त्तिकालिखितं रूपकमित्यर्थः:, अथवा पोत्थं-ताडपत्रादि तत्र कर्म्म-तत्छेदनिष्पन्नं रूपकं, 'लेपकर्म्म' लेप्यरूपकं, 'ग्रन्थिमं' कौशलातिशयाद् ग्रन्थि-समुदायनिष्प्रादितं रूपकं 'वेष्टिमं' पुष्पवेष्टनक्रमेण निष्पन्नमानन्दपुरादिप्रतीतरूपम् अथवा एकं द्वयादीनि वा वस्त्राणि वेष्टयन् कश्चित् रूपकं उत्थापयति तद्वेष्टिमं, 'पूरिमं' भरिमं पित्तलादि-मयप्रतिमावत् 'संघातिमं' बहुवस्त्रादिखण्डसंघातानिष्पन्नं कञ्चुकवत्, 'अक्षः' चन्दनको 'वराटकः' कर्पदकः, अत्र वाचानान्तरे अन्यान्यपि दन्तकर्म्मादिपदानि दृश्यन्ते तान्यप्युक्ता-नुसारतो भावनीयानि, वाशब्दाः पक्षान्तरसूचकाः, यथासम्भवमेवमन्यत्रापि, एतेषु काष्ठकर्मादिषु आवश्यककक्रियां कुर्व्वन्तः एकादिसाध्वादयः सद्भावस्थापनया असद्भावस्थापनया वा



Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्थाप्यमानाः स्थापनाऽऽवश्कं, तत्र काष्ठकर्मादिष्वाकारवति सद्भावस्थापनया, साध्वाद्याकारस्य तत्र सद्भावात्, अक्षादिषु त्वनाकारवती असद्भावस्थापनया, साध्वाद्याकारस्य तत्रासद्भावादिति, निगमयन्नाह–

'सेत'मित्यादि तदेतत् स्थापनाऽऽवश्यकमित्यर्थः। अत्र नामस्थापनयोरभेदं पश्यन्निदमाह–

*मू. ( १२ ) नामट्ठवणाणं को पइविसेसो ?, नामं आवकहिअं, ठवणा इत्तरिआ वा होज्जा आवकहिआ वा।*

वृ. नामस्थापनयोः कः प्रतिविशेषो ?, न कश्चिदित्यभिप्रायः, तथाहि–आवश्कयादिभावार्थशून्ये गोपालदारकादौ द्रव्यमात्रे यथा आवश्यकादि नाम क्रियंते, तत्स्थापनाऽपि तथैव तच्छून्ये काष्ठकर्मादौ द्रव्यमात्रे क्रियते, अतो भावशून्ये द्रव्यमात्रे क्रियमाणत्वाविशेषान्नानयोः कश्चिद्विशेषः, अत्रोत्तरमाह–'नामं आवकहिय'मित्यादि, नाम यावत्कथिकं–स्वाश्रयद्रव्यस्यास्तित्वकथां यावदनुवर्त्तते, न पुनरन्तराऽप्युपरमते(ति), स्थापना पुनरित्वरा–स्वल्पकालभाविनी वा स्याद्यावत्कथिका वा, स्वाश्रयद्रव्ये अवतिष्ठमानेऽपि काचिदन्तराऽपि निवर्त्तते काचित्तु तत्सत्तां यावदतिष्ठति इति भावः, तथाहि–नाम आवश्यकादिकं मेरुजम्बूद्वीपकलिङ्गमगधसुराष्ट्रादिकं वा यावतए स्वाश्रयो गोपालदारकदेहादिः शिलासमुच्चयादिर्वा समस्ति तावदवतिष्ठत इति तद्यावत्कथिकमेव, स्थापना त्वावश्यकत्वेन योऽक्षः स्थापितः स क्षणान्तरे पुनरपि तथाविधप्रयोजनसम्भवे इन्द्रत्वेन स्थाप्यते पुनरपि च राजादित्वेनेत्यकल्पकालवर्त्तिनी, शाश्वतप्रतिमादिरूपा तु यावत्कथिका वर्त्तते, तस्याश्चार्हदादिरूपेण सर्वदा तिष्ठतीति स्थापनेति व्युत्पत्तेः स्थापनात्वमवसेयं, न तु स्थाप्यत इति स्थापना, शाश्वतत्वेन केनापि स्थाप्यमानत्वाभावादिति, तस्माद्भावशून्यद्रव्याधारसाम्येऽप्यस्त्यनयोः कालकृतो विशेषः।

अत्राह–ननु यथा स्थापना काचिदकल्पकालीना तथा नामापि किञ्चिदल्पकालीमेव, गोपालदारकादौ विद्यमानेऽपि कदाचिदनेकनामपरावृत्तिदर्शनाद्, सत्यं, किन्तु प्रायो नाम यावत्कथितमेव, यस्तु कचिदन्यथोपलम्भः सोऽल्पत्वान्नेह विवक्षित इत्यदोषः।

उपलक्षणमात्रं चेदं कालभेदेनैतयोर्भेदकथनम्, अपरस्यापि बहुप्रकारभेदस्य सम्भवात्, तथाहि–यथेन्द्रादिप्रतिमास्थापनायां कुण्डलाङ्गदादिभूषितः सन्निहितशचीवज्रादिराकार उपलभ्यते न तथा नामेन्द्रादौ, एवं यथा तत्स्थापनादर्शनाद् भावः समुल्लसति नैवमिन्द्रादिनामश्रवणमात्राद्, यथा च तत्स्थापनायां लोकस्योपयाचितेच्छापूजाप्रवृत्तिसमीहितलाभादयो दृश्यन्ते नैवं नामेन्द्रादावित्येवमन्यदपि वाच्यमिति।

उक्तं स्थापनाऽऽवश्यकम्, इदानीं द्रव्यावश्यकनिरूपणाय प्रश्नं कारयति–

*मू. ( १३ ) से किं तं दव्वावस्सयं ?, २ दुविहु पन्नत्तं तंजहा–आगमओ अ नोआगमओ अ।*

वृ. अथ किं तत् द्रव्यावश्यकमिति पृष्टे सत्याह–'दव्वावस्सयं दुविह'मित्यादि तत्र द्रवति–गच्छति ताँस्तान् पर्यायानिति द्रव्यंविवक्षितयोरतीतभविष्यद्भावयोः कारणम्, अनुभूतविवक्षितभावमनुभविष्यद्विवक्षितभावं वा वस्त्वित्यर्थः, द्रव्यं च तदावश्यकं च द्रव्यावश्यकम्, अनुभातावश्यकपरिणाममनुभविष्यदावश्यकपरिणामं वा साधुदेहादीत्यर्थः।

द्रव्यलक्षणं च सामान्य इदम् –

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'भूतस्य भाविनो वा भावस्य हि कारणं तु यल्लोके ।
तद् द्रव्यं तत्त्वज्ञैः सचेतनाचेतनं कथितम् ॥'

व्याख्या-तद् द्रव्यं तत्त्वज्ञैः कथितं, यत्कथंभूतमित्याह-यत् कारणं-हेतुः, कस्येत्याह-'भावस्य' पर्यायस्य, कथंभूतस्येत्याह-'भूतस्य' अतीतस्य 'भाविनो वा' भविष्यतो वा, 'लोके' आधारभूते, तच्च सचेतनं-पुरुषादि अचेतनं च-काष्ठादि भवति, एतदुक्तं भवति यः पूर्व स्वर्गादिष्विन्द्रियादित्वेन भूत्वा इदानीं मनुष्यादित्वेन परिणतः सोऽतीतस्येन्द्रादिपर्यायस्य कारणत्वात्साम्प्रतमपि द्रव्यत इन्द्रादिरभिधीयते, अमात्यादिपदपरिभ्रष्टामात्यादिवत्, तथा अग्रेऽपि य इन्द्रादित्वेनोत्पतस्यते स इदानीमपि भविष्यदिन्द्रापदपर्यायकारणत्वात् द्रव्यत इन्द्रादिरभिधीयते, भविष्यद्राजकुमारराजवत्, एवमचेतनस्यापि काष्ठादेर्भूतभविष्यत्पर्याय-कारणत्वेन द्रव्यता भावनीयेत्यार्यार्थः ॥

इतः प्रकृतमुच्यते-तच्चेह द्रव्यरूपमावश्यकं प्रकृतं, तत्रावश्यकोपयोगाधिष्ठितः साध्वादि-देहो वन्दनकादिसूत्रोच्चारणलक्षणश्चागमः आवर्त्तादिका क्रिया चावश्यकमुच्यते, आवश्यकोप-योगशून्यास्तु ता एव देहागमक्रिया द्रव्यवश्यकं, तच्च द्विविधं प्रज्ञप्तमिति, तद्यथा-'आगमतः' 'आगममाश्रित्य नोआगामतः' नोआगममाश्रित्य, नोआगामशब्दार्थं यथाऽवसरमेव वक्ष्यामः, चशब्दौ द्वयोरपि स्वस्वविषये तुल्यप्राधान्यख्यापनर्थौ ॥ अत्राद्यभेदजिज्ञासुराह-

*मू. ( १४ ) से किं तं आगमओ दव्वावस्सयं ?, २ जस्स नं आवस्सएत्ति पदं सिक्खितं ठितं जितं मितं परिजितं नामसमं घोससमं अहीनक्खरं अनच्चक्खरं अव्वाइद्धक्खरं अक्खलिअं अमिलिअं अवच्चामेलियं पडिपुण्णं पडिपुन्नघोसं कंठोट्ठविप्पमुक्कं गुरुवायणोवगयं, से णं तत्थ वायणाए पुच्छणाए परिअट्टणाए धम्मकहाए नो अनुप्पेहाए, कम्हा ?, 'अनुवओगो दव्व' मितिकट्टु ॥*

वृ. अथ किं तदागमतो द्रव्यावश्यकमिति, आह-'आगमतो दव्वावस्सयं जस्स न'मित्यादि, 'ण'मिति पूर्ववत्, 'जस्स'त्ति यस्य कस्यचित् 'आवस्सएत्तिपयं'ति आवश्यकपदाभिधेयं शास्त्रमित्यर्थः, ततश्च यस्य कस्यचिदावश्यकशास्त्र शिक्षितं स्थितं जितं यावत् वाचनोपगतं भवति 'से नं तत्थे'ति स-जन्तुस्त्र आवश्यकशास्त्रे वाचनाप्रच्छनापरिवर्त्तनाधर्म्मकथाभि-वर्त्तमानोऽप्यावश्यकोपयोगे अवर्त्तमानः 'आगमतः' आगममाश्रित्य द्रव्यावश्यकमिति समुदा-यार्थः। अत्राह-नन्वागममाश्रित्य द्रव्यावश्यकमित्यागमरूपमिदं द्रव्यावश्यकमित्युक्तं भवति, एताच्चयुक्तं, यत आगमो ज्ञानं ज्ञानं च भाव एवेति कथमस्य द्रव्यत्वमुपपद्यते ?, सत्यमेतत्, किन्त्वागमस्य कारणामात्मा तदधिष्ठितो देहः शब्दश्चयोपयोगशून्यसूत्रोच्चारणरूप इहास्ति, न तु साक्षादागमः एतच्च त्रितयभागकारणत्वाकारणे कार्योपचारादागम उच्यते, कारणं न विवक्षितभावस्य द्रव्यमेव भवतीत्युक्तमेवेत्यदोषः ।

तत्रादित आरभ्य पठनक्रियया यावदन्तं नीतं तच्छिक्षितमुच्यते, तदेवाविस्मरणतश्चेतसि स्थितं-स्थितत्वात् स्थितमप्रच्युतमित्यर्थः, परावर्त्तनं कुर्व्वतः परेण वा क्वचित् पृष्टस्य यच्छीघ्रमागच्छति तज्जितं विज्ञातश्लोकपदवर्णादिसंख्यं मितं, परि-समन्तात्सर्व्वप्रकारैर्जितं परिजितं-परावर्त्तनं कुर्व्वतो यत्क्रमेणोत्क्रमेण वा समागच्छतीत्यर्थः, नाम-अभिधानं तेन समं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नामसमय्, इदमुक्तं भवति-

यथा स्वनाम कस्यचिच्छिक्षितं जितं मितं परिजितं भवति तथैतदपीत्यर्थः, घोषा-उदात्तादयः तैर्वाचनाचार्याभिहितघोषैः समं घोषसमं, यथा गुरुणा अभिहिता घोषास्तथा शिष्योऽपि यत्र शिक्षते तत् घोषमसममिति भावः, एवद्वयादिभिरक्षरैर्हीनं हीनाक्षरं न तथा अहीनाक्षरम्, एकादिभिरक्षैरधिककत्यक्षरं न तथा अनत्यक्षरम्, 'अव्वाइद्धक्खरं'ति विपर्यस्तरत्नमाला-गतरत्नानीव व्याविद्धानि-विपर्यस्तान्यक्षराणि यत्र तद्याविद्धाक्षरं न तथाऽव्याविद्धाक्षरं, 'अव्वाइद्ध'मिति कचित्पाठः, तत्रापि व्याविद्धाक्षरयोगाव्द्याविद्धं न तथाऽव्याविद्धम्, उपलशकलाद्याकुलभूभागे लांगलमिव स्खलित यत्तत् स्खलितं न तथाऽस्खलितम्, अनेकशास्त्रसम्बन्धीनि सूत्राण्येकत्र मीलयित्वा यत्र पठति तत् मिलितमसदृशधान्यमेलकवत्, अथवा परावर्त्तमानस्य यत्र पदादिविच्छेदो न प्रतीयते तन्मलितं न तथाऽमीलितम्, एकस्मिन्नेनव शास्त्रेऽन्यान्यस्थाननिबद्धान्येकार्थानि सूत्राण्येकत्रस्थाने समानीय पठतो व्यत्याम्रेडितम्, अथवा आचारादिसूत्रमध्ये स्वमतिचर्चितानि तत्सदृशानि सूत्राणि कृत्वा प्राक्षिपतो व्यत्याम्रेडितम्, अस्थानविरतकं वा व्यत्याम्रेडितम्, न तथाऽव्यत्याम्रेडितं, सूत्रतो बिन्दुमात्रादिभिरनूनमर्थत-स्त्वध्याहारकांक्षादिरहितं प्रतिपूर्णम्, उदात्तादिघोषैरविकलं प्रतिपूर्णघोषम्।

अत्राह-घोषममिमित्युक्तमेव तत्क इह विशेष इति, उच्यते, घोषममिति शिक्षाकालम-अधिकृत्योक्तं, प्रतिपूर्णघोषं सु परावर्त्तनादिकालमधिकृत्येति विशेषः, कण्ठश्चौष्ठश्च कण्ठोष्ट-मिति प्राण्यङ्गत्वात्समाहारस्तेन विप्रमुक्तं, कष्ठोष्ठविप्रमुक्तं, बालमूकभाषितवद्यदव्यक्तं न भवतीत्यर्थः, गुरुप्रदत्तया वाचनया उपगतं-प्राप्तं गुरुवाचनोपगतं न तु कर्णाघाटकेन शिक्षितं न वा पुस्तकात् स्वयमेवाधीतमिति भावः, तदेवं यस्य जन्तोरावश्यकशास्त्र शिक्षितादिगुणोपेतं भवति स जन्तुस्तत्रावश्यकशास्त्रे वाचनया-शिष्याध्यापनलक्षणया प्रच्छनया-तद्गतार्थदेर्गुरुं प्रति प्रश्नलक्षणया परावर्त्तनया-पुनः पुनः सूत्रार्थाभ्यालक्षणया धर्मकथया-अहिंसादिधर्म्म-प्ररूपणस्वरूपया वर्त्तमानोऽपि, अनुपयुक्तत्वादिति साध्याहारम्, आगमतो द्रव्यावश्यक-मित्यनेन सम्बन्धः।

ननु यथा वाचनादिभिस्तत्र वर्त्तमानोऽपि द्रव्यावश्यकं भवति तथाऽनुप्रेक्षयाऽपि तत्र वर्त्तमानस्तद्भवति?, नेत्याह-'नो अनुप्पेहाए'त्ति अनुप्रेक्षया-ग्रन्थार्थानुचिन्तरूपणया, तत्र वर्त्तमानो न द्रव्यावश्यकमित्यर्थः, अनुप्रेक्षाया उपयोगमन्तरेणाभावाद्, उपयुक्तस्य च द्रव्यावश्यकत्वायोगादिति भावः। अत्राह परः-'कम्ह'त्ति, ननु कस्माद्वाचनादिभिस्तत्र वर्त्तमानोऽपि द्रव्यावश्यकं?, कस्माच्चानुप्रेक्षया तत्र वर्त्तमानो न तथेति प्रच्छकाभिप्रायः, एवं पृष्टे सत्याह-'अनुवओगो दव्वमितिकट्टु'त्ति अनुपयोगो द्रव्यमितिकृत्वा, उपयोजनमुपयोगो-जीवस्य बोधरूपो व्यापारः, स चेह विवक्षितार्थे चित्तस्य विनिवेशस्वरूपो गृह्यते, न विद्यतेऽसौ यत्र सोऽनुपयोगः-पदार्थः, स विवक्षितोपयोगस्य कारणमात्रत्वात् द्रव्यमेव भवति 'इतिकृत्वा' अस्मात्कारणाद् अनन्तरोक्तमुपपद्यत इति शेषः, एतदुक्तं भवतिउपयोग-पूर्व्वका अनुपयोगपूर्वकाश्च वाचनाप्रच्छनादयः संभवन्त्येव, तत्रेह द्रव्यावश्यकचिन्ताप्रस्ता-वादनुपयोगपूर्वका गृह्यन्ते, अत एव सूत्रेऽनभिहितस्याप्यनुपयुक्तत्वस्याध्याहारस्तत्र कृतः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अनुपयोगोस्तु भावशून्यता, तच्छून्यं च वस्तु द्रव्यमेव भवतीत्यतो वाचनादिभिस्तत्र वर्त्तमानोऽपि द्रव्यावश्यकम्, अनुप्रेक्षा तूपयोगपूर्विकैव संभवति, अतस्तत्र वर्त्तमानो न तथेति भावार्थः।

अत्राह-नन्वागमतोऽनुपयुक्तो वक्ता द्रव्यावश्यकमित्येतावतैवेष्टासिद्धेः शिक्षितादि-श्रुतगुणसमुत्कीर्त्तनमनर्थकम्, अत्रोच्यते, शिक्षितादिगुणोत्कीर्त्तनं कुर्व्वन्निदं ज्ञापयति-यदु-तैवंभूतमपि निर्दोषं श्रुतमुच्चारयतोऽनुपयुक्तस्य द्रव्यश्रुतं द्रव्यावश्यकमेव भवति किं पुनः सदोषम्?, उयुक्तस्य तु स्खलितादिदोषदुष्टमपि निगदतः भावश्रुतमेव भवति, एवमन्यत्रापि प्रत्युपेक्षणादिक्रियाविशेषाः सर्वे निर्दोषा अप्य नुपयुक्तस्य तथाविधफलशून्या एव संपद्यन्ते, उपक्तस्य तु मतिवैकल्यादितः सदोषा अप्यमी कर्ममालापगमायैवेत्यलं विस्तरेण।

अत्राह-ननु भवत्वेवं, किन्तु हीनाक्षरे सूत्रे समुच्चारिते को दोषो? येनोक्तमहीनाक्षरमिति, अत्रोच्यते, लोकेऽपि तावद्विद्यामन्त्रादिभिरक्षरादिहीनैरुच्चार्यमाणैर्विवक्षितफलवैकल्य-मनर्थावाप्तिश्च दृश्यते, किं पुनः परममन्त्रकल्पे सिद्धन्ते?, तथाहि-राजगृहनगरे समवसृतस्य भगवतश्चरमतीर्थाधिपतेर्वन्दार्थं विबुधविद्याधरनरनिवहः श्रेणिकश्च सपुत्रः समाययौ, ततो भगवदन्तिके धर्मं श्रुत्वा प्रतिनिवृत्तयां परिषदि कस्यचिद्विधरस्य गगनोत्पतनहेतुविद्या-सम्बन्ध्येकमक्षरं विस्मृतिपथमवततार, विस्मृते च तस्मिन्किञ्चिन्नभस्युत्पत्य पुनर्निपतत्यसौ पुनरुत्पतति पुनश्च निपतति, एवं च कुर्वन्तममुं विलोक्य श्रेणिकेन भगवान् पृष्टः-किमित्ययं महाभागः खेचरो विधुरतिपक्षः पक्षीव नभसि किञ्चिदुत्पत्य पुनर्निपतति?, भगवता च विद्या-क्षरविस्मरणव्यतिकरस्तस्मै निवेदितः, तं च निवेद्यमानं श्रुत्वा अभयकुमारः खेचरमुपसृत्यै वमवादीत्-भोः खेचर! यदि मां समानसिद्धिकं करोषि तदा त्वद्विद्याऽक्षरमुपलभ्य कथयामि, प्रतिपन्नं च तेन, अभयकुमारस्य चैकस्यादपि पदादनेकपदाभ्यूहशक्तिरस्तीति शेषाक्षरानु-सारेणोपलभ्य तदक्षरं निवेदितम् खेचरस्य, सोऽपि संजातसंपूर्णविद्योहृष्टः श्रेणिकसुताय विद्या-साधनोपायं कथयित्वा गतः समीहितप्रदेशमिति, एष दृष्टान्तः, उपनयस्त्वयम्-यथा तस्य विद्या-धरस्य हीनाक्षरतादोषान्नभोगमनमुपरतं, तदुपरमे च व्यर्थैव विद्या, तथेहापि हीनाक्षरतायामर्थ-भेदस्तदभेदे क्रियाभदेस्तद्भेदे च मोक्षाभावस्तदभावे च दीक्षादिग्रहणवैयर्थ्यमेवेति।

एवमाधिकाक्षरादिष्वपि दोषाः सदृष्टान्ता अभ्यूह्य वाच्याः॥

*मू. (१५) नेगमस्स णं एगो अनुवउत्तो आगमओ एगं दव्वावस्सयं दोन्नि अनुवउत्ता आगमओ दोन्नि दव्वावस्सयाइं तिन्निअनुवउत्ता आगमओ तिन्नि दव्वावस्सयाइं एवं जावइआ अनुवउत्ता आगमओ तावइआइं दव्वावस्सयाइं, एवमेव ववहारस्सवि, संगहस्स णं एगो वा अनेगो वा अनुवउत्तो वा अनुवउत्ता वा आगमओ दव्वावस्सयं दव्वावस्सयाणि वा से एगे दव्वावस्सए, उज्जुसुअस्स एगो अनुवउत्तो आगमतो एगं दव्वावस्सयं पुहुत्तं नेच्छइ, तिण्हं सद्दनयाणं जाणए, अनुवउत्ते अवत्थु, कम्हा?, जइ जाणए अनुवउत्ते न भवति, जइ अनुवउत्ते जाणए न भवति, तम्हा नत्थि आगमओ दव्वावस्सयं। से तं आगमओ दव्वावस्सयं॥*

वृ. इह जिनमते सर्वमपि सूत्रमर्थश्च श्रोतृजनमपेक्ष्य नयैर्विचार्यते,

'नत्थि नएहिं विहुणं सुत्तं अत्थो य जिनमए किंचि।
आसज्ज उ सोयारं नए नयविसारओ बूया॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति वचनात्, अत इदमपि द्रव्यावश्यकं नयैश्चिन्त्यते, ते च मूलभेदानाश्रित्य नैगमादयः सप्त, तदुक्तम्-

"नेगमसंगहववहार उज्जुसुए चेव होइ बोद्धव्वे।
सद्दे य समभिरूढे एवंभूते य मूलनया॥"

तत्र नैगमस्तावत्कियन्ति द्रव्यावश्यकानीच्छतीत्याह-'नेगमस्से'त्यादि, सामान्यविशेषादि-प्रकारेण नैकः अपि तु बहवो गमा-वस्तुपरिच्छेदा यस्मासौ निरुक्तविधिना ककारस्य लोपान्नैगमः, सामान्यविशेषादिप्रकारैः बहुरूपवस्त्वभ्युपगमपर इत्यर्थः, तस्य-नैगमस्यैको देवदत्तादिरनुपयुक्त आगमत एकं द्रव्यावश्यकं, द्वौ देवदत्तयज्ञदत्तावनुपयुक्तौ आगमतो द्वे द्रव्यावश्यके, त्रयो देवदत्तयज्ञदत्तसोमदत्ता अनुपयुक्ता आगमतस्त्रीणि द्रव्यावश्यकानि, किं बहुना ?, एवं यावन्तो देवदत्तादयोऽनुपयुक्तास्तावन्त्येव तान्यतीतादिकालत्रयवर्त्तीनि नैगमस्यागमतो द्रव्यावश्यकानि, एतदुक्तं भवति-नैगमो हि सामान्यरूपं विशेषरूपं च वस्त्वभ्युपगच्छत्येव, न पुनर्वक्ष्यमाणसंग्रहवत्सामान्यरूपमेव, ततो विशेषवादित्वादस्येह प्राधान्येन विविक्षितत्वाद्यावन्तः केचन देवदत्तादिविशेषा अनुपयुक्तास्तावन्ति सर्वाण्यप्यस्य द्रव्यावश्यकानि, न पुनः संग्रहवत्सामान्यवादित्वादेकमेवेतिभावः

एवमेव 'ववहारस्सवि'त्ति व्यवहरणं व्यवहारो-लौकिकप्रवृत्तिस्वरूपस्तत्प्रधानो नयोऽपि व्यवहारः, तस्यापि 'एवमेव' नैगमवदेको देवदत्तादिरनुपयुक्त आगमत एकं द्रव्यावश्यकमित्यादि सर्वं वाच्यम्, इदमुक्तं भवति-व्यवहारनयो लोकव्यवहारोपकारिण एव पदार्थानभ्युपगच्छति, न शेषान्, लोकव्यवहारे च जलाहरणव्रणपिण्डीप्रदानादिके घटनिम्बादिविशेषा एवोपकुर्व्वाणा दृश्यन्ते न पुनस्तदतिरिक्तं तत्सामान्यमिति विशेषानेव वस्तुत्वेन प्रतिपद्यतेऽसौ न सामान्यं, व्यवहारनुपकारित्वाद्विशेषव्यतिरेकेणानुपलभ्यमानत्वाच्चेति, अतो विशेषवादि-नैगममतसाम्येनातिदिष्टः अत्र चादिशेनैयेष्टार्थसिद्धेर्ग्रन्थलाघवार्थं संग्रहमतिक्रम्य व्यवहारोपन्यासः कृत इति भावनीयम्।

'संगहस्से'त्यादि, सर्वमपि भुवनत्रयान्तर्वर्ति वस्तुनिकुरुम्बं संग्रह्णाति-सामान्यरूपतयाऽध्यवस्यतीति संग्रहस्तस्य मते एको वा अनेके वा अनुपयुक्तोऽनुपयुक्ता वा यदागमतो द्रव्यावश्यकं द्रव्यावश्यकानि वा, तत्किमित्याह-'से एगे'त्ति तदेकं द्रव्यावश्यकम्, इदमत्र हृदयम्-संग्रहनयः सामान्यमेवाभ्युपगच्छति न विशेषान्, अभिदधातु च-सामान्याद्विशेषा व्यतिरिक्ता स्युः अव्यतिरिक्ता वा स्युः ? यद्याद्यः पक्षस्तर्हि न सन्त्यमि, निःसामान्यत्वात्, खरविषाणवत्, अथापरः पक्षस्तर्हि सामान्यमेव ते, तदव्यतिरिक्तत्वात्, सामान्यस्वरूपवत्, तस्मात्सामान्यव्यतिरेकेण विशेषासिद्धेर्यानि कानिचिद् द्रव्यावश्यकानि तानि तत्सामान्यव्यतिरिक्तत्वादेकमेव संग्रहस्य द्रव्यावश्यकमिति।

'उज्जुसुयस्से'त्यादि, ऋजु-अतीतानागपतरकीयपरिहारेण प्राञ्जलं वस्तु सूत्रयति-अभ्युपगच्छतीति ऋजुसूत्रः, अयं हि वर्त्तमानकालभाव्येव वस्तु अभ्युपगच्छति, नातीतं विनष्टत्वान्नाप्यनागतमनुत्पन्नत्वाद्, वर्त्तमानकालभाव्यपि स्वकीयमेव मन्यते स्वकार्यसाधकत्वात् स्वधनवत्, परकीयं तु नेच्छति स्वकार्याप्रसाधकत्वात् परधनवत्, तस्मादेको देवदेत्तादिर-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नुपयोक्तोऽस्य मते आगमत एकं द्रव्यावश्यकमस्ति 'पुहुत्तं नेच्छइ'त्ति अतीतानागतभेदतः परकीयभेदतश्च 'पृथकत्वं' पार्थक्यं नेच्छत्यसौ, किं तर्हि ?, वर्त्तमानकालीनं स्वगतमेव चाभ्युपैति, तच्चैकमेवेति भावः, 'तिण्हं सद्दनयाण'मित्यादि, शब्दप्रधाना नयाः शब्दनयाः-शब्दसमभिरूढैवंभूताः, ते हि शब्दमेव प्रधानमिच्छन्तीति, अर्थं तु गौणं, शब्दवशेनैवार्थप्रतीतेः, तेषां त्रयाणां शब्दनयानां ज्ञायकोऽथ चानुपयुक्त इत्येतदवस्तु, न सम्भवतीत्यर्थः, 'कम्हे'ति कस्मादेवमुच्यते इत्याह-

'जई'त्यादि, यदि ज्ञायकस्तर्ह्यनुपयुक्तो न भवति, ज्ञानस्योपयोगरूपत्वाद्, इदमत्र हृदयम्-आवश्यकशास्त्रज्ञस्तत्र चानुपयुक्त आगमतो द्रव्यावश्यकमिति प्राग्निर्णीतम्, एतच्चामी न प्रतिपद्यन्ते, यतो यद्यावश्यकशास्त्रं जानाति कथमनुपयुक्तः ?, अनुपयुक्तश्चेत् कथं जानाति ?, ज्ञानस्योपयोगरूपत्वात्, यदप्यागमकारणत्वादात्मदेहादिकमागत्वेनोक्तं तदप्यौपचारिकत्वादमी न मन्यन्ते, शुद्धनयत्वेन मुख्यवस्त्वभ्युपगमपरत्वात्, तस्मादेतन्मते द्रव्यावश्यकस्यासंभव इति, निगमयन्नाह-'सेत'मित्यादि, तदेतदागमतो द्रव्यावश्यकम्।

उक्तं सप्रपञ्चमागमतो द्रव्यावश्यकमिदानीं नोआगमतस्तदुच्यते-

*मू. (१६) से किं तं नोआगमओ दव्वावस्सयं ?, २ तिविहं पन्नत्तं, तंजहा-जाणयसरीरदव्वावस्सयं भविअसरीरदव्वावस्सयं जाणयसरीरभविअसरीरवतिरित्तं दव्वावस्सयं।*

**वृ.** अथ किं तन्नोआगमतो द्रव्यावश्यकमिति प्रश्नः, उत्तरमाह-'नोआगमओ दव्वावस्सयं तिविहं पन्नत्त' मित्यादि, नोआगमत इत्यत्र नोशब्द आगमस्य सर्वनिषेध देशनिषेधे वा वर्त्तते, यत उक्तं पूर्वमुनिभिः-

"आगमसव्वनिसेहे नोसद्दो अहव देसपडिसेहे।
सव्वे जह नसरीरं भवस्स य आगमाभावा॥"

व्याख्या-आगमस्य-आवश्यकादिज्ञानस्य सर्वनिषधे वर्त्तते नोशब्दः, अथवा तस्यैव देश-प्रतिषेधे वर्त्तते, तत्र 'सव्वे'त्ति सर्वनिषेधे उदाहरणमुच्यते, यथेत्युपप्रदर्शने, 'णसरीरं'ति ज्ञानस्य-जानतः शरीरं ज्ञशरीरं नोआगमत इह द्रव्यावश्यकं, 'भव्यस्स च' योग्यस्य यच्छरीरं तदपि नोआगमत इह द्रव्यावश्यकं, कुत इत्याह-आगमस्य-आवश्यकादिज्ञानलक्षणस्य सर्वथाऽ-भावाद्, इदमुक्तं भवति-ज्ञशरीरं भव्यशरीरं चानन्तरमेव वक्ष्यमाणस्वरूपं नोआगमतः-सर्वथा आगमाभावमाश्रित्य द्रव्यावश्यकमुच्यते, नोशब्दस्यात्र पक्षे सर्वनिषेधवचनत्वादिति गाथार्थः॥

देशप्रतिषेधवचनेऽपि नोशब्दे उदाहरणं यथा-

"किरियागमुच्चरंतो आवासं कुणइ भावसुन्नो उ।
किरियाऽऽगमो न होइ तस्स निसेहो भवे देसे॥"

व्याख्या-क्रियाम्-आवर्तादिकां कुर्वन्नित्यध्याहारः, आगमं च वन्दनसूत्रादिकमुच्चारयन्, जडत्वाद्, आगमस्य च ज्ञानरूपत्वाद्, अतस्तस्याऽऽगमस्य देशे क्रियालक्षणे निषेधो भवति, क्रिया आगमो न भवतीत्यर्थः, अतो नोआगमत इति, इह किमुक्तं भवति ?-देशे क्रियालक्षणे आगमाभावमाश्रित्य द्रव्यावश्यकमिदमिति गाथार्थः।

तदेवं नोआगमतआगमाभावमाश्रित्य द्रव्यावश्यकं त्रिविधं प्रज्ञप्तं, तद्यथा-ज्ञशरीरद्रव्या-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वश्यकं, भव्यशरीरद्रव्यावश्यकं, ज्ञशरीरभव्यशरीरव्यतिरिक्तं द्रव्यावश्यकम्।। तत्राऽऽद्यभेदं विवरीषुराह-

*मू. (१७) से किं तं जाणयसरीरदव्वावस्सयं ?, २ आवस्सएत्ति पयत्थाहिगारजाणयस्स जं सरीरयं ववगयचुतचावितचत्तदेहं जीवप्पिजढं सिज्जागयं वा संथारगयं वा निसीहिआगयं वा सिद्धसिलातलगयं वा पासित्ता नं कोई भणेज्जा-अहो ! णं इमेणं सरीरसमुस्सएणं जिनदिट्ठेणं भावेणं आवस्सएत्तिपयं आघवियं पन्नविअं परूविअं दंसिअं निदंसिअं उवदंसिअं, जहा को दिट्ठंतो ? अयं महुकुंभे आसी अयं घयकुंभे आसी, सेतं जाणयसरीरदव्वावस्सयं ॥*

**वृ.** अथ किं तत् ज्ञशरीरद्रव्यावश्यकमिति प्रश्ने निर्वचनमाह-'जाणगसरीरदव्वास्सयं आवस्सएत्ती'त्यादि, ज्ञातवानिति ज्ञः, प्रतिक्षणं शीर्यत इति शरीरं ज्ञस्य शरीरं ज्ञशरीरं, तदेव अनुभूतभावत्वाद् द्रव्यावश्यकं, किं तदित्याह-यच्छशरीरकं संज्ञायां कच् वपुरित्यर्थः, कस्य सम्बन्धीत्याह-''आवस्सएत्ती'त्यादि, आवश्यकमिति यत्पदं आवश्यकपदाभिधेयं शास्त्र-मित्यर्थः, तस्यार्थ एवार्थाधिकारोऽनेके वा तद्गता अर्थाधिकारा गुह्यन्ते, तस्य तेषां वा ज्ञातुः सम्बन्धि, कथंभूतं तदिदं ज्ञशरीरं द्रव्यावश्यकं भवतीत्याह-व्यपगतच्युतच्यावितत्यक्तदेहं जीवविप्रमुक्तामित्यक्षरयोजना, इदानीं भावार्थः कश्चिदुच्यते-तत्र व्यपगतं अचेतनस्योच्छ्वा-साद्ययोग्यत्वादन्यथा लेष्ट्वादीनामपि तत्प्रसङ्गात्, तेभ्यश्च परिभ्रंशस्तु स्वभाववादिभिः कैश्चित् स्वभावत एवाभ्युपगम्यते, तदपोहार्थमाह-च्यावितं-बलीयसा आयुःक्षयेण तेभ्यः परिभ्रंशितं, न तं स्वभावतः, तस्य सदाऽवस्थितत्वेन सर्वाद तत्प्रसङ्गाद्, एवं च सति कथंभूतं तदित्याह-त्यक्तदेहं-'दिह उपचये'त्यक्तो देहः-आहारपरिणतिजनित उपचयो येन तत् त्यक्तदेहम्, अचेतनस्याऽऽहारग्रहणपरिणतेरभावात्, एवमुक्तेन विधिना जीवेन-आत्मना विविधम्-अने-कधा प्रकर्षेण मुक्तं जीवविप्रमुक्तं, तदेतदावश्यकं ज्ञस्य शरीरमतीतावश्यकभावस्य कारण-त्वाद्, द्रव्यावश्यकम्, अस्य च नोआगमत्वमागमस्य तदानीं सर्वथाऽभावात्, नोशद्बस्य चात्र पक्षे सर्वनिषेधवचनत्वादिति भावः।

ननु यदि जीवविप्रमुक्तमिदं कथं तर्ह्यस्य द्रव्यावश्यकत्वं ? लेष्टवदीनामपि तत्प्रसङ्गात, तत्पुद्गलानामपि कदाचिदावश्यकवेत्तृभिर्गृहीतत्वसम्भवादित्याशङ्क्याह-'सेज्जागत'-मित्यादि, यस्मादिदं शय्यागतं वा संस्तारगतं वा नैषेधिकीगतं वा सिद्धशिलातलगतं वा दृष्ट्वा कोऽपि ब्रूयाद्-अहो ! अनेन शरीरसमुच्छ्रयेण जिनदृष्टेन भावेन आवश्यकमित्येतत् पदं आगृही-तमित्यादि, यावदुपदर्शितमिती, तस्मादतीतवर्तमानकालभाविवस्त्वेकत्वग्राहिनयानुसारिणा-मेवंवादिनां सम्भवाद् यथोक्तशरीरस्य द्रव्यावश्यकत्वं न विरुध्यते, लेष्ट्वदिदर्शने पुनर्नेत्थ-म्भूतः प्रत्ययः कस्यापि समुत्पद्यत इति न तेषां तत्प्रसङ्गः, तेनैव करचरणोरुग्रीवादीपरिणा-मेनानन्तरमेवाऽऽवश्यककारणत्वेन व्यापृतत्वात्, तदेव तथाविधप्रत्ययजनकं द्रव्यावश्यकं, न लेष्ट्वदय इति भाव इति समुदायार्थः।

इदानीमवयवार्थ उच्यते-तत्र शय्या-महती सर्वाङ्गप्रमाणा तां गतं शय्यागतं शय्यास्थितमित्यर्थः, संस्तारोलघुकोऽर्धतृतीयहस्तमानस्तं गतं तत्र स्थमित्यर्थः, यत्र साधवस्तपःपरकर्मितशरीराः स्वयमेव गत्वा भक्तपरिज्ञाद्यनशनं प्रतिपन्नपूर्वाः प्रतिपद्यन्ते

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रतिपत्स्यन्ते च तत् सिद्धशिलातलमुच्यते, क्षेत्रगुणतो यथाभद्रकदेवतागुणतो वा साधूनामाराधनाः सिद्धयन्ति तत्रेतिकृत्वा, अन्ये तु व्याचक्षते-यत्र महर्षिः कश्चित् सिद्धस्तत् सिद्धशिलातलं, तद्गतं-तत्रस्थितं सिद्धशिलातलगतम्, इह 'निसीहियागयं वे'त्यादीन्यपि पदानि वाचनान्तरे दृश्यन्ते तानि च सुगमत्वात् स्वयमेव भावनीयानि, नवरं नैषेधिकी-शबपरिस्थानपनभूमिः, अपरं चात्रान्तरे 'पासित्ता नं कोई भणिज्ज'त्ति ग्रन्थः क्वचिद् दृश्यते, स च समुदायार्थकथनावसरे योजित एव, यत्र तु न दृश्यते तत्राध्याहारो द्रष्टव्यः, अहोशब्दो दैन्यविस्मयामन्त्रषेणु वर्तते, स चेह त्रिष्वपि घटते, तथाहि-अनित्यं शरीरमिति दैन्ये, आवश्यकं ज्ञातमिति विस्मये, अन्यं पार्श्वस्थितमामन्त्रयमाणस्याऽऽमन्त्रणे, 'अनेन' प्रत्यक्षतया दृश्यमानेन शरीरमेव पुद्गलसङ्घातत्वात् समुच्छ्रयस्तेन, 'जिनदृष्टेन' तीर्थङ्कराभिमतेन, 'भावेन' कर्मनिर्जरणाभिप्रायेण, अथवा भावेन-तदावरणकर्मक्षयक्षयोपशमलक्षणेन, आवश्यकपदाभिधेयं शास्त्र 'आघवियं'ति प्राकृतशैल्या छान्दसत्वाच्च गुरोः सकाशादागृहीतं, 'प्रज्ञामपितं' सामान्यतो विनेयेभ्यः कथितं, 'प्ररूपितं' तेभ्य एव प्रतिसूत्रमर्थकथनतः, 'दर्शितं' प्रत्युपेक्षणादिक्रियादर्शनतः, इयं क्रिया एभिरक्षरैरत्रोपात्ता इत्थं च क्रियते इत्येवं विनेयेभ्यः प्रकटितमिति भावः, 'निदर्शितं' कथञ्चिदगृह्णतः परयाऽनुकम्पया निश्चयेन पुनः पुनः दर्शितम्, 'उपदर्शितं' सर्वनययुक्तिभिः।

आह-नन्वनेन शरीरसमुच्छ्रयेणाऽऽवश्यकमागृहीतामित्यादि नोपपद्यते, ग्रहणप्ररूपणादीनां जीवधर्मत्वेन शरीरस्याघटमानत्वात्, सत्यं, किन्तु भूतपूर्वगत्या जीवशरीरयोरभेदोपचारदित्थमुपन्यास इत्यदोषः। पुनरप्याह-ननु यद्यपि तच्छरीरकं शय्यादिगतं दृष्ट्वा पूर्वोक्तवक्तारो भवन्ति, तथाऽपि कथं तस्य द्रव्यावश्यकता?, यत आवश्यकस्य कारणमेव द्रव्यावश्यकं भवितुमर्हति, 'भूतस्य भाविनो वे'त्यादिपूर्वोक्तवचनात्, कारणं चाऽऽगमस्य चेतनाधिष्ठितमेव शरीरं न त्विदं, चेतनारहितत्वात्, तस्यापि तत्कारणेत्वेऽतिप्रसङ्गात्, सत्यं किन्त्वतीतपर्यायानुवृत्त्यभ्युपगमपरनयानुवृत्त्याऽतीतमावश्यककारणत्वपर्यायमपेक्ष्य द्रव्यावश्यकताऽस्योच्यत इत्यदोषः, स्यादेवं, यद्यत्रार्थे कश्चिद् दृष्टान्तः स्यादिति विकल्प्य पृच्छति-यथा कोऽत्र दृष्टान्तः?, इति पृष्टे सत्याह-यथाऽयं 'घृतकुम्भ आसीत्' 'अयं मधुकुम्भ आसी'दित्यादि, एवदुक्तं भवति-यथा मधुनि घृत वा प्रक्षिप्यापनीते तदाधारत्वपर्यायेऽतिक्रान्तेऽप्ययं मधुकुम्भः अयं च घृतकुम्भ इति व्यपदेशो लोके प्रवर्त्तते, तथा आवश्यककारणत्वपर्यायेऽतिक्रान्तेऽपि अतीतपर्यायानुवृत्त्या द्रव्यावश्यकमिदमुच्यत इति भावः, निगमयन्नाह-'से त'मित्यादि, तदेतद् ज्ञशरीरद्रव्यावश्यकम्॥

उक्तो नोआगमतो द्रव्यावश्यकप्रथमभेदः, अथ द्वितीयभेदनिरूपणार्थमाह-

*मू. (१८) से किं तं भविअसरीरदव्वावस्सयं?, २ जे जीवे जोणिजम्मणनिक्खंते इमेणं चेव आतएणं सरीरसमुस्सएणं जिनोवदिट्ठेणं भावेणं आवस्सएत्तिपयं सेयकाले, सिक्खिस्सइ न ताव सिक्खइ, जहा को दिट्ठंतो? अयं महुकुंभे भविस्सइ अयं घयकुंभे भविस्सइ, से त्तं भविअसरीरदव्वावस्सयं।*

**वृ.** अथ किं तद्भव्यशरीरद्रव्यावश्यकमिति प्रश्ने सत्याह-'भवियसरीरदव्वावस्सयं जे जीवे'त्यादि, विवक्षितपर्यायेण भविष्यतीति भव्यो-विवक्षितपर्यायार्हस्तद्योग्य इत्यर्थः, तस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शरीरं, तदेव भाविभावावश्यककारणत्वात् द्रव्यावश्यकं, भव्यशरीर द्रव्यावश्यकं, किं पुनस्तदित्यत्रोच्यते-यो जीवो योनिजन्मत्वनिष्क्रान्तोऽनेनैव शरीरसमुच्छ्रयेणात्तेन जिनोपदिष्टेन भावेन आवश्यकमित्येतत् पदं आगामिनि काले शिक्षिष्यते न तावच्छिक्षते तज्जीवाधिष्ठितं शरीरं भव्यशरीरद्रव्यावश्यकमिति समुदायार्थः।

साम्प्रतमयवार्थ उच्यते-तत्र यः कश्चिद् 'जीवो'जन्तुः योन्या-योषिदवाच्यदेशलक्षणायाः परिपूर्णसमस्तदेहो जन्मत्वेन-जन्मसमयेन निष्क्रान्तो न पुनरामगर्भावस्थ एव पतितो योनिजन्म-त्वनिष्क्रान्तः, अनेनैव शरीरमेव पुद्गलसङ्घाततत्वादुत्पत्तिसमयादारभ्य प्रतिसमयं समुत्सर्पणाद् वा समुच्छ्रयस्तेन आत्तेन आदत्तेन वा गृहीतेन प्राकृतशैलीवशादात्मीयेन वा जिनोपदिष्टेनेत्यादि पूर्ववत्, 'सेयकाले'त्ति छान्दसत्वादागामिनि काले शिक्षिष्यते-अध्येष्वते साम्प्रतं तं न तावद्यापि शिक्षते, तज्जीवाधिष्ठितं शरीरं भव्यशरीरद्रव्यावश्यकं।

नोआगमत्वं चात्राप्यागमाभावमाश्रित्य मन्तव्यं तदानीं तत्र वपुष्यागमाभावात्, नोशब्दस्य चात्रापि सर्वनिषेधवचनत्वात्। अत्राऽऽह-नन्वाश्यकस्य कारणं द्रव्यावश्यकमुच्यते, यदि त्वत्र वपुष्यागमाभावः कथं तर्हि तस्य तं प्रति कारणत्वम्?, न हि कार्याभावे वस्तुनः कारणत्वं यज्यते, अतिप्रसङ्गात्, अतः कथमस्य द्रव्यावश्यकता? सत्यं, किं तु भविष्यत्पर्यायस्येदानीमपि योऽस्तित्वमुपचरति नयस्तदनुवृत्त्याऽस्य द्रव्यावश्यकत्वमुच्यते, तथा च तदनुसारिणः पठन्ति-'भाविनि भूतवदुपचार' इति, अत्रार्थे दृष्टान्तं दिदर्शयिषुः प्रश्नं कारयति-यथा कोऽत्रदृष्टान्त इति, निर्वचनमाह-यथाऽयं मधुकुम्भो भविष्यतीत्यादि, एतदुक्तं भवति-यथा मधुनि घृते वा प्रक्षेप्तुमिष्टे तदाधारत्वपर्याये भविष्यत्यपि छोकेऽयं मधुकुम्भो घृतकुम्भो वेत्यादिः दृश्यते, तथाऽत्राप्यवश्यककारणत्वपर्याये भविष्यत्यपि तदस्तित्वपरनयानुवृत्त्या द्रव्यावश्यकत्व-मुच्यत इति भावः, निगमयन्नाह-

'सेत्त'मित्यादि, तदेतद्भव्यशरीरद्रव्यावश्यकमिति। उक्तो नोआगमो द्रव्यावश्यक-द्वितीयभेदः तृतीयभेदनिरूपणार्थमाह-

*मू. (१९) से किं तं जाणयसरीरभविअसरीरवतिरित्तं दव्वावस्सयं?, २ तिविहं पन्नत्तं, तंजहा-लोइअं कुप्पावयणियं लोउत्तरिअं।*

**वृ.** अथ किं तत् ज्ञशरीरभव्यशरीरव्यतिरिक्तं द्रव्यावश्यकम्?, निर्वचनमाह-'जाणगसरीर-भविसरीरवइरित्ते दव्वावस्सए तिविहे' इत्यादि, यत्र ज्ञशरीरभव्यशरीरयोः सम्बन्धि पूर्वोक्तं लक्षणं न घटते तत् ताभ्यां व्यतिरिक्तं-भिन्नं द्रव्यावश्यकमुतच्च त्रिविधं प्रज्ञप्तं, तद्यथा-लौकिकं कुप्रावचनिकं लोकोत्तरिकं च। तत्र प्रथमभेदं जिज्ञासुराह-

*मू. (२०) से किं तं लोइयं दव्वावस्सयं?, २ जे इमे राईसरतलवरमाडुंबिअइब्भसेट्ठि-सेनावइसत्थवाहप्पभितिओ कल्लं पाउप्पभायाए रयणीए, सुविमलाए फुल्लुप्पलकमल-कोमलुम्मिलिअंमि अहापंडुरे पभाए रत्तासोगपगासकिंसुअसुअमुहगुंजद्धरागसरिसे कमलागरनलिनिसंडबोहए उट्ठिअंमि सूरे सहस्सरस्सिमि दिनयरे तेअसा जलंते मुहधोअनदंत-पक्खालणतेल्लफणिहसिद्धत्थयहरिआलिअद्दागधूवपुप्फमल्लगुधतंबोलवत्थाइआइं दव्वाव-स्सयाइं करेंति, ततो पच्छा रायकुलं वा देवकुलं वा आरामं वा उज्जानं वा सभं वा पवं वा*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*गच्छन्ति से तं लोइयं दव्वावस्सयं।*

वृ. अत्र निर्वचनमाह-'लोइय'मित्यादि, लोके भवं लौकिकं शेषं तथैव, अत्र य एते राजेश्वर-तलवरादयः प्रभातसमये मुखधावनादि कृत्या ततः पश्चाद् राजकुलादौ गच्छन्ति, तत्तेषां सम्बन्धि मुखधावनादि लौकिकं ज्ञशरीरभव्यातिरिक्तं द्रव्यावश्यकमिति समुदायार्थः।

तत्र राजा-चक्रवर्ती वासुदेवो बलदेवो महामण्डलिकश्च ईश्वरो-युवराजः सामान्यमण्डलि-कोऽमातयश्च, अन्ये तु व्याचक्षते-अणिमाद्यष्टविधैश्वर्ययुक्त ईश्वरः, परितुष्टनरपतिप्रदत्तरत्नालं-कृतसौवर्णपट्टविभूषितशिरास्तलवरः, यस्यो पार्श्वत आसन्नपरं ग्रामनगरादिकं नास्ति तत्सर्वत-श्छिन्नजनाश्रयविशेषरूपं मडम्बमुच्यते, तस्याधिपतिर्माडम्बिकः, कतिपयकुटुम्बप्रभुः कौटुम्बिकः, इभो-हस्ती तत्प्रमाणं द्रव्यमर्हतीतीभ्यः-यस्य सत्कपुञ्जीकृतहिरण्यरत्नादिद्रव्ये-णान्तरितो हस्त्यपि न दृश्यते सः, अधिकतरद्रव्यो वा इभ्य इत्यर्थः, श्रीदेवताध्यासितसौवर्ण-पट्टविभूषितोत्तमाङ्गः पुरज्येष्ठो वणिग्विशेषः श्रेष्ठी, हस्त्यश्वरथपदातिसमुदायलक्षणायाः सेनायाः प्रभुः सेनापतिः,

"गणिमं धरिमं मेज्जं पारिच्छेज्जं च दव्वजायं तु।
घेत्तूणं लाभत्थं वच्चइ जो अन्नदेसं तु॥१॥
निवबहुमओ पसिद्धो दीनानाहाण वच्छलो पंथे।
सो सत्थवाहनामं धनोव्व लोघ समुव्वहई॥२॥"

एतल्लक्षणयुक्तः सार्थवाहः, प्रभृतिग्रहणेन शेषप्राकृतजनपरिग्रहः, 'कल्लं पाउप्पभायाए' इत्यादि, कल्यमिति विभक्तिव्यत्ययात् सामान्येन प्रभाते, प्रभातस्यैव विशेषावस्थाः प्राह-'पाउ' इत्यादि, प्रादुः-प्राकाश्ये, ततश्च प्रकाशप्रभातायां रजन्यां, किञ्चिदुपलभ्यमानप्रकाशामिति भावः, तदनन्नतरं 'सुविमलायां' तस्मामेव किञ्चित्परिस्फुटतरप्रकाशायाम्, अथशब्द आनन्तर्ये, तदनन्तरं पाण्डुरे प्रभाते, कथंभूत इत्याह-'फुल्लोत्पलकमलकोमलोन्मीलिते' फुल्लं-विकसितं तच्च तदुत्पलं च फुल्लोत्पलं कमलो-हरिणविशेषः, फुल्लोत्पलं च कमलश्च फुल्लोत्पलकमलौ तयोः कोमलम्-अकठोरं दलानां नयनयोश्चयोन्मीलितम्-उन्मीलनं यत्र प्रभाते तत् तथा (तस्मिन्), अनेन च प्रागुक्तायाः सुविमलतायाः वक्ष्यमाणसूर्योदयस्यचान्तरालभाविनीं पूर्वस्यां दिश्यरुणप्रभावस्थामाह, तदनन्तरं 'उट्ठिए सूरिए'त्ति अभ्युद्गते आदित्ये, कथम्भूते इत्याह-

'रक्ताशोकप्रकाशकिंशुकशुकमुखगुञ्जार्धरागसदृशे' रक्ताशोकप्रकाशस्य किंशुकस्य-पुष्पितपलाशस्य शुकमुखस्य गुञ्जार्धस्य च रागेण सदृशो यः स तथा तस्मिन्, आरक्ते इत्यर्थः, तथा 'कमलाकरनलिनीखण्डबोधके' कमलानामाकरा-उत्पत्तिभूमयो हृदादिजलाशय-विशेषास्तेषु यानि नलिनीखण्डानि तेषां बोधको यः स तथा तस्मिन्, पुनः किंभूते तस्मिन्नित्याह-सहस्ररश्मौ, दिनं करोतीति दिनकरस्तस्मिन्, तेजसा ज्वलति सति, तत्रैवैते भावाः सर्वेऽपि सन्तीति ज्ञापनार्थं सूर्यस्य विशेषणबहुत्वम्, अनेन चोत्तरोत्रकालभाविना आवश्यककरणकाल-विशेषणकलापेन प्रकृष्टमध्यमजघन्योद्यमवतां सत्त्वानां तं तमावश्यककरणसमयमाह, तथाहि-केचित् प्रकृष्टोद्यमिनः किञ्चित् प्रकाशमानायां रजन्यां मुखधावनाद्यावश्यकं कुर्वन्ति, मध्य-मोद्यामिनस्तु तस्यामेव सुविमलायामरुणप्रभावसरे वा, जघन्योद्यमिनस्तु समुद्गते सवितरीति,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'मुहधोवणे'त्यादि, मुखधावनं च दन्तप्रक्षालनं च तैलं च फणिहश्च सिद्धार्थश्च हरितालिका च आदर्शश्च धूपश्च पुष्पाणि च माल्यं च गन्धाश्च ताम्बूलं च वस्त्राणि च तान्यादिः येषां स्नानाभरण-परिधानादीनां तानि तथा, तत्र फणिहः-कङ्कतकस्तं मस्तकादौ व्यापारयन्ति, सिद्धार्थाः-सर्षपाः, हरितालिका-दूर्वा, एतद्द्वयं मङ्गलार्थं शिरसि प्रक्षिपन्ति, आदर्शे तु मुखादि निरीक्षन्ते, धूपेन वस्त्रादि धूपयन्ति, अग्रथितानि पुष्पाणि, तान्येव ग्रथितानि माल्यम्, अथवा विकसितानि पुष्पाणि, तान्येवाविकसितानि माल्यम्, एतेषां च मस्तकादिषूपयोगः, शेषं स्वरूपत उपयोगतश्च प्रतीतमेव,

एतानि द्रव्यावश्यकानि कृत्वा ततः पश्चाद्राजकुलादौ गच्छन्ति। अत्र रमणीयतातिशयेन स्त्रीपुरुषमिथुनानि यत्राऽऽरमन्ति स विविध पुष्पाजात्युपशोभित आरामः, वस्त्राभरणादिसमलं-कृतविग्रहाः सन्निहिताशनाद्याहारा मदनोत्सवादिषु क्रीडार्थं लोका उद्यान्ति यत्र तच्चम्पकादि-तरुखण्डमण्डितमुद्यानं, भारतादिकथानविनोदेन यत्र लोकस्तिष्ठति सा सभा, शेषं प्रतीतम्।

अत्राह-ननु राजादिभिः प्रभातेऽवश्यं क्रियत इति व्युत्पत्तिमात्रेणाऽऽवश्यकत्वं भवतु मुखधावनादीनां, द्रव्यत्वं तु कथममीषां?, विवक्षितभावस्य हि कारणं द्रव्यं भवति, 'भूतस्य भाविनो वा भावस्य ही'त्यादिवचनात्, न च राजादिभिः क्रियमाणानि मुखधावनादीनि भावा-वश्यककारणं भवन्ति, सत्यं, किन्तु 'भूतस्य भाविनो वेत्याद्येव न मन्तव्यं, किं तर्हि?, "अप्पा-हन्नेवि दव्वसद्दोत्ती(त्थी)"ति वचनादप्रधानवाचकोऽपि द्रव्यशब्दोऽवगन्तव्यः, अप्रधानानि च मोक्षकारणभावावश्यकापेक्षया संसारकारणानि राजदिमुखधावनादीनि, ततश्च द्रव्यभूतानि-अप्रधानभूतान्यावश्यकानि द्रव्यावश्यकानि एतानीत्यदोषः, नोआगमत्वं चेहाप्यागमाभावा-न्नोशब्दस्य च सर्वनिषेधवचनत्वादित्यलं विस्तरेण, निगमयन्नाह-'से तं लोइय'मित्यादि, तदेत-ज्ज्ञशरीरभव्यशरीरव्यतिरिक्तं लौकिकं द्रव्यावश्यकमित्यर्थः।

उक्तो नोआगमतो द्रव्यावश्यकान्तर्गतज्ञशरीरभव्यशरीरव्यतिरिक्तद्रव्यावश्यक (स्य)-प्रथमो भेदः। अथ द्वितीयभेदनिरूपणार्थमाह-

*मू. ( २१ ) से किं तं कुप्पावयणिअं दव्वावस्सयं?, २ जे इमे चरगचीरिगचम्मखंडिअभि-क्खोंडपंडुरंगगोअमगोव्वतिअगिहिधम्मधम्मचिंतगअविरुद्धविरुद्धवुड्ढसावगप्पभितओ पास-डंत्था कल्लं पाउप्पभायाए रयणीए जाव तेअसा जलंते इंदस्स वा खदंस्स वा रुद्दस्स वा सिवस्स वा वेसमणस्स वा देवस्स वा नागस्स वा जक्खस्स वा भूअस्स वा मुगुंदस्स वा अज्जाए वा दुग्गए वा कोट्टकिरियाए वा उवलेवणसंमज्जणआवरिसिणधूवपुप्फगंधमल्लाइआइं दव्वावस्सयाइं करेंति, से तं कुप्पावयणियं दव्वावस्सयं।*

**वृ.** अथ किं तत् कुप्रावचनिकं द्रव्यावश्यकं?, अत्र निर्वचनम् -'कुप्पावयणियं दव्वा-वस्सयं जे इमे' इत्यादि, कुत्सितं प्रवचनं येषां ते कुप्रवचनास्तेषामिदं कुप्रावचनिकं द्रव्या-वश्यकं, किं पुनस्तदित्याह-'जे इमे' इत्यादि, य एते चरकचीरिकादयः प्रभातसमये इन्द्रस्कन्दा-देरुपलेपनादि कुर्वन्ति तत् कुप्रावचनिकं द्रव्यावश्यकमिति समुदायार्थः।

तत्र धाटिबाहकाः सन्तो ये भिक्षां चरन्ति ते चरकाः, अथवा ये भुञ्जानाश्चरन्ति ते चरकाः, रथ्यापतितचीरपरिधानाश्चीरिकाः अथवा येषां चीरमयमेव सर्वमुपकरणं ते चीरिकाः, चर्म-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परिधानाश्चर्मखण्डीका:, अथवा चर्ममयं सर्वमेवोपकरणं येषां ते चर्मखण्डिका:, ये भिक्षामेव भुञ्जते न तु स्वपरिगृहीतगोदेग्धादिकं ते भिक्षोण्डा:; सुगतशासनस्था इत्यन्ये, पाण्डुराङ्गा-भस्मोद्धूलितगात्रा:, विचित्तपादपतनादिशिक्षाकलापयुक्तवराटकमालिकादिचर्चित-वृषभकोपायत: कणभिक्षाग्राहिणो गोतमा:, गोचर्यानुकारिणो गोव्रतिका:, ते हि वयमपि किल तिर्यक्षु वसाम इति भावनां भावयन्तो गोभिर्निर्गच्छन्तीभि: सह निर्गच्छन्ति स्थिताभिस्ति-ष्ठन्त्यासीनाभिरुपविशन्ति भुञ्जानाभिस्तद्वदेव तृणपत्रपुष्पफलादि भुञ्जन्ति, तदुक्तम्-

"गावीहिं समं निग्गमपवेसठाणासणाइ पकरंति।

भुंजंति जहा गावी तिरिक्खवासं विभावंता॥"

गृहस्थधर्म एव श्रेयानित्यभिसन्धाय तद्यथोक्तचारिणो गृहिधर्मा:, तथा च तदनुसारिणां वच:-

"गृहाश्रमसमो धर्मो, न भूतो न भविष्यति।

तं पालयन्ति ये धीरा:, क्लीबा: पाषण्डमाश्रिता:॥" इति

याज्ञवल्क्यप्रभृतिऋषिप्रणीतधर्मसंहिताश्चिन्तयन्ति ताभिश्च व्यवहरन्ति(ये)ते धर्मचिन्तका:, देवताक्षितीशमातापितृतिर्यगादीनामविरोधेन विनयकारित्वादविरुद्धा-वैनयिका:, पुण्यपपर-लोकाद्यनभ्युपगमपरा अक्रियावादिनो विरुद्धा:, सर्वपाषण्डिभि: सह विरुद्धाचारित्वाद्, अत्रा-ऽऽह-ननु यद्येते पुण्याद्यनभ्युपगमपरा: कथं तर्ह्येषां वक्ष्यमाणमिन्द्राद्युपलेपनं संभवति?, पुण्या-दिनिमित्तमेव तस्य सम्भवात्, सत्यं, किन्तु जीविकादिहेतोस्तेषामपि तत्संभवतीत्यदोषा:।

प्रथममेवाऽऽद्यतीर्थकरकाले समुत्पन्नत्वात् प्रायो वृद्धकाले दीक्षाप्रतिपत्तेश्च वृद्धा:-तापसा:, श्रावका-ब्राह्मणा: प्रथमं भरतादिकाले श्रावकाणामेव सतां पश्चाद् ब्राह्मणत्वभावाद्, अन्ये तु वृद्धश्रावका इत्येकमेवं पदं ब्राह्मणवाचकत्वेन व्याचक्षते, एतेषां द्वन्द्वसमास:, प्रभृतिग्रहणात् परिव्राजकादिपरिग्रह:, पाषण्डं-व्रतं तत्र तिष्ठन्तीति पाषण्डस्था:, 'कल्लं पाउप्पभायाए'इत्यादि, पूर्ववद् यावत्तेजसा ज्वलतीति।

'इंदस्स वे'त्यादि, तत्रेन्द्र:-प्रतीत:, स्कन्द:-कार्तिकेय:, रुद्रो-हर:, शिवस्त्वाकारविशेष-धर: स एव व्यन्तरविशेषो वा, वैश्रवणो-यक्षनायक:, देव:-सामान्य:, नागो-भवनपतिविशेष:, यक्षभूतौ व्यन्तरविशेषौ, मुकुन्दो-बलदेव:, आर्या-प्रशान्तरूपा, दुर्गा सैव महिषारूढा, ततकुट्ट-नपरा कोट्टक्रिया, अत्रोपचारादिन्द्रादिशब्देन तदायतनमप्युच्यते, अतस्तस्येन्द्रारुपलेपन-सम्मार्जनावर्षणपुष्पधूपगन्धमाल्यादीनि द्रव्यावश्यकानि कुर्वन्ति, तत्र उपलेपनं-छगणादिना प्रतीतमेव, सम्मार्जनं-दण्डपुञ्छनादिना, आवर्षणं-गन्धोकादिना, शेषं गतार्थं, तदेवं य एते चरकादय इन्द्रादेरुपलेपनादि कुर्वन्ति तत् कुप्रावचनिकं द्रव्यावश्यकम्, अत्र द्रव्यात्वमा-वश्यकत्वं नोआगमत्वं च लौकिकद्रव्यावश्यकोक्तमिव भावनीयम्।

निगयमत्राह-'से त'मित्यादि, तदेतज्ज्ञशरीरभव्यशरीरव्यतिरिक्तं कुप्रावचनिकं द्रव्या-वश्यकमित्यर्थ:, उक्तो नोआगमतो द्रव्यावश्यकान्तर्गत-ज्ञशरीरभव्यशरीरव्यतिरिक्तद्रद्रव्या-वश्यकद्वितीयभेद: अथ तृतीयभेदनिरूपणार्थमाह-

*मू. (२२) से किं तं लोगुत्तरिअु दव्वावस्सयं?, २ जे इमे समणगुणमुक्कजोगी छकाय-*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*निरनुकंपा हया इव उद्दामा गया इव निरंकुसा घट्ठा मट्ठा तुप्पोट्ठा पंडुरपडपाउरणा जिनानमणाणाए सच्छंदं विहरिऊणं उभओकालं आवस्सयस्स उवट्ठंति, से तं लोगुत्तरिअं दव्वावस्सयं, से तं जाणयस्सरीरभविअसरीरवइरित्तं दव्वावस्सयं, से तं नोआगमतो दव्वावस्सयं, से तं दव्वावसयं।*

वृ.अथ किं तल्लोकोत्तरिकं द्रव्यावश्यकम्?, अत्र निर्वचनमाह-लोकस्योत्तरा:-साधवः, अथवा लोकस्योत्तरं-प्रधानं लोकोत्तरं-जिनशासनं तेषु तस्मिन् वा भवं लोकोत्तरिकं, द्रव्यावश्यकमिति व्याख्यातमेव, किं पुनस्तदित्याह-'जे इमे' इत्यादि, य एते श्रमणगुणमुक्तयोगित्वादिविशेषणविशिष्टाः साध्वाभासा जिनानामनाज्ञया स्वच्छन्दं विहृत्योभयकालमावश्यकायप्रतिक्रमणायोपतिष्ठन्ते तत्तेषां प्रतिक्रमणानुष्ठानं लोकोत्तरिक्तं द्रव्यावश्यकमिति समुदायार्थः।

इदानीमवयवार्थ उच्यते-तत्र श्रमणाः-साधवस्तेषां गुणा-मूलोत्तरगुणरूपाः, तत्र जीववधविरत्यादयो मूलगुणाः पिण्डविशुद्धयादयस्तूत्तरगुणाः, तेषु मुक्तो योगो-व्यापारो यैस्ते सर्वधनादेशकृतिगणत्वात्, श्रमणगुणमुक्तयोगिनः, एते जीववधादिविरतिमुक्तव्यापारा अपि मनसा कदाचित् सानुकम्पा अपि स्युरित्याह-षट्सु कायेषु-पृथिव्यादिषु विषये निर्गता-अपगता अनुकम्पा-मनःसार्द्रता येभ्यस्ते तथा, निरनुकम्पताचिह्नमेवाऽऽह-हया इव-तुरगा इव उद्दामाः-चरणनिपातजीवोपमर्द्दनिरपेक्षत्वाद् द्रुतचारिण इत्यर्थः, कीमित्येवंभूतास्ते इत्याह-यतो गजा इव-दुष्टद्विरदा इव निरंकुशाः गुर्वाज्ञाव्यतिक्रमचारिण इत्यर्थः, अत एव 'घट्ठ'त्ति येषां जङ्घे श्लक्ष्णीकरणार्थं फेनादिना घृष्टे भवतस्तेऽवयवावयविनोरभेदोपचारात् घृष्टाः, तथा 'मट्ठ'त्ति तैलोदकादिना येषां केशाः शरीरं वा मृष्टं ते तथैव मृष्टाः, अथवा केशादिषु मृष्टं विद्यते येषां मृष्टवन्तः, वत्प्रत्ययलोपान्मृष्टाः, तथा 'तुप्पोट्ठ'त्ति तुप्रा-म्रक्षिता मदनने वा वेष्टिताः शीतरक्षादिनिमित्तमोष्ठा येषां ते तुप्रयोष्ठाः, तथा मलपरीषहा(ह)सहिष्णुतादूरीकृतत्वात् पाण्डुरो-धौतः पटः-प्रावरणं येषां ते तथा, 'जिनानामनाज्ञया स्वच्छन्दं विहृत्य' तीर्थकराज्ञाबाह्याः स्वस्वरुच्या विविधचेष्टाः कृत्वा तत्रोभयकालं-प्रभातसमयेऽस्तमयसमये च चतुर्थ्यर्थे षष्ठीतिकृत्वा आवश्यकाय-प्रतिक्रमणायोपतिष्ठन्ते तत्तेषामावश्यकं लोकोत्तरिकं द्रव्यावश्यकम्, अत्र तु द्रव्यावश्यकत्वं भावशून्यत्वात् तत्फलाभावाच्चाप्रधानतयाऽवसेयं नोआगमत्वमपि देशे क्रियालक्षणे आगमाभावन्नोशब्दस्य चात्र देशप्रतिषेधवचनत्वादिति।

अत्र च लोकोत्तरिके द्रव्यावश्यके उदाहरणम्-वसन्तपुरे नगरेऽगीतार्थोऽसंविग्नो गच्छ एको विचरति, तत्र च श्रमणगुणमुक्तयोगी संविग्नाभासः साधुरेकः प्रतिदिनं पुरःकर्मादिदोषदुष्टमनेषणीयं भक्तादि गृहीत्वा महता संवेगेन प्रतिक्रमणकाले आलोचयति, तस्मै न गच्छाचार्योऽगीतार्थत्वात् प्रायश्चित्तं प्रयच्छन् भणति-पश्यत अहो! कथमसौ भावमगोपयन् अशठतया सर्वं समालोचयति?, सुखं हि आसेवना क्रियते, दुखं चेत्थमालोचयितुं, तस्मादशठतयैव शुद्धो ह्यसौ, तथा च तं प्रशस्यमानं दृष्ट्वा तत्र अन्येऽप्यगीतार्थश्रमणाः प्रशंसन्ति चिन्तयन्ति च-गुरोश्चेदित्थमालोच्यते तर्हि दोषासेवनायामसकृत् कृतायामपि न कश्चिद्दोषः, आलोचनाया एव साध्यत्वाद्, एवं चान्यदा तत्र संविग्नगीतार्थः, साधुः कश्चिदायातः तेन च प्रतिदिनं तमेव व्यतिकरमालोक्य सूरिरुक्तः-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्वमित्थमस्य प्रशंसां कुर्वन् विवक्षितक्षितीश इव लक्ष्यसे, तथाहि-गिरिनगरवासी कश्चिदग्निभक्तो वणिक् पद्मरागरत्नानां गृहं भृत्वा प्रतिवर्षं वह्निना प्रदीपयति तं चाविवेकितया तन्नगरनरपतिर्लोकश्च श्लाघते-अहो ! धन्योऽयं वणिग् यो भगवन्तं हुतभुजमित्थमौदार्य-क्त्यतिशयाद् रत्नैस्तर्पयति, अन्यदा च प्रबलपवनपटलप्रेरितस्तत्प्रदीपितदहनः सराजप्रासादं समस्तमपि तन्नगरं दहति स्म, असौ च राज्ञा दण्डितो नगराच्च निष्कामसितः, तदेव यथा राज्ञा तस्य प्रशंसां कुर्वता आत्मा नगरलोकश्च नाशितस्तथा त्वमपि अस्याविधिप्रवृत्तस्य प्रशंसां कुर्वन्नात्मानं समस्तगच्छं चोच्छेदयसि, यदि पुनरेनमेकं शिक्षयसि तदा तथाविधनृप इव् सपरिकरो निरपायतामनुभवसि, तथाहि-अन्येन केनचिद् राज्ञा तथैव कुर्वन् कश्चिद् वणिगा-कर्णितः, ततो नगरदाहापायदर्शिना क्षितीशेन अरण्यं गत्वा किमित्थं न करोषीत्यादिव-चोभिस्तिरस्कृत्य दण्डितो निष्कासितश्च, एवं त्वमपीत्यादि, उपनयो गतार्थः, इत्यादि बहुप्रकारं भणितो यावदसौ तत्प्रशंसातो न निवर्तते तावत्तेन गीतार्थसाधुना शेषसाधवोऽभिहिताः-एष गणाधिपो महानिर्धर्मताऽऽस्पदमगीतार्थो यदि न परित्यज्यते तदा भवतां महतेऽनर्थाय प्रभ-वतीति।

तदेवं तत् साध्वाभासवश्यकप्रकारं सर्वं लोकोत्तरिकं द्रव्यावश्यकमिति। निगमयन्नाह-'से त'मित्यादि, तदेतल्लोकोत्तरिकं द्रव्यावश्यकं, एतद् भणने च ज्ञशरीरभव्यशरीरव्यतिरिक्तं त्रिविधमपि द्रव्यावश्यकं समर्थितं भवत्यतस्तदपि निगमयति-'से त'मित्यादि, एतत्समर्थने च नोआगमतो द्रव्यावश्यकस्य सप्रभेदस्य समर्थितत्वात्तदपि निगमयति-'से तं नोआगमतो' इत्यादि, एतत्समर्थने च यत् प्रक्रान्तं द्रव्यावश्यकं तत्सोत्तरभेदमप्यवसितमतो निगमयति-'से तं दव्वावस्सय'मिति, तदेतत् द्रव्यावश्यकं समर्थितमित्यर्थः।

उक्तं सप्रपञ्चं द्रव्यावश्यकं, साम्प्रतमवसरायातभावावश्यकनिरूपणार्थमाह-

*मू. ( २३ ) से किं तं भावावस्सयं ? २ दुविहं पन्नत्तं, तंजहा-आगमतो अ नोआगमतो अ।*

**वृ.** अथ किं तद् भावावश्यकमिति, अत्र निर्वचनमाह-'भावावस्सयं दुविह'मित्यादि, वक्तृविवक्षितपरिणामस्य भवनं भावः, उक्तं च-

"भावो विवक्षितक्रियाऽनुभूतियुक्तो हि वै समाख्यातः।
सर्वज्ञैरिन्द्रादिवदिहेन्द्रनाक्रियाऽनुभवात्॥"

व्याख्याः-वक्तृविवक्षितक्रियायाः-विवक्षितपरिणामस्य इन्दनादेरनुभवनम्-अनुभूति-स्तया युक्तो योऽर्थः स भावतद्वतोरभेदोपचाराद्भावः सर्वज्ञैः समाख्यातः, निदर्शनमाह-इन्द्रादिवदित्यादि, यथा इन्दनादिक्रियानुभवात्, परमैश्वर्यादिपरिणामेन परिणत्वादिन्द्रादिर्भाव उच्यत इत्यर्थः, इत्यार्यार्थः।

भावश्चासो आवश्यकं च भावमाश्रित्य वा आवश्यकं भावावश्यकं, तच्च द्विविधं प्रज्ञप्तं, तद्यथा-आगमतः-आगममाश्रित्य नोआगमतः-आगमाभावमाश्रित्य। तत्राऽऽद्यभेदनिरूप-णार्थमाह-

*मू. ( २४ ) से किं तं आगमतो भावावस्सयं ? २ जाणए उवउत्ते, से तं आगमतो भावावस्सयं।*

**वृ.** अथ किं तदागमतो भावावश्यकम्?, अत्राह-'आगमओ भावास्सयं जाणए'इत्यादि,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उपयुक्त आगमतो भावावश्यकम्, इदमुक्तं भवति-आवश्यकपदार्थज्ञस्तज्जनितसंवेगेन विशुद्धयमानपरिणामस्तत्र चोपयुक्तः साध्वादिरागमतो भावावश्यकम्, आवश्यकार्थोपयोग-लक्षणस्याऽऽगमस्यात्र सद्‌भावत्, भावावश्यकता चात्राऽऽवश्यकोपयोगपरिणामस्य सद्-भावात्, भावमाश्रित्य आवश्यकमिति व्युत्पत्ते, अथवाऽऽवश्यकोपयोगपरिणामानन्यत्वात् साध्वादिरपि भावः, ततश्च भावश्चासावावश्यकं चेति व्युत्पत्तेरप्यसौ मन्तव्य इति 'से त'मित्यादि निगमनम्।

अथ भावावश्यकद्वितीयभेदनिरूपणार्थमाह-

*मू. ( २५ ) से किं तं नोआगमतो भावावस्सयं?, २ तिविहं पन्नत्तं, तंजहा-लोइयं कुप्पाव-यणियं लोगुत्तरिअं।*

वृ. अथ किं तन्नोआगमतो भावावश्यकम्?, अत्राऽऽह-नोआगमतो भावावश्यकं त्रिविधं प्रज्ञप्तं, तद्यथा-लौकिकं कुप्रावचनिकं लोकोत्तरिकं च। तत्र प्रथमभेदनिर्णयार्थमाह-

*मू. ( २६ ) से किं तं लोइयं भावावसयं?, २ पुव्वण्हे भारहं अवरण्हे रामायणं, से तं लोइयं भावावस्सयं।*

वृ. अथ किं तल्लौकिकं भावावश्यकमिति?, आह-'लोइयं भावावस्सयं पुव्वण्हे'इत्यादि, लोके भवं लौकिकं यदिदं लोकः पूर्वाह्णे भारतमपराह्णे रामायणं वाचयति शृणोति वा तल्लौकिकं भावावश्यकं, लोके हि भारतरामायणयोर्वाचनं श्रवणं वा पूर्वाह्णापराह्णयोरेव रूढं, विपर्यये दोषदर्शनात्, ततश्चेत्थमनयोर्लोकेऽवश्यकरणीयत्वादावश्यकत्वं, तद्वाचकस्य श्रोतृणां च तदर्थोपयोगपरिणामसद्‌भावात्, भावत्वं तद्वाचकाः श्रोतारश्च पत्रकपरावर्तनहस्ताभिनयगात्र-संयतत्वकरकुड्मलमीलनादिक्रियायुक्ता भवन्ति, क्रिया च नोआगमत्वने प्रागिहोक्ता, 'किरियाऽऽगमो न होइ'त्ति वचनात्, ततश्च क्रियालक्षणे देशे आगमस्याभावात् नोआगमत्वपि भावनीयं, नोशब्दस्यात्र देशनिषेधवचनत्वाद्, देशे त्वागमोऽस्ति, लौकिकाभिप्रायेण भारता-देरागमत्वात्, तस्माद् यथानिर्दिष्टसमये लौकिकास्तदुपयुक्ता यदवश्यं भारतादि वाचयन्ति शृणवन्ति वा तल्लौकिकं भावावश्यकमिति स्थितं, भावमाश्रित्याऽऽवश्यकं भावावश्यकं भावश्चासावावश्यकं चेति वा भावावश्यकमित्यलं विस्तरेण 'से त'मित्यादि निगमनम्।

उक्तो नोआगमतो भावावश्यकप्रथमभेदः, अथ तद्द्वितीयभेदनिरूपणार्थमाह-

*मू. ( २७ ) से किं तं कुप्पावयणियं भावावस्सयं?, २ जे इमे चरगचीरिग जाव पासंडत्था इज्जंजलिहोमजपोंदुरुक्कनमोक्कारमाइआइं भावावस्सयाइं करेंति से तु कुप्पावयणिअं भावावस्सयं।*

वृ. अत्र च निर्वचनमाह-'कुप्पावयणियं भावावस्सयं जे इमे'इत्यादि, कुत्सितं प्रवचनं येषां ते तथा तेषं भवं कुप्रावचनिकं भावावश्यकं, किं तद्?, उच्यते, य एते चरकचीरिकादयः पाषण्डस्था यथावसरं इज्याञ्जलिहोमादीनि भावरूपाण्यावश्यकानि भावावश्यकानि कुर्वन्ति तत् कुप्रावचनिकं भावावश्यकमिति सम्बन्धः।

तत्र चरकादिस्वरूपं प्रागेवोक्तम्, इज्याञ्जल्यादिस्वरूपं तूच्यते-तत्र यजनमिज्या याग इत्यर्थस्तद्विषयो जलस्याञ्जलिः इज्याञ्जलिः यागदेवतापूजावसरभावीति हृदयम्, अथवा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यजनमिज्या-पूजा गायत्र्यादिपाठपूर्वकं विप्राणां सन्ध्यार्चनमित्यर्थः, तत्राञ्जलिः इज्याञ्जलिः, अथवा देशीभाषया इज्येति माता तस्या नमस्कारविधौ तद्भक्तैः, क्रियमाणः, करकुड्मल-मीलनलक्षणोऽञ्जलिरिज्याञ्जलिः, होमः अग्निहोत्रिकैः क्रियमाणमग्निहवनं जपो-मन्त्राद्यभ्यासः 'उंदुरुक्क'त्ति देशीवचनं उन्दु-मुखं तेन रुक्कं-वृषभादिशब्दकरणमुन्दुरुक्कं देवतादिपुरतो वृष-भगर्जितादिकरणमित्यर्थः,

नमस्कारो-नमो भगवते दिवसनाथायेत्यादिकः, एतेषां द्वन्द्वे इज्याञ्जलिहोमजपोन्दुरुक्क-नमस्कारास्ते आदिर्येषां तानि तथा, आदिशब्दात्, स्तवादिपरिग्रहः, एतेषां च चरकादिभिरवश्यं क्रियमाणत्वादावश्यत्वम्, एतत्कर्तॄणां च तदर्थोपयोगश्रद्धादिपरिणामसद्भावात् भावत्वम्, अन्यच्च चरकादीनां तदार्थोपयोगलक्षणो देश आगमः देशस्तु करशिरोव्यापारादिक्रियालक्षणो नोआगमस्ततो देश आगमाभावमाश्रित्य नोआगमत्वमगन्तव्यं, नोशब्दस्येहापि देशनिषेध-परत्वात्, तस्माच्चरकादयस्तदुरपयुक्ता यथावसरं यदवश्यमिज्याञ्जल्यादि कुर्वन्ति तत् कुप्रा-वचनिकं भावावश्यकं, भावावश्यकशब्दस्य च व्युत्पत्तिद्वयं तथैव, 'से त'मित्यादि निगमनम्।

उक्तो नोआगमतो भावावश्यकद्वितीयभेदः अथ, तृतीयभेदनिरूपणार्थमाह-

*मू. (२८) से किं तं लोगंत्तरिअं भावावस्सयं?, २ जण्णं इमे समणे वा समणी वा सावओ वा साविआ वा तच्चित्ते तम्मने तल्लेसे तदज्झवसिए तत्तिव्वज्झवसाणे तदट्ठोवउत्ते तदप्पिअकरणे तब्भावणाभाविए अन्नत्थ कत्थइ मनं अकरेमाणे उभओकालं आवस्सयं करेंति से तं लोगुत्तरियं भावावस्सयं, से तं नोआगमतो भावावस्सयं, से तं भावावस्सयं।*

वृ. अत्र निर्वचनम्-'लोउत्तरियं भावावस्सयं जं न'मित्यादि जं नं'ति नमिति वाक्यालङ्कारे यदिदं श्रमणादयस्तच्चित्तादिविशेषणविशिष्टा उभयकालं प्रतिक्रमणाद्यावश्यकं कुर्वन्ति तल्लोकोत्तरिकं भावावश्यकमिति सण्टङ्कः, तत्र श्राम्यतीति श्रमणः-साधुः, श्रणी-साध्वी, शृणोति साधुसमीपे जिनप्रणीतां सामाचारीमिति श्रावकः-श्रमणोपासकः, श्राविका-श्रमणोपासिका, वाशब्दाः समुच्चायार्थाः, तस्मिन्नेवाऽऽवश्यके चित्तं-सामान्योपयोगरूपं यस्येति स तच्चितः, तस्मिन्नेव मनोविशेषोपयोगरूपं यस्य स तन्मनाः, तत्रैव लेश्याशुभपरिणामरूपा यस्येति स तल्लेश्यः, तथा तदध्यवसितः-इहाध्यवसायोऽध्यवसितं, ततश्च तच्चित्तादिभावयुक्तस्य सतस्त-स्मिन्नेवाऽऽवश्यकेऽध्यवसितं क्रियासम्पादनविषयमस्येति तदध्यवसितः, तथा तत्तीव्राध्य-वसायः-तस्मिन्नेवाऽऽवश्यके तीव्रं-प्रारम्भकालादारभ्य प्रतिक्षणं प्रकर्षयायि प्रयत्नविशेष-लक्षणमध्यवसानं यस्य स तथा, तथा 'तदर्थोपयुक्तः' तस्य -आवश्यकस्यार्थस्तदर्थस्त-स्मिन्नुपयुक्तस्तदर्थोपयुक्तः-प्रशस्ततरसंवेगविशुद्ध्यमानः तस्मिन्नेव प्रतिसूत्रं प्रतिक्रियं चार्थेषूपयुक्त इत्यर्थः,

तथा 'तदर्पितकरणः करणानि-तत्साधकतमानि देहरजोहरणमुखवस्त्रिकादीनि तस्मिन्-आवश्यके यथोचित्तव्यापारनियोगेनार्पितानि-नियुक्तानि तानि येन स तथा, सम्यग्यथास्थान-न्यस्तोपकरण इत्यर्थः, तथा 'तद्भावनाभावितः' तस्य-आवश्यकस्य भावना-अव्यवच्छिन्न-पूर्वपूर्वतरसंस्कारस्य पुनः पुनस्तदनुष्ठानुरूपा तया भावितः-अङ्गाङ्गीभावेन परिणतयावश्यका-



Jain Education International For Private & Personal Use Only www.jainelibrary.org

नुष्ठानपरिणामस्तद्भावनाभावितः, तदेवं यथोक्तप्रकारेण प्रस्तुतव्यतिरेकतोऽन्यत्र कुत्रचिन्मनोऽकुर्वन् उपलक्षणत्वाद्वाचं कायं चान्यत्राकुर्वन्, एकार्थिकानि वा विशेषणान्येतानि प्रस्तुतोपयोगप्रकर्षप्रतिपादनपराणि, अमूनि च लिङ्गविपरिणामतः श्रमणीश्राविकयोरपि योज्यानि, तस्मात् तच्चित्तादिविशेषणविशिष्टाः श्रमणादयः 'उभयकालम्' उभयसन्ध्यं यदावश्यकं कुर्वन्ति तल्लोकोत्तरिकं, भावमाश्रित्य भावश्चासावावश्यकं चेति वा भावावश्यकम्, अत्राप्यवश्यंकरणादावश्यकत्वं तदुपयोगपरिणामस्य च सद्भावत, भावत्वं मुखवस्त्रिकाप्रत्युपेक्षणरजोहरणव्यापारादिक्रियालक्षणदेशस्यानागमत्वात् नोआगमत्वं भावनीयम्, 'से त'मित्यादि निगमनम्। तदेवं स्वरूपत उक्तं भावावश्यकम्, अनेन चात्राधिकार इत्यतो नानादेशजविनेयानुग्रहार्थं तस्यैव पर्यायाभिधानार्थमाह-

*मू. ( २९ )तस्स णं इमे एगट्ठिआ नानाघोसा नानावंजणा नामधेज्जा भवंति, तंजहा-*

**वृ.** 'तस्स' आवश्यकस्य 'अमूनि' वक्ष्यमाणानि 'एकार्थिकानि' परमार्थत एकार्णविषयाणि 'नानाघोषाणि' पृथग्भिन्नोदात्तादिस्वराणि 'नानाव्यञ्जनानि' पृथग्भिन्नककाराद्यक्षराणि 'नामधेयानि' पर्यायध्वनयो भवन्ति, तद्यथा-आवस्सयं' गाहा,

**मू. ( ३० )** *आवस्सय १ अवस्संकरणिज्जं २ धुवनिग्गहो ३ विसोही ४ अ।*
अज्झयणछक्कवग्गो ५ नाओ ६ आराहणा ७ मग्गो ८ ॥

**वृ.** श्रमणादिभिरवश्यं क्रियत इति निपातनादावश्यकम्, अथवा ज्ञानादिगुणा मोक्षो वा असमन्ताद्वशयः क्रियतेऽनेनेत्यावश्यकम्, अथवा आ-समन्तद्वश्या इन्द्रियकषायादिभावशत्रवो येषां ते तथा, तैरेव क्रियते यत् तदावश्यकम्, अथवा समग्रस्यापि गुणग्रामस्यावासकमित्यावासकमित्याद्यपरमपि स्वधिया वाच्यं, पूर्वमपि च व्युत्पादितमिदं तथा मुमुक्षुभिर्नियमानुष्ठेयत्वादवश्यकरणीयं, तथा 'ध्रुवनिग्रहः' इति अत्रानादित्वात् कंचिदपर्यवसितत्वाच्च ध्रुवंकर्म तत्फलभूतः संसारो वा तस्य निग्रहहेतुत्वान्निग्रहो ध्रूवनिग्रहः, तथा कर्ममलिनस्याऽऽत्मनो विशुद्धिहेतुत्वाद्विशुद्धिः, तथा सामायिकादिषडध्ययनकलापात्मकत्वादध्ययनष्ट्कवर्गः, तथाऽभीष्टार्थसिद्धेः सम्यगुपायत्वात् न्यायः, अथवा जीवकर्मसम्बन्धापनयनान्न्यायः, अयमभिप्रायो-यथा कारणिकैर्दष्टो न्यायो द्वयोरर्थिप्रत्यर्थिनोर्भूमिद्रव्यादिसम्बन्धं चिरकालीनामप्यपनयत्येवं जीवकर्मणोरनादिकालीनमप्याश्रयाश्रयिभावसम्बन्धमपनयतीत्यावश्यकमपि न्याय उच्यते, तथा मोक्षाराधनाहेतुत्वादाराधना, तथा मोक्षापुरप्रापकत्वादेव मार्ग इति गाथार्थः। उक्त गाथाया आद्यपदं सूत्रकार एव व्युत्पादयन्नाह-

*मू. ( ३१ ) समणेणं सावएण य अवस्सकायव्वयं हवइ जम्हा।*
*अंतो अहोनिसस्स य तम्हा आवस्सयं नाम॥*

**वृ.** 'समणेण' गाहा, श्रमणादिना, अहोरात्रस्य मध्ये यस्मादवश्यंक्रियते तस्मादावश्यकम्, एवमेवावश्यकरणीयादिपदानामपि व्युत्पत्तिर्द्दष्टव्या उपलक्षणत्वादस्याः, इति गाथार्थः।

*मू. ( ३२ ) से तं आवस्सयं॥*

**वृ.** 'से त'मित्यादि निगमनं, तदेतदावश्यकं निक्षिप्तमित्यर्थः। तदेवं नामादिभेदैर्निक्षिप्तमावश्यकं, तन्निक्षेपे च यदुक्तम्-'आवश्यकं निक्षेप्स्यामि'ति तत् सम्पादितम् (इति अनुयोग-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्वारग्रन्थे आवश्यकाधिकारः कथितः ॥ अथ श्रुताधिकारः कथ्यते)

साम्प्रतं पुनर्यदुक्तम्-'श्रुतं निक्षेप्स्यामी'ति तत्सम्पादनार्थमाह-

*मू. ( ३३ ) से किं तं सुतं ? २ चउव्विहं पन्नत्तं, तंजहा- नामसुअं ठवणसुअं दव्वसुअं भावसुअं।*

**वृ.** अथ किं तत् श्रुतमिति प्रश्नः, अत्र निर्वचनं 'सुअं चउव्विह'मित्यादि, 'श्रुतं' प्राग्निरूपितशब्दार्थं चतुर्विधं प्रज्ञप्तं, तद्यथा-नामश्रुतं स्थापनाश्रुतं द्रव्यश्रुतं भावश्रुतं च। तत्राऽऽद्यभेदनिर्णयार्थमाह-

*मू. ( ३४ ) से किं तं नामसुअं ?, २ जस्स णं जीवस्स वा जाव सुएत्ति नामं कज्जइ से तं नामसुअं*

**वृ.** अत्र निर्वचनं-नामश्रुतं, 'जस्स ण'मित्यादि, यस्य जीवस्य वा अजीवस्य वा जीवानां वा अजीवानां वा तदुभयस्स वा तदुभयानां वा श्रुतमिति यन्नाम क्रियते तन्नाम श्रुतमित्यादिपदेन सम्बन्धः, नाम च तत् श्रुतं चेति व्युत्पत्तेः, अथवा यस्य जीवादेः श्रुतमिति नाम क्रियते नाम क्रियते तज्जीवादिवस्तु नामश्रुतं, नाम्ना-नाममात्रेण श्रुतं नामश्रुतमिति व्युत्पत्तेः। तत्र जीवस्य कथं श्रुतमिति नाम सम्भवतीत्यादिभावना यथा नामावश्यके तथा तदनुसारेण यथासम्भवभ्यूह्य वाच्या, से 'त'मित्यादि निगमनम्।

उक्तं नामश्रुतम्, अथ स्थापनाश्रुतनिरूपणार्थमाह-

*मू. ( ३५ ) से किं तं ठवणासुअं ?, जं णं कट्ठकम्मे वा जाव ठवणा ठविज्जइ, से तं ठवणासुअं। नामठवणाणं को पइविसेसो ?, नाम आवकहिअं ठवणा इत्तरिआ वा होज्जा आवकहिआ वा।*

**वृ.** अत्र निर्वचनम्- 'ठवणासुअं जं न'मित्यादि, अत्र व्याख्यानं यथा स्थापनावश्यके तथा सप्रपञ्चं द्रष्टव्यं, नवरभावश्यकस्थाने श्रुतमुच्चारणीयं, काष्ठकर्मादिषु श्रुतपठनादिक्रियावन्त एकादिसाध्वादयः स्थाप्यमानाः स्थापनाश्रुतमिति तात्पर्यम्। 'से त'मित्यादि निगमनम् 'नामठवणाणं को पइविसेसो ?' इत्यादि पूर्वं भावितमेव, वाचनान्तरे तु 'नामठवणाओ' भणियाओ इत्येतदेव दृश्यते, आवश्यकनामस्थापनाभणनेन प्रायोऽभिन्नार्थत्वात्, श्रुतनामस्थापने अप्युक्ते एव भवतः इत्यतो नात्र ते पुनरुच्यते इति भावः।

द्रव्यश्रुतनिरूपणार्थमाह-

*मू. ( ३६ ) से किं तं दव्वसुअं ?, दुविहं पन्नत्तं, तंजहा-आगमतो अ नोआगमतो अ।*

**वृ.** अत्र निर्वचनम्-'दव्वसुअं दुविह'मित्यादि, द्रव्यश्रुतं द्विविधं प्रज्ञप्तं, तद्यथा-आगमतो नोआगमतश्च। अत्राऽऽद्यभेदनिर्णयार्थमाह-

*मू. ( ३७ ) से किं तं आगमतो दुव्वसुअं ?, २ जस्स नं सुएत्ति पयं सिक्खियं ठियं जियं जाव नो अनुप्पेहाए, कम्हा ?, अनुवओगो दव्वमितिकट्टु, नेगमस्स नं एगो अनुवउत्तो आगमतो एगं दव्वसुअं जाव कम्हा ? जइ जाणए अनुवउत्ते न भवइ। से तं आगमतो दव्वसुअं,*

**वृ.** अत्र निर्वचनम्-'आगमओ दव्वसुअ'मित्यादि, यस्य कस्यचित् श्रुतमिति एवं श्रुतपदाभिधेयमाचारादिशास्त्र शिक्षितं स्थितं यावद्वाचनोपगतं भवति स जन्तुस्तत्र वाचनाप्रच्छनादिभिर्वर्तमानोऽपि श्रुतोपयोगेऽवर्तमानत्वादागमतः-आगममाश्रित्य द्रव्यश्रुतमिति समुदायार्थः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शेषोऽत्राऽऽक्षेपपरिहारदिप्रपञ्चो नयविचारणा च द्रव्यावश्यकवत् दृष्टव्या, अत एव सूत्रेऽप्यतिदेशं कुर्वता 'जाव कम्हा ?, जइ जाणए' इत्यादिना पर्यन्तनिर्दिष्टानां शब्दनयानां सम्बन्धी सूत्रालापको गृहीतः। एतच्च काञ्चिदेव वचनामाश्रित्य व्याख्यायते, वाचनान्तराणि तु हीनाधिकान्यपि दृश्यन्ते, 'से त'मित्यादि निगमनम्।

उक्तमागमतो द्रव्यश्रुतम्, इदानीं नोआगमतस्तदेवोच्यते–

*मू. ( ३८ ) से किं तं नोआगमतो दुव्वसुअं ?, २ तिविहं पन्नत्तं, तंजहा–जाणयसरीरदव्वसुअं भविअसरीरदव्वसुअं जाणयसरीरभविअसीरवइरित्तं दव्वसुअं।*

**वृ.** अत्र निर्वचनम्–'नोआगमओ दव्वसुअं तिविह'मित्यादि, 'जाणयसरीर० भविअसरीर० जाणयसरीरभविअसरीरवइरित्तं दव्वसुअं'। अत्राऽऽद्यभेदज्ञापनार्थमाह–

*मू. ( ३९ ) से किं तं जाणयसरीरदव्वसुअं ?, २ सुअत्तिपयत्थाहिगारजाणयस्स जं सरीरय ववगयचुअचाविअचत्तदेहं तं चेव पुव्वभणिअं भाणिअव्वं जाव से तं जाणयसरीरदव्वसुअं।*

**वृ.** अत्रोत्तरम्–'जाणयसरीरदव्वसुअं सुअत्ती'त्यादि, ज्ञातवानिति ज्ञस्तस्य शरीरं तदेवानुभूतभावत्वाद् द्रव्यश्रुतं ज्ञशरीरद्रव्यश्रुतं, श्रुतमिति यत्पदं तदर्थाधिकारज्ञायकस्य यच्छरीरकं व्यपगतादिविशेषणविशिष्टं तज्ज्ञशरीरद्रव्यश्रुतमित्यर्थः। ननु यदि जीवविप्रमुक्तमिदं कथं तर्ह्यस्य द्रव्यश्रुतत्वं ?, लेष्ट्वादीनामपि तत्प्रसङ्गात्, तत्पुद्गलानामपि कदाचित् श्रुतकर्तृ-(वेतृ)भिः गृहीत्वा मुक्तत्वसम्भवादित्याशङ्कयाऽऽह–'सेज्ञागय'मित्यादि, शेषोऽत्रावयवव्याख्यादिप्रपञ्चो ज्ञशरीरद्रव्यावश्यकवत् श्रुताभिलापतो वाच्यः, यावत् 'से त'मित्यादिनिगमनम्। द्वितीयभेदनिरूपणार्थयाह–

*मू. ( ४० ) से किं तं भविअसरीरदव्वसुअं ?, २ जे जीवे जोणीजम्मणनिक्खंते जहा दव्वावस्सए तहा भणिअव्वं जाव से तं भविअसरीरदव्वसुअं।*

**वृ.** अत्र प्रतिवचः–'भविअसरीरदव्वसुअं जे जीवे'इत्यादि, विवक्षितपर्यायेण भविष्यतीति भव्यो–विवक्षितपर्यायार्हः तद्योग्य इत्यर्थः, तस्य शरीरं तदेव भाविभावश्रुतकारणत्वात् द्रव्यश्रुतं भव्यशरीरद्रव्यश्रुतं, किं पुनस्तदिति, अत्रोच्यते, यो जीवो योनिजन्मत्वनिष्क्रान्तोऽनेनैव शरीरसमुच्छ्रयेणादत्तेन जिनोपदिष्टेन भावेन श्रुतमित्येतत् पदमागामिकाले शिक्षिष्यते न तावच्छिक्षते तज्जीवाधिष्ठतं शरीरं भव्यशरीरद्रव्यश्रुतमित्यर्थः, शेषं द्रव्यावश्यकवत् श्रुताभिलापेन सर्व वाच्यं, यावत् 'से त'मित्यादि निगमनम्। तृतीयभेदपरिज्ञानार्थमाह–

*मू. ( ४१ ) से किं तं जाणयसरीरभविअसरीरवइरित्तं दव्वसुअं ?, २ पत्तयपोत्थलिहिअं, अहवा जाणयसरीरभविअसरीरवइरित्तं दव्वसुअं पंचविहं पन्नत्तं, तंजहा–अंडयं बोंडयं कीडयं वालयं वागयं, अंडयं हंसगब्भादि, बोडयं कप्पासमाइ, कीडयं पंचविहं पन्नत्तं, तंजहा–पट्टे मलए अंसुए चीणंसुए किमिरागे, वालयं पंचविहं पन्नत्तं, तंजहा–उन्निए उट्टिए मिअलोमिए कोतवे किट्टिसे, वागयं सणमाइ, से तं जाणयसरीरभविअसरीरवइरित्तं दव्वसुअं, से तं नोआगमतो दव्वसुअं, से तं दव्वसुअं।*

**वृ.** अत्र निर्वचनम्–'जाणयसरीरभविअसरीरवइरित्तं दव्वसुअ'मित्यादि, यत्र ज्ञशरीरभव्यशरीरयोः, सम्बन्धि अनन्तरोक्तस्वरूपं न घटते तत् ताभ्यां व्यतिरिक्तं–भिन्नं द्रव्यश्रुतं, किं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुनस्तदित्याह-'पत्तयपोत्थयलिहियं'ति पत्रकाणि-तलताल्यादिसंबन्धीनि तत्संघातनिष्पन्नास्तु पुस्तकाः, ततश्च पत्रकाणि च पुस्तकाश्च तेषु लिखितं पत्रकपुस्तकलिखितम्, अथवा 'पोत्थयं'ति पोतं-वस्त्र पत्रकाणि च पोतं च तेषु लिखितं पत्रकपोतलिखितं ज्ञशरीरभव्यशरीरव्यतिरिक्तं द्रव्यश्रुतम्, अत्र च पत्रकादिलिखितस्य श्रुतस्य भावश्रुतकारणत्वात् द्रव्यत्वमवसेयं, नोआगमत्वं तु आगमतो द्रव्यश्रुत इव आगमकारणस्यात्मदेहशब्दत्रयरूपस्याभावाद् भावनीयम्।

तदेवमेकेन प्रकारेण ज्ञशरीरभव्यशरीरव्यतिरिक्तं द्रव्यश्रुतमुक्तं, साम्प्रतं तदेव प्रकारान्तरेण निरूपयितुमाह-'अहवे'त्यादि, अथवा श्रुतं पञ्चविधं प्रज्ञप्तं, तद्यथा-'अंडय'मित्यादि, अत्राऽऽहननु श्रुते प्रकान्ते सूत्रस्य प्ररूपणमप्रस्तुतं, सत्यं, किन्तु प्राकृतशैलीमङ्गीकृत्य श्रुतस्याण्डजादिसूत्रस्य च सूत्रलक्षणेनैकेन शब्देनाभिधीयमानत्वसाम्यादिदमपि प्ररूपयतीत्यदोषः, प्रसङ्गतोऽण्डजादिसूत्रस्वरूपज्ञापनेन शिष्यव्युत्पत्तिश्चैवं कृता भवति, अत एवा भावश्रुते प्रक्रान्ते नामश्रुतादिप्ररूपणमप्रस्तुतमित्याद्यपि प्रर्यमपास्तं, तस्यापि शिष्यव्युत्पादनादिफलत्वात्, न च भावश्रुतप्रतिपक्षस्य नामश्रुतादेः प्ररूपणमन्तरेण भावश्रुतस्य निर्दोषत्वादिस्वरूपनिश्चयः कर्तुं पार्यते, 'जं सव्वं जाणइ से एगं जाणइ'त्ति वचनादित्यलं विस्तरेण।

अत्राऽऽद्यभेदज्ञापनार्थमाह-'से किं त'मित्यादि, अत्रोत्तरम्-'अंडयं हंसगब्भाइ'त्ति अण्डाज्ञ्जातमण्डजं हंसः-पतङ्गश्चतुरिन्द्रियो जीवविशेषः, गर्भस्तु तन्निर्वर्तितः कोसिकाकारो, हंसस्य गर्भो हंसगर्भः, तदुत्पन्नं सूत्रमण्डजमुच्यते, आदिशब्दः स्वभेदप्रख्यापनपरः। ननु यदि हंसगर्भोत्पन्नसूत्रमण्डजमुच्यते तर्हि सूत्रे 'अंडयं हंसगब्भाइ'त्ति सामानाधिकरण्यं विरुध्यते, हंसगर्भस्य प्रस्तुतसूत्रकारणत्वादेव, सत्यं, कारणे कार्योपचारात् तदविरोधः, कोशकाभवं सूत्रं चटकसूत्रमिति लोके प्रतीतमण्डजमुच्यत इति हृदयं, पञ्चेन्द्रियहंसगर्भसम्भवमित्यन्ये, 'से त'मित्यादि निगमन्। अथ द्वितीयभेद उच्यते-

'से किं त'मित्यादि, अत्र निर्वचनम्-'बोंडयं फलिहमाइ'त्ति बोंडं वमनीफलं तस्माज्ञ्जातं बोण्डजं फलिहवमनी तस्याः फलमपि फलिहं कर्पासाश्रयं कोशकरूपं, तदिहापि कारणे कार्योपचारद्बोण्डजं सूत्रमुच्यते इति भावः, 'से त'मित्यादि निगमनम्।

अथ तृतीयभेद उच्यते-'से किं त'मित्यादि, अत्रोत्तरम्-'कीडयं पंचविह'मित्यादि, कीटाज्ञ्जातं कीटजंसूत्रं तत् पञ्चविधं प्रज्ञप्तं, तद्यथा-'पट्टे'त्ति पट्टसूत्रं मलयम् 'अंशुकं' चीनांशुकं कृमिरागम्, अत्र वृद्धव्याख्या-किल यत्रत्र विषये पट्टसूत्रमुत्पद्यते तत्रारण्ये वननिकुञ्जस्थाने मांसचीडादिरूपस्याऽऽमिषस्य पुञ्जाः क्रियन्ते, तेषां च पुञ्जानां पार्श्वतो निम्ना उन्नताश्च सान्तरा बहवः कीलका भूमौ निखायन्ते, तत्र वनान्तरेषु संचरन्तः पतङ्गकीटाः समागत्य मांसाद्यामिषोपभोगलुब्धाः कीलकान्तरेष्वितस्ततः परिभ्रमन्तो लालाः प्रमुञ्चन्ति, ताश्च कीलकेषु लग्नाः परिगृह्यन्ते, इत्येतत् पट्टसूत्रमभिधीयते, अनेनैव क्रमेण मलयविषयोत्पन्नं तदेव मलयम्, इत्थमेव चीनविषये बहिस्तादुत्पन्नं तदेवांशुकं, इत्थमेव चीनविषयोत्पन्नं तदेव चीनांशुकमभिधीयते, क्षेत्रविशेषाद्धि कीटविशेषस्तद्विशेषात्तु पट्टसूत्रादिव्यपदेश इति भावः।

एवं क्वचिद्विषये मनुष्यादिशोणितं गृहीत्वा केनापि योगेन युक्तं भाजनसम्पुटे स्थाप्यते, तत्र च प्रभूताः, कृमयः समुत्पद्यन्ते, ते च वाताभिलाषिणो भाजनच्छिद्रैर्निर्गत्य आसन्न पर्यटन्तो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यन्नालाजालमभिमुञ्चन्ति तत् कृमिरागं पट्टसूत्रमुच्यते, तच्च रक्तवर्णकृमिसमुत्थत्वात् स्वपरिणामत एव रक्तं भवति। अन्ये त्वभिदधति-यदा तत्र शोणिते कृमयः समुत्पन्ना भवन्ति तदा सकृमिकमेव तन्मलित्वा किट्टिसं परित्यज्य रसो गृह्यते, तत्र च कश्चिद् योगः प्रक्षिप्यते, ततस्तेन यद् रज्यते पट्टसूत्रं तत् कृमिरागमुच्यते, तच्च धौताद्यवस्थासु मनागपि कथञ्चिद्रागं न मञ्चन्ति, 'से त'मित्यादि निमगनम्।

अथ चतुर्थो भेद उच्यते-'से किं त'मित्यादि, अत्रोत्तरम्-'वालयं पंचविह'मित्यादि, वालेभ्यः-ऊरणिकादिलोमभ्यो जातं वालजं, तत् पञ्चविधं प्रज्ञप्तं, तद्यथा-ऊर्णाया इदमौर्णिकम्, उष्ट्राणामिदमौष्ट्रिकम्, एते द्वे अपि प्रतीते, ये मृगेभ्यो ह्रस्वका मृगाकृतयो बृहत्पुच्छा आटविक-जीवविशेषास्तल्लोमनिष्पन्नं मृगलोमिकम्, उन्दुररोमनिष्पन्नं कौतवं, ऊर्णादीनां यदुद्धरितं किट्टिसं तन्निष्पन्नं सूत्रमपि किट्टिसम्, अथवा एतेषामेवोर्णदीनां द्विकादिसंयोगतो निष्पन्नं सूत्रं किट्टिसं, अथवा उक्तशेषाश्लादिलोमनिष्पन्नं किट्टिसं 'से त'मित्यादि निगमन्।

अथ पञ्चमो भेदोऽभिधीयते-'से त'मित्यादि, वल्काज्जातं वल्कजं, तच्च सणप्रभृति, क्वचित् पुनरतस्यादीति पाठः, तत्रातसीसूत्रं मालवादिदेशप्रसिद्धं, 'से त'मित्यादि निगमन्।

उक्तं पञ्चविधमण्डजादिसूत्रं, तद्भणने चोक्तं ज्ञशरीरभव्यशरीरव्यतिरिक्तं द्रव्यश्रुतम् अतस्तदपि निगमयति-'से तं जाणगे'त्यादि, एतद्भणने च समर्थितं नोआगमतो द्रव्यश्रुतमत-स्तदपि निगमयति 'से तं नोआगमओ' इत्यादि, एतत्समर्थने च समर्थितं द्विविधमपि द्रव्यश्रुत-तस्तदपि निगमयति-'से तं दव्वसुअ'मित्यादि। अथ भावश्रुतनिरूपणार्थमाह-

*मू. (४२) से किं तं भावसुअं ?, २ दुविहं पन्नत्तं, तंजहा-आगमतो अ नोआगमतो अ।*

**वृ.** अत्रोत्तरम्-'भावसुअं दुविह'मित्यादि, विवक्षितपरिणामस्य भवनं भावः स चासौ श्रुतं चेति भावश्रुतं भावप्रधान वा श्रुतं भावश्रुतं, तद् द्विविधं प्रज्ञप्तम्-आगमतो नोआगमतश्च। तत्राऽऽद्यभेदनिरूपणार्थमाह-

*मू. (४३) से किं तं आगमतो भावसुअं ?, जानए उवउत्ते, से तं आगमतो भावसुअं।*

**वृ.** अत्रोत्तरं-श्रुतपदार्थज्ञस्तत्र चोपयुक्त आगमतः-आगममाश्रित्य भावश्रुतं, श्रुतोप-योगपरिणामस्य सद्भावत् तस्य चाऽऽगमत्वादिति भावः, 'से त'मित्यादि निगमनम्। अथ द्वितीयभेद उच्यते-

*मू. (४४) से किं तं नोआगमतो भावसुअं ? २ दुविहं पन्नत्तं, तंजहा-लोइअं लोगुत्तरिअं च।*

**वृ.** अत्रोत्तरम्-'नोआगमओ भावसुअं दुविहं पन्नत्तं, लोइयं लोउत्तरिअ'मित्यादि। अत्राऽऽद्यभेदनिरूपणार्थमाह-

*मू. (४५) से किं तं लोइअं नोआगमतो भावसुअं ?, २ जं इमं अन्नाणिएहिं मिच्छदिट्ठीहिं सच्छंदबुद्धिमइविगप्पियं, तंजहा- भारहं रामायणं भीमासुरुक्खं कोडिल्लयं घोडयमुहं सगडभद्दि-आउ कप्पासिअं नागसुहुमं कणगसत्तरी वेसियं वइसेसियं बुद्धसासणं काविलं लोगायतं सट्ठियंतं माढरपुराणवागरणनाडगाइ, अहवा बावत्तरिकलाओ चत्तारि वेआ संगोवंगा, से तं लोइयं नोआगमतो भावसुअं।*

**वृ.** अत्र निर्वचनम्-'लोइयं नोआगमतो भावसुअं जं इम'मित्यादि, लोकैः, प्रणीतं लौकिकं,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किं पुनस्तदित्याह-यदिदमज्ञानिकैर्मिथ्यादृष्टिभिः स्वच्छन्दबुद्धिमतिविकल्पितं तल्लौकिकं, भावश्रुतमिति सम्बन्धः, तत्राल्पज्ञानभावतोऽधनवदनशीलवद्वा सम्यग्दृष्टयोऽप्यज्ञानिकाः प्रोच्यन्तेऽत आह-मिथ्यादृष्टिभिः स्वच्छन्दमतिबुद्धिविकल्पितम्, ईहावग्रहे बुद्धिः, अपाय धारणे तु मतिः, स्वच्छन्देन-स्वाभिप्रायेण तत्त्वतः सर्वज्ञप्रणीतार्थानुसारमन्तरेण बुद्धिमतिभ्यां विकल्पितं स्वच्छन्दबुद्धिमति विकल्पितं, स्वबुद्धिविकल्पनाशिल्पिनिर्मितमित्यर्थः। तत्प्रकट-नार्थमेवेदमाह-'तद्यथा-भारत'मित्यादि, एतच्च भारतादिकं नाटकादिपर्यन्तं श्रुतं लोकप्रसिद्धि-गम्यम्।

अथ प्रकारान्तरेण लौकिकश्रुतनिरूपणार्थमाह-'अहवा बावत्तरिकलाओ' इत्यादि, तत्र कलनानि-वस्तुपरिज्ञानानि कलास्ताश्च द्विसप्ततिः समवायाङ्गादिग्रन्थप्रसिद्धाः, चत्वारश्च वेदाः सामवेदऋग्वेदयजुर्वेदाथर्वणवेदलक्षणाः साङ्गोपाङ्गः, तत्राङ्गानि शिक्षा १ कल्प २ व्याकरण ३ च्छन्दो ४ निरुक्त ५ ज्योतिष्कायन ६ लक्षणानि षट्, उपाङ्गानि तद्व्याख्यानरूपाणि तैः सह वर्तन्ते इति साङ्गोपाङ्गाः 'से त'मित्यादि निगमनम्।

उक्तं नोआगमतो लौकिकं भावश्रुतम्, अथ लोकोत्तरिकं तदेवाऽऽह-

*मू. ( ४६ ) से किं तं लोउत्तरिअं नोआगमतो भावसुअं ?, २ जं इमं अरिहंतेहिं भगवंतेहिं उप्पन्ननाणदंसणधरेहिं तीयपच्चुप्पन्नमनागयजाणएहिं सव्वण्णूहिं सव्वदरिसीहिं तिलुक्कवहितमहितपूइएहिं अप्पडिहयवरनाणदंसणधरेहिं पणीअं दुवालसंगं गणिपिडगं, तंजहा-आयारो सूअगडो ठाणं समवाओ विवाहपन्नत्ती नायाधम्मकहाओ उवासगदसाओ अंतगडदसाओ अनुत्तरोववाइअदसाओ पण्हावागरणाइं विवागसुअं दिट्ठीवाओ अ, से तं लोउत्तरियं नोआगमतो भावसुअं, से त नोआगमतो भावसुअं, से तं भावसुअं।*

**वृ.** लोकोत्तरैः-लोकप्रधानैरर्हद्भिः प्रणीतं लोकोत्तरिकं, किं पुनस्तदित्याह-'लोउत्तरियं भावसुअं जं इम'मित्यादि, यदिदमर्हद्भिर्द्वादशाङ्गं गणिपिटकं प्रणीतं तल्लोकोत्तरिकं भाव-श्रुतमिति सम्बन्धः, तद्यथा 'आयारो सुयगडमि' (डो इ)त्यादि, तत्र सदेवमनुजासुरलोकविरचितां पूजामर्हन्तीति अर्हन्तस्तैः, एवंभूताश्चातीर्थकरा अपि केवल्यादयो भवन्त्यतस्तीर्थकरप्रतिपत्तये आह-'भगवद्भि'रिति, समस्तैश्वर्यनिरुपमरूपयशः श्रीधर्मप्रयत्नवद्भिरित्यर्थः, इत्थंभूताश्च अनाद्यप्रतिघज्ञानादिमन्तः केचित् कैश्चिदभ्युपगम्यन्ते, उक्तं चैतद्वादिभिः-

"ज्ञानमप्रतिघं यस्य, वैराग्यं च जगत्पतेः।
एश्वर्यं चैव धर्मश्च, सहसिद्धं चतुष्टयम्॥"

इत्यादि, अतस्तद्व्यवच्छेदार्थमाह-ज्ञानावरणक्षपणादिप्रकारेणोत्पन्ने न तु सहजे ज्ञानदर्शने धरन्तीत्युत्पन्नज्ञानदर्शनधारस्तैः, न च प्रस्तुतविशेषणव्यवच्छेद्या अप्येवंभूता एव, 'सहसिद्धं चतुष्टय'मित्यादिवचनविरोधप्रसङ्गात्, तर्हि सुगता इत्थंभूता अपि भविष्यन्तीत्याशंक्याऽऽह-'तीयपच्चुप्पन्ने'त्यादि, अतीतवर्तमानभविष्यदर्थज्ञायकैरित्यर्थः, न च सुगतानामतीतभविष्य-दर्थज्ञातृत्वसम्भवः, एकान्तक्षणभङ्गवादित्वेन तदसत्त्वाभ्युपगमाद्, असतां च ग्रहणेऽति-प्रसङ्गाद्, अथ सन्तानद्वारेण कालत्रयेऽप्यर्थनां सद्भावादतीताद्यर्थज्ञातृत्वं तेषामपि न विहन्यत इत्याशंक्याऽऽह-'सर्वज्ञैः सर्वदर्शिभि'रिति, सर्वम्-एकेन्द्रियद्वीन्द्रयजीवादि वस्तु केवलज्ञानेन

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जानन्तीति, सर्वज्ञाः, तैः, तदेव सर्वं केवलदर्शनेन पश्यन्तीति सर्वदर्शिनस्तैः, शाक्यानां त्वतीताद्यर्थज्ञातृत्वेऽपि नोपपद्यते, कतिपयधर्माद्यभीष्टपदार्थज्ञातृत्वस्यैव तेष्वभ्युपगमाद्, यत उक्तं तच्छिष्यैः-

"सर्वं पश्यतु मा वाऽसाविष्टमर्थं तु पश्यतु।
कीटसंख्यापरिज्ञानं, तत्र(स्य)नः कोपयुज्यते ? ॥"

इत्यादि, यथोक्तगुणविशिष्टत्वात् 'तिलुक्कवहियमहिये'त्यादि, 'वहिय'त्ति विगलद्बहलानन्दाश्रुदृष्टिभिः सहर्षं निरीक्षिता यथावस्थितानन्यसाधारणगुणोत्कीर्तनलक्षणेन भावस्तेन महिता-अभिष्टुताः सुगन्धिपुष्पकरक्षेपादिना तु द्रव्यस्तवेन पूजिताः, तत एषां द्वन्द्वे तैलोक्येन-भवनपतिव्यतन्तरनरविद्याधरवैमानिकादिसमुदायलक्षणेन वहितमहितपूजितास्तैः, अत्राऽऽह-ननूत्पन्नज्ञानदर्शनधरैरित्युक्तम्, उत्पत्तिमत् सप्रतिघं दृष्टं यथा मूर्तेष्ववध्यादिज्ञानं, उत्पन्ने च तज्ज्ञानदर्शने अभ्युपगते, अतस्ताभ्यां ते सप्रतिघज्ञानिनः प्राप्नुवन्ति, तथा च पूर्वोक्तसर्वज्ञत्वादिहानिरित्याशङ्कयाऽऽह-'अप्रतिहतवरज्ञानदर्शनधरै'रिति, समस्तावरणक्षयसम्भूतत्वादप्रतिहते-मूर्तामूर्तेषु समस्तवस्तुष्वस्खलिते अत एव वरे-प्रधाने केवलज्ञानदर्शनलक्षणे ज्ञानदर्शने धरन्ति ये ते तथा तैः, यत्त्ववध्यादेः सप्रतिधत्वं तन्नोत्पत्तिमत्त्वेन, किं तर्हि ?, आवरणसद्भावाद्, अतोऽप्रतिधकेवलज्ञानदर्शने समस्तावरणक्षयसम्भूतत्वात्, तत्क्षयेऽपि सप्रतिवत्वाभ्युपगमेऽतिप्रसङ्गाद्, इदं च विशेषणं कस्याञ्चिदेव वाचनायां दृश्यते, न सर्वत्र, तदेवं यथोक्तप्रकारेण तावद् व्याख्यातान्यमूनि विशेषणानि, अन्यथा वाऽविरोधतः सुधिया व्याख्येयानि।

तैरर्थकथनद्वारेण 'प्रणीतं' प्ररूपितं, किं तद् ?-'द्वादशाङ्गं श्रुतं' परमपुरुषस्याङ्गानीवाङ्गानि द्वादश अङ्गानि-आचारादीनि यत्र तद् द्वादशाङ्गं, किंभूतं ?, 'गणिपिटकं' गुणगणोऽस्यास्तीति गणी-आचार्यस्तस्य पिटकं-सर्वस्वं गणिपिटकं, तद्यथा-आचार इत्यादि सुगमम्। अत्र द्वादशाङ्गश्रुतस्य चरणगुणसमन्वितस्य विवक्षितत्वान्नोआगमत्वं भावनीयं, देशस्य चरणगुणलक्षणस्यानागमत्वान्नो शब्दस्य च देशप्रतिषेध(क)त्वेनाश्रयणाद्, एवं पूर्वत्रापि लौकिकभावश्रुते वाच्यम्, निगमयन्नाह-'से कं लोउत्तरिय' मित्यादि।

एतद्भणने च समर्थितं द्विविधमपि नोआगमतो भावश्रुतम्, अतस्तदपि निगमयति-'से तं नोआगमतो भावसुअं' इत्यादि। एतद्भणने चोक्तं सर्वमपि भावश्रुतमतो निगमयति-'से तं भावसुअ'मिति। तदेवं स्वरूपत उक्तं भावश्रुतमनेनैव चात्राधिकार इत्यतोऽस्यैव पर्यायनिरूपणार्थमाह-

*मू. (४७) तस्स णं इमे एगट्ठिआ नानाघोसा नानावंजणा नामधेज्जा भवंति, तंजहा-*

वृ. 'तस्य' श्रुतस्य 'अमूनि' अनन्तरमेव वक्ष्यमाणतया प्रत्यक्षाणि 'एकार्थिकानि' तत्त्वत एकार्थविषयाणि 'नानाघोषाणि' पृथग्भिन्नोदात्तादिस्वराणि 'नानाव्यञ्जनानि' पृथग्भिन्नाक्षराणि 'नामधेयानि' पर्यायध्वनिरूपाणि भवन्ति, तद्यथा-

*मू. (४८) सुअसुत्तगंथसिद्धंतसासने आनवयण उवएसे।*
*पन्नवण आगमेऽवि अ एगट्ठा पज्जवा सुत्ते॥*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**वृ.** 'सुअ' गाहा, गुरुसमीपे श्रूयत इति श्रुतम्, अर्थानां सूचनात् सूत्रं, विप्रकीर्णार्थग्रन्थनाद् ग्रन्थः, सिद्धं-प्रमाणप्रतिष्ठितमर्थमन्तं-संवेदनिष्ठारूपं, तत्रापि प्रशस्तं प्रधानं प्रथमं वा वचनं प्रवचनं, मोक्षार्थमाज्ञाप्यन्ते प्राणिनोऽनयेत्याज्ञा, उक्तिर्वचनं वाग्योग इत्यर्थः, हिताहितप्रवृत्ति-त्युपदेशः, यथावस्थितजीवादिपदार्थज्ञापनात् प्रज्ञापना, आचार्यपारम्पर्येणाच्छतीत्यागमः, आप्तवचनं वाऽऽगम इति, 'सूत्रे' सूत्रविषये एकार्थाः पर्याया इति गाथार्थः ।

*मू. (४९) से तं सुअं ।*

**वृ.** 'से तं सुअ'मित्यादि, तदेतन्नामादि भेदैरुक्तं, श्रुतमित्यर्थः ।

(इति अनुयोगद्वारग्रन्थे श्रुताधिकारः कथितः । अथ स्कन्धाधिकारः कथ्यते) साम्प्रतं यदुक्तं 'स्कन्धं निक्षेप्स्यामी'ति, तत्सम्पादनार्थमुपक्रमते-

*मू. (५०) से किं तं खंधे ?, २ चउव्विहे पन्नत्ते, तंजहा-नामखंधे ठवणाखंधे दव्वखंधे भावखंधे ।*

**वृ.** अथ किं तत् स्कन्ध इत्युच्यते इति प्रश्ने निर्वचनमाह 'खंधे चउव्विहे' इत्यादि ।

*मू. (५१) नामट्ठवणाओ पुव्वभणिआनुक्कमेण भाणिअव्वाओ ।*

**वृ.** अत्र नामस्कन्धस्थापनास्कन्धप्रतिपादकसूत्रं नामस्थापनावश्यकप्रतिपादकसूत्र-व्याख्यानुसारेण स्वयमेव भावनीयम् ।

*मू. (५२) से किं तं दव्वखंधे ?, २ दुविहे पन्नत्ते, तंजहा-आगमतो अ नोआगमतो अ, से किं तं आगमओ दव्वखंध ?, २ खंधेत्ति पयं सिक्खियं सेसं जहा दव्वावस्सए तहा भाणिअव्वं, नवरं खंधाभिलावो जाव से किं तं जाणयसरीरभविअसरीरवइरित्ते दव्वखंधे ?, २ तिविहे पन्नत्ते, तंजहा- सच्चित्ते अचित्ते मीसए ।*

**वृ.** द्रव्यस्कन्धसूत्रमपि भव्यशरीरद्रव्यस्कन्धसूत्रं यावद् द्रव्यावश्यकोक्तव्याख्यानुसारेणैव भावनीयं, प्रायस्तुल्यवक्तव्यत्वादिति । 'से किं तं जाणयसरीरभविअसरीरवइरित्ते दव्वखंधे' इति प्रश्ने निर्वचनमाह-'जाणयसरीरभविसरीरवइरित्ते दव्वखंधे तिविहे पन्नत्ते' इत्यादि, ज्ञशरीरभव्यशरीरव्यतिरिक्तद्रव्यस्कन्धस्त्रिविधः प्रज्ञप्तः, तद्यथा-सचित्तोऽचित्तो मिश्रः ॥ तत्राऽऽद्यभेद जिज्ञासुः पृच्छति-

*मू. (५३) से किं तं सचित्ते दव्वखंधे ?, २ अनेगविहे पन्नत्ते, तंजहा-हयखंधे गयखंधे किन्नरखंधे किंपुरसखंधे महोरगखंधे गंधव्वखंधे उसभखंधे, से तं सचित्ते दव्वखंधे ।*

**वृ.** 'से किं त'मित्यादि, 'अत्रोत्तरम्-'सचित्तदव्वखंधे अनेगवीहे पन्नत्ते'इत्यादि, चित्तं मनो विज्ञानमिति पर्यायाः, सह चित्तेन वर्तत इति सचित्तः, स चासौ द्रव्यस्कन्धश्चेति सचित्त-द्रव्यस्कन्धः, 'अनेकविधो' व्यक्तिभेदतोऽनेकप्रकारः प्रज्ञप्तः, तद्यथा-'हयस्कन्ध'इत्यादि, हयः-तुरगः स एव विशिष्टैकपरिणामपरिणत्वात्, स्कन्धो हयस्कन्धः, एवं गजस्कन्धादिष्वपि समासः, नवरं किन्नरकिम्पुरुषमहोरगा व्यन्तरविशेषाः 'उसभ'त्ति वृषभः, क्वचिद्गन्धर्वस्क-न्धादीन्यकान्यप्युदाहरणानि दृश्यन्ते, सुगमानि च, नवरं 'पसुपसयविहगवानरखंधे'त्ति क्वचिद् दृश्यते, तत्र पशुः-छगलकः, पसयस्तुआटविको द्विखुरः चतुष्पदविशेषः, विहगः-पक्षी, वानरः-प्रतीतः, स्कन्धशब्दस्तु प्रत्येकं दृष्टव्यः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इह च सचित्तस्कन्धाधिकाराज्जीवानामेव च परमार्थतः सचेतनत्वात् कथञ्चिच्छरीरैः, सहाभेदे सत्यपि हयादीनां सम्बन्धिनो जीवा एव विवक्षिता न तुद तदधिष्ठितशरीराणीति सम्प्रदायः, न च जीवानां स्कन्धत्वं, पपद्यते, प्रत्येकमसङ्ख्येयपदेशात्मकत्वेन तेषां स्कन्धत्वस्य सुप्रतीतत्वादिति, हयस्कन्धादीनामन्यतरेणैकेनाप्युदाहरणेन सिद्धं, किं प्रभूतोदाहरणाभिधानेनेति चेत्, सत्यं, किन्तु पृथग्भिन्नस्वरूपविजातीयस्कन्धबहुत्वाभिधानेनाऽऽत्माद्वैतवादं निरस्यति, तथाऽभ्युपगमे मुक्तेतरादिव्यव्यवहारोच्छेदप्रसङ्गात्, 'से त'मित्यादि निगमनम्।

अथाचित्तद्रव्यस्कन्धनिरूपणार्थमाह–

*मू. ( ५४ ) से किं तं अचित्ते दव्वखंधे ? २ अनेगविहे पन्नत्ते, तंजहा–दुपएसिए तिपएसिए जाव दसपएसिए संखिज्जपएसिए असंखिज्जपएसिए अनंतपएसिए, से तं अचित्ते दव्वखंधे।*

**वृ.** 'से'इत्यादि, अत्र निर्वचनम्–'अचित्तदव्वखंधे' इत्यादि, अविद्यमानचित्तोऽचित्तः स चासौ द्रव्यस्कन्धश्चेति समासः, अयमनेकविधः प्रज्ञप्तः, तद्यथा–द्विप्रदेशिकः, स्कन्ध इत्यादि, तत्र प्रकृष्टः पुद्गलास्तिकायदेशः प्रदेशः परमाणुरित्यर्थः, द्वौ प्रदेशौ यत्र स द्विप्रदेशिकः स चासौ स्कन्धश्च द्विप्रदेशिस्कन्धः, एवमन्यत्रापि यथायोगं समासः। 'से त'मित्यादि निगमनम्।

अथ मिश्रद्रव्यस्कन्धनिरूपणायाऽऽह–

*मू. ( ५५ ) से किं तं मीसए दव्वखंधे ?, २ अणेगविहे पन्नत्ते, तंजहा–सेणाए अग्गिमे खंधे सेणाए मज्झिमे खंधे सेणाए पच्छिमे खंधे, से तं मीसए दव्वखंधे।*

**वृ.** 'से'इत्यादि। अत्रोत्तरम्–'मीसए दव्वखंधे० सेणाए' इत्यादि, सचेतनाचेतनसंकीर्णो मिश्रः सचासौ द्रव्यस्कन्धश्चेति मिश्रद्रव्यस्कन्धः, कोऽसावित्याह–सेनायाः–हस्त्यश्वरथ-पदातिसन्नाहखड्गहकुन्तासमुदायलक्षणाया अग्रस्कन्धोऽग्रानीकमित्यर्थः, मध्यमस्कन्धो मध्यमानीकं, पश्चिमस्कन्धः पश्चिमानीकम्, एतेषु हि हस्त्यादयः सचित्ताः खड्गादयस्त्वचित्ता इत्यतो मिश्रत्वं भावनीयमिति। 'से त'मित्यादि निगमनम्। तदेवमेकेन प्रकारेण तद्व्यतिरिक्तो द्रव्यस्कन्धः प्ररूपितः।

अथ तमेव प्रकारान्तरेण प्ररूपयितुमाह–

*मू. ( ५६) अहवा जाणयसरीरभविअसरीरवइरित्ते दव्वखंधे तिविहे पन्नत्ते, तंजहा–कसिणखंधे अकसिणखंधे अनेगदवियखंधे।*

**वृ.** 'अथवा' अन्येन प्रकारेण ज्ञशरीरभव्यशरीरव्यतिरिक्तो द्रव्यस्कन्धस्त्रिविधः प्रज्ञप्तः, तद्यथा–कृत्स्नस्कन्धः अकृत्स्नस्कन्धोऽनेकद्रव्यस्कन्धः। तत्राऽऽद्यभेदनिरूपणार्थमाह–

*मू. ( ५७ ) से किं कसिणखंधे ?, से चेव हयक्खंधे गयक्खंधे जाव उसभखंधे, से तं कसिणखंधे।*

**वृ.** 'से' इत्यादि, अत्रोत्तरम्–'कसिणक्खंधे' इत्यादि, यस्मान्दयो बृहत्तरः स्कन्धो नास्ति स कृत्स्नः–परिपूर्णः स्कन्ध कृत्स्नस्कन्धः, कोऽयमित्याह–'से चेवे'त्यादि, स एव हयखंधे-त्यादिनोपन्यस्तो हयादिकस्कन्धः कृत्स्नस्कन्धः। आह–यद्येवं प्रकारान्तरत्वमसिद्धं, सचित्त-स्कन्धस्यैव संज्ञान्तरेणोक्तत्वात्, नैतदेवं, प्राग् सचित्तद्रव्यस्कन्धाधिकारात्, तथाऽसम्भवि-नोऽपि बुद्धया निष्कृष्य जीवा एवोक्ताः, इह तु जीवतदधिष्ठितशरीरावयवलक्षणः समुदायः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कृत्स्नस्कन्धत्वेन विवक्षित इत्यतोऽभिधेयभेदात् सिद्धं प्रकारान्तरत्वम्।

यद्येवं तर्हि हयादिस्कन्धस्य कृत्स्नत्वं नोपपद्यते, तदपेक्षया गजादिस्कन्धस्य बृहत्तरत्वात्, नैतदेवं यतोसंख्येयप्रदेशात्मको जीवस्तदधिष्ठिताश्च शरीरावयवा इत्येवंलक्षणः समुदायो हयादिस्कन्धत्वेन विवक्षितो जीवस्य चासंझयेयप्रदेशात्मकतया सर्वत्र तुल्यात्वाद्गजादि-स्कन्धस्य बृहत्तरत्वमसिद्धं, यदि हि जीवप्रदेशपुद्गलसमुदायः सामस्त्येन वर्द्धेत तदा स्याद्-गजादिस्कन्धस्य बृहत्त्वं, तच्च नास्ति, समुदायवृद्धयभावात्, तस्मादितरेतरापेक्षया जीवप्रदेश-पुद्गलसमुदास्य हीनाधिक्याभावात् सर्वेऽपि हयादिस्कन्धाः परिपूर्णत्वात् कृत्स्नस्कन्धाः।

अन्ये तु पूर्वं सचित्तस्कन्धविचारे जीवतदधिष्ठितशरीरवयवसुमदायः सचित्तस्कन्धोऽत्र तु शरीरात् बुद्धया पृथक्कृत्य जीव एव केवलः कृत्स्नस्कन्ध इति व्यत्ययं व्याचक्षते, अत्र च व्याख्याने प्रेर्यमेव नास्ति, हयगजादिजीवानां प्रदेशतो हीनाधिक्याभावेन कृत्स्नस्कन्धत्वस्य सर्वमाविरोधादित्यलं प्रसङ्गेन।

'से त'मित्यादि निगमनम्। अथाकृत्स्नस्कन्धनिरूपणार्थमाह-

*मू. ( ५८ ) से किं तं अकसिणखंधे ?, २ सो चेव दुपएसियाइखंधे जाव अनंतपएसिए खंधे, से तं अकसिणखंधे।*

**वृ.** 'स' इत्यादि, अत्रोत्तरम्-'अकसिणखंधे सो चेवे'त्यादि, न कृत्स्नोऽकृत्स्नः स चासौ स्कन्धश्चाकृत्स्नस्कन्धो यस्मादन्योऽपि बृहत्तरः स्कन्धोऽस्ति सोऽपरिपूर्णत्वादकृत्स्नस्कन्ध इत्यर्थः। कश्चायमित्याह-'सो चेवे'त्यादि स एव 'दुपएसिए खंधे तिपएसिए खंधे' इत्यादिना पूर्वमुपन्यस्तो द्विप्रदेशिकादिरकृत्स्नोऽकृत्स्न इत्यर्थः, द्विप्रदेशिकस्य त्रिपदेशिकापेक्षयाऽ-कृत्स्नोत्वात्, त्रिपदेशिकस्यापि चतुष्प्रदेशिकापेक्षयाऽकृत्स्नत्वाद्, एवं तावद्वाच्यं यावत् नापद्यत इति। पूर्वं द्विपदेशिकादिः सर्वोत्कृष्टप्रदेशश्च स्कन्धः सामान्येनाचित्ततया प्रोक्तः, इह तु सर्वो-त्कृष्टस्कन्धादधोवर्तिन एवोत्तरोत्तरापेक्षया पूर्वपूर्वतरा अकृत्स्नस्कन्धत्वेनोक्ता इति विशेषः। 'से त' मित्यादि निगमनम्।

अथानेकद्रव्यस्कन्धनिरूपणार्थमाह-

*मू. ( ५९ ) से किं तं अनेगदविवयखंधे ?, २ तस्स चेव देसे अवचिएअ तस्स चेव देसे उवचिए, से तं अनेगदविअखंधे से तं जाणयसरीरभवियसरीरवइरित्ते दव्वखंधे, से तं नोआगमतो दव्वखंधे, से तं दव्वखंधे।*

**वृ.** 'से' इत्यादि, अत्रोत्तरम्-'अनेगदवियखंधे तस्स चेवे'त्यादि, अनेकद्रव्यश्चासौ स्कन्ध-श्चेति समासः, तस्यैवेत्यत्रानुवर्तमानं स्कन्धमात्रं संबध्यते, ततश्च 'तस्यैव' यस्य कस्यचित्त स्कन्धस्य यो 'देशो' नखदन्तकेशादिलक्षणः 'अपचितो' जीवप्रदेशैर्विरहितो, यश्च तस्यैव 'देशः' पृष्टोदरचरणादिलक्षण 'उपचित्तो' जीवप्रदेशैर्व्याप्त इत्यर्थः, तयोर्यथोक्तदेश-योर्वि-शिष्टैकपरिणामपरिणतयोर्यो देहाख्यः समुदायः सोऽनेकद्रव्यस्कन्धः, सचेतनानेकद्रव्यात्म-कत्वादिति भावः। स चैवंभूतः सामर्थ्यात्तुरगदास्य को विशेष इति चेद्, उच्यते, स किल यावानेव जीवप्रदेशानुगतस्तावानेव विवक्षितो, न तु जीवप्रदेशानुगतस्तावानेव विवक्षितो, न तु जीवप्रदेशाव्याप्तनखाद्यपेक्षया, अयं तु नखाद्यपेक्षयाऽपीतिविशेषः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पूर्वोक्तमिश्रस्कन्धास्य तर्हि को विशेष इति चेद्, उच्यते, तत्र खड्गाद्यजीवानां हस्त्यादि-जीवानां च पृथग्व्यवस्थितानां समूहकल्पनया मिश्रस्कन्धत्वमुक्तम्, अत्र तु जीवप्रयोगतो विशिष्टैकपरिणामपरिणतानां सचेतनाचेतनद्रव्याणामनेकद्रव्यस्कन्धत्वमिति विशेष इत्यलं प्रसङ्गेन। 'सेत'मित्यादि निगमनम्। तदेवमुक्तो ज्ञशरीरभव्यशरीरव्यतिरिक्तो द्रव्यस्कन्धः, तद्भणने च समर्थितो नोआगमो द्रव्यस्कन्धविचारः, तत्समर्थने च समर्थितो द्रव्यस्कन्ध इति।

अथ भावस्कन्धनिरूपणार्थमाह-

*मू. (६०) से किं तं भावखंधे ?, २ दुविहे पन्नत्तं, तंजहा- आगमओ नोआगमओ अ।*

**वृ.** अत्रोत्तरम्-'भावखंधे दुविहे' इत्यादि, भावश्चासौ स्कन्धश्च भावस्कन्धः, भावमाश्रित्य वा स्कन्धो भावस्कन्धः, स च द्विविधः प्रज्ञप्तः, तद्यथा-आगमतश्चच नोआगमतश्च।

*मू. (६१) से किं तं आगमओ भावखंधे ?, २ जाणए उवउत्ते, से तं आगमओ भावखंधे।*

**वृ.** तत्राऽऽगमतः स्कन्धपदार्थज्ञस्तत्र चोपयुक्तः तदुपयोगानन्यत्वाद्भावस्कन्धः।

*मू. (६२) से किं तं नोआगमओ भावखंधे ?, २ एएसिं चेव सामाइअमाइयाणं छण्हं अज्झयणाणं समुदयसमिइसमागमेणं आवस्सयसुअखंधे भावखंधेत्ति लब्भइ, से तं नोआगमओ भावखंधे, से तं भावखंधे।*

**वृ.** नोआगमतस्तु एतेषामेव प्रस्तुतावश्यकभेदानां सामायिकादीनां षण्णामध्ययनानां समुदायः, स चैतेषां विशकलितानामपि तथाविधदेवदत्तादीनामिव तथाविधदेवदत्तादीनामिव स्यादत उच्यते-समुदयस्य समितिः नैरन्तर्येण मीलना, सा च नैरन्तर्यावस्थापितायःशलाका-नामिव परस्परनीरपेक्षाणामपि स्यादत उच्यते-तस्याः समुदयसमितेर्यः समागमः-परस्परं सम्बद्धतया विशिष्टैकपरिणामः समुदयसमितिसमागमस्तेन निष्पन्नो य आवश्यकश्रुतस्कन्धः स भावस्कन्ध इति 'लभ्यते' प्राप्यते भवति इति हृदयम्। इदमुक्तं भवति-सामायिकादिषडध्य-यनसंहितिनिष्पन्न आवश्यकश्रुतस्कन्धो मुखवस्त्रिकारजोहरणादिव्यापारलक्षणक्रियायुक्ततया विवक्षितो नोआगमतो भावस्कन्ध, नोशब्दस्य देशे आगमनिषेधपरत्वात् क्रियालक्षणस्य च देशस्यानागमत्वादिति भावः। 'से त'मित्यादि निगमनम्। तदेवं प्रतिपादितो द्विविधोऽपि भावस्कन्ध इति निगमयति-'से तं भावखंधे'त्ति।

इदानीं त्वस्यैव एकार्थिकान्यभिधित्सुराह-

*मू. (६३) तस्स णं इमे एगट्ठिया नानाघोसा नानावंजणा नामधेज्जा भवंति, तंजहा-*

**वृ.** गतार्थम्।

*मू. (६४) गणकाए अ निकाए खंधे वग्गे तहेव रासी अ।*
*पुंजे पिंडे निगरे संघाए, आउल समूहे॥*

**वृ.** 'गण काए'गाहेति, व्याख्या-मल्लादिगणवद्गणः, पृथिवीकायादिवत् कायः, षड्जीव-निकायवन्निकायः, त्र्यादिपरमाणुस्कन्धवत् स्कन्धः, गोवर्गवद् वर्गः, शालिधान्यादिराशिवद् राशिः, विप्रकीर्णपुञ्जीकृतधान्यादिपुञ्जवत् पुञ्जः, गुडादिपिण्डवत् पिण्डः, हिरण्यद्रव्यादि-निकरवन्निकरः, तीर्थादिषु सम्मीलितजनसङ्घावत् सङ्घातः, राजगृहाङ्गणजनाकुलवदाकुलः, पुरादिजनसमूहवत् समूहः, एते भावस्कन्ध पर्यायवाचका ध्वनय इति गाथार्थः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*मू. ( ६५ ) से तं खंधे।*

वृ. 'से त'मित्यादि निगमनम्।

(इति स्कन्धाधिकारः कथितः। अथ आवश्यकषडध्ययनिववरणं कथ्यते)

*मू. ( ६६ ) आवस्सगस्स णं इमे अत्थाहिगारा भवंति, तंजहा-*

वृ. आह-नन्वाश्यके किमिति षडध्ययनानि?, अत्रोच्यते, षडर्थाधिकारयोगात्, के पुनस्ते इत्याशङ्क्य तदुपदर्शनार्थमाह-'आवस्सगस्स न'मित्यादि आवश्यकस्य 'एते वक्ष्यमाणा अर्थाधिकारा भवन्ति, तद्यथा-

*मू. ( ६७ ) सावज्जजोगविरई उक्कित्तण गुणवओ अ पडिवत्ती।*
*खलिअस्स निंदना वणतिगिच्छ गुणधारणा चेव॥*

वृ. 'सावज्जजोग' गाहा, व्याख्या-प्रथमे सामायिकलक्षणे अध्ययने प्राणातिपातादिसर्वसावद्ययोगविरतिर्थाधिकारः, 'उक्कित्तण'त्ति द्वितीये चतुर्विशतिस्तवाध्ययने प्रधानकर्मक्षयकारणात्वाल्लब्धबोधिविशुदद्धिहेतुत्वात् पुनर्बोधिलाभफलत्वात् सावद्ययोगविरत्युपदेशकत्वेनोपकारित्वाच्च तीर्थङ्कराणां गुणोत्कीर्तनार्थाधिकारः, 'गुणवओ य पडिवत्ति'त्ति गुणामूलोत्तरगुणरूपा व्रतपिण्डविशुद्धयादयो विद्यन्ते यस्य स गुणवाँस्तस्य प्रतिपत्तिः-वन्दनादिका कर्तव्येति तृतीये वन्दनाध्ययनेऽर्थाधिकारः, चशब्दात् पुष्टालम्बनेऽगुणवतोऽपि प्रतिपत्तिः कर्तव्येति द्रष्टव्यम्, उक्तं च-

"परियाय परिस पुरिसं खेत्तं कालं च आगमं नाउं।
कारणजाए जाए जहारिएं जस्सं जं जोगं॥"

'खलियस्स निंदन'त्ति खलियस्स निंदण'त्ति स्खलितस्य-मूलोत्तरगुणेषु प्रमादाचीर्णस्य प्रत्यागतसंवेगस्य जन्तोर्विशुद्धयमानाध्यवसायस्याकार्यमिदमिति भावयतो निन्दा प्रतिक्रमणेऽर्थाधिकारः, 'वणतिगिच्छ'त्ति व्रणचिकित्सा कायोत्सर्गाध्ययनेऽर्थाधिकारः, इदमुक्तं भवति-चारित्रपुरुषस्य योऽयमतिचाररूपो भावव्रणस्तस्य दशविधप्रायश्चित्तभेषजेन कायोत्सर्गाध्ययने चिकित्सा प्रतिपाद्यते, 'गुणधारणा चेव'त्ति गुणधारणा प्रत्याख्यानाध्ययने अर्थाधिकारः, अयमत्र भावार्थः-मूलगुणोत्तरगुणप्रतिपत्तिस्तस्याश्च निरतिचारं सन्धारणं यथा भवति तथा प्रत्याख्यानध्ययने प्ररूपणा करिष्यते, चशब्दादन्येऽप्यवान्तरार्थाधिकारा विज्ञेयाः, एवकारोऽवधारण इति गाथार्थः॥

तदेवं यदादौ प्रतिज्ञातम् 'आवश्यकं निक्षेप्स्यामी'त्यादि, तत्रावश्यश्रुतस्कन्धलक्षणानि त्रीणि पदानि निक्षिप्तानि, साम्प्रतं त्वध्ययनपदमवसरायातमपि न निक्षिप्यते, वक्ष्यमाणनिक्षेपानुयोगद्वार ओघनिष्पन्ननिक्षेपे तस्य निक्षेप्स्यमानत्वाद्, अत्रापि भणने च ग्रन्थगौरवाप्रत्तेरिति।

इदानीमावश्यकस्य यद्व्याख्यातं तच्च (यच्च) व्याख्येयं तदुपदर्शयन्नाह-

*मू. ( ६८ ) आवस्सयस्स एसो पिंडत्थो वण्णिओ समासेणं।*
*एत्तो एक्केक्कं पुन अज्झयणं कित्तइस्सामि।*

वृ. 'आवश्यकस्य' आवश्यकपदाभिधेयस्य शास्त्रस्य 'एषः' पूर्वोक्तप्रकारः 'पिण्डार्थः' समुदायार्थो 'वर्णितः' कथितः 'समासेन' संक्षेपेण, इदमत्र हृदयम्-आवश्यकश्रुतस्कन्ध इति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शास्त्रनाम पूर्वं व्याख्यातं, तच्च सान्वर्थं, ततश्च यथा सान्वर्थादाचारादिनामत एव तद्वाच्यशास्त्रस्य चारित्राद्याचारोऽत्राभिधास्यत इत्यादिलक्षणः समुदायार्थः प्रतिपादितो भवति, एवमात्राप्यावश्यकश्रुतस्कन्ध इति, सान्वर्थनामकथनादेवावश्यं करणीयं सावद्ययोगविरत्यादिकं वस्त्वत्राभिधास्यत इति समुदायार्थः प्रतिपादितो भवति, अत ऊर्ध्वं पुनरेकैकमध्ययनं 'कीर्तयिष्यामि' भणिष्यामीति गाथार्थः। तत्कीर्तनार्थमेवाऽऽह-

*मू. ( ६१ ) तंजहा-सामाइअं चउवीसत्थओ वंदयणं पडिक्कमणं काउस्सग्गो पच्चक्खाणं।*

*-तत्थ पढमं अज्झयणं सामाइयं, तस्स णं इमे चत्तारि अनुओगदारा भवंति, तंजहा-उवक्कमे १ निक्खेवे २ अनुगमे ३ नए ४।*

वृ. तद्यथा-सामायिकं चतुर्विंशतिस्तवो वन्दनं प्रतिक्रमणं कायोत्सर्ग प्रत्याख्यानम्। 'तत्र' तेषु अन्तरोद्दिष्टेषु षट्सु अध्ययनेषु मध्ये 'प्रथमम्' आद्यमध्ययनं सामायिकम्, आद्युपन्यासश्चास्य निःशेषचरणादिगुणाधारत्वेन प्रधानमुक्तिकारणत्वात्, उक्तं च-

"सामायिकं गुणानामाधारः स्वमिव सर्वभावानाम्।
न हि सामायिकहीनाश्चरणादिगुणान्विता येन ॥१॥
तस्माज्जगाद भगवान् सामायिकमेव निरुपमोपायम्।
शारीरमानसानेकदुःखनाशस्यनाशस्य मोक्षस्य ॥२॥"

तत्र बोधादेरधिकमयनं-प्रापणमध्ययनं प्रपञ्चतो वक्ष्यमाणशब्दार्थं, 'सामायिक'मित्यत्र यः सर्वभूतान्यात्मवत् पश्यति स रागद्वेषवियुक्तः समः तस्याऽऽयः-प्रतिक्षणं ज्ञानादिगुणोत्कर्षप्राप्तिः समायः, समो हि प्रतिक्षणमपूर्वैः ज्ञानदर्शनचरणपर्यायैर्भवाटवीभ्रमणहेतुसंक्लेशविच्छेदकैर्निरुपमसुखहेतुभिः संयुज्यते, समायः प्रयोजनमस्याध्ययनस्य ज्ञानक्रियासमुदायरूपस्येति सामायिकं, समाय एव सामायिकं, तस्य सामायिकस्य, 'ण'मिति वाक्यालङ्कारे, 'इमे'त्ति अमूनि वक्ष्यमाणलक्षणानि चत्वार्यनुयोगद्वाराणि भवन्ति, तत्राध्ययनार्थकथनविधिरनुयोगः, द्वारणीव द्वाराणि महापुरस्येव सामायिकस्यानुयोगार्थं-व्याख्यानार्थं द्वारण्यनुयोगद्वारणि, अत्र नगरद्दष्टान्तं वर्णयन्त्याचार्याः, यथा हि अकृतद्वारं नगरमनगरमेव भवति, निर्गमप्रवेशोपायाभावतोऽनधिगमनीयत्वात्, कृतैकद्विकादिद्वारमपि दुरधिगमं कार्यातिपत्तये च भवति, चतुर्मूलद्वारं तु प्रतिद्वारानुगतं सुखाधिगमं कार्यानतिपत्तये च संपद्यते, एवं सामायिकपुरमप्यर्थाधिगमोपायद्वारशून्यमशक्याधिगमं स्याद्, एकादिद्वारनुगतमपि दुरवधिगमु भवेत्, सप्रभेदचतुर्द्वारानुगतं तु सुखाधिगमं भवति, अतः फलवाँस्तदधिगमार्थो द्वारोपन्यासः।

कानि पुनस्तानीति तद्दर्शनार्थमाह- 'तद्यथे'त्यादि, तत्रोपक्रमणं-दूरस्थस्य वस्तुनस्तैः तैः प्रतिपादनप्रकारैः समीपमानीय निक्षेपयोग्यताकरणमुपक्रमः, उपक्रान्तं हि-उपक्रमान्तर्गतभेदैर्विचारितं हि निक्षिप्यते नान्यथेति भावः, उपक्राम्यते वा निक्षेपयोग्यं क्रियतेऽनेन गुरवाग्योगेनेत्युपक्रमः, अथवा उपक्रम्यते अस्मिन् शिष्यश्रवणभावे सतीत्युपक्रमः, अथवा उपक्रम्यते अस्माद्विनीतविनेयविनयादित्युपक्रमः, विनयेनाराधितो हि गुरुर्निक्षेपयोग्यं शास्त्रं करोतीति भावः, तदेवं करणाधीकरणापादानकारकैर्गुरुवाग्योगादयोऽर्था भेदेनोक्ताः, यदित्वेकोऽप्य-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न्यतोऽर्थः करणादिकारकवाच्यत्वेन विवक्ष्यते तथापि न दोषः ।

एवं निक्षेपणं-शास्त्रादेर्नामस्थापनादिभेदैर्न्यसनं-व्यवस्थापनं निक्षेपः निक्षिप्यते नामादिभेदैर्व्यवस्थाप्यते अनेनास्मिन्नस्मादिति वा निक्षेपः, वाच्यार्थविवक्षा तथैव । एवमनुगमनं-सूतस्यानुकूलमर्थकथनमनुगमः, अथवा अनु गम्यते-व्याख्याययते सूत्रमनेनास्मिन्न-स्मादिति वाऽनुगमः, वाच्यार्थविवक्षा तथैव। एवं नयनं नयो नीयते-परिच्छद्यते अनेनास्मिन्न-स्मादिति वा नयः, सर्वत्रानन्तधर्माध्यसिते वस्तुन्येकांशग्राहको बोध इत्यर्थः । अत्र चोपक्रान्तमेव निक्षेपयोग्यतामानीतमेव निक्षिप्यत इत्युपक्रमानन्तरं निक्षेप उपन्यस्तः, नामादिभेदैर्निक्षिप्तमेव चानुगम्यत इति निक्षेपानन्तरमनुगमः, अनुगम्यमानमेव च नयैर्विचार्यते नान्यथेति तदनन्तरं नय इति यथाक्तक्रमेणोपन्यासः फलवानिति।

तत्रोपक्रमो द्विधाः शास्त्रीय-इतरश्च लोकप्रसिद्धः, तत्रेतराभिधित्सया प्राह-

*मू.( ७० ) से किं तं उवक्कमे ?, २ छव्विहे पन्नत्ते, तंजहा-नामोवक्कमे ठवणोवक्कमे दव्वोवक्कमे खेत्तोवक्कमे कालोवक्कमे भावोवक्कमे, नामठवणाओ गयाओ, से किं तं दव्वोवक्कमे ?, २ दुविहे पन्नत्ते, तंजहा-आगमओ अ नोआगमओ अ, जाव जाणगसरीरभविअसरीरवइरित्ते दव्वोवक्कमे तिविहे पन्नत्ते, तंजहा-सचित्ते अचित्ते मीसए।*

**वृ.** 'उवक्कमे छव्विहे पन्नत्ते'इत्यादि, अत्र क्वचिदेवं दृश्यते-'उवक्कमे दुविहे पन्नत्ते' इत्यादि, अयं च पाठ आधुनिकोऽयुक्तश्च, 'अहवा उवक्कमे छव्विहे पन्नत्ते' इत्यादिवक्ष्यमाणग्रन्थोपन्यासस्याघटमानताप्रसङ्गात्, यदि शास्त्रीयोपक्रमोऽत्र प्रतिज्ञातः स्यात्तदा वक्ष्यमाणसूत्रमेवं स्यात्-

'से किं तं सत्थोवक्कमे ?, सत्थोवक्कमे छव्विहे पन्नत्ते' इत्यादि, न चैवं, तस्मान्नेह सूत्रे द्वैविध्यप्रतिज्ञा किन्त्वितरोपक्रमभणनं चेतसि विकल्प्य यथानिर्दिष्टमेव सूत्रमुक्तमित्यलं विस्तरेण, प्रकृतं प्रस्तुमः-तत्र नामस्थापनोपक्रमव्याख्या नामस्थापनावश्यकव्याख्यानुसारेण कर्तव्या, द्रव्योपक्रमव्याख्याऽपि द्रव्यावश्यकवदेव यावत् 'से किं तं जाणयसरीरभवि-असरीरवइरित्ते दव्वोवक्कमे ?' इत्यादि,

तत्र द्रव्यस्य-नटादेरुपक्रमणं-कालान्तरभाविनापि पर्यायेण सहेदानीमेवोपायाविशेषतः संयोजनं द्रव्योपक्रमः अथवा द्रव्यथ-घृतादिना द्रव्येभूम्यादौ द्रव्यतः-घृतादेरेवोपक्रमो द्रव्योपक्रम इत्यादिकारकयोजना विवक्षया कर्तव्येति । स च त्रिविधः प्रज्ञप्तः, तद्यथा-सचित्तद्रव्यविषयः, सचित्तः, अचित्तद्रव्यविषयोऽचित्तः, मिश्रद्रव्यविषयवस्तु मिश्रः, द्रव्योपक्रम इति वर्तते।

*मू.( ७१ ) से किं तं सचित्ते दव्वोवक्कमे ?, २ तिविहे पन्नत्ते, तंजहा-दुपए चउप्पए अपए, एक्किके पुण दुविहे पन्नत्ते तंजहा-परिक्कमे अ वत्थुविनासे अ।*

**वृ.** तत्र सचित्तद्रव्योपक्रमस्त्रिविधः, तद्यथा-द्विपदानां-नटनर्तकादीनां चतुष्पदानाम्-अश्वहस्त्यादीनाम् अपदानाम्-आम्रादीनां, तत्रैकैकः पुनरपि द्विधा-परिकर्मणि वस्तुविनाशे च, तत्रावस्थितस्यैव वस्तुनो गुणविशेषाधानं परिकर्म, तत्र परिकर्मणि-परिकर्मविषयो द्रव्योपक्रमः, यदा तु वस्तुनो विनाश एवोपायविशेषेरुपक्रम्यते तदा वस्तुनाशविषयो द्रव्योप-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्रमः, तत्र द्विपदानां नटनर्तकादीनां घृताद्युपयोगेन (यद्) बलवर्णादिकरणं कर्णस्कन्धवर्धनादिक्रिया वा स परिकर्मणि सचित्तद्रव्योपक्रमः ।

द्विविधमप्येतमुपक्रमं बिभणिषुराह-

*मू. ( ७२ ) से किं तं दुपए उवक्कमे ?, २ नडाणं नट्टाणं जल्लाणं मल्लाणं मुट्ठियाणं वेलंबगाणं कहगाणं पवगाणं लासगाणं आइक्खगणं लंखाणं मंखाणं तूणइल्लाणं तुंबवीणियाणं कावोयाणं, मागहाणं से तं दुपए उवक्कमे ।*

**वृ.** अत्र निर्वचनम्-'दुपयाणं नडाण'मित्यादि, तत्र नाटकानां नाटयितारो नटास्तेषां, 'नट्टाणं'ति नृत्यविधायिनो नर्तकास्तेषां, 'जल्लाणं'ति जल्ला-वरत्राखेलकास्तेषां, राजस्तोत्रपाठकानामित्यन्ये, 'मल्लाणं'ति मल्लाः-प्रतीतास्तेषां, 'मुट्ठियाणं'ति मौष्टिका ये मुंष्टिभिः प्रहरन्ति मल्लविशेषा एव तेषां 'वेलबंगाणं'ति विडम्बका-विदूषका नानावेषादिकारिण इत्यर्थः तेषां, 'कहगाणं'ति कथकानां-प्रतीतानां 'पवगाणं'ति प्लवका ये उत्प्लवन्ते-गर्तादिकं झम्पाभिर्लङ्घयन्ति नद्यादिकं वा तरन्ति तेषां, 'लासगाणं'ति लासका ये रासकान् गायन्ति तेषां, जयशब्दप्रयोक्तृणां वा भाण्डानामित्यर्थः, 'आइक्खगाणं'ति ये शुभाशुभमाख्यान्ति ते आख्यायकास्तेषां, 'लंखाणं'ति ये महावंशाग्रमारोहन्ति ते लङ्खास्तेषां, 'मंखाणं'ति ये चित्रपट्टादिहस्ता भिक्षां चरन्ति ते मङ्खास्तेषां, 'तूणइल्लाणं'ति तूणाभिधानावाद्यविशेषवतां, 'तुंबवीनियाणं'ति वीणावादकानां, 'कावोयाणं'ति कावडिवाहकानां, 'मागहाणं'ति मङ्गलपाठकानाम्, एषां, सर्वेषामपि यद् धृताद्युपयोगेन बलवर्णादिकरणं कर्णस्कन्धवर्द्धनादिक्रिया वा स परिकर्मणि सचित्तद्रव्योपक्रमः, यस्तु खङ्गादिभिरेषां नाश एवोपक्रम्यते-संपाद्यते स वस्तुनाशे सचित्तद्रव्योपक्रम इति वाक्यशेषः ।

अन्ये तु शास्त्रगन्धर्वनृत्यादिकलासम्पादनमपि परिकर्मणि द्रव्यापक्रम इति व्याचक्षते, एतच्चायुक्तं, विज्ञानविशेषात्मकत्वात् शास्त्रादिपरिज्ञानस्य, तस्य च भावत्वादिति, अथवा यद्यात्मद्रव्यसंस्कारमात्रापेक्षया शरीरवर्णादिकरणवदित्थमुच्यते तर्ह्येतदप्यदुष्यमेवेति । 'से त'मित्यादि निगमनम् ।

अथ चतुष्पदानां द्विविधमप्युपक्रमं बिभणिषुराह-

*मू. ( ७३ )से किं तं चउप्पए उवक्कमो ?, २ चउप्पयाणं आसाणं हत्थीणं इच्चाइ, से तं चउप्पए उवक्कमो ।*

**वृ.** अत्र निर्वचनम्-'चउप्पयाणं आसाणं हत्थीण'मित्यादि, अश्वादयः प्रतीता एव, तेषां शिक्षागुणविशेषकरणं परिकर्मणि खङ्गादिभिस्त्वेषां नाशोपक्रमणं वस्तुनाशे, सचित्तद्रव्योपक्रम इतीहापि वाक्यशेषः । 'से त'मित्यादि निगमनम् ।

अथापदानां द्विविधमप्युपक्रमं बिभणिषुराह-

*मू. ( ७४ ) से किं तं अपए उवक्कमे ?, २ अपयाणं अंबाणं अंबाडगाणं इच्चाइ, से तं अपओवक्कमे, से तं सचित्तदव्वोवक्कमे ।*

**वृ.** अत्र निर्वचनम् -'अपयाणं अंबाणं अंबाडगाण'मित्यादि, इहाऽऽम्रादयो देशप्रतीता एव, नवरं 'चाराणं'ति येषु चारकुलिका उत्पद्यन्ते ते चारवृक्षाः, आम्रादिशब्दैश्च वृक्षास्तत्फलानि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वा गृह्यन्ते, तत्र वृक्षाणां वृक्षायुर्वेदोपदेशाद्वार्द्धक्यादिगुणापादनं तत्फलानां तु गर्तप्रक्षेप-कोद्रवपलालस्थगनादिना आश्वेव पाकादिकरणं परिकर्मणि शस्त्रादिभिस्तु मूलत एव विनाशनं वस्तुनाशे, सचित्तद्रव्योपक्रम इत्यत्रापि वाक्यशेषः । 'से त'मित्यादि निगमनद्वयम् ।

अथाचित्तद्रव्योपक्रमं विवक्षुराह–

*मू. ( ७५ ) से किं तं अचित्तदव्वोवक्कमे ?, २ खंडाईणं गुडाईणं मच्छंडीणं, से तं अचित्तदव्वोवक्कमे ।*

**वृ.** 'अचित्तदव्वोवक्कमे'इत्यादि, खण्डादयः-प्रतीता एव, नवरं 'मच्छंडी' खण्डशर्करा एतेषां खण्डाद्यचित्तद्रव्याणामुपायविशेषतो माधुर्यादिगुणविशेषकरणं परिकर्मण सर्वथा विनाशकरणं वस्तुनाशे, अचित्तद्रव्योपक्रम इत्यत्रापि वाक्यशेषः । 'से त'मित्यादि निगमन् ।

अथ मिश्रद्रव्योपक्रममाह–

*मू. ( ७६ ) से किं तं मीसए दव्वोवक्कमो ?, २ से चेव थासगआयंसगाइमंडिए आसाइ, से तं मीसए दव्वोवक्कमे, से तं जाणयसरीरभविसरीरवइरित्ते दव्वोवक्कमे से तं नोआगमओ दव्वोवक्कमे, से तं दव्वोवक्कमे*

**वृ.** स्थासकोऽश्वाभरणविशेषः, आदर्शस्तु वृषभादिग्रीवाभरणं, आदिशब्दात् कुंकुमादि-परिग्रहः । ततश्च तेषामश्वादीनामेडकान्तानां कुंकुमादिभिर्मण्डितानां स्थासकादिभिस्तु विभूषिता-नां यच्छिक्षादिगुणविशेषकरणं खड्गादिभिर्विनाशो वा स मिश्रद्रव्योपक्रम इति शेषः । अश्वादीनां सचेतनत्वात् स्थासकादीनामचेतनत्वात् मिश्रद्रव्यत्वमिह भावनीयम् । अत्र च संक्षिप्ततरा अपि वाचनाविशेषा दृश्यन्ते, तेऽप्युक्तानुसारेण भावनीयाः । 'से त'मित्यादि निगमनचतुष्टयम् । उक्तो द्रव्योपक्रमः । इतः क्षेत्रोपक्रममभिधित्सुराह–

*मू. ( ७७ ) से किं तं खेत्तोवक्कमे ?, २ जण्णं हलकुलआईहिं खेत्ताई उवक्कमिज्जंति, से तं खेत्तोवक्कमे ।*

**वृ.** क्षेत्रस्योपक्रमः-परिकर्मविनाशकरणं क्षेत्रोपक्रमः, स क इत्याह-'खेत्तोवक्कमे जं णं हलकुलिआईहिं खेत्ताइं उवक्कमिज्जंति'त्ति तत्र हलं-प्रतीतम् अधोनिबद्धतिर्यक्तीक्ष्ण-लोहपट्टिकं, 'कुलिकं' लघुतरं काष्ठं तृणादिच्छेदार्थ यत् क्षेत्रे वाह्यते तत् मरुमण्डलादिप्रसिद्धं कुलिकमुच्यते, ततश्च यदत्र हलकुलिकादिभिः क्षेत्राण्युपक्रम्यन्ते-बीजवपनादियोग्यतामानी-यन्ते स परिकर्मणि क्षेत्रोपक्रमः, आदिशब्दाद्गजेन्द्रबन्धनादिभिः, क्षेत्राण्युपक्रम्यन्ते-विनाश्य-न्ते स वस्तुनाशे क्षेत्रोपक्रमः, गजेन्द्रमूत्रपुरीषादिदग्धेषु ही क्षेत्रेषु बीजानामप्ररोहणाद् विनष्टानि क्षेत्राणि इति व्यपदिश्यन्ते । आह-यद्येवं क्षेत्रगतपृथिव्यादिद्रव्याणामेव एतौ परिकर्मविनाशौ, इत्थं च द्रव्योपक्रम एवायं, कथं क्षेत्रोपक्रम ? इति, सत्यं, किन्तु क्षेत्रमाकाश तस्य चामूर्तत्वात् मुख्यतयोपक्रमो न संभवति, किन्तु तदाधेयद्रव्याणां पृथिव्यादीनां य उपक्रमः स क्षेत्रेऽपि उपचर्ते, दृश्यते च आधेयधर्मोपचार आधारे, यथा मञ्चाः क्रोशन्ति, उक्तं च–

"खित्तमरूवं निच्चं न तस्य परिकम्मणं न य विनासो ।
आहेयगयवसेण उ करणविणासोवयारोऽत्थ ॥"



Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्यादि, 'से त'मित्यादि निगमनम्।

इदानीं कालोपक्रमः, तत्र कालो द्रव्यपर्याय एव, द्रव्यपर्यायौ च मेचकमणिवत् संवलितरूपाविति द्रव्योपक्रमाभिधाने कालोपक्रम उक्त एव भवति, अथवा 'समयावलियमुहुत्ते'त्यादिरूपस्य कालस्य स्वतन्त्रमेवोपक्रममभिधित्सुराह सूत्रकारः-

*मू. (७८) से किं तं कालोवक्कमे?, २ जं णं नालिआईहिं कालस्सोवक्कमणं कीरइ, से तं कालोवक्कमे।*

वृ. कालस्योपक्रमः कालोपक्रमः, स क इत्याह-'जं णं नालिआईहिं कालस्य उवक्कमणं'णमिति वाक्यालङ्कारे, यदिहनालिकादिभिरादिशब्दात् शंकुच्छायानक्षत्रचारादिपरिग्रहस्तैः काल उपक्रम्यते, स कालोपक्रम इति शेषः, तत्र नालिकाताम्रादिमयघटिका तया, शंकुच्छायादिना वा नक्षत्रचारादिना वा एतावत्पौरुष्यादिकालोऽतिक्रान्त इति यत् परिज्ञानं भवति स परिकर्मणि कालोपक्रमः, यथावत् परिज्ञानमेव हि तस्येह परिकर्म, यत्तु नक्षत्रादिचारैः कालस्य विनाशनं स वस्तुनाशे कालोपक्रमः, तथाहि-अनेन ग्रहनक्षत्रादिचारेण विनाशितः कालो, न भविष्यन्त्यधुना धान्यादिसम्पत्तय इति वक्तारो भवन्ति, उक्तं च पूज्यैः-

"छायाए नालियाए व परिकम्मं से जहत्थविन्नाणं।
रिक्खाइयचारेहि य तस्स विनासो विवज्जासो॥"

इत्यादि, 'से त'मित्यादि, 'से तं'मित्यादि निगमनम्। अथ भावोपक्रमार्थमाह-

*मू. (७९) से किं तु भावोवक्कमे?, २ दुविहे पन्नत्ते, तंजहा-आगमओ अ नोआगमओ अ, आगमओ जाणए उवउत्ते, नोआगमओ० दुविहे पन्नत्ते, तंजहा-पसत्थे अ अपसत्थे अ, तत्थ अपसत्थे डोडिणिगणिआअमच्चाईणं, पसत्थे गुरुमाईणं, से तं नोआगमओ भावोवक्कमे, से तं भावोवक्कमे, से तं उवक्कमे।*

वृ. भावोपक्रमे द्विविधः प्रज्ञप्तः, तद्यथा-आगमतश्च नोआगतश्च, तत्रोपक्रमशद्बार्थज्ञः तत्रोपयुक्तश्चागमतो भावोपक्रमः, 'से किं तं नोआगमओ'इत्यादि, अत्रोत्तरम्-'नोआगमो भावोवक्कमे दुविहे'इत्यादि, इहाभिप्रायाख्यो जीवद्रव्यपर्यायो भावशब्देनाभिप्रेतः, उक्तं च-"भावभिख्याः पञ्च स्वभावसत्ताऽऽत्मयोन्यभिप्रायाः" ततश्च भावस्य-परकीयाभिप्रायस्योपक्रमणं-यथावत् परिज्ञानं भावोपक्रमः, स च द्विविधः-प्रशस्तोऽप्रशस्तश्चेति, तत्राप्रशस्ताभिधित्सया आह-'से किं त'मित्यादि।

अत्र निर्वचनम्-'अप्पसत्थे डोडिणिगणिआअमच्चाईणं'ति, इदमिह तात्पर्यम्-ब्राह्मण्या वेश्यया अमात्येन च यत् परकीयभावस्य यथावत् परिज्ञानलक्षणमुपक्रमणं कृतं सोऽप्रशस्तभावोपक्रमः, संसारफलत्वात्, तत्र कथं ब्राह्मण्यादिभिः परभावोपक्रमणमकारीति?, अत्रोच्यते, एकस्या ब्राह्मण्यास्तिस्रः पुत्रिकाः तासां च परिणयानानन्तरं तथा करोमि यथैताः सुखिता भवन्तीति विचिन्त्य माता जयेष्ठदुहितरं प्रत्यवोचत्-यदुत त्वयाऽऽवासभवनसमागमे स्वभर्ता कश्चिदपराधमुद्भाव्य मूर्ध्नि पादग्रहारेण हन्तव्यो, हतश्च यदनुतिष्ठति तन्ममाऽऽख्येयं, कृतं च तया तथैव, सोऽप्यतिस्नेहतरलितमना अयि प्रियतमे! पीडितस्ते सुकुमालश्चरणो भविष्यतीत्यभिधानपूर्वकं तस्याश्चरणोपमर्दनं चकार, अमुं च व्यतिकरं सा मात्रे निवेदितवती, साऽप्युप-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्रान्तजामातृभावा हृष्टा दुहितरं प्रत्यवादीत्-पुत्रिके ! यद् रोचते तत् त्वदीयगृहे कुरु त्वं, न तवावचनकरो भर्ता भविष्यतीति।

द्वितीयाऽपि तथैव शिक्षिता, तयाऽपि च तथैव स्वभर्ता शिरसि प्रहतः, केवलमसौ नैतच्छिष्टानां युज्यत इत्यादि किञ्चित् कोपं कृत्वा निवर्तितः, अमुं च व्यतिकरं सा मात्रे निवेदितवती, हृष्टा पुत्रीं प्रत्यवादीत्-पुत्रिके ! त्वद्भर्ता क्षणमेकं रुषित्वा स्थास्यति।

एवं च तृतीययाऽपि प्रहतः, केवलममुना समुच्छलदतुच्छकोपेन उक्तम्-कुलीना त्वं ?, यैवं शिष्यजनानुचित्तं चेष्टसे इत्याद्यभिधाय गाढं कुट्टयित्वा गृहान्निष्काशिता, तया चाऽऽगत्य सर्वं मात्रे निवेदितं, तयाऽपि विज्ञातजामातृभावया गत्वा तत्समीपे वत्स ! कुलस्थितिरस्माकमियं यदुत प्रथमसमागमे वध्वा वरस्येत्थं कर्तव्यमित्यादि किञ्चिदभिधाय कथमप्यनुनयितोऽसौ, दुहिता च प्रोक्ता-वत्से ! दुराराधस्ते भर्ता भविष्यति, परमदेवतावदप्रमत्तया समाराधनीय इति।

तथैकस्मिन्नगरे चतुःषष्ठिविज्ञानसहिता गणिका, तया च पराभिप्रायपरिज्ञानार्थं रतिभवनभित्तिषु स्वस्वव्यापारं कुर्वत्यः सर्वा अपि राजपुत्रादिजातयश्चित्रकर्मणि लेखिताः, तत्र च यः कश्चिद् राजपुत्रादिराच्छति स तत्रैव कृताभ्यासतया स्वकीयस्वकीयव्यापारमेव बाढं प्रशंसति, ततोऽसौ विलासिनी राजपुत्रादीनामन्यतरत्वेन तं विनिश्चित्य यथौचित्येनोपचरति, आनुकूल्येनोपचरिताश्च भुजङ्गाः प्रचुरतरमर्थजातं तस्यै प्रयच्छन्तीति। तथैकस्मिन्नगरे कश्चिद्राजा अमात्येन सहाश्ववाहनिकायां निर्गतः, तत्र च पथिगच्छता राजतुरङ्गमेन कुत्रचित् खिलप्रदेशे प्रश्रवणमकारि, तच्च तत्प्रदेशे पृथिव्याः स्थिरत्वेन बद्धच्छिल्लरकं चिरेणाप्यशुष्कं व्यावर्तमानो राजा तथैव व्यवस्थितमद्राक्षीत्, चिरावस्थायिजलं शोभनमत्र प्रदेशे तडागं भवतीति चिन्तयँश्चिरमवलोकितवाँश्च, तदिङ्गिताकारपरिज्ञानकुशलतया चामात्येन राज्ञाऽभणितेनापि विदिततदभिप्रायेण खानितं तत्र प्रदेशे महासरः, तत्पाल्यां च रोपिताः सर्वर्तुकपुष्पफलसमृद्धयो नानाजातीयतरुनिवहाः, अन्यदा च तेनैव प्रदेशे गच्छता भूपेन दृष्टं, पृष्टं चाहो ! मानससरोवद्रमणीयकं केनेदं खानितम् ?, अमात्यो-जगाद-भवद्भिरेव, राजा सविस्मयं प्राह-कदा कश्च मयैतत्करणाय निरूपति इति, अतः सचिवो यथावृत्तं सर्वं कथितवान्, अहो ! परचित्तोपलक्षकत्वममात्वस्येति विचिन्त्य परितुष्टो राजातस्य वृत्तिं वर्द्धयामासेति।

तदेवमित्या(वमा)दिकः संसारफलाऽपरोऽप्यप्रशस्तभावोपक्रमः। अथ प्रशस्तभावोपक्रममाह-'पसत्थो गुरुमाईणं'ति, तत्र श्रुतादिनिमित्तं गुर्वादीनां यद्भावोपक्रमणं स प्रशस्तभावोपक्रमः। आह-नन्वनुयोगद्वारविचारोऽत्र प्रकान्तः, अनुयोगश्च व्याख्यानम्, ततश्च यदेव तदुपकारि किञ्चित् तदेव वक्तव्यं भवति, गुरुभावोपक्रमस्त्वप्रस्तुतो, व्याख्यानानुपकारित्वात्, तदेतदयुक्तं, गुरुभावोपक्रमस्यैव मुख्यव्याख्याङ्गत्वात्, उक्तं च-

"गुर्वायत्ता यस्माच्छास्त्रारम्भा भवन्ति सर्वेऽपि।
तस्माद् गुर्वाराधनपरण हितकाङ्क्षिणा भाव्यम्॥" (अन्यच्च)

"जुत्तं गुरुमणगहणं नाऊणं तयं जहट्ठियं तत्तो।
जइ होइ सुप्पसन्नं तह जहयव्वं गुणत्थीहिं॥१॥
गुरुचित्तायत्ताइं वक्खाणंगाइ जेण सव्वाइ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तेन जह सुप्पसन्नं होइ तयं तं तहा कुज्ञा ॥२॥
आगारिंगियकुसलं जइ सेयं वायसं वए पुज्ञा।
तह वि य से नवि कूडे विरहम्मि य कारणं पुच्छे ॥३॥
निवपुच्छिएण भणिओ गुरुणा गंगा कओमुही वहई ?।
संपाइयवं सीसो जह तह सव्वत्थ कायव्वं ॥४॥ इत्यादि,

भवत्वेवं तर्हि भावोपक्रमस्य सार्थकत्वं, शेषास्तु नामस्थापनाद्रव्याद्युपक्रमा अनर्थका एव, नैतदेवं, यतो गुरोस्तथाविधप्रयोजनोत्पत्तौ तच्चित्तप्रसादनार्थमेवाशनपानवस्त्रपात्रौ-षधादिद्रव्यं व्याख्यास्थानादिक्षेत्रं प्रव्रज्यालग्नादिकालमुपक्रमतो विनेयस्य द्रव्यक्षेत्र-कालोपक्रमा अपि सार्थका एव, नामस्थापनोपक्रमौ तु प्रकृतानुपयोगित्वेऽभ्युपक्रमसाम्या-दत्रोक्तौ, अथवा सर्वेऽप्यमी प्रकृतानुपयोगिनोऽप्यन्यत्रोशपयोक्ष्यन्ते उपक्रमसाम्याच्चात्रोक्ता इत्यदोषः ॥

तदेवं लौकिकोपक्रमप्रकारेणोक्त उपक्रमः, साम्प्रतं तु तमेव शास्त्रीयोपक्रमलक्षणेन प्रकारान्तरेणाभिधित्सुराह-

**मू. (८०)** *अहवा उवक्कमे छव्विहे पन्नत्ते, तंजहा-आनुपुव्वी १ नामं २ पमाणं ३ वत्तव्वया ४ अत्थाहिगारे ५ समोआरे ६।*

**वृ.** अथवा अनन्तरं यः प्रशस्तभावोपक्रमः उक्तः स हि द्विविधो द्दष्टव्यो-गुरुभावोपक्रमः शास्त्रभावोपक्रमश्च, शास्त्रलक्षणो भावः शास्त्रभावस्तस्योपक्रमः शास्त्रभावोपक्रमः, तत्रैकेन गुरुभावोपक्रमलक्षणेन प्रकारेणोक्तः, अथ द्वितीयेन शास्त्रभावोपक्रमलक्षणेन प्रकारान्तरेण तमभिधित्सुराह-'अहवा उवक्कमे'इत्यादि, 'अथवे'ति पक्षान्तरसूचकः उपक्रमः, प्रथमपातना-पक्षे शास्त्रीयोपक्रमे द्वितीयपातनापक्षे तु शास्त्रोभावोपक्रमः, 'षड्विधः' षट्प्रकारः प्रज्ञप्तः, तद्यथा-आनुपूर्वी १ नाम २ प्रमाणं ३ वक्तव्यता ४ अर्थाधिकारः ५ समवतारः ६। एतेषां तु शब्दव्युत्पत्त्यादिस्वरूपं यथावसरं पुरस्तादेव वक्ष्यामः।

तत्राऽऽनुपूर्वीस्वरूपणार्थमाह-

**मू. (८१)** *से किं तं आनुपुव्वी ?, २ दसविहा पन्नत्ता, तंजहा-नामानुपुव्वी १ ठवणानुपुव्वी २ दव्वानुपुव्वी ३ खेत्तानुपुव्वी ४ कालानुपुव्वी ५ उक्कित्तणानुपुव्वी ६ गणणानुपुव्वी ७ संठाणानुपुव्वी ८ सामाआरीआनुपुव्वी ९ भावानुपुव्वी १०*

**वृ.** अथ किं तदानुपूर्वीवस्त्विति प्रश्नार्थः। अत्र निर्वचनम् -'आनुपुव्वी दसविहे' त्यादि, इह हि पूर्वं प्रथममादिरिति पर्यायाः, पूर्वस्य अनु-पश्चादनुपूर्वं, 'तस्य भाव'इति यणप्रत्यये स्त्रियामीकारे चानुपूर्वी अनुक्रमोऽनुपरिपाटीति पर्यायाः, त्र्यादिवस्तुसंहतिरित्यर्थः। इयमानुपूर्वी 'दशविधा' दशप्रकारा प्रज्ञप्ता, तद्यथा-नामानुपूर्वी स्थापनानुपूर्वी द्रव्यानुपूर्वी क्षेत्रानुपूर्वी कालानुपूर्वी उत्कीर्तनानुपूर्वी गणाननुपूर्वी संस्थानानुपूर्वी सामचार्यानुपूर्वी भावानुपूर्वीति।

**मू. (८२)** *नामठवणाओ गयाओ, से किं तं दव्वानुपुव्वी ?, २ दुविहा पन्नत्ता, तंजहा-आगमओ न नोआगमओ अ। से किं तं दव्वानुपुव्वी ?, २ जस्स नं आनुपुव्वित्ति पयं सिक्खियं ठियं जियं मियं परिजियं जाव नो अनुप्पेहाए, कम्हा ?, अनुवओगो दव्वमितिकट्टु, नेगमस्स*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*णं एगो अनुवउत्तो आगमओ एगा दव्वानुपुव्वी जाव कम्हा ? जइ जाणए अनुवउत्ते न भवइ, से तं आगमओ दव्वानुपुव्वी।*

*से किं तं नोआगमओ दव्वानुपुव्वी ?, २ तिविहा पन्नत्ता, तंजहा- जाणयसरीरदव्वानुपुव्वी भविअसरीरदव्वानुपुव्वी जाणयसरीरभविअसरीरवइरित्ता दव्वानुपुव्वी।*

*से किं तं जाणयसरीरदव्यानुपुव्वी ?, आनुपुव्वीपयत्थाहिगारजाणयस्स जं सरीरयं ववगयचुयचावियचत्तदेहं सेसं जहा दव्वावस्सए तहा भाणिअव्वं, जाव से तं जाणयसरीदव्वानुपुव्वी।*

*से किं तं भविअसरीरदव्वानुपुव्वी ?, २ जे जीवे जोणीजम्मणनिक्खंते सेसं जहा दव्वावस्सए जाव से तं भविअसररीदव्वानुपुव्वी।*

*से किं तं जाणयसरीरभविअसरीरवइरित्ता दव्वानुपुव्वी ?, २ दुविहा पन्नत्ता, तंजहा- उवनिहिआ य अनोवनिहिआ य, तत्थ णं जा सा उवनिहिआ सा ठप्पा, तत्थ नं जा सा अनोवनिहिआ सा दुविहा पन्नत्ता, तंजहा- नेगमववहाराणं संगहस्स य।*

**वृ.** अत्र नामस्थापनानुपूर्वीसूत्रे नामस्थापनावश्यकसूत्रव्याख्यानुसारेण व्याख्येये, द्रव्यानुपूर्वीसूत्रमपि द्रव्यावश्यकवदेव भावनीयं, यावत् 'जाणयसरीरभविअसरीरवइरित्ता दव्वानुपुव्वी दुविहे'त्यादि, तत्र निधानं निधिर्निक्षेपो न्यासो विरचना प्रस्तारः स्थापनेति पर्यायाः, तथा च लोके-'निधेहीदं निहितमिद'मित्यत्र निपूर्वस्य धागो निक्षेपार्थः प्रतीयत एव, उप-सामीप्येन निधिरुपनिधिः-एकस्मिन् विवक्षितेऽर्थे पूर्वं व्यवस्थापिते तत्समीप एवापरापरस्य वक्ष्यमाणपूर्वानुपूर्वादिक्रमेण यन्निक्षेपणं स उपनिधिरित्यर्थः, उपनिधिः प्रयोजनं यस्या आनुपूर्व्याः, सा औपनिधिकीति प्रयोजनार्थे इकणप्रत्यः, सामायिकाध्ययनादिवस्तूनां वक्ष्यमाणपूर्वानुपूर्व्यादिप्रस्तारप्रयोजना आनुपूर्वी औपनिधिकीत्युच्यत इति तात्पर्यम्।

अनुपनिधिः-वक्ष्यमाणपुर्वानुपूर्व्यादिक्रमेणाविरचनं प्रयोजनमस्या इत्यनौपनिधिकी, यस्यां वक्ष्यमाणपूर्वानुपूर्व्यादिक्रमेण विरचना न क्रियते सा त्र्यादिपरमाणुनिष्पन्नस्कन्धविषया आनुपूर्वी: अनौपनिधिकीत्युच्यते इति भावः। आह-नन्वानुपूर्वी परिपाटिरुच्यते, भवता च त्र्यणुकादिकोऽनन्ताणुकावसान एकैकः स्कन्धोऽनौपनिधिक्यानुपूर्वीत्वेनाभिप्रेतो, न च स्कन्धगतत्र्यादिपरमाणूनां नियता काचित्त परिपाटिरस्ति, विशिष्टैकपरिणामपरिणतत्वात् तेषां, तत् कथमिहानुपूर्वीत्वं ?, सत्यं, किन्तु त्र्यादिपरमाणूनामादमध्यायसानभावेन नियतपरिपाट्य व्यवस्थापनयोग्यताऽस्तीति योग्यतामाश्रित्यात्राप्यानुपूर्वीत्वं न विरुध्यते।

'तत्थण' मित्यादि, तत्र याऽसावौपनिधिकी द्रव्यानुपूर्वी सा स्थाप्या-सांन्यासिकी तिष्ठतु तावदल्पतरवक्तव्यत्वेन, तस्या उपरि वक्ष्यमाणत्वादिति भावः। अनौपनिधिकी तु पश्चान्निर्दिष्टाऽपि बहुतरव्यक्तव्यत्वेन प्रथमं व्याख्यायते, बहुतरवक्तव्यत्वे हि वस्तुनि प्रथममुच्यमानेऽल्पतरवक्तव्यवस्तुगतः, कश्चिदर्थस्तन्मध्येऽप्युक्त एव लभ्यते इति गुणाधिक्यं पर्यालोच्य सूत्रकारोऽनौपनिधिक्याः स्वरूपं विवरीषुराह-

'तत्थ न'मित्यादि, तत्र याऽसावनौपनिधिकी द्रव्यानुपूर्वी सा नयवक्तव्यताश्रयणात् द्रव्यास्तिकनयमतेन द्विविधा प्रज्ञसा, तद्यथा-नैगमव्यवहारयोः, संग्रहस्य च, नैगमव्यवहार-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ऋजुसूत्रशब्दसमभिरूढैवंभूता नयाः'' एते च द्रव्यास्तिकपर्यायास्तिकलक्षणे नयद्वयेऽन्तर्भाव्यन्ते, द्रव्यमेव परमार्थतोऽस्ति न पर्याया इत्यभ्युपगमपरो द्रव्यास्तिकः, पर्याया एव वस्तुतः सन्ति न द्रव्यमित्यभ्युपगमपरः पर्यायास्तिकः, तत्राऽऽद्यास्त्रयो द्रव्यास्तिकाः, शेषास्तु पर्यायास्तिकाः, पुनर्द्रव्यास्तिकोऽपि सामान्यतो द्विविधो-विशुद्धोऽविशुद्धश्च, तत्र नैगमव्यवहाररूपोऽविशुद्धः, संग्रहरूपस्तु विशुद्धः, कथम् ?

यतो नैगमव्यवहारावनन्तपरमाण्वनन्तद्व्यणुकाद्यनेकव्यक्त्यात्मकं कृष्णाद्यनेकगुणाधारं त्रिकालविषयं वाऽविशुद्धं द्रव्यमिच्छतः, संग्रहश्च परमाण्वादिकं परमाण्वादिसाम्यादेकं तिरोभूतगुणकलापमविद्यमानपूर्वापरविभागं नित्यं सामान्यमेव द्रव्यमिच्छति, एतच्च किलानेकताद्यभ्युपगमकलङ्केनालकङ्कितत्वाच्छुद्ध, ततः शुद्धद्रव्याभ्युपगमपरत्वादयमेव शुद्धः । अत्र च द्रव्यानुपूर्व्येव विचारयितुं प्रक्रान्ता, अतः शुदद्धधाशुद्धस्वरूपं द्रव्यासस्तितिकमतेनैवासो दर्शयिष्यते न पर्यायास्तिकमतेन, पर्यायविचारस्याप्रक्रान्तत्वादित्यलं विस्तरेण ।

तत्र नैगमव्यहारसंमातामिमां दर्शयितुमाह-

*मू. ( ८३ ) से किं तं नेगमववहारणं अनोवनिहिआ दव्वानुपुव्वी ?, २ पंचविहा पन्नत्ता, तंजहा-अट्ठपयपरूवणया १ भंगसमुक्कित्तणया २ भंगोवदंसणया ३ समोआरे ४ अनुगमे ५*

**वृ.** अत्र निर्वचनम्-'नेगमववहारणं अनोवनिहिआ दव्वानुपुव्वी पंचविहे'त्यादि, अर्थपदप्ररूपणतादिभिः पञ्चभिः प्रकारैर्विचार्यमाणत्वात्, पञ्चविधा-पञ्चप्रकारा प्रज्ञप्ता, तद्यथा-अर्थपदप्ररूणतया भङ्गसमुत्कीर्तनता भङ्गोपदर्शनता समवतारोऽनुगमः । एभिः पञ्चभिः प्रकारैनैंगमव्यवहारनयमतेन अनौपनिधिक्याः द्रव्यानुपूर्व्याः स्वरूपं निरूप्यत इतीह तात्पर्यम् । तत्र अर्यत इत्यर्थः-त्र्यणुकस्कन्धादिस्तद्युतं तद्विषयं वा पदमानुपूर्व्यादिकं तस्य प्ररूपणं-कथनं तद्‌भावोऽर्थपदप्ररूपणता, इयमानुपूर्व्यादिका संज्ञा अयं च तदभिधेयस्त्र्यणुकादिरर्थः संज्ञीत्येवं संज्ञासंज्ञिसम्बन्धकथनमात्रं प्रथमं कर्तव्यमिति भावार्थः ।

तेषामेवानुपूर्व्यादिपदानां समुदिताना वक्ष्यमाणन्यायेन सम्भविनो विकल्पा-भङ्गासमुत्कीर्तनं, तद्‌भावो भङ्गसमुत्कीर्तनता, आनुपूर्व्यादिपदनिष्पन्नानां प्रत्येकभङ्गानां द्व्यादिसंयोगभङ्गानां च समुच्चारणमित्यर्थः । तेषामेव सूत्रमात्रतया अनन्तरसमुत्कीर्तितभङ्गानां प्रत्येकं स्वाभिधेयेन त्र्यणुकाद्यर्थेन सहोपदर्शनं भङ्गोपदर्शनं, तद्‌भावो भङ्गोपदर्शनता । भङ्गसमुत्कीर्तने भङ्गकविषयं सूत्रमेव केवलमुच्चारणीयं, भङ्गोपदर्शने तु तदेव स्वविषयभूतेनार्थेन सहोच्चारयितव्यमिति विशेषः । तथा तेषामेवानुपूर्व्यादिद्रव्याणां स्वस्थानपरसथानान्तर्भावचिन्तनप्रकारः समवतारः ।

तथा तेषामेव आनुपूर्व्यादिद्रव्याणां सत्पदप्ररूपणादिभिरनुयोगद्वारैरनुगमनं-विचारणमनुगमः । तत्राऽऽद्यभेदं विवरीषुराह-

*मू. ( ८४ ) से किं तं नेगमववहारणं अट्ठपयरूवणया ?, २ तिपएसिए आनुपुव्वी चउप्पएसिए आनुपुव्वी जाव दसपएसिए आनुपुव्वी संखेज्जपएसिए आनुपुव्वी असंखिज्जपएसिए आनुपुव्वी अनंतपएसिए आनुपुव्वी, परमाणुपोग्गले अनानुपुव्वी, दुपएसिए अवत्तव्वए, तिपएसिआ आनुपुव्वीओ जाव अनंतपएसिसाओ आनुपुव्वीओ, परमाणुपोग्गला अनानु-*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*पुव्वीओ, दुपएसिआइं अवत्तव्ययाइं, से तं नेमववहारणं अट्ठपयपरूवणया,*

**वृ.** अथ कैयं नैगमव्यवहारयोः सम्मता अर्थपदप्ररूपणतेति, अत्रोत्तरमाह-'नेगमववहारण'मित्यादि, तत्र त्रयः प्रदेशाः-परमाणुत्रयलक्षणा यत्र स्कन्धे सा आनुपूर्वीत्युच्यते, एवं यावदनन्ता अणवो यत्र सोऽनन्ताणुकः सोऽप्यानुपूर्वीत्युच्यते, 'परमाणुपोग्गले'त्ति एकः परमाणुः परमाण्वन्तरासंसक्तोऽनानुपूर्वीत्यभिधीयते, द्वौ प्रदेशौ यत्र स द्विप्रदेशिकः स्कन्धोऽवक्तव्यकमित्याख्यायते, बहवस्त्रिपदेशिकादयः स्कन्धा आनुपूर्व्यो, बहवश्चैकाकिपरमाणवोऽनानुपूर्व्यो, बहूनि च द्वयणुकस्कन्धद्रव्याण्यवक्तव्यकानि आनुपूर्व्यां प्रकान्तायामनानुपूर्व्यवक्तव्यकयोः प्ररूपणमसङ्गतमिति चेत्, न, तत्प्रतिपक्षत्वात्तयोरपि प्ररूपणीयत्वात्, प्रतिपक्षपरिज्ञाने च प्रस्तुतवस्तुनः सुखावसेयत्वादिति भावार्थः।

इहाऽऽनुपूर्वी अनुपरिपाटिरिति पूर्वमुक्तं, सा च यत्रैवादिमध्यान्तलक्षणः सम्पूर्णो गणानुक्रमोऽस्ति तत्रैवोपपद्यते, नान्यत्र, एतच्च त्रिपदेशिकादिस्कन्धेष्वेव, तथाहि-यस्मात् परमस्ति न पूर्वं स आदिः, यस्मात पूर्वमस्ति न परं सोऽन्तः तयोश्चान्तरं मध्यमुच्यते, अयं च संपूर्णो गणनानुक्रमस्त्रिप्रदेशादिस्कन्ध एव, न परमाणौ तस्यैकद्रव्यत्वेनादिमध्यान्तव्यवहाराभावाद्, अत एवायमनानुपूर्वीत्वेनोक्तो, नापि द्वयणुकस्कन्धः, तत्रापि मध्याभावेन सम्पूर्णगणनानुक्रमाभावाद्, अत्राऽऽह-ननु पूर्वस्यानु पश्चादनुपूर्वं तस्य भाव आनुपूर्वीति पूर्वं व्याख्यातम्, एतच्च द्वयणुकस्कन्धेऽपि घटत एव, परमाणुद्वयस्यापि परस्परापेक्षया पूर्वपश्चाद्भावस्य विद्यमानत्वात्, ततः सम्पूर्णगणनानुक्रमाभावेऽपि कस्मादयमप्यानुपूर्वी न भवति?, नैतदेवं, यतो यथा मेर्वादिके कचित् पदार्थे मध्येऽवधौ व्यवस्थापिते लोके पूर्वादिविभागः प्रसिद्धस्तथा यद्यत्रापि स्यात्तदा स्यादप्येवं, न चैवमत्रास्ति, मध्येऽवधिभूतस्य कस्यचिदभावतोऽसाङ्कर्येण पूर्वपश्चाद्भावस्यासिद्धत्वात्, यद्येवं परमाणुवद् द्वयणुस्कन्धोऽप्यनानुपूर्वीत्वेन कस्मान्नोच्यते?, सत्यं, किन्तु परस्परापेक्षया पूर्वपश्चाद्भावमात्रस्य सद्भावादेवमप्यभिधातुमशक्योऽसौ तस्मादानुपूर्व्यनानुपूर्वीप्रकाराभ्यां वक्तुशक्यत्वादवक्तव्यकमेव द्वयणुस्कन्धः, तस्माद्व्यवस्थितमिदम्-आदिमध्यान्तभावेनावधिभूतं मध्यवर्तिनमपेक्ष्यासाङ्कर्येण मुख्यस्य पूर्वपश्चाद्भावस्य सद्भावत्, त्रिप्रदेशादिस्कन्ध एवाऽऽनुपूर्वी, परमाणुस्तूक्तयुक्त्याऽनानुपूर्वी, द्वयणुकोऽवक्तव्यकः, इत्येवं संज्ञासंज्ञिसम्बन्धकथनस्य सिद्धत्वात्, सत्यं, किन्त्वानुपूर्व्यादिद्रव्याणां प्रतिभेदमनन्तव्यक्तिख्यापनार्थो नैगमव्यवहारयोरित्थंभूताभ्युपगमप्रदर्शनार्थश्च बहुत्वनिर्देश इत्यदोषः।

अत्राऽऽह-नन्वनानुपूर्वीद्रव्यमेकेन परमाणुना निष्पद्यते, अवक्तकद्रव्यं परमाणुद्वयेन, आनुपूर्वीद्रव्यं तु जघन्यतोऽपि परमाणुत्रयेणेति, इत्थं द्रव्यवृद्ध्या पूर्वानुपूर्वीक्रममाश्रित्य प्रथममनानुपूर्वी ततोऽवक्तव्यकं ततश्चाऽऽनुपूर्वीत्येयं निर्देशो, युज्यते, पश्चानुपूर्वीक्रमाश्रयेण तु व्यत्ययने युक्तः, तत् कथं क्रमद्वयमुल्लंध्यान्यथा निर्देशः कृतः?, सत्यमेतत्, किन्त्वनानुपूर्व्यपि व्याख्याङ्गमिति ख्यापनार्थः, यदि वा त्र्यणुकचतुरणुकादीन्यानुपूर्वीद्रव्याण्यनानुपर्व्यवक्तव्यकद्रव्येभ्यो बहूनि तेभ्योऽनानुपूर्वीद्रव्याण्यल्पानि तेभ्योऽप्यवक्तव्यकद्रव्याण्यल्पतराणीत्यत्रैव वक्ष्यते, द्रव्यहान्या पूर्वानुपूर्वीक्रमनिर्देश एवायमित्यलं विस्तरेण। 'से त'मित्यादि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निगमनम्।

*मू. (८५) एआए नं नेगमववहारणं अट्ठपयपरूवणयाए किं पओअणं ?, एआए णं नेगमववहाराणं अट्ठपयपरूवणाए भंगसमुक्कित्तणया कज्जइ।*

**वृ.** 'एआए न'मित्यादि, 'एतया' अर्थपदप्ररूपणतया किं प्रयोजनमिति, अत्राऽऽह- 'एतया' अर्थपदप्ररूपणतया भङ्गसमृत्कीर्तना क्रियते, इदमुक्तं भवति-अर्थपदप्ररूपणतायां संज्ञासंज्ञि-व्यवहारो निरूपितस्तस्मिंश्च सति एवं भङ्गकाः समुत्कीर्तयितुं शक्यन्ते, नान्यथा, संज्ञामन्तरेण निर्विषयाणां भङ्गानां प्ररूयितुमशक्यत्वात्, तस्माद् युक्तमुक्तम् एतया-अर्थपदप्ररूपणया भङ्गसमुत्कीर्तना क्रियत इति।

तामेव भङ्गसमुत्कीर्तना निरूपयितुमाह-

*मू. (८६) से किं तं नेगमववहारणं भंगसमुक्कित्तनया ?, २ अत्थि आनुपुव्वी १ अत्थि अनानुपुव्वी २ अत्थि अवत्तव्वए ३ अत्थि आनुपुव्वीओ ४ अत्थि अनानुपुव्वीओ ५ अत्थि अवत्तव्वयाइं ६।*

*अहवा अत्थि आनुपुव्वी अ आनानुपुव्वी अ १ अहवा अत्थि आनुपुव्वी अ अनानुपुव्वीओ अ २ अहवा अत्थि आनुपुव्वीओ अ अनानुपुव्वी अ ३ अहवा अत्थि आनुपुव्वीओ अ अनानुपुव्वीओ अ ४ अहवा अत्थि आनुपुव्वी अ अवत्तव्वए अ ५ अहवा अत्थि आनुपुव्वी अ अवत्तव्वयाइं च ६ अहवा अत्थि आनुपुव्वीओ अ अवत्तव्वए अ ७ अहवा अत्थि आनुपुव्वीओ अ अवत्तव्वयाइं च ८ अहवा अत्थि अनानुपुव्वी अ अवत्तव्वए अ ९ अहवा अनानुपुव्वी अ अवत्तव्वयाइं च १० अहवा अत्थि अनानुपुव्वीओ अ अवत्तव्वयाइं च १२ अहवा अत्थि आनुपुव्वी अ अनानुपुव्वी अ अवत्तव्वए अ १ अहवा अत्थि आनुपुव्वी अ अनानुपुव्वी अ अवत्तव्वयाइं च २ अहवा अत्थि आनुपुव्वी अ अनानुपुव्वीओ अ अवत्तव्वयाइं च ४ अहवा अत्थि आनुपुव्वीओ अ अनानुपुव्वी अ अवत्तव्वए अ ५ अहवा अत्थि आनुपुव्वीओ अ अनानुपुव्वी अ अवत्तव्वयाइं च ६ अवहा अत्थि आनुपुव्वीओ अ अनानुपुव्वीओ अ अवत्तव्वए अ ७ अहवा अत्थि आनुपुव्वीओ अ अनानुपुव्वीओ अ अवत्तव्वयाइं च ८*

*एए अट्ठ भंगा। एवं सव्वेऽवि छव्वीसं भंगा। से तं नेगमववहारणं भंगसमुक्कित्तणया।*

**वृ.** 'से'इत्यादि प्रश्ने, अत्र चानुपूर्व्यादिपदत्रयेणैकवचनान्तेन त्रयो भङ्गा भवन्ति, बहुव-चनान्तेनापि तेन त्रय् एव भङ्गाः, एवमेतेऽसंयोगतः प्रत्येकं षड् भवन्ति, संयोगपक्षे तु पदत्रय-स्यास्य त्रयो द्विकसंयोगाः, एकेकस्मिंस्तु द्विकसंयोगे एकवचनबहुवचनाभ्यां चतुर्भङ्गी-सद्भावतः त्रिष्वपि द्विकयोगेषु द्वादशः भङ्गाः संपद्यन्ते, त्रिकयोगस्त्वत्रैक एव, तत्र च एकवचन-बहुवचनाभ्यामष्टौ भङ्गाः सर्वेऽप्यमी षड्विंशतिः।

सर्वेऽपि षड्विंशतिरेव, एते चोत्तरं प्रयच्छता अनेनैव क्रमेण सूत्रेऽपि लिखिताः सन्तीति भावनीयाः। अथ किमर्थं भङ्गकसमुत्कीर्तनं क्रियत इति चेद्, उच्यते, इहानुपूर्व्यादिभिस्त्रिभिः पदैरेकवचनान्तबहुवचनान्तैः प्रत्येकचिन्तया संयोगचिन्तया च षड्विंशतिर्भङ्गाः संजायन्ते, तेषु च मध्ये येन केनचिद्भङ्गेन वक्ता द्रव्यं वक्तुमिच्छति तेन प्रतिपादयितुं सर्वानपि प्रतिपादन-प्रकारानेनकरूपत्वान्नैगमव्यवहारनयाविच्छत इति प्रदर्शनार्थं भङ्गकसमुत्कीर्तनमिति। 'से

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त'मित्यादि निगमनम्।

उक्ता भङ्गसमुत्कीर्तनता, अथ भङ्गोपदर्शनतां प्रतिपिपादयिषुराह-

*मू. ( ८७ ) एआए णं नेगमववहारणं भंगसमुक्कित्तणयाए किं पओअणं ?, एआए णं नेगम-ववहारणं भंगसमुक्कित्तणयाए भंगोवदंसणया कीरइ।*

**वृ.** 'एतया' भङ्गसमुत्कीर्तनतया किं प्रयोजनमिति, अत्रोत्तरमाह-'एआए ण'मित्यादि, 'एतया' भङ्गसमुत्कीर्तनतया भङ्गोपदर्शनता क्रियते, इदमुक्तं भवति-भङ्गसमुत्कीर्तनतायां भङ्गकसूत्रमुक्तं, भङ्गोपदर्शनतायां तस्यैव वाच्यं त्र्यणुकस्कन्धादिकं कथयिष्यते, तच्च सूत्रे समुत्कीर्तित एव कथयितुं शक्यते, वाचकमन्तरेण वाच्यस्य कथयितुमशक्यत्वाद्, अतो युक्तं भङ्गसमुत्कीर्तनतायां भङ्गोप्रदर्शनताप्रयोजनम्। अत्राऽऽह-ननु भङ्गोपदर्शनतायां वाच्यस्य त्र्यणुकस्कन्धादेः कथनकाले आनुपूर्व्यादिसूत्रं पुनरप्यत्कीर्तयिष्यति, तत् किं भङ्गसमुत्कीर्त-नतया प्रयोजनमिति, सत्यं, किन्तु भङ्गसमुत्कीर्तनतासिद्धस्यैव सूत्रस्य भङ्गोपदर्शनतायां वाच्यावाचकभावसुखप्रतिपत्त्यर्थं प्रसङ्गतः पुनरपि समुत्कीर्तनं करिष्यते, न मुख्यतयेत्यदोषः, यथा हि 'संहिता च पदं चैवे'त्यादिव्याख्याक्रमे सूत्रं संहिताकाले समुच्चारितमपि पदार्थ-कथनकाले पुनरप्यर्थकथनार्थमुच्चार्यते तद्वदत्रापीति भावः।

अथ केयं पुनर्भङ्गोपदर्शनतेति प्रश्नपूर्वकं तामेव निरूपयितुमाह-

*मू. ( ८८ ) से किं तं नेगमववहारणं भंगोवदंसणया ?, १ तिपएसिए आनुपुव्वी १ परमाणु-पोग्गले अनानुपुव्वी २ दुपएसिए अवत्तव्वए ३ अहवा तिपएसिया आनुव्युवीओ परमाणु-पोग्गला अनानुपुव्वीओ दुपएसिया अवत्तव्वयाइं ३, अहवा तिपएसिए अ परमाणुपोग्गले अ आनुपुव्वी अ अनानुपुव्वी अ ४ चउभंगो, अहवा तिपएसिए य दुपएसिए अ आनुवव्वी अ अवत्तव्वयए य चउभंगो, अहवा परमाणुपोग्गले अ दुपएसिए य अनानुपुव्वी य अवत्तव्वए य चउभंगो १२*

*अहवा तिपएसिए अ परमाणुपोग्गले अ दुपएसिए अ अनानुपुव्वी अ आनुपुव्वी अ अवत्तव्वए अ १ अहवा तिपएसिए अ परमाणुपोग्गले अ दुपएसिया य आनुपुव्वी अ अनानुपुव्वी अ अवत्तव्वयाइं च २ अहवा तिपएसिए अ परमाणुपोग्गला अ दुपएसिए अ आनुपुव्वी अ अनानुपुव्वीओ अ अवत्तव्वए अ ३ अहवा तिपएसिए अ परमाणुपोग्गला य दुपएसिया अ आनुपुव्वी अ अनानुपुव्वी अ अवत्तव्वयाइं च ४ अहवा तिपएसिए य परमाणुपोग्गले अ दुप-एसिए अ आनुपुव्वीओ अ अनानुपुव्वी अ अवत्तव्वए अ ५ अहवा तिपएसिआ य परमाणुपोग्गले अ दुपएसिआ य आनुपुव्वीओ अ अनानुपुव्वी अ अवत्तव्वयाइं च ६ अहवा तिपएसिआ य परमाणुपोग्गला य दुपएसिआ य आनुपुव्वी अ अनानुपुव्वी अ अवत्तव्वयाइं च ८*

*से तं नेगमववहारणं भंगोवदंसणया।*

**वृ.** 'तिपएसिए आनुपुव्वी'त्ति त्रिप्रदेशिकोऽर्थः आनुपूर्वीत्युच्यते, त्रिप्रदेशिकस्कन्ध-लक्षणेनार्थेनानुपूर्वीति भङ्गको निष्पद्यत इत्यर्थः, एवं परमाणुपुद्गललक्षणोऽर्थोनानुपूर्वीत्यु-च्यते, द्विप्रदेशिकस्कन्धलक्षणः अर्थोऽवक्तव्यकमुच्यते, एवं बहवस्त्रिप्रदेशिका आनुपूर्व्यः बहवः परमाणुपुद्गला अनानुपूर्व्यो बहवो द्विपदेशिकस्कन्धा अवक्तव्यकानिति षण्णां प्रत्येक-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भङ्गानामर्थकथनम्।

एवं द्विकसंयोगेऽपि त्रिपदेशिकस्कन्धः परमाणुपुद्गलश्चानुपूर्व्यनानुपूर्वीत्वेनोच्यते, यदा त्रिपदेशिकस्कन्धः परमाणुपुद्गलश्च प्रतिपादायितुमभीष्टो भवति तदा 'अत्थि आनुपुव्वी अ अनानुपुव्वी अ' इत्येवं भङ्गो निष्पद्यत इत्यर्थः, एवमर्थकथनपुरस्सराः शेषभङ्गा अपि भावनियाः। अत्राह-नन्वर्थोऽप्यानुपूर्व्यादिपदानां त्र्यणुकस्कन्धादिकोऽर्थपदप्ररूपणतालक्षणे प्रथमद्वारे कथित एव तत्किमनेन ?, सत्यं, किन्तु तत्र पदार्थमात्रमुक्तम्, अत्र तु तेषामेवाऽऽनुपूर्व्यादिपदानां भङ्ककरचनासमादिष्टानामर्थः कथ्यत इत्यदोषो, नयमतवैचित्र्यप्रदर्शनार्थं वा पुनरित्थमर्थोपदर्शनमित्यलं विस्तरेण। 'से त'मित्यादि निगमनम्।

उक्ता भङ्गोपदर्शनता, अथ समवतारं बिभणिषुराह-

*मू. ( ८९ ) से किं तं समोआरे ?, २ नेगमववहाराणं आनुपुव्वीदव्वाइं कहिं समोअरंति ?, किं आनुपुव्वीदव्वेहिं समोअरंति ? आनुपुव्वीदव्वेहिं समोअरंति ? अवत्तव्वयदव्वेहिं समोअरंति ?, नेगमववहाराणं आनुपुव्वीदव्वाइं आनुपुव्वीदव्वेहिं समोअरंति नो अनानुपुव्वीदव्वेहिं समोअरंति नो अवत्तव्वदव्वेहिं समोअरंति,*

*नेगमववहाराणं आनुपुव्वीदव्वाइं कहिं समोअरंति ?, किं आनुपुव्वीदव्वेहिं समोअरंति ? अनानुपुव्वीदव्वेहिं समोअरंति ? अवत्तव्वयदव्वेहिं समोअरंति ?, नो अनानुपुव्वीदव्वेहिं समोअरंति अनानुपुव्वीदव्वेहिं समोअरंति नो अवत्तव्वदव्वेहिं समोअरंति,*

*नेगमववहाराणं अवत्तव्वयदव्वाइं कहिं समोअरंति ?, किं आनुपुव्वीदव्वेहिं समोअरंति ? अनानुपुव्वीदव्वेहिं समोअरंति ? अवत्तव्वयदव्वेहिं समोअरंति ?, नो अनानुपुव्वीदव्वेहिं समोअरंति नो अनानुपुव्वीदव्वेहिं समोअरंति नो अवत्तव्वदव्वेहिं समोअरंति। से तं समोआरे।*

**वृ.** अत्र कोऽयं समवतार इति प्रश्ने सत्याह-'समोआरे'त्ति, अयं समवतार उच्यत इति शेषः, कः पुनरयमित्याह-'नेगमववहाराणं आनुपुव्वीदव्वाइं कहिं समोयरंती'त्यादिप्रश्नः, अत्रोत्तरम्-'नेगमववहारणं आनुपुव्वी' इत्यादि, आनुपूर्वीद्रव्याणि आनुपूर्वीद्रव्यलक्षणायां स्वजातावेव वर्तन्ते, न स्वजात्यतिक्रमेणेत्यर्थः, इदमुक्तं भवति-सम्यग्-अविरोधेनावतरणंवर्तनं समवतारः-अविरोधवृत्तिना प्रोच्यते, सा च स्वजातिवृत्तावेव स्यात्, परजातिवृत्तेर्विरुद्धत्वात्, ततो नानादेशादिवृत्तीन्यपि सर्वाण्यानुपूर्वीद्रव्याणि आनुपूर्वीद्रव्येष्वेव वर्तन्ते इति स्थितम्। एवमनानुपूर्व्यादीनामपि स्वस्थानावतारो भावनीयः। 'से त'मित्यादि निगमनम्।

उक्तः समवतारः, अथानुगमं बिभणिषुरुपक्रमते-

*मू. ( ९० ) से किं अनुगमे ?, २ नवविहे पन्नत्ते, तंजहा-*

**वृ.** अत्रोत्तरम्-'अनुगमे नवविहे'इत्यादि, तत्र सूत्रार्थस्यानुकूलमनुरूपं वा गमनं-व्याख्यानमनुगमः, अथवा सूत्रपठनादनु-पश्चाद्गमनं-व्याख्यानमनुगमः, यदिवा अनुसूत्रमर्थो गम्यते-ज्ञायते अनेनेत्यनुगमोव्याख्यानमेवेत्याद्यन्यदपि वस्त्वविरोधेन स्वधिया वाच्यमिति। स च नवविधो-नवप्रकारो भवति, तदेव नवविधत्वं दर्शयति-'तद्यथे'त्युपदर्शनार्थः, 'संतपय' गाहा,

*मू. ( ९१ ) संतपयपरूवणया १ दव्वपमाणं च २ खित्त ३ फुसणा ४।*
*कालो य ५ अंतरं ६ भाग ७ भाव ८ अप्पाबहुं चेव॥*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ.सदर्थविषयं पदं सत्पदं तस्य प्ररूपणं-प्रज्ञापनं सत्पदप्ररूपणं तस्य भावः सत्पदप्ररूपणता सा प्रथमं कर्तव्या, इदमुक्तं भवति–इह स्तम्भकुम्भादीनि पदानि सदर्थविषयाणि दृश्यन्ते, खरशृङ्गव्योमकुसुमादीनि त्वसदर्थविषयाणि, तत्राऽऽनुपूर्व्यादिपदानि किं स्तम्भादिपदानीव सदर्थविपयाण्याहोश्चित्(स्वित)खरविषाणादिपदवत् असदर्थगोचराणीत्येतत् प्रथमं पर्यालोचयित्यं, तथा आनुपूर्व्यादिपदाभिधेयद्रव्याणां प्रमाणं-सङ्ख्यास्वरूपं प्ररूपणीयं, चः समुच्चये, एवमन्यत्रापि, तथा तेपामेव क्षेत्रं–तदाधारस्वरूपं प्ररूपणीयं, कियति क्षेत्रे तानि भवन्तीति चिन्तनीयमित्यर्थः, तथा स्पर्शना च वक्तव्या, कियत् क्षेत्रं तानि स्पृशन्तीति चिन्तनीयतमित्यर्थः, तथा कालश्च तत्स्थितिलक्षणो वक्तव्यः, तथा अन्तरं–विवक्षितस्वभावपरित्यागे सति पुनस्तद्भावप्राप्तिविरहलक्षणं प्ररूपणीयं, तथा आनुपूर्वीद्रव्याणि शेपद्रव्याणा कतिभागे वर्तन्ते इत्यादिलक्षणो भागः प्ररूपणीयः, तथा आनुपूर्व्यादिद्रव्याणि कस्मिन् भावे वर्तन्ते इत्येवंरूपो भावः प्ररूपणीयः, तथा अल्पबहुत्वं चानुपूर्व्यादिद्रव्याणां द्रव्यार्थप्रदेशार्थउभयार्थताश्रयणेन परस्परं स्तोकबहुत्वचिन्तालक्षणं प्ररूपणीयम्, एवकारोऽवधारणे, एतावत्प्रकार एवानुगम इति गाथासमासार्थः ।

व्यासार्थं तु ग्रन्थकारः स्वयमेव बिभणिषुराद्यावयवमधिकृत्याऽऽह–

*मू.(९२) नेगमववहाराणं आनुपुव्वीदव्वाइं किं अत्थि नत्थि ?, नियमा अत्थि, नेगमववहाराणं अनानुपुव्वीदव्वाइं किं अत्थि नत्थि ?, नियमा अत्थि नेगमववहाराणं अवत्तव्वगदव्वाइं किं अत्थि नत्थि ?, नियमा अत्थि।*

वृ. नैगमव्यवहारयोरानुपूर्वीशब्दभिधेयानि द्रव्याणि त्र्यणुकस्कन्धादीनि किं सन्ति नेति प्रश्नः, अत्रोत्तरम्-'नियमा अत्थि' इति, एतदुक्तं भवति–नेदं खरशृङ्गादिवदानुपूर्वीपदमसदर्थगोचरम्, अतो नियमात् सन्ति तदभिधेयानि द्रव्याणि, तानि च त्र्यणुकस्कन्धादीनि पूर्वं दर्शितान्येव, एवमनानुपूर्व्यवक्तव्यकपक्षद्वयेऽपि वाच्यम् ।

कृता सत्पदप्ररूपणा, अथ द्रव्यप्रमाणमभिधित्सुराह–

*मू.(९३) नेगमववहाराणं आनुपुव्वीदव्वाइं किं संखिज्जाइं असंखिज्जाइं अनंताइं ?, नो संखिज्जाइं नो असंखिज्जाइं अनंताइं, एवं अनानुपुव्वीदव्वाइं अवत्तव्वगदव्वाइं च अनंताइं भाणिअव्वाइं।*

वृ. 'नेगमववहाराणं आनुपुव्वीदव्वाइं किं संखेज्ञाइ'मित्यादि, अयमत्र निर्वचनभावार्थः-इहानुपूर्व्यनानुपूर्व्यवक्तव्यकद्रव्याणि प्रत्येकमनन्तान्येकैकस्मिन्नप्याकाशप्रदेशे प्राप्यन्ते, किं पुनः सर्वलोके, अतः सङ्ख्येयासङ्ख्येयप्रकारद्वयनिषेधेन त्रिष्वपि स्थानेष्वानन्त्यमेव वाच्यमिति। न च वक्तव्यं कथमसङ्ख्येये लोके अनन्तानि द्रव्याणि तिष्ठन्ति ?, अचिन्त्यत्वात् पुद्गलपरिणामस्य, दृश्यते चैकगृहान्तर्वर्त्याकाशप्रदेशेष्वेकप्रदीपप्रभापरमाणुव्याप्तेष्वप्यनेकापरप्रदीपप्रभापरमाणूनां तत्रैवावस्थानं, त चाक्षिदृष्टेऽप्यर्थेऽनुपपत्तिः, अतिप्रसङ्गात्, इत्यलं प्रपञ्चेन।

इदानीं क्षेत्रद्वारमुच्यते –

*मू.(९४) नेगमववहाराणं आनुनुव्वीदव्वाइं लोगस्स किं संखिज्जइभागे होज्जा असंखिज्जइभागे होज्जा संखेज्जेसु भागेसु होज्जा असंखेज्जेसु भागेसु होज्जा सव्वलोए*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*होज्जा ?, एगं दव्वं पडुच्च संखेज्जइभागे वा होज्जा असंखेज्जइभागे वा होज्जा संखेज्जेसु भागेसु वा होज्जा असंखिज्जेसु भागेसु वा होज्जा सव्वलोए वा होज्जा, नानादव्वाइं पडुच्च नियमा सव्वलोए होज्जा।*

*नेगमववहाराणं अनानुपुव्वीदव्वाइं किं लोअस्स संखिज्जइभागे होज्जा जाव सव्वलोए वा होज्जा ?, एगं दव्वं पडुच्च नो संखेज्जइभागे होज्जा असंखिज्जइभागे होज्जा नो संखेज्जेसु भागेसु होज्जा नो असंखेज्जेसु भागेसु होज्जा नो सव्वलोए होज्जा, नानादव्वाइं पडुच्च नियमा सव्वलोए होज्जा, एवं अवत्तव्वगदव्वाइं भाणिअव्वाइं।*

**वृ.** आनुपूर्वीद्रव्याणि किं लोकस्यैकस्मिन् सङ्ख्याततमे भागे 'होज्ज'त्ति आर्षत्वाद्भवन्ति अवगाहन्त इतियावत्, यदिवा एकस्मिन्नसङ्ख्याततमे भागे भवन्ति, उत बहुषु सङ्ख्येयेषु भागेषु भवन्ति, आहोश्विद्बहुष्वसङ्ख्येयेषु भागेषु भवन्त्यथ च सर्वलोके भवन्तीति पञ्च पृच्छास्थानानि, अत्र निर्वचनसूत्रस्येयं भावना-इहानुपुर्वीद्रव्याणि त्र्यणुकस्कन्धादीन्यनन्ताणुकस्कन्ध-पर्यवसानान्युक्तानि, तत्र च सामान्यत एकं द्रव्यमाश्रित्य तथाविधपरिणामवैचित्र्यात् किञ्चि-ल्लोकस्यैकस्मिन् सङ्ख्याततमे भागे भवति, एकं तत्सङ्ख्यातभागमवगाह्य तिष्ठतीत्यर्थः, अन्यत्तु तदसंख्येयभागमवगाहते, अपरं तु बहूँस्तत्संख्येयान् भागानवगाह्य वर्तते, अन्यच्च बहूँस्तद-संख्येयभागानवगाह्य तिष्ठतीति, 'सव्वलोए वा होज्ज'त्ति इहानन्तानन्तपरमाणुप्रचयनिष्पन्नं प्रज्ञापनादिप्रसिद्धाचित्तमहास्कन्धलक्षणमानुपूर्वीद्रव्यं समयमेकं सकललोकावगाहि प्रतिपत्तव्यमिति।

कथं पुनरयमचित्तमहास्कन्धः सकललोकावगाही स्याद्?, उच्यते, समुद्घातवर्तिकेव-लिवत्, तथाहि-लोकमध्यव्यवस्थितोऽसौ प्रथमसमये तिर्यगसंख्यातयोजनविस्तरं संख्यात-योजनविस्तरं वा ऊर्ध्वाधस्तु चतुर्दशरज्ज्वायतं विश्रसापरिणामेन वृत्तं दण्डं करोति, द्वितीये कपाटं, तृतीये मन्थानं, चतुर्थे लोकव्याप्तिं प्रतिपद्यते, पञ्चमे अन्तराणि संहरति, षष्ठे सप्तमे कपाटमष्टमे तु दण्डं संहृत्य खण्डशो भिद्यत इत्येके, अन्ये त्वन्यथापि व्याचक्षते, तत्तु विशेषा-वश्यकादवसेयमिति। वाशब्दः समुच्चये, एवं यथासम्भवमन्यत्रापि। 'नानादव्वाइं पडुच्चे'-त्यादि, नानाद्रव्याण्यानुपूर्ववीपरिणामवन्ति प्रतीत्य प्रकृत्य वा अधिकृत्येत्यर्थः 'नियमात्' नियमेन सर्वलोके भवन्ति, न संख्येयादिभागेषु, यतः सर्वलोकाकाशस्य स प्रदेशोऽपि नास्ति यत्र सूक्ष्मपरिणामवन्त्यनन्तान्यानुपूर्वीद्रव्याणि न सन्तीति।

अनानुपूर्व्यवक्तव्यकद्रव्येषु तावत् परमाणुरुच्यते स चैकाकाशप्रदेशावगाढ एव भवति, अव्यक्तव्यकं तु द्व्यणुकस्कन्धः स चैकप्रदेशावगाढो द्विपदेशावगाढो वा स्यादिति यथोक्तभाग-वृत्तितैवेति, नानाद्रव्यभावना पूर्ववद्, इत्युक्तं क्षेत्रद्वारम्।

साम्प्रतं स्पर्शनाद्वारमुच्यते-

***मू. (१५)*** *नेगमववहाराणं आनुपुव्वीदव्वाइं लोगस्स किं संखेज्जइभागं फुसंति असंखेज्जइभागं फुसंति संखेज्जे भागे फुसंति असंखेज्जे भागे फुसंति सव्वलोगं फुसं ?, एगं दव्वं पडुच्च लोगस्स संखेज्जइभागं वा फुसंति जाव सव्वलोगं वा फुसंति, नानादव्वाइं पडुच्च निअमा सव्वलोगं फुसंति।*

Jain Education International    For Private & Personal Use Only    www.jainelibrary.org

*नेगमववहाराणं आनुपुव्वीदव्वाइं लोअस्स किं संखेज्जइभागं फुसंति जाव सव्वलोगं फुसंति ?, एगं दव्वं पडुच्च संखिज्जइभागं फुसंति असंखिज्जइभागं फुसंति नो संखिज्जे भागे फुसंति नो असंखिज्जे भागे फुसंति, नानादव्वाइं पडुच्च नियमा सव्वलोअं फुसंति, एवं अवत्तव्वगदव्वाइं भाणिअव्वाइं,*

**वृ.** भावना क्षेत्रद्वारवदेव कर्तव्या, नवरं क्षेत्रस्पर्शनयोरयं विशेषः-क्षेत्रम्-अवगाहाक्रान्तप्रदेशमात्रं, स्पर्शना तु षड्दिक्कैः प्रदेशैस्तद्बहिरपि भवति, तथा च परमाणुद्रव्यमाश्रित्य तावदगाहनास्पर्शनयोरन्यत्रोक्तो भेदः-'एगपएसोगाढं सत्तपएसा य से फसुण'त्ति, अस्यार्थः-परमाणुद्रव्यमवगाढं तावदेकस्मिन्नेवाकाशप्रदेशे, स्पर्शना तु 'से'तस्य सप्त प्रदेशा भवन्ति, षड्दिग्व्यवस्थितान् षट् प्रदेशान् यत्र चावगाहस्तं स्पृशतीत्यर्थः, एवमन्यत्रापि क्षेत्रस्पर्शनयोर्भेदो भावनीयः।

अत्र सौगताः प्रेरयन्ति-यदि-परमाणोः षड्दिक्स्पर्शनाऽभ्युपगम्यते तर्ह्येकत्वमस्य हीयते, तथाहि-प्रष्टव्यमत्र, किं येनैवे स्परूपेणासौ पूर्वाद्यन्यतरदिशा सम्बद्धस्तेनैवान्यदिग्भिरुत स्वरूपान्तरेण ?, यदि तेनैव तदा अयं पूर्वदिकसम्बन्धोऽयं चापरदिक्सम्बन्ध इत्यादिविभागो न स्याद्, एकस्वरूपत्वात्, विभागभावे च षड्दिक्सम्बन्धवचनमुपप्लवत एव, अथापरो विकल्पः, कल्प्यते तर्हि तस्य षट्स्वरूपापत्त्वा एकत्वं विशीर्यते, उक्तं च-"दिग्भागभेदो यस्यास्ति, तस्यैकत्वं न युज्यत" इति, अत्र प्रतिविधीयते, इह परमाणुद्रव्यमादिमध्यान्त्यादिविभागरहितं निरंशमेकस्वरूपमिष्यते, अतः सांशवस्तुसम्भवित्वात् परोक्तं विकल्पद्वयं निरास्पदमेव, अथानभ्युपगम्यमानाऽपि परमाणोः सांशताऽनन्तरोक्तविकल्पबलेनापाद्यते, ननु भवन्तोऽपि तर्हि प्रष्टव्याः-कचिद् विज्ञानसन्ताने विवक्षितः कश्चिद्विज्ञानलक्षणक्षणः स्वजनकपूर्वक्षणस्य कार्यं स्वजन्योत्तरक्षणस्य कारणमित्यत्र सौगतानां तावदविप्रतिपत्तिः,

तत्रेहापि(तत्रापि) विचार्यते-किमसौ येन स्वरूपेण पूर्वक्षणस्य कार्य तेनैवोत्तरक्षणस्य कारणभुत स्वरूपन्तरेण ?, यद्याद्यः पक्षस्तर्हि यथा पूर्वापेक्षयाऽसौ कार्य तथोत्तरापेक्षयापि स्याद्, यथा वा उत्तरापेक्षया कारणं तथा पूर्वापेक्षयाऽपि स्याद्, एकस्वरूपत्वात्, तस्येति, अथ द्वितीयः पक्षस्तर्हि तस्य सांशत्वप्रसङ्गोऽत्रापि दुर्वारः स्याद्, अथ निरंश एवासौ ज्ञानलक्षणक्षणोऽकार्याकारणरूपः तत्तद्वस्तुव्यापृतत्वात् तथा तथा व्यपदिश्यते, न पुनस्तस्यानेकस्वरूपत्वमस्ति, नन्वस्माकमपि नेदमुत्तरमतिदुर्लभं स्यात्, यतो द्रव्यतया निरंश एव परमाणुस्तथाविधाचिन्त्यपरिणामत्वात्, दिक्ष्ट्केन सह नैरन्तर्येणावस्थितवात् तस्य स्पर्शक उच्यते, न पुनस्तत्रांशैः काचित् समस्तीनि, अत्र बहु वक्तव्यं तत्तु नोच्यते, स्थानान्तरेषु चर्चितत्वादित्यलं विस्तरेण।

उक्तं स्पर्शनाद्वारम्, इदानीं कालद्वारं बिभाणिषुराह-

***मू.* ( ९६** *नेगमववहाराणं आनुपुव्वीदव्वाइं कालओ केवच्चिरं होइ ?, एगं दव्वं पडुच्च जहन्नेणं एगं समयं उक्कोसेणं असंखेज्ज कालं, नानादव्वाइं पडुच्च नियमा सव्वद्धा, अनानुपुव्वीदव्वाइं अवत्तव्वगदव्वाइं च एवं चेव भाणिअव्वाइं।*

**वृ.** नैगमव्यवहारयोरानुपूर्वीद्रव्याणि 'कालतः' कालमाश्रित्य 'कियच्चिरं' कियन्तं कालं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'भवन्ति' आनुपूर्वीत्वपर्यायेणावतिष्ठन्ते ?, अत्रोत्तरम्-'एगं दव्व'मित्यादि, इयमत्र भावना-परमाणुद्वयादेरपरैकादिपरमाणुमीलनेऽपूर्वं किञ्चिदानुपूर्वीद्रव्यं समुत्पन्नं, ततः समयादूर्ध्वं पुनरप्येकाद्यणौ वियुक्तेऽपगतस्तद्भाव इत्येकमानुपूर्वीद्रव्यमधिकृत्य जघन्यतः समयोऽव-स्थितिकालः, यदा तु तदेवासङ्ख्यानं कालं तद्भावेन स्थित्वाऽनन्तरोक्तस्वरूपेण वियुज्यते तदा उत्कृष्टतोसङ्ख्येयोऽवस्थितिकालः, प्राप्यते, अनन्तं कालं पुनर्नाधितिष्ठते, उत्कृष्टाया अपि पुद्गलसंयोगस्थितेरसङ्ख्येयकालत्वादिति।

'नानाद्रव्याणि' बहूनि पुनरानुपूर्वीद्रव्याण्यधिकृत्य सर्वाद्धा स्थितिर्भवति, नास्ति स कश्चित् कालो यत्रानुपूर्वीद्रव्यविरहितोऽयं लोकः स्यादिति भावः अनानुपूर्वीअवक्तव्यकद्रव्येष्वपि जघन्यादिभेदभिन्न एतावानेवावस्थितिकालः, तथाहि-कश्चित् परमाणुरेकं समयमेकाकीभूत्वा ततः परमाण्वादिना अन्येन सह संयुज्यते, इत्थमेकमनानुपूर्वीद्रव्यमधिकृत्य जघन्यतः समयोऽवस्थितिकालः यदा तु स एवाससङ्ख्यातं कालं तद्भावेन स्थित्वा अन्येन परमाण्वादिना सह संयुज्यते तदोत्कृष्टतोऽसङ्ख्येयोऽवस्थितिकालः संप्राप्यते, नानाद्रव्यपक्षस्तु पूर्ववदेव भावनीयः।

अवक्तव्यकद्रव्यमपि परमाणुद्वयलक्षणं यदा समयमेकं संयुक्तं स्थित्वा ततो वियुज्यते तदव-स्थमेव वाऽन्येन परमाण्वादिना संयुज्यते तदा तस्यावक्तव्यकद्रव्यतया जघन्यतः समयोऽव-स्थानं लभ्यते, यदा तु तदेवासङ्ख्यातं कालं तद्भावेन स्थित्वा विघटते तदवस्थमेवो वाऽन्येन परमाण्वादिना संयुज्यते तदोत्कृष्टतः, अवक्तव्यकद्रव्यतथाऽसङ्ख्यातं कालमवस्थानं प्राप्यते, नानाद्रव्यपक्षस्तु तथैव भावनीय इति।

उक्तं कालद्वारम्, अथान्तरद्वारं प्रतिपिपादयिषुराह-

*मू. (१७) नेगमववहाराणं आनुपुव्वीदव्वाणं अंतरं कालओ केवच्चिरं होइ ?, एगं दव्वं पडुच्च जहन्नेणं एगं समयं उक्कोसेणं अनंतं कालं, नाणादव्वाइं पडुच्च नत्थि अंतरं।*

*नेगमववहाराणं अनानुपुव्वीदव्वाणं अंतरं कालओ केवच्चिरं होइ ?, एगं दव्वं पडुच्च जहन्नेणं एगं समयं उक्कोसेणं असंखेज्जं कालं, नानादव्वाइं पडुच्च नत्थि अंतरं।*

*नेगमववहाराणं अवत्तव्वदव्वाणं अंतरं कालओ केवच्चिरं होइ ?, एगं दव्वं पडुच्च जहन्नेणं एगं समयं उक्कोसेणं अनंतं कालं, नानादव्वाइं पडुच्च नत्थि अंतरं।*

**वृ.** नैगमव्यवहारयोरानुपूर्वीद्रव्याणामन्तरं कालतः कियच्चिरं भवतीति प्रश्नः, 'अन्तरं' व्यवधानं, तच्च श्रेत्रतोऽपि भवति यथा भूतलसूर्ययोरष्टौ योजनशतान्यन्तरमित्यस्तद्व्य-वच्छेदार्थमुक्तम्, 'कालतः' कालमाश्रित्य, तदयमत्रार्थः-आनुपूर्वीद्रव्याण्यानुपूर्वीस्वरूपतां परित्यज्य कियता कालेन तान्येव पुनस्तथा भवन्ति, आनुपूर्वीत्वपरित्यागपुनर्लाभयोरन्तरे कियान् कालो भवतीत्यर्थः।

अत्र निर्वचनम्-'एगं दव्व'मित्यादि, इयमत्र भावना-इह विवक्षितं त्र्यणुकस्कन्धादिकं किमप्यानुपूर्वीद्रव्यं विश्रसापरिणामात् प्रयोगपरिणामाद्वा खण्डशो वियुज्य परित्यक्तानुपूर्वीभावं सञ्जातम्, एकस्माच्च समयादूर्ध्वं विश्रसादिपरिणामात् पुनस्तैरेव परमाणुभिस्तथैव तन्नि-ष्पन्नमित्येवं जघन्यतः सर्वस्तोकतया एकं द्रव्यमाश्रित्याऽऽनुपूर्वीत्वपरित्यागपुनर्लाभयोरन्तरे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

समयः प्राप्यते, उत्कृष्टतः सर्वबहुतया पुनरन्तरमनन्तं कालं भवति, तथाहि-तदेव विवक्षितं किमप्यानुपूर्वीद्रव्यं तथैव भिन्नं, भित्त्वा च ते परमाणवोऽन्येषु परमाणुद्व्यणुकत्र्यणुकादिषु अनन्ताणुकस्कन्धपर्यन्तेषु अनन्तस्थानेषूत्कृष्टान्तराधिकारादसकृत् प्रतिस्थानमुत्कृष्टां स्थितिमनुभवन्तः पर्यटन्ति, कृत्वा चेत्थं पर्यटनं कालस्यानन्तत्वाद् विश्रसादिपरिणामतो यदा तैरेव परमाणुभिस्तदेव विवक्षितमानुपूर्वीद्रव्यं निष्पद्यते तदाऽनन्त उत्कृष्टान्तरकालः प्राप्यते, नानाद्रव्याण्यधिकृत्य पुनर्नास्त्यन्तरं, न हि स कश्चित् कालोऽस्ति यत्र सर्वाण्यप्यानुपूर्वीद्रव्याणि युगपदानुपूर्वीभावं परित्यजन्ति, अनन्तानन्तैरानुपूर्वीद्रव्यैः सर्वदैव लोकस्याशून्यत्वादिति भावः।

अनानुपूर्वीद्रव्यान्तरकालचिन्तायां 'एगं दव्वं पडुच्च जहन्नेणं एक्कं समयं'ति, इह यदा किञ्चिदनानुपूर्वीद्रव्यं परमाणुलक्षणमन्वेन परमाणुद्व्यणुकत्र्यणुकादिना केनचिद् द्रव्येण सह संयुज्य समयादूर्ध्वं वियुज्य पुनरपि तथास्वरूपमेव भवति तदा समयलक्षणो जघन्यान्तरकालः प्राप्यते, 'उक्कोसेणं असंखेज्ज कालं'ति तदेवानानुपूर्वीद्रव्यं यदा अन्येन परमाणुद्व्यणुकत्र्यणुकादिना केनचिद् द्रव्येण सह संयुज्यते, तत्संयुक्तं चासङ्ख्येयं कालं स्थित्वा वियुज्य पुनस्तथास्वरूपमेव भवति तदाऽसङ्ख्यात उत्कृष्टान्तरकालो लभ्यते।

अत्राह-ननु अनानुपूर्वीद्रव्यं यदा अनन्तानन्तपरमाणुप्रचितस्कन्धेन सह संयुज्यते, तत्संयुक्तं चासङ्ख्येयं कालमवतिष्ठते,, ततोऽसौ स्कन्धो भिद्यते, भिन्ने च तस्मिन् यस्तस्माल्लघुस्कन्धो भवति तेनापि सह संयुक्तमसङ्ख्यातं कालमवतिष्ठते, पुनस्तस्मिन्नपि भिद्यमाने यस्तस्माल्लघुतरः स्कन्धो भवति तेनापि संयुक्तमसङ्ख्येयं कालमवतिष्ठते, पुनस्तस्मिन्नपि भिद्यमाने यस्तस्माल्लघुतमः स्कन्धो भवति तेनापि संयुक्तमसङ्ख्येयं कालमवतिष्ठते, इत्येवं तत्र भिद्यमाने क्रमेण कदाचिदानन्ता अपि स्कन्धाः संभाव्यन्ते, तत्र च प्रतिस्कन्धसंयुक्तमनानुपूर्वीद्रव्यं यदा यथोक्तां स्थितिमनुभूय तत एकाक्येव भवति तदा तस्य यथोक्तानन्तस्कन्धस्थित्यपेक्षया अनन्तोऽपि कालोऽन्तरे प्राप्यते, किमित्यसङ्ख्येय एवोक्तः ?, अत्रोच्यते, स्यादेवं, हन्त यदि संयुक्तोऽणुरेतावन्तं कालं तिष्ठेद, एतच्च नास्ति पुद्गलसंयोगस्थितेरुत्कृष्टतोऽप्यसङ्ख्येकालत्वादित्युक्तमेव, अथ ब्रूयाद्-यस्मिन्नेव स्कन्धे संयुज्यतेऽसौ परमाणुः स चेत्स्कन्धोऽसङ्ख्येयकालाद्भिद्यते तर्ह्येतावतैव चरितार्थः पुद्गलसंयोगसङ्ख्येयकालनियमो, विवक्षितपरमाणुद्रव्यस्य तु वियोगो मा भूदपीति, नैतदेवं, यस्मान्येन संयोगो जातस्तस्यासङ्ख्येयकालाद् वियोगश्चिन्त्यते, यदि च परमाण्वाश्रयः स्कन्धो वियुज्यते तर्हि परमाणोः किमायातं ?, तस्यान्यसंयोगस्य तदवस्थत्वात्, तस्मादणुत्वेनासौ संयुक्तोऽसङ्ख्येयकालादणुत्वेनैव वियोजनीय इति यथोक्त एवान्तरकालो न त्वनन्त इति, कथं पुनरणुत्वेनैव तस्य वियोगश्चिन्तनीय इति चेत् सूत्रप्रामाण्यात्, प्रस्तुतसूत्रे व्याख्याप्रज्ञप्त्यादिषु च परमाणोः पुनः परमाणुभवनेऽसङ्ख्येयरूपस्यैवान्तरकाल त्योक्तत्वादित्यलं विस्तरेण। 'नानादव्वाइं पडुच्चे'त्यादि पूर्ववद्भावनीयम्।

अवक्तव्यकद्रव्याणामन्तरचिन्तायाम् 'एगं दव्वं पडुच्चे'त्यादि, अत्र भावना-इह कश्चिद् द्विप्रदेशिकः स्कन्धो विघटितः, स्वतन्त्रं परमाणुद्वयं जातं, समयं चैकं तथास्थित्वा पुनस्ताभ्यामेव

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परमाणुभ्यां द्विप्रदेशिकः स्कन्धो निष्पन्नः, अथवा विघटित एव द्विप्रदेशिकः स्कन्धोऽन्येन परमाण्वादिना संयुज्य समयादूर्ध्वं पुनस्तथैव नियुक्त इत्यवक्तव्यकस्स् पुनरत्यवक्तव्यकभवने उभयथाऽपि समयोऽन्तरे लभ्यते, 'उक्कोसणं अनंतं कालं' इति, कथम् ?, अत्रोच्यते, अवक्तव्यकद्रव्यं किमपि विघटितं विशकलितपरमाणुद्वयं जातं, तच्चानन्तैः परमाणुभिरनन्तैर्द्व्यणुकस्कन्धैरनन्तैस्त्र्यणुकस्थन्धैर्यावदनन्तैरनन्ताणुकस्कन्धैः सह क्रमेण संयोगमासाद्य उत्कृष्टान्तराधिकाराच्च प्रतिस्थानमसकृदुत्कृष्टां संयोगस्थितिमनुभूय कालस्यानन्तत्वात् यदा पुनरपि तथैव द्व्यणुकस्कन्धतया संयुज्यते तदा अवक्तव्यकैकद्रव्यस्य पुनस्तथाभवने अनन्तोऽन्तरकालः प्राप्यते, नानाद्रव्यपक्षभावना लोके सर्वदैव तद्भावात् पूर्ववद् वक्तव्या।

उक्तमन्तरद्वारम्, साम्प्रतं भागद्वारं निर्दिदिक्षुराह-

*मू. (९८) नेगमववहाराणं आनुपुव्वीदव्वाइं सेसदव्वाणं कइभागे होज्जा ? किं संखिज्जइभागे होज्जा असंखिज्जइभागे होज्जा संखेज्जेसं भागेसु होज्जा असंखेज्जेसु भागेसु होज्जा ?, नो संखिज्जइभागे होज्जा नो असंखिज्जइभागे होज्जा नो संखेज्जेसु भागेसु होज्जा नियमा असंखेज्जेसु भागेसु होज्जा।*

*नेगमववहाराणं अनानुपुव्वीदव्वाइं सेसदव्वाणं कइभागे होज्जा किं संखिज्जइभागे होज्जा असंखिज्जइभागे होज्जा संखेज्जेसु भागेसु होज्जा असंखेज्जेसु भागेसु होज्जा ?, नो संखेज्जइभागे होज्जा नो असंखेज्जइभागे होज्जा नो संखेज्जेसु भागेसु होज्जा नो असंखेज्जेसु भागेसु होज्जा। एवं अवत्तव्वगदव्वाणिवि भाणिअव्वाणि।*

**वृ.** नैगमव्यवहारयोस्त्र्यणुकस्कन्धादीन्यनन्ताणुकस्कन्धपर्यन्तानि सर्वाण्यप्यानुपूर्वीद्रव्याणि शेषद्रव्याणां समस्तानामनानुपूर्व्यवक्तव्यकद्रव्यणलक्षणानां 'कइभागे होज्ज'त्ति कतिभागे भवन्तीत्यर्थः, किं संख्याततमे भागे भवन्ति, यथा असत्कल्पनया शतस्य विंशतिमिताः, किमसंख्याततमे भागे भवन्ति ?, यथा शतस्यैव दश, अथ संख्यातेषु भागेषु भवन्ति ?, यथा शतस्यैव चत्वारिंशत् षष्टिर्वा, किमसंख्यातेषु भागेषु भवन्ति, यथा शतस्यैवाशीतिरिति प्रश्नः अत्र निर्वचनम्-'नो संखेज्जइभागे होज्जा'इत्यादि, नियमात् 'असंखेज्जेसु भागेसु होज्ज'त्ति, इह तृतीयार्थे सप्तमी, ततश्चानुपूर्वीद्रव्याणि शेषेभ्योऽनानुपूर्व्यवक्तव्यकद्रव्येभ्योऽसंख्येयैर्भागैरधिकानि, भवन्तीति वाक्यशेषो द्रष्टव्यः, ततश्चायमर्थः प्रतिपत्तव्यः-आनुपूर्वीद्रव्याणि शेषद्रव्येभ्योऽसंख्येयगुणानि, शेषद्रव्याणि तु तदसंख्येयभागे वर्तन्ते, न पुनः शतस्याशीतिरिवानुपूर्वीद्रव्याणि शेषेभ्यः स्तोकानीति, कस्मादेवं व्याख्यायते ?, स्तोकान्यपि तानि भवन्त्विति चेत्, नैतदेवम्, अघटमानत्वात्, तथाहि-अनानुपूर्व्यवक्तव्यकद्रव्येषु एकाकिनः परमाणुपुद्गला द्व्यणुकाश्च स्कन्धा इत्येतावन्त्येव द्रव्याणि लभ्यन्ते, शेषाणि तु त्र्यणुकस्कन्धादीन्यनन्ताणुकस्कन्धपर्यन्तानि द्रव्याणि समस्तन्यप्यनुपूर्वीरूपाण्येव, तानि च पूर्वेभ्योऽसंख्येयगुणानि, यत उक्तम्-

"एएसि णं भंते ! परमाणुपोग्गलाणं संखिज्जपएसियाणं असंखेज्जपएसियाणं अनंतपएसियाण य खंधाणं कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा अनंतपएसिया खंधा, परमाणुपोग्गला अनंतगुणा, संखिज्जपएसिआ खंधा संखिज्ज-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गुणा, असंखिज्जपएसिया खंधा असंखिज्जगुणा" तदत्र सूत्रे पुद्गलजाते: सर्वस्या अपि सकाशादसंख्यातप्रदेशिका: स्कन्धा असंख्यातगुणा उक्ता:, ते चाऽऽनुपूर्व्यामन्तर्भवन्ति, अतस्तदपेक्षया आनुपुर्वीद्रव्याणि शेषात् समस्तादपि द्रव्यादसंख्यातगुणानि, किं पुनरनानुपूर्व्यवक्तव्यकद्रव्यमात्रात्, ततो यथोक्तमेव व्याख्यानं कर्तव्यमित्यलं विस्तरेण।

'अनानुपुव्वीदव्वाइ'मित्यादि, इहानानुपूर्वीद्रव्याण्यवक्तव्यकद्रव्याणि च शेषद्रव्याणां यथाऽसंख्याततम एव भागे भवन्ति, न शेषभागषु, तथाऽनन्तरोक्तन्यायादेव भावनीयमिति।

उक्तं भागद्वारं, साम्प्रतं भावद्वारमाह–

*मू. (९९) नेगमववहाराणं आनुपुव्वीदव्वाइं कतरंमि होज्जा ? किं उदइए भावे होज्जा उवसमिए भावे होज्जा खइए भावे होज्जा खओवसमिए भावे होज्जा पारिणामिए भावे होज्जा संनिवाइए भावे होज्जा ?, नियमा साइपारिणामिए भावे होज्जा, अनानुपुव्वीदव्वाणि अवत्तव्वगदव्वाणि अ एवं चेव भाणिअव्वाणि।*

वृ. 'नेगमववहाराण'मित्यादि प्रश्न:, अत्र चौदयिकादिभावानां शब्दार्थो भावार्थश्च विस्तरेणोपरिष्टात् स्वस्थान एव वक्ष्यते, अत्र निर्वचनसूत्रे 'नियमा साइपारिणामिए भावे होज्ज'त्ति परिणमनं–द्रव्यस्य तेन तेन रूपेण वर्तनं–भवनं परिणाम:, स एव पारिणामिक:, तत्र भवस्तेन वा निर्वृत्त इति वा पारिणामिक:, स च द्विविध:–सदिरनादिश्च, तत्र धर्मास्तिकायाद्यरूपिद्रव्याणामनादि: परिणाम:, अनादिकालात्तद्द्रव्यत्वेन तेषां परिणतत्वाद्, रूपिद्रव्याणां तु सादि: परिणाम:, अभ्रेन्द्रधनुरादीनां तथापरिणतेरनादित्वाभावाद्, एवं च स्थिते 'नियमाद्' अवश्यंतयाऽऽनुपूर्वीद्रव्याणि सादिपारिणामिक एव भावे भवन्ति, आनुपूर्वीत्वपरिणतेरनादित्वासम्भवात्, विशिष्टैकपरिणामेन पुद्गलानामसंख्येयकालमेवावस्थानादिति भाव:। अनानुपूर्व्यवक्तव्यकद्रव्येष्वपीत्थमेव भावना कार्या इति।

उक्तं भावद्वारम्, इदानीमल्पबहुत्वद्वारं बिभणिषुराह–

*मू. (१००) एएसिं णं भंते ! नेगमववहाराणं आनुपुव्वीदव्वाणं अनानुपुव्वीदव्वाणं अवत्तव्वगदव्वाण य दव्वट्ठयाए पएसट्ठयाए दव्वपएसट्ठयाए कयरे कयरेहिंतो अप्पा वा बहुवा या तुल्ला वा विसेसाहिया वा ?,*

*गोयमा ! सव्वत्थोवाइ नेगमववहाराणं अव्वत्तगदव्वाइं दव्वट्ठयाए, अनानुपुव्वीदव्वाइं दव्वट्ठयाए विसेसाहिआइं, आनुपुवीदव्वाइं दव्वट्ठयाए असंखेज्जगुणाइं, पएसट्ठयाए नेगमववहाराणं सव्वत्थोवाइं अनानुपुव्वीदव्वाइं अपएसट्ठयाए अवत्तव्वगदव्वाइं पएसट्ठयाए विसेसाहिआइं, आनुपुव्वीदव्वाइं पएसट्ठयाए अनंतगुणाइं, दव्वट्ठपएसट्ठयाए सव्वत्थोवाइं नेगमववहाराणं अवत्तव्वगदव्वाइं दव्वट्ठयाए अनानुपुव्वीदव्वाइं दव्वट्ठयाए अपएसट्ठयाए विसेसाहिआइं, अवत्तव्वगदव्वाइं पएसट्ठयाए विसेसाहिआइं, आनुपुव्वीदव्वाइं दव्वट्ठयाए असंखेज्जगुणाइं ताइं चेव पएसट्ठयाए अनंतगुणाइं,*

*से तं अनुगमे, से तं नेगमववहाराणं अनोवनिहिआ दव्वानुपव्वी,*

वृ. द्रव्यमेवार्थो द्रव्यार्थ:, तस्य भावो द्रव्यार्थता तया, द्रव्यत्वेन इत्यर्थ:, प्रकृष्टो–निरंशो



Jain Education International For Private & Personal Use Only www.jainelibrary.org

देशः प्रदेश स चासावर्थश्च प्रदेशार्थः तस्य भावः प्रदेशार्थता तया, परमाणुत्वेनेति भावः, द्रव्यार्थप्रदेशार्थतया तु यथोक्तोभयरूपतयेति भावः, तदयमर्थः-एतेषां भदन्त! आनुपूर्व्यादिद्रव्याणां मध्ये 'कयरे कयरेहिंतो' त्ति कतराणि-कान्याश्रित्य द्रव्यापेक्षया प्रदेशापेक्षया उभयापेक्षया वाऽल्पानि विशेषहीनत्वादिना बहूनि असंख्येयगुणत्वादिना तुल्यानि समसंख्यत्वेन विशेषाधिकानि किञ्चिदाधिक्येनेति, वाशब्दः, पक्षान्तरवृत्तिद्योतकाः, इति पृष्टे वाचः क्रमवर्तित्वाद् द्रव्यार्थतापेक्षया तावदुत्तरमुच्यते, तत्र-'सव्वत्थोवाइं नेगमववहाराणं अवत्तवगदव्वाइं दव्वट्ठयाए' त्ति नैगमव्यवहारयोः द्रव्यार्थतामपेक्ष्य तावदवक्तव्यकद्रव्याणि सर्वेभ्योऽन्येभ्यः स्तोकानि सर्वस्तोकानि, अनानुपूर्वीद्रव्याणि तु द्रव्यार्थतामेवापेक्ष्य विशेषाधिकानि, कथम्?, वस्तुस्थितिस्वभावाद्, उक्तं च-

"एएसि णं भंते! परमाणुपोग्गलाणं दुपएसियाणं खंधाणं कयरे कयरेहिंतो बहुया० ?, गोयमा! दुपएसिएहिंतो खंधेहिंतो परमाणुपोग्गला बहुग" त्ति, तेभ्योऽपि आनुपूर्वीद्रव्याणि द्रव्यार्थतयैवासंख्येयगुणानि, यतोऽनानुपूर्वीद्रव्येष्ववक्तव्यकद्रव्येषु च परमाणुलक्षणं द्व्यणुकस्कन्धलक्षणं चैकैकमेव स्थानं लभ्यते, आनुपुर्वीद्रव्येषु तु त्र्यणुकस्कन्धादीन्येकोत्तरवृद्ध्याऽनन्ताणुकस्कन्धपर्यन्तान्यनन्तानि स्थानानि प्राप्यन्ते, अतः स्थानबहुत्वादानुपूर्वीद्रव्याणि पूर्वेभ्योऽसंख्यातगुणानि।

ननु यदि तेषु स्थानान्यनन्तानि तर्ह्यनन्तगुणानि पूर्वेभ्यस्तानि कस्मान्न भवन्तीति चेत्, 'नैवं, यतोऽनन्ताणुकस्कन्धाः केवलानानुपूर्वीद्रव्येभ्योऽप्यनन्तभागवर्तित्वात्, स्वभावादेव स्तोका इति न किञ्चित्तैरिह वर्द्धते, अतो वस्तुवृत्त्या किलासंख्यातान्येव तेषु स्थानानि प्राप्यन्ते, तदपेक्षया त्वसंख्यातगुणान्येव तानि, एतच्च पूर्वं भागद्वारे लिखितप्रज्ञापनासूत्रात् सर्वं भावनीयमित्यलं विस्तरेण।

उक्तं द्रव्यार्थतया अल्पबहुत्वम्, इदानीं प्रदेशार्थतया तदेवाऽऽह-'पएसट्ठयाए सव्वत्थोवाइं नेगमववहाराण' मित्यादि, नैगमव्यवहारयोः प्रदेशार्थतया अल्पबहुत्वे चिन्त्यमाने अनानुपूर्वीद्रव्याणि सर्वेभ्यः स्तोकानि, कुत इत्याह-'अपएसट्ठयाए' त्ति प्रदेशलक्षणस्यार्थस्य तेष्वभावादित्यर्थः, यदि हि तेषु प्रदेशाः स्युस्तदा द्रव्यार्थतायामिव प्रदेशार्थतायामप्यवक्तव्यकापेक्षयाऽधिकत्वं स्यात्, न चैतदस्ति 'परमाणुरप्रदेश' इति वचनाद्, अतः सर्वस्तोकन्येतानि, ननु यदि प्रदेशार्थता तेषु नास्ति तर्हि तया विचारोऽपि तेषां न युक्त इति चेत्, नैतदेवं, प्रकृष्टः-सर्वसूक्ष्मः पदगलास्तिकायस्य देशो निरंशो भागः प्रदेश इति व्युत्पत्तेः प्रतिपरमाणु प्रदेशार्थताऽभ्युपगम्यत एव, आत्मव्यतिरिक्तप्रदेशान्तरापेक्षया त्वप्रदेशार्थतेत्यदोषः, अवक्तव्यकद्रव्याणि प्रदेशार्थतयाऽनानुपूर्वीद्रव्येभ्यो विशषाधिकानि, यतः किलासत्कल्पनया अवक्तव्यकद्रव्याणां षष्टिः अनानुपूर्वीद्रव्याणां तु शतं, ततो द्रव्यार्थताविचारे एतानीतरापेक्षया विशेषाधिकान्युक्तानि, अत्र तु प्रदेशार्थताविचारेऽनानुपूर्वीद्रव्याणां निष्प्रदेशत्वात् तदेव शतमवस्थितम्, अवक्तकद्रव्याणां त्विह प्रत्येकं द्विप्रदेशत्वाद्, द्विगुणितानां विंशत्युत्तरं प्रदेशशतं जायत इति तेषामितरेभ्यः प्रदेशार्थतया विशेषाधिकत्वं भावनीयम्।

आनुपूर्वीद्रव्याणि प्रदेशार्थतया अवक्तकद्रव्येभ्योऽनन्तगुणानि भवन्ति, कथम्?, यतो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्रव्यार्थतयाऽपि तावदेतानि पूर्वेभ्याऽसंख्यातगुणान्युक्तानि, यदा तु संख्यातप्रदेशिकस्कन्धा-नामसंख्यातप्रदेशिकस्कन्धानामनन्ताणुकस्कन्धानां च सम्बन्धिनः सर्वेऽपि प्रदेशा विवक्ष्यन्ते तदा महानसौ राशिर्भवतीति प्रदेशार्थतयाऽमीषां पूर्वेभ्योऽनन्तगुणत्वं भावनीयम्।

उक्तं प्रदेशार्थतयाऽल्पबहुत्वम्, इदानीमुभयार्थतामाश्रित्य तदाह-'दव्वट्ठपएसट्ठयाए' इत्यादि, इहोभयार्थताधिकारेऽपि यदेवाल्यं तदेवादौ दर्श्यते, अवक्तकद्रव्याणि च सर्वाल्पानि इति प्रथममेवोक्तम् 'सव्वत्थोवाइं नेगमववहाराणं अवत्तव्वगदव्वाइं दव्वट्ठयाए'त्ति, अपरं चोभयार्थताधिकारेऽपि 'अनानुपुव्वीदव्वाइं दव्वट्ठयाए'इत्यादि (दौ) यदुक्तम् 'अपए-सट्ठयाए'त्ति तदात्मव्यतिरिक्तप्रदेशान्तराभावतोऽनानुपूर्वीद्रव्याणामप्रदेशिकत्यादिति मन्तव्यं, ततश्चेदमुक्तं भवति-द्रव्यार्थतया अप्रदेशार्थतया च विशिष्टान्यनानुपूर्वीद्रव्याण्यवक्तकद्रव्येभ्यो विशेषाधिकानि, शेषभावना तु प्रत्येकचिन्तावत् सर्वा कार्या।

आह-यद्येवं प्रत्येकचिन्तायामेव प्रस्तुतोऽर्थः सिद्धः किमनयोभयार्थताचिन्तयेति चेत्, नैवं, यत आनुपूर्वीद्रव्येभ्यस्तत्प्रदेशाः कियताऽप्यधिका इति प्रत्येकचिन्तायां न निश्चितम्, अत्र तु 'ताइं चेव पएसट्ठयाए अनंतगुणाइं' इत्यनेन तन्निर्णीतमेव, ततोऽनवगतार्थप्रतिपाद-नार्थत्वात् प्रत्येकावस्थातो भिन्नैवोभयावस्था वस्तूनामिति दर्शनार्थत्वाच्च युक्तमेवो-भयार्थताचिन्तनमित्यदोषः। तदेवमुक्तो नवविधोऽप्यनुगम इति निगमयति-'से तं अनुगमे'त्ति, तद्भणने च समर्थिता नैगमव्यवहारयोरनौपनिधिकी द्रव्यानुपूर्वी इति निगमयति-'से तं नेगमे'त्यादि।

व्याख्याता नैगमव्यवहारनयमतेन अनौपनिधिकी द्रव्यानुपूर्वी, साम्प्रतं संग्रहनयमतेन तामेव व्याचिख्यासुराह-

*मू. ( १०१ ) से किं तं संगहस्स अनोवनिहिआ दव्वानुपुव्वी ?, २ पंचविहा पन्नत्ता, तंजहा-अट्ठपयपरूवणया १ भंगसमुक्कित्तणया २ भंगोवदंसणया ३ समोआरे ४ अनुगमे ५ ।*

**वृ.** सामान्यमात्रसंग्रहशीलः संग्रहो नयः, अथ तस्य संग्रहनयस्य किं तद्वस्त्वनौपनिधिकी द्रव्यानुपूर्वीति प्रश्नः, आह-ननु नैगमसंग्रहव्यवहारेत्यादिसूत्रक्रमप्रामाण्यन्नैगमात्रतरं संग्रह-स्योपन्यासो मुक्तः, तत्किमिति व्यवहारमपि निर्दिश्य ततोऽयमुच्यत इति, सत्यं, किन्तु नैगम-व्यवहारयोरत्र तुल्यमतत्वाल्लाघवार्थं युगपत् तन्निर्देशं कृत्वा पश्चात् संग्रहो निर्दिष्ट इत्यदोषः। अत्र निर्वचनमाह-'संगहस्स अनोवनिहिया दव्वानुपुव्वी पंचविहा'त्ति, संग्रहनयमतेनाप्य-नौपनिधिकी द्रव्यानुपूर्वी-प्राग्निरूपितशब्दार्थ पञ्चभिरर्थपदप्ररूपणतादिभिः प्रकारैर्विचार्य-माणत्वात्, पञ्चविधा-पञ्चप्रकारा प्रज्ञप्ता। तदेव दर्शयति-'तंजहे'त्यादि, अत्र व्याख्या पूर्व-वदेव।

*मू. ( १०२ ) से किं संगहस्स अट्ठपयपरूवणया ?, २ तिपएसिए आनुपुव्वी चउप्पएसिए आनुपुव्वी जाव दसपएसिए आनुपुव्वी संखिज्जपएसिए आनुपुव्वी असंखिज्जपएसिए आनुपुव्वी अनंतपएसिए आनुपुव्वी परमाणुपोग्गले अनानुपुव्वी दुपएसिए अवत्तवए, से तं संगहस्स अट्ठपयपरूवणया ।*

**वृ.** यावत् तिपएसिए आनुपुव्वी' इत्यादि, इह पूर्वमेकस्त्रिप्रदेशिक आनुपूर्वी अनेके

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

त्रिप्रदेशिका आनुपूर्व्य इत्याद्युक्तम् अत्र तु संग्रहस्य सामान्यवादित्वात् सर्वेऽपि त्रिप्रदेशिका एकैवाऽऽनुपूर्वी, इमां चात्र युक्तिमयमभिधत्ते-त्रिप्रदेशिकाः स्कन्धास्त्रिप्रदेशिकत्त्वसामान्याद् व्यतिरेकिणोव्यतिरेकिणो वा ?, यद्याद्यः पक्षस्तर्हि ते त्रिप्रदेशिकाः स्कन्धाः त्रिप्रदेशिका एव न भवन्ति, तत्सामान्यव्यतिरिक्तत्वात्, द्विप्रदेशिकादिवदिति, अथ चरमः पक्षस्तर्हि सामान्यमेव ते, तदव्यतिरेकात्, तत्स्वरूपत्, सामान्यं चेकस्वरूपमेवेति सर्वेऽपि त्रिप्रदेशिका एकैशानुपूर्वी, एवं चतुष्प्रदेशिकत्वसामान्याव्यतिरेकात् सर्वेऽपि चतुष्प्रदेशिका एकैवानुपूर्वी, एवं यावद-नन्तप्रदेशिकत्वसामान्यव्यतिरेकात् सर्वेऽप्यनन्तप्रदेशिका एकैवाऽऽनुपूर्वी इत्यविशुद्धि-संग्रहनयमतं, विशुद्धसंग्रहनयमतेन तु सर्वेषां त्रिप्रदेशिकादीनामन्ताणुकपर्यन्तानां स्कन्धाना-मानुपूर्वीत्वसामान्यव्यतिरेकाद्व्यतिरेके चानुपूर्वीत्वाभावप्रसङ्गात् सर्वाऽप्येकैवानुपूर्वीति।

एवमनानुपूर्वीत्वसामान्यव्यतिरेकात् सर्वेऽपि परमाणुपुद्गला एकैवानानुपूर्वी, तथाऽवक्त-व्यत्वसामान्यव्यतिरेकात् सर्वेऽपि द्विप्रदेशिकस्कन्धा एकमेवावक्तव्यकमिति सामान्यवा दित्वेन सर्वत्र बहुवचनाभावः, 'से त'मित्यादि निगमनम्। भङ्गसमुत्कीर्तनतां निर्दिदिक्षुराह-

*मू. ( १०३ ) एआए णं संगहस्स अट्ठपयपरूवणयाए किं पओअणं ?, एआए णं संगहस्स अट्ठपयपरूवणयाए संगहस्स भंगसमुक्कित्तणया कज्जइ।*

*से किं तं संगहस्स भंगसमुक्कित्तणया ?, २ अत्थि आनुपुव्वी १ अत्थि अनानुपुव्वी २ अत्थि अवत्तव्वए ३, अहवा अत्थि आनुपुव्वी अ अवत्तव्वए अ ५ अहवा अत्थि अनानुपुव्वी अ अवत्तव्वए अ ६ अहवा अत्थि आनुपुव्वी अ अनानुपुव्वी अ अवत्तव्वए अ ७, एवं सत्त भंगा, से तं संगहस्स भंगसमुक्कित्तणया॥*

*एआए णं संगहस्स भंगसमुक्कित्तणयाए किं पओयणं ?, एयाए णं संगहस्स भंगस-मुक्कित्तणयाए संगहस्स भंगोवदंसणया कीरइ।*

वृ. अत्रापि व्याख्या कृतैव द्रष्टव्या यावत् 'अत्थि आनुपुव्वी'त्यादि, इहैकवचनान्तास्त्रय एव प्रत्येकभङ्गाः, सामान्यवादित्वेन व्यक्तिबहुत्वाभावतो बहुवचनाभावाद्, आनुपूर्व्यादि-पदत्रयस्य च त्रयो द्विकसंयोगा भवन्ति, एककस्मिँश्च द्विकयोगे एकवचनान्त एक एव भङ्गः, त्रिकयोगेऽपि एक एवैकवचनान्त इति, सर्वेऽपि सप्तभङ्गाः संपद्यन्ते, शेषास्त्वेकोनविंशति-र्बहुवचनसम्भवित्वान्न भवन्ति। अत्र स्थापना-आनुपूर्वी १ इति प्रथमो द्विकयोगः, आनुपूर्वी २ अवक्तव्यक १ इति द्वितीयो द्विकयोगः, अनानुपूर्वी अवक्तव्यक इति तृतीयो द्विकयोगः, आनुपूर्वी १ अनानुपूर्वी १ अवक्तव्यक १ इति त्रिकयोगः, एवमेते सप्त भङ्गाः।

'से त'मित्यादि निगमनम्। भङ्गोपदर्शनतां बिभणिषुराह-

*मू. ( १०४ ) से किं तं संगहस्स भंगोवदंसणया ?, २ तिपएसिया आनुपुव्वी परमाणुपोग्गला अनानुपुव्वी दुपएसिया अवत्तव्वए, अहवा तिपएसिया य परमाणुपोग्गला य आनुपुव्वी य अनानुपुव्वी य, अहवा तिपएसिया य दुपएसिया य आनुपुव्वी य अवत्तव्वए य अहवा परमाणु-पोग्गला य दुपएसिया य अनानुपुव्वी य अवत्तव्वए य अहवा तिपएसिया य परमाणुपोग्गला य दुपएसिया य आनुपुव्वी य अनानुपुव्वी य अवत्तव्वए य, से तं संगहस्स भंगोवदंसणया।*

*मू. ( १०५ ) से किं संगहस्स समोयारे ?, २ संगहस्स आनुपुव्वीदव्वाइं कहिं समोय-*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*रंति ?, किं आनुपुव्वीदव्वेहिं समोयरंति ? अनानुपुव्वीदव्वेहिं समोयरंति ? अवत्तव्वगदव्वेहिं समोयरंति ?, संगहस्स आनुपुव्वीदव्वाइं आनुपुव्वीदव्वेहिं समोयरंति नो अनानुपुव्वीदव्वेहिं समोयरंति नो अवत्तव्वगदव्वेहिं समोयरंति, एवं दोन्निवि सट्ठाणे सट्ठाणे समोयरंति, से तं समोयारे।*

**वृ.** अत्रापि सप्त भङ्गास्त एवार्थकथनपुरस्सरा भावनीयाः, भावार्थस्तु सर्वः पूर्ववत्, 'स त'मित्यादि निगमनम्। अथ समवताराभिधित्सया प्राह- 'से किं तं संगहस्स समोयारे' इत्यादि, इदं च द्वारं पूर्ववन्निखिलं भावनीयम्। अथानुगमं व्याचिख्यासुराह-

*मू. ( १०६ ) से किं तं अनुगमे ?, २ अट्ठविहे पन्नते, तंजहा-*

**वृ.** अत्रोत्तरम्- 'अनुगमे अट्ठविहे पन्नत्ते' इति पूर्वं नवविध उक्तोऽत्र त्वष्टविध एव, अल्पबहुत्वद्वाराभावात्, तदेवाष्टविधत्वं दर्शयतति- तद्यथेत्युपदर्शनार्थः, 'संतपय' गाहा, इयं पूर्वं व्याख्यातैव, नवरं 'अप्पाबहुं नत्थि' संग्रहस्य सामान्यवादित्वात्, सामान्यस्य च सर्वत्रैकत्वादल्पबहुत्वविचारोऽत्र न संभवतीत्यर्थः।

*मू. ( १०७ ) संतपयपरूवणया दव्वपमाणं च खित्त फुसणा य।*
*कालो य अंतरु भाव भावे अप्पाबहुं नत्थि॥*

**वृ.** तत्र सत्पदप्ररूपणाभिधानार्थमाह- 'संगहस्से'त्यादि।

*मू. ( १०८ ) संगहस्स आनुपुव्वीदव्वाइं किं अत्थि नत्थि ?, नियमा अत्थि, एवं दोन्निवि। संगहस्स आनुपुव्वीदव्वाइं किं संखिज्जाइं असंखेज्जाइं अनंताइं ?, नो संखेज्जाइं नो अनंताइं नियमा एगो रासी, एवं दोन्निवि। संगहस्स आनुपुव्वीदव्वाइं लोगस्स कइभागे होज्जा ? किं संखेज्जइभागे होज्जा असंखेज्जइभागे होज्जा संखेज्जेसु भागेसु होज्जा असंखेज्जेसु भागेसु होज्जा सव्वलोए होज्जा ?, नो संखेज्जइभागे होज्जा नो असंखेज्जइ भागे होज्जा नो संखेज्जेसु भागेसु होज्जा नो असंखेज्जेसु भागेसु होज्जा नियमा सव्वलोए होज्जा, एवं दोन्निवि।*

*संगहस्स आनुपुव्वीदव्वाइं लोगस्स किं संखेज्जइभागं फुसंति असंखेज्जइभागं फुसंति भागे फुसंति सव्वलोगं फुसंति ?, नो संखेज्जइभागं फुसंति जाव नियमा सव्वलोगं फुसंति, एवं, दोन्निवि।*

*संगहस्स आनुपुव्वीदव्वाइं कालओ केवच्चिरं होंति ?, सव्वद्धा, एवं दोन्निवि। संगहस्स आनुपुव्वीदव्वाइं कालओ केवच्चिरं अंतरं होंति ?, नत्थि अंतरं, एवं दोन्निवि। संगहस्स आनुपुव्वीदव्वाइं सेसदव्वाणं कइभागे होज्जा ?, किं संखेज्जइभागे होज्जा असंखेज्जइभागे होज्जा संखेज्जसु भागेसु होज्जा असंखेज्जेसु भागेसु होज्जा ?, नो संखेज्जइभागे होज्जा नो असंखेज्जइभागे होज्जा नो संखेज्जेसु भागेसु होज्जा नो असंखेज्जसु भागेसु होज्जा नियमा तिभागे होज्जा, एवं दोन्निवि।*

*संगहस्स आनुपुव्वीदव्वाइं कयरंमि भावे होज्जा ?, नियमा साइपारिणामिए भावे होज्जा, एवं दोन्निवि। अप्पाबहुं नत्थि। से तं अनुगमे, से तं संगहस्स अनोवनिहिया दव्वानुपुव्वी, से तं अनोवहिया दव्वानुपुव्वन्।*

**वृ.** ननु संग्रहविचारे प्रकान्ते आनुपूर्वीद्रव्याणी सन्तीत्युनुपपन्नम्, आनुपूर्वीसामान्यस्यैवैकस्य तेनास्तित्वाभ्युपगमात्, सत्यं, मुख्यरूपतया सामान्यमेवास्ति, गुणभूतं च व्यवहार-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मात्रनिबन्धनं द्रव्यबाहुल्यमप्यसौ वदतीत्यदोषः, शेषभावना पूर्ववदिति। द्रव्यप्रमाणद्वारे यदुक्तं 'नियमा एगो रासि'त्ति, अत्राह-ननु यदि संख्येयादिस्वरूपाणि एतानि न भवन्ति तर्ह्येको राशिरित्यपि नोपपद्यते, द्रव्यबाहुल्ये सति तस्योपपद्यमानत्वाद्, व्रीह्यादिराशिषु तथैव दर्शनात्, सत्यं, किन्त्वेको राशिरिति वदतः कोऽभिप्रायः ?, बहूनामपि तेषामानुपूर्वीत्वसामान्येनैकेन क्रोडीकृतत्वादेकत्वमेव, किं च-यथा विशिष्टैकपरिणामपरिणते स्कन्धे तदारम्भकावयवानां बाहुल्येऽप्येकतैव मुख्या, तद्वदत्राऽऽनुपूर्वीद्रव्यबाहुल्येऽपि तत्सामान्यस्यैकरूपत्वादेकत्वमेव मुख्यमसौ नयः प्रतिपद्यते, तद्वशेनैव तेषामानुपूर्वीत्वसिद्धेः, अन्यथा तदभावप्रसङ्गात्, तस्मान्मुख्यस्यैकत्वस्यानेन कक्षीकृतत्वात् संख्येयरूपातादिनिषेधो गुणभूतानि(तु) द्रव्याण्याश्रित्य राशिभावोऽपि न विरुध्यते, एव मन्यत्रापि भावनीयमित्यलं प्रपञ्चेन।

क्षेत्रद्वारे 'नियमा सव्वलोए होज्ज'त्ति आनुपूर्वीसामान्यस्यैकत्वात् सर्वलोकव्यापित्वाच्चेति भावनीयम्, एवमितरद्वयेऽप्यभ्यूह्यमिति। स्पर्शनाद्वारमप्येवमेव चिन्तनीयमिति।

कालद्वारेऽपि तत्सामान्यस्य सर्वदाऽव्यवच्छिन्नत्वात्, त्रयाणामपि सर्वाद्धाऽवस्थानं भावनीयमिति, अत एवान्तरद्वारे नास्त्यन्तरमित्युक्तं, तद्भावव्यवच्छेदस्य कदाचिदप्यभावादिति। भागद्वारे 'नियमा तिभागे होज्ज'त्ति त्रयाणां राशीनामेको राशिस्त्रिभाग एव वर्तत इति भावः, यत्तु राशिगतद्रव्याणां पूर्वोक्तमल्पबहुत्वं तदत्र न गण्यते, द्रव्याणां प्रस्तुतनयमाते व्यवहारसंवृत्तिमात्रेणैव सत्त्वादिति।

भावद्वारे 'सादिपारिणामिए भावे होज्ज'त्ति यथा आनुपूर्व्याअदिद्रव्याणामेतद्भाववर्तित्वं पूर्वं भावितं तथाऽत्रापि भावनीयं, तेषां यथास्वं सामान्यदव्यतिरिक्तत्वादिति। अल्पबहुत्वद्वारासम्भवस्तूक्त एव, इति समर्थितोऽनुगम, तत्समर्थने च समर्थिता संग्रहमतेनानौपनिधिकी द्रव्यानुपूर्वी, तत्समर्थने च व्याख्याता सर्वथाऽपीयम्, अतः 'से त'मित्यादि निगमनत्रयम्।

गताऽनौपनिधिकीद्रव्यानुपूर्वी, साम्प्रतं प्रागुद्दिष्टमेवोपनिधिकी तां व्याचिख्यासुराह-

*मू.(१०९) से किं तं उवनिहिया दव्वानुपुव्वी ?, २ तिविहा पन्नत्ता, तंजहा-पुव्वानुपुव्वी पच्छानुपुव्वी अनानुपुव्वी य।*

**वृ.** अथ केयं प्रागनिर्णीतशब्दार्थमात्रा औपनिधिकी द्रव्यानुपूर्वीति प्रश्नः, अत्र निर्वचनम्-औपनिधिकी द्रव्यानुपूर्वी त्रिविधा प्रज्ञप्ता, तद्यथा-पूर्व्वानुपूर्वीत्यादि, उपनिधिर्निक्षेपो विरचनं प्रयोजनमस्या इत्यौपनिधिकी द्रव्याविषयाऽऽनुपूर्वी-पारिपाटिर्द्रव्यानुपूर्वी, सा त्रिप्रकारा, तत्र विवक्षितधर्म्मास्तिकायादिद्रव्यविशेषसमुदाये यः पूर्वः-प्रथमस्तस्मादारभ्यानुपूर्वी-अनुक्रमः परिपाटिः निक्षिप्यते विरच्यते यस्यां सा पूर्वानुपूर्वी, तत्रैव यः पाश्चात्यः-चरमस्तस्मादारभ्य व्यत्ययेनैवानुपूर्वी-परिपाटिः विरच्यते यस्यां सा निरुक्तविधिना पश्चानुपूर्वी, न आनुपूर्वी अनानुपूर्वी, यथोक्तप्रकारद्वयातिरिक्तस्वरूपेत्यर्थः।

तत्राद्यभेदं तावन्निरूपयितुं प्रश्नमाह-

*मू.(११०) से किं तं पुव्वानुपुव्वी ?, २ धम्मत्थिकाए अधम्मत्थिकाए आगासत्थिकाए जीवत्थिकाए पोग्गलत्थिकाए अद्धासमए, से तं पुव्वानुपुव्वी।*

*से किं तं पच्छानुपुव्वी ?, २ अद्धासमए पोग्गलत्थिकाए जीवत्थिकाए आगासत्थिकाए*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*अहम्मत्थिकाए धम्मत्थिकाए, से तं पच्छानुपुव्वी।*

*से किं तं अनानुपुव्वी ?, २ एयाए चेव एगाइआए एगुत्तरिआए छगच्छगयाए सेढीए अन्नमन्न-ब्भासो दूरूवूणो, से तं अनानुपुव्वी।*

वृ. इह च द्रव्यानुपूर्व्यधिकाराद् धर्मास्तिकायादीनामेव च द्रव्यत्वादित्थं निर्वचनमाह- 'धम्मत्थिकाए' इत्यादि, तत्र जीवपुद्गलानां स्वतः एव गतिक्रियापरिणतानां तत्स्वभावधारणाद् धर्मः अस्तयः-प्रदेशास्तेषां कायः-सङ्घातोऽस्तिकायः, धर्म्मश्चासावस्तिकायश्चेति समासः, सकललोकव्याप्यसंख्येयप्रदेशात्मकोऽमूर्तद्रव्यविशेष इत्यर्थः, जीवपुद्गलानामेव तथैव गतिपरिणतानां तत्स्वभावाधारणादधर्मः जीवपुद्गलानां स्थित्युपष्टम्भकारक इत्यर्थः, शेषं धर्मास्तिकायवत् सर्व, सर्वभावावकाशनादाकाशम्, आ-मर्यादया तत्संयोगेऽपि स्वकीय-स्वरूपेऽवस्थानतः सर्वथा तत्स्वरूपत्वाप्राप्तिलक्षणया प्रकाशन्ते-स्वभावलाभेन अवस्थि-तिकरणेन च दीप्यन्ते पदार्थसार्था यत्र तदाकाशमिति, अथवा आ-अभिविधिना सर्वात्माना तत्संयोगानुभवनलक्षणेन काशन्ते-तत्रैव दीप्यन्ते पदार्था यत्र तदाकाशमिति भावः, तच्च तदस्तिकायश्चेति आकाशास्तिकायः, लोकालोकव्याप्यनन्तप्रदेशात्मकोऽमूर्तद्रव्यविशेष इत्यर्थः, जीवन्ति जीविष्यन्ति जीवितवन्त इति जीवाः ते च तेऽस्तिकायाश्चेति समासः, प्रत्येकमसंख्येयप्रदेशात्मकसकललोकभाविनानजीवद्रव्यसमूह इत्यर्थः, पूरणगलनधर्म्माणः पुद्गला-परमाण्वादयोऽनन्ताणुकस्कन्धपर्यन्ताः, ते हि कुतश्चिद्रव्याद्गलन्ति-वियुज्यते किञ्चित्तु द्रव्यं तत्संयोगतः पूरयन्तीति भावः, ते च तेऽस्तिकायाश्चेति समासः, अद्धाशब्दः, कालवचनः समयः सङ्केतदिवाचकोऽप्यस्ति ततो विशिष्यते-अद्धारूपः समयोऽद्धासमयः, वक्ष्यमाणपट्टसाटिकादिपाटनदृष्टान्तसिद्धः सर्वसूक्ष्मः पूर्वपरकोटिविप्रमुक्तो वर्तमान एकः कालांश इत्यर्थः, अत एवात्र अस्तिकायत्वाभावः, बहुप्रदेशत्व एव तद्भावाद्, अत्र त्वतीताना-गतयोर्विनष्टानुत्पन्नत्वेन वर्तमानस्यैकस्यैव कालप्रदेशस्य सद्भावत्, नन्वेवमावलिकादि-कालाभावः, समयबहुत्व एव तदुपपत्तेरिति चेद्, भवतु तर्हि-को निवारयिता ? 'समया-वलियमुहुत्ता दिवसमहोरत्तपक्खमासा य' इत्याद्यागमविरोध इति चेत्, नैवम्, अभिप्राया-परिज्ञानाद्, व्यवहारनयमतेनैव तत्र तत्सत्त्वाभ्युपगमाद्, अत्र तु निश्चयनयमतेन तदसत्त्व-प्रतिपादनात्, न हि पुद्गलस्कन्धे परमाणुसङ्घात इवावलिकादिषु समयसङ्घातः कश्चिदवस्थितः समस्तीति तदसत्त्वमसौ प्रतिपपद्य इत्यलं चर्चयेति।

अत्र च जीवपुद्गलानां गत्यन्यथाऽनुपपत्तेर्धर्मास्तिकायस्य तेषामेव स्थित्यन्यथाऽनु-पपत्तेरधर्मास्तिकायस्य सत्त्वं प्रतिपत्तव्यं, न च वक्तव्यं तद्गतिस्थिति व भविष्यतो धर्मा-धर्मास्तिकायस्यौ च न भविष्यत इति प्रतिबन्धाभावादनेकान्तिकतेति, तावन्तरेणापि तद्भवनेऽ-लोकेऽपि तत्प्रसङ्गात्, यदि तु अलोकेऽपि तद्गतिस्थिति स्यातां तदाऽलोकस्यानन्तत्वा-ल्लोकान्निर्गत्य जीवपुदगलानां तत्र प्रवेशादेकद्वित्र्यादिजीवपुद्गलयुक्तः सर्वथा तच्छून्यो वा कदाचिल्लोकः स्यात्, न चैददृष्टमिष्टं वेत्याद्यन्यदपि दूषणजालमस्ति, न चोच्यते ग्रन्थविस्तर-भयादिति। आकाशं तु जीवादिपदारथानामाधारान्यथाऽनुपपत्तेरस्तीति श्रद्धेयं, न च धर्मा-धर्मास्तिकायावेव तदाधारो भविष्यति इति वक्तव्यं, तयोस्तद्गतिस्थितिसाधकत्वेनोक्तत्वात्,

Jain Education International     For Private & Personal Use Only     www.jainelibrary.org

न चानयसाध्यं कार्यमन्यः साधयति, अतिप्रसङ्गादिति।

घटादिज्ञानगुणस्य प्रतिप्राणि स्वसंवेदनसिद्धत्वाज्जीवयस्यास्तित्वमवसातव्यं, न च गुणि-नमन्तरेण गुणसत्ता युक्ता, अतिप्रसङ्गात्, न च देह एवास्य गुणी युज्यते, यतो ज्ञानममूर्तं चिद्रूपं सदैवेन्द्रियगोचरातीत्वादिधर्म्मोपेतम्, अतः तस्यानुरूप एव कश्चिद्गुणी समन्वेषणीयः, स च जीव एव न तु देहो, विपरीतत्वाद्, यदि पुनरननुरूपोऽपि गुणानां गुणी कल्प्यते तर्ह्यनवस्था, रूपादिगुणानामप्याकाशादेर्गुणित्वकल्पनाप्रसङ्गादिति। पुद्गलास्तिकायस्य तु घटादिकार्या-न्यथानुपपत्तेः, प्रत्यक्षत्वाच्च सत्त्वं प्रतीतमेवेति, कालोऽप्यस्ति बहुलाशोकचम्पकादिषु पुष्पफल-प्रदानस्यानियमेनादर्शनाद्, यस्तु तत्र नियामकः स काल इति, स्वभावादेव तु तद्भावने, नित्यं सत्त्वमसत्त्वं वे'त्यादिदूषणप्रसङ्गः, अत्र बहु वक्तव्यं तत्तु नोच्यते, ग्रन्थदुर-वगमताभयादिति।

आह-धर्मास्तिकायस्य प्राथम्यमधर्मास्तिकायस्यादिनां तु तदनन्तरं क्रमेणेत्थं निर्देशः कुतः सिद्धो ? येनात्र पूर्वानुपूर्वीरूपता स्यादिति, अत्रोच्यते, आगमे इत्थमेव पठितत्वात, तत्रापि कथमित्थमेव पाठ इति चेद्, उच्यते, धर्मास्तिकायस्य इत्यत्र यदाद्यं धर्मेतिपदं तस्य माङ्गलि-कत्वाद्धर्मास्तिकायस्य प्रथममुपन्यासः, ततस्तत्प्रतिपक्षत्वादधर्मास्तिकायस्य, ततस्तदा-धारत्वादाकाशास्तिकायस्य, ततः स्वाभाविकामूर्तत्वसाम्याज्जीवास्तिकायस्य, ततस्तदु-पयोगित्वात् पुद्गलास्तिकायस्य, ततो जीवाजीवापर्यायत्वात् तदनन्तरमद्धासमयस्योपन्यास इति पूर्वानुपूर्वीसिद्धिरिति।

अथ पश्चानुपूर्वी निरूपयितुमाह-'से किं तं पच्छनुपुव्वी'त्यादि, पाश्चात्यादारभ्य प्रतिलोभं व्यत्ययेनैवानुपूर्वी -परिपाटिः क्रियते यस्यां सा पश्चानुपूर्वी , अत्रोदाहरणमुत्क्रमेण, इदमेवा-ऽऽह-'अद्धासमये'त्यादि, गतार्थमेव। अथानानुपूर्वी निरूपयितु-'से किं त' मित्यादि, अत्र निर्वचनम्-'अनानुपुव्वी एयाए चेवे'त्यादि, न विद्यते आनुपूर्वी -यथोक्तपरिपाटिद्वयरूपा यस्यां सा अनानुपूर्वी, विवक्षितपदानामन्तरोक्तक्रमद्वयमुल्लङ्घ्य परस्परासदृशैः, सम्भवदि-भर्भङ्गकैर्यस्यां विरचना क्रियते साऽनानुपूर्वीत्यर्थः, का पुनरियमित्याह-'अन्नमन्नब्भासो'त्ति, अन्योऽन्यं-परस्परमभ्यासो-गुणनमन्योऽन्याभ्यासः, 'दूरूवणो'त्ति द्विरूपन्यूनः आद्यन्त-रूपरहितः अनानुपूर्वीति सण्टङ्कः, कस्यां विषये योऽसावभ्यास-इत्याह-'श्रेण्यां' पङ्क्तौ, कस्यां पुनः श्रेण्यामित्याह-'एयाए चेवे'ति, 'अस्यामेव' अनन्तराधिकृतधर्मास्तिकायादिसम्बन्धिन्यां, कथंभूतायामित्याह-एक आदिर्यस्यां सा एकादिकी एकैक उत्तरः प्रवर्द्धमानो यस्यां सा एकोत्तरा तस्यां, पुनः कथंभूतायामित्याह-'छगच्छगयाए'त्ति षण्णां गच्छः-समुदायः षड्गच्छस्तं गता-प्राप्ता षड्गच्छता तस्यां, धर्मास्तिकायादिवस्तुषट्कविषयायामित्यर्थः, आदौ व्यवस्थापि-तैककायाः पर्यन्ते न्यस्तषट्काया धर्मास्तिकायादिवस्तुषट्कविषयायाः पङ्क्तेर्या परस्परगुणने भङ्गकसङ्ख्या भवति सा आद्यन्तभङ्गकद्वयरहिता अनानुपूर्वीति भावार्थः।

तत्रोर्ध्वाधः किलैककादयः षट्पर्यन्ता अङ्काः स्थापिताः, तत्र चैककेन द्विके गुणिते जातौ द्वावेव, ताभ्यां त्रिको गुणितो जाताः षट्, तैरपि चतुष्कको गुणितो जाता चतुर्विंशतिः, पञ्चकस्य तु तद्गुणने जातं विंशं शतं, षट्कस्य तद्गुणने जातानि विंशत्यधिकानि सप्त शतानि, स्थापना

Jain Education International For Private & Personal Use Only www.jainelibrary.org

६५४३२१, आगमत्, ७२०, अत्राऽऽद्यो भङ्गः पूर्वानुपूर्वी अन्त्यस्तु पश्चानुपूर्वीति तदपगमे शेषाण्यष्टादशोत्तराणि सप्त भङ्गकशतान्यनानुपूर्वीति मन्तव्यानि। अत्र च भङ्गकस्वरूपानयनार्थ करणगाथा-

"पुव्वानुपुव्वि हिट्ठा समयाभेएण कुरु जहाजेट्ठं।
उवरिमतुल्लं पुरओ नसेज्ज पुव्वकम्मो सेसे ॥"

इति, व्याख्या-इह विवक्षितपदानां क्रमेण स्थापना पूर्वानुपूर्वीत्युच्यते, तस्याः, 'हेट्ठ'त्ति अधस्ताद् द्वितीयादिभङ्ककान्, जिज्ञासुः 'कुरु'त्ति स्थापय एकादीनि पदानीति शेषः, कथ-मित्याह-ज्येष्ठस्यानतिक्रमेण यथाज्येष्ठं, यो यस्मादौ स तस्य ज्येष्ठो, यथा द्विकस्यैयको ज्येष्ठः, त्रिकस्य त्वेककोऽनुज्येष्ठः, चतुष्कादीनां तु स एव ज्येष्ठानुज्येष्ठ इति, एवं त्रिकस्य द्विको ज्येष्ठः, स एव चतुष्कस्यानुज्येष्ठः, पञ्चकादीनां तु स एव ज्येष्ठानुज्येष्ठ इत्यादि, एव च सति उपरितनाङ्कस्य अधस्ताज्ज्येष्ठो निक्षिप्यते, तत्रालभ्यमाने अनुज्येष्ठः, तत्राप्यलभ्यमाने ज्येष्ठानुज्येष्ठ इति यथा-ज्येष्ठं निक्षेपं कुर्यात्, कथमित्याह-'समयाभेदेने'ति समयः-सङ्केतः प्रस्तुतभङ्ककरचनव्यवस्था तस्य अभेदः-अनतिक्रमः, तस्य च भेदस्तदा भवति यदा तस्मिन्नेव भङ्गके निक्षिप्ताङ्कसदृशोऽ-परोऽङ्कः पतति, ततो यथोक्तं समयभेदं वर्जयन्नेव ज्येष्ठाद्यङ्कनिक्षेपं कुर्याद्, उक्तं च-

"जहियंमि उ निक्खित्ते पुनरवि सो चेव होइ कायव्वो।
सो होइ समयभेओ वज्जेयव्वो पयत्तेणं॥"

निक्षिप्तस्य चाङ्कस्य यथासम्भवं 'पुरओ'त्ति अग्रतः उपरितनाङ्कैस्तुल्यं-सदृशं यथा भवेत्येवं न्यसेत्, उपरितनाङ्कसदृशानेवाङ्कान्निक्षेपेदित्यर्थः, 'पुव्वक्कमो सेसे'त्ति स्थापितशेषानङ्कान्नि-क्षिप्ताङ्कस्य यथासम्भवं पृष्ठतः पूर्वक्रमेण स्थापयेदित्यर्थः, यः संख्यया लघुरेककादिः स प्रथमं स्थाप्यते वस्तुतया महान् द्विकादिः स पश्चादिति पूर्वक्रमः, पूर्वानुपूर्वीलक्षणे प्रथमभङ्गके इत्थमेव दृष्टत्वादिति भाव इत्यक्षरघटना।

भावार्थस्तु दिग्मात्रदर्शनार्थ सुखाधिगमाय च त्रीणि पदान्याश्रित्य तावद् दर्श्यते-तेषां च परस्पराभ्यासे षड् भङ्गका भवन्ति, ते चैवमानीयन्ते-पूर्वानुपूर्वीलक्षणस्तावत् प्रथमो भङ्गः, तद्यथा-१२३, अस्याश्च पूर्वानुपूर्व्या अधस्ताद्, भङ्गकरचने क्रियमाणे एककस्य तावज्ज्येष्ठ एव नास्ति, द्विकस्य तु विद्यते एकः, स तदधो निक्षिप्यते, तस्य चाग्रतस्त्रिको दीयते, 'उवरिमतुल्ल' मित्यादिवचनात्, पृष्ठतस्तु स्थापितशेषो द्विको दीयते, ततोऽयं द्वितीयो भङ्गः २१३, अत्र च द्विकस्य विद्यते एकको ज्येष्ठः, परं नासौ तदधस्तान्निक्षिप्यते, अग्रतः सदृशाङ्कपातेन समय-भेदप्रसङ्गात्, एकस्य तु ज्येष्ठ एव नास्ति, त्रिकस्य तु विद्यते द्विको ज्येष्ठः, स तदधस्तान्निक्षिप्यते, अत्र चाग्रभागस्य तावदसम्भव एव, पृष्ठतस्तु स्थापितशेषावेककत्रिकौ क्रमेण स्थाप्येते 'पुव्व-क्कमो सेसे' त्तिवचनात्, ततस्तृतीयोऽयं भङ्गः १३२, अत्राप्येककस्य ज्येष्ठ एव नास्ति, त्रिकस्य ज्येष्ठो द्विको, न च निक्षिप्यते, अग्रे सदृशाङ्कपातेन समयभेदापत्तेः, ततोऽस्यैवानुज्येष्ठ एककः स्थाप्यते, अग्रतस्तु द्विकः 'उवरिमतुल्ल'मित्यादिवचनात्, पृष्ठतस्तु स्थापितशेषस्त्रिको दीयते इति चतुर्थोऽयं भङ्गः ३१२, एवमनया दिशा पञ्चमषष्ठावप्यभ्यूह्यौ, सर्वेषां चामीषामियं स्थापना-अत्राप्याद्यभङ्गस्य पूर्वानुपूर्वीत्वादन्त्यस्य च पश्चानुपूर्वीत्वान्मध्यमा एव चत्वारोऽ२१३ १२३

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अनानुपूर्वीत्वेन मन्तव्याः एवमनया दिशा चतुरादिपदसम्भविनोऽपि भङ्गा भावनीयाः, भूयां-सश्चेहोत्तराध्ययन१३२ नटीकादिनिर्दिष्टाः प्रस्तुतभङ्गानयनोपायाः सन्ति, न चोच्यन्तेऽतिविस्तर-भयात्, तदर्थिना तु तत एवावधारणीयाः । ३१२ तदिदमत्र तात्पर्यम्-

पूर्वानुपूर्व्यां तावद्धर्मास्तिकायस्य प्रथमत्वमेव, तदनुक्रमेणाधर्मास्तिकायादीनां द्वितीया-दित्वं, २३१ पश्चानुपूर्व्यां त्वद्धासमयस्य प्रथमत्वं, पुद्गलास्तिकायादीनां तु प्रतिलोमतया द्वितीयादित्यम्, अनानुपूर्व्यां त्व ३२१ नियमेन कचिद्‌भभङ्गके कस्यचित् प्रथमत्वमित्यलं विस्तरेण । 'से त'मित्यादि निगमनम् ।

तदेवमत्र पक्षे धर्मास्तिकायादीनि षडपि द्रव्याणि पूर्वानुपूर्व्यादित्वेनोदाहृतानि, साम्प्रतं त्वेकमेव पुद्गलास्तिकायमुदाहर्तुमाह-

*मू. ( १११ ) अहवा उवनिहिआ दव्वानुपुव्वी तिविहा प० पं०- पुव्वानुपुव्वी पच्छानुपुव्वी अनानुपुव्वी,*

*से किं तं पुव्वानुपुव्वी ?, २ परमाणुपोग्गले दुपएसिए तिपएसिए जावदसपएसिए संखिज्ज-पएसिए असंखिज्जपएसिए अनंतपएसिए, से तं पुव्वानुपुव्वी,*

*से किं तं पच्छानुपुव्वी, २ अनंतपएसिए असंखिज्जपएसिए संखिज्जपएसिए जाव दसप-एसिए जाव तिपएसिए दुपएसिए परमाणुपोग्गले, से तं पच्छानुपुव्वी,*

*से किं तं अनानुपुव्वी ?, २ एआए चेव एगाइआए एगुत्तरिआए अनंतगच्छगयाए सेढीए अन्नमन्नब्भासो दूरूवूणो, से तं अनानुपुव्वी, से तं उवनिहिआ दव्वानुपुव्वी, से तं जाणगवइरित्ता दव्वानुपुव्वी, से तं नोआगमओ दव्वानुपुव्वी, से तं दव्वानुपुव्वी ।*

**वृ.** अत्र चौपनिधिक्या द्रव्यानुपूर्व्या ज्ञातमपि त्रैविध्यं यत्पुनरप्युपन्यस्तं तत्प्रकारान्तर-भणनप्रस्तावादेदेति मन्तव्यम्, 'अनंतगच्छगयाएत्ति अत्रैकोत्तरवृद्धिमत्स्कन्धानामनन्त-त्वादनन्तानां गच्छः-समुदायोऽनन्तगच्छस्तं गता अनन्तगच्छगता तस्याम्, अत एव भङ्गा अत्रानन्ता एवावसेया इति ।

शेषभावना च सर्वा पूर्वोक्तानुसारतः स्वयमप्यवसेसेति । आह-ननु यथैकः पुद्गलास्ति-कायो निर्धार्य पुनरपि पूर्वानुपूर्व्यादित्वेनोदाहृतः, एवं शेषा अपि प्रत्येकं किमिति नोदाह्रियन्ते ? अत्रोच्यते, द्रव्याणां क्रमः-परिपाट्यदिलक्षणाः पूर्वानुपूर्व्यादिविचार इह प्रक्रान्तः, स च द्रव्या-बाहुल्ये सति संभवति, धर्माधर्माकाशास्तिकायेषु च पुद्गलास्तिकायवन्नास्ति प्रत्येकं द्रव्यबाहु-ल्यम्, एकैकद्रव्यत्वात्तेषां, जीवास्तिकाये त्वनन्तजीवद्रव्यात्मकत्वादस्ति द्रव्यबाहुल्यं, केवलं परमाणुद्विप्रदेशिकादिद्रव्याणामिव जीवद्रव्याणां पूर्वानुपूर्व्यादित्वनिबन्धनः प्रथमपाश्चात्यादि-भावो नास्ति, प्रत्येकमसंख्येयप्रदेशत्वेन सर्वेषां तुल्यप्रदेशत्वात्, परमाणुद्विप्रदेशिकादिद्रव्याणां तु विषमप्रदेशिकत्वादिति, अद्धासमयस्यैकत्वादेव तदसम्भव इत्यलमतिचर्चितेन ।

तदेवं समर्थिता औपनिधिकी द्रव्यानुपूर्वी, तत्समर्थने च समर्थिता प्रागुद्दिष्टा द्विप्रकाराऽपि द्रव्यानुपूर्वी, ततः 'से त'मित्यादीनि निगमनानि, इति द्रव्यानुपूर्वी समाप्ता ।

उक्ता द्रव्यानुपूर्वी, अथ प्रागुद्दिष्टामेव क्षेत्रानुपूर्वी व्याचिख्यासुराह-

*मू. ( ११२ ) से किं तं खेत्तानुपुव्वी ?, २ दुविहा पन्नत्ता, तंजहा- उवनिहिआ य अनोव-*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*निहिआ य।*

***मू. ( ११३ )*** *तत्थ णं जा सा उवनिहिआ सा ठप्पा, तत्थ णं जा सा अनोवनिहिआ सा दुविहा पन्नत्ता, तंजहा-नेगमववहाराणं संगहस्स य।*

**वृ.** इह क्षेत्रविषया आनुपूर्वी क्षेत्रानुपूर्वी, का पुनरियामित्यत्र निर्वचनं-क्षेत्रानुपूर्वी द्विविधा प्रज्ञप्ता, तद्यथा-औपनिधिकीपूर्वोक्तशब्दार्था अनौपनिधिकी च, तत्र या सा औपनिधिकी सा स्थाप्या, अल्पवक्तव्यत्वादुपरि वक्ष्यत इत्यर्थः, तत्र याऽसावनौपनिधिकी सा नयवक्तव्यताश्रयणाद् द्विविधा प्रज्ञप्ता, तद्यथा-नैगमव्यवहारयोः संग्रहस्य च, सम्मतेति शेषः।

तत्र नैगमव्यवहारसम्मतां तावद्दर्शयितुमाह-

***मू. ( ११४ )*** *से किं तं नेगमववहाराणं अनोवनिहिआ खेत्तानुपुव्वी ?, २ पंचविहा पन्नत्ता, तंजहा-अट्ठपयपरूवणया भंगसमुक्कित्तणया भंगोवदंसणया समोआरे अनुगमे,*

*से किं तं नेगमववहाराणं अट्ठपयपरूवणया ?, २ तिपएसोगाढे आनुपुव्वी जाव दसपएसोगाढे आनुपुव्वी जाव संखिज्जपएसोगाढे आनुपुव्वी असंखिज्जपएसोगाढे आनुपुव्वी, एगपएसोगाढे अनानुपुव्वी, दुपएसोगाढे अवत्तव्वए, तिपएसोगाढे आनुपुव्वीओ जाव दसपएसोगाढा आनुपुव्वीओ जाव असंखिज्जपएसोगाढा आनुपुव्वीओ एगपएसोगाढा अनानुपुव्वीओ दुपएसोगाढा अवत्तव्वगाइं, से तं नेगमववहाराणं अट्ठपयपरूवणा एआए नं नेगमववहाराणं अट्ठपयपरूवणयाए किं पओअंणं ?, एयाए नेगमववहाराणं अट्ठपयपरूवणयाए नेगमववहाराणं भंगसमुक्कित्तणया कज्जइ।*

*से किं तं नेगमववहाराणं भंगसमुक्कित्तणया ?, २ अत्थि आनुपुव्वी अत्थि अनानुपुव्वी अत्थि अवत्तव्वए, एवं दव्वानुपुव्विगमेणं खेतानुपुव्वीएऽवि ते भेव छव्वीसं भंगा भाणिअव्वा, जाव से तं नेगमववहाराणं भंगसमुक्कित्तणया। एआए णं नेगमववहाराणं भंगसमुक्कित्तणयाए किं पओअणं ?, एआए णं नेगमववहाराणं भंगसमुक्कित्तणयाए नेगमववहाराणं भंगोवदंसणया कज्जइ।*

*से किं तं नेगमववहाराणं भंगोवदंसणया ?, २ तिपएसोगाढे आनुपुव्वी एगपएसोगाढे अनानुपुव्वी दुपएसोगाढे अवत्तव्वए तिपएसोगाढा आनुपुव्वीओ एगपएसोगाढा अनानुपुव्वीओ दुपएसोगाढा अवत्तव्वगाइं, अहवा तिपएसोगाढे अ एगपएसोगाढे अ आनुपुव्वी अ अनानुपुव्वी अ एवं तहा चेव दव्वानुपुव्विगमेणं छव्वीसं भंगा भाणिअव्वा जाव से तं नेगमववहाराणं भंगोवदंसणया।*

*से किं तं समोआरे ?, २ नेगमववहाराणं आनुपुव्वीदव्वाइं कहिं समोअरंति ? किं आनुपुव्वीदव्वेहिं समोअरंति ? किं अनानुपुव्वीदव्वेहिं समोअरंति ? अवत्तव्वगदव्वेहिं समोअरंति ?, आनुपुव्वीदव्वाइं आनुपुव्वीदव्वेहिं समोअरंति नो अनानुपुव्वीदव्वेहिं नो अवत्तव्वयदव्वेहिं समोअरंति ?, एवं तिन्निवि सट्ठाणे समोअरंतित्ति भाणिअव्वं, से तं समोआरे।*

*से किं तं अनुगमे ?, २ नवविहे पन्नत्ते, तंजहा-*

***मू. ( ११५ )*** *संतपयपरूवणया जाव अप्पाबहुं चेव।*

**वृ.** इह व्याख्या यथा द्रव्यानुपूर्व्यां तथैव कर्तव्या, विशेषं तु वक्ष्यामः, तत्र 'तिपएसोगाढे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आनुपुव्वी'त्ति, त्रिषु-नभः-प्रदेशेष्ववगाढः-स्थितः त्रिप्रदेशावगाढस्त्र्यणुकादिकोऽनन्ताणुकपर्यन्तो द्रव्यस्कन्ध एवानुपूर्वी, ननु यदि द्रव्यस्कन्ध एवानुपूर्वी कथं तर्हि तस्य क्षेत्रानुपूर्वीत्वं ?, सत्यं किन्तु क्षेत्रप्रदेशत्रयावगाहपर्यायविशिष्टोऽसौ द्रव्यस्कन्धो गृहीतो नाविशिष्टः, ततोऽत्र क्षेत्रानुपूर्व्यधिकारात् क्षेत्रावगाहपर्यायस्य प्राधान्यात् सोऽपि क्षेत्रानुपूर्वीति न दोषः, प्रदेशत्रयलक्षणस्य क्षेत्रस्यैवात्र मुख्यं क्षेत्रानुपूर्वीत्वं तदधिकारादेव, किन्तु तदवगाढं द्रव्यमपि तत्पर्यायस्य प्राधान्येन विवक्षितत्वात् क्षेत्रानुपूर्वीत्वेन न विरुध्यत इति भावः, यद्येवं तर्हि मुख्यं क्षेत्रं परित्यज्य किमिति तदवगाढद्रव्यस्यानुपूर्व्यादिभावश्चिन्त्यते ?, उच्यते,

'संतपयपरूवयणे'त्यादिवक्ष्यमाणबहुतरविचारविषयत्वेन द्रव्यस्य शिष्यमतिव्युत्पादनार्थत्वात्, क्षेत्रस्य तु नित्यत्वेन सदावस्थितमानत्वादचलत्वाच्च प्रायो वक्ष्यमाणविचारस्य सुप्रतीतत्वेन तथाविधशिष्यमतिव्युत्पत्त्यविषयत्वाद्, एवमन्यदपि कारणमभ्युह्यमित्यलं विस्तरेणं, एवं चतुष्प्रदेशावगाढादिष्वपि भावना कार्या, यावदसङ्खयातप्रदेशागाढा आनुपूर्वीति, असङ्खयातप्रदेशेषु चावगाढोऽसङ्खयाताणुकोऽनन्ताणुको वा द्रव्यस्कन्धो मन्तव्यो, यतः पुद्गलद्रव्याणामवगाहमित्थं जगद्गुरवः प्रतिपादयन्ति-परमाणुराकाशस्यैकस्मिन्नेव प्रदेशेऽवगाहते, द्विप्रदेशिकादयोसङ्खयातप्रदेशिकान्तास्तु स्कन्धाः प्रत्येकं जघन्यत एकस्मिन्नाकाशप्रदेशेऽवगाहन्ते, उत्कृष्टतस्तु यत्र स्कन्धे यावन्तः परमाणवो भवन्ति स तावत्स्वेव नभःप्रदेशेष्ववगाहते, अनन्ताणुकस्कन्धस्तु जघन्यतस्तथैव उत्कृष्टतस्त्वसङ्खयेयेष्वेव नभःप्रदेशेष्ववगाहते, नानन्तेषु, लोकाकाशस्यैवासङ्खयेयप्रदेशत्वात्, अलोकाकाशे च द्रव्यस्यावगाहाभावादित्यलं प्रसङ्गेन, प्रकृतमुच्यते,

तत्रानुपूर्वीप्रतिक्षत्वादनानुपूर्व्यादिस्वरूपमाह-'एगपएसोगाढे अनानुपुव्वी'त्ति, एकस्मिन्नभःप्रदेशे अवगाढः-स्थित एकप्रदेशावगाढः परमाणुसङ्घातः स्कन्धसङ्घातश्च क्षेत्रतोऽनानुपूर्वीति मन्तव्यः, 'दुप्पएसोगाढे अवत्तव्वए'त्ति, प्रदेशद्वयेऽवगाढो द्विप्रदेशिकादिस्कन्धः क्षेत्रतोऽवक्तव्यकं, शेषो बहुवचननिर्देशादिको ग्रन्थो यथाऽधस्ताद् द्रव्यानुपूर्व्यां व्याख्यातस्तथेहापि तदुक्तानुसारतो व्याख्येयो, यावद् द्रव्यप्रमाणद्वारे।

*मू. (११६) नेगमववहाराणं आनुपुव्वीदव्वाइं किं अत्थि ?, नत्थि नियमा अत्थि, एवं दुन्निवि। नेगमववहाराणं आनुपुव्वीदव्वाइं किं संखिज्जाइं असंखिज्जाइ अनंताइं ?, नो संखिज्जाइं असंखिज्जाइं नो अनताइं, एवं दुन्निवि।*

वृ. 'नेगमववहाराणं आनुपुव्वीदव्वाइं किं संखेज्जाइं'इत्यादि प्रश्नः, अत्रोत्तरम्-'नो संखेज्जाइ'मित्यादि, त्र्यादिप्रदेशविभागावगाढानि द्रव्याणि क्षेत्रत आनुपूर्वीत्वेन निर्दिष्टानि, त्र्यादिप्रदेशविभागाश्चासङ्खयातप्रदेशात्मके लोकेऽसङ्खयाता भवन्ति, अतो द्रव्यतया बहूनामपि क्षेत्रावगाहामपेक्ष्य तुल्यप्रदेशावगाढानामेकत्वात्, क्षेत्रानुपूर्व्यामसङ्खयातान्येवानुपूर्वीद्रव्याणि भवन्तीति भावः, एकमेकप्रदेशावगाढं बह्वपि द्रव्यं क्षेत्रत एकैवानानुपूर्वीत्युक्तं, लोके च प्रदेशा असङ्खयाता भवन्ति, अतस्तत्तुल्यसङ्खयत्वादनानुपूर्वीद्रव्याण्यप्यसङ्खयेयानीति, एवं प्रदेशद्वयेऽवगाढं बह्वपि द्रव्यं क्षेत्रत एकमेवावक्तव्यकमुक्तं, द्विप्रदेशात्मकाश्च विभागा लोकेऽसङ्खयाता भवन्त्यतस्त्यान्यप्यसङ्खयेयानीति। क्षेत्रद्वारे निर्वचनसूत्रे-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*मू. ( ११६ वर्तते ) नेगमववहाराणं आनुपुव्वीदव्वाइं लोगस्स किं संखिज्जइभागे होज्जा असंखिज्जइभागे होज्जा जाव सव्वलोए होज्जा ?, एगं दव्वं पडुच्च लोगस्स संखिज्जइभागे वा होज्जा असंखिज्जइभागे वा होज्जा संखेज्जेसु० असंखेज्जेसु भागेसु वा होज्जा, देसूने वा लोए होज्जा, नानादव्वाइं पडुच्च नियमा सव्वलोए होज्जा।*

*नेगमववहाराणं अनानुपुव्वीदव्वाणं पुच्छाए एगदव्वं पडुच्च नो संखिज्जइभागे होज्जा असंखिज्जइभागे होज्जा नो संखेज्जेसु० नो असंखेज्जेसु० नो सव्वलोए होज्जा, नानादव्वाइं पडुच्च नियमा सव्वलोए होज्जा, एवं अवत्तदव्वगदव्वाणिवि भाणिअव्वाणि।*

वृ. इह स्कन्धद्रव्याणां विचित्ररूपत्वात्, कश्चित् स्कन्धो लोकस्य संख्येयं भागमवगाह्य तिष्ठति, अन्यस्त्वसंख्येयम्, अन्यस्तं संख्येयाँस्तद्भागानवगाह्य वर्तते, अन्यस्त्वसंख्येयेया-नित्यतस्तत्तस्कन्धद्रव्यापेक्षया संख्येयादिभागवर्तित्वं भावनीयं, विशिष्टक्षेत्रावगाहोपलक्षितानां स्कन्धद्रव्याणामेव क्षेत्रानुपूर्वीत्वेनोक्तत्वादिति भावः।

'देसूने वा लोए होज्ज' त्ति, देशोने वा लोके आनुपूर्वीद्रव्यं भवेदिति, अत्राऽऽह-नन्वचित्त-महास्कन्धस्य सर्वलोकव्यापकत्वं पूर्वमुक्तं, तस्य च समस्तलोकवर्त्यसंख्येयप्रदेशलक्षणायां क्षेत्रानुपूर्व्यामवगाढत्वात् परिपूर्णस्यापि क्षेत्रानुपूर्वीत्वं न किञ्चिद् विरुध्यते, अतस्तदपेक्षं क्षेत्रतोऽप्यानुपूर्वीद्रव्यं सर्वलोकव्यापि प्राप्यते, किमिति देशोनलोकेव्यापिता प्रोच्यते ?, सत्यं, किन्तु लोकोऽयमानुपूर्व्यनानुपूर्व्यवक्तव्यकद्रव्यैः सर्वदैवाशून्य एवैष्टव्य इति समयस्थितिः, यदि चात्रानुपूर्व्याः सर्वलोकव्यापिता निर्दिश्येत तदाऽनानुपूर्व्यवक्तकद्रव्याणां निरवकाश-तयाऽभावः प्रतीयते (येत), ततोऽचित्तमहास्कन्धपूरितेऽपि लोके जघन्यतोऽप्येकः प्रदेशोऽ-नानुपूर्वीविषयत्वेन प्रदेशद्वयं चावक्तव्यकविषयत्वेन विवक्ष्यते, आनुपूर्वीद्रव्यस्य तत्र सत्त्वेऽप्यप्राधान्यविवक्षणादनानुपूर्व्यवक्तव्यकयोस्तु प्राधान्यविवक्षणादिति भावः, ततोऽनेन प्रदेशत्रयलक्षणेन देशेन हीनोऽत्र लोकः प्रतिपादित इत्यदोषः, उक्तं च पूर्वमुनिभिः-

"महखंधापुण्णेऽविय अवत्तव्वगऽनानुपुव्विदव्वाइं।
जद्देसोगाढाइं तद्देसेणं स लोगूनो ॥"

ननु यद्येवं तर्हि द्रव्यानुपूर्व्यामपि सर्वलोकव्यापित्वमानुपूर्वीद्रव्यस्य यदुक्तं तदसङ्गतं प्राप्नोति, अनानुपूर्व्यवक्तव्यकद्रव्याणामनवकाशत्वेन तत्राप्यभावप्रतीतिप्रसङ्गात्, सर्वकालं च तेषामप्यवस्थितिप्रतिपादनात्, नैतदेवं, यतो द्रव्यानुपूर्व्यां द्रव्याणामेवानुपूर्व्यादिभाव उक्तो, न क्षेत्रस्य, तस्य तत्रानधिकृतत्वाद्, द्रव्याणां चानुपूर्व्यादीनां परस्परभिन्नानामप्येकत्रापि क्षेत्रेऽवस्थानं न किञ्चिद्विरुध्यते, एकापवरकान्तर्गतानेकप्रदीपप्रभाऽवस्थानदृष्टान्तादिसिद्ध-त्वात्, अतो न तत्र कस्याप्यनवकाशः, अत्र तु द्रव्याणामौपचारिक एवानुपूर्व्यादिभावो मुख्यस्तु क्षेत्रस्यैव क्षेत्रानुपूर्व्यधिकारात्, ततो यदि लोकप्रदेशाः सामस्त्येनैवानुपूर्व्या क्रोडीकृताः स्युस्तदा किमन्यदनानुपूर्व्यवक्तकतया प्रतिपद्येत ?, यस्त्विहैव येष्वाकाशप्रदेशेष्वानुपूर्व्यस्तेष्वेवेतर-योरपि सद्भावः कथयिष्यते स द्रव्यावगाहभेदेन क्षेत्रभेदस्य विवक्षणाद्, अत्र तु तदविवक्षणा-दिति, तस्मादनानुपूर्व्यवक्तव्यकविषयप्रदेशत्रयलक्षणेन देशेन लोकस्योनता विवक्षितेति, अथवा आनुपूर्वीद्रव्यस्य स्वावयवरूपा देशाः कल्प्यन्ते, यथा पुरुषस्यांगुल्यादयः, ततश्च

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विवक्षिते कस्मिंश्चिद्देशे देशिनोऽसद्भावो विवक्ष्यते, यथा पुरुषस्यैवांगुलीदेशे, देशत्वस्यैव तत्र प्राधान्येन विवक्षितत्वादिति भावः, न च वक्तव्यं देशिनो देशो न कश्चिद्भिन्नो दृश्यते, एकान्ताभेदे देशमा त्रस्य देशिमात्रस्य चाभावप्रसङ्गात्, ततश्च समस्तलोकक्षेत्रावगाहपर्यायस्य प्राधान्याश्रयणादत्राचित्तमहास्कन्धस्याऽऽनुपूर्वीत्वेऽपि देशोन एव लोकः, स्वकीयैकस्मिन् देशे तस्याभावविवक्षणात्, तस्मिंश्चानुपूर्व्यव्याप्तदेशे इतरयोरवकाशः सिद्धो भवतीति भावः, न च देशदेशिभावः कल्पनामात्रं सभ्भत्यादिन्यायनिर्दिष्टयुक्तिसिद्धत्वादित्यलं प्रसङ्गेन, 'नाणा-दव्वाइ'मित्यादि, त्र्यादिप्रदेशावगाढद्रव्यभेदतोऽत्राऽऽनुपूर्वीणां नानात्त्वं, तैश्च त्र्यादिप्रदेश-वगाढैर्द्रव्यभेदैः, सर्वोऽपि लोको व्याप्त इति भावः।

अत्रानानुपूर्वीचिन्तायामेकद्रव्यं प्रतीत्य लोकस्यासङ्ख्येय भागवर्तित्वमेव, एकप्रदेशाव-गाढस्यैवानानुपूर्वीत्वेन प्रतिपादनाद्, एकप्रदेशस्य च लोकासङ्ख्येयभागवर्तित्वादिति, 'नानादव्वाइं पडुच्च नियमा सव्वलोए होज्ज'त्ति, एकैकप्रदेशावगाढैरपि द्रव्यभेदैः समस्त-लोकव्याप्तेरिति, एवम् 'अवत्तव्वगदव्वाणिवि'त्ति, अवक्तव्यकद्रव्यमप्येकं लोकासङ्ख्येयभाग एव वर्तते, द्विप्रदेशावगाढस्यैवावक्तव्यकत्वेनाभिधानत्, प्रदेशद्वयस्य च लोकासङ्ख्येय-भागवर्तित्वादिति, तथा प्रत्येकं द्विप्रदेशावगाढैरपि द्रव्यभेदैः समस्तलोकव्याप्तेर्नानाद्रव्याणा-मत्रापि सर्वलोकव्यापित्वमवसेयमिति।

अत्राह-नन्वानुपूर्व्यादिद्रव्याणि त्रीण्यपि सर्वलोकव्यापीनीत्युक्तानि, ततश्च येष्वेवाकाश-प्रदेशेष्वानुपूर्वी तेष्वेवेतरयोरपि सद्भावः प्रतिपादितो भवति, कथं चैतत् परस्परविरुद्धं भिन्नविषयं व्यपदेशत्रयमेकस्य स्यात्?, अत्रोच्यते, इह त्र्यादिप्रदेशावगाढात् द्रव्याद्भिन्नमेव तावदेकप्रदेशावगाढं, ताभ्यां च भिन्नं द्विप्रदेशावगाढं, ततश्चाधेयस्यावगाहकद्रव्यस्य भेदादाधार-स्याप्यवगाह्यस्य भेदः स्यादेव, तथा च व्यपदेशभेदो युक्त एव, अनन्तधर्माध्यासिते च वस्तुनि तत्तत्सहकारिसन्निधानात्तत्तद्धर्माभिव्यक्तौ दृश्यत एवछ समकालं व्यपदेशभेदो, यथा खड्गकुन्त-कवचादियुक्ते देवदत्ते खड्गी कुन्ती कवचीत्यादिरिति, इह कचिद् वाचनान्तरे "अनानुपुव्वी-दव्वाइं अवत्तव्वगदव्वाणि जहेव हिट्ठे'ति अतिदेशे एव दृश्यते, तत्र 'हेट्ठे'ति यथाऽधस्ताद् द्रव्यानुपूर्व्यामनयोः क्षेत्रमुक्तं तथाऽत्रापि ज्ञातव्यमित्यर्थः तच्च व्याख्यातमेव, इत्येवमन्यत्रापि यथासम्भवं वाचनान्तरमवगन्तव्यममिति॥ गतं क्षेत्रद्वारं,

*मू.( ११६ वर्तते ) नेगमववहाराणं आनुपुव्वीदव्वाइं, लोगस्स किं संखेज्जइभाग फुसंति असंखेज्जइभागं फुसंति संखेज्जे भागे फुसंति जाव सव्वलोअं फुसंति?, एगं दव्वं पडुच्च संखिज्जइभागं वा फुसइ असंखिज्जइभागं असंखिज्जइभागे (संखेज्जे भागे वा) असंखेज्जे भागे वा देसूनं वा लोगं फुसइ, नानादव्वाइं पडुच्च नियमा सव्वलोअं फुसंति, अनानुपुव्वीदव्वाइं अवत्तव्वगदव्वाइं च जहा खेत्तं नवरं फुसणा भाणियव्वा॥*

**वृ.** स्पर्शनाद्वारमपि चेत्थमेव निखिलं भावनीयं, नवरमत्र कस्याश्चिद्वाचनाया अभिप्रायेणानु-पूर्व्यामेकद्रव्यस्य संख्येयभागादारभ्य यावद्देशोनलोकस्पर्शना भवतीति ज्ञायते, अन्यस्यास्त्व-भिप्रायेण संख्येयभागादारभ्य यावत् सम्पूर्णलोकस्पर्शना स्यादित्यवसीयते, एतच्च द्वयमपि बुध्यत एव, यतो यदि मुख्यतया क्षेत्रप्रदेशानामानुपूर्वीत्त्वमङ्गीक्रियते तदा अनानुपूर्व्यवक्तव्य-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कयोर्निरवकाशाताप्रसङ्गात् पूर्ववद्देशोनता लोकस्य वाच्या, अथानुपूर्वीरूपे क्षेत्रेऽवगाढत्वा- दचित्तमहास्कन्धस्यैवानुपूर्वीत्वं तर्हि द्रव्यानुपूर्व्यामिवात्रापि सम्पूर्णता लोकस्य वाच्येति, न चात्रानुपूर्व्या सकलस्यापि लोकस्य स्पृष्टत्वादितरयोरवकाशाभाव इति वक्तव्यम्, एकैक- प्रदेशरूपे द्विद्विप्रदेशरूपे च क्षेत्रेऽवगाढानां प्रत्येकमसङ्ख्येयाना द्रव्यभेदानां सद्भावतस्तयोरपि प्रत्येकमसङ्ख्येयभेदयोर्लोके सद्भावाद्, द्रव्यावगाहभेदेन च क्षेत्रभेदस्येह विवक्षितत्वादिति भावः, वृद्धबहुमतश्चायमपि लक्ष्यते, तत्त्वं तु केवलिनो विदन्ति।

क्षेत्रस्पर्शनयोस्तु विशेषः प्राग् निदर्शित एवेति, गतं स्पर्शनाद्वारं, अथ कालद्वारं-

*मू. ( ११६ वर्तते ) नेगमववहाराणं आनुपुव्वीदव्वाइं कालओ केवच्चिरं होइ ?, एवं तिन्निवि, एगं दव्वं पडुच्च जहन्नेणं एगं समयं उक्कोसेणं असंखिज्जं कालं, नानादव्वाइं पडुच्च नियमा सव्वद्धा ॥*

वृ. तत्र क्षेत्रावगाहपर्यायस्य प्राधान्यविवक्षया त्र्यादिप्रदेशवगाढद्रव्याणामेवानुपूर्व्यादिभावः पूर्वमुक्तः, अतस्तेषामेवावगाहस्थितिकालं चिन्तयन्नाह-'एगं दव्वं पडुच्चे'त्यादि, अत्र भावना-इह द्विप्रदेशावगाढस्य वा एकप्रदेशावगाढस्य वा द्रव्यस्य परिणामवैचित्र्यात् प्रदेशत्रयाद्यवगाहभवने आनुपूर्वीव्यपदेशः सञ्जातः, समयं चैकं तद्भावमनुभूय पुनस्तथैव द्विप्रदेशावगाढमेकप्रदेशावगाढं वा तद्रव्यं संजातमित्यानुपूर्व्याः समयो जघन्यावगाहस्थितिः, यदा तु तदेवो द्रव्यमसंख्येय कालं तद्भावमनुभूय पुनस्तथैव द्विप्रदेशावगाढमेकप्रदेशावगाढं वा जायते तदा उत्कृष्टतया असङ्ख्येयोऽवगाहस्थितिकालः, सिद्ध्यति, अनन्तस्तु न भवति, विवक्षितैकद्रव्यस्यैकावगाहेनोत्कृष्टताऽप्यसङ्ख्यातकालमेवावस्थानादिति, नानाद्रव्याणि तु 'सर्वाद्धा' सर्वकालमेव भवन्ति, त्र्यादिप्रदेशावगाढद्रव्यभेदानां सदैवावस्थानादिति, एवं यदा समयमेकं किञ्चिद् द्रव्यमेकस्मिन् प्रदेशेऽवगाढं स्थित्वा ततो द्व्यादिप्रदेशावगाढं भवति तदाऽनानुपूर्व्याः समयो जघन्याऽवगाहस्थितिः, यदा तु तदेवासङ्ख्यातं कालं तद्रूपेण स्थित्वा ततो द्व्यादिप्रदेशावगाढं भवति तदोत्कृष्टतोऽसंख्येयोऽवगाहस्थितिकालः नानाद्रव्याणि तु सर्वकालम्, एकप्रदेशावगाढद्रव्यभेदानां सर्वदैव सद्भावादिति, अवक्तव्यकस्य तु द्विप्रदेशा- वगाढस्य समयादूर्ध्वमेकस्मिंस्त्र्यादिषु वा प्रदेशेष्ववगाहप्रतिपत्तौ जघन्यः समयोऽवगाह- स्थितिः, असंख्येयकालादूर्ध्वं द्विप्रदेशावगाहं परित्यजत उत्कृष्टोऽसंख्येयोऽगाहस्थितिकालः सिद्ध्यति, नानाद्रव्याणि तु सर्वकालं, द्विप्रदेशावगाढद्रव्यभेदानां सदैव भावादिति, एवं समान- वक्तव्यत्वादतिदिशति-

'एवं दोन्निवि'त्ति। इदानीमन्तरद्वारम्-

*मू. ( ११६ वर्तते ) नेगमववहाराणं आनुपुव्वीदव्वाणमंतरं कालओ केवच्चिरं होइ ?, तिण्हंपि एगं दव्वं पडुच्च जहन्नेणं एक्कं समयं उक्कोसेणं असंखेज्ज कालं, नानादव्वाइं पडुच्च नत्थि अंतरं ॥*

वृ. 'जहन्नेणं एक्कं समयं'ति, अत्र भावना-इह यदा त्र्यादिप्रदेशावगाढं किमप्यानुपूर्वीद्रव्यं समयमेकं एकस्माद्विवक्षितक्षेत्रादन्यत्रावगाहं प्रतिपद्य पुनरपि केवलमन्यद्रव्यसंयुक्तं वा तेष्वेव विवक्षितत्र्याद्याकाशप्रदेशेष्ववगाहते तदैकानुपूर्वीद्रव्यस्य समयो जघन्योऽन्तरकालः प्राप्यते,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'उक्कोसेणं असंखेज्जं कालं'ति तदेव यदाऽन्येषु क्षेत्रप्रदेशेष्वसङ्खयेयं कालं परिभ्रम्य केवलमन्यद्रव्यसंयुक्तं वा समागत्य पुनरपि तेष्वेव विवक्षितत्र्याद्याकाशप्रदेशेष्ववगाहते तदोत्कृष्टतोऽसङ्खयेयोऽन्तरकालः प्राप्यते, न पुनर्द्रव्यानुपूर्व्यामिवानन्ततो, यतो द्रव्यानुपूर्व्यां विवक्षितद्रव्यादन्ये द्रव्यविशेषा अनन्ताः प्राप्यन्ते, तैश्च सह क्रमेण संयोगे उक्ताऽनन्तः कालः, अत्र तु विवक्षितावगाहक्षेत्रादन्यत् क्षेत्रमसङ्खयेयमेव, प्रतिस्थानं चावगाहनामाश्रित्य संयोगस्थितिरत्राप्यसङ्खयेवकालैव, ततश्चासङ्खयेय क्षेत्रे परिभ्रमत्ता द्रव्येण पुनरपि केवलेनान्यसंयुक्तेन वाऽसङ्खयेयकालात्तेष्वेव नभःप्रदेशेष्वागत्यावगाहनीयं, न च वक्तव्यमसङ्खयेयेऽपि क्षेत्रे पौनःपुन्येन तत्रैव परिभ्रमणे कस्मादनन्तोऽपि कालो नोच्यत इति ?, यत इहासङ्खयेयक्षेत्रेऽसङ्खयेयकालमेवान्यत्र तेन पर्यटितव्यं, तत ऊर्ध्वं पुनस्तस्मिन्नेव विवक्षितक्षेत्रे नियमादवगाहनीयं वस्तुस्थितिस्वाभाव्यादिति तावदेकीयं व्याख्यानमादर्शितम्।

अन्ये तु व्याचक्षते-यस्मात् त्र्यादिप्रदेशलक्षणाद्विवक्षितक्षेत्रात् तदानुपूर्वीद्रव्यमन्यत्र गतं तस्य क्षेत्रस्य स्वभावादेवासङ्खयेयकालादूर्ध्वं तेनैवानुपूर्वीद्रव्येण वर्णगन्धरसस्पर्शसङ्ख्यादिधर्मैः सर्वथा तुल्येनान्येन वा तथाविधाधेयेन संयोगे सति नियमात् तथाभूताधारतोपपत्तेरसङ्खयेय एवान्तरकाल इति, तत्त्वं तु केवलिनो विदन्ति, गम्भीरत्वात् सूत्रप्रवृत्तेरिति। 'नानादव्वाइं'-इत्यादि, न हि त्र्यादिप्रदेशावगाढानुपूर्वीद्रव्याणि युगपत् सर्वाण्यपि तद्भावं विहाय पुनस्तथैव जायन्त इति कदाचिदपि सम्भवति, असङ्खयेयानां तेषां सर्वदैवोक्तत्वादिति भावः। अनानुपूर्व्यवक्तव्यकद्रव्येष्वप्यसावेवैकानेकद्रव्याश्रया अन्तरकालवक्तव्यता, केवलमाननुपूर्वीद्रव्यस्यैकप्रदेशावगाढस्यावक्तव्यकद्रव्यस्य तु द्विप्रदेशावगाढस्य पुनस्तथाभवनेऽन्तरकालश्चिन्तनीयः, शेषा तु व्याख्याद्वयभावना सर्वाऽपि तथैवेति।

उक्तमन्तरद्वारम्, साम्प्रतं भागद्वारमुच्यते-

*मू. ( ११६ वर्तते ) नेगमववहाराणं आनुपुव्वीदव्वाइं सेसदव्वाणं कइभागे होज्जा ?, तिन्निवि जहा दव्वानुपुव्वीए॥*

**वृ.** तत्र यथा द्रव्यानुपूर्व्यां तथाऽत्राप्यानुपूर्वीद्रव्याणि अनानुपूर्व्यवक्तव्यकलक्षणेभ्यः शेषद्रव्येभ्योऽसङ्खयेयैर्भागैरधिकानि, शेषद्रव्याणि तु तेषामसंख्येयभागे वर्तन्त इति। अत्राह-ननु त्र्यादिप्रदेशावगाढानि द्रव्याण्यानुपूर्व्य एकैकप्रदेशावगाढान्यनानुपूर्व्यो द्विद्विप्रदेशावगाढान्यवक्तव्यकानीति प्राक् प्रतिज्ञातम्, एतानि चानुपूर्व्यादीनि सर्वस्मिन्नपि लोके सन्त्यतो युक्त्या विचार्यमाणान्यानुपूर्वीद्रव्याण्येव स्तोकानि ज्ञायन्ते, तथाहि-असत्कल्पनया किल लोके त्रिंशत् प्रदेशाः, तत्र चानानुपूर्वीद्रव्याणि त्रिंशदेव अवक्तव्यकानि तु पञ्चदश आनुपूर्वीद्रव्याणि तु यदि सर्वस्तोकतया त्रिप्रदेशनिष्पन्नानि गण्यन्ते तथापि दशैव भवन्तीति शेषेभ्यः स्तोकान्येव प्राप्नुवन्ति, कथमसङ्खयेयगुणानि स्युरिति ?, अत्रोच्यते, एकस्मिन्नानुपूर्वीद्रव्ये ये नभःप्रदेशा उपयुज्यन्ते ते यद्यन्यस्मिन्नपि नोपयज्येरँस्तदा स्यादेवं, तच्च नास्ति, यत एकस्मिन्नपि प्रदेशत्रयनिष्पन्ने आनुपूर्वीद्रव्ये ये त्रयः प्रदेशास्त एवान्यान्यरूपतयाऽवगाढेनाधेयद्रव्येणाक्रान्ताः सन्तः प्रत्येकमनेकेषु त्रिकसंयोगेषु गण्यन्ते, प्रतिसंयोगमाधेयद्रव्यस्य भेदात्, तद्भेदे चाधारभेदादिति भावः, एवमान्यान्याचतुष्प्रदेशावगाढाद्याधेयेनाध्यासितत्वात्त

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवानेकेपु चतुष्कसंयोगेष्वनेकेपु पञ्चकसंयोगेषु यावदनेकेष्वसंख्येयकसंयोगेपु प्रत्येकमुपयुज्यन्ते, एव चतुरादिप्रदेशनिष्पन्नेष्वप्यानुपूर्वीद्रव्येपु ये चतुरादयः प्रदेशास्तेषामप्यन्यान्यसंयोगोपयोगिता भावीनया, तस्मादसंख्येयप्रदेशात्मके स्वस्थित्या व्यवस्थिते लोके यावन्तस्त्रिकसंयोगादयोऽसंख्येयकसंयोगपर्यन्ताः संयोगा जायन्ते तावन्त्यानुपूर्वीद्रव्याणि भवन्ति, प्रतिसंयोगमाधेयद्रव्यस्य भेदेनावस्थितिसद्भावाद्, आधेयभेदे चाधारभेदात् न हि नभःप्रदेशा येनैव स्वरूपेणैकस्मिन्नाधेये उपयुज्यन्ते तेनैव स्वरूपेणाधेयान्तरेऽपि, आधेयैकताप्रसङ्गाद्, एकस्मिन्नाधारस्वरूपे तदवगाह्यभ्युपगमाद्, घटे तत्स्वरूपवत्, तस्मात्त्यादिसंयोगानां लोके बहुत्वादानुपूर्वीणां बहुत्वं भावनीयम्, अवक्तव्यकानि तु स्तोकानि, द्विकसंयोगानां तत्र स्तोकत्वाद्, अनानुपूर्व्योऽपि स्तोका एव, लोकप्रदेशसंख्यमात्रत्वाद्।

अत्र सुखप्रतिपत्त्यर्थं लोके किल प्रञ्चाकाशप्रदेशाः कल्प्यन्ते, अत्रानानुपूर्व्यस्तावत् पञ्चैव प्रतीताः, अव्यक्तव्यकानि त्वष्टौ, द्विकसंयोगानामिहाष्टानामेव सम्भवाद्, आनुपूर्व्यस्तु पोडश संभवन्ति, दशानां त्रिकसंयोगानां पञ्चानां चतुष्कसंयोगानामेकस्य तु पञ्चकयोगस्येह लाभाद्, दश त्रिकयोगाः कथमिह लभ्यन्ते ? इति चेद्, उच्यते, षट् तावत् मध्यव्यवस्थापितेन सह लभ्यन्ते चत्वारस्तु त्रिकसंयोगा दिग्व्यवस्थापितैश्चतुर्भिरेव केवलैरिति, चतुष्कयोगास्तु चत्वारो मध्यव्यवस्थापितेन सह लभ्यन्ते एकस्तु, तन्निरपेक्षैर्दिग्व्यवस्थितैरेनेति सर्वे पञ्च, पञ्चकयोगस्तु प्रतीत एवेति, तदेवं प्रदेशपञ्चकप्रस्तारेऽप्यानुपूर्वीणां बाहुल्यं दृश्यते, अत एव तदनुसारेणद्भासवतोऽसंख्येयप्रदेशात्मके लोकेऽत्रानुपूर्वीद्रव्याणां शेषेभ्योऽसंख्यातगुणत्वं भावनीयमित्यलं विस्तरेण। उक्तं भावद्वारम्, साम्प्रतं भावद्वारम्-

**मू. ( ११६ वर्तते )** *नेगमववहाराणं आनुपुव्वीदव्वाइं कयरंमि भावे होज्जा ?, नियमा साइपरिणामिए भावे होज्जा, एवं दोन्निवि।*

**वृ.** तत्र त द्रव्याणां त्र्यादिप्रदेशावगाहपरिणामस्य एकप्रदेशावगाहपरिणामस्य द्विप्रदेशावगाहपरिणामस्य च सदापिरिणामिकत्वात् त्रयाणामपि सदापिरिणामिकत्वात् त्रयाणामपि सदापिरिणाभिकभाववर्तित्वं भावनीयमिति। अल्पबहुत्वद्वारे-

**मू. ( ११६ वर्तते )** *एएसि णं भंते! नेगमववहाराणं आनुपुव्वीदव्वाणं अनानुपुव्वीदव्वाणं अवत्तव्वगदव्वाण य दव्वट्ठयाए पएसट्ठयाए दव्वट्ठपएसट्ठयाए कयरे कयरेहिंतो अप्पा वा बहुवा वा तुल्ला वा विसेसाहिआ वा ?, गोयमा! सव्वत्थोवाइं नेगमववहाराणं अवत्तव्वगदव्वाइं दव्वट्ठयाए अनानुपुव्वीदव्वाइं दव्वट्ठयाए विसेसाहियाइं आनुपुव्वीदव्वाइं दव्वट्ठयाए असंखेज्जगुणाइं पएसट्ठयाए सव्वत्थोवाइं नेगमववहाराणं अनानुपुव्वीदव्वाइं अपएसट्ठयाए अवत्तव्वगदव्वाइं पएसट्ठयाए विसेसाहियाइं आनुपुव्वीदव्वाइं पएसट्ठयाए असंखेज्जगुणाइं, दव्वट्ठपएसट्ठयाए सव्वत्थोवाइं नेगमववहाराणं अवत्तव्वगदव्वाइं दव्वट्ठयाए अनानुपुव्वीदव्वाइं दव्वट्ठयाए अपएसट्ठयाए विसेसाहिआइं अवत्तव्वगदव्वाइं पएसट्ठयाए विसेसाहियाइं आनुपुव्वीदव्वाइं तं नेगमववहाराणं अनोवनिहिआ खेत्तानुपुव्वी॥*

**वृ.** इह द्रव्यगणनं द्रव्यार्थता प्रदेशगणनं प्रदेशार्थता उभयगणनं तूभयार्थता, तत्रानुपूर्व्यां



Jain Education International For Private & Personal Use Only www.jainelibrary.org

विशिष्टद्रव्यावगाहोपलक्षितास्त्र्यादिनभःप्रदेशसमुदायास्तावद् द्रव्याणि समुदायारम्भकास्तु प्रदेशाः अनानुपूर्व्यां त्वेकैकप्रदेशावगाहिद्रव्योपलक्षिताः सकलनभःप्रदेशाः प्रत्येकं द्रव्याणि, प्रदेशास्तु न संभवन्ति, एकैकप्रदेशद्रव्ये हि प्रदेशान्तरायोगदा, अवक्तव्यकेषु तु यावन्तो लोके द्विकयोगाः संभवन्ति तावन्ति प्रत्येकं द्रव्याणि तदारम्भकास्तु प्रदेशा इति, शेषा त्वत्र व्याख्या द्रव्यानुपूर्वीवत् कर्तव्येति, नवरं 'सव्वत्थोवाइं नेगमववहाराणं अवत्तव्वगदव्वाइ'मित्यादि, अत्राह-ननु यदा पूर्वोक्तयुक्त्या एकैको नभःपदेशोऽनेकेषु द्विकसुयोगेषूपयुज्यते तदा अनानुपूर्वीद्रव्येभ्योऽवक्तव्यकद्रव्याणामेव बाहुल्यमवगम्यते, यतः पूर्वोक्तायामपि पञ्चप्रदेशनभःकल्पनायामवक्तव्यकद्रव्याणामेवाष्टसंख्योपेतानां पञ्चसंख्येभ्योऽनानुपूर्वीद्रव्येभ्यो बाहुल्यं दृष्टं, तत्कथमत्र व्यत्ययः प्रतिपाद्यते ?, सत्यम्, अस्त्येतत् केवलं लोकमध्ये, लोकपर्यन्तवर्तिनिष्कुटगतास्तु ये कण्टकाकृतयो विश्रेण्या निर्गता एकाकिनः प्रदेशास्ते विश्रेणिव्यवस्थितत्वादवक्तव्यकत्वायोग्या इत्यनानुपूर्वीसंख्यायामेवान्तर्भवन्ति, अतो लोकमध्यगतां निष्कुटगतां च प्रस्तुतद्रव्यसंख्यां मीलयित्वा यदा केवली चिन्तयति तदाऽवक्तव्यकद्रव्याण्येव स्तोकानि, अनानुपूर्वीद्रव्याणि तु तेभ्यो विशेषाधिकतां प्रतिपद्यन्ते, अत्र निष्कुटस्थापना ४४४, अत विश्रेणिलिखितौ द्वौ अववक्तव्यकायोग्यौ तु तेभ्योऽसंख्यातगुणत्वं भावितमेव, शेषु द्रव्यानुपूर्व्यनुसारेण भावनीयं, नवरमुभयार्थताविचारे आनुपूर्वीद्रव्याणि स्वद्रव्येभ्यः प्रदेशार्थतयाऽसंख्येयगुणानि, कथम् ?, एकैकस्य तावद् द्रव्यस्य त्र्यादिभिरसंख्येयान्तैर्नभभःप्रदेशैरारब्धत्वात्, नभः-प्रदेशानां च समुदितानामप्यसंख्येयत्वादिति।

'से त'मित्यादि निगमनद्वयम्।

उक्ता नैगमव्यवहारमतेनानौपनिधिकी क्षेत्रानुपूर्वी, अथ तामेव संग्रहमतेन बिभणिषुराह-

*मू. (११७) से किं तं संगहस्स अनोवनिहिआ खेत्तानुपुव्वी ?, २ पंचविहा पन्नत्ता, तंजहा- अट्ठपयपरूवणया भंगसमुक्कित्तणया भंगोवदंसणया समोआरे अनुगमे, से किं तं संगहस्स अट्ठपयपरूवणया ?, २ तिपएसोगाढे आनुपुव्वी चउप्पएसोगाढे आनुपुव्वी जाव दसपएसोगाढे आनुपुव्वी संखिज्जपएसोगाढे आनुपुव्वी असंखिज्जपएसोगाढे आनुपुव्वी एगपएसोगाढे अनानुपुव्वी दुपएसोगाढे अवत्तव्वए, से तं संगहस्स अट्ठपयवरूवणया*

*एआए णं संगहस्स अट्ठपयपरूवणया कि पओअणं ?, संगहस्स अट्ठपयपरूवणयाए संगहस्स भंगसमुक्कित्तणया कज्जइ, से किं तं संगहस्स भंगसमुक्कित्तणया ?, अत्थि आनुपुव्वी अत्थि अनानुपुव्वी अत्थि अवत्तव्वए, अहवा अत्थि आनुपुव्वी अ अनानुपुव्वी अ एवं जहा दव्वानुपुव्वीए संगहस्स तहा भाणिअव्वं भाव से तं संगहस्स भंगसमुक्कित्तणया।*

*एआए णं संगहस्स भंगसमुक्कित्तणयाए किं पओअणं ?, एआए णं संगहस्स भंगसमुक्कित्तणयाए संगहस्स भंगोवंदसणया कज्जइ, से किं तं संगहस्स भंगोवदसंणया ?, २ तिपएसोगाढे आनुपुव्वी एगपएसोगाढे अनानुपुव्वी दुपएसोगाढे अवत्तव्वए अहवा तिपएसोगाढे अ एगपएसोगाढे अ आनुपुव्वी अ अनानुपुव्वी अ एवं जहा दव्वानुपुव्वीए संगहस्स तहा खेत्तानुपुव्वीएवि भाणिअव्व जाव से तं संगहस्स भंगोवदंसणया।*

*से किं तं समोआरे ?, २ संगहस्स आनुपुव्वीदुव्वाइं कहिं सहोअरंति ? किं आनुपुव्वीदव्वेहिं*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*समोअरंति अनानुपुव्वीदव्वेहिं अवत्तव्वगदव्वेहिं ?, तिन्निवि सट्ठाणे समोअरंति, से तं समोआरे।*

*से किं तं अनुगमे ?, २ अट्ठविहे पन्नत्ते, तंजहा-*

*मू. ( ११८ ) संतपयपरूवणया जाव अप्पाबहुं नत्थि॥*

*मू. ( ११९ ) संहगस्स आनुपुव्वीदव्वाइं किं अत्थि नत्थि ?, नियमा अत्थि, एवं तिन्निव, सेसगदाराइं जहा दव्वानुपुव्वीए संगहस्स तहा खेत्तानुपुव्वीएपि भाणिअव्वाइं, जाव से तं अनुगमे। से तं संगस्स अनोवनिहिआ खेत्तानुपुव्वी। से तं अनोवनिहिआ खेत्तानुपुव्वी।*

**वृ.** इह संग्रहाभिमतद्रव्यानुपूर्व्यनुसारेण निखिलं भावनीयं, नवरं क्षेत्रप्राधान्यादत्र 'तिपए-सोगाढा आनुपुव्वी जाव असंखेज्जपएसोगाढा आनुपुव्वी एगपएसोगाढा अनानुपुव्वी दुपए-सोगाढा अवत्तव्वए'इत्यादि वक्तव्यं, शेप तथैवेति ॥ उक्ता अनौपनिधिकी क्षेत्रानुपूर्वी, अथौपनिधिकीं तां निर्दिदिक्षुराह-

*मू. ( १२० ) से किं तं उवनिहिआ खेत्तानुपुव्वी ?, २ तिविहा पन्नत्ता, तंजहा-पुव्वानुपुव्वी पच्छानुपुव्वी अनानुपुव्वी। से किं तं पुव्वानुपुव्वी ?, २ अहोलोए तिरिअलोए, से तं पुव्वानु-पुव्वी। से कंकिं तिं पच्छानुपुव्वी ?, २ उड्ढलोए तिरिअलोए अहोलोए, से तं पच्छानुपुव्वी। से किं तं अनानुपुव्वी ?, २ एआए चेव एगाइआए एगुत्तरिआए तिगच्छगयाए सेढीए अन्नमन्नब्भासो दुरूवूणो, से तं अनानुपुव्वी।*

**वृ.** अत्र व्याख्या पूर्ववत् कर्तव्या, नवरं तत्र द्रव्यानुपूर्व्यधिकाराद् धर्मास्तिकायादिद्रव्याणि पूर्वानुपूर्व्यादित्वेनोदाहृतानि अत्र तु क्षेत्रानुपूर्व्यधिकारादधोलोकादिक्षेत्रविशेषा इति, इह चोर्ध्वाधश्चतुर्दशरज्ज्वायतस्य विस्तरतस्त्वनियतस्स पञ्चास्तिकायमयस्य लोकस्य त्रिधा परिकल्पनेऽधोलोकादिविभागाः सम्पद्यन्ते, तत्रास्यां रत्नप्रभायां बहुसमभूआगे मेरुमध्ये नभः-प्रतरद्वयेऽष्टप्रदेशो रुचकः समस्ति, तस्य च प्रतरद्वयस्य मध्ये एकस्मादधस्तनप्रतरादारभ्या-धोऽभिमुखं नव योजनशतानि परिहृत्य परतः सातिरेकसप्तरज्ज्वायतोऽधोलोकः, तत्र लोक्यते-केवलिप्रज्ञया परिच्छिद्यत इति लोकः, अधोव्यवस्थितो लोकोऽधोलोकः, अथवा अधः-शब्दोऽशुभपर्यायः, तत्र च क्षेत्रानुभावाद् बाहुल्येनाशुभ एव परिणामो द्रव्याणां जायते, अतोऽशुभपरिणामवद्द्रव्ययोगादधः-अशुभो लोकोऽधोलोकः, उक्तं च-

"अहव अहोपरिणामो खेत्तनुभावेन जेण ओसन्नं।
असुभो अहोत्ति भणिओ दव्वाणं तेनऽहोलोगो ॥"त्ति,

तस्यैव रुचकप्रतरद्वयस्य मध्ये एकस्मादुपरितनप्रतरादारभ्योर्ध्वं नव योजनशतानि परिहृत्य परत किञ्चिन्न्यूनसप्तरज्ज्वायत ऊर्ध्वलोकः, ऊद्धर्वम्-उपरि व्यवस्थापितो लोकः ऊद्धर्वलोकः, अथवा ऊद्धर्वशब्दः शुभपर्यायः, तत्र च क्षेत्रस्य शुभत्वात्तदनुभावाद्, द्रव्याणां प्रायः शुभ एव परिणामा भवन्ति, अतः शुभपरिणामवद्द्रव्ययोगादूर्ध्वः-शुभो लोक ऊद्धर्वलोकः, उक्तं च-

"उड्ढंति उवरि जं चिय सुभखित्तं खेत्तओ य दव्वगुणा।
उप्पज्जंति सुभा वा तेण तओ उड्ढलोगोत्ति॥"

तयोश्चाधोलोकोर्ध्वलोकयोर्मध्ये अष्टादशयोजनशतानि तिर्यग्लोकः, समयपरिभाषया तिर्यग्-मध्ये व्यवस्थितो लोकस्तिर्यग्लोकः, अथवा तिर्यक्शब्दो मध्यमपर्यायः, तत्र च

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्षेत्रानुभावात् प्रायो मध्यमपरिणामवन्त्येव द्रव्याणि संभवन्ति, अतस्तद्योगात्तिर्यङ्-मध्यमो लोकस्तिर्यग्लोकः, अथवा स्वकीयोर्ध्वाधोभागात्तिर्यग्भाग एवातिविशालतयाऽत्र प्रधानम्, अतस्तेन व्यपदेशः कृतः, तिर्यग्भागप्रधानो लोकस्तिर्यग्लोकः, उक्तं च-

"मज्झनुभावं खेत्तं जं तं तिरयंति वयणपज्ञवओ ।
भण्णइ तिरियं विसालं अतो व तं तिरियलोगोत्ति ॥"

'वयणपज्ञवओ'त्ति मध्यानुभाववचनस्य तिर्यग्ध्वनेः पर्यायतामाश्रित्येत्यर्थः । अत्र च जघन्यपरिणामवद्द्रव्ययोगतो जघन्यतया गुणस्थानकेषु मिथ्यादृष्टेरिवादावेवाधोलोकस्योपन्यासः, तदुपरि मध्यमद्रव्यवत्त्वात् मध्यमतया तिर्यग्लोकस्य, तदुपरिष्टादुत्कृष्टद्रव्यवत्त्वादूर्ध्वलोकस्योपन्यास इति पूर्वानुपूर्वीत्वसिद्धिः, पश्चानुपूर्वी तु व्यत्ययेन प्रतीतैव, अनानुपूर्व्यां तु पदत्रयस्य षड् भङ्गा भवन्ति, ते च पूर्वं दर्शिता एव, शेषभावना त्विह प्राग्वदेवेति। अत्र च कचिद्वाचनान्तरे एकप्रदेशावगाढादीनां असंख्यातप्रदेशावगाढान्तानां प्रथमं पूर्वानुपूर्व्यादिभाव उक्तो दृश्यते, सोऽपि क्षेत्रानुपूर्व्यधिकारादविरुद्ध एव, सुगमत्वाच्चोक्तानुसारेण भावनीय इति।

साम्प्रतं वस्त्वन्तरविषयत्वेन पूर्वानुपूर्व्यादिभावं दिदर्शयिषुरधोलोकादीना च भेदपरिज्ञाने शिष्यव्युत्पत्ति पश्यन्नाह-

*मू. (१२०) अहोलोअखेत्तानुपुव्वी तिविहा पन्नत्ता, तंजहा-पुव्वानुपुव्वी पच्छानुपुव्वी अनानुपुव्वी । से किं तं पुव्वानुपुव्वी ?, २ रयणप्पभा सक्करप्पभा वालुअप्पभा पंकप्पभा धूमप्पभा तमप्पभा तमतमप्पभा, से तं पुव्वानुपुव्वी । से कि तं पच्छानुपुव्वी ?, २ तमतमा जाव रयणप्पभा, से तं पच्छानुपुव्वी । से किं तं अनानुपुव्वी ?, २ एआए चेव एगाइआए एगुत्तरिआए सत्तगच्छगयाए सेढीए अन्नमन्नब्भासो दूरूवूणो, से तं अनानुपुव्वी ।*

*तिरिअलोअखेत्तानुपुव्वी तिविहा पन्नता, तंजहा-पुव्वानुपुव्वी पच्छानुपुव्वी अनानुपुव्वी । से किं तं पुव्वानुपुव्वी ?*

**वृ.** 'अहोलोयखेत्तानुपुव्वी तिविहे'त्यादि, अधोलोकक्षेत्रविषया आनुपूर्वी, औपनिधिको प्रक्रमाल्लभ्यते, सा त्रिविध, प्रज्ञप्ता, तद्यथेत्यादि शेषं पूर्ववद्भावनीयं यावद्रत्नप्रभेत्यादि, इन्द्रनीलादिबहुविधरत्नस्म्भावन्नरकवर्ज्जं प्रायो रत्नानां प्रभाज्योत्स्ना यस्यां सा रत्नप्रभा, एवं शर्कराणाम्-उपलखण्डानां प्रभा प्रकाशनं स्वरूपेणावस्थानं यस्यां सा शर्कराप्रभा, वालुकाया वालिकाया वा-परुषपांशूत्कररूपायाः प्रभा-स्वरूपावस्थितिर्यस्यां सा वालुकाप्रभा वालिकाप्रभा वेति, पङ्कस्यप्रभा यस्यां सा पङ्कप्रभा, प्रङ्काभद्रव्योपलक्षितेत्यर्थः, धूमस्यप्रभा यस्यां सा धूमप्रभा, धूमाभद्रव्योपलक्षितेत्यर्थः, तमसः प्रभा यस्यां सा तमःप्रभा कृष्णद्रव्योलक्षितेत्यर्थः, क्वचित्तमेति पाठः, तत्रापि तमोरूपद्रव्ययुक्तत्वात्तमा इति, महातमसः प्रभा यस्यां सा महातमःप्रभा अतिकृष्णद्रव्योपलक्षितेत्यर्थः, क्वचित्तमतमेति पाठः, तत्राप्यतिशयवत्तमस्तमस्तमस्तद्रूपद्रव्ययोगात्, तमस्तमा इति, अत्र प्रज्ञापकप्रत्यासन्नेति रत्नप्रभाया आदावुपन्यासः कृतः, ततः परं व्यवहितव्यवहिततरादित्वात् क्रमेण शर्कराप्रभादीनामिति पूर्वानुपूर्वीत्वं, व्यत्ययेन पशश्चानुपूर्वीत्वम्, अमीषां च सप्तानां पदानां परस्पराभ्यासे पञ्च सहस्राणि चत्वारिंशदधिकानि भङ्गानां भवन्ति, तानि चाद्यन्तभङ्गकद्वयरहितान्यनानुपूर्व्यां दृष्टव्यानीति, शेषभावना पूर्ववदिति।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तिर्यग्लोके क्षेत्रानुपूर्व्यां 'जंबूद्दीवे' इत्यादिगाथा –

*मू. ( १२१ ) जंबूद्दीवे लवणे धायइ कालोअ पुक्खरे वरुणे।*
*खीर घय खोअ नंदी अरुणवरे कुंडले रुअगे॥*

वृ. द्वाभ्यां प्रकाराभ्यां स्थानदातृत्वाहाराद्युपष्टम्भहेतुत्वलक्षणाभ्यां प्राणिनः पान्तीति द्वीपाः–जन्त्वावासभूतक्षेत्रविशेषाः सह मुद्रया–मर्यादया वर्तन्त इति समुद्राः–प्रचुरजलोपलक्षिताः क्षेत्रविशेषा एव, एते च तिर्यग्लोके प्रत्येकसंख्येया भवन्ति, तत्र समस्तद्वीपसमुद्राभ्यन्तरभूतत्वेनादौ तावज्जम्बूवृक्षेणोपलक्षितो द्वीपो जम्बूद्वीपः, ततस्तं परिक्षिप्य स्थितो लवणरसास्वादनीरपूरितः समुद्रो लवणसमुद्रः, एकदेशेन समुदायस्य गम्यमानत्वाद्, एवं पुरस्तादपि यथासम्भवं द्रष्टव्यं, 'धायइ कालोय'त्ति, ततो लवणसमुद्रं परिक्षिप्य स्थितो धातकीवृक्षखण्डोपलक्षितो द्वीपो धातकीखण्डः, तत्परितोऽपि शुद्धोदकरसास्वादः कालोदः समुद्रः, तं च परिक्षिप्य स्थितः पुष्करैः–पद्मवैररुपलक्षितो द्वीपः पुष्करवरद्वीपः, तत्परितोऽपि शुद्धोदकरसास्वाद एव पुष्करोदः समुद्रः, अनयोश्च द्वयोरप्येकेनैव पदेनात्र संग्रहो द्रष्टव्यः 'पुक्खरे'त्ति, एवमुत्तरत्रापि, ततो 'वरुणो'त्ति वरुणवरो द्वीपस्ततो वारुणीरसास्वादो वारुणोदाः समुद्रः, 'खीर'त्ति क्षीरवरो द्वीपः क्षीररसास्वादः क्षीरोदः समुद्रः, 'घय'त्ति घृतवरो द्वीपः घृतरसास्वादो धृतोदः समुद्रः, 'खोय'त्ति इक्षुवरो द्वीपः इक्षुरसास्वाद एवेक्षुरसः सुमद्रः, इत ऊर्ध्वं सर्वेऽपि समुद्राः द्वीपसदृशनामानो मन्तव्याः, अपरं च स्वयम्भूरमणवर्जाः सर्वेऽपीक्षुरसास्वादाः तत्र द्वीपनामान्यमूनि, तद्यथा नन्दी–समृद्धिस्तया ईश्वरो द्वीपो नन्दीश्वरः, एवमरुणवरः अरुणावासः कुण्डलवरः शङ्खवरः रुचकवर इत्येवं षड् द्वीपनामानि चूर्णौ लिखितानि दृश्यन्ते सूत्रे तु 'नन्दी अरुणवरे कुण्डले रुयगे'इत्येतस्मिन् गाथादले चत्वार्येव तान्युपलभ्यन्ते, अतः चूर्णिलिखितानुसारेण रुचकवस्त्रयोदशः, सूत्रलिखितानुसारतस्तु स एवैकादशो भवति, तत्त्वं तु केवलिनो विदन्तीति गाथार्थः।

इदानीमनन्तरोक्तद्वीपसमुद्राणामवस्थितिस्वरूपप्रतिपादनार्थं शेषाणां तं नामाभिधानार्थमाह–

*मू. ( १२२ ) जंबुद्दीवाओ खलु निरंतरा संसया असंखइमा,*
*भुयगवर कुसवरा वि य कौंचवराभरणमाईया॥*

वृ. "जंबूद्दीवाओ खलु" इति, व्याख्या–एते पूर्वोक्ताः सर्वेऽपि जम्बूद्वीपादारभ्य 'निरन्तरा' नैरन्तर्येण व्यवस्थिताः, न पुनरमीषामन्तरेऽपरो द्वीपः कश्चनापि समस्तीति भावः, ये तु शेषका भुजगवरादय इत ऊर्ध्वं वक्ष्यन्ते ते प्रत्येकमसंख्याततमा द्रष्टव्याः, तथाहि–'भुजगवरे'ति पूर्वोक्ताद् रुचकवराद् द्वीपादसंख्येयान् द्वीपसमुद्रान् गत्वा भुजगवरो नाम द्वीपः समस्ति, 'कुसवर'त्ति ततोऽप्यीसंख्येयाँस्तान् गत्वा कुशवरो नाम द्वीपः समस्ति, अपि चेति समुच्चये, 'कोंचवरे'ति ततोऽप्यसंख्येयाँस्तानतिक्रम्य क्रौञ्चवरो नाम द्वीपः समस्ति,

*मू. ( १२३ ) आभरणवत्थगंधे उप्पलतिलए अ पुढविनिहिरयणे।*
*वासहरदहनईओ विजया वक्खारकप्पिंदा॥*

वृ. 'आभरणमाई य'त्ति एवमसंख्येयान् द्वीपसमुद्रानुल्लंध्याऽऽभरणादयश्च–आभरणादिनामसदृशनामानश्च द्वीपा वक्तव्याः, समुद्रास्तु तत्सदृशनामन एव भवन्तीत्युक्तमेवेति गाथार्थः॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इयं च गाथा कस्याञ्चिद्वाचनायां न दृश्यत एव, केवलं कापि वाचनाविशेषे दृश्यते, टीकाचूर्ण्योस्तु तद्व्याख्यानमुपलभ्यत इत्यस्माभिरपि व्याख्यातेति। तानेवाभरणादीनाह-'आभरणवत्थे'-त्यादिगाथाद्वयम् (त्रयम्)। असंख्येयानाम् असंख्येयानां द्वीपानामन्ते आभरणवस्त्रगन्धोत्पल-तिलकादिपर्यायसदृशनामक एकैकोऽपि द्वीपस्तावद्वक्तव्यो यावदन्ते स्वम्भूरमणो द्वीपः, शुद्धोदकरसः स्वयम्भूरमण एव समुद्र इति गाथाद्वय(त्रय) भावार्थः।

*मू. ( १२४ )* *कुरुमंदरआवासा कूडाअ नक्खत्तचंदसूरा य।*
*देवे नागे जक्खे भूए अ सयंभुरमणे अ॥*

**वृ.** ननु यद्येवं तर्ह्यसंख्येयान् द्वीपानुतिक्रम्य ये वर्तन्ते तेषामेव द्वीपाना मेतानि नामान्याख्या-तानि, ये त्वन्तरालेषु द्वीपास्ते किंनामका इति वक्तव्यं?, सत्यं लोके पदार्थानां शङ्खध्वजकलश-स्वस्तिकश्रीवत्सादीनि यावन्ति शुभनामानि तैः सर्वैरप्युलक्षितास्तेषु द्वीपाः प्राप्यन्त इति स्वयमेव दृष्टव्यं, यत उक्तम्-"दीवसमुद्दा णं भंते! केवइया नामधिज्जेहिं पन्नत्ता?, गोयमा! जावइया लोए सुभा नामा सुभा रूवा सुभा गंधा सुभा रसा सुभा फासा एवइया नं दीवसमुद्दा नामधिज्जेहिं पन्नत्ता" इति, संख्या तु सर्वेषामसंख्येयस्वरूपा

"उद्धारसागराणं अड्ढाईज्जाणा जत्तिया समया।
दुगुणादुगुणपवित्थर दीवोदहि रज्जु एवइया॥"

इति गाथाप्रतिपादिता दृष्टव्या।

*मू. ( १२५ ) से तं पुव्वानुपुव्वी। से किं तं पच्छानुपुव्वी?, २ सयंभूरमणे अ जाव जंबूद्दीवे, से तं पच्छानुपुव्वी। से किं तं अनानुपुव्वी?, २ एआए चेव एगाइआए एगुत्तरिआए असंखेज्जगच्छगयाए सेढीए अन्नमन्नब्भासो दुरुवूणो, से तं अनानुपुव्वी।*

**वृ.** तदेवमत्र क्रमोपन्यासे पूर्वानुपूर्वी व्यत्येयन पश्चानुपूर्वी, अनानुपूर्वी त्वमीषामसंख्येयानां पदानां परस्पराभ्यासे येऽसंख्येया भङ्गा भवन्ति भङ्गकद्वयोना तत्स्वरूपा दृष्टव्येति॥

*मू. ( १२५ वर्तते ) उड्ढलोअखेत्तानुपुव्वी तिविहा पन्नत्ता, तंजहा-पुव्वानुपुव्वी पच्छानुपुव्वी अनानुपुव्वी। से किं तं पुव्वानुपुव्वी?, २ सोहम्मे ईसाने सणंकुमारे माहिंदे बंभलोए लंतए महासुक्के सहस्सारे आणए पाणए आरणे अच्चुए गेवेज्जविमाणे अनुत्तरविमाणे ईसिपब्भारा, से तं पुव्वानुपुव्वी। से किं तं पच्छानुपुव्वी?, २ ईसिपब्भारा जाव सोहम्मे, से तं पच्छानु-पुव्वी। से किं तं अनानुपुव्वी?, २ एआए चेव एगाइआए एगुत्तरिआए पन्नरसगच्छगयाए सेढीए अन्नमन्नब्भासो दुरूवूणो, से तं अनानुपुव्वी।*

*अहवा उवनिहिआ खेत्तानुपुव्वी तिविहा पन्नत्ता, तंजहा-पुव्वानुपुव्वी पच्छानुपुव्वी अनानुपुव्वी, से किं तं पुव्वानुपुव्वी?, २ एगपएसोगाढे दुपएसोगाढे दसपएसोगाढे संखिज्ज-पएसोगाढे जाव असंखिज्जपएसोगाढे, से तं पुव्वानुपुव्वी। से किं तं पच्छानुपुव्वी?, २ असंखिज्जपएसोगाढे संखिज्जपएसोगाढे जाव एगपएसोगाढे, से तं पच्छानुपुव्वी। से किं तं अनानुपुव्वी?, २ एआए चेव एगाइआए एगुत्तरिआए असंखिज्जगच्छगयाए सेढीए अन्नमन्नब्भासो दुरूवूणो, से तं अनानुपुव्वी।*

*से तं उवनिहिआ खेत्तानुपुव्वी। से तं खेत्तानुपुव्वी।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. ऊर्ध्वलोकक्षेत्रानुपूर्व्यां 'सोहम्मे'त्यादि, सकलविमानप्रधानसौधर्मावतंसकाभिधान-विमानविशेषोपलक्षितत्वात् सौधर्मः, एवं सकलविमानप्रधानेशानावतंसकविमानविशेषो-पलक्षित ईशानः, एवं तत्तद्विमानावतंसकप्राधान्येन तत्तन्नाम वाच्यं, यावत् सकलविमानप्रधाना-च्युतावतंसकाभिधानाविमानविशेषोपलक्षितोऽच्युतः, लोकपुरुषस्य ग्रीवाविभागे भवानि विमानानि ग्रैवेयकानि, नैषामन्यान्युत्तराणि विमानानि सन्तीत्यनुत्तरविमानानि, ईषद्भाराक्रान्त-पुरुषवन्नता अन्तेष्वितीषत्प्राग्भारेति, अत्र प्रज्ञापकप्रत्यासत्तेरादौ सौधर्मस्योपन्यासः, ततो व्यवहितादिरूपत्वात् क्रमेणेशानादीनामिति पूर्वानुपूर्वीत्वं, शेषभावना तु पूर्वोक्तानुसारतः कर्तव्येति क्षेत्रानुपूर्वी समाप्ता।

उक्ता क्षेत्रानुपूर्वी, साम्प्रतं प्रागुद्दिष्टामेव क्रमप्राप्तां कालानुपूर्वी व्याचिख्यासुराह-

*मू. ( १२६ ) से किं तं कालानु० ?, २ दुविहा पन्नत्ता, तंजहा-उवनिहिआ य अनोवनि-हिआ य।*

*मू. ( १२७ ) तत्थ णं जा सा उवनिहिआ सा ठप्पा, तत्थ नं जा सा अनोवनिहिआ सा दुविहा पन्नत्ता, तंजहा-नेगमववहाराणं संगहस्स य।*

*मू. ( १२८ ) से किं तं नेगमववहाराणं अनोवनिहिआ कालानु० ?, २ पंचविहा पन्नत्ता, तंजहा-अट्ठपयपरूवणया भंगसमुक्कित्तणया भंगोवदंसणया समोआरे अनुगमे।*

*मू. ( १२९ ) से किं तं नेगमववहाराणं अट्ठपयरूवणया ?, २ तिसमयट्ठिईए आनु० जाव दससमयट्ठिईए आनु० संखिज्जसमयट्ठिईए आनु० असंखिज्जसमयट्ठिईए आनु० एगसमयट्ठिईए अनानु० दुसमयट्ठिईए अवत्तव्वए तिसमयट्ठिईआओ आनुपुव्वीओ एगसमयट्ठिईआओ अनानु० दुसमयट्ठिईआओ अवत्तव्वगाइं, से तं नेगमववहाराणं अट्ठपयपरूवणया। एआए णं नेगमव-वहाराणं अट्ठपयपरूवणयाए किं पओअणं ?, एआए नं नेगमववहाराणं अट्ठपयपरूवणयाए नेगमववहाराणं भंगसमुक्कित्तणया कज्जइ।*

*मू. ( १३० ) से किं तं नेगमववहाराणं भंगसमुक्कित्तणया ?, २ अत्थि आनु० अत्थि अनानु० अत्थि अवत्तव्वए, एवं दव्वानुपुव्वीगमेणं कालानुपुव्वीएवि ते चेव छव्वीसं भंगा भाणिअव्वा जाव से तं नेगमववहाराणं भंगसमुक्कित्तणया। एआए नं नेगमववहाराणं भंगसमुक्कित्तणयाए किं पओअणं ?, एआए नं नेगमववहाराणं भंगसमुक्कित्तणयाए नेगमववहाराणं भंगोवदंसणया कज्जई*

*मू. ( १३१ ) से किं तं नेगमववहाराणं भंगोवदंसणया ?, २ तिसमयट्ठिईए आनु० एगस-मयट्ठिईए अनानु० दुसमयट्ठिईए अवत्तव्वए, तिसमयट्ठिईआ अनानुपुव्वीओ एगसमयट्ठिईआ अनानुपुव्वीओ दुसमयट्ठिईआ अवत्तव्वगाइं, अहवा तिसमयट्ठिईए अ एगसमयट्ठिईए अ आनु० अनानु० अ, एवं तहा चेव दव्वानु० गमेणं छव्वीसं भंगा भणिअव्वा, जाव से तं नेगमववहाराणं भंगोवदंसणया।*

*मू. ( १३२ ) से किं तं समोआरे ? २ नेगमववहाराणं आनु०दव्वाइं कहिं समोअरंति ? किं आनु०दव्वेहिं समोअरंति ? अनानु०दव्वेहिं ?, एवं तिन्निवि सट्ठाणे समोअरंति इति भाणिअव्वं। से तं समोआरे।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*मू. ( १३३ ) से किं तं अनुगमे ?, २ नवविहे पन्नत्ते, तंजहा-*

*मू. ( १३४ ) संतपयपरूवणया जाव अप्पाबहुं चेव ॥*

*मू. ( १३५ ) नेगमववहाराणं आनुपुव्वीदव्वाइं किं अत्थि नत्थि ?, नियमा तिन्निवि अत्थि। नेगमववहाराणं आनु० दव्वाइं किं संखेज्जाइं असंखेज्जाइं अनंताइं ?, तिन्निवि नो संखिज्जाइ असंखेज्जाइं नो अनंताइं।*

वृ. अत्राक्षरगमनिका यथा द्रव्याणुपूर्व्यां तथा कर्तव्या यावत् 'तिसमयट्ठिईए आनुपुव्वी' -त्यादि, त्रयः समयाः स्थितिर्यस्य परमाणुद्वयणुकत्र्यणुकाद्यनन्ताणुकस्कन्धपर्यन्तस्य द्रव्य-विशेषस्य स त्रिसमयस्थितिर्द्रव्यविशेष आनुपूर्वीति, आह-ननु यदि द्रव्यविशेष एवात्राप्यानुपूर्वी कथं तर्हि तस्य कालानुपूर्वीत्वं ?, नैतदेवम्, अभिप्रायापरिज्ञानाद्, यतः समयत्रयलक्षणकाल-पर्यायविशिष्टमेव द्रव्यं गृहीतं, ततश्च पर्यायपर्यायिणोः कथञ्चिदभेदात् कालपर्यायस्य चेह प्राधान्येन विवक्षितत्त्वाद् द्रव्यस्यापि विशिष्टस्य कालानुपूर्वीत्वं न दुष्यति, मुख्यं समयत्रयस्यै-वात्रानुपूर्वीत्वं, किन्तु तद्विशिष्टद्रव्यस्यापि तदभेदोपचारात्तदुक्तं इति भावः, एवं चतुःसमय-स्थित्यादिष्वपि वाच्यं, यावद्दश समयाः स्थितिर्यस्य परमाणवादिद्रव्यसङ्घातस्य स तथा, संख्येयाः समयाः स्थितिर्यस्य परमाण्वादेः स तथा, असंख्येयाः समयाः स्थितिर्यस्य परमाण्वादेः स तथा, अनन्तास्तु समया द्रव्यस्य स्थितिरेव न भवति, स्वाभाव्याद्, इत्युक्तमेवेति, शेषा बहुवचननिर्देशादिभावना पूर्ववदेव, एकसमस्थितिकं परमाण्वाद्यनन्ताणुकस्कन्धपर्यन्तं द्रव्यमनानुपूर्वी, द्विसमयस्थितिकं तं तदेवावक्तव्यकमिति, शेषं पूर्वोक्तानुसारेण सर्वं भावनीयं, यावद् द्रव्यप्रमाणद्वारे 'नो संखेज्जाइं असंखेज्जाइं नो अनंताइं' इति, अस्य भावना-

इह त्र्यादिसमयस्थितिकानि परमाण्वादिद्रव्याणि लोके यद्यपि प्रत्येकमनन्तानि प्राप्यन्ते तथाऽपि समयत्रयलक्षणायाः स्थितेरेकस्वरूपत्वात् कालस्य चेह प्राधान्येन द्रव्याबहुत्वस्य गुणीभूतत्वात् त्रिसमयस्थितिकैरनन्तैरप्येकमेवानुपूर्वीद्रव्यम्, एवं चतुःसमयलक्षणायाः स्थितेरेकत्वादनन्तैरपि चतुःसमयस्थितिकद्रव्यैरेकमेवानुपूर्वीद्रव्यम्, एवं समयवृद्ध्या ताव-ज्ज्ञेयं यावदसंख्येयसमयलक्षणायाः स्थितेरेकत्वादनन्तैरप्यसंख्येयसमयस्थितकैर्द्रव्यैरेक-मेवानुपूर्वीद्रव्यमिति, एवमसंख्येयान्येवात्रानुपूर्वीद्रव्याणि भवन्ति, एवमनानुपूर्व्यवक्तव्यक-द्रव्याण्यपि प्रत्येकमसंख्येयानि वाच्यानि, अत्राह-नन्वेकसमयस्थितिकद्रव्यास्यानानुपूर्वीत्वं द्विसमयस्थितिकस्य त्ववक्तकत्वमुक्तं तत्र यद्यप्येकद्विसमयस्थितिनि परमाण्वादिद्रव्याणि लोके प्रत्येकमनन्तानी लभ्यन्ते तथाऽप्यनन्तरोक्तत्वादुक्तयुक्त्यैव समयलक्षणाया द्विसमयलक्षणायाश्च स्थितेरेकैकरूपत्वाद्, द्रव्यबाहुल्यस्य च गुणीभूतत्वादेकमेवानानुपूर्वी-द्रव्यमेक मेव चावक्तव्यकद्रव्यं वक्तुं युज्यते, न तु प्रत्येकमसंख्येयत्वम्, अथ द्रव्यभेदेन भेदोऽङ्गीक्रियते तर्हि प्रत्येकमानन्त्यप्रसक्तिः, एकसमयस्थितीनां द्विसमयस्थितीनां च द्रव्याणां प्रत्येकमनन्तानां लोके सद्भावादिति, सत्यमेतत्, किन्त्वेकसमयस्थितिकमपि यदवगाहभेदेन वर्तते तदिह भिन्नं विवक्ष्यते, एवं द्विसमयस्थितिकमप्यवगाहभेदेन भिन्नं चिन्त्यते, लोके चासंख्येया अवगाहभेदाः सन्ति, प्रत्यवगाहं चैकद्विसमयस्थितिकानेकद्रव्यसम्भवाद-नानुपूर्व्यवक्तव्यकद्रव्याणामाधारक्षेत्रभेदात् प्रत्येकमसंख्येयत्वं न विहन्यते इति, अनया

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दिशाऽतिगहनमिदं सूक्ष्मधिया पर्यालोचनीयमिति। क्षेत्रद्वारे-

*मू. ( १३५ वर्तते ) नेगमववहाराणं आनु०दव्वाइं लोगस्स किं संखेज्जइभागे होज्जा ? असंखिज्जइभागे होज्जा ? संखेज्जेसु भागेसु वा होज्जा ? असंखेज्जेसु भागेसु वा होज्जा ? सव्वलोए वा होज्जा ?, एगं दव्वं पडुच्च संखेज्जइभागे वा होज्जा असंखेज्जइभागे वा होज्जा संखेज्जसु वा भागेसु होज्जा असंखेज्जसु वा भागेसु होज्जा देसूने वा लोए होज्जा, नानादव्वाइं पडुच्च नियमा सव्वलोए होज्जा, एवं अनानुपुव्वीदव्वं, आएसंतरेण वा सव्वपुच्छासु होज्जा, एवं अवत्तव्वगदव्वाणिवि जहा खेत्तानुपुव्वीए। फुसणा कालानुपुव्वीएवि तहा चेव भाणिअव्वा।*

**वृ.** 'एगं दव्वं पडुच्च लोगस्सासंखेज्जइभागे होञ्जा, जाव देसूणे वा लोगे होञ्ज'त्ति, इह त्र्यादिसमयस्थितिकद्रव्यस्य तत्तदवगाहसम्भवतः संख्येयादिभागवर्तित्वं भावनीयं, यदा त्र्यादिसमयस्थितिकः सूक्ष्मपरिणामः स्कन्धो देशोने लोकेऽवगाहते तदैकस्यानुपूर्वीद्रव्यस्य देशोनलोकवर्तित्वं भावनीयं, अन्ये तु 'पदेसूने वा लोगे होञ्ज'त्ति पाठं मन्यन्ते, तत्राप्ययमेवार्थः, प्रदेशस्यापि विवक्षया देशत्वादिति, सम्पूर्णेऽपि लोके कस्मादिदं न प्राप्यत इति चेद्, उच्यते, सर्वलोकव्यापी अचित्तमहास्कन्ध एव प्राप्यते, सच तद्व्यापितया एकमेव समयमवतिष्ठते, तत ऊर्ध्वमुपसंहारस्योक्तत्वात्, न चैकसमयस्थितिकमानुपूर्वीद्रव्यं भवितुमर्हति, त्र्यादिसमयस्थितिकत्वेन तस्योक्तत्वात्, तस्मात्र्यादिसमयस्थितिकमन्यद् द्रव्यं नियमादेकेनापि प्रदेशेनोन एव लोकेऽवगाहत इति प्रतिपत्तव्यम्।

अत्राह-नन्वचित्तमहास्कन्धोऽप्येकसमयस्थितिको न भवति, दण्डाद्यवस्थासयमगणनेन तस्याप्यष्टसमयस्थितिकत्वाद्, एवं च सति तस्याप्यानुपूर्वीत्यात् सम्पूर्णलोकव्यापित्वं युज्यतेऽत वक्तुमिति, नैतदेवम्, अवस्थाभेदेन वस्तुभेदस्येह विवक्षितत्वात्, भिन्नाश्च परस्परं दण्डकपाटाद्यवस्थाः, ततस्तद्भेदेन वस्तुनोऽपि भेदाद् अन्यदेव दण्डकपाटाद्यवस्थाद्रव्येभ्यः सकललोकव्याप्यचित्तमहास्कन्धव्यं तच्चैकसमयस्थितिकमिति न तस्यानुपूर्वीत्वम्, एतच्चानन्तरमेव पुनर्वक्ष्यत इत्यलं विस्तरेण।

अथवा यथा क्षेत्रानुपूर्व्यां तथाऽत्रापि सर्वलोकव्यापिनोऽप्यत्तिमहास्कन्धस्य विवक्षामात्रामाश्रित्य एकस्मिन्नभःप्रदेशेऽप्राधान्यद्देशोनलोकवर्तित्वं वाच्यम्, एकसमयस्थितिकस्यानापूर्वीद्रव्यस्य द्विसमयस्थितिकावक्तव्यकस्य च तत्र प्रदेशे प्राधान्यश्रयणादिति भावः, एवमन्यदपि आगमाविरोधतो वक्तव्यमिति। 'नानादव्वाइं पडुच्च नियमा सव्वलोए होञ्ज'त्ति, त्र्यादिसमयस्थितिकद्रव्याणां सर्वलोकेऽपि भावादिति भावनीयम्।

अनानुपूर्वीद्रव्यचिन्तायां यथा क्षेत्रानुपूर्व्यां तथा अत्राप्येकद्रव्यं लोकस्यासंख्येयभाग एव वर्तते, कथमिदम् १, उच्यते, यत्कालत एक समयस्थितिकं तत्क्षेत्रतोऽप्येकप्रदेशावगाढमेवेहानानुपूर्वीत्वेन विवक्ष्यते, तच्च लोकासंख्येयभाग एव भवति, 'आएसंतरेण वा सव्वपुच्छासु होञ्ज'त्ति, अस्य भावना-इहाचित्तमहास्कन्धस्य दण्डाद्यवस्थाः परस्परं भिन्नाः, आकारादिभेदात्, द्वित्रिचतुःप्रदेशकादिस्कन्धवत्, ततश्च ता एकैकसमयवृत्तित्वात्, पृथगनानुपूर्वीदव्याणि, तेषु च मध्ये किमपि कियत्यपि क्षेत्रे वर्तत इत्यनया विवक्षया किलैकमनानुपूर्वीद्रव्यं मतान्तरेण संख्येयभागादिकासु पञ्चस्वपि पृच्छासु लभ्यते, एतच्च सूत्रेषु प्रायो न दृश्यते, टीकाचूर्ण्योस्त्वेवं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्याख्यातमुपलभ्यत इति। नानाद्रव्याणि तु सर्वस्मिन्नपि लोके भवन्ति, एकसमयस्थितिकद्रव्याणां सर्वत्र भावादिति।

अवक्तव्यकद्रव्यचिन्तायां क्षेत्रानुपूर्व्यामिवैकद्रव्यं लोकस्यासंख्येयभाग एव वर्तते, कथमिति?. उच्यते, यत्कालतो द्विसमयस्थितिकं तत् क्षेत्रतो द्विप्रदेशावगाढमेवेहावक्तव्यकत्वेन गृह्यते, तच्च लोकासंख्येयभाग एव स्याद्, अथवा द्विसमयस्थितिकं द्रव्यं स्वभावादेव लोकस्यासंख्येयभाग एवावगाहते, न परतः, आदेशान्तरेण वा 'महाखुधवज्जमन्नदव्वेसु आइल्लचउपुच्छासु होज्ज'त्ति, अस्य हृदयं-मतान्तरेण किल द्विसमयस्थितिकमपि द्रव्यं किञ्चिल्लोकस्य संख्येयभागेऽवगाहते किञ्चित्त्वसंख्येये अन्यत्तु संख्येयेषु तद्भागेष्ववगाहते अपरं त्वसंख्येयेष्विति, महास्कन्धं वर्जयित्वा शेषद्रव्याण्याश्रित्य यथोक्तस्वरूपास्वाद्यासु चतसृषु पृच्छास्वेकमवक्तव्यकद्रव्यं लभ्यते, महास्कन्धस्य त्वष्टसमयस्थितित्वेनोक्तत्वात्र द्विसमयस्थितिकत्वसम्भव इति तद्वर्जनम्, अत एव सर्वलोकव्याप्तिलक्षणायाः पञ्चमपृच्छाया अत्रासम्भवः, महास्कन्धस्यैव सर्वलोकव्यापकत्वात्, तस्य चावक्तव्यकत्वायोगादिति। एतदपि सूत्रं वाचनान्तरे कचिदेव दृश्यते। नानाद्रव्याणि तु सर्वलोके भवन्ति, द्विसमयस्थितीनां सर्वत्र भावादिति।

गतं क्षेत्रद्वारं, स्पर्शनाद्वारमप्येवमेव भावनीयं। कालद्वारे-

*मू. ( १३५ वर्तते ) नेगमववहाराणं आनुपुव्वीदव्वाइं कालओ केवच्चिरं होंति ?, एगं दव्वं पडुच्च जहन्नेणं तिन्नि समया उक्कोसेणं असंखेज्ज कालं, नानादव्वाइं पडुच्च सव्वद्धा, नेगमववहाराणं अनानुपुव्वीदव्वाइं कालओ केवच्चिरं होइ ?, एगं दव्वं पडुच्च अजहन्नमनुक्कोसेणं एक्कं समयं नानादव्वाइं पडुच्च सव्वद्धा, अवत्तव्वगदव्वाणं पुच्छा, एगं दव्वं पडुच्च अजहन्नमणुक्कोसेणं (एक्कं) दो समया नानादव्वाइं पडुच्च सव्वद्धा।*

**वृ.** 'एगं दव्वं पडुच्च जहन्नेणं तिन्नि समय'त्ति, जघन्यतोऽपि त्रिसमयस्थितिकस्यैवानुपूर्वीत्वेनोक्तत्वादिति भावः। 'उक्कोसेणं असंखेज्जं कालं'ति असंख्येयकालात् परत एकेन परिणामेन द्रव्यास्थानस्यैवाभावादिति हृदयम्। नानाद्रव्याणि तु सर्वकालं भवन्ति, प्रतिप्रदेशं लोकस्य सर्वदा तैरशून्यत्वादिति। अनानुपूर्व्यवक्तव्यकचिन्तायाम्-'अजहन्नमनुक्कोसेणं'ति जघन्योत्कृष्टचिन्तामृत्सृज्येत्यर्थः, न हि एकसमयस्थितिकस्यैवानानुपूर्वीत्वे द्विसमयस्थितिकस्यैव चावक्तव्यकत्वेऽभ्युपगम्यमाने जघन्यतो(न्यो)त्कृष्टचिन्ता सम्भवतीति भावः, नानाद्रव्याणि तूभयत्रापि सर्वकालं भवन्ति, प्रतिप्रदेशं तैरपि सर्वदा लोकस्याशून्यत्वादिति॥ अन्तरद्वारे-

*मू. ( १३५ वर्तते ) नेगमववहाराणं आनुपुव्वीदव्वाणमंतरं कालओ केवच्चिरं होइ ?, एगं दव्वं पडुच्च जहन्नेणं एगं समयं उक्कोसेणं दो समया नानादव्वाइं पडुच्च नत्थि अंतरं। नेगमववहाराणं अनानुपुव्वीदव्वाणमंतरं कालओ केवच्चिरं होइ ?, एगं दव्वं पडुच्च जहन्नेनं दो समया उक्कोसेणं असंखेज्ज कालं, नानादव्वाइं, पडुच्च नत्थि अंतरं। नेगमववहाराणं अवत्तव्वगदव्वाणं पुच्छा, एगं दव्वं पडुच्च जहन्नेनं एगं समयं उक्कोसेणं असंखेज्जं कालं, नानादव्वाइं पडुच्च नत्थि अंतरं। भागभावअप्पाबहुं चेव जहा खेत्तानुपुव्वीए तहा भाणिअव्वाइं,*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*जाव से तं अनुगमे। से तं नेगमववहाराणं अनोवनिहिआ कालानुपुव्वी।*

**वृ.** 'एगं दव्वं पडुच्च जहन्नेणं एक्कं समयं'ति अत्र भावना-इह त्र्यादिसमयस्थितिकं विवक्षित किञ्चिदेकमानुपूर्वीद्रव्यं तं परिणामं परित्यज्य यदा परिणामान्तरेण समयमेकं स्थित्वा पुनस्तेनैव परिणामेन त्र्यादिसमयस्थितिकं जायते तदा जघन्यतथा समयोऽन्तरे लभ्यते, 'उक्कोसेणं दो समय'त्ति, तदेव यदा परिणामान्तरेण द्वौ समयौ स्थित्वा पुनस्तमेव त्र्यादिसमयस्थितियुक्तं प्राक्तनं परिणाममासादयति तदा द्वौ समयावुत्कृष्टेऽन्तरे भवतः, यदि पुनः परिणामान्तरेण क्षेत्रादिभेदतः समयद्वयात्परतोऽपि तिष्ठेत्तदा तत्राप्यानुपूर्वीत्वमनुभवेत, ततोऽन्तरमेव न स्यादिति भावः।

नानाद्रव्याणां तं नास्त्यन्तरं, सर्वदा लोकस्य तदशून्यत्वादिति। अनानुपूर्वीचिन्तायां 'एगं दव्वं पडुच्च जहन्नेणं दो समय'त्ति, एकसमयस्थितिकं द्रव्यं यदा परिणामान्तरेण समयद्वयमनुभूय पुनस्तमेवैकसमयस्थितिकं परिणाममासादयति तदा समयद्वयं जघन्योऽन्तरकालः, यदि तु परिणामान्तरेणाप्येकमेव समयं तिष्ठत् तदा अन्तरमेव न स्यात्, तत्राप्यनानुपूर्वीत्वाद्, अथसमयद्वयात् परतस्तिष्ठेत्तदा जघन्यत्वं न स्यादिति भावः।

'उक्कोसेणं असंखेज्जं कालं'त्ति, तदेव यदा परिणामान्तरेणासंख्येयकालमनुभूय पुनरेकसमयस्थितिकं परिणाममनुभवति तदोत्कृष्टतोऽसंख्येयोऽन्तरकालः प्राप्यते। आह-ननु यदि च अन्यान्यद्रव्यक्षेत्रसम्बन्धे तस्यानन्तोऽपि कालोऽन्तरे लभ्यते किमित्यसंख्येय एवोक्तः?, सत्यं, किन्तं कालानुपूर्वीप्रक्रमात्, कालस्यैवेह प्राधान्यं कर्तव्यं, यदि त्वन्यान्यद्रव्यक्षेत्रसम्बन्धोऽन्तरकालबाहुल्यं क्रियते तदा तद् द्वारेणैवान्तरकालस्य बहुत्वकरणात्तयोर्द्वयोरेव प्राधान्यमाश्रितं स्यान्न कालस्य, तस्मादेकस्मिन्नेव परिणामान्तरे यावान् कश्चिदुत्कृष्टः कालो लभ्यते स एवान्तरे चिन्त्यते, स चासंख्येय एव, ततः परमेकेन परिणामेन वस्तुनोऽवस्थानस्यैव निषिद्धत्वादित्येवं भगवतः सूत्रस्य विवक्षावैचित्र्यात् सर्वं पूर्वमुत्तरत्र चागमाविरोधेन भावनीयमिति। नानाद्रव्याणं तु नास्त्यन्तरं प्रतिप्रदेशं लोके सर्वदा तल्लाभादिति। अवक्तव्यकद्रव्यचिन्तायां 'जहण्णेणं एगं समयं'ति द्विसमयस्थितिकं किञ्चिदवक्तव्यकद्रव्यं परिणामान्तरेण समयमेकं स्थित्वा यदा पूर्वानुभूतमेव द्विसमयस्थितिकपरिणाममासादयति तदा समयो जघन्यान्तरकालः।

'उक्कोसेणं असंखेज्जं कालं'ति, तदेव यदा परिणामान्तरेणासंख्येयं कालं स्थित्वा पुनस्तमेव पूर्वानुभूतं परिणाममासादयति तदाऽसंख्यात उत्कृष्टोऽन्तरकालो भवति, आक्षेपपरिहारावत्राप्यनानुपूर्वीवत् द्रष्टव्याविति। नानाद्रव्यान्तरं तु नास्ति, सर्वदा लोके तद्भावादिति। उक्तमन्तरद्वारं, भागद्वारे तु यथा द्रव्यक्षेत्रानुपूर्व्योस्तथैवानुपूर्वीद्रव्याणिशेषद्रव्येभ्योऽसङ्ख्येयैर्भागैरधिकानि व्याख्येयानि, शेषद्रव्याणि त्वानुपूर्वीद्रव्याणामसङ्ख्येयभाग एव वर्तन्त इति, भावना त्वित्थं कर्तव्या-इहानानुपूर्व्यामेकसमयस्थितिलक्षणमेकमेव स्थानं लभ्यते, अवक्तव्यकेष्वपि द्विसमयस्थितिलक्षणमेकमेव तल्लभ्यते, आनुपूर्व्यां तु त्रिसमयचतुःसमयपञ्चसमयस्थित्वादीन्येकोत्तरवृद्धयाऽसङ्ख्येयसमयस्थित्यन्तान्यसङ्ख्येयानि स्थानानि लभ्यन्त इत्यानुपूर्वीद्रव्याणामसङ्ख्येयगुणत्वम्, इतरयोस्तु तदसंख्येयभागवर्तित्वमिति।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भावद्वारे सादिपारिणामिकभाववर्तित्वं त्रयाणामपि पूर्ववद् भावनीयम्।

अल्पबहुत्वद्वारे सर्वस्तोकान्यवक्तव्यकद्रव्याणि, द्विसमयस्थितिकद्रव्याणां स्वभावत एव स्तोकत्वात्, अनानुपूर्वीद्रव्याणि तु तेभ्यो विशेषाधिकानि, एकसमयस्थितिद्रव्याणां निसर्गत एव पूर्वेभ्यो विशेषाधिकत्वाद्, आनुपूर्वीद्रव्याणां तु पूर्वेभ्योऽसंख्यातगुणत्वं भागद्वारे भावितमेव शेषं तं क्षेत्रानुपूर्व्याद्युक्तानुसारतः सर्वं वाच्यमिति। अत एव केषुचिद्वाचनान्तरेषु भागादिद्वारत्रयं क्षेत्रानुपूर्व्यतिदेशेनैव निर्दिष्टं दृश्यते, न तु विशेषतो लिखितमिति।

'से त'मित्यादि निगमनम्। उक्ता नैगमव्यवहारनयमतेनानौपनिधिकी कालानुपूर्वी, अथ संग्रहनयमतेन तामेव व्याचिख्यासुराह-

*मू. ( १३६ ) से किं तं संगहस्स अनोवनिहिआ कालानुपुव्वी ?, २ पंचविहा पन्नत्ता, तंजहा-अट्ठपयपरूवणया भंगसमुक्कित्तणया भंगोवदंसणया समोआरे अनुगमे।*

*मू. ( १३७ ) से किं तं संगहस्स अट्ठपयपरूवणया ?, २ एआइं पंचवि दाराइं जहा खेत्तानुपुव्वीए संगहस्स तहा कालाणु० एवि भाणिअव्वाणि, नवरं ठिइअभिलावो, जाव से तं अनुगमे। से त संगहस्स अनोवनिहिआ कालानु०।*

वृ. यथा क्षेत्रानुपूर्व्यामियं संग्रहमतेन प्राग्निर्दिष्टा तथाऽत्रापि वाच्या, नवरं 'तिसमयट्ठिइआ आनुपुव्वी जाव असंखेज्जसमयठिइआ आनुपुव्वी'त्यादि अभिलापः कार्यः, शेषं तु तथैवेति। उक्ता संग्रहमतेनाप्यनौपनिधिकी कालानुपूर्वी, तथा च सति अवसितस्तद्विचारः, इदानीं प्रागुद्दिष्टामेवौपनिधिकीं तां निर्दिदिक्षुराह-

*मू. ( १३८ ) से किं तं उवनिहिआ कालानुपुव्वी ?, २ तिविहा पन्नत्ता, तंजहा-पुव्वानु०पच्छानु०अनानु०। से किं तं पुव्वानु० ?, २ समए आवलिआ आण पाणू थोवे लवे मुहुत्ते अहोरत्ते पक्खे मासे उऊ अयने संवच्छरे जुगे वाससए वाससहस्से वाससयसहस्से पुव्वंगे पुव्वे तुडिअंगे तुडिए अडडंगे अडडे अववंगे अववे हुहुअंगे हुहुए उप्पलंगे उप्पले पउमंगे पउमे नलिनंगे नलिने अत्थनिऊरंगे अत्थनिऊरे अउअंगे अउए नउअंगे नउएअ पउअंगे पउए चूलिअंगे चूलिआ सीसपहेलिअंगे सीसपहेलिआ पलिओवमे सागारोवमे ओसप्पिणी उस्सप्पिणी पोग्गलपरिअट्टे अतीतद्धा अनागतद्धा सव्वद्धा, से तं पुव्वानु० से किं तं पच्छानु०, २ सव्वद्धा अनागतद्धा जाव समए, से तं पच्छानु०। से किं तं अनानु० ?, २ एआए चेव एगाइआए एगुत्तरिआए अनंतगच्छगयाए सेढीए अन्नमन्नब्भासो, दूरूवूणो, से तं अनानुपुव्वी।*

*अहवा उवनिहिआ कालानुपुव्वी तिविहा पन्नत्ता, तंजहा-पुव्वानुपुव्वी पच्छानुपुव्वी अनानुपुव्वी। से किं तं पुव्वानुपुव्वी ?, २ एगसमयठिइए दुसमयठिइए तिसमयठिइए जाव दससमयठिइए संखिज्जसमयठिइए, असंखिसमयठिइए, से तं पुव्वानुपुव्वी। से किं तं पच्छानुपुव्वी ? २ असंखिज्जसमयठिइए जाव एगसमयठिइए, से तं पच्छानुपुव्वी। से किं तं अनानुपुव्वी ?, २ एआए चेव एगाइआए एगुत्तरिआए असंखिज्जगच्छगयाए सेढीए अन्नमन्नब्भासो दूरूवूणो, से तं अनानुपुव्वी।*

*से तं उवनिहिआ कालानुपुव्वी से कालानुपुव्वी।*

वृ. एकः समयः स्थितिर्यस्य द्रव्यविशेषस्य स तथा, एवं यावदसंख्येयाः समयाः स्थितिर्यस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स तथेति पूर्वानुपूर्वी, शेषभावना त्वत्र पूर्वोक्तानुसारेण सुकरैव। अथ कालविचारस्य प्रस्तुतत्वात्समयादेश्च कालत्वेन प्रसिद्धत्वाद् अनुपङ्गतो विनेयानां समयादिकालपरिज्ञानदर्शनाच्च तद्विषयत्वेनैव प्रकारान्तरेण तामाह- 'अहवे'त्यादि, तत्र समयो - वक्ष्यमाणस्वरूपः सर्वसूक्ष्मः कालांशः, स च सर्वप्रमाणानां प्रभवत्वात्, प्रथमं निर्दिष्टः १, तैरसंख्येयैर्निष्पन्ना आवलिका २, संख्येया आवलिकाः 'आण'त्ति आणः एक उच्छ्वास इत्यर्थः ३, ता एव संख्येया निःश्वासः, अयं च सूत्रेऽनुक्तोऽपि द्रष्टव्यः, स्थानान्तरप्रसिद्धत्वादिति ४, द्वयोरपि कालः, 'पाणु'त्ति एकः प्राणुरित्यर्थः ५, सप्तभिः प्राणुभिः स्तोकः ६, सप्तभिः स्तोकैर्लवः ७, सप्तसप्तत्या लवानां मुहूर्त्तः ८, त्रिंशता मुहूर्त्तैरहोरात्रं ९, पञ्चदशभिः पक्षः १०, ताभ्यां द्वाभ्यां मासः ११, मासद्वयेन ऋतुः १२, ऋतुत्रयमानमयनम् १३, अयनद्वयेन संवत्सरः १४, पञ्चभिस्तैर्युगं १५, विंशत्या युगैर्वर्षशतं १६, तैर्दशभिर्वर्षसहस्रं १७, तेषां शतेन वर्षशतसहस्र, लक्षमित्यर्थः १८, चतुरशीत्या च लक्षैः पूर्वाङ्गं भवति १९, तदपि चतुरशीत्या लक्षैर्गुणितं पूर्वं भवति २०, तच्च सप्ततिकोटिलक्षाणि षट्पञ्चाशच्च कोटिसहस्राणि वर्षाणाम्, उक्तं च-

"पुव्वस्स उ परिमाणं सयरी खलं हुंति कोडिलक्खाउ।
छप्पन्नं च सहस्सा बोद्धव्वा वासकोडीणं॥"

स्थापना ७०५६००००००००००, इदमपि चतुरशीत्या लक्षैर्गुणितं त्रुटिताङ्गं भवति २१, एतदपि चतुरशीत्या लक्षैर्गुणितं त्रुटितं भवति २२, तदपि चतुरशीत्या लक्षैर्गुणैतमटटाङ्गं २३, एतदपि तेनैव गुणकारेण गुणितमटटम् २४, एवं सर्वत्र पूर्वः पूर्वो राशिश्चतुरशीतिलक्षस्वरूपेण गुणकारेण गुणित उत्तरोत्तरराशिरूपतां प्रतिपद्यत इति प्रतिपत्तव्यं, ततश्च अवावङ्गं २५, अववं २६, हुहुकाङ्गं २७, हुहुकं २८, उत्पलाङ्गं २९, उत्पलं ३०, पद्माङ्गं ३१, पद्मं ३२, नलिनाङ्गं ३३, नलिनं ३४, अर्थनिपूराङ्गं ३५, अर्थनिपूरं ३६, अयुताङ्गं ३७, अयुतं ३८, नयुताङ्गं ३९, नयुतं ४०, प्रयुताङ्गं ४१, प्रयुतं ४२, चूलिवाङ्गं ४३, चूलिका ४४, शीर्षप्रहेलिकाङ्गं ४५, एवमेते राशयश्चतुरशीतिलक्षस्वरूपेण गुणकारेण यथोत्तरं वृद्धा द्रष्टव्यास्तावद् यावदिदमेव शीर्षप्रहेलिकाङ्गं चतुरशीत्या लक्षैर्गुणितं शीर्षप्रहेलिका भवति ४६, अस्याः स्वरूपमङ्कतोऽपि दर्श्यते ७५८२६३२५३०७३०१०२४११५७९७३५६९९७५६९६४०६२१८९६६८-४८०८०१८३२९६ अग्रे च चत्वारिंशं शून्यशतं १४०,

तदेवं शीर्षप्रहेलिकायां सर्वाण्यमूनि चतुर्णवत्यधिकशतसङ्ख्यान्यङ्कस्थानानि भवन्ति, अनेन चैतावता कालमानेन केषाञ्चिद् रत्नप्रभानारकाणां भवनपतिव्यन्तरसुराणां सुषमदुष्षमारकसम्भविनां नरतिरश्चां च यथासम्भवमायूंषि मीयन्ते, एतस्माच्च परतोऽपि संख्येयः कालोऽस्ति, किंत्वनतिशयिनामसंव्यवहार्यत्वात् सर्पपाद्युपमयाऽत्रैव वक्ष्यमाणत्वाच्च नेहोक्तः, किं तर्हि ?, उपमामात्रप्रतिपाद्यानि पल्योपमादीन्येव, तत्र पल्योपमसागरोपमे--अत्रैव वक्ष्यमाणस्वरूपे, दशसागरोपमकोट्याकोटिमाना त्ववसर्पिणी, तावन्मानैवोत्सर्पिणी, अनन्ता उत्सर्पिण्यवसर्पिण्यः पुद्गलपरावर्तः, अनन्तास्ते अतीताद्धा, तावन्मानैवानागताद्धा, अतीतानागतवर्तमानकालस्वरूपा सर्वाद्धेत्येषा पूर्वानुपूर्वी, शेषभावना तु पूर्वोक्तानुसारतः सुकरैव, यावत् कालानुपूर्वी समाप्ता॥

साम्प्रतं प्रागुद्दिष्टमेवोत्कीर्तनानुपूर्वी बिभणिषुराह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*मू. ( १३९ ) से किं तं उक्कित्तणानुपुव्वी ?, २ तिविहा पन्नत्ता, तंजहा-पुव्वानुपुव्वी पच्छानुपुव्वी अनानुपुव्वी । से किं तं पुव्वानुपुव्वी ?, २ उसभे अजिए संभवे अभिनंदने सुमती पउमप्पहे सुपासे चंदप्पहे सुविहि सीतले सेज्जंसे वासुपुज्जे विमले अनंते धम्मे संती कुंथू अरे मल्ली मुनिसुव्वए नमी अरिट्ठनेमी पासे वद्धमाणे, से तं पुव्वानुपुव्वी । से किं तं पच्छानुपुव्वी ?, २ वद्धमाणे जाव उसभे, से तं पच्छानुपुव्वी । से किं तं अनानुपुव्वी ?, २ एआए चेव एगाइआए एगुत्तरिआए चउवीसगच्छगयाए सेढीए अन्नमन्नब्भासो दुरूवूणो, से तं अनानुपुव्वी । से तं उक्कित्तणानुपुव्वी ।*

वृ. उत्कीर्तनं-संशब्दनमभिधानोच्चारणं तस्यानुपूर्वी अनुपरिपाटिः सा पूर्वानुपूर्व्यादिभेदेन त्रिविधा, तत्र ऋषभः प्रथममुत्पन्नत्वात् पूर्वमुत्कीर्त्यते, तदनन्तरं क्रमेण अजितादय इति पूर्वानुपूर्वी, शेषभावना तु पूर्ववद्, अत्राह-ननु औपनिधिक्या द्रव्यानुपूर्व्या अस्याश्च को भेदः ?, उच्यते, तत्र द्रव्याणां विन्यासमात्रमेव पूर्वानुपूर्व्यादिभावेन चिन्तितम्, अत्र तु तेषामेव तथैवोत्कीर्तनं क्रियत इत्येतावन्मात्रेण भेद इति, भवत्वेवं, किन्त्वावश्यकस्य प्रस्तुतत्वादुत्कीर्तनमपि सामायिकाद्यध्ययनानामेव युक्तं, किमित्यप्रक्रान्तानां ऋषभादीनां तद्विहितमिति ?, सत्यं, किन्तु सर्वव्यापकं प्रस्तुतशास्त्रमित्यादावेवोक्तं, तद्दर्शनार्थमृषभादिसूत्रान्तरोपादानं, भगवतां च तीर्थप्रणेतृत्वात् तत्स्मरणस्य समस्तश्रेयः फलकल्पपादपत्वाद् युक्तं तन्नामोत्कीर्तनं, तद्विषयत्वेन चोक्तमुपलक्षणत्वादन्यत्रापि दृष्टव्यमिति, शेषं भावितार्थं यावत्, 'से त'मित्यादि निगमनम् । इदानीं पूर्वोद्दिष्टामेव गणनानुपूर्वीमाह-

*मू. ( १४० ) से किं तं गणनानुपुव्वी ?, २ तिविहा पन्नत्ता, तंजहा-पुव्वानुपुव्वी पच्छानुपुव्वी अनानुपुव्वी । से किं तं पुव्वानुपुव्वी ?, २ एगो दस सयं सहस्सं दस सहस्साइं सयसहस्सं दस सयसहस्साइं कोडी दस कोडीओ कोडीसयं दस कोडिसयाइं, से तं पुव्वानुपुव्वी । से किं तं पच्छानुपुव्वी ?, २ दस कोडिसयाइं जाव एक्को, से तं पच्छानुपुव्वी । से किं तं अनानुपुव्वी ?, २ एआए चेव एगाइआए एगुत्तरिआए दसकोडिसयगच्छगयाए सेढीए अन्नमन्नब्भासो दुरूवूणो, से तं अनानुपुव्वी । से तं गणनानुपुव्वी ।*

वृ. गणनं-परिसंख्यानं एकं द्वे त्रीणि चत्वारि इत्यादि तस्य आनुपूर्वी-परिपाटिर्गणनानुपूर्वी, अत्रोपलक्षणमात्रमुदाहर्तुमाह-'एगे'त्यादि सुगमम्, उपलक्षणमात्रं चेदमतोऽन्येऽपि सम्भविनः संख्याप्रकारा अत्र दृष्टव्याः, उत्कीर्तनानुपूर्व्यां नाममात्रोत्कीर्तनमेव कृतम् अत्र त्वेकादिसंख्याभिधानमिति भेदः । 'से त'मित्यादि निगमनम् ॥ अथ प्रागुद्दिष्टामेव संस्थानानुपूर्वीमाह-

*मू. ( १४१ ) से किं तं संठाणानुपुव्वी ?, २ तिविहा पन्नत्ता, तंजहा-पुव्वानुपुव्वी पच्छाणुपुव्वी अनानुपुव्वी । से किं तं पुव्वानुपुव्वी ?, २ समचउरंसे निग्गोहमंडले सादी खुज्जे वामने हुंडे, से तं पुव्वानुपुव्वी । से किं तं पच्छानुपुव्वी ?, २ हुंडे जाव समचउरंसे, से तं पच्छानुपुव्वी । से किं तं अनानुपुव्वी ?, २ एआए चेव एगाइआए एगुत्तरिआए छगच्छगयाए सेढीए अन्नमन्नब्भासो दुरूवूणो, से तं अनानुपुव्वी । से तं संठाणानुपुव्वी ।*

वृ. आकृतिविशेषाः संस्थानानि तानि च जीवाजीवसम्बन्धित्वेन द्विधा भवन्ति, तत्रेह जीवसम्बन्धीनि तत्रापि पञ्चेन्द्रियसम्बन्धीनी वक्तुमिष्टानि, अतस्तान्याह-'समचउरंसे'त्यादि, तत्र

Jain Education International For Private & Personal Use Only www.jainelibrary.org

समाः-शास्त्रोक्तलक्षणाविसंवादिन्यश्चतुर्दिग्वर्तिनः अवयवरूपाश्चतस्रोऽस्रयो यत्र तत् समासान्नात्प्रत्यये समचतुरस्रं संस्थानं, तुल्यारोहपरिणाहः, सम्पूर्णलक्षणोपेपाङ्गोपाङ्गावयवः स्वांगुलाष्टाधिकशतोच्छ्रयः सर्वसंस्थानप्रधानः पञ्चेन्द्रियजीवशरीराकारविशेष इत्यर्थः १, नाभेरुपरि न्यग्रोधवन्मण्डलम्--आद्यसंस्थानलक्षणयुक्तत्त्वेन विशिष्टाकारं न्यग्रोधमण्डलं, न्यग्रोधो-वटवृक्षः, यथा चायमुपरि वृत्ताकारतादिगुणोपेतत्वेन विशिष्टाकारो भवत्यधस्तु न तथा, एवमेतदपीति भावः २, सह आदिना- नाभेरधस्तनकायलक्षणेन वर्तत इति सादि, ननु सर्वमपि संस्थानमादिना सहैव वर्तते ततो निरर्थकं सादित्वविशेषणं, सत्यं, किं त्वत एव विशेषणवैफल्य-प्रसङ्गादाद्यसंस्थानलक्षणयुक्त आदिरिह गृह्यते, ततस्तथाभूतेन आदिना सह यद्वर्तते नाभेस्तूपरि-तनकाये आद्यसंस्थानलक्षणविकलं तत्सादीति तात्पर्यम् ३, यत्र पाणिपादशिरोग्रीवं समग्र-लक्षणपरिपूर्णं शेषं तु हृदयोदरपृष्ठलक्षणं कोष्ठं-लक्षणहीनं तत् कुब्जं ४, यत्र तु हृदयोदरपृष्ठं सर्वलक्षणोपेतं शेषं तु हीनलक्षणं तद्वामनं, कुब्जविपरीतमित्यर्थः ५, यत्र सर्वेऽप्यवयवाः प्रायो लक्षणविसंवादिन एव भवन्ति तत्संस्थानं हुण्डमिति ६ ।

अत्र च सर्वप्रधानत्वात् समचतुरस्रस्य प्रथमत्वं, शेषाणां तं यथाक्रमं हीनत्वाद्द्वितीया-दित्वमिति पूर्वानुपूर्वीत्वं, शेषभावना पूर्ववदिति । आह-यदीत्थं संस्थानानुपूर्वी प्रोच्यते तर्हि संहननवर्णरसस्पर्शाद्यनुपूर्व्योऽपि वक्तव्याः स्युः, तथा च सत्यानुपूर्वीणामियत्तैव विशीर्यते, ततो निष्फल एव प्रागुपन्यस्तो दशविधत्वसंख्यानियम इति, सत्यं, किन्तु सर्वासामपि तासां वक्तुमशक्यत्वादुपलक्षणमात्रमेवायं संख्यानियमः, एतदनुसारेणान्या अप्येता अनुसर्तव्या इति तावल्लक्षयामः, सुधिया त्वन्यथाऽपि वाच्यं, गम्भीरार्थत्वात्, परममुनिप्रणीतसूत्रविवक्षायाः, एवमुत्तरत्रापि वाच्यमित्यलं विस्तरेण ॥ सामाचार्यानुपूर्वी विवक्षुराह-

*मू. ( १४२ ) से किं तं सामायारीआनुपुव्वी ?, २ तिविहा पन्नत्ता, तंजहा-पुव्वानुपुव्वी पच्छानुपुव्वी अनानुपुव्वी । से किं तं पुव्वानुपुव्वी ?, २-*

**वृ.** तत्र समाचरणं समाचारः-शिष्टजनाचरितः क्रियाकलापस्तस्य भाव इति यण्प्रत्यये स्त्रियामीकारे च सामाचारी, सा च त्रिविधा-ओघनिर्युक्त्यभिहितार्थरूपा ओघ सामाचारी १, इच्छामिच्छाद्यर्थविषया दशधासामाचारी २, निशीथकल्पाद्यभिहितप्रायश्चित्तपदविभागविषया पदविभागसामाचारी ३, उक्तं च-"सामाचारी तिविहा ओहे दसहा पयविभागे'त्ति, तत्रेह दशधासामाचारीमाश्रित्योक्तम्-

*मू. ( १४३ ) इच्छामिच्छातहक्कारो आवस्सिआ य निसीहिआ ।*
*आपुच्छणा य पडिपुच्छा छंदना य निमंतणा ।*

**वृ.** 'इच्छामिच्छातहक्कारो'इत्यादि, अत्र कारशब्दः प्रत्येकमभिसम्बध्यते, ततश्चैषण-मिच्छा-विवक्षितक्रियाप्रवृत्त्यभ्युपगमस्तया करणमिच्छाकारः, आज्ञाबलाभियोगरहितो व्यापार इत्यर्थः १,

मिथ्या-असदेतद् यन्मयाऽऽचरितमित्येवं करणं मिथ्याकारः, अकृत्ये कस्मिँश्चित् कृते मिथ्या-वितथमिदं न पुनर्यथा भागवद्भिरुक्तं तथैवेतन्मच्चेष्टितमतो दुष्कृतं-दुराचीर्णम् इत्येवमसत्क्रियानीवृत्त्यभ्युपगमो मिथ्याकार इति तात्पर्यम् २,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सूत्रव्याख्यानादौ प्रस्तुते गुरुभिः कस्मिँश्चिद् वचस्युदीरिते सति यथा भवन्तः प्रतिपादयन्ति तथैवैतदित्येवंकरणं तथाकारः, अविकल्पगुर्वाज्ञाभ्युपगम इत्यर्थः ३,

अवश्यकर्तव्यमावश्यकं तत्र भवा आवश्यकी-ज्ञानाद्यालम्बनेनोपाश्रयात् बहिरवश्यंगमने समुपस्थिते अवश्यं कर्तव्यमिदमतो गच्छाम्यहमित्येवं गुरुं प्रति निवेदना आवश्यकमिति हृदयं ४,

निषेधे भवा नैषेधिकी उपाश्रयाद्बहिः कर्तव्यव्यापारेष्ववसितेषु पुनस्तत्रैव प्रविशतः साधोः शेषसाधूनामुन्त्रासादिदोषपरिजिहीर्षया बहिर्व्यापारनिषेधेनोपाश्रयप्रवेशसूचनत्रैषेधिकीति परमार्थः ५,

भदन्त! करोमीदमित्येवं गुरोः प्रच्छनमाप्रच्छना ६,

एकदा पृष्टेन गुरुणा नेदं कर्तव्यमित्येवं निषिद्धस्य विनेयस्य किञ्चिद्विलम्ब्य ततश्चेदं चेदं कारणमस्त्यतो यदि पूज्या आदिशन्ति तदा करोमीत्येवं गुरोः पुनः प्रच्छनं प्रतिप्रच्छना, अथवा ग्रामदौ प्रेषितस्य गमनकाले पुनः प्रच्छनं प्रतिप्रच्छना ७,

छन्द छदि संवरण'इत्यस्यानेकार्थत्वात्, कुरु ममानुग्रहं परिभुंक्ष्वेदमित्येवं पूर्वानीताशनादिपरिभोगविषये साधूनामुत्साहना छन्दना ८,

इदं वस्तु लब्ध्या ततोऽहं तुभ्यं दास्यामीत्येवद्याप्यगृहीतेनाशनादिना साधूनामामन्त्रणं निमन्त्रणा, उक्तं च-

"पुव्वगहिएण छंदन निमंतणा होइऽगहिएणं"ति ९,

त्वदीयोऽहमित्येवं श्रुताद्यर्थमन्यदीयसत्ताभ्युपगम उपसम्पदिति १०। एवं एते दशप्रकाराः काले यथास्वं प्रस्तावे विधीयमाना दशविधा सामाचारीति गाथार्थः॥

*मू. (१४४) उवसंपया य काले सामाचारी भवे दसविहा उ। से तं पुव्वानुपुव्वी। से किं तं पच्छानुपुव्वी ?, २ उवसंपया जाव इच्छागारो, से तं पच्छानुपुव्वी। से किं तं अनानुपुव्वी ?, २ एआए चेव एगाइआए एगुत्तरिआए दसगच्छगयाए सेढीए अन्नमन्नब्भासो दुरूवूणो, से तं अनानुपुव्वी, से तं सामायारीआनुपुव्वी।*

**वृ.** इह धर्मस्यापरोपतापमूलत्वादिच्छाकारस्याज्ञाबलाभियोगलक्षणपरोपतापवर्जकत्वात् प्राधान्यत् प्रथममुपन्यासः, अपरोपतापकेनापि च कथञ्चित् स्खलने मिथ्यादुष्कृतं दातव्यमिति तदनन्तरं मिथ्याकारस्य, एतौ च गुरुवचनप्रतिपत्तावेव ज्ञातुं शक्यौ, गुरुवचनं च तथाकारणेनैव सम्यक् प्रतिपन्नं भवतीति तदनन्तरं तथाकारस्य, प्रतिपन्नगुरुवचनेन चोपाश्रयाद्बहिर्निर्गच्छता गुरुपृच्छापूर्वकं निर्गन्तव्यमिति तथाकारानन्तरं तत्पृच्छारूपाया आवश्यक्याः, बहिर्निगतेन च नैषेधिकीपूर्वकं पुनः प्रविष्टव्यमिति तदनन्तरं नैषेधिक्याः, उपाश्रयप्रविष्टेन च गुरुमापृच्छ्य सकलमनुष्ठेयमिति तदनन्तरमाप्रच्छनायाः, आपृष्टे च निषिद्धे पुनः प्रष्टव्यमिति तदनन्तरं प्रतिप्रच्छनायाः, प्रतिप्रश्ने चानुज्ञातेनाशनाद्यानीय तत्परिभोगाय साधव उत्साहनीया इति तदनन्तरं छन्दनायाः, एषा च गृहीत एवाशनादौ स्याद् अगृहीते तु निमन्त्रणैवेति तदनन्तरं निमन्त्रणायाः, इय च सर्वाऽपि निमन्त्रणापर्यन्ता सामाचारी गुरूपसम्पदमन्तेण न ज्ञायत इति तदनन्तरमुपसम्पद उपन्यास इति पूर्वानुपूर्वीत्वसिद्धिरिति। शेषं पूर्ववदिति। अथ भावानुपूर्वीमाह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*मू. ( १४५ ) से किं तं भावानुपुव्वी ?, २ तिविहा पन्नत्ता, तंजहा-पुव्वानुपुव्वी पच्छा-नुपुव्वी अनानुपुव्वी । से किं तं पुव्वानुपुव्वी ?, २ उदइए उवसमिए खाइए खओवसमिए पारिणामिए संनिवाइए, से तं पुव्वानुपुव्वी । से किं तं पच्छानुपुव्वी ?, २ सन्निवाइए जाव उदइए, से तं पच्छानुपुव्वी । से किं तं अनानुपुव्वी ?, २ एआए चेव एगाइआए एगुत्तरिआए छगच्छगयाए सेढीए अन्नमन्नब्भासो दुरुवूणो, से तं अनानुपुव्वी । से तं भावानुपुव्वी, से तं आनुपुव्वी, आनुपुव्वीत्ति पदं समत्तं ।*

वृ. इह तेन तेन रूपेण भवनानि भावाः-वस्तुपरिणामविशेषाः-औदयिकादयः, अथवा तेन तेन रूपेण भवन्तीति भावास्त एव, यद्वा भवन्ति तैः तेभ्यस्तेषु वा सत्सु प्राणिनस्तेन तेन रूपेणेति भावा यथोक्ता एव, तेषामानुपूर्वी-परिपाटिर्भावानुपूर्वी औदयिकादीनां तु स्वरूपं पुरस्तान्यक्षेण वक्ष्यते, अत्र च नारकादिगतिरौदयिको भाव इति वक्ष्यते, तस्यां च सत्यां शेषभावाः सर्वेऽपि यथासम्भवं प्रादुर्भवन्तीति शेषभावाधारत्वेन प्रधानत्वादौदयिकस्य प्रथममुपन्यासः, ततश्च शेषभावपञ्चकस्य मध्ये औपशमिकस्य स्तोकविषयत्वात् स्तोकतया प्रतिपादयिष्यत इति तदन्तरमौपशमिकस्य, ततो बहुविपयत्वात् क्षायिकस्य, ततो बहुतरविषयत्वात् क्षायोपश-मिकस्य, ततो बहुतमविषयत्वात् पारिणामिकस्य, ततोऽप्येषामेव भावानां द्विकासंयोगस-मुत्थत्वात्, सान्निपातिकस्योपन्यास इति पूर्वानुपूर्वीक्रमसिद्धिरिति । शेषं पूर्वोक्तानुसारेण भावनीयम् । तदेवमुक्ताः प्रागुद्दिष्टा दशाप्यानुपूर्वीभेदाः, तद्भणने चोपक्रमप्रथमभेदलक्षणा आनुपूर्वी समाप्ता ।

साम्प्रतमुपक्रमस्यैव प्रागुद्दिष्टं द्वितीय भेदं व्याचिख्यासुराह-

*मू. ( १४६ ) से किं तं नामे ?, नामे दसविहे पन्नत्ते, तंजहा-एगनामे दुनामे तिनामे चउनामे पंचनामे छनामे सत्तनामे अट्ठनामे नवनामे दसनामे ।*

वृ. इह जीवगतज्ञानादिपर्याजीवगतरूपादिपर्यायानुसारेण प्रतिवस्तु भेदेन नमति-तदभिधायकत्वेन प्रवर्तत इति नाम, वस्त्वभिधानमित्यर्थः, उक्तं च-

"जं वत्थुणोऽभिहाणं पज्जयभेयानुसारि तं नामं ।
पइभेअं जं नमई पइभेअं जाइ जं भणिअं ॥"

इदं च दशप्रकारं, कथमित्याह-'एगनामे' इत्यादि, इह येन केनचिन्नाम्ना एकेनापि सता सर्वेऽपि विवक्षितपदार्था अभिघातुं शक्यन्ते तदेकनामोच्यते, यकाभ्यां तु नामभ्यां द्वाभ्यामपि सर्वं विवक्षितं वस्तुजातमभिधानद्वारेण संगृह्यते तद् द्विनाम, यैस्तु त्रिभिर्नामभिः सर्वेऽपि विवक्षितपदार्था अभिधातुं शक्यन्ते तत् त्रिनाम, यैस्तु चतुर्भिर्नामभिः सर्वं विवक्षितं वस्त्वभि-धीयते तच्चतुर्नाम, एवमनया दिशा ज्ञेयं, यावद् यैर्दशभिर्नामभिः सर्वं विवक्षितं वस्तु प्रतिपाद्यते तद् दशनामेति । तत्र 'यथोद्देशं निर्देश' इत्येकनामोदाहरन्नाह-

*मू. ( १४७ ) से किं तं एगनामे ?, २*

*मू. ( १४८ ) नामानि जानि कानिवि दव्वाण गुणाण पज्जवाणं च*
*तेसिं आगमनिहसे नामंति परूविआ सन्ना ॥*



Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. 'नामानि गाहा' व्याख्या-'द्रव्याणां' जीवाजीवभेदानां 'गुणानां' ज्ञानादीनां रूपादीनां च तथा 'पर्यायाणां' नारकत्वादीनामेकगुणकृष्णत्वादीनां च नामानि-अभिधानानि यानि कानिचिल्लोके रूढानि, तद्यथा-जीवो जन्तुरात्मा प्राणीत्यादि, आकाशं नभस्तारापथो व्योमाम्बरमित्यादि, तथा ज्ञानं बुद्धिर्बोध इत्यादि, तथा रूपं रसो गन्ध इत्यादि, तथा नारकस्तिर्यंमनुष्य इत्यादि, एकगुणकृष्णो द्विगुणकृष्ण इत्यादि, तेषु सर्वेषामप्यभिधानानामागम एव निकषो-हेमरजतकल्पजीवादिपदार्थस्वरूपपरिज्ञानहेतुत्वात् कषपट्टकस्तस्मिन्नामेत्येवंरूपाअ संज्ञा-आख्या प्ररूपिता-व्यवस्थापिता, सर्वाण्यपि जीवो जन्तुरित्याद्यभिधानानि नामत्वसामान्य-व्यभिचारादेकेन नामशब्देनोच्यन्त इति भावः, तदेवमिहैकेनाप्यनेन नामशब्देन सर्वाण्यपि लोकरूढाभिधानानि वस्तूनि प्रतिपाद्यन्त इत्येतदेकनामोच्यते, एकं सन्नामैकनामेतिकृत्वा इति गाथार्थः ।

*मू. ( १४९ ) से तं एगनामे।*

वृ. 'से तं एगनामे'त्ति निगमनम्।

*मू. ( १५० ) से किं तं दुनामे ?, २ दुविहे पन्नत्ते, तं जहा-एगक्खरिए अ अनेगक्खरिए अ, से किं तं एगक्खरिए ?, २ अनेगविहे पन्नत्ते, तंजहा-ह्रीः श्रीः धीः स्त्री, से तं एगक्खरिए। से किं तं अनेगक्खरिए ?, २ कन्ना वीणा लता माला, से तं अनेगक्खरिए।*

*अहवा दुनामे दुविहे पन्नत्ते, तंजहा-जीवनामे अ अजीवनामे अ, से किं तं जीवनामे ?, अनेगविहे पन्नत्ते, तंजहा-देवदत्तो जन्नदत्तो विण्हुदत्तो सोमदत्तो, से तं जीवनामे से किं तं अजीवनामे ?, २ अनेगविहे पन्नत्ते, तंजहा-घडो पडो कडो रहो, से तं अजीवनामे।*

*अहवा दुनामे दुविहे पन्नत्ते, तंजहा-विसेसिए अ अविसेसिए अ। अविसेसिए दव्वे विसेसिए जीवदव्वे अजीवदव्वे अ, अविसेसिए जीवदव्वे विसेसिए नेरइए तिरिक्खजोणिए मनुस्से देवे, अविसेसिए नेरइए विसेसिए रयणप्पहाए सक्करप्पहाए वालुअप्पहाए पंकप्पहाए धूमप्पहाए तमाए तमतमाए, अविसेसिए रयणप्पहापुढविणेरइए विसेसिए पज्जत्तए अ अपज्जत्तए अ। एवं जाव अविसेसिए तमतमापुढवीणेरइए विसेसिए पज्जत्तए अ अपज्जत्तए अ।*

*अविसेसिए तिरिक्खजोणिए विसेसिए एगिंदिए बेइंदिए तेइंदिए चउरिंदिए पंचिंदिए, अविसेसिए एगिंदिए विसेसिए पुढविकाइए आउकाइए तेउकाइए वाउकाइए वणस्सइकाइए, अविसेसिए पुढविकाइए विसेसिए सुहुमपुढविकाइए अ बादरपुढविकाइए अ, अविसेसिए सुहुमपुढविकाइए विसेसिए पज्जत्तयसुहुमपुढविकाइए अ अपज्जत्तयसुहुमपुढविकाइए अ, अविसेसिए अ बादरपुढविकाइए विसेसिए पज्जतयबादरपुढविकाइए अ अपज्जत्तयबादर-पुढविकाइए अ, एवं आउकाइए तेउकाइए वाउकाइए वणस्सइकाइए अविसेसिअविसेसि-अपज्जत्तयअपज्जत्तयभेदेहिं भाणिअव्वा।*

*अविसेसिए बेइंदिए विसेसिए पज्जत्तयबेइंदिए अ अपज्जत्तयबेइंदिए अ, एवं तेइंदिअचउरिंदिआवि भाणिअव्वा।*

*अविसेसिए पंचिंदिअतिक्खजोणिए विसेसिए जलयरपंचिंदियतिरिक्खजोणिए थलयरपंचिंदिअतिरिक्खजोणिए खयरपंचिंदिअतिरिक्खजोणिए।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अविसेसिए जलयरपंचिंदिअतिरिक्खजोणिए विसेसिए संमुच्छिमजलयरपंचिंदियतिरिक्खजोणिए अ गब्भवक्कंतिअजलयरपंचिंदियतिरिक्खजोणिए अ, अविसेसिए संमुच्छिमजलयरपंचिंदियतिरिक्खजोणिए विसेसिए अ पज्जत्तयसंमुच्छिमजलयरपंचिंदियतिरिक्खजोणिए अ अपज्जत्तयसंमुच्छिमजलयरपंचिंदियतिरिक्खजोणिए अविसेसिए गब्भवक्कंतियजलयरपंचिंदिअतिरिक्खजोणिए विसेसिए पज्जत्तगब्भवक्कंतिअजलयरपंचिंदिअतिरिक्खजोणिए अ अपज्जत्तगब्भवक्कंतिअजलयरपंचिंदिअतिरिक्खजोणिए अ,

अविसेसिए थलयरपंचिंदिअतिरिक्खजोणिए विसेसिए चउप्पयथलयरपंचिंदिअतिरिक्खजोणिए अ परिसप्पथलयरपंचिंदिअतिरिक्खजोणिए अ, अविसेसिए चउप्पयथलयरपंचिंदिअतिरिक्खजोणिए विसेसिए संमुच्छिचउप्पयथलयरपंचिंदिअतिरिक्खजोणिए अ गब्भक्कंतिअचउप्पयथलयरपंचिंदिअतिरिक्खजोणिए अ, अविसेसिए संमुच्छिमचउप्पयथलयर० विसेसिए पज्जत्तयसंमुच्छिचउप्पयथलयरपंचिंदिअतिरिक्खजोणिए अ अपज्जत्तयसंमुच्छिचउप्पयथलयरपंचिंदिअतिरिक्खजोणिए अ, अविसेसिए गब्भक्कंतिअचउप्पयथलयरपंचिंदिअतिरिक्खजोणिए विसेसिए पज्जत्तयगब्भक्कंतिअचउप्पयथलयरपंचिंदिअतिरिक्खजोणिए अ अपज्जत्तगब्भक्कंतिअचउप्पयथलयरपंचिंदिअतिरिक्खजोणिए अ, अविसेसिए परिसप्पथलयर० विसेसिए उरपरिसप्पथलपंचिंदिअतिरिक्खजोणिए अ भुअपरिसप्पथलयरपंचिंदिअतिरिक्खजोणिए अ, एतेऽवि संमुच्छिमा पज्जत्तगा अपज्जत्तगा य गब्भवक्कंतिआवि पज्जत्तगा अपज्जत्तगा य भाणिअव्वा।

अविसेसिए खहयरपंचिंदिअ० विसेसिए संमुच्छिमखहयरपंचिंदिअतिरिक्खजोणिए अ गब्भक्कंतिअखहयरपंचिंदिअतिरिक्खजोणिए अ, अविसेसिए संमुच्छिमखहयरपंचिंदिअतिरिक्खजोणिए विसेसिए पज्जत्तयसंमुच्छिमखहयरपंचिंदिअतिरिक्खजोणिए अ अपज्जत्तसंमुच्छिमखहयरपंचिंदिअतिरिक्खजोणिए, अविसेसिए गब्भक्कंतिअखहयरपंचि० विसेसिए पज्जत्तयगब्भक्कंतिअखहयरपंचिंदिअतिरिक्खजोणिए अ अपज्जत्तयगब्भक्कंतिअखहयरपंचिंदिअतिरिक्खजोणिए य।

अविसेसिए मनुस्से विसेसिए संमुच्छिममनुस्से अ गब्भक्कंतिअमनुस्से च, अविसेसिए संमुच्छिममनुस्से विसेसिए पज्जत्तसंमुच्छिममनुस्से अ अपज्जत्तसंमुच्छिममनुस्से अ, अविसेसिए गब्भक्कंतिअमनुस्से विसेसिए कम्मभूमिओ य अकम्मभूमिओ य अंतरदीवओ य संखिज्जवासाउय असंखिज्जवासाउय पज्जत्तापज्जत्तओ।

अविसेसिए देवे विसेसिए भवणमासी वाणमंतरे जोइसिए वेमाणिए अ, अविसेसिए भवणमासी विसेसिए असुरकुमारे नागकु० सुवण्णकु० विज्जकु० अग्गिकु० दीवकु० उदधिकु० दिसाकु० वाउकु० थणिकुमारे सव्वेसिंपी अविसेसिअविसेसिअपज्जत्तगअपज्जत्तगभेदा भाणिअव्वा।

अविसेसिए वाणमंतरे विसेसिए पिसाए भूए जक्खे रक्खसे किन्नरे किंपुरिसे महोरगे गंधव्व, एतेसिंपि अविसेसिअविसेसिअपज्जत्तयअपज्जत्तगभेदा भाणिअव्वा।

अविसेसिए जोइसिए विसेसिए चंदे सूरे गहगने नक्खत्ते तारारूवे, एतेसिंपि अविसेसिय-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*विसेसियपज्जत्तयअपज्जत्तभेआ भाणिअव्वा।*

*अविसेसिए वेमाणिए विसेसिए कप्पोवगे अ कप्पातीतगे अ, अविसेसिए कप्पोवगे विसेसिए सोहम्महे ईसानए सणंकुमारए माहिंदिए बंभलोए लंतयए महासुक्कए सहस्सारए आणयए पाणयए आरणए अच्चुयए, एतेसिंपी अविसेसिअविसेसिअअपज्जत्तगपज्जत्तगभेदा भाणिअव्वा। अविसेसिए कप्पातीतए विसेसिए गेवेज्जए अ अनुत्तरोववाइए अ, अविसेसिए गेवेज्जए विसेसिए हेट्ठिम, मज्झिम, उवरि, अविसेसिए हेट्ठिम० विसेसिए हेट्ठिमहेट्ठिमगेवेज्जए हेट्ठिममज्झिमगेवेज्जए, हिट्ठिमउवरिमगेवेज्जए, अविसेसिए मज्झिमगेवेज्जए विसेसिए हिट्ठिममज्झिमगेविज्जए मज्झिममज्झिमगेवेज्जए मज्झिमउवरिमगेवेज्जए, अविसेसिए उवरिमगेवेज्जए विसेसिए उवरिमहेट्ठिमगेवेज्जए उवरिममज्झिमगेवेज्जए उवरिमउवरिमगेवेज्जए अ, एतेसिंपि सव्वेसिं अविसेसिअविसेसिअपज्जत्तगापज्जत्तगभेदा भाणिअव्वा। अविसेसिए अनुत्तरोववाइए विसेसिए विजयए वेजयंतए जयंतए अपराजिअए सव्वट्ठिसिद्धए अ, एतेसिंपि सव्वेसिं अविसेसिअविसेसिअपज्जत्तगापज्जत्तगभेदा भाणिअव्वा।*

*अविसेसिए अजीवदव्वे विसेसिए धम्मत्थिकाए अधम्मत्थिकाए आगासत्थिकाए पोग्गलत्थिकाए अद्धासमए अ, अविसेसिए पोग्गलत्थिकाए विसेसिए परमाणुपोग्गले दुपएसिए तिपएसिए जाव अनंतपसिए अ, से तं दुनामे*

**वृ.** यत एवेदं द्विनामभत एव द्विविधं-द्विप्रकारं, तद्यथा-एकं च तदक्षरं च २ तेन निर्वृत्तमेकाक्षरिकम्, अनेकानि च तान्यक्षराणि च २ तैर्निर्वृत्तमनेकाक्षरिकं चकारौ समुच्चयार्थौ, तत्रैकाक्षरिके ह्रीः-लज्जा देवताविशेषो वा, श्रीः-देवताविशेषः, धीः-बुद्धिः, स्त्री-योषिदिति, अनेकाक्षरिके-कन्येत्वादि, उपलक्षणं चेदं बलाकापताकादीनां त्र्याद्यक्षरनिष्पन्ननाम्नामिति, तदेवं यदस्ति वस्तु तत् सर्वमेकाक्षरेण वा नाम्नाऽभिधीयतेऽमेकाक्षरेण वा, अतोऽनेन नामद्वयेन विवक्षितस्य सर्वस्यापि वस्तुजातस्याभिधानाद् द्विनामोच्यते, द्विरूपं सत् सर्वस्य नाम द्विनाम, द्वयोर्वा नाम्नोः समाहारो द्विनाममिति। एतदेव प्रकारान्तरेण-'अहवा दुनामे' इत्यादि, जीवस्य नाम जीवनाम अजीवस्य नाम अजीवनाम, अत्रापि यदस्ति तेन जीवनाम्नाऽजीवनाम्ना वा भवितव्यमिति जीवाजीवनामभ्यां विवक्षितसर्ववस्तुसंग्रहो भावनीयः, शेषं सुगमं।

पुनरेतदेवान्यथा प्राह-'अहवा दुनामे'इत्यादि, द्रव्यमित्यविशेषनाम जीवे अजीवे च सर्वत्र सद्भावात्, जीवद्रव्यमजीवद्रव्यमिति च विशेषनाम, एकस्य जीव एवान्यस्य त्वजीव एव सद्भावादितिः, ततः पुनरुत्तरापेक्षाया जीवद्रव्यमित्यविशेषनाम, नारकस्तिर्यङित्यादि तु विशेषनाम, पुनरप्युत्तरापेक्षया नारकादिकमविशेषनाम रत्नप्रभायां भवो रात्नप्रभ इत्यादि तु विशेषनाम, एवं पूर्वं पूर्वमविशेषनाम उत्तरोत्तरं तु विशेषनाम सर्वत्र भावनीयं, शेषं सुगमं, नवरं सम्मूर्च्छन्ति तथाविधकर्मोदयाद् गर्भमन्तरेणैवोत्पद्यन्त इति सम्मूर्च्छिमाः, गर्भे व्युत्क्रान्तिः-उत्पत्तिर्येषां गर्भव्युत्क्रान्तिकाः, उरसा भुजाभ्यां च परिसर्प्पन्ति-गच्छन्तीति विषधरगोधानकुलादयः सामान्येन परिसर्पाः, विशेषस्तूरसा परिसर्पन्तीत्युरः-परिसर्पाः सर्पादय एव, भुजाभ्यां परिसर्पन्तीति भुजपरिसर्पाः-गोधानकुलादय एव, शेषं सुखोन्नेयं।

तदेवमुक्ताः सामान्यविशेषनामभ्यां जीवद्रव्यस्य सम्भविनो भेदाः, साम्प्रतं प्रागुद्दिष्टम-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जीवद्रव्यमपि भेदतस्तथैवोदाहर्तुमाह-'अविसेसिए अजीवदव्वे'इत्यादि, गतार्थं, तदेवं यदस्ति वस्तु तत्सर्वं सामान्यनाम्ना विशेषनाम्ना वा अभिधीयते, एवमन्यत्रापि द्विनामत्वं भावनीयं, 'से तं दुनामे'त्ति निगमनम्।

*मू. (१५१) से किं तिनामे ?, २ तिविहे पन्नत्ते, तंजहा-दव्वनामे गुणनामे पज्जवनामे अ। से किं तं दव्वनामे ?, २ छव्विहे पन्नत्ते, तंजहा-धम्मत्थिकाए अधम्मत्थिकाए आगासत्थिकाए जीवत्थिकाए पुग्गलत्थिकाए अद्धासमए अ, से तं दव्वनामे।*

*किं तं गुणनामे ?, २ पंचविहे पन्नत्ते, तंजहा-वन्ननामे गंधनामे रसनामे फासनामे संठाननामे। से किं तं वण्णनामे ?, २ पंचविहे पन्नत्ते, तंजहा-कालवण्णनामे नीलवण्णनामे लोहिअवण्णनामे हालिद्दवण्णनामे सुक्किल्लवण्णनामे, से तं वण्णनामे। से किं तं गंधनामे ?, २ दुविहे पन्नत्ते, तंजहा-सुरभिगंधनामे अ दुरभिगंधनामे अ, से तं गंधनामे। से किं रसनामे ?, २ पंचविहे पन्नत्ते, तंजहा-तित्तरसनामे कडुअरसनामे कसायरसनामे अंबिलरसनामे महुररसनामे अ, से तं रसनामे। से किं तं फासनामे ?, २ अट्ठविहे पन्नत्ते तंजहा-कक्खडफासनामे मउअफा० गरुअफा० लहुअफा० सीतफासनामे उसिणफासनामे निद्धफा० लुक्खफासनामे, से तं फासनामे। से किं तं सठाणनामे ?, २ पंचविहे पन्नत्ते, तंजहा-परिमंडलसंठाणनामे वट्टसं० तंससं० चउरंससं० आयतसंठाणनामे, से तं संठाणनामे, से तं गुणनामे।*

**वृ.** यत एवेदं त्रिनाम तत एव त्रिविधं-त्रिप्रकारं, द्रव्यनामादिभेदात्, तत्र द्रवति-गच्छति ताँस्तान् पर्यायान् प्राप्नोतीति द्रव्यं तस्य नाम धर्मास्तिकाय इत्यादि, धर्मास्तिकायादयश्च प्राक् व्याख्याता एव, गुण्यन्ते-संख्यायन्ते इति गुणास्तेषां नाम गुणनाम, 'वण्णनामे' इत्यादि, तत्र वर्ण्यते-अलङ्क्रियते वस्त्वनेनेति वर्णः-कृष्णादिः पञ्चधा प्रतीत एव, कपिशादयस्त्वेतत्संयोगेनैवोत्पद्यन्ते न पुनः सर्वथा एतद्विलक्षणया इति नेहोदाहृताः, गन्ध्यते-आघ्रायत इति गन्धस्तस्य नाम गन्धनाम, स च द्विविधः-सुरभिर्दुरभिश्च, तत्र सौमुख्यकृत् सुरभिः, वैमुख्यकृद् दुरभिः, अत्राप्युभयसंयोगजः पृथग्नोक्तः, एतत्संसर्गजत्वादेव भेदाविवक्षणात्, रस्यते-आस्वाद्यत इति रसस्तस्य नाम रसनाम, स च तिक्तकटुकषायाम्लमधुरभेदात् पञ्चविधः, तत्र श्लेष्मादिदोषहन्ता निम्बाद्याश्रितस्तिक्तो रसः, तथा च भिषक् शास्त्रम्-

"श्लेष्माणमरुचिं पित्तं, तृषं कुष्टं विषं ज्वरम्।
हन्यात् तिक्तो रसो बुद्धेः, कर्ता मात्रोपसेवितः॥"

गलामयादिप्रशमनो मरिचनागराद्याश्रितः कटुः उक्तं च-

"कटुर्गलामयं शोफं, हन्ति युक्त्योपसेवितः।
दीपनः पाचको रुच्यो, बृंहणोऽतिकफापहः॥"

रक्तदोषाद्यहर्ता बिभीतकामलककपित्थाद्याश्रितः कषायः, आह च-

"रक्तदोषं कफं पित्तं, कषायो हंति सेवितः।
रूक्षः शीतो गुणग्राही, रोचकश्च स्वरूपतः॥"

अग्निदीपनादिकृदम्लीकाद्याश्रितोऽम्लः, पठ्यते च-

"अम्लोऽग्निदीप्तिकृत् स्निग्धः, शोफपित्तकफापहः।

Jain Education International  For Private & Personal Use Only  www.jainelibrary.org

क्लेदनः पाचनो रुच्यो, मूढवातानुलोकः ॥"

पित्तादिप्रशमनः खण्डशर्कराद्याश्रितो मधुरः, तथा चोक्तम् -

"पित्तं वातं विषं हन्ति, धातुवृद्धिकरो गुरुः ।
जीवनः केशकृद्बालवृद्धक्षीणौजसां हितः ॥"

इत्यादि, स्थानान्तरे स्तम्भिताहारबन्धविध्वंसादिकर्ता सिन्धुलवणाद्याश्रितो लवणोऽपि रसः पठ्यते, स चेह नोदाहृतो, मधुरादि संसर्गजत्वात् तदभेदेन विवक्षणात्, सम्भाव्यते च तत्र माधुर्यादिसंसर्गः, सर्वरसानां लवणप्रक्षेपअ एव स्वादुत्वप्रतिपत्तेरित्यलं विस्तरेण। स्पृश्यत इति स्पर्शः-कर्कशादिरष्टविधः, तत्र स्तब्धताकारणं दृषदादिगतः कर्कशः, सन्नतिकारणं तिनिशलतादिगतो मृदुः, अधःपनहेतुरयोगोलकादिगतो गुरुः, प्रायस्तिर्यगूर्ध्वाधोगमनहेतुरर्कतूलादिनिश्रितो लघुः, देहस्तम्भादिहेतुः प्रालेयाद्याश्रितः शीतः, आहारपाकादिकारणं वहन्याद्यनुगत उष्णः, पुद्गलद्रव्याणां मिथः संयुज्यमानानां बन्धनिबन्धनं तैलादिस्थितः स्निग्धः, तेषा मेवाबन्धनिबन्धनं भस्माद्याधारो रूक्षः, एतत्संसर्गजास्तु नोक्ताः एष्वेवान्तर्भावादिति। संस्थानस्वरूपं तु प्रतीतमेव।

*मू.( १५१ ) से किं तं पज्जवनामे ?, २ अनेगविहे पन्नत्ते, तंजहा-एगगुणकालए दुगुणकालए तिगुणकालए जाव दसगुणकालए संखिज्जगुणकालए असंखिज्जगुणकालए अनंतगुणकालए, एवं नीललोहिअहालिद्दसुक्किल्लावि भाणिअव्वा। एगगुणसुरभिगंधे दुगुणसुरभिगंधे तिगुणसुरभिगंधे जाव अनंतगुणसुरभिगंधे एवं दुरभिगंधोऽवि भाणिअव्वो। एगगुणतित्ते जाव अनंतगुणतित्ते, एवं कडुअकसागअंबिलमहुरावि भाणिअव्वा। एगगुणक्खडे जाव अनंतगुणक्खडे, एवं मउअगरुअलहुअसीतउसिणणिद्धलुक्खावि भा०, से तं पज्जवनामे।*

**वृ.** परिः-समतादवन्ति अपगच्छन्ति न तु द्रव्यवत् सर्वदैवावतिष्ठन्त इति पर्यवाः, अथवा परिः-समन्ताद् अवनानि-गमनानि द्रव्यस्यावस्थान्तरप्राप्तिरूपाणि पर्यवाः-एकगुणकालत्वादयस्तेषां नाम पर्यवनाम, यत्र तु पर्यायनामेति पाठः, तत्र परिः-समन्तादयन्ते-अपगच्छन्ति न पुनर्द्रव्यवत् सर्वदैव तिष्ठन्तीति पर्यायाः, अथवा परिः-सामस्त्येन एति-अभिगच्छति व्याप्नोति वस्तुतामिति पर्यायाः-एकगुणकालत्वादय एव, तेषां नाम पर्यायनामेति, तत्रेह गुणशब्दोऽशपर्याय्: ततश्च सर्वस्यापि त्रैलोक्यगतकालत्वस्यासत्कल्पनया पिण्डितस्य य एकः-सर्वजघन्यो गुणः-अंशस्तेन कालकः परमाण्वादिरेकगुणकालकः-सर्वजघन्यकृष्ण इति।

द्वाभ्यां गुणाभ्यां-तदंशाभ्यां कालकः परमाण्वादिरेक द्विगुणकालकः, एवं तावन्नेयं यावदनन्तैर्गुणैः-तदंशैः कालकोऽनन्तगुणकालकः स एवेति एवमुक्तानुसारेणैकगुणनीलकादीनामेकगुणसुरभिगन्धादीनां च सर्वत्र भावना कार्येति, आह-गुणपर्याययोः कः प्रतिविशेषः ?, उच्यते सदैव सहवर्तित्वाद्वर्णगन्धरसादयः सामान्येन गुणा उच्यते, न हि मूर्ते वस्तुनि वर्णादिकमात्रं कदाचिदपि व्यवच्छिद्यते, एकगुणकालत्वादयस्तु द्विगुणकालत्वाद्यवस्थायां निवर्तन्त एवेति अतः क्रमवृत्तित्वात् पर्यायाः, उक्तं च-"सहवर्तिनो गुणाः, यथा जीवस्य चैतन्यामूर्तत्वादयः, क्रमवर्तिनः पर्यायाः, यथा तस्यैव नारकत्वतिर्यक्त्वादयः" इति, ननु यद्येवं तर्हि वर्णादिसामान्यस्य भवतु गुणत्वं, तद्विशेषाणां तु कृष्णादीनां न स्याद्, अनियतत्वात् तेषां,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सत्यं, वर्णादिसामान्यस्य भवतु गुणत्वं, तद्विशेषाणां तं कृष्णादीनां न स्याद्, अनियतत्वात् तेषां, सत्यं, वर्णादिसामान्यभेदानामपि कृष्णनीलादीनां प्रायः प्रभूतकालं सहवर्तित्वात् गुणत्वं विवक्षितमित्यलं विस्तरेण। आह-भवत्वेवं,

किन्तु पुद्गलास्तिकायद्रव्यस्यैव संबन्धिनो गुणपर्यायाः किमिति गुणपर्यायनामत्वेनोदाहृताः ?, न धर्मास्तिकायादीना, न च वक्तव्यं-तेषां न सन्तीति, धर्माधर्माकाशजीवकालद्रव्येष्वपि यथाक्रमं गतिस्थित्यवगाहोपयोगवर्त्तनादिगुणानां प्रत्येकमनन्तानामगुरुलघुपर्यायाणां च प्रसिद्धत्वात्, सत्यं, किन्त्वन्द्रियप्रत्यक्षगम्यत्वात् सुप्रतिपाद्यतया पुद्गलद्रव्यस्यैव गुणपर्याया उदाहृता न शेषाणामित्यलं विस्तरेण, तस्माद् यत्किमपि नाम तेन सर्वेणापि द्रव्यनाम्ना गुणनाम्ना पर्यायनाम्ना वा भवितव्यं, नातः परं किमपि नामास्ति, ततः सर्वस्यैवानेन संग्रहात् त्रिनामैतदुच्यत इति।

मू. ( १५२ ) *तं पुन नामं तिविहं इत्थी पुरिसं नपुंसगं चेव।*
*एएसिं तिण्हंपि अ अंतंमि अ परूवणं वोच्छं॥*

वृ. तत्पुनर्नाम द्रव्यादीनां सम्बन्धि सामान्येन सर्वमपि स्त्रीपुनपुंसकलिङ्गेषु वर्तमानत्वात्, त्रिविधं-त्रिप्रकारं, तत्र स्त्रीलिङ्गे नदी महीत्यादि, पुंल्लिङ्गे घटः पटः इत्यादि, नपुंसके दधि मध्वित्यादि, एषां च स्त्रीलिङ्गवृत्यादीना त्रयाणामपि नाम्नां प्राकृतशैल्या उच्चार्यमाणानामन्ते यान्याकारादीन्यक्षराणि भवन्ति तत्प्ररूपणाद्वारेण लक्षणं निर्दिदिक्षुरुत्तरार्द्धमाह-'एएसि' मित्यादि, गतार्थमेवेति गाथार्थः।

मू. ( १५३ ) *तत्थ पुरिसस्स अंता आइऊओ हवंति चत्तारि।*
*ते चेव इत्थिआओ हवंति ओकारपरिहीणा॥*

वृ. 'तत्र' तस्मिन् त्रिविधे नाम्नि 'पुरुषस्य' पुंल्लिङ्गवृत्तेर्नाम्नाः 'अन्ता' अन्तवर्तीन्यक्षराणि चत्वारि भवन्ति, तद्यथा-आकार ईकार ऊकार ओकारश्चेत्यर्थः, एतानि विहाय नापरं प्राकृतपुंल्लिङ्गवृत्तेर्नाम्नोऽन्तेऽक्षरं सम्भवतीत्यर्थः, स्त्रीलिङ्गवृत्तेर्नाम्नोऽप्यन्ते ओकारवर्जान्येतान्येवाकारेकारोकारलक्षणानि त्रीणि अक्षराणि भवन्ति नापरमिति, अत्र चानन्तरगाथायां इत्थीपुरिसमिति निर्दिश्यापि यदिहादौ पुंल्लिङ्गनाम्नो लक्षणकथनं तत्पुरुषप्राधान्यख्यापनार्थमिति गाथार्थः॥

मू. ( १५४ ) *अंतिअ इंतिअ उंतिअ अंताउ नपुंसगस्स बोद्धव्या।*
*एतेसिं तिण्हंपि अ वोच्छामि निदंसणे एत्तो॥*

वृ. नपुंसकवृत्तिनाम्नां त्वन्ते अंकारः इंकार उंकारश्चेत्येतान्येव त्रीण्यक्षराणि भवन्ति नापरं। एतेषां च त्रयाणामपि निदर्शनम्-उदाहरणं प्रत्येकं वक्ष्यामीति गाथार्थः॥ तदेवाह-

मू. ( १५५ ) *आगारंतो राया ईगारंतो गिरि अ सिहरी अ।*
*ऊगारंतो विण्हू दुमो अ अंता उ पुरिसाणं॥*

मू. ( १५६ ) *आगारंता माला ईगारंता सिरी अ लच्छी अ।*
*ऊगारंता जंबू वहू अ अंताउ इत्थीणं॥*

मू. ( १५७ ) *अंकारंतं धन्नं इंकारंतं नपुंसगं अत्थि।*
*उंकारंतो पीलुं महुं च अंता नपुंसाणं॥*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. गाथात्रयं व्यक्तं, नवरं संस्कृते यद्यपि विष्णुरित्युकारान्तमेव भवति तथापि प्राकृतलक्षणस्यैवेह वक्तुमिष्टत्वादूकारान्तता न विरुध्यते, एवमोकारान्तो द्रुम इत्यादिष्वपि वाच्यं, जम्बूः-स्त्रीलिङ्गवृत्तिर्वनस्पतिविशेषः, 'पीलुं'ति क्षीरं, शेषं सुगमं,

*मू. (१५८) से तं तिनामे।*

वृ. 'से तं तिनामे'त्ति निगमनम्॥

*मू. (१५९) से किं तं चउनामे?, २ चउव्विहे पन्नत्ते, तंजहा-आगमेणं लोवेणं पयईए विगारेणं। से किं तं आगमेणं?, २ पद्मानि पयांसि कुण्डानि, से तं आगमेणं। से किं तं लोवेणं?, २ ते अत्र तेऽत्र पटो अत्र पटोऽत्र घटो अत्र घटोऽत्र, से तं लोवेणं। से किं तं पगईए?, २ अग्नी एतौ पटू इमौ शाले एते माले इमे, से तं पगईए। से किं तं विगारेणं?, २ दण्डस्य अग्रं दण्डाग्रं सा आगता साऽऽगता दधि इदं दधीदं नदी इह नदीह मधु उदकं अ मधूदकं वधू ऊहः वधूहः, से तं विगारेणं, से तं चउनामे।*

वृ. आगच्छतीत्यागो-न्वागमादिस्तेन निष्पन्नं नाम यथा पद्मानीत्यादि, धुट्स्वराद् घुटि नुः इत्यनेनात्र न्वागमस्य विधानाद्, उपलक्षणमात्रं चेदं, संस्कार उपस्कार इत्यादेरपि सुडाद्यागमनिष्पन्नत्वादिति, लोपो-वर्णापगमरूपस्तेन निष्पन्नं नाम, यथा तेऽत्रेत्यादि, 'एदोत्परः पदान्ते' इत्यादिना आकारस्येह लुप्तत्वात्, नामत्वं चात्र तेन तेन रूपेण नमनान्नामेति व्युत्पत्तेरस्त्येवेति, इत्थमन्यत्रापि वाच्यम्। उपलक्षणं चेदं-मनस ईषा मनीषा-बुद्धिः भ्रमतीति भ्रूरित्यादेरपि सकारमकारादिवर्णलोपेन निष्पन्नत्वादिति, प्रकृतिः-स्वभावो वर्णलोपाद्यभावस्तया निष्पन्नं नाम, यथा अग्नी एतावित्यादि, द्विवचनमनावि त्यनेनात्र प्रकृतिभावस्य विधानात्, निदर्शनमात्रं चेदं, सरसिजं कण्ठेमाल इत्यादीनामपि प्रकृतिनिष्पन्नत्वादिति, वर्णस्यान्यथाभावापादनं विकारस्तेन निष्पन्नं दण्डस्याग्रं दण्डाग्रमित्यादि, समानः सवर्णे दीर्घीभवति परश्च लोपम् इत्यादिना दीर्घत्वलक्षणस्य वर्णविकारस्येह कृतत्वाद्, उदाहरणमात्रं चैतत्-तस्करः षोडशेत्यादेरपि वर्णविकारसिद्धत्वादिति। तदिह यदस्ति तेन सर्वेणापि नाम्ना आगमनिष्पन्नेन वा लोपनिष्पन्नेन वा प्रकृतिनिर्वृत्तेन वा विकारनिष्पन्नेन वा भवितव्यं, डित्थादिनाम्नामपि सनिरुक्तवात् 'नाम च धातुजमाहे'त्वादिवचनात्, ततश्चतुर्भिरप्यैतैः सर्वस्य संग्रहाच्चतुर्नामेदमुच्यते, 'से तं चउनामे'त्ति निगमनम्।

*मू. (१६०) से किं तं पंचनामे?, २ पंचविहे पन्नत्ते, तंजहा-नामिकं नैपातिकं आख्यातिकम् औपसर्गिकं मिश्रं, अश्व इति नामिकं, खल्विति नैपातिकं धावतीत्याख्यातिकं, परीत्यौपसर्गिकं, संयत इति मिश्रं, से तं पंचनामे।*

वृ. इहाश्व इति किं? नामिकं, वस्तुवाचकत्वात्, खल्विति नैपातिकं, निपातेषु पठितत्वात्, धावतीत्याख्यातिकं, क्रियाप्रधानत्वात्, परीत्यौपसर्गिकम्, उपसर्गेषु पठितत्वात्, संयत इति मिश्रम्, उपसर्गनामसमुदायनिष्पन्नत्वादिति। एतैरपि सर्वस्य क्रोडीकरणाद् पञ्चनामत्वं भावनीयम्, 'से तं पंचनामे'त्ति निगमनम्।

*मू. (१६१) से किं तं छन्नामे?, २ छव्विहे पन्नत्ते, तंजहा-उदइए उवसमिए खइए अखोवसमिए पारिणामिए संनिवाइए।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. अत्रौदयिकादयः षड् भावाः प्ररूप्यन्ते, तथा च सूत्रम्-'उदइए' इत्यादि, अत्राह-ननु नाम्नि प्रक्रान्ते तदभिधेयाना मर्थानां भावलक्षणानां प्ररूपणमयक्तमिति, नैतदेवं, नामनामवतोर-भेदोपचारात् तत्प्ररूपणस्याप्यदुष्टत्वाद्, एवमन्यत्रापि यथासम्भवं वाच्यं, तत्र ज्ञानावरणादीना-मष्टानां प्रकृतीनामात्मीयात्मीयस्वरूपेण विपाकतोऽनुभवनमुदयः स एवौदयिकः, अथवा यथोक्तन वोदयेन निष्पन्न औदयिको भाव इति सामर्थ्याद् गम्यते, उपशमनमुपशमः-कर्म-णोऽनुदयाक्षीणावस्था भस्मपटलावच्छन्नाग्निवत् स एव औपशमिकः, तेन वा निर्वृत्त औपशमिकः, क्षयः-कर्मणोऽपगमः स एव तेन वा निर्वृत्तः क्षायिकः कर्मणो यथोक्तो क्षयोपश-मावेव ताभ्यां वा निर्वृत्तः क्षायोपशमिकः दरविध्यतभस्मच्छन्नावह्निवत्, परिणमनं-तेन तेन रूपेण वस्तूनां भवनं परिणामः स एव तेन वा निर्वृत्तः पारिणामिक अनन्तरोक्तानां द्वयादिभावानां मेलकः सन्निपातः स एव तेन वा निर्वृत्तः सान्निपातिकः।

तत्रामीषां प्रत्येकं स्वरूपनिरूपणार्थमर्थमाह-

*मू. ( १६१ वर्तते ) से किं तं उदइए ?, २ दुविहे पन्नत्ते, तंजहा-उदइए अ उदयनिप्फन्ने अ। से किं तं उदइए ?, २ अट्ठण्हं कम्मपयडीणं उदएणं, से तं उदइए। से किं तं उदयनिप्फन्ने ?, २ दुविहे पन्नत्तं, तंजहा-जीवोदयनिप्फन्ने अ अजीवोदयनिप्फन्ने अ।*

*से किं तं जीवोदयनिप्फन्ने ?, २ अनेगवीहे पन्नत्ते तंजहा-नेरइए तिरिक्खजोणिए मनुस्से देवे पुढविकाइए जाव तसकाइए कोहकसाई जाव लोहकसाई इत्थीवेदए पुरिसवेयए नपुंसगवेदए कण्हलेसे जाव सुक्कलेसे मिच्छादिट्ठी ३ अविरए असण्णी अन्नाणी आराहरए छउमत्थे सजोगी संसारत्थे असिद्धे, से तं जीवोदयनिप्फन्ने ? से किं तं अजीवोदयनिप्फन्ने ?, २ अनेगवीहे पन्नत्ते तंजहा-उरालिअं वा सरीरं उरालिअसरीरपओगपरिणामिअं वा दव्वं, वेउव्विअं वा सरीर वेउव्वियसरीरपओगपरिणामिअं वा दव्वं, एवं आहारगं, सरीरं तेअगं सरीरं कम्मगसरीरं च भाणिअव्वं, पओगपरिणामिए वन्ने गंधे रसे फासे से तं अजीवोदयनिप्फन्ने। से तं उदयनिप्फन्ने, से तं उदइए।*

**वृ.** औदयिको भावो द्विविधः-अष्टानां कर्मप्रकृतीनामुदयस्तन्निष्पन्नश्च, अयं चार्थः प्रकारद्वयेन व्युत्पत्तिकरणादादावेव दर्शितः, उदयनिष्पन्नः, पुनरपि द्विविधो-जीवे उदयनिष्पन्नो जीवोदयनिष्पन्नः अजीवे उदयनिष्पन्नोऽजीवोदयनिष्पन्नो, जीवोदयनिष्पन्नस्योदाहरणानि-'नेरइए'इत्यादिः, इदमुक्तं भवति-कर्मणामुदयेनैव सर्वेऽप्येते पर्याया जीवे निष्पन्नाः, तद्यथा-नारकस्तिर्यंमनुष्य इत्यादि, अत्राह-ननु यद्येवमपरेऽपि निद्रापञ्चकवेदनीयहास्यादयो बहवः कर्मोदयजन्या जीवे पर्यायाः सन्ति, किमिति नारकत्वादयः कियन्तोऽप्युपन्यस्ताः ?, सत्यम्, उपलक्षणत्वादमीषामन्येऽपि सम्भविनो द्रष्टव्याः, अपरस्त्वाह-ननु कर्मोदयजनितानां नारका-त्वादीनां भवत्विहोपन्यासो लेश्यास्तु कस्यचित् कर्मण उदये भवन्तीत्येतन्न प्रसिद्धं तत्किमितिह तदुपन्यासः ?, सत्यं, किन्तु योगपरिणामो लेश्याः, योगस्तु त्रिविधोऽपि कर्मोदयजन्य एव, ततो लेश्यानामपि तदुभयजन्यत्वं न विहन्यते, अन्ये तु मन्यन्ते-कर्माष्टकोदयात् संसारस्थत्वा-सिद्धत्ववल्लेश्यावत्त्वमपि भावनीयमित्यलं विस्तरेण, तदर्थिना तु गन्धहस्तिवृत्तिरनुसर्तव्येति, 'से तं जीवोदयनिप्फन्नो'त्ति निगमनम्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथाजीवोदयनिष्पन्नं निरूपयितुमाह-'से किं त'मित्यादि, 'ओरालियं वा सरीरं'ति विशिष्टाकारपरिणतं तिर्यङ्मनुष्यदेहरूपमौदारिकं शरीरं, 'उरालिअसरीरप्पओगे'इत्यादि, औदारिकशरीरप्रयोगपरिणामितं द्रव्यम् औदारिकशरीरस्य प्रयोगो-व्यापारस्तेन परिणामितं स्वप्रयोगित्वात् गृहीतं तत्तथा, तच्च वर्णगन्धरसस्पर्शानापानादिरूपं स्वत एवोपरिष्टाद् दर्शयिष्यति, वाशब्दौ परस्परसमुच्चये, एतद्द्वितमप्यजीवे-पुद्गलद्रव्यलक्षणे औदारिकशरीरनामकर्मोदयने निष्पन्नत्वादजीवोदयनिष्पन्न औदयिको भाव उच्यते, एवं वैक्रियशरीरादिष्वपि भावना कार्या, नवरं वैक्रियशरीरनामकर्माद्युदयजन्वत्वं यथास्वं वाच्यमिति। औदारिकादिशरीरप्रयोगेण यत् परिणम्यते द्रव्यं तत् स्वत एव दर्शयितुमाह-'पओगपरिणामिए वण्णे'इत्यादि, पञ्चानामपि शरीराणां प्रयोगेण-व्यापारेण परिणामितं-गृहीतं वर्णादिकं शरीरवर्णादिसम्पादकं द्रव्यमिदं द्रष्टव्यम्, उपलक्षणत्वाच्च वर्णादीनामपरमपि यच्छरीरे संभवत्यानापानादि तत् स्वत एव दृश्यमिति । अत्राह--ननु यथा नारकत्वादयः पर्याया जीवे भवन्तीति जीवोदयनिष्पन्ने औदयिके पठ्यन्ते, एवं शरीराण्यपि जीव एव भवन्ति अतस्तान्यपि तत्रैव पठनीयानि स्युः, किमित्यजीवोदयनिष्पन्नेऽधीयन्ते ?, अस्त्येतत्, किंत्वौदारिकादिशरीरनामकर्मोदयस्य मुख्यतया शरीरपुद्गलेष्वेव विपाकदर्शनात् तन्निष्पन्न औदयिको भावः शरीरलक्षणेऽजीव एव प्राधान्याद् दर्शित इत्यदोषः । 'से त'मित्यादि निगमनत्रयम् ।

उक्तो द्विविधोऽप्योदयिकः, अथौपशमिकं निर्दिदिक्षुराह-

*मू.( १६१ वर्तते ) से किं तं उवसमिए ?, २ दुविहे पन्नत्ते, तंजहा-उवसमे अ उवसमनिप्फन्ने अ । से किं तं उवसमे ?, २ मोहनिज्जस्स कम्मस्स उवसमेणं, से तं उवसमे । से किं तं उवसमनिप्फन्ने ?, २ अनेगविहे पन्नत्ते, तंजहा-उवसंतकोहे जाव उवसंतलोभे उवसंतपेज्जे उवसंतदोसे उवसंतदंसनमोहनिज्जे उवसंतमोहनिज्जे उवसमिआ सम्मत्तलद्धी उवसमिआ चरित्तलद्धी उवसंतकसायछउमत्थवीयरागे, से तं उवसमनिप्फन्ने । से तं उवसमिए ।*

वृ. अयमपि द्विविधः-उपशमस्तन्निष्पन्नश्च, तत्र 'उवसमे नं'ति नमिति वाक्यालङ्कारे, उपशमः पूर्वोक्तस्वरूपो मोहनीयस्यैव कर्मणोऽष्टाविंशतिभेदभिन्नस्योपशमश्रेण्यां द्रष्टव्यो न शेषकर्मणां, 'मोहस्सेवोवसमो' इति वचनात्, उपशम एवौपशमिकः । उपशमनिष्पन्ने तु 'उवसंतकोहे'इत्यादि, इहोपशान्तक्रोधादयो व्यपदेशाः कापि वाचनाविशेषाः (पे) कियन्तोऽपि दृश्यन्ते, तत्र मोहनीयस्योपशमेन दर्शनमोहनीयं चारित्रमोहनीयं चोपशान्तं भवति, तदुपशान्ततायां च ये व्यपदेशाः संभवन्ति ते सर्वेऽप्यत्रादुष्टा न शेषा इति भावनीयम् । 'से त'मित्यादि निगमनद्वयम् । निर्दिष्टो द्विविधोऽप्यौशमिकः, अथ क्षायिकमाह-

*मू.( १६१ वर्तते ) से किं तं खइए ?, २ दुविहे पन्नत्ते, तंजहा-खइए अ खयनिप्फन्ने अ । से किं तं खइए ?, २ अट्ठण्हं कम्मपयडीणं खए नं से तं खइए । से किं तं खयनिप्फन्ने ?, २ अनेगविहे पन्नत्ते, तंजहा-*

*उप्पन्ननाणदंसणधरे अरहा जिने केवली खीणआभिनिबोहिअनाणावरणे खीणसुअनाणावरणे खीणओहिनाणावरणे खीणमनपज्जनाणावरणे खीणकेवलनाणावरणे अनावरणे निरावरणे खीणावरणे ।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*नाणावरणिज्जकम्मविप्पमुक्के केवलदंसी सव्वदंसी खीणनिद्दे खीणनिद्दानिद्दे खीणपयले खीणपयलापयले खीणथीणगिद्धी खीणचक्खुदंसणावरणे खीणअचक्खुदंसणावरणे खीणओहिदंसणावरणे खीणकेवलदंसणावरणे अनावरणे निरावरणे खीणावरणे,*

*दरिसणावरणिज्जकम्मविप्पमुक्के खीणसायावेअनिज्जे खीणअसायावेअनिज्जे अवेअणे निव्वेअणे खीणवेअणे सुभासुवेअणिज्जकम्मविप्पमुक्के खीणकोहे जाव खीणलोहे खीणपेज्जे खीणदोसे खीणदंसमोहणिज्जे खीणचरित्तमोहनिज्जे अमोहे निम्मोहे खीणमोहे,*

*मोहनिज्जकम्मविप्पमुक्के खीणनेरइआउए खीणतिरिक्खजोणिआउए खीणमनुस्साउए खीणदेवाउए अनाउए निराउए खीणाउए।*

*आउकम्मविप्पमुक्के खीणसुभनामे खीणअसुभनामे अनामे निन्नामे खीणनामे सुभासुभनामकम्मविप्पमुक्के खीणउच्चागोए खीणनीआगोए अगोए निग्गोए खीणगोए।*

*उच्चनीयोगोत्तकम्मविप्पमुक्के खीणदानंतराए खीणलाभंतराए खीणभोगंतराए खीणउवभोगंतराए खीणविरियंतराए अनंतराए निरंतराए खीणंतराए अंतरायकम्मविप्पमुक्के सिद्धे बुद्धे मुत्ते परिनिव्वुए अंतगडे सव्वदुक्खप्पहीणे, से तं खयनिप्फन्ने। से तं खइए।*

वृ. एषोऽपि द्विधा-क्षयस्तन्निष्पन्नश्च, तत्र 'खए नं' अत्र नमिति पूर्ववत्, 'क्षयोष्टानां ज्ञानावरणादिकर्मप्रकृतीनां सोत्तरभेदानां सर्वथाऽपगमलक्षणः स च स्वार्थिकेकण्प्रत्यये क्षायिकः क्षयनिष्पन्नस्तु तत्फलरूपः, तत्र च सर्वेष्वपि कर्मसु सर्वथा क्षीणेषु ये पर्यायाः संभवन्ति तान् क्रमेण दिदर्शयिषुर्ज्ञानावरणक्षये तावद् ये भवन्ति तानाह-

'उप्पन्ननाणदंसणे'त्यादि, उत्पन्ने-श्यामतापगमेनादर्शमण्डलप्रभावत् सकलतदावरणापगमादभिव्यक्ते ज्ञानदर्शने धरति यः स तथा, 'अरहा' अविद्यमानरहस्यो, नास्य गोप्यं किञ्चिदस्तीति भावः, आवरणशत्रुजेतृत्वाज्जिनः, केवलं-सम्पूर्णं ज्ञानमस्यास्तीति केवली, क्षीणमाभिनिबोधकज्ञानावरणं यस्य स तथा, एवं नेयं यावत् क्षीणकेवलज्ञानावरणः, अविद्यमानमावरणं यस्य स विशुद्धाम्बरे श्वेतरोचिरिवानावरणः, तथा निर्गत आगन्तुकादप्यावरणाद् राहुरहितोरोहिणीशवदेव निरावरणः, तथा क्षीणमेकान्तेनापुनर्भावितया आवरणभस्येत्यपाकृतमलावरणजात्यमणिवत् क्षीणावरणः, निगमयन्नाह-ज्ञानावरणीयेन कर्मणा विविधम्-अनेकैः प्रकारैः प्रकर्षेण मुक्तो ज्ञानावरणीयकर्मविप्रमुक्तः, एकार्थिकानि वा एतान्यनावरणादिपदानि, अन्यथा वा नयमतभेदेन सुधिया भेदो वाच्यः।

तदेवमेतानि ज्ञानावरणीयक्षयापेक्षाणि नामान्युक्तानि, अथ दर्शनावरणीयक्षयापेक्षाणि तान्येवाह-'केवलदंसी' त्यादि, केवलेन-क्षीणावरणेन दर्शनेन पश्यतीति केवलदर्शी क्षीणदर्शनावरणत्वादेव सर्वं पश्यतीति सर्वदर्शीत्येवं निद्रापञ्चकदर्शनावरणचतुष्कक्षयसम्भवीन्यपराण्यपि नामान्यत्र पूर्वोक्तानुसारेण व्युत्पादनीयानि, नवरं निद्रापञ्चकस्वरूपमिदम्-

"सुहपडिबोहा निद्दा दुहपडिबोहा य निद्दनिद्दा य।
पयला होइ ठियस्सा पयलापयला य चंकमओ॥१॥
अइसंकिलिट्ठकम्माणुवेयणे होइ थीणगिद्धी उ।
महनिद्द दिणचिंतियवावारपसाहणी पायं॥२॥"

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अपरं च-अनावरणादिशब्दाः पूर्वं ज्ञानावरणाभावापेक्षाः प्रवृत्ता अत्र तु दर्शनावरणाभावापेक्षा इति विशेषः, वेदनीयं द्विधा-प्रीत्युत्पादकं सातमप्रीत्युत्पादकं त्वसातं, तत्क्षयापेक्षास्तु क्षीण-सातावेदनीयादयः शब्दाः सुखोन्नेयाः, नवरमवेदनो-वेदनारहितः, स च व्यवहारतोऽल्पवेद-नोऽप्युच्यते ततः प्राह-निर्वेदनः-अपगतसर्ववेदनः, स च पुनः कालान्तरभाविवेदनोऽपि स्यादि-त्याह-क्षीणवेदनः-अपुनर्भाविवेदनः, निगमयन्नाह-'सुभासुभवेअणिज्ञकम्मविप्पमुक्के' त्ति।

मोहनीयं द्विधा-दर्शनमोहनीयं चारित्रमोहनीयं च, तत्र दर्शमोहनीयं त्रिधा-सम्यक-त्वमिश्रमिथ्यात्वभेदात्, चारित्रमोहनीयं च द्विधा-क्रोधादिकषायहास्यादिनोकषायभेदात्, तत एतत्क्षयसम्भवीनि सूत्रलिखितानि क्षीणक्रोधादीनि नामानि सुबोधान्येव, नवरं मायालोभौ प्रेम, क्रोधमानौ तु द्वेषः, तथा अमोहः-अपगतमोहनीयकर्मा, स च व्यवहारिकेऽल्पमोहोदयोऽपि निर्दिश्यते अत आह-निर्गतो मोहान्निर्मोहः, स च पुनः कालान्तरभाविमोहोदयोऽपिअ स्यादुप-शान्तमोहवत् तद्व्यवच्छेदार्थमाह-क्षीणमोहः अपुनर्भाविमोहोदय इत्यर्थः, निगमयति-मोहनीयकर्मविप्रमुक्त इति।

नारकाद्यायुष्कभेदेनायुश्चतुर्द्धा, तत्क्षयसमुद्भवानि च नामानि सुगमानि, नवरमविद्य-मानायुष्कोऽनायुष्कस्तद्भविकायुःक्षयमात्रेऽपि स स्यादत उक्तं-निरायुष्कः, स च शैलेशीं गतः किञ्चिदवतिष्ठमानायुःशेषोऽप्युपचारतः स्यादत उक्तं-क्षीणायुरिति, आयुःकर्मविप्रमुक्त इति निगमनं।

नामकर्म सामान्येन शुभाशुभभेदतो द्विविधं, विशेषस्तु गतिजातिशरीराङ्गोपाङ्गादिभेदाद् द्विचत्वारिंशादिभेदं स्थानान्तरदवसेयं, तत्रेह तत्क्षयभावीनि कियन्ति तन्नामानि अभिधत्ते-'गइजाइसरीरे' त्यादि, इह प्रक्रमान्नामशब्दो यथासम्भवं द्दष्टव्यः, ततश्च नारकादिगतिचतुष्ट-यहेतुभूतं गतिनाम, एकेन्द्रियादिजातिपञ्चककारणं जातिनाम, औदारिकादिशरीरपञ्चकनिबन्धनं शरीरनाम, औदारिकवैक्रियाहारकशरीरत्रयाङ्गोपाङ्गनिर्वृत्तिकारणमङ्गोपाङ्गनाम, काष्ठादीनां लाक्षादिद्रव्यमिव शरीरपञ्चकपुद्गलानां परस्परं बन्धहेतुर्बन्धननाम, तेषामेव पुद्गलानां परस्परं बन्धनार्थमन्योऽन्यसांनिध्यलक्षणसङ्घातकारणं काष्ठसन्निकर्षकृत् तथाविधकर्मकर इव सङ्घातनम, कपाटादीना लोहपट्टादिरिवौदारिकशरीरस्थ्नां परस्परबन्धविशेषनिबन्धनं संहन-ननाम, एतच्च बन्धनादिपदत्रयं क्वचिद्वाचनान्तरे न द्दश्यत इति, बोन्दिस्तनुः शरीरमिति पर्यायाः, अनेकाश्च ता नानाभावेषु बह्वीनां तासां भावात् तस्मिन्नेव वा भवे जघन्यतोऽप्यौदारिकतेज-सकार्मणलक्षणानां तिसृणां भावाद् बोन्द्यश्चानेकवोन्द्यस्तासां वृन्दं-पटलं तदेव पुद्गलसङ्घात-रूपत्वात् सङ्घातोऽनेकबोन्दिवृन्दसङ्घातः, गत्यादीनां च द्वन्द्वे गतिजातिशरीराङ्गोपाङ्गबन्धन-संघातसंहननसंस्थानानेकबोन्दिवृन्दसङ्घातास्तैर्विप्रमुक्तो यः स तथा, प्राक्तनेन शरीरशब्देन शरीराणां निबन्धनं नामकर्म गृहीतं, बोन्दिवृन्दग्रहणेन तु तत्कार्यभूतशरीराणामेव ग्रहणमिति विशेषः, क्षीणम्-अपगतं तीर्थकरशुभसुभगसुस्वरादेययशःकीर्त्यादिकं शुभं नाम यस्य स तथा, क्षीणम्-अपगतं नरकगत्यशुभदुर्भगदुःस्वरानादेयायशःकीर्त्यादिकमशुभं नाम यस्य स तथा, अनामनिर्नामक्षीणनामादिशब्दास्तु पूर्वोक्तानुसारेण भावनीयाः, शुभाशुभनामविप्रमुक्त इति निगमनम्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गोत्रं द्विधा-उच्चैर्गोत्रं नीचैर्गोत्रं च, ततस्तत्क्षयसम्भवीनि क्षीणगोत्रादिनामान्युक्तानुसारतः सुखावसेयान्येव।

दानान्तरायादिभेदादन्तरायं पञ्चधा, तत्क्षयनिष्पन्नानि च क्षीणादानान्तरायादिनामान्यविषमाण्येव, तदेवमेकैकप्रकृतिक्षयनिष्पन्ननामानि प्रत्येकं निर्दिश्य साम्प्रतं पुनः समुदितप्रकृत्यष्टकक्षयनिष्पन्नानि सामान्यतो यानि नामानि भवन्ति तान्याह-'सिद्धे'इत्यादि, सिद्धसमस्तप्रयोजनत्वात् सिद्धः, बोधात्मकत्वादेव बुद्धः, बाह्याभ्यन्तरग्रन्थबन्धनमुक्तत्वात् मुक्तः, परिः-समन्तात् सर्वप्रकारैः निर्वृत्तः-सकलसमीहितार्थलाभप्रकर्षप्राप्तत्वात् शीतीभूतः परिनिर्वृतः, समस्तसंसारान्तकृत्त्वादन्तकृदिति, एकान्तेनैव शरीरमानसदुःखप्रहणात् सर्वदुःखप्रहीण इति। 'से त'मित्यादि निगमनद्वयम्। उक्तो द्विविधोऽपि क्षायिकः, अथ क्षायोपशमिकवाह-

*मू. ( १६१ वर्तते )से किं तं खओवसमिए ?, २ दुविहे पन्नत्ते, तंजहा- खओवसमिए य खओवसमनिप्फन्ने य। से किं त खओवसमे ?, २ चउण्हं घाइकम्माणं खओवसमेणं, तंजहा-नानावरणिज्जस्स दंसणावरणिज्जस्स मोहणिज्जस्स अंतरायस्स खओवसमेणं, से तं खओवसमे।*

*से किं तं खओवसमनिप्फन्ने ?, २ अनेगविहे पन्नत्ते, तंजहा-खओवसमिआ आभिनिबोहिअनाणलद्धी जाव खओवसमिया मनपज्जवनाणलद्धी खओवसामिआ मइअन्नालद्धी खओवसमिया सुअअन्नाणलद्धी खओवसमिआ विभंगनाणलद्धी खओवसमिआ चक्खुदंसणलद्धी अचक्खुदंसणलद्धी ओहिदंसणलद्धी एवं सम्मदंसणलद्धी मिच्छादंसणलद्धी सम्ममिच्छादंसणलद्धी*

*खओवसमिआ सामाइअचरित्तलद्धी एवं छेदोवट्ठावणलद्धी परिहारविसुद्धिअलद्धी सुहुमसंपरायचरित्तलद्धी एवं चरित्ताचरित्तलद्धी खओवसमिआ दानलद्धी एवं लाभ० भोग० उवभोगलद्धी खओवसमिआ वीरिअलद्धी एवं पंडिअवीरिअलद्धी बावलवीरिअलद्धी बालपंडिअवीरिअलद्धी खओवसमिआ सोइंदिअलद्धी जाव खओवसमिआ फासिंदिअलद्धी।*

*खओवसमिए आयारंगधरे एवं सुअगडंगधारे ठाणंगधरे समवायंधरे विवाहपन्नत्तिधरे नायाधम्मकहा० उवासगदसा० अंतगडदसा० अनुत्तरोववाइअदसा० पण्हावागारणधरे विवागसुअधरे खओवसमिएअ दिट्ठियावधरे अखोवसमिए नवपुव्वी खओवसमिए जाव चउद्दसपुव्वी खओवसमिए गणी खओवसमिए वायए, से तं खओवसमनिप्फन्ने, से तं खओवसमिए।*

वृ. असावपि द्विरूपः-क्षयोपशमस्तन्निष्पन्नश्च, तत्र विवक्षितज्ञानादिगुणविघातकस्य कर्मण उदयप्राप्तस्य क्षयः-सर्वथाऽपगमः अनुदीर्णस्य तु तस्यैवोपशमे-विपाकत उदयाभाव इत्यर्थः, ततश्च क्षयोपलक्षित उपशमः क्षयोपशमः, ननु चौपशमिकेऽपि यदुदयप्राप्तं तत्सर्वथा क्षीणं शेषं तु न क्षीणं नाप्युदयप्राप्तमतस्तस्योपशम उच्यत इत्यनयोः कः प्रतिविशेषः ?, उच्यते, क्षयोपशमावस्थे कर्मणि विपाकत एवोदयो नास्ति, प्रदेशतस्त्वस्त्येव, उपशान्तावस्थायां तु प्रदेशतोऽपि नास्त्युदय इत्येतावता विशेषः। तत्र चतुर्णां घातिकर्मणां केवलज्ञानप्रतिबन्धकानां ज्ञानावरणदर्शनावरणमोहनीयान्तरायाणां यः क्षयोपशमः-क्षयोपशमरूपः स क्षयोपशमिको भावः, नमिति पूर्ववत्, तद्यथेत्यादिना स्वत एव घातिकर्माणि विवृणोति, शेषकर्मणां तं क्षयोपशमो नास्त्येव, निषिद्धत्वात्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'से त'मित्यादि निगमनम्। तेनैव क्षयोपशमेनोक्तस्वरूपेण निष्पन्नः क्षयोपशमिको भावोऽनेकधा भवति, तमाह-'खाओवसमिया आभिनिबोहियनाणलद्धी'त्यादि, आभिनिबोधिकज्ञानं-मतिज्ञानं तस्य लब्धिः-योग्यता स्वावरणकर्मक्षयोपशमसाध्वत्वात् क्षयोपशमिकी, एवं तावद् वक्तव्यं यावन्मनःपर्यायज्ञानलब्धिः, केवलज्ञानलब्धिस्तु स्वावरणकर्मणः क्षय एवोत्पद्यत इति नेहोक्ता, कुत्सितं ज्ञानमज्ञानं मतिरेव अज्ञानं मत्यज्ञानं, कुत्सितत्व चेह मिथ्यादर्शनोदयदूपितत्वात् द्रष्टव्यं, दृष्टा च कुत्सार्थे नञो वृत्तिः, यथा कुत्सितं शीलमशीलमिति, मत्यज्ञानस्य लब्धिः-योग्यता, साऽपि स्वावरणक्षयोपशमेनैव निष्पद्यते, एवं श्रुताज्ञानलब्धिरपि वाच्या, भङ्गः प्रकारो भेद इत्यर्थः, स चेह प्रक्रमादवधिरेव गृह्यते विरूपः-कुत्सितो भङ्गो विभङ्गः स एवार्थपरिज्ञानात्मकत्वात् ज्ञानं विभङ्गज्ञानं, मिथ्यादृष्टिदेवादेरवधिर्विभङ्गज्ञानमुच्यते इत्यर्थः, इह च विशब्देनैव कुत्सितार्थप्रतीतेर्न नञो निर्देशः, तस्य लब्धिः-योग्यता साऽपि स्वावरणक्षयोपशमेनैव प्रादुरस्सर्ति, एवं मिथ्यात्वादिकर्मणः क्षयोपशमसाध्याः शेषा अपि सम्यग्दर्शनादिलब्धयो यथासम्भवं भावनीयाः नवरं बाला-अविरताः पण्डिताः-साधवः बालपण्डितास्तु-देशविरताः तेषां यथास्वं वीर्यलब्धिर्वीर्यान्तरायकर्मक्षयोपशमाद्भावनीया, इन्द्रियाणि चेह लब्ध्युपयोगरूपाणि भावेन्द्रियाणि गृह्यन्ते, तेषां च लब्धिः-योग्यता मतिश्रुतज्ञानचक्षुर्दर्शनावरणक्षयोपशमजन्यत्वात् क्षयोपशमिकीति भावनीयम्, आचारधरत्वादिपर्यायाणां च श्रुतज्ञानप्रभवत्वात् तस्य च तदावरणकर्मक्षयोपशमसाध्यत्वादाचारधरादिशब्दा इह पठ्यन्ते इति प्रतिपत्तव्यम्। 'से त'मित्यादि निगमनद्वयम्।

अथ पारिणामिकभावमाश्रित्याह-

*मू. (१६१ वर्तते) से किं तं पारिणामिए?, २ दुविहे पन्नत्ते, तंजहा-साइपारिणामिए अ अनाइपारिणामिए अ। से किं तं साइपारिणामिए?, २ अनेगविहे पन्नत्ते, तंजहा-*

**वृ.** सर्वथा अपरित्यक्तपूर्वावस्थस्य यद्रूपान्तरेण भवनं-परिणमनं स परिणामः, तदुक्तम्-

"परिणामो ह्यर्थान्तरगमनं त च सर्वथा व्यवस्थानम्
न च सर्वथा विनाशः परिणामस्तद्विदा-मिष्टः॥"

इति, स एव तेन वा निर्वृत्तः पारिणामिकः, सोऽपि द्विविधः-सादिरनादिश्च, तत्र सादिपारिणामिको।

*मू. (१६२) जुण्णसुरा जुण्णगुलो जुण्णघयं जुण्णतंदुला चेव।*
*अब्भा य अब्भरुक्खा संझा गंधवणगरा य॥*

**वृ.** 'जुण्णसुरे'त्यादि, जीर्णसुरादीनां जीर्णत्वपरिणामस्य सादित्वात् सादिपारिणमिकता, इह चोभयावस्थयोरप्युनुगतस्य सुराद्रव्यस्य नव्यतानिर्वृत्तौ जीर्णतारूपेणं भवनं परिणाम इत्येवं सुखप्रतिपत्त्यर्थं जीर्णानां सुरादीनाक्ग्रहणम्, अन्यथा नवेष्वपि तेषु सादिपारिणमिकता अस्त्येव, कारणद्रव्यस्यैव नूतनसुरादिरूपेण परिणतेः, अन्यथा कार्यानुत्पत्तिप्रसङ्गाद्, अत्र बहु वक्तव्यं तत्तु नोच्यते स्थानान्तरवक्तव्यत्वादस्यार्थस्येति। अभ्राणि सामान्येन प्रतीतान्येव, अभ्रवृक्षास्तु तान्येव वृक्षाकारपरिणतानि, सन्ध्या-कालनीलाद्यभ्रपरिणतिरूपा प्रतीतैव, गन्धर्वनगराण्यपिसुरसद्मप्रासादोपशोभितनगराकारतया तथाविधनभःपरिणतपुद्गलराशिरूपाणि प्रतीतान्येव।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*मू. ( १६३ ) उक्कावाया दिसादाहा गज्जियं विज्जू निग्धाया जूवया जक्खादित्ता धूमिआ महिआ रयुग्घाया चंदोवरागा सूरोवरागा चंदपरिवेसा सूरपरिवेसा पडिचंदा पडिसूरा इंदधनू उदगमच्छा कविहासिया अमोहा वासा वासधरा गामा नगरा धरापव्वता पायाला भवणा निरया रयणप्पहा सक्करप्पहा वालुअप्पहा पंकप्पहा धूमप्पहा तमप्पहा तमतमप्पहा सोहम्मे जाव अच्चुए गेवेज्जे अनुत्तरे ईसिप्पभारा परमाणुपोग्गले दुपएसिए जाव अनंतपएसिए, से तं साइपारिणामिए। से किं तं अनाइपारिणामिए ?, २ धम्मत्थिकाए अधम्मत्थिकाए आगासत्थिकाए जीवत्थिकाए पुग्गलत्थिकाए अद्धासमए लोए अलोए भवसिद्धिआ अभवसिद्धिआ से तं अनाइपारिणामिए। से तं पारिणामिए।*

**वृ.** उल्कापाता अपि व्योमसम्मूर्च्छितज्वलनपतनरूपाः प्रसिद्धा एव, दिग्दाहास्तु-अन्यतरस्यां दिशि छिन्नमूलज्वलनज्वालाकरालिताम्बरप्रतिभासरूपाः प्रतिपत्तव्याः, गर्जितविद्युन्निर्घाताः प्रतीताः, यूपकास्तु-'संझाच्छेयावरणो य जूयओ सुक्क दिन तिन्नी'ति गाथादलप्रतिपादितस्वरूपा आवश्यकादवसेया, यक्षादीप्तकानि नभोदृश्यमानाग्निपिशाचाः, धूमिका-रूक्षा प्रविरिला धूमाभा प्रतिपत्तव्या, महिका तु स्निग्धा घना स्निग्धघनत्वादेव भूमौ पतिता सार्द्रतृणादिदर्शनद्वारेण लक्ष्यते रजउद्घातो-रजस्वला दिशः, चन्द्रसूर्योपरागा राहुग्रहानि, बहुवचनं चात्रार्द्धतृतीयद्वीपसमुद्रवर्तिचन्द्रार्काणां युगपदुपरागभावात् मन्तव्यमिति चूर्णिकारः, चन्द्रसूर्यपरिवेषाः-चन्द्रादित्ययोः परितो वलयाकारपुद्गलपरिणतिरूपाः सुप्रतीता एव, प्रतिचन्द्रः-उत्पातादिसूचको द्वितीयश्चन्द्रः, एवं प्रतिसूर्योऽपि, इन्द्रधनुः-प्रसिद्धमेव, उदकमत्स्यास्तु-इन्द्रधनुःखण्डान्येव, कपिहसितानि-अकस्मान्नभसि ज्वलद्भीमशब्दरूपाणि अमोघा-सूर्यबिम्बादधः कदाचिदुपलभ्यमानशकटोर्द्धिसंस्थितश्यामादिरेखाः वर्षाणि-भरतादीनि वर्षधारस्तु-हिमवदादयः पातालाः-पातालकलशाः, शेषास्तु ग्रामादयः प्रसिद्धा एव।

अत्राह-ननु वर्षधरादयः शाश्वतत्वात् न कदाचित्तद्भावं मुञ्चन्ति तत्कथं सादिपारिणमिकभाववर्तित्वं तेषां ?, नैतदेवं, तदाकारमात्रतयैव हि तेऽवतिष्ठामानाः शाश्वता उच्यन्ते, पुद्गलास्त्वसङ्ख्येयकालादूर्ध्वं न तेष्वेवावतिष्ठन्ते, किं त्वपरापरे तद्भावेन परिणमन्ति, तावत्कालादूर्ध्वं पुद्गलानामेकपरिणामेनावस्थितेः प्रागेव निषिद्धत्वादिति सादिपारिणमिकता न विरुध्यते, अनादिपारिणामिके तु धर्मास्तिकायादयः, तेषां तद्रूपतया अनादिकालात् परिणतेः, वाचनान्तराण्यपि सर्वाण्युक्तानुसारतो भावनीयानि। 'से त'मित्यादि निगमनद्वयम्।

उक्तः पारिणामिकः, अथ सान्निपातिकं निर्दशति-

***मू. ( १६३ वर्तते )*** *से किं तं सन्निवाइए ?, २ एएसिं चेव उदइअउवसमिअखइअखओवसमिअपारिणामिआणं भावाणं दुगसंजोएणं तियसंजोएणं चउक्कसंजोएणं पंचवसंजोएणं जे निप्फन्नइ सव्वे से सन्निवाइए नामे, तत्थ नं दस दंअसंजोगा दस तिअसंजोगा पंच चउक्कअसंजोगा एगे पंचकसंजोगे।*

**वृ.** सन्निपातः-एषामेवौदयिकादिभावनां द्वयादिमेलापकः स एव तेन वा निर्वृत्तः सान्निपातिकः, तथा चाह-'एएसिं चेवे'त्यादि, एषामौदयिकादीनां पञ्चानां भावनां द्विकत्रिकचतुष्कपञ्चकसंयोगर्ये षड्विंशतिर्भङ्गाः भवन्ति ते सर्वेऽपि सान्निपातिको भाव इत्युच्यते,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एतेषु मध्ये जीवेषु नारकादिषु षडेव भङ्गा सम्भवन्ति, शेषास्तु विंशतिर्भङ्गका रचनामात्रेणैव भवन्ति, न पुनः क्वचित् सम्भवन्ति, अतः प्ररूपणामात्रतयैव ते अवगन्तव्याः, एतत् सर्वं पुरस्ताद्व्यक्तीकरिष्यते, कियन्तः पुनस्ते द्व्यादिसंयोगाः प्रत्येकं सम्भवन्ति इत्याह-'तत्थ नं दस दुगसंजोगा' इत्यादि, पञ्चानामौदयिकादिपदानां दश द्विकसंयोगाः दशैव त्रिकसंयोगाः पञ्च चतुःसंयोगाः एकस्तु पञ्चकसंयोगः संपद्यत इति, सर्वेऽपि षड्विंशतिः। तत्र के पुनस्ते दश द्विकसंयोगा इति जिज्ञासायां प्राह-

*मू.( १६३ वर्तते ) एत्थ णं जे ते दस दुगसंजोगा ते णं इमे-अत्थि नामे उदइएउवसमनिप्फन्ने १ अत्थि नामे उदइएखाइगनिप्फन्ने २ अत्थि नामे उदइएखओवसमनिप्फन्ने ३ अत्थि नामे उदइएपरिणामिअनिप्फन्ने ४ अत्थि नामे उवसमिएखयनिप्फन्ने ५ अत्थि नामे उवसमिएखओवसमनिप्फन्ने ६ अत्थि नामे उवसमिएपारिणामिअनिप्फन्ने ७ अत्थि नामे खइएखओवसमनिप्फन्ने ८ अत्थि नामे खइएपारिणामिअनिप्फन्ने ९ अत्थि नामे खओवसमिएपारिणामिअनिप्फन्ने १०।*

*कयरे से नामे उदइएउवसमनिप्फन्ने ?, उदइएत्ति मनुस्से उवसंता कसाया, एस णं से नामे उदइएउवसमनिप्फन्ने ?, कयरे से नामे उदइएखयनिप्फन्ने ?, उदइएत्ति मनुस्से खइअं सम्मत्तं, एस णं से नामे उदइएखयनिप्फन्ने २, कयरे से नामे उदइएखओवसमनिप्फन्ने ?, उदइएत्ति मनुस्से खओवसमिआइं इंदिआइं, एस णं से नामे उदइएखओवसमनिप्फन्ने ३, कयरे से नामे उदइएपरिणामिअनिप्फन्ने ?, उदइएत्ति मनुस्से पारिणामिए जीवे, एस णं से नामे उदइए-पारिणामिअनिप्फन्ने ४, कयरे से नामे उवसमिएखयनिप्फन्ने ?, उवसंता कसाया खइअं सम्मत्तं, एस णं से नामे उवसमिएखयनिप्फन्ने ५ कयरे से नामे उवसमिएखओवसमनिप्फन्ने ?, उवसंता कसाया खओवसमिआइं इंदिआइं, एस णं से नामे उवसमिएखओवसमनिप्फन्ने ६, कयरे से नामे उवसममिएपारिणामिअनिप्फन्ने ?, उवसंता कसाया पारिणामिए जीवे, एस णं से नामे उवसमिएपारिणामिअनिप्फन्ने ७, कयरे से नामे खइएखओवसमनिप्फन्ने ?, खइयं सम्मत्तं खओवसमिआइं इंदिआइं, एस णं से नामे खइएखओवसमनिप्फन्ने ८, कयरे से नामे खइए-पारिणामिअनिप्फन्ने ?, खइअं सम्मत्तं पारिणामिए जीवे, एस णं से नामे खइएपारिणामिअनिप्फन्ने ९, कयरे से नामे खओवसमिएपारिणामिअनिप्फन्ने ?, खओवसमिआइं इंदिआइं पारिणामिए जीवे, एस णं से नामे खओवसमिएपारिणामिअनिप्फन्ने १०।*

**वृ.** नामाधिकारादित्थमाह-अस्ति तावत्सान्निपातिकभावान्तर्वर्ति नाम विभक्तिलोपादौद-यिकौपशमिकलक्षणभावद्वयनिष्पन्नमित्येको भङ्गः, एवमन्येनाप्युपरितनभावत्रयेण सह संयोगादौदयिकेन चत्वारो द्विकसंयोगा लब्धाः, ततस्तत्परित्यागे औपशमिकस्योपरितन-भावत्रयेण सह चारणायां लब्धास्त्रयः, तत्परिहारे क्षायिकस्योपरितनभावद्वयमीलनायां लब्धौ द्वौ, ततस्तं विमुच्य क्षायोपशमिकस्य पारिणामिकमीलने लब्ध एक इति सर्वेऽपि दश, एवं सामान्यतो द्विकसंयोगभङ्गकेषु दर्शितेषु विशेषतस्तत्स्वरूपमजानन् विनेयः पृच्छति-

'कयरे से नामे उदइए ?' इत्यादि अत्रोत्तरम्-'उदइएत्ति मनुस्से' इत्यादि, औदयिके भावे मनुष्यत्वं-मनुष्यगतिरिति तात्पर्यम्, उपलक्षणमात्रं चेदं, तिर्यगादिगतिजातिशरीरनामा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दिकर्मणामप्यत्र सम्भवाद्, उपशान्तास्तु कषाया औपशमिके भाव इति गम्यते, अत्राप्युदाहरण-मात्रमेतत्, दर्शनमोहनीयनोकषायमोहनीययोरप्यौपशमिकत्वसम्भवाद्, एतन्निगमयति-'एस णं से नामे उदइएउवसमनिप्फन्ने'त्ति, णमिति वाक्यालङ्कारे एतत्तन्नाम यदुद्दिष्टं प्रागौदयि-कौपशमिकभावबद्वयनिष्पन्नमिति प्रथमद्विकयोगे भङ्गक-व्याख्यानम्, अथं च द्विकयोगवि-वक्षामात्रत एव संपद्यते, न पुनरीदृशो भङ्गः कविज्जीवे संभवति, तथा हि-यस्यौदयिकी मनुष्य-गतिरौपशमिकाः कषाया भवन्ति तस्य क्षायोपशमिकानीन्द्रियाणी पारिणामिकं जीवत्वं कस्यचित् क्षायिकं सम्यक्त्वमित्येतदपि संभवति, तत्कथमस्य केवलस्य सम्भवः ?, एवमेत-द्व्याख्यानुसारेण शेषा अपि व्याख्येयाः, केवलं क्षायिकपारिणामिकभावद्वयनिष्पन्नं नवमभङ्ग विहाय परेऽसम्भविनो द्रष्टव्याः, नवमस्तु सिद्धस्य संभवति, तथाहि-क्षायिके सम्यक्त्वज्ञाने पारिणामिकं तं जीवत्वमित्येतदेव भावद्वयं तस्यास्ति नापरः, तस्मादयमेकः सिद्धस्य संभवति, शेषास्तु नव द्विकयोगाः प्ररूपणामात्रमिति स्थितम्, अन्येषां हि संसारीजीवानामौदयिकी गतिः क्षायोपशमिकानीन्द्रियाणि पारिणामिकं जीवत्वमित्येतद्भावत्रयं जघन्यतोऽपि लभ्यत इति कथं तेषु द्विकसंयोगसम्भव ?, इति भावः । त्रिकयोगान्निर्दिदिक्षुराह-

***मू. ( १६३ वर्तते )***तत्थ णं जे ते दस तिगसंजोगा ते णं इमे-अत्थि नामे उदइएउवसमि-एखयनिप्फन्ने १ अत्थि नामे उदइएउवसमिएखओवसमनिप्फन्ने २ अत्थि नामे उदइएउव-समिएपरिणामिअनिप्फन्ने ३ अत्थि नामे उदइएखइएखओवसमनिप्फन्ने ४ अत्थि नामे उदइए-खइएपरिणामिअनिप्फन्ने ५ अत्थि नामे उदइएखओवसमिपरिणामिअनिप्फन्ने ६ अत्थि नामे उवसमिएखओवसमनिप्फन्ने ७ अत्थि नामे उवसमिएखइएपारिणामिनिप्फन्ने ८ अत्थि नामे उवसमिएखओवसमिएपारिणामिअनिप्फन्ने ९ अत्थि नामे खइएखओवसमिएपारिणामिअनि-प्फन्ने १० ।

*कयरे से नामे उदइएउवसमिएखयनिप्फन्ने ? उदइएत्ति मनुस्से उवसंता कसाया खइअं सम्मत्तं, एस नं से नामे उदइएउवसमिएखयनिप्फन्ने १, कयरे से नामे उदइएउवसमिएखय-ओवसमियनिप्फन्ने ? उदइएत्ति मनुस्से उवसंता कसाया खओवसमिआइं इंदिआइं, एस णं से नामे उदइएउवसमिएखयओवसमनिप्फन्ने २, कयरे से नामे उदइएउवसमिएपारिणामि-अनिप्फन्ने ? उदइएत्ति मनुस्से उवसंता कसाया पारिणामिए जीवे, एस णं से नामे उदइएउवस-मिपारिणामिअनिप्फन्ने ३, कयरे से नामे उदइएखइएखओवसमनिप्फन्ने ? उदइएत्ति मनुस्से खओवसमिआइं इंदिआइं, एस णं से नामे उदइएखइएखओवसमनिप्फन्ने ४, कयरे से नामे उदइएखइएपारिणामिअनिप्फन्ने ? उदइएत्ति मनुस्से खइअं सम्मत्तं पारिणामिए जीवे, एस णं से नामे उदइएखइएपारिणामिअनिप्फन्ने ५, कयरे से नामे उदइएखओवसमिएपारिणामि-अनिप्फन्ने ?, उदइएत्ति मनुस्से खओवसमिआइं इंदिआइं पारिणामिए जीवे, एस नं से नामे उदइएखओवसमिएपारिणामिअनिप्फन्ने ६, कयरे से नामे उवसमिएखइएखओवसम-निप्फन्ने ?, उवसंता कसाया खइअं सम्मत्तं खओवसमिआइं इंदिआइं, एस णं से नामे उवसमिएखइएखओवसमनिप्फन्ने ७, कयरे से नामे उवसमिएखइएपारिणामिअनिप्फन्ने ?,*



Jain Education International For Private & Personal Use Only www.jainelibrary.org

*उवसंता कसाया खइअं सम्मत्तं पारिणामिए जीवे, एस णं से नामे उवसमिएखइए पारिणामि-अनिप्फन्ने ८, कयरे से नामे उवसमिएखओवसमिएपारिणामिअनिप्फन्ने ?, उवसंता कसाया खओवसमिआइं इंदिआइं पारिणामिए जीवे, एस णं से नामे उवसमिएखओवसमिएपारिणामि-अनिप्फन्ने ९, कयरे से नामे खइएखओवसमिएपारिणामिअनिप्फन्ने ?, खइअं सम्मत्तं अखोवसमि-आइं इंदिआइं पारिणामिए जीवे, एस णं से नामे खइएखओवसमिएपारिणामिअनिप्फन्ने १०।*

**वृ.** एतदप्यौदयिकौपशमिकक्षायिकक्षायोपशमिकपारिणामिकभावपञ्चकं भूम्यादावालिख्य तत आद्यभावद्वयस्योपरितनभावत्रयेण सह चारणायां लब्धास्त्रयः, इत्यादिक्रमेण दशापि भावनीयाः, एतानेवं स्वरूपतो विवरीषुराह-

कयरे से नामे उदइएउवसमिए'इत्यादि, व्याख्या पूर्वानुसारतोऽत्रापि कर्तव्या, नवरम-त्रौदयिकक्षायिकपारिणामिकभावत्रयनिष्पन्नः पञ्चमो भङ्गः केवलिनः संभवति, तथाहि-औदयिकी मनुष्यगतिः क्षायिकाणि ज्ञानदर्शनचारित्राणि पारिणामिकं तु जीवत्वमित्येते त्रयो भावास्तस्य भवन्ति, औपशमिकस्त्विह नास्ति, मोहनीयाश्रयत्वेन तस्योक्तत्वात्, मोहनीयस्य च केवलीन्यसम्भवात्, तथा क्षायोपशमिकोऽप्यत्रापास्य एव, क्षायोपशमिकानामिन्द्रियादि-पदार्थानामस्यासम्भवाद्, 'अतीन्द्रियाः केवलिन' इत्यादिवचनात्, तस्मात् पारिशेष्याद्यथोक्त-भावत्रयनिष्पन्नः पञ्चमो भङ्गः केवलिनः सम्भवति, षष्ठस्त्वौदयिकक्षायोपशमिकपारिणामिक-भावनिष्पन्नो नारकादिगतिचतुष्टयेऽपि संभवति, तथाहि-औदयिकी अन्यतरा गतिः क्षायोपशमिकानीन्द्रियाणि पारिणामिकं जीवत्वमित्येवमेतद्भावत्रयं सर्वास्वपि गतिषु जीवानां प्राप्यत इति, शेषास्त्वष्टौ त्रिकयोगाः प्ररूपणामात्रं, काप्यसम्भवादिति भावनीयं।

चतुष्कसंयोगोन्निर्दिशन्नाह-

***मू. ( १६३ वर्तते )*** *तत्थ णं ते जे तं पंच चउक्कसंजोगा ते नं इमे-अत्थि नामे उदइएउवसमिएखइएखओवसमनिप्फन्ने १ अत्थि नामे उदइएउवसमिएखइएपारिणामिअनिप्फन्ने २ अत्थि नामे उदइएउवसमिएखओवसमिएपारिणामिअनिप्फन्ने ३ अत्थि नामे उदइएखइएखओ-वसमिए-पारिणमिअनिप्फन्ने ४ अत्थि नामे उवसमिएखइएखहओवसमिएपारिणामिअ-निप्फन्ने ५,*

*कयरे से नामे उदइएउवसमिएखइएखओवसमनिप्फन्ने ?, उदइएत्ति मनुस्से उवसंता कसाया खइअं सम्मत्तं खओवसमिआइं इंदिआइं, एस नं से नामे उदइएउवसमिएखइएखओवसमि-निप्फन्ने १, कयरे से नामे उदइएउवसमिएखइएपारिणामिअनिप्फन्ने ?, उदइएत्ति मनुस्से उवसंता कसाया खइअं सम्मत्तं पारिणामिए जीवे, एस नं से नामे उदइएउवसमिएखइएपारिणामि-अनिप्फन्ने २, कयरे से नामे उदइएउवसमिएखओवसमिएपारिणामिअनिप्फन्ने ?, उदइएत्ति मनुस्से उवसंता कसाया खओवसमिआइं इंदिआइं पारिणामिए जीवे, एस नं से नामे उदइएउवसमिएखओव० पारिणा० ३, कयेर से नामं उदवइखइएखओवसमिएपारिणामि-अनिप्फन्ने ?, उदइएत्ति मनुस्से खइअं सम्मत्तं अखोवसमिआइं इंदिआइं पारिणामिए जीवे, एस नं से नामे उदइएखइएखओवसमिएपारिणामिअनिप्फन्ने४, कयरे से नामे उवसमिएखइए-खओवसमिएपारिणामिअनिप्फन्ने ?, उवसंता कसाया खइअं सम्मत्तं खओवसमिआइं इंदिआइं*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*पारिणामिए जीवे, एस नं से नामे उवसमिएखइएखओवसमिएपारिणामिअनिप्फन्ने ५ ।*

वृ. भङ्गकरचना अकृच्छ्रावसेयैव। इदानीं तानेव पञ्च भङ्गान् व्याचिख्यासुराह-'कयरे से नामे उदइए' इत्यादि, भावना पूर्वाभिहितानुगुण्येन कर्तव्या, नवरमत्रौदयिकौपशमिकक्षायोपशमिकपारिणामिकभावनिष्पन्नस्तृतीयभङ्गो गतिचतुष्टयेऽपि संभवति, तथाहि-औदयिकी अन्यतरा गतिः नारकतिर्यग्देवगतिषु प्रथमसम्यक्त्वलाभकाले एव उपशमभावो भवति मनुष्यगतौ तु तत्रोपशमश्रेण्यां चौपशमिकं सम्यक्त्वं क्षायोपशमिकानीन्द्रियाणि पारिणामिकं जीवत्वमित्येवमयं भङ्गकः सर्वासु गतिषु लभ्यते, यत्त्विह सूत्रे प्रोक्तम्-'उदइएत्ति मनुस्से उवसंता कसाय'त्ति, तत्तु मनुष्यगत्यपेक्षयैव द्रष्टव्यं, मनुष्यत्वोदयस्योपशमश्रेण्यां कषायोपशमस्य च तस्यामेव भावाद्, अस्य चोपलक्षणमात्रत्वादिति, एवमौदयिकक्षायिकक्षायोपशमिकपारिणामिकभावनिष्पन्नश्चतुर्थभङ्गोऽपि चतुसृष्वपि गतिषु संभवति, भावना त्वनन्तरोक्ततृतीयभङ्गकवदेव कर्तव्या, नवरमोपशमिकसम्यक्त्वस्थाने क्षायिकसम्यक्त्वं वाच्यम्, अस्ति च क्षायिकसम्यक्त्वं सर्वास्वपि गतिषु, नारकतिर्यग्देवगतिषु पूर्वप्रतिपन्नस्यैव, मनुष्यगतौ तु पूर्वप्रतिपन्नस्य प्रतिपद्यमानकस्य च तस्यान्यत्र प्रतिपादितत्वादिति, तस्मादत्राप्येतौ द्वौ भङ्गकौ सम्भविनौ, शेषास्तु त्रयः संवृत्तिमात्रं, तद्रूपेण वस्तुन्यसम्भवादिति।

साम्प्रतं पञ्चकसंयोगमेकं प्ररूपयन्नाह-

*मू. ( १६३ वर्तते )तत्थ णं जे से एक्के पंचगसंजोए से णं इमे-अत्थि नामे उदइएउवसमिएखओवसमिएखइएपारिणामिअनिप्फन्ने १, कयरे से नामे उदउएउवसमिएखइएखओवसमिएपारिणामिअनिप्फन्ने ?, उदइएत्ति मनुस्से उवसंता कसाया खइअं सम्मत्तं खओवसमिआइं इंदिआइं पारिणामिए जीवे, एस नं से नामे जाव पारिणामिअनिप्फन्ने, से तं सन्निवाइए, से तं छन्नामे ।*

वृ. अयं च सविवरणः सुगम एव, केवलं क्षायिकः सम्यग्दृष्टिः सन् यः उपशमश्रेणीं प्रतिपद्यते तस्यायं भङ्गकः संभवति, नान्यस्य, समुदितभावपञ्चकस्यास्य तत्रैव भावादिति परमार्थः, तदेवमेको द्विकसंयोगभङ्गको द्वौ द्वौ त्रिकयोगचतुष्कयोगभङ्गकावेकस्त्वयं पञ्चकयोग इत्येते षड् भङ्गका अत्र सम्भविनः, प्रतिपादिताः, शेषास्तु विंशतिः संयोगोत्थानमात्रतयैव प्ररूपिता इति स्थितम्, एतेषु च षट्सु भङ्गकेषु मध्ये एकस्त्रिकसंयोगो द्वौ चतुष्कसंयोगावित्येते त्रयोऽपि प्रत्येकं चतसृष्वपि गतिषु संभवन्तीति निर्णीतम्, अथो गतिचतुष्टयभेदात् ते किल द्वादश(वि)-वक्ष्यन्ते, ये तु शेषा द्विकयोगत्रिकयोगपञ्चकयोगलक्षणास्त्रयो भङ्गाः सिद्धकेवल्युपशान्तमोहानां यथाक्रमं निर्णीताः ते यथोक्तैकैकस्थानसम्भवित्वात् त्रय एवेत्यनया विवक्षयाऽयं सान्निपातिको भावः स्थानान्तरे पञ्चदशविध उक्तो द्रष्टव्यो, यदाह-'अविरुद्धसन्निवाइयभेया एभेव पन्नरस'त्ति, 'से तं सन्निवाइए'त्ति निगमनम्।

उक्तः सान्निपातिको भावः, तद्भणने चोक्ताः षडपि भावाः, ते च तद्वाचकैर्नामभिर्विना प्ररूपयितुं न शक्यन्त इति तद्वाचकान्यौदयिकादीनि नामान्यप्युक्तानि, एतैश्च षड्भिरपि धर्मास्तिकायादेः समस्तयापि वस्तुनः संग्रहात् षट्प्रकारं सत् सर्वस्यापि वस्तुनो नाम षड्नामेत्यनया दिशा सर्वमिदं भावनीयं, 'से तं छन्नामे'त्ति निगमनम्॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उक्तं षड्नाम, अथ सप्तनामं निरूपयितुमाह-

*मू. ( १६४ ) से किं तं सत्तनामे ?, २ सत्त सरा पन्नत्ता, तंजहा-*

वृ. 'स्वृ शब्दोपतापयो'रिति स्वरणानि स्वराः-ध्वनिविशेषाः ते च सप्त, तद्यथा-

*मू. ( १६५ ) सज्जे रिसहे गंधारे, मज्झिमे पंचमे सरे।*
*रेवए (धेवए) चेव नेसाए, सरा सत्त विआहिआ॥*

वृ. 'सज्जे'त्ति श्लोको, व्याख्या षड्भ्यो जातः षड्जः उक्तं च-

"नासां कण्ठमुरस्तालु, जिह्वां दन्ताँश्च संश्रितः।
षड्भि· संजायते यस्मात्, तस्मात् षड्ज इति स्मृतः॥"

तथा ऋषभो-वृषभस्तद्वत् यो वर्तते स ऋषभः, आह च-

"वायुः समुत्थितो नाभेः, कण्ठशीर्षसमाहतः।
नर्दन् वृषभवद् यस्मात्, तस्माद्दृषभ उच्यते॥"

तथा गन्धो विद्यते यस्य स गन्धारः, स एव गान्धारो-गन्धवाहविशेष इत्यर्थः, अभाणि च-

"वायुः समुत्थितो नाभेर्हृदि कण्ठे समाहतः।
नानागन्धावहः पुण्यो, गान्धारस्तेन हेतुना॥"

तथा मध्ये कायस्य भवो मध्यमः, यदवाचि-

"वायुः समुत्थितो नाभेरुरोहृदि समाहतः।
नाभिं प्राप्तो महानादो, मध्यमत्वं समश्नुते॥"

तथा पञ्चानां षड्जादिस्वराणां निर्देशक्रममाश्रित्य पूरणः पञ्चमः, अथवा पञ्चसु-नाभ्यादि-स्थानेषु मातीति पञ्चमः स्वरो, यदभ्यधायि-

"वायुः समुत्थितो नाभेरुरोहृतकण्ठशिरोहतः।
पञ्चस्थानोत्थितस्यास्य, पञ्चमत्वं विधीयते॥

तथाऽभिसन्धयते-अनुसंधयति शेषस्वरानिति निरुक्तिवशाद्धैवः, यदुक्तम्-

"अभिसंधयते यस्मादेतान् पूर्वोदितस्वरान्।
तस्मादस्य स्वरस्यापि, धैवतत्वं विधीयते॥"

पाठान्तरेण रैवश्चैवेति, तथा निषीदन्ति स्वरा यस्मिन् स निषादः, यतोऽभिहितम्-

"निषीदन्ति स्वरा यस्मिन्निषादस्तेन हेतुना।
सर्वांश्चाभिभवत्येव, यदादित्योऽस्य दैवतम्॥ ?"

इति, तदेवं स्वराः-जीवाजीवनोश्रितध्वनिविशेषाः 'सत्त वियाहिय'त्ति विविधप्रकारैरा-ख्यातास्तीर्थकरगणधरैरितिश्लोकार्थः। आह-ननुअ कारणभेदेन कार्यस्य भेदात् स्वराणां च जिह्वादिकारणजन्यत्वात् तद्वतां च द्वीन्द्रियादित्रसजीवानामसंख्येयत्वाज्जीवनिसृता अपि तावत् स्वरा असङ्ख्याताः प्राप्नुवन्ति किमुताजीवनिसृता इति कथं सप्तसङ्ख्यानियमो न विरुध्यत इति ?, अत्रोच्यते, असङ्ख्यातानामपि स्वरविशेषाणामेतेष्वेव सप्तसु सामान्यस्वरेष्वन्तर्भावाद् बादराणां वा केषाञ्चिदेवोपलभ्यमानविशिष्टव्यक्तीनां ग्रहणाद्गीतोपकारिणां विशिष्टस्वराणां वक्तुमिष्टत्वाददोष इति।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वरान्नामतो निरूप्य कारणतस्तानेवाभिधित्सुराह-

*मू. ( १६६ ) एएसि णं सत्तण्हं सराणं सत्त सरट्ठाणा पन्नत्ता, तंजहा-*

*मू. ( १६७ ) सज्जं च अग्गजीहाए उरेण रिसहं सरं।*
*कंठुग्गएण गंधारं, मज्झजीहाए मज्झिमं ॥*

*मू. ( १६८ ) नासाए पंचमं बूआ, दंतोट्ठेण अ रेवतं।*
*भमुहक्खेवेण नेसायं, सरट्ठाणा विआहिआ ॥*

*मू. ( १६९ ) सत्त सरा जीवणिस्सिआ पन्नत्ता, तंजहा-*

*मू. ( १७० ) सज्जं रवइ मऊरो, कुक्कुडो रिसभं सरं।*
*हंसो रवइ गंधारं, मज्झिअं म गवेलगा ॥*

*मू. ( १७१ ) अह कुसुमसंभवे काले, कोइला पंचमं सरं।*
*छट्ठं च सारसा कुंचा, नेसायं सत्तमं गओ ॥*

*मू. ( १७२ ) सत्त सरा अजीवनिस्सिआ पन्नत्ता, तंजहा-*

*मू. ( १७३ ) सज्जं रवइ मुअंगो, गोमुही रिसहं सरं।*
*संखो रवइ गंधारं, मज्झिमं पुण झल्लरी ॥*

*मू. ( १७४ ) चउच्चरणपइट्ठाणा, गोहिआ सरं।*
*आडंबरो रेवइयं, महाभेरी अ सत्तमं ॥३१॥*

**वृ.** तत्र नामेरुत्थिथोऽविकारी स्वर आभोगतोऽनाभोगतो वा यदत्र जिह्वादिस्थानं प्राप्य विशेषमासादयति तत् स्वरस्योपकारकमतः स्वरस्थानमुच्यते,

तत्र 'सज्ज' मित्यादिश्लोकद्वयं सुगमं, नवरं चकारोऽवधारणे षड्जमेव प्रथमस्वरलक्षणं ब्रूयात्, कयेत्याह-अग्रभूता जिह्वा अग्रजिह्वा जिह्वाग्रमित्यर्थस्तया, इह यद्यपि षड्जभणने स्थानान्तराण्यपि कण्ठादीनि व्याप्रियन्ते अग्रजिह्वा च स्वरान्तरेषु व्याप्रियते तथापि सा तत्र बहुव्यापारवतीतिकृत्वा तथा तमेव ब्रुयादित्युक्तम्, इममत्र हृदयम-षड्जस्वरोऽग्रजिह्वां प्राप्य विशिष्टांअ व्यक्तिमासादयत्यतस्तदपेक्षया सा स्वरस्थानमुच्यते, एवमन्यत्रापि भावना कार्या, उरो-वक्षस्तेन ऋषभं स्वरं, ब्रुयादिति सर्वत्र सम्बध्यते,

'कंठुग्गएणं'ति कण्ठादुद्गमनमुद्गतिः-स्वरनिष्पत्तिहेतुभूता क्रियाअ तेन कण्ठोद्गतेन गान्धारं, जिह्वाया मध्यो भागो मध्यजिह्वा तया मध्यमं, तथा दन्ताश्चौष्ठौ च दन्तोष्ठं तेन धैवत रैवतं वेति भ्रूत्क्षेपावष्टम्भेन निषादमिति।

इत ऊर्ध्वं सर्वं निगदसिद्धमेव, नवरं 'जीवनिस्सिय'त्ति जीवाश्रिताः जीवेभ्यो वा निसृता-निर्गताः, 'सज्जं रवई'त्यादिश्लोकः, रवति-नदति 'गवेल'त्ति गावश्च एलकाश्च ऊरणका गवेलकाः, अथवा गवेलका-ऊरणका एव, 'अह कुसुमे'त्यादि, अथेति विशेषणार्थो, विशेषणार्थता चैवं-यथा गवेलका अविशेषेण मध्यमस्वरं नदन्ति न तथा पञ्चमं कोकिलः, अपि तु वनस्पतिषु बाहुल्येन कुसुमानां-मल्लिकापाटलादीनां सम्भवो यस्मिन् काले स तथा तस्मिन्, मधुमास इत्यर्थः,

'अजीवनिस्सिय'त्ति तथैव, नवरमजीवेष्वपि मृदङ्गादिषु जीवव्यापारोत्थापिता एवामी

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मन्तव्याः, अपरं षड्जादीनां मृदङ्गादिषु यद्यपि नाशाकण्ठाद्युत्पन्नत्वलक्षणो व्युत्पत्त्यर्थो न घटते तथापि सादृश्यात् तद्‌भावोऽवगन्तवयः, 'सज्ज'मित्यादिश्लोकद्वयं, गोमुखी-काहला यस्या मुखे गोशृङ्गादि वस्तु दीयत इति, चतुर्भिश्चरणैः प्रतिष्ठानम्-अवस्थानं भुवि यस्याः सा गोधा चर्मावनद्धा गोधिका-वाद्यविशेषो दर्दरिकेत्यपरनाम्ना प्रसिद्धा, आडम्बरः-पटहः,

*मू. ( १७५ ) एएसि णं सत्तण्हं सराणं सत्त सरलक्खणा पन्नत्ता, तंजहा-*

*मू. ( १७६ ) सज्जेण लहई विर्त्ति, कयं च न विनस्सइ।*
*गावो पुत्ता य मित्ता य, नारीणं होइ वल्लहो ॥*

*मू. ( १७७ ) रिसहेण उ एसज्जं(पसेज्जं) सेनावच्चं धनानि अ।*
*वत्थगंधमलंकारं, इत्थिओ सयनानि य।*

*मू. ( १७८ ) गंधारे गतिजुत्तिण्णा, वज्जवित्ती कलाहिआ।*
*हवंति कइणो धन्ना, जे अन्ने सत्थपारगा ॥*

*मू. ( १७९ ) मज्झिमसरमंता उ, हवंति सुहजीविणो।*
*खायई पियई देई, मज्झिमसरमस्सिओ ॥*

*मू. ( १८० ) पंचमसरमंता उ, हवंति पुहवीपई।*
*सूरा संगहकत्तारो, अनेगगणनायगा ॥*

*मू. ( १८१ ) रेवयसरमंता उ, हवंति दुहजीविणो।*
*कुचेला य कुवित्ती य, चोरा चंडालमुट्ठिया ॥*

*मू. ( १८२ ) निसायसरमंता उ, होंति कलहकारगा।*
*जंघाचरा लेहवाहा, हिंडगा भारवाहगा ॥*

**वृ.** एतेषां सप्तानां स्वराणां प्रत्येकं लक्षणस्य विचित्रत्वात् सप्त स्वरलक्षणानि-यथास्वं फलप्राप्त्यव्यभिचारीणि स्वरतत्त्वानि भवन्ति, तान्येव फलत आह-'सज्जेणे'त्यादि सप्त श्लोकाः षड्जेन लभते वृत्तिम्, अयमर्थः-षड्जस्येदं लक्षणं-स्वरूप मस्ति येन तस्मिन् सति वृत्ति-जीवनं लभते प्राणी, एतच्च मनुष्यापेक्षया लक्षयते, वृत्तिलाभादीनां तत्रैव घटनात्, कृतं च न विनश्यति, तस्येति शेषः, निष्फलारम्भो न भवतीत्यर्थः, गावः पुत्राश्च मित्राणि च भवन्तीति शेषः।

गान्धारे गीतयुक्तिज्ञा वर्यवृत्तयः-प्रधानजीविकाः कलाभिरधिकाः कवयः-काव्यकर्तारः प्राज्ञाः-सद्बोधाः ये चोक्तेभ्यो गीतयुक्तिज्ञादिभ्योऽन्ये-शास्त्रपारगाः चतुर्वेदिशास्त्रपारगामिनस्ते भवन्तीति।

शकुनेन-श्येनलक्षणेन चरन्ति पापर्धिं कुर्वन्ति शकुनान् वा घ्नन्तीति शाकुनिकाः, वागुरा-मृगबन्धनं तया चरन्तीति वागुरिकाः, शूकरेण सन्निहितेन शूकरवधार्थं चरन्ति शूकरान् वा घ्नन्तीति शौकरिकाः, मौष्टिका मल्ला इति।

पाठान्तराण्यप्युक्तानुसारेण व्याख्येयानि।

*मू. ( १८३ )एएसिं णं सत्तण्हं सराणं तओ गामा पन्नत्ता, तंजहा-सज्जगामे मज्झिमगामे गंधारगामे, सज्जगामस्स नं सत्त मुच्छणाओ, पन्नत्ताओ, तंजहा-*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (१८४) मग्गी कोरविआ हरिया, रयणी अ सारकंता य।
छट्ठी अ सारसी नाम, सुद्धसज्जा य सत्तमा।

मू. (१८५) मज्झिमगामस्स णं सत्त मुच्छणाओ पन्नत्ताओ, तंजहा

मू. (१८६) उत्तरमंदा रयणी, उत्तरा उत्तरासमा।
समोक्कंता य सोवीरा, अभिरूवा होइ सत्तमा॥

मू. (१८७) गंधारगामस्स णं सत्त मुच्छणाओ पन्नत्ताओ, तंजहा-

मू. (१८८) नंदी अ खुड्डिआ पूरिमा य चउत्थी अ सुद्धगंधारा।
उत्तरगंधाराविं अ सा पंचमिआ हवइ मुच्छा॥

मू. (१८९) सुट्ठुत्तरमायामा सा छट्ठी सव्वओ य नायव्वा।
अह उत्तरायया कोडिमा य सा सत्तमी मुच्छा॥

वृ एतच्चिरन्तनमुनिगाथाभ्यां व्याख्यायते-यथा

"सज्झाइतिहागामो, ससमूहो मुच्छणाण विन्नेओ।
ता सत्त एक्कमेक्के तो सत्तसराण इगवीसा॥१॥
अन्नन्नसरविसेसे उप्पायंतस्स मुच्छणा भणिया।
कत्ता व मुच्छिओ इव कुणई मुच्छंव सो वत्ति॥२॥"

कर्ता वा मूर्च्छित इव ताः करोतीति मूर्च्छना उच्यन्ते, 'मुच्छं व सो वत्ति' मूर्च्छन्निव वा स कर्ता ताः करोतीति मूर्च्छना उच्यन्त इत्यर्थः, मङ्गीप्रभृतीनां चैकविंशतिमूर्च्छनानां स्वरविशेषाः पूर्वगतस्वरप्राभृते भणिताः, इदानीं तु तद्विनिर्गतेभ्यो भरतविशाखिलादिशास्त्रेभ्यो विज्ञेया इति।

मू. (१९०) सत्त सरा करो हवंति ? गीयस्स का हवइ जोणी।
कइसमया ओसासा, कइ वा गीयस्स आगारा॥

मू. (१९१) सत्त सरा नाभीओ हवंति गीयं च रुइयजोणी।
पायसमा ऊसासा तिन्नि य गीयस्स आगारा॥

मू. (१९२) आइमउ आरभंता समुव्वहन्ता य मज्झयारंमि।
अवसाने उज्झंता तिन्निवि गीयस्स आगारा॥

वृ. इह चत्वारः प्रश्नाः, तत्र कुतः इति कस्मात् स्थानात् सप्त स्वरा उत्पद्यन्ते, का योनिरिति का जातिः, तथा कति समया येषु ते कतिसमया-उच्छ्वासाः, किंपरिमाणकाला इत्यर्थः, तथा आकाराः-आकृतयः स्वरूपाणि इत्यर्थः। उत्तरमाह-'सत्त सरा नाभीओ' इत्यादिगाथा स्पष्टा, नवरं रुदितं योनिः-समानरूपतया जातिर्यस्य तद् रुदितयोनिकं, पादसमा उच्छ्वासाः, यावद्भिः समयैर्वृत्तस्य पादः समाप्यते तावत्समया उच्छ्वासा गीते भवन्तीत्यर्थः आकारानाह-'आइ' गाहा, त्रयो गीतस्याकाराः-स्वरूपविशेषलक्षणा भवन्ति इति पर्यन्ते सम्बन्धः, किं कुर्वाणा इत्याह- 'आरंभन्त' त्ति आरम्भमाणा गीतमिति गम्यते, कथंभूतमित्याह-'आइमउ' त्ति आदौ-प्रथमतो मृदु-कोमलं आदिमृदु, तथा समुद्वहन्तश्च-कुर्वन्तश्च महतीं गीतध्वनिमिति गम्यते, 'मध्यकारे' मध्यमभागे, तथा अवसाने च क्षपयन्तो, गीतध्वनिं मन्द्रीकुर्वन्ति इत्यर्थः, आदौ मृदु मध्ये तारं पर्यन्ते मन्द्रं गीतं कर्तव्यम्, अत एते मृदुतादयस्त्रयो गीतस्याकारा भवन्तीति तात्पर्यं। किन्तु-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (१९३) छद्दोसे अट्ठगणे तिन्नि अ वित्ताइं दो य भणिईओ।
जो नाही सो गाहिइ, सुसिक्खिओ रंगमज्झंमि॥

मू. (१९४) भीअं दुअ उप्पिच्छं उत्तालं च कमसो मुनेअव्वं।
कागस्समनुनासं छदोसा होंति गेअस्स॥

मू. (१९५) पुन्नं रत्तं च अलंकिअं च वत्तं च तहेवमविघुट्ठं।
महुरं समं सुललिअं अट्ठ गुणा होंति गेअस्स॥

मू. (१९६) उरकंठसिरविसुद्धं च गिज्जंते मउअरिभिअपदबद्धं।
समतालपडुक्खेवं सत्तस्सरसीभरं गीयं॥

मू. (१९७) अक्खरसमं पदसमं तालसमं लयसमं च गेहसमं।
नीससिओससिअसमं संचारसमं सरा सत्त॥

मू. (१९८) निद्दोसं सारमंतं च, हेउजुत्तमलंकियं।
उवनीअं सोवयारं च, मिअं महुरमेव य॥

मू. (१९९) समु अद्धसमं चेव, सव्वत्थ विसमं च जं।
तिन्नि वित्तपयाराइं, चउत्थं नोवलब्भइ॥

मू. (२००) सक्कया पायया चेव, भणिईओ होंति दोन्नि वा।
सरमंडलंमि गिज्जंते, पसत्था इसिभासिआ॥

मू. (२०१) केसी गायइ महुरं केसी गायइ खरं च रुक्खं च।
केसी गायइ चउरं केसी अ विलंबिअं दंतं केसी ?॥

मू. (२०२) विस्सरं पुण केरिसी। गाथाऽधिकमिदं।
गोरी गायति महुरं सामा गायइ खरं च रुक्खं च।
काली गायइ चउरं काणा य विलंबिअं दुतं अंधा॥

मू. (२०३) विस्सरं पुण पिंगला। गाथाऽधिकमिदमपि।
सत्त सरा तओ गामा, मुच्छणा इक्कवीसई।
ताणा एगूनपन्नासं सम्मत्तं सरमंडलं॥

मू. (२०४) से तं सत्तनामे।

वृ. षड् दोषा वर्जनीयास्तानाह-'मीयं'गाहा भीतमुन्त्रस्तमानसं यद्‌गीयते इत्येको दोषः १ द्रुतं-त्वरितम् २, उप्पिछंश्वासयुक्तं त्वरितं च, पाठान्तरेण 'रहस्सं'त्ति हूस्वस्वरं लघुशब्द-मित्यर्थः ३, उत्तालम्-उत्-प्राबल्यार्थे अतितालमस्थानतालं चेत्यर्थः तालस्तु कंसिकादि-शब्दविशेषः ४ काकस्वरं-श्लक्षणाश्रव्यस्वरम् ५, अनुनासं-नासाकृतस्वरम् ६ एते षड् दोषा गीतस्य भवन्ति।

अष्टौ गुणानाह-'पुण्णं'गाहा, स्वरकलाभिः सर्वाभिरपि युक्तं कुर्वतः पूर्णं १, गेयरागेण रक्तस्य-भावितस्य रक्तम् २, अन्यान्यस्फुटशुभस्वरविशेषाणां करणादलंकृतम् ३, अक्षर-स्वरफुटकरणादव्यक्तं ४, विक्रोशनमिव यद्विस्वरं न भवति तदविघुष्टं ५, मधुमत्त-कोकिलारुतवन्मधुरस्वरं ६, तालवंशस्वरादिसमनुतं समं ७, स्वरघोलनाप्रकारेण सुष्ठु-अतिशयेन

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ललतीव यत् सुकुमालं तत् सुललितम् ८, एते अष्टौ गुणा गीतस्य भवन्ति, एतद्विरहितं तु वडिम्बनामात्रमेव तदिति।

किं चोपलक्षणत्वादन्येऽपि गीतगुणा भवन्ति तानाह-'उर'गाहा, चकारो गेयगुणान्तरसमुच्चार्थः, उरःकण्ठशिरोविशुद्धं च, अयमर्थः-यद्युरसि स्वरो विशालस्तुदुर्युरोविशुद्धं, कण्ठे यदि स्वरो वर्तितोऽतिस्फुटितश्च तदा कण्ठविशुद्धं शिरसि प्राप्तो यदि नानुनासिकस्ततः शिरोविशुद्धम्, अथवा उरःकण्ठशिरस्सु श्लेष्मणाऽव्याकुलेषु विशुद्धेषु प्रशस्तेषु यद्गीयते तदुरःकण्ठशिरोविशुद्धं, गीयते गेयमिति संबध्यते, किंविशिष्टमित्याह-मृदुकं मृदुना-अनिष्ठुरेण स्वरेण यद्गीयते तन्मृदुकं, यत्राक्षरेषु घोलनया संचरन् स्वरो रङ्गतीव तत् घोलनाबहुलं रिङ्गितं, गेयपदैर्बद्धं-विशिष्टविरचनाया रचितं पदबद्धं, ततश्च पदत्रयस्य कर्मधारयः, 'समतालपडुक्खेवं'ति तालशब्देन हस्ततालासमुत्थ उपचाराच्छब्दो विवक्षितः, मुरजकांसिकादिगीतोपकारकातोद्यानां ध्वनिः प्रत्युत्क्षेपः नर्तकीपदप्रक्षेपलक्षणो वा प्रत्युत्क्षेपः, समौ गीतस्वरेण तालप्रत्युत्क्षेपौ यत्र तत् समतालप्रत्युत्क्षेपं, 'सत्तस्सरसीभरं'ति सप्त स्वराः सीभरन्ति-अक्षरादिभिः समा यत्र तत्सप्तस्वरसीभरं गीतमिति, ते चामी सप्त स्वराः-

'अक्खरसमं'गाहा, यत्र दीर्घे अक्षरे दीर्घो गीतस्वरः क्रियते ह्रस्वे ह्रस्वः प्लुते प्लुतः सानुनासिके तु सानुनासिकः तदक्षरसमं यद्गीतपदं-नामिकादिकं यत्र स्वरे अनुपाति भवति तत् तत्रैव यत्र गीयते तत् पदसमं, यत्परस्पराभिहतहस्ततालस्वरानुसारिणा स्वरेण गीयते तत्तालसमं, शृङ्गदार्वाद्यन्यतरवस्तुमयेनांगुलीकोशकेन समाहते तन्त्रीस्वरप्रकारे लयस्तमनुसरता स्वरेण यद्गीयते तल्लयसमं, प्रथमतो वंशतन्त्र्यादिभिर्यः स्वरो गृहीतस्तत्समेन स्वरेण गीयमानं ग्रहसमं, निःश्वसितोच्छ्वसितमानमनतिक्रमतो यद्गेयं तन्निःश्वसितोच्छ्वसितसमं, वंशतन्त्र्यादिष्वेवांगुलीसञ्चारसमं यद्गीयते तत्सञ्चारसमम्।

एवमेते स्वराः सप्त भवन्ति, इदमुक्तं भवति-एकोऽपि गीतस्वरोऽक्षरपदादिभिः सप्तभिः स्थानैः सह समत्वं प्रतिपद्यमानः सप्तधात्वमनुभवतीत्येवं सप्त स्वरा अक्षरादिभिः समा दर्शिता भवन्तीति।

गीते च यः सूत्रबन्धः सोऽष्टगुण एव कर्तव्य इत्याह-'निद्दोस'मित्यादि, तत्र 'अलियमुवघायजणय'मित्यादिद्वात्रिंशत्सूत्रदोषरहितं निर्दोषं १ विशिष्टार्थयुक्तं सारवत् २ गीतनिबद्धार्थगमकहेतुयुक्ततया हेत्वर्थ हेतुयुक्तम् ३ उपमाद्यलङ्कारयुक्तमलंकृतम् ४ उपसंहारोपनययुक्तमुपनीतम् ५ अनिष्ठुराविरुद्धालज्जनीयार्थवाचकं सानुप्रासं वा सोपचारम् ६ अतिवचनविस्तररहितं संक्षिप्ताक्षरं मितं ७ मधुरं श्रव्यशब्दार्थं ८ गेयं भवतीति शेषः।

'तिन्नि य वित्ताइं'ति यदुक्तं, तत्राह-'सम'मित्यादि, यत्र वृत्ते चतुर्ष्वपि पादेषु सङ्ख्यया समान्यक्षराणि भवन्ति तत्समं, यत्र प्रथमतृतीययोर्द्वितीयचतुर्थयोश्च पादयोरक्षरसंख्यासमत्वं तदर्द्धसमं, यत्तु सर्वत्र सर्वपादेष्वक्षरसङ्ख्यावैषम्योपेतं तद्विषमं, 'जं'ति यस्माद्वृत्तं भवतीति शेषः, तस्मात् त्रय एव वृत्तप्रकारा भवन्ति, चतुर्थस्तु प्रकारो नोपलभ्यतेऽसत्त्वादित्यर्थः, एवमन्यथाऽप्यविरोधतो व्याख्येयमिदमिति।

'दुन्निय भणिईओ'त्ति यदुक्तं तत्राह-'सक्काए'त्यादि, भणितिर्भाषा स्वरमण्डले-षड्जादि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वरसमूहे, शेषं कण्ठ्यं, गीतविचारप्रस्तावादिदमपि पृच्छति-'केसी गायई' त्यादिप्रश्नगाथा सुगमा, नवरं 'केसि'त्ति कीदृशी स्त्री इत्यर्थः, 'स्वरं'ति स्वरस्थानं, रूक्षं प्रतीतं, चतुरं-दक्षम्, विलम्बितं-परिमन्थरं, द्रुतं शीघ्रमिति। विस्सरं पुण केरिसि'त्ति गानाऽधिकमिदं।

अत्र क्रमेणोत्तरमाह-'गोरी गायइ महुर'मित्यादि, अत्रापि 'विस्सरं पुण पिंगल'त्ति गाथाऽधिकमेव, व्याख्या सुकरैव, नवरं-पिङ्गला-कपिला इत्यर्थः। समस्तस्वरमण्डलसंक्षेपाभिधानेनोपसंहरन्नाह-'सत्तसरे' त्यादि, तता तन्त्री तानो भण्यते, तत्र षड्जादयः स्वराः प्रत्येकं सप्तभिस्तानैर्गीयन्त इत्येवमेकोनपञ्चाशत्तानाः सप्ततन्त्रिकायां वीणायां भवन्तीति। एवं तदनुसारेणैकतन्त्रीकायां त्रितन्त्रिकायां कण्ठेनापि वा गीयमाना एकोनपञ्चाशदेव ताना भवन्तीति।

तदेवमेतैः षड्जादिभिः सप्तभिर्नामभिः सर्वस्यापि स्वरमण्डलस्याभिधानात् सप्तनामेदमुच्यते, 'से तं सत्तनामे'त्ति निगमनम्।

अथाष्टनाम प्रतिपादयन्नाह-

*मू. (२०५) से किं तं अट्ठविहा वयणविभत्ती पन्नत्ता, तंजहा-*

*मू. (२०६) निद्देसे पढमा होइ, बितिआ उवएसन।*
*तइया करणंमि कया, चउत्थी संपयावणे॥*

*मू. (२०७) पंचमी अ अवायाणे, छट्ठी सस्सामिवायणे।*
*सत्तमी सन्निहानंत्थे अट्ठमाऽऽमंतणी भवे॥*

*मू. (२०८) तत्थ पढमा विभत्ती निद्देसे सो इमो अहं वत्ति।*
*बिइआ पुण उवएसे भण कुणसु इमं व तं वत्ति॥*

*मू. (२०९) तइआ करणंमि कया भणिअं च कयं च तेण व मए वा।*
*हंदि नमो साहाए हवइ चउत्थी पयाणंमि॥*

*मू. (२१०) आवण्य गिण्ह य एत्तो इउत्ति वा पंचमी अवायाणे।*
*छट्ठी तस्स इमस्स व गयस्स वा सामिसंबंधे॥*

*मू. (२११) हवइ पण सत्तमी तं इमंमि आहारकालभावे अ।*
*आमंतणी भवे अट्ठमी उ जह हे जुवानत्ति॥*

*मू. (२१२) से तं अट्ठनामे।*

**वृ.** उच्यन्त इति वचनानि-वस्तुवाचीनि विभज्यते-प्रकटीक्रियते अर्थोऽनयेति विभक्तिः वचनानां विभक्तिर्वचनविभक्तिः, नाख्यातविभक्तिरपि तु नामविभक्तिः प्रथमादिकेति भावः, सा चाष्टविधा तीर्थकरगणधरैः, प्रज्ञप्ता, का पुनरियमित्याशङ्क्य यस्मिन्नर्थे या विधीयते तत्सहितामष्टविधामपि विभक्तिं दर्शयितुमाह-

'तद्यथे'त्यादि 'निद्देसे'इत्यादि श्लोकद्वयं निगदसिद्धं, नवरं-लिङ्गार्थमात्रप्रतिपादनं निर्देशः, तत्र सि औ जसिति प्रथमा विभक्तिर्भवति, अन्यतरक्रियायां प्रवर्तनेच्छोत्पादनमुपदेशस्तस्मिन् अम् सौ शस् इति द्वितिया विभक्तिर्भवति, उपलक्षणमात्रं चेदं, कटं करोतीत्यादिषूपदेशमन्तरेणापि द्वितीयाविधानाद्, एवमन्यत्रापि यथासम्भवं वाच्यं, विवक्षितक्रियासाधकतमं करणं तस्मिँस्तृतीया 'कृता' विहिता, सम्प्रदीयते यस्मै तद् गवादिदानविषयभूतं सम्प्रदानं तस्मिँ-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्चतुर्थी विहिता, अपादीयते-वियुज्यते यस्मात् तद्वियुज्यमानावधिभूतमपादानु तत्र पञ्चमी विहिता, स्वम्-आत्मीयं सचित्तादि स्वामी-राजादिः तयोर्वचने तत्सम्बन्धप्रतिपादने षष्ठी विहितेत्यर्थः, संनिधीयते-आधीयते यस्मिँस्तत्सन्निधानम्-आधारस्तदेवार्थः २ तस्मिन् सप्तमी विहिता, अष्टमी सम्बुद्धिः-आमन्त्रणी भवेद्, आमन्त्रणार्थे विधीयत इत्यर्थः ।

एनमेवार्थं सोदाहरणमाह-'तत्थ पढमे' त्यादिगाथाश्चतस्रो गतार्था एव, नवरं प्रथमा विभक्तिर्निर्देशे, क यथेत्याह-'सो'त्ति सः तथा 'इमो'त्ति अयं 'अहं'ति अहं वाशब्द उदाहरणान्तरसूचकः, उपदेशे द्वितीया, क्वयथेत्याह-भण कुरु वा, किं तदित्याह-'इदं' प्रत्यक्षं तद्वा-परोक्षमिति, तृतीया करणे क यथेत्याह-भणितं वा कृतं वा, केनेत्याह-तेन वा मया वेति, अत्र यद्यपि कर्तरि तृतीया प्रतीयते, तथापि विवक्षाधीनत्वात् कारकप्रवृत्तेस्तेन मया वा कृत्वा भणितं कृतं वा, देवदत्तेनेति गम्यत इति, एवं करणविवक्षाऽपि न दुष्यतीति लक्षयामः, तत्त्वं तु बहुश्रुता भवतीत्येके, अन्ये तूपाध्यायाय गां ददातीत्यादिष्वेव सम्प्रदाने चतुर्थीमिच्छन्ति, अपनय गृहाण एतस्मादितो वेत्येवमपादाने पञ्चमी, तस्यातस्य गतस्य, कस्य ?-भृत्यादेरिति गम्यते, इत्येवं स्वस्वामिसम्बन्धे षष्ठी, तद्वस्तु बदरादिकं अस्मिन् कुण्डादौ तिष्ठतीति गम्यते, इत्येवमाधारे सप्तमी भवति, तथा 'कालभावे अ'त्ति कालभावयोश्चेयं द्रष्टव्या, तत्र काले यथा मधौ रमते, भावे तु चारित्रेऽवतिष्ठते, आमन्त्रणे भवेदष्टमी यथा हे युवन्निति, वृद्धवैयाकरणदर्शनेन चेयमष्टमी गण्यते, ऐदंयुगीनानां त्वसौ प्रथमैवेति मन्तव्यमिति ।

इह च नामविचारप्रस्तावात् प्रथमादिविभक्त्यन्तं नामैव गृह्यते, तथा(चा)ष्टविभक्तिभेदादष्टविधं भवति, न च प्रथमादिविभक्त्यन्तनामाष्टकमन्तरेणापरं नामास्ति, अतोऽनेन नामाष्टकेन सर्वस्य वस्तुनोऽभिधानद्वारेण संग्रहादष्टनामेदमुच्यते इति भावार्थः

'से तं अट्ठनामे'त्ति निगमनम् । अथ नवनाम निर्दिशन्नाह-

*मू. ( २१३ ) से किं तं नवनामे ?, २ नव कव्वरसा पन्नत्ता ।*

*मू. ( २१४ )* *वीरो सिंगारो अब्भुओ अ रोद्दो अ होइ बोद्धव्वो ।*
*वेलणओ बीभच्छो हासो कलुणो पसंतो अ ॥*

वृ. नवनाम्नि नव काव्यरसाः प्रज्ञप्ताः, तत्र कवेरभिप्रायः काव्यं, रस्यन्ते-अन्तरात्मनाऽनुभूयन्त इति रसाः, तत्तत्सहकारिकारणसन्निधानोद्भूताश्चेतोविकारविशेषा इत्यर्थः, उक्तं च-

"बाह्यार्थलम्बनो यस्तु, विकारो मानसो भवेत् ।
स भावः कथ्यते सद्भिस्तस्योत्कर्षो रसः स्मृतः ॥"

काव्येषूपनिबद्धा रसाः काव्यरसाः-वीरशृङ्गारादयः, तानेवाह-'वीरो सिंगारो' इत्यादिगाथा सुगमा, नवरं 'शूर वीर विक्रान्ता'विति वीरयति-विक्रामयति त्यागतपोवैरिनिग्रहेषु प्रेरयति प्राणिनमित्युत्तमप्रकृतिपुरुषचरितश्रवणादिहेतुसमुद्भूतो दानाद्युत्साहप्रकर्षात्मको वीरो, रस इति सर्वत्र गम्यते ?, शृङ्गं-सर्वरसेभ्यः परमप्रकर्षकोटिलक्षणमियर्ति-गच्छतीति कमनीयकामिनीदर्शनादिसम्भवो रतिप्रकर्षात्मकः शृङ्गारः, सर्वरसप्रधान इत्यर्थः, अत एव ।

"शृङ्गारहास्यकरुणा, रौद्रवीरभयानकाः ।
बीभत्साऽद्भुतशान्ताश्च, नव नाट्ये रसाः स्मृताः ॥"

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्यादिष्ववयं सर्वरसानामादावेव पठ्यते, अत्र तु त्यागतपोगुणो वीररसे वर्तते, त्यागतपसी च 'त्यागो गुणो गुणशताधधिको मतो मे' 'परं लोकातिगं धाम, तपः श्रुतमिति द्वय' मित्यादि-वचनात् समस्तगुणप्रधान इत्यनया विवक्षया वीररसस्यादावुपन्यास इति २, श्रुतं शिल्पं त्यागतपःशौर्यकर्मादि वा सकलभुवनातिशायि किमप्यपूर्वं वस्त्वद्भुतमुच्यते, तद्दर्शन-श्रवणादिभ्यो जातो रसोऽप्युपचाराद्विस्मयरूपोऽद्भुतः ३, रोदयति-अतिदारुणतया अश्रूणि मोचयतीति रौद्रं-रिपुजनमहारण्यान्धकारादि, तद्दर्शनाद्युद्भवो विकृताध्यवसायोरूपो रसोऽपि रौद्रः ४, व्रीडयति-लज्जामुत्पादयतीति लज्जनीयवस्तुदर्शनादिप्रभवो मनोव्यलीकतादिस्वरूपो व्रीडनकः, अस्य स्थाने भयजनकसंग्रामादिवस्तुदर्शननादिप्रभवो भयानको रसः पठ्यते अन्यत्र, स चेह रौद्ररसान्तर्भावविवक्षणात् पृथग् नोक्तः ५, शुक्रशोणितोच्चारप्रश्रवणाद्यनिष्ठमुद्वेजनीयं वस्तु बीभत्समुच्यते, तद्दर्शनश्रवणादिप्रभवो जुगुप्साप्रकर्षस्वरूपो रसोऽपि बीभत्सः ६, विकृतासम्बद्धपरवचनवेषालङ्कारादिहास्यार्हपदार्थप्रभवो मनःप्रकर्षादिचेष्टात्मको रसोऽपि हास्यः ७, कृत्सितं रौत्यनेनेति निरुक्तवशात् करुणः करुणास्पदत्वात् करुणः प्रियवि-प्रयोगादिदुःखहेतुसमुत्थः शोकप्रकर्षस्वरूपः करुणो रस इत्यर्थः ८, प्रशाम्यति क्रोधादि-जनितौत्सुक्यरहितो भवत्यनेनेति प्रशान्तः, परमगुरुवचःश्रवणादिहेतुसमुल्लसित उपशम-प्रकर्षात्मा प्रशान्तो रस इत्यलं विस्तरेण ९ ॥

एतानेव लक्षणादिद्वारेण बिभणिषुर्वीररसं तावल्लक्षणतो निरूपयन्नाह-

*मू. ( २१५ )* *तत्थ परिच्चायंमि अ तवचरणे सत्तुजनविनासे अ ।*
*अननुसयधितिपरक्कमलिंगो वीरो रसो होइ ।*

*मू. ( २१६ ) वीरो रसो जहा-सो नाम महावीरो जो रज्जं पयहिऊण पव्वइओ ।*
*कामकोहमहासत्तूपक्खनिग्घायणं कुणइ ॥*

**वृ.** 'तत्र' तेषु नवसु रसेषु मध्ये 'परित्यागे' दाने 'तपश्चरणे' तपोविधाने शत्रुजनविनाशे च यथासङ्ख्यमननुशयधृतिपराक्रमचिह्नो वीरो रसो भवति-इदमुक्तं भवति-दाने दत्ते यदाऽनुशयो-गर्वः पश्चात्तापो वा तं न करोति, तपसि च कृते धृतिं करोति नार्तध्यां, शत्रुविनाशे च पराक्रमते न तु वैक्लुव्यमवलम्बते, तदा एतैर्लिङ्गैर्ज्ञायतेऽयं प्राणी वीररसे वर्तते, इत्येवमन्यत्रापि भावना कार्येति ।

उदाहरणनिदर्शनार्थमाह-वीरो रसो 'यथे'त्युपदर्शनार्थमेतत्, 'सो नाम'गाहा पाठसिद्धा, नवरं वीररसवत्पुरुषचेष्टितप्रतिपादनादेवंप्रकारेषु काव्येषु वीररसः प्रतिपत्तव्य इति भावार्थः, अपरं चेहोत्तमपुरुषजेतव्यकामक्रोधादिभावशत्रुजयनैव वीररसोदाहरणं मोक्षाधिकारिणि प्रस्तुतशास्त्रे इतरजनसाध्यसंसारकारणद्रव्यशत्रुनिग्रहस्याप्रस्तुतत्वादिति मन्तव्यमिति, एवमन्यत्रापि भावार्थोऽवगन्तव्य इति । श्रृङ्गाररसं लक्षणतस्त्वाह-

*मू. ( २१७ )* *संगारो नाम रसो रतिसंजोगाभिलाससंजननो ।*
*मंडणविलासविब्बोअहासलीलारमनलिंगो ॥*

*मू. ( २१८ ) सिंगारो रसो जहा-महुरविलाससललिअं हियउम्मादणकरं जुवाणाणं ।*
*सामा सद्दुदामं दाएती मेहलादामं ॥*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. शृङ्गारो नाम रसः, किंविशिष्ट इत्याह-'रती'त्यादि, रतिशब्देनेह रतिकारणानि सुरतव्यापाराङ्गानि ललनादीनि गृह्यन्ते तैः सार्द्धं संयोगाभिलाषसंजनकः, तस्य तत्कार्यत्वादेव, तथा मण्डनविलासविब्बोकहास्यलीलारमणानि लिङ्गं यस्य स तथा, तत्र मण्डनं कङ्कणादिभिः, विलासः-कामगर्भो रम्यो नयनादिविभ्रमो विब्बोयत्ति देशीपदं अङ्गजविकारार्थं, हास्यं प्रतीतं, लीला-सकामगमनभाषितादिरमणीयचेष्टा, रमणं-क्रीडनमिति।

उदाहरणमाह-'सिंगारो' इत्यादि, 'महुर'गाहा, श्यामा स्त्री मेखलादाम-रसनासूत्रं दर्शयति, प्रकटयतीत्यर्थ, कथंभूतमित्याह-रणन्मणिकिङ्किणीस्वरमाधुर्यान्मधुरं, तथा विलासैः-सकामैश्चेष्टाविशेषैर्ललितं-मनोहारि, तथा शब्दोद्दामं-किङ्किणीस्वनमुखरं, किमिति तत्प्रकटयतीत्याह-यतो 'हृदयोन्मादनकरं' प्रबलस्मरदीपनं यूनामिति, शृङ्गारप्रधानचेष्टाप्रतिपादनादयं शृङ्गारो रस इति ॥ अद्भुतं स्वरूपतो लक्षणतश्चाह-

*मू. ( २१९ ) विम्हयकरो अपुव्वो अनुभुअपुव्वो य जो रसो होइ।*
*हरिसविसाउप्पत्तीलक्खणो अब्भुओ नाम ॥*

*मू. ( २२० )अब्भुओ रसो जहा-अब्भुअतरमिह एत्तो अन्नं किं अत्थि जीवलोगंमि।*
*जं जिनवयणे अत्था तिकालजुत्ता मुनिज्जंति ? ॥*

वृ. कस्मिँश्चिदद्भुते वस्तुनि दृष्टे विस्मयं करोति, विस्मयोत्कर्षरूपो यो रसो भवति सोऽद्भुतनामेति सण्टङ्कः, कथंभूतः ?- अपूर्वः-अननुभूतपूर्वोऽनुभूतपूर्वो वा, किंलक्षण इत्याह-हर्षविषादोत्पत्तिलक्षणः, शुभे वस्तुन्युद्भुतो दृष्टे हर्षजननलक्षणः अशुभे तु विषादजननलक्षण इत्यर्थः, उदाहरणमाह-

'अब्भुय' गाहा, इह जीवलोकेऽद्भुततरम् इतो-जिनवचनात् किमन्यदस्ति ?, नास्तीत्यर्थः, कुत इत्याह-'यद्' यस्माज्जिनवचनेनार्थाः-जीवादयः सूक्ष्मव्यवहिततिरोहितातीन्द्रियामूर्त्तादिस्वरूपाः अतीतानागतवर्तमानरूपत्रिकालयुक्ता अपि ज्ञायन्त इति।

अथ रौद्रं हेतुतो लक्षणतश्चाह-

*मू. ( २२१ ) भयजननरूवसद्दंधयारचिंताकहासमुप्पन्नो।*
*संमोहसंभमविसायसरणलिंगो रसो रोद्दो ॥*

*मू. ( २२२ )रोद्दो रसो जहा-भिउडीविडंबिअमुहो संदट्ठोट्ठ इअ रुहिरमाकिन्नो।*
*हणसि पसुं असुरणिभो भीमरसिअ अइरोद्द ! रोद्दोऽसि ॥*

वृ. रूपं शत्रुपिशाचादीनां शब्दस्तेषामेव, अन्धकारं बहुलतमोनिकुरुम्बरूपम्, उपलक्षणत्वादरण्यादयश्च पदार्था इह गृह्यन्ते, तेषां भयजनकानां रूपादिपदार्थानां येयं चिन्ता-तत्स्वरूपपर्यालोचनरूपा कथा-तत्स्वरूपभणनलक्षाणा, तथोपलक्षणत्वाद् दर्शनादि च गृह्यते, तेभ्यः समुत्पन्नो-जाता रौद्रो रस इति योगः, किंलक्षण इत्याह-'संमोहः' किंकर्तव्यत्वमूढता सम्भ्रणो-व्याकुलत्वं विषादः-किमहमत्र प्रदेशे समायात इत्यादिखेदस्वरूपः मरणं-भयोद्भ्रान्तगजसुकुमालहन्तृसोमिलद्विजस्येव प्राणत्यागस्तानि 'लिङ्ग' लक्षणं यस्य स तथा-

आह-ननु भयजनकरूपादिभ्यः समुत्पन्नः संमोहादिलिङ्गश्च भयानक एव भवति, कथमस्य रौद्रत्वं ?, सत्यं, किन्तु पिशाचादिरौद्रवस्तुभ्यो जातत्वाद् रौद्रत्वमस्य विवक्षितमित्यदोषः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथा शत्रुजनादिदर्शने तच्छिरः कर्त्तनादिप्रवृत्तानां पशुशूककुरङ्गवधादिप्रवृत्तानां च यो रौद्राध्यवसायात्मको भ्रुकुटीभङ्गादिलिङ्गो रौद्रो रसः सोऽप्युपलक्षणत्वात्रैव दृष्टव्यः, अन्यथा स निरास्पद एव स्याद्, अत एव रौद्रपरिणामवत्पुरुषचेष्टाप्रतिपादकमेवोदाहरणं दर्शयिष्यति, भीतचेष्टाप्रतिपादकं तु तत् स्वत एवाभ्यूह्यमित्यलं प्रसङ्गेन।

उदाहरणमाह-'भिउडी'गाहा, त्रिवलीतरङ्गितललाटरूपया भ्रुकुट्या विडम्बितं-विकृतीकृतं मुखं यस्य तत् सम्बोधनं हे भ्रुकुटीविडम्बितमुख! संदष्टौष्ठः 'इत' इति इतश्च इतश्च 'रुहिरमाकिण्ण'त्ति विक्षिप्तरुधिर इत्यर्थः, 'हंसि' व्यापादयति पशुम्, असुरो-दानवस्तत्रिभः-तत्सदृशः, भीमं रसितं-शब्दितं यस्य तत्संबोधनं हे भीमरसित! 'अतिरौद्र' अतिशयरौद्राकृते! रौद्रोऽसि-रौद्रपरिणामयुक्तोऽसीति।

अथ व्रीडारसं हेतुतो लक्षणतश्चाह-

*मू. ( २२३ ) विनओवयारगुज्झगुरुदारमेरावइक्कमुप्पन्नो।*
*वेलणओ नाम रसो लज्जासंकाकरणलिंगो॥*

*मू. ( २२४ )वेलणओ रसो जहा-किं लोइअकरणीओ लज्जणीअतरंति लज्जयामुत्ति?।*
*वारिज्जंमि गुरुयणो परिवंदइ जं वहुप्पोत्तं॥*

**वृ.** विनयोपचारगुह्यगुरुदारमर्यादानां व्यतिक्रम-स्थितिलङ्घनं तदुत्पन्नो व्रीडनको नाम रसो भवति, तत्र विनरयार्हानां विनयोपचारव्यतिक्रमे शिष्टस्य पश्चात् व्रीडा प्रादुरस्ति, पश्यत मया कथं पूज्यपूजाव्यतिक्रकमः कृत इति?, तथा गुह्यं-रहस्यं तस्य च व्यतिक्रकमेऽन्यकथनादिलक्षणे व्रीडारसः प्रादुर्भवति, तथा गुरव-पूज्याः पितृत्वकलाग्राहकोपाध्यायादयस्तद्दारैश्च सहाब्रह्मसेवादिलक्षणे मर्यादाव्यतिक्रकम कृते लज्जारसः प्रादुर्भवतीति, एवमन्योऽपि दृष्टव्यः, किंलक्षण इत्याह-लज्जाशङ्कयोः करणं-विधानं लिङ्गं यस्य स तथा, तत्र शिरसोऽधोऽवनमनं गायत्रसङ्कोच इत्यादिहेतुका लज्जा, मां न कचित् कश्चित् किञ्चिद् भणिष्यतीति सर्वत्राभिशङ्कितत्वं शङ्केति।

अत्रोदाहरणं-'किं लोइय' गाहा, इह कचिद्देशेऽयं समाचारो, यदुत-अभिनववध्वाः स्वभर्त्रा यतए प्रथमयोन्युद्भेदे कृते शोणितचर्चितं तन्निवसनं अक्षतयोनिरयं न पुनरग्रेऽप्यासेविताना-चारेति संज्ञापनार्थं प्रतिगृहं भ्राम्यते, सकलजनमसक्षं च श्वश्रूश्वशुरादिस्तदीयगुरुजनः सतीत्वख्यापनार्थं तद्वन्दत इति, एवं व्यवस्थिते सखीपुरतो वधूर्भणति-'किं लोइयकरणीउ'त्ति करणीक्रिया, ततश्च लौकिकक्रियाया-लौकिककर्त्तव्यात् सकाशात किमन्याल्लज्जनीयतरं?, न किञ्चिदित्यर्थः, इत्यतो लज्जिताऽहं भवामि, किमिति?,-यतो 'वारेज्जो' विवाः तत्र गुरुजनो वन्दते 'वहुप्पोत्तं'ति वधूनिवसनमिति।

अथ बीभत्सं हेतुतो लक्षणतश्चाह-

*मू. ( २२५ ) असुइकुणिमदुद्दंसणसंजोगब्भासगंधनिप्फन्नो।*
*निव्वेअऽविहिंसालक्खणो रसो होइ बीभत्सो॥*

मू. ( २२६ )बीभत्सो रसो जहा-असुइमलभरियअनिज्झरसभावदुग्गंधि सव्वकालंपि
धन्ना उ सरीरकलिं बहुमलकलुसं विमुंचंति॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**वृ.** अशुचि-मूत्रपुरीषादि वस्तु कुणपं-शवः अपरमपि यद्दुर्दर्शनं गलल्लालादिकराल शरीरादि तेषां संयोगाभ्यासाद्अभीक्ष्णं तद्दर्शनादिरूपात् तद्गन्धाच्च निष्पन्नो बीभत्सो रसो भवतीति सम्बन्धः, किंलक्षण इत्याह-निर्वेदश्च अकारस्य लुप्तस्य दर्शनादविहिंसा च तल्लक्षणं यस्य स तथा, तत्र निर्वेदः-उद्वेग, अविहिंसा-जन्तुघातादिनिवृत्तिः, इह च शरीरादेरसारतामुपलभ्य हिंसादिपापेभ्यः कश्चिन्निवर्तते इत्यविहिंसाऽपि तल्लक्षणत्वेनोक्तेति।

'असुई' त्याद्युदाहरणगाथा, इह कश्चिदुपलब्धशरीराद्यसारतास्वरूपः प्राह-कलिः-जघन्यः कालविशेषः कलहो वा तत्र सर्वानिष्टहेतुत्वात् सर्वकलहमूलत्वाद्वा शरीरमेव कलिः शरीरकलिस्तं मूर्च्छात्यागेन मुक्तिगमनकाले सर्वथात्यागेन वा धन्याः केचिद्विञ्जन्तीति सण्टङ्कः, कथंभूतम् ? अशुचिमलभृतानि निर्झराणि-श्रोत्रादिविवराणि यस्य तत्तथा, सर्वकालमपि स्वभावतो दुर्गन्धं तथा बहुमलकलुषमिति, एवं वाचनान्तराण्यपि भावनीयानि।

अथ हास्यरसं हेतुलक्षणाभ्यामाह-

*मू. ( २२७ )* *रूववयवेसभासाविवरीअविलंबणासमुप्पन्नो।*
*हासो मनप्पहासो पगासलिंगो रसो होइ॥*

*मू. ( २२८ ) हासो रसो जहा-पासुत्तमसीमंडिअपडिबुद्धं देवरं पलोअंती।*
*ही जह थणभरकंपनपनमिअमज्झा हसइ सामा॥*

**वृ.** रूपवयोवेषभाषाणां हास्योत्पादनार्थं वैपरीत्येन या विडम्बना-निवर्तना तत्मुत्पन्नो हास्यो रसो भवतीति संयोगः, तत्र पुरुषादेर्योषिदादिरूपकरणं रूपवैपरीत्यं, तरुणादेर्वृद्धादिभावापादानं वयोवैपरीत्यं, राजपुत्रोदेर्वाणिगादिवेषधारणं वेषणवैपरीत्यं, गुर्जरादेस्तु मध्यदेशादिभाषाभिधानं भाषावैपरीत्यं, स च कथंभूतः, स्यादित्याह-'मणप्पहासो'त्ति मनःप्रहर्षकारी प्रकाशो-नेत्र-वक्त्रादिविकाशस्वरूपो लिङ्गं यस्य स तथा, अथवा प्रकाशानि-प्रकटान्युदरप्रकम्पनाऽट्टहासादीनि लिङ्गानि यस्येति स तथेति।

'पासुत्तमसी'त्यादिनिदर्शनगाथा, इह कयाचिद्वध्वा प्रसुप्तो निजदेवरश्चसूर्या मषीमण्डनेन मण्डितः, तं प्रबुद्धं च सा हसति, तां च हसन्तीमपुलभ्य कश्चित्पार्श्ववर्तिनं कञ्चित्पार्श्ववर्तिनं कञ्चिदामन्त्र्य प्राह-हीति कन्दर्पातशयद्योतकं वचः, पश्यत भोः श्यामा स्त्री यथा हसतीति सम्बनन्धः, किं कुर्वती-देवरं प्रलोकयन्ती, कथंभूतं ?-'पासुत्ते'त्यादि छिन्नप्ररूढादिवदत्र कर्मधारयः, पूर्वं प्रसुप्तश्च असौ ततो मषीमण्डितश्चासौ ततोऽपि प्रबुद्धश्च स तथा तं, कथंभूता ?-स्तनभरकम्पनेन प्रणतं मध्यं यस्याः सा तथेति।

अथ हेतुतो लक्षणतश्च करुणरसस्वरूपमाह-

*मू. ( २२९ )* *पिअविप्पओगबंधवहवाहिविनिवायसंभमुप्पन्नो।*
*सोइअविलविअपम्हाणरुन्नलिंगो रसो करुणो॥*

*मू. ( २३० ) करुणो रसो जहा-पज्झायकिलामिअयं बाहागयपप्पुअच्छिअं बहुसो।*
*तस्स विओगे पुत्तिय! दुब्बलयं ते मुहं जायं॥*

**वृ.** प्रियविप्रयोगबन्धवधव्याधिविनिपातसम्भ्रमेभ्यः समुत्पन्नः करुणो रस इति योगः, तत्र विनिपातः-सुतादिमरणं सम्भ्रमः-परचक्रादिभयं, शेषं प्रतीतं, किंलक्षण इत्याह-शोचित-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विलपितप्रम्लानरुदितानि लिङ्गानि-लक्षणानि यस्य स तथा, तत्र शोचितं-मानसो विकारः, शेषं विदितमिति।

'पज्झाये'त्याद्युदाहरणगाथा, अत्र प्रियविप्रयोगभ्रमितां बालां प्रति वृद्धा काचिदाह-तस्य कस्यचित्त प्रियतमस्य वियोगे हे पुत्रिके ! दुर्बलकं ते मुखं जातं, कथंभूतं ?-'पज्झायकिलामितयं' ति प्रध्यातं-प्रियजनविषयमतिचिन्तितं तेन क्लान्तः, 'बाहागयपप्पुअच्छियं'ति बाष्पस्यागतम्-आगमनं तेनोपप्लुते-व्याप्ते अक्षिणी यत्र तत्तथा, बहुशः-अभीक्ष्यमिति।

अथ हेतुलक्षणद्वारेणैव प्रशान्तरसमुदाहरति-

*मू. ( २३१ ) निद्दोसमणसमाहानसंभवो जो पसंतभावेनं।*
*अविकारलक्खो सो रसो पसंतोत्ति नायव्वो॥*

*मू. ( २३२ ) पसंतो रसो जहा-सब्भावनिव्विगारं उवसंतपसंतसोमदिट्ठिअं।*
*ही जह मुनिनो सोहइ मुहकमलं पीवरसिरिअं॥*

*मू. ( २३३ ) एए नव कव्वरसा बत्तीसादोसविहिसमुप्पन्ना।*
*गाहार्हि मुनियव्वा हवंति सुद्धा व मीसा वा॥*

*मू. ( २३४ ) से तं नवनामे।*

**वृ.** निर्दोष-हिंसादिदोषरहितं यन्मनस्तस्य यत्समाधानं-विषयाद्यौत्सुक्यनिवृत्तिलक्षणं स्वास्थ्यं तस्मात्सम्भवो यस्य स तथा, प्रशान्तभावेन-क्रोधादिपरित्यागेन यो भवतीति गम्यते, स प्रशान्तो रसो ज्ञातव्य इति घटना, स चाविकारलक्षणोनिर्विकारताचिह्न इत्यर्थः।

'सब्भावे'त्याद्युदाहरणगाथा, प्रशान्तवदनं कश्चित्साधुमवलोक्य कश्चित्समीपस्थितं कञ्चिदाश्रित्य प्राह-हीति प्रशान्तभावातिशयद्योतकः, पश्य भो ! यथा मुनेर्मुखकमलं शोभते, कथंभूत ?-सद्भावतो न मातृस्थानतो निर्विकार-विभूषाभ्रूक्षेपादिविकाररहितम्, उपशान्ता रूपालोकनाद्यौत्सुक्यत्यागतः प्रशान्ता क्रोधादिदोषपरिहारतोऽत एव सौम्या दृष्टिर्यत्र तत्तथा, अस्मादेव च पीवरश्रीकम्-उपचितोपशमलक्ष्मीकमिति।

साम्प्रतं नवानामपि रसानां संक्षेसः स्वरूपं कथयन्नुपसंहरन्नाह-'एए नवकव्व' गाहा, एते नव काव्यरसाः, अनन्तरोक्तगाथाभिर्यथोक्तप्रकारेणैव 'मुणितव्या' ज्ञातव्याः, कथंभूता ?,-'अलियमुवघायजनयं निरत्थयमवत्थयं छलं दुहिल' मित्यादयोऽत्रैव वक्ष्यमाणा ये द्वात्रिंशत् सूत्रदोषास्तेषां विधिः-विरचनं तस्मात् समुत्पन्नाः, इदमुक्तं भवति-अलीकतालक्षणो यस्तावत् सूत्रदोष उक्तस्तेन कश्चिद् रसो निष्पद्यते, यथा -

"तेषां कटतटभ्रष्टैर्गजानां मदबिन्दभिः।
प्रावर्तत नदी घोरा, हस्त्यश्वरथवाहिनी॥"

इत्येवंप्रकारं सूत्र मलीकतादोषदुष्टं, रसश्चायमुद्भुतः, ततोऽनेनालीकतालक्षणेन सूत्रदोषेणाद्भुतो रसो निष्पन्नः, तथा कश्चिद्रस उपघातलक्षणेन सूत्रदोषेण निवर्त्यते यथा -

'स एव प्राणिति प्राणी, प्रीतेन कुपितेन च।
वितैर्विपक्षरक्तैश्च, प्रीणिता येन मार्गणाः'

इत्यादिप्रकारं सूत्रं परोपघातलक्षणदोषदुष्टं वीररसश्चायं, ततोऽनेनोपघालक्षणेन सूत्रदोषेण

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वीररसोऽत्र निर्वृत्तः, इत्येवमन्यत्रापि यथासम्भवं सूत्रदोषेविधानाद्रसनिष्पत्तिर्वक्तव्या, प्रायोवृत्तिं चाश्रित्यैवमुक्तं, तपोदानविषयस्य वीररसस्य प्रशान्तादिरसानां च क्वचिदनृतादिसूत्रदोषो-नन्तरेणापि निष्पत्तेरिति, पुनः किंविष्टा अमी भवन्तीत्याह-'हवंति सुद्धा व मीसा व'त्ति सर्वेऽपि शुद्धा वा मिश्रा वा भवन्ति, क्वचित्काव्ये शुद्ध एक एव रसो निबध्यते, क्वचित्तु द्वयादिरसंयोग इति भाव इति गाथार्थः । तदेवमेतैर्वीरशृङ्गारादिभिर्नवभिर्नामभिरत्र वक्तुमिष्टस्य रसरस्य सर्वस्याप्यभिधानान्नवनामेदमुच्यते ।

'से तं नवनामे'त्ति निगमनम् । अथ दशनामाभिधानार्थमाह-

*मू.( २३५ ) से किं तं दसनामे ?, २ दसविहे पन्नत्ते, तंजहा-गोण्णे नोगोण्णेअ आयाणपएणं पडिवक्खपएणं पहाणयाए अनाइअसिद्धंतेन नामेणं अवयवेणं संजोगेनं पमाणेणं । से किं तं गोण्णे ?, २ खमईत्ति खमणो तवइत्ति तवनो जलइत्ति जलणो पवइत्ति पवनो, से तं गोण्णे । से किं तं नोगोण्णे ?, अंकुतो संकुतो अमुग्गो समुग्गो अमुद्दो समुद्दो अलालं पलालं अकुलिआ सकुलिआ नो पलं असइत्ति पलासो अमाइवाहए माइवाहए अबीयवावए बीअवावए नो इंदगोवए इंदगोवे, से तं नोगोण्णे । से किं तं आयाणपएणं ?, २ (धम्मोमंगलं चूलिआ) आवंती चाउरंगिज्जं असंखयं अहातत्थिज्जं अद्दइज्जं जन्नइज्जं पुरिसइज्जं (उसंकारिज्जं) एलइज्जं वीरीयं धम्मो मग्गो समोसरणं जंमइअं, से तं आयाणपएणं ।*

**वृ.** गौणादिनाम्नामेव स्वरूपनिर्णयार्थमाह-'से किं तु गुण्णे'इत्यादि, गुणैर्निष्पन्नं गौणं, यथार्थमित्यर्थः, तच्चानेकप्रकारं, तत्र क्षमत इति श्रमण इत्येतत् क्षमालक्षणेन गुणेन निष्पन्नं, तथा तपतीति तपन इत्येतत्तपनलक्षणेन गुणेन निर्वृत्तम्, एवं ज्वलतीति ज्वलन इतीदं ज्वलनगुणेन संभूतमित्येवमन्यदपि भावनीयम् १ । 'से किं तं नोगुण्णे'इत्यादि, गुणनिष्पन्नं यन्न भवति तन्नोगौणम्-अयथार्थमित्यर्थः-'अंकुते संकुते'इत्यादि, अविद्यमानकुन्ताख्यप्रहरणविशेष एव सकुन्ततत्तति पक्षी प्रोच्यत इत्ययथार्थता, एवमविद्यमानमुद्गोऽपि कर्पूराद्याधारविशेषः समुद्गः, अंगुल्याभरणविशेषमुद्रारहितोऽपि समुद्रो-अजलराशिः 'अलालं पलालं' ति इह प्रकृष्टा लाला यत्र तत्प्रलालं वस्तु प्राकृते पलालमुच्यते, यत्र तु पलालाभावस्तत्कथं तृणविशेषरूपं पलालमुच्यत इति, प्राकृतशैलीमङ्गीकृत्यात्रायथार्थता मन्तव्या, संस्कृते तु तृणविशेषरूपं पलालं निर्व्युत्पत्तिकमेवोच्यते इति न यथार्थायथार्थचिन्ता संभवति, 'अउलिया सउलिय'त्ति अत्रापि कुलकाभिः सह वर्तमानैव प्राकृते सउलियत्ति भण्यते, या तु कुलिकारहितैव पक्षिणी सा कथं सउलियत्ति ?, इत्येवमिहापि प्राकृतशैलीमेवाङ्गीकृत्यायथार्थता, संस्कृते तु शकुनिकैव साऽभिधीयत इति कुतस्तच्चिन्तासम्भवः ?, इत्येवमन्यत्राऽप्यविरोधतः सुधिया भावना कार्या, पलं-मांसमनश्नन्नपि पलाश इत्यादि तु सुगमं, नवरं मातृवाहकादयो विकलेन्द्रियजीवविशेषाः 'से तं नोगोण्णे'त्ति निगमनम् २ ।

'से किं तं आयाणपएण'मित्यादि, आदीयते-तत्प्रथमतया उच्चारयितुमारभ्यते शास्त्राद्यनेनेत्यादानं तच्च तत्दपं चादानपदं शास्त्रस्याध्ययनोद्देशकादेश्चादिपदमित्यर्थः, तेन हेतुभूतेन किमपि नाम भवति, तच्च 'आवंती'त्यादि, तत्र आवंतीत्याचारस्य पञ्चमाध्ययनं,



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्र ह्यादावेव 'आवन्ती केयावन्ती' त्यालापको विद्यत इत्यादानपदेनैतन्नाम, 'चाउरु गिज्जं'ति एतदुत्तराध्ययनेषु तृतीयमध्ययनं, तत्र चादौ 'चत्तारि परमगांणि, दुल्लहाणीह जंतुणो'इत्यादि विद्यते, 'असंखयं' इदमप्युत्तराध्ययनेष्वेव चतुर्थमध्ययनं, तत्र च आदावेव 'असंखयं जीविय मा पमायए' इत्येतत्पदमस्ति, ततस्तेनेदं नाम, एवमन्यान्यपि कानिचिदुत्तराध्ययनान्तर्वर्तीन्य-ध्ययनानि कानिचित्तु दशवैकालिकसूयगडाद्यध्ययनानि स्वधिया भावनीयानि ३।

*मू. ( २३५ ) से किं तं पडिवक्खपएणं ?, २ नवेसु गामागरणगरखेडकब्बडमडंबदोणमुह-पट्टनामससंवाहन्निवेसेसु संनिविस्समानेसु असिवा सिवा अग्गी सीअलो विसं महुरं कल्लालघरेसु अंबिलं साउअं जे रत्तए से अलत्तए जे लाउए से अलाउए जे सुंभए से कुसुंभए आलवंते विवलीअभासए, से तं पडिवक्खपएणं।*

*से किं तं पाहन्नयाए ?, असोगवने सत्तवन्नवने चंपगवने चूअवने नागवने पुन्नागवने उच्छुवने दक्खवने सालिवने, से तकपाहन्नयाए।*

*से किं तं अनाइसिद्धंतेणं ?, धम्मत्थिकाए अधम्मत्थिकाए आगसत्थिकाए जीवत्थिकाए पुग्गलत्थिकाए अद्धासमए, से तं अनाइगसिद्धंतेणं। से किं तं नामेणं ?, २ पिउपिआमहस्स नामेणं उन्नामिज्जइ (ए), से तं नामेणं।*

*से किं तं अवयवेणं ?, २-*

**वृ.** विवक्षितस्तुधर्मस्य विपरीतो धर्मो विपक्षस्तद्वाचकं पदं विपक्षपदं तन्निष्पन्नं भवति, यथा शृगाली अशिवाऽप्यमाङ्गलिकशब्दपरिहारार्थं शीवा भण्यते, किं सर्वदा ?, नेत्याह-'नवेसु'इत्यादि, तत्र ग्रसते बुद्ध्यादीन्, गुणानिति ग्रामः-प्रतीतः, आकरो-लोहाद्युत्पत्तिस्थानं, नगरं-कररहितं, खेटं-धूलीयमयप्रकारोपेतं, कर्बटं-कुनगरं, मडम्बं-सर्वतो दूरवर्तिसन्नि-वुशान्तरं, द्रोणमुखं-जलपथस्थलपथोपेतं, पत्तनं-नानादेशागतपणययस्थानं, तच्च द्विधा-जलपत्तनं स्थलपत्तनं च , रत्नभूमिरित्यन्ते, आश्रमः-तापसादिस्थानं, सम्बाधः-अतिबहु-प्रकारलोकसङ्कीर्णस्थानविशेषः, सन्निवेशो-घोषादिरथवा ग्रामादीनां द्वन्द्वे ते च ते सन्निवेशा-श्चेत्येवं योज्यते, ततस्तेषु ग्रामादिषु नूतनेषु निवेश्यमानेष्वशिवापि सा मङ्गलार्थं शिवेत्युच्यते, अन्यदा त्वनियमः, तथा कोऽपि कदाचित्केनापि कारणवेशनाग्निः शीतो विषं मधुरमित्याद्याचष्टे, तथा कल्पपालगृहेषु किलाम्लशब्दे समुच्चारिते सुरा विनश्यति अतोऽनिष्टशब्दपरिहारार्थमम्लं स्वादूच्यते, तदेवमेतानि शिवादीनि विशेषविषयाणि दर्शितानि, साम्प्रतं त्वविशेषतो यानि सर्वदा प्रवर्तन्ते तान्याह-

'जो अलत्तए'इत्यादि, यो रक्तो लाक्षारसेन प्राकृतशैल्या कन्प्रत्ययः, स एव रश्रुतेर्लश्रुत्या अलक्तक उच्यते, तथा यदेव लाति-आदत्ते धरति प्रक्षिप्तं जलादि वस्तु इति निरुक्छतेर्लाबु तदेव अलाबु तुम्बकमभिधीयते, य एव च सुम्भकः शुभवर्णकारी स एव कुसुम्भकः, 'आलवंते'त्ति आलपन्-अत्यर्थं लपन्नसमञ्जसमिति गम्यते, स किमित्याह-'विवलीय-भासए'त्ति भाषकाद् विपरीतो विपरीतभाषक इति, राजदन्तादिवत् समासः, अभाषक इत्यर्थः, तथाहि सुबह्वसम्बद्धं प्रलपन्तं कञ्चिद् दृष्ट्वा लोके वक्तारो भवन्ति, अभाषक एवायं द्रष्टव्यो-ऽसारवचनत्वादिति, प्रतिपक्षनामता यथायोगं सर्वत्र भावनीया, ननु च नोगौणादिदं न भिद्यते

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति चेत्, नैतदेवं, तस्य कुन्तादिप्रवृत्तिनिमित्ताभावनमात्रेणैवोक्तत्वाद्, अस्य तु प्रतिपक्षधर्म-वाचकत्वसापेक्षत्वादिति विशेषः ४।

'से किं तं पाहण्णयाए'इत्यादि, प्रधानस्य भावः प्रधानता तया किमपि नाम भवति, यथा बहुष्वशोकवृक्षेषु स्तोकेष्वाम्रादि पादपेष्वशोकप्रधाननंवनमशोकवनमिति नाम, सप्तपर्णाः-सप्तच्छदास्तत्प्रधानं वनं सप्तवर्णवनमित्यादि सुगमं, नवरमात्रप्याह-ननु गुणनिष्पन्नादिदं न भिद्यते, नैवं, तत्र क्षमादिगुणेन क्षमणादिशब्दवाच्यस्यार्थस्य सामस्त्येन व्याप्तत्वादत्र त्वशोकादिभिरशोकवनादिशब्दवाच्यानां वनानां सामस्त्येन व्याप्तेरभावावदिति भेदः ५। 'से किं तं अनाइसिद्धंतेण'मित्यादि, अमनं अन्तो-वाच्यवाचकरूपतया परिच्छेदोऽनादिसिद्ध-श्चासावन्तश्चानादिसिद्धान्तस्तेन, अनादिकालादारभ्येदं वाचकमिदं तु वाच्यमित्येवं सिद्धः-प्रतिष्ठितो योऽसावन्तः-परिच्छेदस्तेन किमपि नाम भवतीत्यर्थः, तच्च प्राग्व्याख्यातार्थं धर्मास्तिकायादि, एतेषां न नाम्नामभिधेयं धर्मास्तिकायादिवस्तु न कदाचिदन्यथात्वं प्रतिपद्यते, गौणनाम्नस्तु प्रदीपादेरभिधेयं दीपकलिकादि परित्यजत्यपि स्वरूपमित्येतावता गौणनाम्नः, पृथगेतदुक्तमिति ६। 'से किं तं नामेन'मित्यादि, नाम-पितृपितामहादर्वाकमभिधानं तेन हेतुभूतेन पुत्रपौत्रादिनाम भवति, किं पुनस्तदित्याह-'पिउपिआमहस्स नामेणं उन्नामिए'त्ति पिता च पितामहश्च तयोः समाहारस्तस्य, अथवा पितुः पितामहः पितृपितामहस्तस्य वाचकेन बन्धुदत्तादिनाम्ना यः पुत्रादिरुन्नामित-उत्क्षिप्तः प्रसिद्धिं गत इतियावत् स एव नामतद्वतोरभेदो-पचारान्नाम्ना हेतुभूतेन नामोच्यते इत्यर्थः, पित्रादेर्यद्बन्धुदत्तादिनामासीत्तत्पुत्रादेरपि तदेव विधीयमानं नाम्ना नामोच्यत इति तात्पर्यम्, से तं नामेण ७।

'से किं तं अवयवेण'मित्यादि, अवयवोऽवयविन एकदेशस्तेन नाम यथा

*मू.( २३६ )* *सिंगी सिही विसाणी दाडी पक्खी खुरी नही वाली।*
*दुपय चउप्पय बहुपया नंगुली केसरी कउही॥*

**वृ.** 'सिंगी सिही'त्यादिगाथा, शृङ्गमस्यास्तीति शृङ्गीत्यादीन्यवयवप्रधानानि सर्वाण्यभि सुगमानि, नवरं द्विपद-स्त्र्यादि चतुष्पदं-गवादि बहुपदं-कर्णशृगाल्यादि, अत्रापि पादलक्षणा-वयवप्रधानता भावनीया, 'कउहि'त्ति ककुदं-स्कन्धासन्नोन्नतदेहावयलक्षणमस्यास्तीति ककुदी-वृषभ इति,

*मू.( २३७ )* *परिअरबंधेन भडं जानिज्जा महिलिअं निवसनेनं।*
*सित्थेण दोणवायं कविं च इक्काए गाहाए॥ (से तं अवयवेणं)*

**वृ.** 'परियर'गाहा परिकरबन्धेन-विशिष्टनेपथ्यरचनालक्षणेन भटं-शूरपुरुषं जानीयात-लक्षयेत्, तथा निवसनेन-विशिष्टरचनारचितपरिधानलक्षणेन महिलां-स्त्रीं, जानीयादिति सर्वत्र सम्बध्यते, धान्यद्रोणस्य पाकः-स्विन्नतारूपस्तं च तन्मध्याद्गृहीत्वा निरीक्षितेनैकेन सिक्थेन जानीयाद्, एकया च गाथया लालित्यादिकाव्यधर्मोपेतया श्रुतया कविं जानीयाद्, अयमत्रा-भिप्रायो-यदा स नेपथ्यपुरुषाद्यवयवरूपपरिकरबन्धादिदर्शनद्वारेण भटमहिलापाकक-विशब्दप्रयोगं करोति तदा भटादीन्यपि नामान्यवयवप्रधानतया प्रवृत्तत्वादवयवनामान्युच्यन्त इति इह तदुपन्यास इति।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इदं चावयवप्रधानतया प्रवृत्तत्वात् सामान्यरूपतयाऽप्रवृत्तात्वाद्गौणनाम्नो भिद्यत इति ८।

*मू.( २३८ ) से किं तं संजोएणं ?, संजोगो चउव्विहे पन्नत्ते, तंजहा-दव्वसंजोगे खेत्तसंजोगे कालसंजोगे भावसंजोगे। से किं तं दव्वसंजोगे ?, २ तिविहे पन्नत्ते, तंजहा-सचित्ते अचित्ते मीसए। से किं तं सचित्ते ?, २ गोहिं गोमिए महिसीहिं महिसए ऊरणीहिं ऊरणीए उट्टीहिं उट्टीवाले, से तं सचित्ते। से किं तं अचित्ते ?, २ छत्तेण छत्ती दंडेन दंडी पडेण पडी घडेण घडी कडेण कडी, से तं अचित्ते। से किं तं मसीए ?, २ हलेण हालिए सगडेणं सागडिए रहेणं रहिए नावाए नाविए, से तं मिसए से तं दव्वसंजोगे।*

*से किं तं खेत्तसंजोगो ?, २ भारेह एरवए हेमवए एरन्नवए हरिवासए रम्मगवासए देवकुरुए उत्तरकुरुए पुव्वविदेहए अवरविदेहए, अहवा मागए मालवए सोरट्ठए माहरट्ठए कुंकणए, से तं खेत्तसंजोगे।*

*से किं तं कालसंजोगे ?, २ सुसमसुसमाए सुसमाए सुसमदुसमाए दूसमसुसमाए दूसमदूसमाए, अहवा पावसए वासारत्तए सरदए हेमतंए वसंतए गिम्हए, से तं कालसंजोगे।*

*से किं तं भावसंजोगे ?, २ दुविहे पन्नत्ते, तंजहा-पसत्थे अ अपसत्थे अ, से किं तं पसत्थे ?, २ नाणेणं नाणी दंसणेणं दंसणी चरित्तेणं चरित्ती, से तं पसंत्थे, से किं तं अपसत्थे ?, २ कोहेणं कोही मानेनं मानी मायाए मायी लोहेणं लोही, से तं अपसत्थे, से तं भावसंजोगे, से तं संजोएणं।*

**वृ.**संयोगः-सम्बन्धः, स चतुर्विधः प्रज्ञप्तः, तद्यथा-द्रव्यसंयोग इत्यादि, सर्वं सूत्रसिद्धमेव, नवरं-सचित्तद्रव्यसंयोगेन गावोऽस्य सन्तीति गोमानित्यादि, अचित्तद्रव्यसंयोगेन छत्रमस्यास्तीति छत्रीत्यादि, मिश्रद्रव्यसंयोगेन हलेन व्यवहरतीति हालिक इत्यादि, अत्र हलादीनामचेतत्वाद् बलवर्द्धानां सचेतनत्वान्मिश्रद्रव्यता भावनीया, क्षेत्रसंयोगाधिकार भरते जातो भरते वाऽस्य निवास इति 'तत्र जातः' 'सोऽस्य निवास' इति वाऽण्प्रत्यये भारतः, एवं शेषेष्वपि भावना कार्य, कालसंयोगाधिकारे सुषमसुषमायां जात इति 'सप्तमी पञ्चम्यन्ते जनेर्डः' इति डप्रत्यये सुषमसुषमजः एवं सुषमजादिष्वपि भावनीयं, भावसंयोगाधिकारे भावः-पर्यायः, स च द्विधा-प्रशस्तो ज्ञानादिरप्रशस्तश्च क्रोधादिः, शेषं सुगमम्, इदमपि संयोगप्रधानतया प्रवृत्तत्वाद् गौणादिभद्यत इति ९॥

*मू.( २३८ ) से किं ते पमाणेनं ?, २ चउव्विहे पन्नत्ते, तंजहा-नामप्पाणे ठवणप्पमाणे दव्वप्पमाणे भावप्पमाणे। से किं ते नामप्पमाणे ?, २ जस्स णं जीवस्स वा अजीवस्स वा जीवाण वा अजीवाण वा तदुभयस्स वा तदुभयाण वा पमाणेत्ति नामं कज्जइ से तं नामप्पमाणे।*

**वृ.** अत्रोत्तरं-'पमाणे चउव्विहे' इत्यादि, प्रमीयते-परिच्छिद्यते वस्तु निश्चीयतेऽनेनेति प्रमाणं नामस्थापनाद्रव्यभावस्वरूपं चतुर्विधम्। अथ किं तन्नामप्रमाणं ?, नामैव वस्तुपरिच्छेदहेतुत्वात् प्रमाणं नामप्रमाणं, तेन हेतुभूतेन किं नाम भवतीति प्रश्नाभिप्रायः, एवमन्यत्रापि भावनीयम्, अत्रोत्तरमुच्यते-यस्य जीवस्य वा अजीवस्य वा जीवानां वा अजीवानां वा तदुभयस्य वा तदुभयानां वा यत्प्रमाणमिति नाम क्रियते तन्नामप्रमाणं, न तत्स्थापनाद्रव्यभावहेतुकं, अपि तु नाममात्रविरचनमेव तत्र हेतुरिति तात्पर्यम्।

*मू.( २३८ ) से किं तं ठवणप्पमाणे ?, २ सत्तविहे पन्नत्ते, तंजहा-*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. ( २३९ ) नक्खत्तदेवयकुले पासंडगणे अ जीविआहेउं।
आभिप्पाइअनामे ठवणानामं तु सत्तविहं ॥

मू. ( २४० ) से किं तं नक्खत्तनामे ?, २ कित्तिआहिं जाए कित्तिए कित्तिआदिन्ने कित्तिआधम्मे कित्तिआसम्मे कित्ति आदेवे कित्ति आदासे कित्तिआसेणे कित्तिआरक्खिए रोहिणीहिं जाए रोहिणिए रोहिणिदिन्ने रोहिणिधम्मे रोहिणिसम्मे रोहिणिदेवे रोहिणिदासे रोहिणिसेने रोहिणिरक्खिए य, एवं सव्वनक्खत्तेसु नामा भाणिअव्वा एत्थं संगहणिगाहाओ।

मू. ( २४१ ) कित्तिअरोहिणिमिगसिरअद्दा य पुनव्वसू अ पुस्से अ।
तत्तो अ अस्सिलेसा महा उ दो फग्गुनीओ अ ॥

मू. ( २४२ ) हत्थो चित्ता साती विसाहा तह य होइ अनुराहा।
जेट्ठा मूला पुव्वासाढा तह उत्तरा चेव ॥

मू. ( २४३ ) अभिई सवण धनिट्ठाअ सतभिसदा दो अ होंति भद्दवया।
रेवई अस्सिणी भरणी एसा नक्खत्तपरिवाडी ॥

मू. ( २४४ ) से तं नक्खत्तनामे। से किं तं देवयानामे ?, २ अग्गिदेवयाहिं जाए अग्गिए अग्गिदिन्ने अग्गिसम्मे अग्गिधम्मे अग्गिदेवे अग्गिदासे अग्गिसेने अग्गिरक्खिए, एवं सव्वनक्खत्तदेवयानामा भाणिअव्वा। एत्थंपि संगहणिगाहाओ-

मू. ( २४५ ) अग्गि पयावइ सोमे रुद्दो अदिती विहस्सई सप्पे।
पिति भग अज्जम सविआ तट्ठा वाऊ अ इंदग्गी ॥

मू. ( २४६ ) मित्तो इंदो निरई आऊ विस्सो अ बंभ विण्हूआ।
वसु वरुण अय विवद्धि पूसे आसे जमे चेव ॥

वृ. अथ किं तत्स्थापनाप्रमाणं ?, 'स्थापनाप्रमाणं सप्तविध'मित्यादि, 'नक्खत्त'गाहा, इदमत्र हृदयं-नक्षत्रदेवताकुलपाषण्डगणादीनि वस्तून्याश्रित्य यत्कस्यचित्रामस्थापनं क्रियते सेह स्थापना गृह्यते, न पुनः 'यत्तु तदर्थवियुक्तं तदभिप्रायेण यच्च तत्करणी'त्यादिना पूर्वं परिभाषितस्वरूपा, सैव प्रमाणं, तेन हेतुभूतेन नाम सप्तविधं भवति, तत्र नक्षत्राण्याश्रित्य यन्नाम स्थाप्यते तद्दर्शयति-कृत्तिकासु जातः कार्तिकः कृत्तिकाभिर्दत्तः कृत्तिकादत्त एवं कृत्तिकाधर्मः कृत्तिकाशर्मः कृत्तिकादेवः कृत्तिकादासः कृत्तिकासेनः कृत्तिकारक्षीतः एवमन्यान्यपि रौहिण्यादिसप्तविंशतिनक्षत्राण्याश्रित्य नामस्थापना द्रष्टव्या, तत्र सर्वनक्षत्रसंग्रहार्थं, कत्तियारोहिणी'त्यादि गाथात्रयं सुगमं, नवरमभीचिनक्षत्रेण सह पठ्यमानेषु नक्षत्रेषु कृत्तिकादिरेव क्रम इत्यश्विन्यादिकममुत्सृज्येत्थमेव पठितवानिति, एषां चाष्टाविंशतिनक्षत्राणामधिष्ठातारः क्रमेणाग्न्यादयोऽष्टाविंशतिरेवदेवताविशेषा भवन्त्यः कृत्तिकादिनक्षत्रजातस्य कश्चिदिच्छादिवशतस्तधिष्ठातृदेवता एवाश्रित्य नामस्थापनं विधत्त इत्येतद्दर्शनार्थमाह-

मू. ( २४७ ) से तं देवयानामे। से किं तं कुलनामे ?, २ उग्गे भोगे रायण्णे खत्तिए इक्खागे नाते कोरव्वे, से तं कुलनामे। से किं तं पासंडनामे ?, २ 'समणे य पंडुरंगे भिक्खू कावालिए अ तावसए। परिवायगे, से तं पासंडनामे। से किं तं गणनामे ?, २ मल्ले मल्लदिन्ने मल्लधम्मे मल्लसम्मे मल्लदेवे मल्लदासे मल्लसेने मल्लरक्खिए, से तं गणनामे। से किं तं जीवियनामे ?, २

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*अवकरए उक्कुरुडए उज्झिअए कज्जवए सुप्पए, से तं जीवियनामे। से किं तं आभिप्पाइअ-नामे ?, अंबए निंबए बकुलए पलासए सिणए पिलूए करीरए, से तं आभिप्पाइअनामे। से तं ठवणप्पमाणे।*

**वृ.** 'से किं तं देवयानामे'इत्यादि, अग्निदेवतासु जातः आग्निकः एवमग्निदत्तादीन्यपि, नक्षत्रदेवतानां संग्रहार्थम् 'अग्गी'त्यादि गाथाद्वयं, तत्र कृत्तिकानक्षत्रस्याधिष्ठाता अग्निः, रोहिण्याः प्रजापतिः, एवं मृगशिरःपभृतीनां क्रमेण सोमो रुद्रः अदितिः बृहस्पतिः सर्पः पितृ भगः अर्यमा सविता त्वष्टा वायुः इन्द्राग्निः मित्रः इन्द्रः निर्ऋतिः अम्भः विश्वः ब्रह्मा विष्णुः वसुः वरुणः अजः विवर्द्धिः अस्य स्थानेऽन्यत्र अहिर्बुध्नः पठ्यते पूषा अश्वः यमश्चैवेति, 'से तं देवतानामे'।

'से किं तं कुलनामे'इत्यादि, यो यस्मिन्नुग्रादिकुले जातस्तस्य तदेवोग्रादि कुलनाम स्थाप्यमानं कुलस्थापनानामोच्यत इति भावार्थः। 'से किं तं पासंडनामे'इत्यादि, इह येन यत्पाषण्डमाश्रितं तस्य तन्नाम स्थाप्यमानं पाषण्डस्थापनानामाभिधीयते, तत्र 'निग्गंथसक्क-तावसगेरुयआजीव पंचहा समणा' इति वचनान्निर्ग्रन्थादिपञ्चपाषण्डान्याश्रित्य श्रमण उच्यते, एवं नैयायिकादिपाषण्डमाश्रिताः पाण्डुराङ्गादयो भावनीयाः नवरं भिक्षुर्बुद्धदर्शनाश्रितः।

'से किं तं गणनामे'इत्यादि, इह मल्लादयो गणाः, तत्र यो यस्मिन् गणे वर्तते तस्य तन्नाम गणस्थापनानामोच्यते इति, मल्ले मल्लदिण्णे इत्यादि। 'से किं तं जीवियाहेउ' मित्यादि, इह यस्या जातमात्रमपत्यं म्रियते सा लोकस्थितिवैचित्र्याज्जातमात्रमपि किञ्चिदपत्यंजीवननि-मित्तवकारदिष्वस्यति, तस्य चावकरकः उत्कुरुटक इत्यादि यन्नाम क्रियते तज्जीविकाहेतोः स्थापनानामाख्यायते, 'सुप्पए'त्ति यः सूर्पे कृत्वा त्यज्यते तस्य सूर्पक एव नाम स्थाप्यते, शेषं प्रतीतम्! 'से किं तं आभिप्पाइयनामे' इत्यादि, इह यत् वृक्षादिषु प्रसिद्धं अम्बको निम्बक इत्यादि नाम देशरूढ्य स्वाभिप्रायानुरोधतो गुणनिरपेक्षं पुरुषेषु व्यवस्थाप्यते तदाभिप्रायिकं स्थापनानामेति भावार्थः।

तदेतत् स्थापनाप्रमाणनिष्पन्नं सप्तविधं नामेति।

*मू. ( २४७ वर्तते ) से किं तं दव्वप्पमाणे ?, २ छव्विहे पन्नत्ते, तंजहा-धम्मत्थिकाए जाव अद्धासमए, से तं दव्वप्पमाणे।*

**वृ.** अयमत्र भावार्थः-धर्मास्तिकायोऽधर्मास्तिकाय इत्यादीनि षड् द्रव्यविषयाणि नामानि द्रव्यमेव प्रमाणं तेन निष्पन्नानि द्रव्यप्रमाणनामानि, धर्मास्तिकायादिद्रव्यं विहाय न कदाच्चिदन्यत्र वर्तन्त इति तद्धेतुकान्युच्यन्त इति तात्पर्यम्। अनादिसिद्धान्तनामत्वेनैवैतानि प्रागुक्तानीति चेद्, उच्यतां, को दोषः ?, अनन्तधर्मात्मके वस्तुनि तत्तद्धर्मापेक्षयाऽनेकव्य पदेशताया अदुष्टत्वाद्, एवमन्यत्रापि यथासम्भवं वाच्यमिति।

*मू. ( २४७ वर्तते ) से किं भावप्पमाणे ?, २ चउव्विहे पन्नत्ते, तंजहा-सामासिए तद्धिए धाउए निरुत्तिए। से किं तं सामासिए ?, २ सत्त समासा भवंति, तंजहा-*

**वृ.** भावो-युक्तार्थत्वादिको गुणः, स एव तद्द्वारेण वस्तुनः परिच्छिद्यमानत्वात् प्रमाणं तेन निष्पन्नं-तदाश्रयेण निर्वृत्तं नाम सामासिकादि चतुर्विधं भवतीत्यत्र परमार्थः। तत्र 'से किं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तं सामासिए' इत्यादि,

*मू. ( २४८ )* *दंदे अ बहुव्वीही, कम्मधारय दिग्गु अ ।*
*तप्पुरिस अव्वईभावे, एक्कसेसे अ सत्तमे ॥*

*मू. ( २४९ ) से किं तं दंदे ?, दंताश्च च ओष्ठौच दंतोष्ठं, स्तनौ च उदरं च स्तनोदरं, वस्त्रंच पात्रं च वस्त्रपात्रम्, अश्वाश्च महिषाश्च अश्वमहिषम्, अहिश्च नकुलश्च अहिनकुलं, से तं दंदे समासे ।*

*से किं त बहुव्वीहीसमासे ?, २ फुल्ला इमंमि गिरिंमि कुडयकयंबा सो इमो गिरी फुल्लिय-कुडयकयंबो, से तं बहुव्वीहीसमासे । से किं तं कम्मधारए ?, २ धवलो वसहो धवलवसहो, किण्हो मियो किण्हमियो, सेतो पडो सेतपडो, रत्तो पडो रत्तपडो, से तं कम्मधारए ।*

*से किं तं दिगुसमासे ?, २ तिन्नि कडुगाणि तिकडुगं, तिन्नि महुराणि तिमहुरं, तिन्नि गुणानि तिगुणं, तिन्नि पुराणि तिपुरं, तिन्नि सराणि तिसरं, तिन्नि पुक्खराणि तिपुक्खरं, तिन्नि बिंदुआणि तिबिंदुअं, तिन्नि पहाणि तिपहं, पंच नईओ पंचनयं, सत्त गया सत्तगयं, नव तुरंगा नवतुरंगं, दस गामा दसगामं, दस पुराणि दसपुरं, से तं दिगुसमासे ।*

*से किं तं तत्पुरिसे ?, २ तित्थे कागो तित्थकागो, वने हत्थी वनहत्थी, वने वराहो वनवराहो, वने महिसो वनमहिसो, वने मयूरो वनमयूरो, से तं तप्पुरिसे ।*

*से किं तं अव्वईभावे ?, २ अनुगामं अनुनइयं अनुफरिहं अनुचरिअं, से तं अव्वईभावे समासे ।*

*से किं तं एगसेसे ?, २ जहा एगो पुरिसो तहा बहवे पुरिसा जहा बहवे पुरिसा तहा एगो पुरिसो, जहा एगो करिसावणो तहा बहवे करिसावणा जहा बहवे करिसावणा तहा एगो करिसावणो, जहा एगो साली तहा बहवे साली जहा बहवे तहा एगो साली, से तं एगसेसे समासे । से तं सामासिए ।*

**वृ.** द्वयोर्बहूनां वा पदानां समसनंसंमीलनं समासस्तेन निर्वृत्तं सामासिकं, सामासाश्च द्वन्द्वादयः सप्त, तत्र समुच्चयप्रधानो द्वन्द्वः, दन्ताश्चौष्ठौ च दन्तोष्ठं, स्तनौ च स्तनोदरमिति, प्राण्यङ्गत्वात् समाहारः, वस्त्रपात्रमित्यादौ त्वप्राणिजातित्वादश्वमहिषमित्यादौ पुनः शाश्वतिकवैरित्याद् एवमन्यान्यप्युदाहरणानि भावनीयानि, अन्यपदार्थप्रधानो बहुव्रीहिः पुष्पिताः कुटजकदम्बा यस्मिन् गिरौ सोऽयं गिरिः पुष्पितकुटजकदम्बः तत्पुरुषः समानाधिकरणः कर्मधारयः, स च धवलश्चासौ वृषभश्च धवलवृषभ इत्यादि, सङ्ख्यापूर्वो द्विगुः-त्रीणि कटुकानि समाहृतानि त्रिकटुकम्, एवं त्रीणि मधुराणि समाहृतानि त्रिमधुरं, पात्रादिगणे दर्शनदिह पञ्चपूलीत्यादिवत् स्त्रियामीप्रत्ययो न भवति, एवं शेषाण्यप्युदाहरणानि भावनीयानि, द्वितीयादिविभक्त्यन्तपदानां समासस्तत्पुरुषः, तत्र तीर्थे काक इवास्ते तीर्थकाकः ध्वाङ्क्षेण क्षेप' (कातं०) इति सप्तमीतत्पुरुषः, शेष प्रतीतं, पूर्वपदार्थप्रधानोऽव्ययीभावः, तत्र ग्रामस्य अनु-समीपेन मध्येन वाऽशनिर्गता अनुग्रामम्, एवं नद्याः समीपेन मध्येन वा निर्गता अनुनदीत्याद्यपि भावनीयं, 'सरूपाणामेकशेष एकविभक्ता' वित्यनेन सूत्रेण समानरूपाणामेकविभक्तियुक्तानां पदानामेकशेषः समासो भवति, सति समासे एकः शिष्यतेऽन्ये तु लुप्यन्ते, यश्च शेषोऽवतिष्ठते स आत्मार्थे लुप्तस्य लुप्तयोलुप्तानां चार्थे वर्तते, अथ एकस्य लुप्तस्यात्मनश्चार्थे वर्तमानात्तस्यात्, द्विवचनं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भवति, यथा पुरुषश्च पुरुषश्चेति पुरुषौ, द्वयोश्च लुप्तयोरात्मनश्चार्थे वर्तमानाद्बहुवचनं यथा पुरुषश्च ३ पुरुषाः, एवं बहूना लुप्तानामात्मनश्चार्थे वर्तमानादपि बहुवचनं यथा पुरुषश्च ४ पुरुषा इति, जातिविवक्षायां तु सर्वत्रैकवचनमपि भावनीयम्।

अतः सूत्रमनुश्रीयते-'जहा एगो पुरिसो'त्ति यथैकः पुरुषः, एकवचनान्तः पुरुषशब्द इत्यर्थः, एकशेषे समासे इति बह्वर्थवाचक इति शेषः, 'तहा बहवे पुरिस'त्ति तथा बहवः पुरुषाः, बहुवचनान्तः पुरुषशब्द इत्यर्थः, एकशेषे समासे सति बह्वर्थवाचक इति शेषः, यथा चैकशेषे समासे बहुवचनान्तः पुरुषशब्दो बह्वर्थवाचकस्तथैकवचनान्तोऽपीति न कश्चिद्विशेषः, एतदुक्तं भवति-यथा पुरुषश्च ३ इति विधाय एकपुरुषशब्दशेषता क्रियते तदा यथैकवचनान्तः पुरुषशब्दो बह्वर्थान् वक्ति तथा बहुवचनान्तोऽपि, यथा बहुवचनान्तस्तथैकवचनान्तोऽपीति न कश्चिदेकवचनान्तबहुवचनान्तयोर्विशेषः, केवलं जातिविवक्षायामेकवचनं बह्वर्थविवक्षायां तु बहुवचनमिति। एवं कार्षापणशाल्यादिष्वपि भावनीयम्।

अयं च समासो द्वन्द्वविशेष एवोच्यते, केवलमेकशेषताऽत्र विधीयते इत्येतावता पृथगुपात्त इति लक्ष्यते, तत्त्वं तु सकलव्याकरणवेदिनो विदन्तीत्यलमतिविजृम्भितेन, गतं सामासिकम्।

मू. ( २४९ ) से किं तं तद्धितए ?, २ अट्ठवीहे पन्नत्ते, तंजहा-

वृ. तद्धिताज्जातं तद्धितजम्, इह तद्धितशब्देन तद्धितप्राप्तिहेतुभूतोऽर्थो गृह्यते, ततो यत्रापि तुन्नाए तंतुवाए तद्धितप्रत्ययो न दृश्यते तत्रापि तद्धेतभूतार्थस्य विद्यमानत्वात्तद्धितजत्वं सिद्धं भवति।

मू. ( २५० ) कम्मे सिप्पसिलोए संजोगसमीअवो अ संजूहो।
इस्सरिअ अवच्चेण य तद्धितनामं तं अट्ठविहे॥

वृ. 'कम्मे'गाहा पाठसिद्धा, नवरं श्लोकः-श्लाघा संयूथो-ग्रन्थरचना,

मू. ( २५१ ) *से किं तं कम्मनामे ?, २ तणहारए कट्ठहारए पत्तहारए दोसिए सोत्तिए कप्पासिए भंडवेआलिए कोलालिए, से तं कम्मनामे। से किं तं सिप्पनामे ?, २ तुन्नए तंतुवाए पट्टकारे उएट्टे बरुडे मुंजकारे कट्ठकारे छत्तकारे वज्झकारे पोत्थकारे चित्तकारे दंतकारे लेप्पकारे सेलकारे कोट्टिमकारे, से तं सिप्पनामे।*

*से किं तं सिलोअनामे ?, २ समणे माहणे सव्वातिही, से तं सिलोअनामे। से किं तं संजोगनामे ?, २ रन्नो ससुराए रन्नो जामाउए रन्नो साले रन्नो भाउए रन्नो भगिणीवई, से तं संजोगनामे। से किं तं समीवनामे ?, २ गिरिसमीवे नयरं गिरिनयरं विदिसासमीवे नयरं वेदिसं नयरं बेन्नाए समीवे नयरं बेन्नायडं तगराए समीवे नयरं तगरायडं, से तं समीवनामे।*

*से किं तं संजूहनामे ?, २ तरङ्गवइक्कारे मलयवइक्कारे अत्तानुसट्ठिकारे बिंदुकारे, से तं संजूहनामे। से किं तं ईसरीअनामे ?, २ राईसरे तलवरे माडंबिए कोडुंबिए इब्भे सेट्ठी सत्थवाहे सेनावई, से तं ईसरिअनामे। से किं तं अवच्चनामे ?, २ अरिहंतमाया चक्कवट्टिमाया बलदेवमाया वासुदेवमाया रायमाया मुणिमाया वायगमाया, से तं अवच्चनामे। से तं तद्धितए।*

*से किं तं धाउए ?, २ भू सत्तायां परस्मैभाषा एध वृद्धौ स्पर्द्ध संहर्षे गाधृ प्रतिष्ठालिप्सयोर्ग्रंथे च बाधृ लोडने, से तं धाउए। से किं तं निरुत्तिए ?, २ मह्यां शेते महिषः, भ्रमति च रौति च*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*भ्रमरः मुहुर्मुहुर्लसतीति मुसलं कपेरिव लम्बते त्थेति च करोति कपित्थं चिदितकरोति खल्लं च भवती चिक्खल्लं ऊर्ध्वकर्णः उलूकः मेखस्य माला मेखला, से तं निरुत्तिए।*

*से तं भावपमाणं। से तं पमाणनामे। से तं दसनामे से तं नामे। नामंति पयं समत्तं।*

वृ.एते च कर्मशिल्पादयोऽर्थास्तद्धिततप्रत्ययस्थोत्पित्सोर्निमित्तीभवन्तीत्येतद्भेदात्तद्धितजं नामाष्टविधमुच्यत इति भावः, तत्र कर्म तद्धितजं 'दोसिए सोत्तिए' इत्यादि, दूष्यं पण्यमस्येति दाषिकः, सूत्रं पण्यमस्येति सौत्रिकः, शेषं प्रतीतं, नवरं भाण्डविचारः कर्मास्येति भाण्डवैचारिकः, कौलालानि-मृद्भण्डानि पण्यमस्येति कौलालिकः, अत्र क्वापि 'तणहारए' इत्यादिपाठो दृश्यते, तत्र कश्चिदाह-नन्वत्र तद्धितप्रत्ययो ने कचिदुपलभ्यते तथा वक्ष्यमाणेष्वपि 'तुन्नाए तंतुवाए' इत्यादिषु नायं दृश्यते तत्किमित्येवंभूतनाम्नामिहोपन्यासः ?, अत्रोच्यते, अस्मादेव सूत्रोपन्यासात् तृणानि हरति-वहतीत्यादिकः कश्चिदाद्यव्याकरणदृष्टस्तद्धितोत्पत्तिहेतुभूतोऽर्थो द्रष्टव्यः, ततो यद्यपि साक्षात्तद्धितप्रत्ययो नास्ति तथापि तदुत्पत्तिनिबन्धनभूतमर्थमाश्रित्येह तन्निर्देशो न विरुध्यते, यदि तद्धिततोत्पत्तिहेतुरर्थोऽस्ति तर्हि तद्धितोऽपि कस्मान्नोत्पद्यत इति चेत् ? लोके इत्थमेव रूढत्वादिति ब्रूमः, अथवा अस्मादेवाद्यमुनिप्रणीतसूत्रज्ञापका-देवं जानीयाः-तद्धितप्रत्यया एवामी केचित् प्रतिपत्तव्या इति। अथ शिल्पतद्धितनामोच्यतेवस्त्रिकः, वस्त्र शिल्पमस्येति तन्त्रीवादनं शिल्पमस्येती तान्त्रिकः, तुन्नाए तंतुवाए इत्यादि प्रतीतम्, आक्षेपपरिहारौ उक्तावेव, यच्चेह पूर्वं च क्वचिद्वाचनाविशेषेऽप्रतीतं नाम दृश्यते तद्देशान्तर-रूढितोऽवसेयम्। अथ श्लाघातद्धितनामोच्यते-'समणे'इत्यादि, श्रमणादीनि नामानि श्लाघ्ये-ष्वर्थेषु साध्वादिषु रूढान्यतोऽस्मादेव सूत्रनिबन्धात् श्लाघ्यार्थास्तद्धितास्तदुत्पत्ति-हेतुभूत-मर्थमात्रं वा अत्रापि प्रतिपत्तव्यम्। संयोगतद्धितनाम राज्ञः श्वसुर इत्यादि, अत्र सम्बन्धरूपः संयोगो गम्यते, अत्रापि चास्मादेव ज्ञापकात् तद्धितनामता, चित्रं च पूर्वगतं शब्दप्राभृतमप्रत्यक्षं च नः अतः कथमिह भावनास्वरूपमस्मादृशैः सम्यगवगम्यते-समीतद्धितनाम गिरिसमीपे नगरं गिरिनगरम्, अत्र 'अदूरभवश्चे' त्य न भवति, गिरिनगरमित्येव प्रतीतत्वात्, विदिशाया अदूरभवं नगर वैदिशम्, अत्र त्वदूरभवश्चेण् भवत्येव, इत्थमेव रूढत्वादिति।

संयूथतद्धितनाम 'तरंगवइक्कारए' इत्यादि, तद्धितनामता चेहोत्तरत्र च पूर्ववद्भावनीया। ऐश्वर्यतद्धितनाम-'राईसरे'इत्यादि, इह राजादिशब्दनिबन्धनमैश्वर्यमवगन्तव्यं, राजेश्वरादि-शब्दार्थस्त्विहैव पूर्वं व्याख्यात एव। अपत्यतद्धितनाम- 'तित्थयरमाया'इत्यादि, तीर्थकरोऽपत्यं यस्याः सा तीर्थकरमाता, एवमन्यत्रापि सुप्रसिद्धेनाप्रसिद्धं विशिष्यते, अत एव तीर्थकरादि-भिर्मातरो विशेषिताः, तद्धितनामत्वभावना तथैव, गतं तद्धितनाम।

अथ धातुजमुच्यते-'से किं तं धाउए'इत्यादि, भूरयं परमस्मैपदी धातुः सत्तालक्षणस्यार्थ-स्य वाचकत्वेन धातुजं नाभेति, एवमन्यत्रापि, अभिधानाक्षरानुसारतो निश्चितार्थस्य वचनं-भणनं-निरुक्तं तत्र भवं नैरुक्तं, तच्च मह्यां शेते महिष इत्यादिकं पाठसिद्धमेव, तदेवमुक्तं नैरुक्तं नाम।

तद्भणने चावसितं भावप्रमाणनाम, तदवसाने च समर्थितं प्रमाणनाम तत्समर्थने च समापितं गौणादिकं दशनाम, एतैरपि च दश नामाभिः सर्वस्यापि वस्तुनोऽभिधानद्वारेण संग्रहाद्दशनामेद-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मुच्यते, तत्समाप्तौ च समाप्तमुपक्रमान्तर्गतं द्वितीयं नामद्वारम्, अतः 'से तं निरुत्तिए' इत्यादि पञ्च निगमनानि, नामद्वारं समाप्तम्।

उक्तमुपक्रमान्तर्गतं द्वितयं नामद्वारमथ तदन्तर्गतमेव क्रमप्राप्तं तृतीय प्रमाणद्वारमभिधित्सुराह-

*मू. ( २५२ ) से किं तं पमाणे ?, २ चउव्विहे पन्नत्ते, तंजहा-दव्वपमाणे खेत्तपमाणे कालप्पमाणे भावप्पमाणे।*

**वृ.** 'से किं तं पमाणे' इत्यादि, प्रमीयते-परिच्छिद्यते धान्यद्रव्याद्यनेनेति प्रमाणम्-असतिप्रसृत्यादि, अथवा इदं चेदं च स्वरूपमस्य भवतीत्येवं प्रतिनियमस्वरूपतया प्रत्येकं प्रमीयते-परिच्छिद्यते यत्तत्प्रमाणं-यथोक्छमेव, यदिवा धान्यद्रव्यादेरेव प्रमितिः-परिच्छिदः स्वरूपावगमः प्रमाणम्, अत्र पक्षेऽसतिप्रसृत्यादेस्तद्धेतुत्वात् प्रमाणता, तच्च प्रमाणं द्रव्यादिप्रमेयवशाच्चतुर्विध तद्यथा-द्रव्यविषयं प्रमाणं द्रव्यप्रमाणम्, एवं क्षेत्रकालभावप्रमाणेष्वि वाच्यम्।

*मू. ( २५३ ) से किं दव्वपमाणे ?, २ दुविहे पन्नत्ते, तंजहा-पएसनिप्फन्ने अ विभागनिप्फन्ने अ। से किं तं पएसनिप्फन्ने ?, २ परमाणुपोग्गले दुपएसिए जाव दसपएसिए संखिज्जपएसिए असंखिज्जपएसिए अनंतपएसिए, से तं पएसनिप्फन्ने। से किं तं विभागनिप्फन्ने ?, २ पंचविहे पन्नत्ते, तंजहा-माने उम्माने अवमाने गणिमे पडिमाणे।*

*से किं तं माने ?, २ दुविहे पन्नत्ते, तंजहा-धन्नमानप्पमाणे अ रसमानप्पमाणे अ। से किं तं धन्नमाणपमाणे ?, २ दो असईओ पसई दो पसईओ सेतिया चत्तारि सेइआओ कुलओ चत्तारि कुलया पत्थो चत्तारि पत्थया आढगं चत्तारि आढगाइ दोनो सट्ठि आढयाइं जहन्नए कुंभे असीइ आढयाइं मज्झिमए कुंभे आढयसयं उक्कोसए कुंभे अट्ठ य आढयसइए वाहे, एएणं धन्नमानपमानेनं किं पओअणं ?, एएणं धन्नमानपमानेनं मुत्तोलीमुखइदुरअलिंदओचारासंसियाणं धन्नाणं धन्नमानप्पमाणनिव्वित्तिलक्खणं भवइ, अ से तं धन्नमानपमाणे। से किं तं रसमानप्पमाणे ?, २ धन्नमानप्पमाणाओ चउभागविवड्डिए अब्भिंतरासिहाजुत्ते रसमानप्पमाणे विहिज्जइ, तंजहा-चउसट्ठिआ ४ (चउपलपमाणा) बत्तीसिआ ८ सोलसिआ १६ अट्ठभाइआ ३२ चउभाइआ ६४ अद्धमाणी १२८ माणी २५६ दो चउसट्ठीआओ बत्तीसिआ दो बत्तीसिआओ सोलसिआ दो सोलसिआओ अट्ठभाइआ दो अट्ठभाइआओ चउभाइया दो चउभाइयाओ अद्धमाणी दो अद्धमाणीओ माणी, एएणं रसमानपमाणेणं किं पओअणं ?, २ एएणं रसमानेनं वारकघडककरककलसिअगागरिदइअकरोडिअकुंडिअसंसियाणं रसानं रसमानप्पमाणनिव्वित्तिलक्खणं भवइ, से तं रसमानप्पमाणे, से तं माने।*

**वृ.** तत्र द्रव्यप्रमाणं द्विविधं-प्रदेशनिष्पन्नं विभागनिष्पन्नं च, तत्र प्रद्येशा-एकद्वित्र्याद्यनवस्तैनिष्पन्नं प्रदेशनिष्पन्नं, तत्रैकप्रदेशनिष्पन्नः परमाणुः, द्विप्रदेशनिवृत्तो द्विप्रदेशिकः, प्रदेशत्रयघटितस्त्रिप्रदेशिकः, एवं यावदनन्तैः, प्रदेशैः सम्पन्नोऽनन्तप्रदेशिकः, नन्विदं परमाण्वादिकमनन्तप्रदेशिकस्कन्धपर्यन्तं द्रव्यमेव, ततस्तस्य प्रमेयत्वात् प्रमाणता न युक्तेति चेत्, नैवं, प्रमेयस्यापि द्रव्यादेः प्रमाणतया रूढत्वात्, तथाहि-प्रस्थकादिप्रमाणेन मित्वा पुञ्जीकृतं धान्यादि द्रव्यमालोक्य लोके वक्तारो भवन्ति-प्रस्थकादिरयं पुञ्जीकृतस्तिष्ठतीति,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततश्चैकद्वित्र्यादिप्रदेशनिष्पन्नत्वलक्षणेन स्वस्वरूपेणैव प्रमीयमाणत्वात्परमाण्वादिद्रव्यस्यापि कर्मसाधनाप्रमाणशब्दवाच्यताऽदुष्टैव, करणसाधनपक्षे त्वेकद्वित्र्यादिप्रदेशनिष्पन्नत्वलक्षणं स्वरूपमेव मुख्यतया प्रमाणमुच्यते द्रव्यं तु तत्स्वरूपयोगादुपचारतः, भावसाधनतायां तं प्रमितेः प्रमाणप्रमेयाधीनत्वादुपचारादेव प्रमाणप्रमेययोः प्रमाणताऽवगन्तव्या, तदेवं कर्मसाधनपक्षे परमाण्वादि द्रव्यं मुख्यतया प्रमाणमुच्यते, करणभावसाधनपक्षयोस्तूपचारत इत्यदोषः।

इदं च यथोत्तरमन्यान्यसंख्योपेतैः स्वगतैरेव प्रदेशैर्निष्पन्नत्वात् प्रदेशनिष्पन्नमुक्तं, द्वितीयं तु स्वगतप्रदेशान् विहायापरो विविधो विशिष्टो वा भागो-भङ्गो विकल्पः प्रकार इतियावत्तेन निष्पन्नं विभागनिष्पन्नं, तथाहि-न धान्यमानादेः स्वगतप्रदेशाश्रयणेन स्वरूपं निरूपयिष्यते अति तु 'दो असईओ पसई'त्यादिको यो विशिष्टः प्रकारस्तेनेति।

तच्च पञ्चविधं, तद्यथा-मानम् उन्मानम् अवमानं गणिमं प्रतिमानं, पुनरपि मानप्रमाणं द्विधा-धान्यमानप्रमाणं च रसमानप्रमाणं च, तत्र मानमेव प्रमाणं मानप्रमाणं धान्यविषयं मान-प्रमाणं, तच्च 'दो असईओ'इत्यादि, अश्नुतेतत्प्रभवत्वेन समस्तधान्यमानानि व्याप्नोतीत्य-सतिः-अवाङ्मुखहस्ततलरूपा, तत्परिच्छिन्नं धान्यमपि तथोच्यते, तद्द्वयेन निष्पन्ना नावाका-रताव्यवस्थापितप्राञ्जलकरतलरूपा प्रसृतिः, द्वे च प्रसृति सेतिका, सा च नेह प्रसिद्धा गृह्यते, मागधदेशप्रसिद्धस्यैवात्र मानस्य प्रतिपिपादयिषितत्वाद्, अत इयं तत्प्रसिद्धा काचिदवगन्तव्याः चतस्रः सेतिकाः कुडवः, ते चत्वारः प्रस्थः, अमी चत्वार आढक इत्यादि सूत्रसिद्धमेव, यावदष्ट-भिराढकशतैर्निर्वृत्तो वाहः, अत्राह शिष्यः-एतेनासत्यादिना धान्यमानप्रमाणेन किं प्रयोजनं-किमनेन विधीयते इत्यर्थः, अत्रोत्तरं, एतेन धान्यमानप्रमाणेन 'मुक्तोलीमुखेदूरालिन्दापचार-संश्रितानां' मुक्तोल्याद्याधारगतानां धान्यानां धान्यस्य यन्मानम्-इयत्तालक्षणं तदेव प्रमाणं तस्य निर्वृत्तिः-सिद्धिस्तस्या लक्षणं-परिज्ञानं भवति, एतावदत्र धान्यमस्तीति परिज्ञानं भवती-त्यर्थः, तत्र मुक्तोली-मोट्टा(द्दा)अध उपरि च सङ्कीर्णा मध्ये त्वीषद्विशाला कोष्टिका, सुखं गन्त्र्या उपरि यद्दीयते, सुम्बादिव्यूतं ढञ्चनकादि तदिदूरं, आलिन्दकं-कुण्डुल्कम् अपचारि-दीर्घतरधान्यकोष्ठाकाविशेषः।

रसमानप्रमाणमाह-'से किं त'मित्यादि, रसो-मद्यादिस्तद्विषयं मानमेव प्रमाणं रसमान-प्रमाणं, किमित्याह-धान्यमानप्रमाणात् सेतिकादेश्चतुर्भागविवर्द्धितं-चतुर्भागाधिकम् अभ्यन्तरशिखायुक्तं यद् रसमानं विधीयते-क्रियते तद्रसमानप्रमाणमुच्यते, धान्यस्या-द्रवरूपत्वात्किल शिखा भवति, रसस्य तु द्रवरूपत्वान्न शिखासम्भवोऽतो बहिःशिखाभावात् धान्यामानच्चतुर्भागवृद्धिलक्षणया अभ्यन्तरशिखया युक्तत्वाच्चभ्यन्तरशिखायुक्तमित्युक्तं, तद्यथा-चतुःषष्टिकेत्यादि, इदमुक्तं भवति-षट्पञ्चाशदधिकशतद्वयपलमाना माणिकानाम वक्ष्यमाणं रसमानं, तस्य चतुः-षष्टितमभागनिष्पन्ना अर्थादेव चतुष्पलप्रमाणा चतुःषष्टिका, एवं माणिकाया एव द्वात्रिंशत्तमभागवर्तित्वादष्टपलप्रमाणा द्वात्रिंशिका, तथा माणिकाया एव षोडशभागवर्तित्वात् षोडशपलप्रमाणा षोडशिका, तस्या एवाष्टमभागवर्तित्वात् द्वात्रिंशत्पल-प्रमाणा अष्टभागीका, तस्या एव चतुर्भागवर्तित्वात् चतुःषष्टिपलमाना चतुर्भागीका, तस्या एवार्द्धभागवर्तिनी अष्टाविंशत्यधिकपलशतमानाऽर्द्धमाणिका, इदं च बहुषु वाचनाविशेषेषु

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न दृश्यत एव, षट्पञ्चाशदधीकशतद्वयपलप्रमाणा माणिका, द्वाभ्यां चतुःषष्टिकाभ्यामेका द्वात्रिंशिका भवतीत्यादि गतार्थमेव, यावदेतेन रसमानप्रमाणेन किं प्रयोजनम् ?, अत्रोत्तरम्- 'एतेन' रसमानप्रमाण वारकघटककरकगर्गरीदृतिककरोडिकाकुण्डिकासंश्रितानां रसानां रसस्य यन्मानं तदेव प्रमाणं तस्य निर्वृत्तिः-सिद्धिस्तस्या लक्षणं परिज्ञानं भवति, तत्रातीवविशालमुखा कुण्डिकैव करोडिका उच्यते, शेषं प्रतीतं, क्वचित् 'कलसिए'ति दृश्यते, तत्र लघुतरः कलश एव कलशशिकेत्यभिधीयते एवमन्यदपि वाचनान्तरमभ्यूह्यम्।

'से त'मित्यादि निगमनद्वयम्। अथोन्मानमभिधित्सुराह-

*मू. ( २५३ वर्तते ) से किं तं उम्माने ?, २ जन्नं उम्मिणिज्जइ, तंजहा-अद्धकरिसो करिसो पलं अद्धपलं अद्धतुला तुला अद्धभारो भारो, दो अद्धकरिसा करिसो दो करिसा अद्धपलं दो अद्धपलाइं पलं पंच पलसइआ तुला दस तुलाओ अद्धभारो वीसं तुलाओ भारो, एएणं उम्मानपमाणेणं किं पओअणं ?, एएणं उम्माणपमानेनं पत्ताअगरतगरचोअअकुंकुमखंडगुल-मच्छंडिआईणं दव्वाणं उम्माणपमाणनिव्वित्तिलक्खणं भवइ, से तं उम्मानपमाणे।*

**वृ.** उन्मीयते तदित्युन्मानम् उन्मीयते अनेनेति वा उन्मानमित्यादि, तत्र कर्मसाधनपक्ष-मधिकृत्याह-'जं नं' उम्मिणिज्जई'त्यादि, यदुन्मीयते-प्रतिनियतस्वरूपतया व्यवस्थाप्यते तदुन्मानं, तद्यथा-अर्द्धकर्ष इत्यादि, पलस्याष्टमांशोऽर्द्धकर्षः, तस्यैय चतुर्भागः कर्षः, पलस्यार्द्धं अर्द्धपलमित्यादि, सर्वं मागधदेशप्रसिद्धं सूत्रसिद्धमेव, नवरं पलाशपत्रकर्मारीपत्रादिकं पत्रं, चोयओ फलविशेषः, मत्स्यण्डिका-शर्कराविशेषः। अवमानं विवक्षुराह-

*मू. ( २५३ वर्तते ) से किं तं ओमाणे ?, २ जण्णं ओमिणीज्जइ, तंजहा-हत्थेण वा दंडेण वा धणंकेन वा जुगेण वा नालिआए वा अक्खेण वा मुसलेण वा-*

**वृ.** अवमीयते-परिच्छिद्यते खाताद्यनेनेति अवमानं-हस्तदण्डादि, अथवा अवमीयते-परिच्छिद्यते हस्तादिना यत्तदवमानंखातादि, तत्र कर्मसाधनपक्षमधिकृत्य तावदाह-'जं ण'मित्यादि, यदवमीयते खातादि तदवमानं, केनावमीयते इत्याह-'हत्थेण वा दंडेण वा'इत्यादि, तत्र हस्तो-वक्ष्यमाणस्वरूपश्चतुर्विशत्यंगुलमानः, अनेनैव हस्तेन चतुर्भिर्हस्तैर्निष्पन्ना अवमान-विशेषा दण्डधनुर्युगनालिकाऽक्षमुशलरूपा षट् संज्ञा लभ्यन्ते, अत एवाह-

*मू. ( २५४ ) दंडधनूजुगनालिआ य अक्खमुसलं च चउहत्थं।*
*दसनालिअं च रज्जुं विआण ओमाणसन्नाए॥*

**वृ.** 'दंडं'गाहा, दण्डं धनुर्युगं नालिकां चाक्षं मुशलं च करणसाधनपक्षमङ्गीलकृत्यावमान-संज्ञया विजानीहीति सम्बन्धः, दण्डादिकं प्रत्येकं कथंभूतमित्याह-चतुर्हस्तं दशभिर्नालि-काभिर्निष्पन्नां रज्जुं च विजानीह्यवमानसंज्ञयेति गाथार्थः। ननु यदि दण्डादयः सर्वे चतुर्ह-स्तप्रमाणास्तर्ह्येकेनैव दण्डाद्यन्तोपादानेन चरितार्थत्वात् किमिति षण्णामप्युपादानम् ?, उच्यते, मेयवस्तुषु भदेने व्याप्रियमाणत्वात्, तथा चाह-

*मू. ( २५५ ) वत्थुंमि हत्थमेज्जं खित्ते दंडं धणुं च पत्थंमि।*
*खायं च नालिआए विआण ओमाणसन्नाए॥*

**वृ.** 'वत्थुमि'गाहा, वास्तुनि-गृहभूमौ मीयतेऽनेनेति मेयं-मानमित्यर्थः, लुप्तद्वितीयै-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कवचनत्वेन हस्तं विजानीहीति सम्बन्धः, हस्तेनैव वास्तु मीयत इति तात्पर्यम्, क्षेत्रे-कृषिकर्मादिविषयभूते चतुर्हस्तवंशलक्षणं दण्डमेव मानं विजानीहि, धनुरादीनां चतुर्हस्तत्वे समानेऽपि रूढिवशाद्दण्डसंज्ञाप्रसिद्धनैवावमानविशेषेण क्षेत्रं मीयते इति हृदयं, पथि-मार्गविषये धनुरेव मानं, मार्गगव्यूतादिपरिच्छेदो धनुःसंज्ञाप्रसिद्धेनैवावमानविशेषेण क्रियते न दण्डादिभिरितिः भावः, खातं च-कूपादि नालिकयैव यष्टिविशेषरूपया मीयत इति गम्यते, एवं युगादिरपि यस्य तत्र व्यापारो रूढस्तस्य तत्र वाच्यः, यत्कथंभूतं हस्तदण्डादिकमित्याह-अवमानसंज्ञयोपलक्षितमिति गाथार्थः।

*मू. ( २५६ ) एएणं अवमानपमानेनं किं पओअणं ?, एएणं अवमानपमाणेणं खायचिअरइअकरकचियकडपडभित्तिपरिक्खेवसंसियाणं दव्वाणं अवमाणपमाणनिव्विअत्तिलक्खणं भवइ, से तं अवमाने। से किं तं गणिमे ?, २ जन्नं गणिज्जइ, तंजहा-एगो दस सयं सहस्सं दस सहस्साइं सयसहस्सं दस सयसहस्साइं कोडी, एएणं गणिमप्पमाणेणं किं पओअणं ?, एएणं गणिमपमाणेणं भितगभितिभत्तवेअणआयव्वयसंसिआणं दव्वाणं गणियप्पमाणनिव्वित्तलक्खणं भवइ, से तं गणिमे।*

**वृ.** एतेनावमानप्रमाणेन किं प्रयोजनमित्यादि भावितर्थमेवं, नवरं खातं-कूपादि चितं त्विष्टिकादि रचितं-प्रासादपीठादि क्रकचितं-करपत्रविदारितं काष्ठादि, कटादयः प्रतीता एव, परिक्षेपो-मित्त्यादेरेव परिधिः नगरपरिखदिर्वा, एतेषां खातादिसंसृतानामभेदेऽपि भेदविकल्पनया खातादिविषयाणां द्रव्याणां खातादीनामेवेति तात्पर्यम्, अवमानमेव प्रमाणं तस्य निर्वृत्तिलक्षणं भवतीति तदेतदवमानमिति निगमनम्।

'से किं तं गणीमे'इत्यादी, गण्यते-सङ्ख्यायते वस्त्वनेनेति गणिमम्-एकादि, अथवा गण्यते-सङ्ख्यायते यत्तद्गणिमं-रूपकादि, तत्र कर्मसाधनपक्षमङ्गीकृत्याह-'जण्ण'मित्यादि, गण्यते तद्गणिमं, कथं गण्यते इत्याह-'एक्को' इत्यादि, एतेन गणिमप्रमाणेन किं प्रयोजनमित्यादि गतार्थमेव, नवरं भृतकः-कर्मकरो भृतिः-पदात्यादीनां वृत्तिः भक्तंभोजनं वेतनकं-कुविन्दादिना(दीनां) व्यूतवस्त्रव्यतिकरेऽर्थप्रदानम्, एतेषु आयव्ययसंश्रितां-प्रतिबद्धानां रूपकादिद्रव्याणां गणिमप्रमाणेन निर्वृत्तिलक्षणम्-इयत्तावगमरूपं भवति, तदेतद्गणिममिति। अथ प्रतिमानप्रमाणं निरूपयितुमाह-

*मू. ( २५६ वर्तते ) से किं तं पडिमाणे ?, जण्णं पडिमिणिज्जइ, तंजहा-गुंजा कागणी निप्फाओ कम्ममासओ मंडलओ सुवन्नो, पंच गुंजाओ कम्ममासओ कागण्यपेक्षया, चत्तारि कागणीओ कम्ममासओ तिन्नि निप्फावा कम्ममासओ एवं चउक्को कम्ममासओ काकण्यपेक्षयेत्यर्थः, बारस कम्ममासया सुवन्नो एवं चउसट्ठि कागणीओ सुवन्नो, एएणं पडिमाणपमानेनं किं पओअणं ?, एएणं पडिमानपमाणेणं सुवन्नरजतमणिमोत्तिअसंखसिलप्पवालाईणं दव्वाणं पडिमाणप्पमाणनिव्वित्तिलक्खणं भवइ, से तं पडिमाणे।*

*से तं विभागनिप्फन्ने। से तं दव्वपमाणे।*

**वृ.** मीयतेऽनेनेति मानं मेयस्य-सुवर्णादेः प्रतिरूपं-सदृशं मानं प्रतिमानं-गुञ्जादि, अथवा प्रतिमीयते तदिति प्रतिमानं, तत्र गुञ्जा चणोठिया १ सपादा गुञ्जा काकणी २ सत्रिभागकाकण्या

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्रिभागोनगुञ्जाद्वयेन वा निर्वृत्तो निष्पावः ३, त्रयो निष्पावाः कर्ममाषकः ४, द्वादश कर्ममाषका एको मण्डलकः ५, षोडश कर्ममाषका एकः सुवर्णः ६ ।

अमुमेवार्थं किञ्चितढ सूत्रेऽप्याह-'पंच गुंजाओ'इत्यादि, पञ्च गुञ्जा एकः कर्ममाषकः, अथवा चतस्त्रः काकण्य एकः कर्ममाषकः, यदिवा त्रयो निष्पावका एकः कर्ममाषकः, इदमुक्तं भवति-अस्य प्रकारत्रयस्य मध्ये येन केनचित् प्रकारेण प्रतिभाति तेन वक्ता कर्ममाषकं प्ररूपयतु पूर्वोक्तानुसारेण, न कश्चिदर्थभेद इति। एवं 'चउक्को कम्ममासओ'इत्यादी, चतसृभिः काकिणी-भिर्निष्पन्नत्वाचतुष्को यः कर्ममाषक इति स्वरूपविशेषणमात्रमिदं, ते द्वादश कर्ममाषका एको मण्डलकः, एवमष्टचत्वारिं

शत्काकिणीभिर्मण्डलको भवतीति शेषः, भावार्थः, पूर्ववदेव, षोडश कर्ममाषकाः सुवर्णः, अनवा चतुःषष्टिः काकण्य एकः सुवर्णो, भावार्थः स एव, एतेन प्रतिमानप्रमाणेन किं प्रयोजन-मित्यादि गतार्थं, नवरं रजतं-रूप्यं मणयः-चन्द्रकान्तादयः शिलाराजपट्टकः, गन्धपट्ट इत्यन्ये, शेषं प्रतीतं, यावत्तदेतत्प्रतिमानप्रमाणं, तदेवं समर्थितं मानोन्मानादिभेदभिन्नं पञ्चविधमपी विभागनिष्पन्नं द्रव्यप्रमाणं, तत्समर्थने च समर्थितं द्रव्यप्रमाणम् ॥

अथ क्षेत्रप्रमाणभिधित्सुराह-

*मू. ( २५७ ) से किं तं खेत्तपमाणे ?, २ दुविहे पन्नत्ते, तंजहा-पएसनिप्फन्ने अ विभाग-निप्फन्ने अ। से किं तं पएसनिप्फन्ने ?, २ एगपएसोगाढे दुपएसोगाढे तिपएसोगाढे सुखिज्जप० असंखिज्जप०, से तं पएसनिप्फन्ने। से किं तं विभागनिप्फन्ने ?*

**वृ.** इदमपि द्विविधं-प्रदेशनिष्पन्नं विभागनिष्पन्नं च, तत्र पदेशा-इह क्षेत्रस्य निर्विभागा भागास्तैर्निष्पन्नं प्रदेशनिष्पन्नं, विभागः-पूर्वोक्तस्वरूपस्तेन निष्पन्नं विभागनिष्पन्नं। 'से किं तं पएसनिप्फन्ने' तत्रैकप्रदेशावगाढाद्यसंख्येयप्रदेशावगाढपर्यन्तं प्रदेशनिष्पन्नम्, एकप्रदेशाद्यवगाढताया एकादिभिः क्षेत्रप्रदेशैर्निष्पन्नत्वाद् अत्रापि प्रदेशनिष्पन्नता भावनीया, प्रमाणता त्वेकप्रदेशावगाहित्वादिना स्वस्वरूपणैव प्रमीयमानत्वादिति । विभागनिष्पन्नं त्वंगुलादि, तदेवाह-

*मू. ( २५८ ) अुगुलविहत्थिरयणी कुच्छी धनु गाउअं च बोद्धव्वं ।*
*जोयण सेढी पयरं लोगमलोगऽवि अ तहेव ॥*

**वृ.** 'अंगुलविहत्थि'गाहा, अंगुलादिस्वरूपं च स्त एव शास्त्रकारो न्यक्षेण वक्ष्यति। तत्रांगुल-स्वरूपनिर्द्धारणायाह-

*मू. ( २५९ ) से किं तं अंगुले ?, २ तिविहे पन्नत्ते, तंजहा-आयंगुले उस्सेहंगुले पमाणं-गुले। से किं तं आयंगुले ?, २ जे णं जया मनुस्सा भवंति तेसिं नं तया अप्पणो अंगुलेणं दुवालसअंगुलाइं मुहं नवमुहाइं पुरिसे पमाणजुत्ते भवइ, दोन्निए पुरिसे मानजुत्ते भवइ, अद्धभारं तुल्लमाणे पुरिसे उम्मानजुत्ते भवइ,-*

**वृ.** 'से किं तं अंगुले'इत्यादि अंगुलं त्रिविधं प्रज्ञप्तं, तद्यथा-आत्मांगुलम् उत्सेधांगुलं प्रमाणांगुलं, तत्र ये यस्मिन् काले भरतसगरादयो मनुष्याः प्रमाणयुक्ता भवन्ति तेषां सम्बन्धी अत्रात्मा गृह्यते, आत्मनोऽगुलमात्मांगुलम्, अत एवाह-'जे न'मित्यादि, ये भरतादयः, प्रमाण-

युक्ता यदा भवन्ति तेषां तदा स्वकीयमंगुलमात्मांगुलमुच्यत इति शेषः, इदं च पुरुषाणां कालदि-भेदेनानवस्थितमानत्वादनियतप्रमाणं द्रष्टव्यम्, अनेनैवात्मांगुलेन पुरुषाणां प्रमाणयुक्तादिनिर्णयं कुर्वन्नाह -

'अप्पणो अंगुलेणं दुवालसे' त्यादि, यद्यस्यात्मीयमंगुलं तेनात्मनोऽगुलेन द्वादशांगुलानि मुखं प्रमाणयुक्तं भवति, अनेन च मुखप्रमाणेन नव मुखानि सर्वोऽपि पुरुषः प्रमाणयुक्तो भवति, प्रत्येकं द्वादशांगुलैर्नवभिर्मुखैरष्टोत्तरं शतमंगुलानां संपद्यते, ततश्चैतावदुच्छ्रयः पुरुषः प्रमाणयुक्तो भवतीति परमार्थः। अथ तस्यैव मानयुक्ततांप्रतिपादनार्थमाह-द्रोणिकः पुरुषो मानयुक्तो भवति, द्रोणीजलपरिपूर्णा महती कुण्डिका तस्यां प्रवेशितो यः पुरुषो जलस्य द्रोणं पूर्वोक्तस्वरूपं निष्काशयति द्रोणोनजलस्योनां वा तां पूरयति स द्रोणिकः पुरुषो मानयुक्तो निगद्यते इति भावः।

इदानीमेतस्यैवोन्मानयुक्ततामाह-सारपुद्गलरचितत्वात् तुलारोपितः सन्नर्द्धभारं तुलयन् पुरुष उन्मानयुक्तो भवति, तत्रोत्तमपुरुषाः यथोक्तैः प्रमाणमानोन्मानैः अन्यैश्च सर्वैरेव गुणैः सम्पन्ना एव भवन्तीत्येतद्दर्शयन्नाह-

*मू. (२६०) मानुम्मानपमाणजुत्ता(णय)लक्खणवंजणगुनेहिं उववेआ।*
*उत्तमकुलप्पसूआ उत्तमपुरिसा मुणेअव्वा॥*

**वृ.** 'मानुम्मान'गाहा, अनन्तरोक्तस्वरूपैर्मानोन्मानप्रमाणैर्युक्ता उत्तमपुरुषाः-चक्रवर्त्यादयो मुणितव्या इति सम्बन्धः, तथा लक्षणानि-शङ्खस्वस्तिकादीनि व्यञ्जनानि-मषीतिलकादीनि गुणाः-क्षान्त्यादयस्तैरुपेताः, तथोत्तमकुलानि-उग्रादीनि तत्प्रसूता इति गाथार्थः॥ अथात्मांगुलेनैवोत्तममध्यमाधमपुरुषाणां प्रमाणमाह-

*मू. (२६१) होंति पूण अहियपुरिसा अट्ठसयं अंगुलाण उव्विद्धा।*
*छन्नउइ अहमपुरिसा चउत्तरं मज्झिमिल्ला उ॥*

**वृ.** 'हुंति पुण' गाहा, भवन्ति पुनरधिकपुरुषा-उत्तमपुरुषाश्चक्रवर्त्यादयः अष्टशतमंगुलम्-(लानां) उव्विद्धाउन्मिता उच्चैस्त्वेन वा, पुनःशब्दस्त्वेषामेवाधिकपुरुषादीनामनेकभेद-तादर्शकः, आत्मांगुलेनैव षण्णवत्यंगुलान्यधमपुरुषा भवन्ति, 'चउरुत्तर मज्झमिल्ला उ'त्ति तेनैवांगुलेन चतुरुत्तरमंगुलशतं मध्यमाः, तुशब्दो यथानुरूपशेषलक्षणादिभावप्रतिपादनपर इति गाथार्थः॥ ये अष्टोत्तरशतांगुलमानाद्धीना अधिका वा ते किं भवन्तीत्याह-

*मू. (२६२) हीना या अहिया वा जे खलु सरसत्तसारपरिहीना।*
ते उत्तमपुरिसाणं अवस्स पेसत्तणमुवेंति॥

**वृ.** 'हीना वा'गाहा, अष्टोत्तरशतांगुलमानात् हीना वा अधिका वा ये खलु स्वरः-सकल-जनादेयत्वप्रकृतिगम्भीरतादिगुणालंकृतो ध्वनिः सत्त्वं-दैन्यविनिर्मुक्तो मानसोऽवष्टम्भः सारः-शुभपुद्गलोपचयजः शारीरः शक्तिविशेषः तैः परिहीनाः सन्तस्ते उत्तमपुरुषाणाम् उपचित-पुण्यप्राग्भाराणाम् अवशा-अनिच्छन्तोऽप्यशुभकर्मवशतः प्रेष्यत्वमुपयन्ति, स्वरादिशेष-लक्षणवैकल्यसहायं च यथोक्तप्रमाणाद्धीनाधिक्यमनिष्टफलप्रदायि प्रतिपत्तव्यं, न केवलमिति लक्ष्यते, भरतचक्रवर्त्यादीनां स्वांगुलतो विंशत्यधिकांगुलशतप्रमाणानामपि निर्णीतत्वात्,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

महावीरादीनां च केषाञ्चिन्मतेन चतुरशीत्याद्यंगुलप्रमाणत्वाद्, भवन्ति च विशिष्टाः स्वरादयः प्रधानफलदायिनो, यत उक्तम्-

"अस्थिष्वर्थाः सुखं मांसे, त्वचि भोगाः स्त्रियोऽक्षिषु।
गतौ यानं स्वरे चाज्ञा, सर्वं सत्त्वे प्रतिष्ठितम्॥" इति गाथार्थः॥

**मू. ( २६३ )** *एएणं अंगुलपमाणेणं छ अंगुलाइं पाओ दो पाया विहत्थी दो विहत्थीओ रयणीओ कुच्छी दो कुच्छीओ दंडं धनू जुगे नालिआ अक्खे मुसले दो घनुसहस्साइं गाउअं चत्तारि गाउआइं जोअणं॥*

**वृ.** एतेनांगुलप्रमाणेन षडंगुलानि पादः, पादस्य मध्यतलप्रदेशः षडंगुलविस्तीर्णः, पादैकदेशत्वात् पादः द्वौ च युग्मीकृतौ पादौ वितस्तिः, द्वे च वितस्ती रत्निः, हस्त इत्यर्थः, रत्निद्वयं कुक्षिः, प्रत्येकु कुक्षिद्वयनिष्पन्नास्तु षट् प्रमाणविशेषा दण्डधनुर्युगनालिकाऽक्षमुशललक्षणा भवन्ति, तत्राक्षो-धूः शेषाश्च गतार्थाः, द्वे धनुःसहस्रे गव्यूतं, चत्वारि गव्यूतानि योजनम्।

**मू. ( २६३ )** *एएणं आयंगुलपमानेनं किं पओअणं ?, २ एएणं आयंगुलेणं जे नं जया मनुस्सा हवंति तेसि नं तया नं आयंगुलेणं अगडतलागदहनदीवाविपुक्खरिणीदीहियगुंजालिआरो सरा सरपंतिआओ सरसरपंतिआओ बिलपंतिआओ आरामुज्जाणकाणणवणवणसंडवणराईओ देउलसभापवाथूभखाइअपरिहाओ पागारअट्टालयचरिअदारगोपुरपासायघरसरणलयणआवणसिंघाडगतिगचउक्कचच्चरचउम्मुहमहापहपहसगडरहजाणजुग्गगिल्लिथिल्लिसिविअसंदमाणिआओ लोहीलोहकडाहकडिल्लयभंडमत्तोवगरणमाईणि अज्जकालिआइं च जोअणाइं भविज्जंति, से समासओ तिविहे पन्नत्ते, तंजहा-सूईअंगुले पयरंगुले घनंगुले अंगुलायया एगपएसिया सेढी सूईअंगुले, सुई सूइगुणिया पयरंगुले, पयरं सूइए गुणितं घनंगुले।*

*एएसि णं भंते ! सूइअंगुलपयरंगुलघणंगुललाणं कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, सव्वथोवे सूइअंगुले, पयरंगुले असंखेज्जगुणे, घनंगुले असंखिज्जगुणे, से तं आयंगुले।*

**वृ.** गतार्थं, नवरं ये यदा मनुष्या भवन्ति तेषां तदा आत्मनोऽगुलेन स्वकीयस्वकीयकालसम्भवीन्यवटह्रदादीनि मीयन्त इति सणटङ्कः, तत्र अवटः-कूपः तडागः-खानितो जलाशयविशेषः वाप्यः-चतुरस्रा जलाशयविशेषाः, पुष्करिण्यो-वृत्तास्ता एव पुष्करवन्त्यो वा दीर्धिकाः-सारिण्यः सारिण्य एव वक्रा गुञ्जालिका भण्यन्ते सरः-स्वयंसम्भूतो जलाशयविशेष एव सरपंतियाउत्ति-पङ्क्तिभिर्व्यवस्थापितानि सरांसि सरःपङ्क्तयः सरसरपंतियाउत्ति-यासु सरःपङ्क्तिष्वेकस्मात्सरसोऽन्यत्र ततोऽपि अन्यत्र कपाटसञ्चारकेनोदकं संचरति ताः सरःसरःपङ्क्तयः बिलपङ्क्तयः प्रतीताः माधवीलतादिषु दम्पत्यादीनि येष्वारमन्ति क्रीडन्ति ते आरामाः पुष्पफलादिसमृद्धानेकवृक्षसंकुलान्युत्सवादौ बहुजनपरिभोग्यान्युद्यानानि सामान्यवृक्षजातियुक्तानि नगराभ्यर्णवर्तीनि काननानि, अथवा स्त्रीणां पुरुषाणां वा केवलानां परिभोग्यानि काननानि, यदिवा येभ्यः परतो भूधरोऽटवी वा तानि सर्वेभ्योऽपि वनेभ्यः पर्यन्तवर्तीनि काननानि, शीर्णवृक्षकलितानि वा काननानि, एकजातीयवृक्षाकीर्णानि वनानि, अनेकजातीयैरुत्तमैश्च पादपैराकीर्णानि वनखण्डानि, एकजातीयानामितरेषां अ वा तरूणां पङ्क्तयो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वनराजयः,

सन्तो भजन्त्येतामिति सभा-पुस्तकवाचनभूमिर्बहुजनसमागमस्थानं वा, अध उपरि च समखातरूपा खातिका, अधः सङ्कीर्णोपरिविस्तीर्णा खातरूपा तु परिखा, प्राकारोपरि आश्रय-विशेषाः अट्टालकाः, गृहाणां प्राकारस्य चान्तरे अष्टहस्तविस्तारो हस्त्यादिसञ्चारमार्गश्चरिका, प्रतोलीद्वारणां परस्परतोऽन्तराणि गोपुराणि, राजानां देवतानां च भवनानि प्रासादाः उत्सेधबहुला वा प्रासादाः, गृहाणि सामान्यजनानां सामान्यानि वा, शरणानि तृणमयावसरिकादीनि लयनानि-उत्कीर्णपर्वतगृहाणि गिरिगुहा वा कार्पटिकाद्यावासस्थानं वा आपणा-हट्टाः नानाहट्टगृहाध्या-सितस्त्रिकोणो भूभागविशेषः, शृङ्गाटकं, स्थापना त्रिपथसमागमो वा शृङ्गाटकं त्रिकं तं त्रिपथ-समागम एव तथा प्रभूतगृहाश्रयश्चतुरस्रो भूभागश्चतुष्कं यथा(द्वा) चतुष्पथसमागमो वा चतुष्पणसमागम एव, षट्पथसमागमो वा चत्वरं चतुर्मुखदेवकुलिकादि चतुर्मुखं महान् राजमार्गो महापथः इतरे पन्थानः देवकुलसभादीनि पदानि क्वचिद्वाचनाविशेषे अत्रैवान्तरे दृश्यन्ते, शकटं-गड्डुकादि, रथो द्विधा-यानरथः संग्रामरथश्च, तत्र संग्रामरथस्योपरि प्राकारानुकारिणी कटीप्रमाणा फलकमयी वेदिका क्रियते, अपरस्य त्वसौ न भवतीति विशेषः, यानं-गन्त्र्यादि जुग्गत्ति-गोल्लविषयप्रसिद्धं द्विहस्तप्रमाणं चतुरस्रवेदिकोपशोभितं जम्पानं, गिल्लित्तिहस्ति उपरि कोल्लरूपा या मानुषं गिलतीव, थिल्लित्ति-लयनां यदड्डुपल्लाणां रूढं तदन्यविषयेषु थिल्लीत्युच्यते सीयत्ति-शिविका कटूकारांच्छादितो जम्पानविशेषः 'संदमाणिय'त्ति पुरुषप्रमाणायामो जम्पानविशेष एव लोहित्ति-लोही मण्डनकाचिपचनिका कविल्ली लोहकडाहित्ति-लोहमयं बृहत्कडिल्लं भाण्डं-मृन्मयादिभाजनं मात्रः-कांश(स्य)भाजनाद्युपकरणमात्राया आधारविशेषः उपकरणं त्वनेकविधं कटपिटकशूर्पादिकं शेषं तु यदिहँ क्वचित्किञ्चिन्न व्याख्यातं तत्सुगमत्वादिति मन्तव्यं।

तदेवमात्मांगुलेनात्मीयात्मीयकालसम्भवीनि वस्तून्यद्यकालीनानि च योजनानि मीयन्ते, ये यत्र काले पुरुषा भवन्ति तदपेक्षयाऽद्यशब्दो द्रष्टव्यः ।

इदं चात्मांगुलं सूच्यंगुलादिभेदात् त्रिविधं, तत्र दैर्घ्येणांगुलायता बाहल्यतस्त्वेशप्रादेशिकी नभःप्रदेशश्रेणिः सूच्यंगुलमुच्यते, एतच्च सद्भावतोऽसंख्येयप्रदेशमप्यसत्कल्पनया सूच्याकारव्यवस्थापितप्रदेशत्रयनिष्पन्नं दृष्टव्यं, सूची सूच्यैव गुणिता प्रतरांगुलम्, इदमपि परमार्थतोऽसंख्येयप्रदेशात्मकम्, असद्भावतस्त्वेषैवानन्तरदर्शिता त्रिपदेशात्मिका सूचिस्तयैव गुण्यते, अतः प्रत्येकं प्रदेशत्रयनिष्पन्नसूचीत्रयात्मकं नवप्रदेशसंख्यंसंपद्यते, प्रतरश्च सूच्या गुणितो दैर्ध्येण विष्कम्भतः पिण्डतश्च समसङ्ख्यं घनांगुल भवति, देर्घ्यादिषु त्रिष्वपि स्थानेषु समतालक्षणस्यैव समयचर्य्यया घनस्येह रूढत्वात्, प्रतराङ्गुलं तु दैर्ध्यविष्कम्भाभ्यामेव समं, न पिण्डतः तस्यैकप्रदेशमात्रत्वादिति भावः, इदमपि वस्तुवृत्त्याऽसंख्येयप्रदेशमानम्, असत्प्र-रूपणया तु सप्तविंशतिप्रदेशात्मकं पूर्वोक्तसूच्या अनन्तरोक्तनवप्रदेशात्मके प्रतरे गुणिते एता-वतामोव प्रदेशानां भावाद्, एषां च स्थापना अनन्तरनिर्दिष्टनवप्रदेशात्मकप्रतरस्याध उपरि च नव नव प्रदेशान् दत्त्वा भावनीया, तथा च दैर्ध्यविष्कम्भपिण्डैस्तुल्यामिदमापद्यते ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

'एएसि नं भंते' इत्यादिना सूच्यङ्गुलादिप्रदेशानामल्पबहुत्वचिन्ता यथानिर्दिष्टव्याख्यानुसारतः सुखावसेसैय, तदेतदात्माङ्गुलमिति। अथोत्सेऽङ्गुलनिर्णयार्थमाह-

*मू. ( २६३ ) से किं तं उस्सेहंगुले ?, २ अनेगविहे पन्नत्ते, तंजहा-*

*मू. ( २६४ ) परमाणू तसरेणू रहरेणू अग्गयं च वालस्स।*
*लिक्खा जूआ य जवो अट्ठगुणविड्डिआ कमसो॥*

**वृ.** उत्सेधः-'अनंताणं सुहुमपरमाणुपोग्गलाण'मित्यादिक्रमेणोच्छ्रयो वृद्धिनयनं तस्माज्ञातमंगुलमृत्सेधाङ्गुलम्,'अथवा उत्सेधो-नारकादिशरीराणामुच्चेस्त्वं तत्स्वरूपनिर्णयार्थमंगुलमुत्सेधाङ्गुलं, तच्च कारणस्य परमाणुत्रसरेण्वादेरनेकविधत्वादनेकविधं प्रज्ञप्तं, तदेव कारणानेकविधत्वं दर्शयति-'तंद्यथे'त्यादि, 'परमाणू'इत्यादिगाथां सूत्रकृत् स्वयमेत्र विवरीषुराह-

*मू. ( २६५ ) से किं तं परमाणूं ?, २ दुविहे पन्नत्ते, तंजहा-सुहुमे अ ववहारिए अ, तत्थ णं जे से सुहुमे से ठप्पे, तत्थ णं जे से ववहारिएअ से नं अनंतानंताणं सुहुमपोग्गलाणं समुदयसमितिसमागमेणं ववहारिए परमाणुपोग्गले निप्फज्जइ, से णं भंते! असिधारं वा खुरधारं वा ओगाहोज्जा ?, हन्ता ओगाहोज्जा, से णं तत्थ छिज्जेज्ज वा भिज्जेज्ज वा ?, नो इणट्ठे समट्ठे, नो खलु तत्थ सत्थं कमइ, सेणं भंते! अगनिकायस्स मज्झंमज्झेणं वीइवएज्जा ?, हंता विइवएज्जा, से णं भंते! तत्थ डहेज्जा ? नो इणट्ठे, समट्ठे, नो खलु तत्थ सत्थं कमइ, से णं भंते! पुरकरसंवट्ठगस्स महामेहस्स मज्झंमज्झेणं वीइवएज्जा ?, हंता विइवएज्जा, से नं तत्थ उदउल्ले सिआ ?, नो इणट्ठे, समट्ठे, नो खलु तत्थ सत्थं कमइ, से णं भंते! गंगाए महानईए पडिसोयं हव्वमागच्छेज्जा ?, हंता हव्वमागच्छेज्जा, से णं तत्थ विनिघायमाववज्जेज्जा ?, नो इणट्ठे समट्ठे, नो खलु तत्थ सत्थं कमइ, से णं भंते! उदगावत्तं वा उदगबिंदुं वा ओगाहेज्जा ? हंता ओगाहेज्जा, से णं तत्थ कुच्छेज्जा वा ?, परियावज्जेज्ज वा ?, नो इणट्ठे समट्ठे, नो खलु तत्थ सत्थं कमइ।*

**वृ.** 'से किं तं परमाणू' इत्यादि, परमाणुर्द्विविधः प्रज्ञप्तः-सूक्ष्मो व्यावहारिकश्च, तत्र सूक्ष्मशस्तत्स्वरूपाख्यानं प्रति स्थाप्यः, अनधिकृत इत्यर्थः, 'से किं तं ववहारिए'इत्यादि, ननु कियद्भिः सूक्ष्मैर्नैश्चयिकपरमाणुभिरेको व्यावहारिकः परमाणुर्निष्पद्यते ?, अत्रोत्तरम्, 'अनंताण'मित्यादि, अनन्तानां सूक्ष्मपरमाणुपुद्गलानां सम्बन्धिनो ये समुदायाः-द्वयादिसमुदायात्मकानि वृन्दानि तेषां याः समितयो-बहूनि मीलनानि तासां समागमः-संयोग एकीभवनं समुदयसमितिसमागमः तेन व्यावहारिकपरमाणुपुद्गल एको निष्पद्यते, इदमुक्तं भवति-निश्चयनयः-

"कारणमेव तदन्त्यं सूक्ष्मो नित्यश्च भवति परमाणुः।
एकरसवर्णगन्धो द्विस्पर्शः कार्यलिङ्गश्च॥"

इत्यादिलक्षणसिद्धं निर्विभागमेव परमाणुमिच्छत्ति, यस्त्वेतैरनैकर्जायते तं सांशत्वात् स्कन्धमेव व्यपदिशति, व्यवहारस्तु तदनेकतानिष्पन्नोऽपि यः शस्त्रच्छेदाग्निदाहादिविषयो न भवति तमद्यापि तथाविधस्थूलताऽप्रतिपत्तेः परमाणुत्वेन व्यवहरति, ततोऽसौ निश्चयतः स्कन्धोऽपि व्यवहारनयमतेन व्यावहारिकः परमाणुरुक्तः, न च वक्तव्यम्-अयं तर्हि शस्त्रच्छे-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दादिविषयो भवति, यतस्तन्निषेधार्थमेव प्रश्नमुत्पादयति-'से नं भंते !' इत्यादि, से भदन्त ! व्यावहारिकपरमाणुः कदाचित् असिः-खड्गं तद्धारां वा क्षुरो-नापितोपकरणं तद्धारां वा अवगाहेत-आक्रामेद् ?, अत्रोत्तरं-'हन्तावगाहेतेति' हन्तेति कोमलामन्त्रणे अभ्युपगमद्योतने वा अवगाहेतेति शिष्यपृष्टार्थस्याभ्युपगमवचनं, पुनः पृच्छति-स तत्रावगाढः संछिद्येत वा-द्विधा क्रियेत भिद्येत वा-अनेकधा विदार्येत सूच्यादिना वस्त्रादिवद्वा सच्छिद्रः क्रियेत ?, उत्तरमाह-नायमर्थः समर्थः, नैतदेवमिति भावः, अत्रोपपत्तिमाह-न खलु तत्र शस्त्रं क्रामति, इदमुक्तं भवति-यद्यप्यनन्तैः परमाणुभिर्निष्पन्नाः काष्ठादयः शस्त्रच्छेदादिविषया दृष्टास्तथाप्य-नन्तकस्याप्यनन्तभेदत्वात् तावत्प्रमाणेनैव परमाण्वनन्तकेन निष्पन्नोऽसौ व्यावहारिकः परमाणु-र्ग्राह्यो यावत्प्रमाणेन निष्पन्नोऽद्यापि सूक्ष्मत्वान्न शस्त्रच्छेदादिविषयतामासादयतीति भावः ।

पुनरप्याह-स भदन्ताग्निकायस्य-वह्नेर्मध्यंमध्येन-अन्तरे व्यतिव्रजेद्-गच्छेत् ?, हन्तेत्याद्युत्तरं पूर्ववत्, नवरं शस्त्रमिहाग्निशस्त्रं ग्राह्यं, पुनः पृच्छति-'से नं भंते ! पुक्खले'त्यादि इदमपि सूत्रं पूर्ववद्भावनीयं, नवरं पुष्करसंवर्तस्य-महामेघस्येयं प्ररूपणा-इहोत्सर्पिण्यामेक-विंशतिवर्षसहस्रमाने दुष्षमदुष्षमालक्षणे प्रथमारकेऽतिक्रान्ते द्वितीयस्यादौ सकलजनस्या-भ्युदयार्थं क्रमेमाणी पञ्च महामेघाः प्रादुर्भविष्यन्ति, तद्यथा-पुष्कलसंवर्तक उदकरसः प्रथमः द्वितीयः क्षीरोदस्तृतीयो घृतोदश्चतुर्थोऽमृतोदः पञ्चमो रसोदः, तत्र पुष्कलसंवर्तोऽस्य भरतक्षेत्रस्य पुष्कलं-प्रचुरमपि सर्वमशुभानुभावं भूमिरूक्षतादाहादिकं प्रशस्तोदकेन संवर्तयति-नाशयति, एवं शेषमेघव्यापारोऽपि प्रथमानुयोगादवगन्तव्यः, 'उदउल्ले सिय'त्ति उदकेनार्द्रः स्यादित्यर्थः, शस्त्रता चात्रोदकस्यावसेया, 'से णं भंते ! गंगाए' इत्यादि गङ्गाया महानद्याः प्रतिश्रोतो हव्यं-शीघ्रमागच्छेत्, पूर्वाद्यभिमुखे गङ्गाप्रवाहे वहति सति, पश्चिमाद्यभिमुखः स आगच्छेत् तन्मध्ये-नेति भावः 'विणिहाय'मित्यादि, विनिघातः-तत्स्रोतसि प्रतिस्खलनं तमापद्येत-प्राप्नुयात्, शेषं पूर्ववत्, 'सेणं भंते ! उदगावत्त'मित्यादि, उदकावर्तोदकबिन्दोर्मध्ये अवगाह्य तिष्ठेदित्यर्थः ?, स च तत्रोदकसम्पर्कात् कुथ्येद्वापूतिभावं यायात् पर्यापद्येत् वा-जलरूपतया परिणमेदित्यर्थः शेषं तथैव, पूर्वोक्तमेवार्थं संक्षेपतः प्राह-

*मू. ( २६६ ) सत्थेण सुतिक्खेणवि छित्तुं भेत्तुं च जं किर न सक्का ।*
*तं परमाणुं सिद्धा वयंति आइं पमाणाणं ॥*

**वृ.** 'सत्थेण' गाहा गतार्था, नवरं लक्षणमेवास्येदमभिधीयते, न पुनस्तं कोऽपि छेत्तुं भेत्तुमार-भते इत्येतत् किलशब्देन सूचयति, सिद्धत्ति-ज्ञानसिद्धाः केवलिनो, न तु सिद्धाः सिद्धिगताः, तेषां वदनस्यासम्भवादिति ।

*मू. ( २६७ ) अनंताणं ववहारिअपरमाणुपोग्गलाणं समुदयसमितिसमागमेणं सा एगा उसण्हसण्हिआ इ वा सण्हसण्हिआ इ वा उड्ढरेणू इ ता तसरेणू इ वा रहरेणू इ वा, अट्ठउसण्ह-सण्हिआओ सा एगा सण्हसण्हिआ, अट्ठ सण्हसण्हिआओ सा एगा उड्ढरेणू, अट्ठ उड्ढरेणुओ सा एगा तसरेणू, अट्ठ तसरेणूओ सा एगा रहरेणू, अट्ठ रहरेणूओ देवकुरुउत्तरकुरूणं मणुआणं से एगे वालग्गे, अट्ठ देवकुरुउत्तरकुरूणं मणुआणं वालग्गा हरिवासरम्मगवासाणं मणुआणं से एगे वालग्गे, अट्ठ हरिवस्सरम्मगवासाणं मनुस्साणं वालग्गा हेमवयहेरन्नवयाणं मनुस्साणं से*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*एगे वालग्गे, अट्ठ हेमवयहेरन्नवयाणं मनुस्साणं वालग्गा पुव्वविदेहअवरविदेहाणं मनुस्साणं से एगे वालग्गे, अट्ठ पुव्वविदेहअवरविदेहाणं मनुस्साणं वालग्गा भरहएरवयाणं मनुस्साणं से एगे वालग्गे, अट्ठ भरहेरवयाणं मनुस्साणं वालग्गा सा एगा लिक्खा, अट्ठ लिक्खाओ सा एगा जूआ, अट्ठ जूआओ से एगे जवमज्झे, अट्ठ जवमज्झे से एगे अंगुले।*

*एएणं अंगुलाण पमानेनं छ अंगुलाइं पादो बारस अंगुलाइं विहत्थी चउवीसं अंगुलाइं रयणी अडयालीसं अंगुलाइं कुच्छी छन्नवइ अंगुलाइं से एगे दंडे इ वा धनू इ वा जुगे इ वा नालिआ इ वा अक्खे इ वा, मुसले इ वा एएणं धनूप्पमानेनं दो धनुसहस्साइं गाउअं चत्तारि गाउआइं जोअणं।*

*एएणं उस्सेहंगुलेणं किं पओअणं ?, एएणं उस्सेहंगुलेणं नेरइअतिरिक्खजोणिअमनुस्सदेवाणं सरीरोगाहणा मविज्जति।*

**वृ.** अनन्तानां व्यावहारिकपरमाणुपुद्गलानां समुदयसमितिसमागमेन या परमाणुतेति गम्यते, सा एका अतिशयेन श्लक्ष्णा श्लक्ष्णश्लक्ष्णा सैव श्लक्ष्णश्लक्ष्णिका, उत्तरप्रमाणापेक्षया उत्-प्राबल्येन श्लक्ष्णश्लक्ष्णिका उत्श्लक्ष्णश्लक्ष्णिका, इतिशब्दः स्वरूपप्रदर्शने, वाशब्द उत्तरापेक्षया समुच्चये, एवं श्लक्ष्णश्लक्ष्णिकेति वा इत्यादिष्वपि वाच्यम्, एते चोत्श्लक्ष्ण-श्लक्ष्णिकादयो यद्यपि यथोत्तरमष्टगुणत्वेन प्रतिपादयिष्यन्ते तथापि प्रत्येकमनन्तपरमाणु-निष्पन्नत्वासाम्यं न व्यभिचरन्त्यतः प्रथमं निर्विशेषितमप्युक्तं 'सा एगा उसण्हसण्हियाइ वा' इत्यादि, प्राक्तनप्रमाणादष्टगुणत्वादूर्ध्वरेण्वपेक्षया त्वष्टमभागवर्तित्वात् श्लक्ष्णश्लक्ष्णि-केत्युच्यते, स्वतः परतो वा ऊर्ध्वाधस्तिर्यक्चलनधर्मा रेणुरूर्ध्वरेणुः एतानि चोत्श्लक्ष्णश्लक्ष्णि-कादीनि त्रीणि पदानि 'परमाणू तसरेणू' इत्यादिगाथायां अनुक्तान्यप्युपलक्षणत्वाद् द्दष्टव्यानि, त्रस्यति-पौरस्त्यादिवायुप्रेरितो गच्छति यो रेणुः स त्रसरेणुः, रथगमनोत्सवातो रेणू रथरेणूः, वालाग्रलिक्षादयः प्रतीताः, देवकुरूत्तरकुरूहरिवर्षरम्यकादिनिवासिमानवानां केशस्थूल-ताक्रमेण क्षेत्रशुभानुभावहानिभावनीयां, शेषं निर्णीतार्थमेव, यावत्-

***मू. ( २६७ वर्तते )*** *नेरइआणं भंते ! के महालिआ सरीरोगाहन्न पन्नत्ता ?, गोयमा ! दुविहा पन्नत्ता, तंजहा- भवधारणिज्जा य उत्तरवेउव्विआ य, तत्थ नं जा सा भवधारणिज्जा सा णं जहन्नेणं अंगुलस्स असंखेज्जइभागं उक्कोसेणं पंच धनुसयाइं, तत्थ नं जा सा उत्तरवेउव्विआ सा जहन्नेनं अंगुलस्स संखेज्जइभागं उक्कोसेणं पंच धनुसहस्सं, रयणप्पहाए पुढवीए नेरइआणं भंते ! के महालिआ सरीरोगाहए पन्नत्ता ?, गो० ! दुव्विहा पन्नत्ता, तंजहा*

*भवधारणिज्जा य उत्तरवेउव्विआ य, तत्थ णं जा सा भवधारणिज्जा सा जहन्नेणं अंगुलस्स असंखिज्जइभागं उक्कोसेणं सत्त धनूइं, तिन्नि रयणीओ छच्च अंगुलाइं, तत्थ णं जा सा उत्तर-वेउव्विआ सा जहन्नेणं अंगुलस्स संखेज्जइभागं उक्कोसेणं पन्नरस धनू दोन्नि रयणीओ बारस अंगुलाइं, सक्करप्पहापुढवीए नेरइआणं भंते ! के महालिआ सरीरोगाहए पन्नत्ता ?, गो० ! दुविहा पन्नत्ता, तंजहा- भवधारणिज्जा उत्तरवेउव्विआ य, तत्थ णं जा सा भवधारणिज्जा सा जहन्नेणं अंगुलस्स असंखिज्जइभागं उक्कोसेणं पन्नरस धनूइं, दुन्नि रयणीओ बारस अंगुलाइं, तत्थ णं जा सा उत्तरवेउव्विआ सा जहन्नेनं अंगुलस्स संखेज्जइभागं उक्कोसेणं एकतीस धनूइं*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*इक्करयणी अ, वालुअप्पहापुढवीए नेरइआणं भंते ! के महालिआ सरीरोगाहए पन्नत्ता ?, गो० ! दुविहा पन्नत्ता, तंजहा- भवधारणिज्जा उत्तरवेउव्विआ य, तत्थ नं जा सा भवधारणिज्जा सा जहन्नेणं अंगुलस्स असंखिज्जइभागं उक्कोसेणं बासट्ठि धनूइं, दो रयणीओ अ, एवं सव्वासिं पुढवीणं पृच्छा भाणिअव्वा,*

*पंकप्पहाए पुढवीए भवधारणिज्जा जहन्नेणं अंगुलस्स असंखिज्जइभागं उक्कोसेणं बासट्ठि धनूइं, दो रयणीओ अ, उत्तरवे० जहन्नेणं, अं० सं० उक्कोसेणं पणवीसं धनुसयं, धूमप्पहाए भवधा० अंगुलाइं, अ० उक्कोसेणं पणवीसं धनुसयं, उत्तरवे० अंगुलस्स संखे० उक्कोसेणं अड्डाइजाइं धनुसयाइं, तमाए भवधारणिज्जा० अंगुलस्स असं० उक्कोसेणं अड्डाइज्जाइं धनुसयाइं, उत्तरवे० अंगुलस्स सं० उक्कोसेणं पंच धनुसयाइं, तमतमाए पुढवीए नेरइयाणं भंते ! के महालिआ सरीरोगाहणा पं० ?, गो० ! दुविहा पन्नत्ता, तंजहा- भवधारणिज्जा य उत्तरवे०, तत्थ नं जा सा भवधारणिज्जा सा जहन्नेणं अंगुलस्स असंखिज्जइभागं उक्कोसेणं पंच धनूसयाइं तत्थ णं जा सा उत्तरवे० सा जहन्नेणं, अंगुलस्स सं० उक्कोसेणं धनुसहस्साइं,*

*असुरकुमाराणं भंते ! के महालिआ सरीरोगाहणा पं० ?, गो० ! दुविहा पन्नत्ता, तंजहा- भवधारणिज्जा उत्तरवे० य, तत्थ णं जा सा भवधारणिज्जा सा जहन्नेणं अंगुलस्स असंखिज्जइभागं उक्कोसेणं सत्त रयणीओ, उत्तरवे० सा जहन्नेणं, अंगुलस्स सं० उक्कोसेणं जोयणसयसहस्सं, एवं असुरकुमारगमेणं जाव थणियकुमाराणं भाणिअव्वा।*

**वृ.** अवगाहन्ते-अवतिष्ठन्ते जीवा अस्यामित्यवगाहना-नारकादितनुसमवगाढं क्षेत्रं नारकादितनुरेव वा, यद्यनेनोत्सेधांगुलेन नारकादीनां शरीरावगाहना मीयते तर्हि भदन्त ! नारकाणां तावत् 'के महालिया' कियन्महती किं महत्त्वोपेता कियतीत्यर्थः, शरीरस्यावगाहना शरीरमेव वा अवगाहना भवद्भिरन्यैश्च तीर्थकरैः सदेवमनुजासुरायां पर्षदि प्रज्ञप्ता-प्ररूपिता ?, अत्र भगवान् गौतममामन्त्र्योत्तरमाह-गौतम ! द्विविधा-द्विप्रकारा प्रज्ञप्ता, तद्यथा-भवधारणीया चोत्तरवैक्रिया च, ननु शरीरावगाहनायाः प्रमाणे पृष्टे तद्द्विविध्यलक्षणभेदकथनमप्रस्तुतमिति चेत्, नैवं, तत्प्रमाणकथनाङ्गत्वात्तस्य, न हि विलक्षणप्रमाणयुक्तेन भेदद्वयेन व्यवस्थिताया अवगाहनायास्तद्भेदकथनमन्तरेण प्रतिनियतं किञ्चित्प्रमाणं प्ररूपयितुं शक्यते, भेदोपन्यासे तु प्रतिभेदनियतं तत्कथ्यत इति भावः, तत्र भावे-नारकादिपर्यायभवनलक्षणे आयुसमाप्तिं यावत्सततं ध्रियते या सा भवधारणीया, सहजशरीरगतेत्यर्थः, या तु तद्ग्रहणोत्तरकालं कार्य-माश्रित्य क्रियते सा उत्तरवैक्रिया, तत्र भवधारणीया जघन्यतोऽगुलासङ्ख्येयभागमात्रा उत्पद्य-मानानां, उत्कृष्टा तु पञ्चधनुःशतमाना सप्तमपृथिव्याम्, उत्तरवैक्रिया त्वाद्यसमयेऽप्यंगुलस्य सङ्ख्येयभाग एव भवति, तथाविधप्रयत्नाभावतोऽसङ्ख्येयस्य भागस्य कर्तुमशक्यत्वादिति भावः, उत्कृष्टा तु धनुःसहस्रप्रमाणा सप्तमपृथिव्यामेव, ओघतो नारकाणां शरीरावगाहनामानं प्रतिपाद्य तदेव विशेषतो निरूपयितुमाह-'रयणप्पहापुढवी' इत्यादि, सूत्रसिद्धमेव, नवरमुत्कृष्टावगाहना सर्वास्वपि पृथिवीषु स्वकीयस्वकीयचरमप्रस्तटेषु द्रष्टव्याः भवधारणीयायाश्चोत्कृष्टायाः सकाशादुत्तरवैक्रिया सर्वत्र द्विगुणाऽवसेया, तदेवं-

''नेरइया असुराई पुढवाई बेंदियादओ तहय।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पंचेंदियतिरियनरा वंतर जोइसिय वेमाणी ॥" इति

समयप्रसिद्धचतुर्विंशतिदण्डकस्याद्यपदेऽवगाहनामानं निरूपितं । साम्प्रतमसुरादिपदे तन्मानं निरूपयितुमाह- 'असुरकुमाराणं भंते ! हे महालिये'त्यादि सर्वं पाठ्यसिद्धं, नवरम्-उत्तरवैक्रियावगाहनाऽत्रापि जघन्या अंगुलस्य सङ्ख्येयभाग एव, उत्कृष्टा तु दशस्वपि निकायेषु योजनशतसहस्रमाना, अन्ये त्वाहुः-नागकुमारादिनवनिकायेषूत्कृष्टाऽसौ योजनसहस्रमानै-वेति । अथ पृथिव्यादिपदेऽवगाहनामाह-

***मू. ( २६७ वर्तते )*** *पुढविकाइआणं भंते ! के महालिआ सरीरोगाहणा पं० ? गो० ! जहन्नेणं अंगुलस्स असंखेज्जइभागं उक्कोसेणवि अं० अ०, एवं सुहुमाणं ओहिमाणं अपज्जत्तगाणं पज्जत्तगाणं च भाणिअव्वं, एवं जाव बादरवाउकाइयाणं पज्जत्तगाणं भाणिअव्वं, वणस्सइकाइआणं भंते ! के महा० पं० ?, गो० ! जहन्नेणं अंगुलस्स असंखेज्जइभागं उक्कोसेणवि सातिरेगं जोयणहस्सं सुहुमवणस्सइकाइयाणं ओहिमाणं अपज्जत्तगाणं पज्जत्तगाणं तिण्हंपि जहन्नेणं अंगुलस्स असंखेज्जइभागं उक्कोसेणवि अंगुलस्स अ०, बादरवणस्सइकाइयाणं जहन्नेणं अंगुलस्स अ० उक्कोसेणं सातिरेगं जोयणहस्सं अपज्जत्तगाणं ज० अंगुलस्स असं० उक्कोसेणवि अंगुलस्स अ० पज्जत्तगाणं जहन्नेणं अ० उक्कोसेणं सातिरेगं जोअणसहस्सं ।*

*बेइंदिआणं पुच्छा, गो० ! जहन्नेणं अंगुलस्स असं० उक्कोसेणं बारस जोअणाइं, अपज्जत्तगाणं जहन्नेणं अंगुलस्स अ० उक्कोसेणवि अंगुलस्स अ०, पज्जत्तगाणं ज० अंगुलस्स सं० उक्कोसेणं बारस जोअणाइं ।*

*तेइंदिआणं पुच्छा गो० ! जहन्नेणं अंगुलस्स असं० उक्कोसेणं तिन्नि गाउआउं, अपज्जत्तगाणं जहन्नेणं अंगुलस्स अ० उक्कोसेणवि अंगुलस्स अ०, पज्जत्तगाणं ज० अंगुलस्स सं० उक्कोसेणं तिन्नि गाउआइं ।*

*चउरिंदिआणं पुच्छा गो ! जहन्नेणं अंगुलस्स असं० उक्कोसेणं चत्तारि गाउआइं, अपज्जत्तगाणं जहन्नेणं अंगुलस्स अ० उक्कोसेणवि अंगुलस्स अ०, पज्जत्तगाणं ज० अंगुलस्स सं० उक्कोसेणं चत्तारि गाउआइं ।*

**वृ.** इहौघिकपृथिवीकायिकानां प्रथममवगाहनामानं निरूप्यते १ ततस्तेषामेवौघतः सूक्ष्माणां २ ततः सूक्ष्माणामप्यपर्याप्तानां ३ तथा पर्याप्तानां ४ तत औधिकबादराणां ५ ततोऽमीषा-मेवापर्याप्तविशेषितानां ६ तथा पर्याप्तविशेषितानां ७ तेषु च सप्तस्वपि स्थानेषु पृथिवीकायि-कानांगुलासङ्ख्येयभाग एवावगाहना, किन्त्वसङ्ख्येयकस्य असङ्ख्येयभेदत्वेन तस्यापि तारतम्य-सम्भवात्, जघन्योत्कृष्टताविचारो न विरुध्यते, एवमप्तेजोवायुवनस्पतिष्वंगुलासङ्ख्येय-भागावगाहीनि यथोक्तानि सप्त सप्त स्थानानि वाच्यानि, नवरमौघिकबादरवनस्पतिषु पर्याप्तेषु च तेषु जघन्यतोऽगुलासङ्ख्येयभागरूपा, उत्कृष्टतस्तु समुद्रगोतीर्थादिगतपद्मनालाद्याश्रित्य सातिरेकयोजनसहस्रमाना अवगाहना द्रष्टव्या, अत्राह-ननु यदीत्थं भेदतोऽवगाहना चिन्त्यते तदा नारकासुरकुमारादिष्वप्यपर्याप्तभेदतः कस्मादसौ न प्रोक्ता ?, सत्यं, किन्तु ते लब्धितः सर्वेऽपि पर्याप्ता एव भवन्ति, अतोऽपर्याप्तत्वलक्षणस्य प्रकारान्तरस्य किल तत्रासम्भवान्न भेदतस्तच्चिन्ता, विचित्रत्वाद्वा सूत्रगतेरित्यलं विस्तरेण ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ द्वीन्द्रियादिपदे अवगाहनामानमाह-तत्रौधिकद्वीन्द्रियाणां अपर्याप्तानां पर्याप्तानां चेति स्थानत्रये अवगाहनाऽत्र चिन्त्यते, एतेषु बादरत्वस्यैव सद्भावात्, सूक्ष्मत्वाभावतो न तच्चिन्ता-सम्भवः, द्वादश च योजनानि शरीरावगाहना स्वयम्भूरमणादिशङ्खादीनामवसेया, एवं त्रीन्द्रियेष्वपि स्थानत्रये अवगाहना भावनीया, नवरं गव्यूतत्रयं शरीरावगाहना बहिर्द्वीपवर्तिकर्ण-शृगाल्यादीनामगन्तव्या, एवं चतुरिन्द्रियेष्वपि नवरं गव्यूतचतुष्टयं शरीरमानं बहिर्द्वीपवर्तिनां भ्रमरादीनाम।

अथ पञ्चेन्द्रियतिर्यक्पदेऽवगाहनां निरूपयितुमाह-

*मू. ( २६७ वर्तते ) महालिया० पं० ?, गो० ! जहन्नेणं अं० उक्कोसेणं जोयणसहस्सं, जलयरपंचिंदियति० पुच्छा गो० ! एवं चेव, संमुच्छिमजलयरपंचिंदियति० पुच्छा, गो० ! जहन्नेणं अंगु० अ० उक्कोसेणं जोयणसहस्सं, अपज्जत्तगसंमुच्छिमजलयरपंचिंदियति० पुच्छा, जहन्नेणं अंगुलस्स असंखिज्जइभागं उक्कोसेणं अंगुलस्स अ० पज्जत्तगसंमुच्छिमजलयरपंचिं-दियति० पुच्छा गो० ! जहन्नेणं अंगु० अ० उक्कोसेणं जोयणसहस्सं, गब्भवक्कंतियजलयरपंचिं-दियपुच्छा, गो० ! जहन्नेणं अंगुलस्स असंखिज्जइभागं उक्कोसेणं जोयणहस्सं अपज्जत्तगगब्भ० ज० गो० ! जह० अंगु० अ० उक्कोसेणवि अंगु० अ०, पज्जत्तगब्भवक्कंतियजलयरपंचिंदियति-पुच्छा, गो० ! जहन्नेणं अंगुलस्स संखिज्जइभागं उक्कोसेणं जोयणहस्सं,*

*चउप्पयथलयरपंचिंदियपुच्छा, गो० ! जहन्नेणं अंगुलस्स अ० उक्कोसेणं छ गाउआइं, संमुच्छिमचउप्पयथलयरपुच्छा, गो० ! जहन्नेणं अंगुलस्स अ० उक्कोसेणं गाउअपुहुत्तं, अपज्जत्तगसंमुच्छिमचउप्पयथलयरपुच्छा, गो० ! जहन्नेणं अंगुलस्स अ० उक्कोसेणं अंगु० अ० पज्जत्तगसंमुच्छिमचउप्पयथलयरपुच्छा, गो० ! जहन्नेणं अंगुलस्स अ० उक्कोसेणं गाउअपुहुत्तं, गब्भवक्कंतिअचउप्पयथलयरपुच्छा, गो० ! जहन्नेणं अंगुलस्स अ० उक्कोसेणं छ गाउआइं, अपज्जत्तगगब्भवक्कंतिअचउप्पयथलयरपुच्छा, गो० ! जहन्नेणं अंगुलस्स अ० उक्कोसेणं अंगुलस्स असं० पज्जत्तगगब्भवक्कंतिअचउप्पयथलयरपुच्छा, गो० ! जहन्नेणं अंगु-लस्स अ० सं० उक्कोसेणं छ गाउआइं,*

*उरपरिउप्पयथलयरपंचिंदियपुच्छा, गो० ! जहन्नेणं अंगुलस्स अ० उक्कोसेणं जोअणसहस्सं संमुच्छिमउरपरिसप्पयथलयरपुच्छा, गो० ! जह० अंगुल० असंखे उक्को० जोअणपुहुत्तं, अपज्जत्तगसंमुच्छिमउरपरिसप्पथलयरपुच्छा, गो० ! जह० अंगुलस्स अ० उक्कोसेणवि अंगुल० असं० पज्जत्तगसम्मुच्छिमउरपरिसप्पथलयरपुच्छा, गो० ! जह० अंगु० संखे० उक्कोसेणं जोअणपुहुत्तं गब्भवक्कंतियउपरपरिसप्पथलयरपुच्छा, गो० ! जहन्नेणं अंगु० असं उक्को० जोअणसहस्सं अपज्जत्तगगब्भवक्कंतियरउरपरिसप्पथलयरपुच्छा, गो० ! जहन्नेणं अंगुलस्स अ० उक्कोसेणवि अं० असं० पज्जत्तगगब्भवक्कंतियउपर० पुच्छा, गो० ! जहन्नेणं अंगु० संखेज्जइभागं उक्कोसेणं जोअणसहस्सं, ।*

*भुअपरिसप्पथलयरपंचिंदियाणं पुच्छा गो० ! जहन्नेणं अंगुलस्स अ० उक्कोसेणं गाउअपुहुत्तं, संमुच्छिमभुअ० पुच्छा, गो० ! जह० अंगुल० असंखे उक्को० धनपुहुत्तं, अपज्जत्तगसंमुच्छिम० गो० ! जह० अंगुलस्स अ० सं० उक्कोसेणवि धनु०, गब्भ० भुअ० थल०, गो० ! जह० अंगु०*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*असंखे० उक्कोसेणं गाउ अपज्ज० भुअप० गो० ! जहन्नेणं अंगु० असं उक्को० अं०, पज्जत्त-गगब्भवक्कंतियरभुअपरिसप्पथलयरपुच्छा, गो० ! जहन्नेणं अंगुलस्स संखे० उक्कोसेणवि गाउअपुहुत्तं, खहयरपंचिंदियपुच्छा, गो० ! जह० अंगु० असं० उक्को० धनुपुहुत्तं, संमिच्छ-मखहयराणं जहा भुअगपरिसप्पसंमुच्छिमाणं तिसुवि गमेसु तहा भाणिअव्वं, गब्भक्कंतिअखह-यरपुच्छा, गो० ! अं० असं० उक्कोसेणवि अं०, पज्जत्तगग० ख० गो० ! जह० अं० संखे० उक्को० धनु०,*

*एत्थ संगहणिगाहाओ भवंति, तंजहा-*

**वृ.** इहौधिकपञ्चेन्द्रियतिर्श्चां प्रथममवगाहना चिन्त्यते-सा चोत्कृष्टा योजनसहस्रं जघन्यं तं पदं सर्वत्राङ्गुलसंख्येयभागरूपत्वेनाविशेषान्नोच्यते, स्वयमेव भावनीयम्, एते च पञ्चेन्द्रितिर्यञ्चो जलचरस्थलचरखचरभेदन्त्रिधा भवन्ति, तत्रौधिका जलचराणां प्रथममवगाहना निरूप्यते-साऽप्युत्कृष्टा योजनसहस्रं १, ततस्तेषामेव सम्मर्च्छजानां तावन्मानैव २, तत एतेषामेवापर्याप्तविशेषितानामृत्कृष्टाऽप्यङ्गुलासंख्येयभागामानैव ३, तदनन्तरममीषामेव पर्याप्तत्वविशिष्टानामृत्कृष्टा योजनसहस्रम् ४, इतस्तेषमोव गर्भव्युत्क्रान्तिकानामुत्कर्षतो योजनसहस्रम् ५, अत एतेषामेवापर्याप्तत्वालिङ्गितानामुत्कृष्टाऽप्यङ्गुलासंख्येयभागाः ६, ततोऽप्यमीषामेव पर्याप्तानां उत्कृष्टा योजनसहस्रम् ७ इति जलचरपञ्चेन्द्रियतिरश्चां सप्त अवगाहनास्थानानि, अत्र च सर्वत्र योजनसहस्रमानं स्वयम्भूरमणमत्स्यानामवसेयम।

इदानीं स्थलचरेषु निरूप्यते-तेऽपि चतुष्पदोःपरिसर्पभुजपरिसर्पभेदात्रिविधा भवन्ति, अत आदावौधिकचतुष्पदस्थलचराणामुच्यते-सा चोत्कृष्टपदवर्तिनी देवकुर्वादिगतगर्भज-द्विरदानाश्रित्य षङ्गव्यूतप्रमाणा निश्चेतव्या १, ततस्तेषामेव सम्मूर्च्छनजत्वविशेषितानां सा गव्यूतपृथक्त्वं २, ततोऽपर्याप्तानामुत्कृष्टाऽप्यङ्गुलासङ्ख्येयभागः ३ पर्याप्तानां गव्यूतपृथक्त्वं ४, तेषामेव गर्भजाना गव्यूतषट्कं ५, तेपामेवापर्याप्तानामङ्गुलासङ्ख्येयभागः ६, पर्याप्तानां षड्गव्यतूतानि ७ इति चतुष्पदस्थलचरपञ्चेन्द्रियतिरश्चामपि सप्तावगाहनास्थानानि, साम्प्रतं विषधराद्युरःपरिसर्पस्थलचरपञ्चेन्द्रियतिर्यक्ष्यवगाहना प्रोच्यते-

तत्रौधिकोरःपरिसर्पाणां बहिर्द्वीपवर्तिगर्भसर्पानाश्रित्योत्कृष्टा योजनसहस्रं १ सम्मूर्च्छनजानां योजनपृथक्त्वं २, तेषामप्यपर्याप्तानांअङ्गुलासङ्ख्येयभागः ३, पर्याप्तानां योजनपृथक्त्वं ४, गर्भजानां सर्पाणा योजनसहस्रम् ५, अपर्याप्तानामङ्गुलासङ्ख्येयभागः ६, पर्याप्तानां योजन-सहस्रम् ७ इत्युरःपरिसर्पेषु सप्त स्थानानि, एवं भुजपरिसर्पेष्वपि गोधानकुलादिस्थल-चरेष्वपीत्थमेव सप्तावगाहनास्थानानि द्रष्टव्यानि, नवरमेतेषवाद्यपदे सामान्यगर्भजपदे पर्याप्तगर्भजपदे च गव्यूतपृथक्त्वं, सामान्यसम्मूर्च्छनजपदे पर्याप्तसम्मूर्च्छनजपदे च धनुःपृथक्त्वं, शेषपदद्वयेऽङ्गुलासङ्ख्येयभागः, तदेवं स्थलचरेषु त्रिविधेष्वप्यगाहना चिन्तिता, एवं खरचेष्वपि सप्तसु स्थानेषु सा वाच्या, नवरमत्राप्यपर्याप्तासम्मूर्च्छजापर्याप्तगर्भजलक्षण-स्थानद्वये उत्कृष्टाऽवगाहना प्रत्येकं अङ्गुलासङ्ख्येयभागः शेषेषु, पञ्चसु स्थानेषु धनुःपृथक्त्वं, तदेवं, षट्त्रिंशत्स्थानेषु पञ्चेन्द्रियतिरश्चा मवगाहनाकनिरूप्य संग्रहंकुर्वन्नह-

'एत्थ संगहणिगाहाओ भवंति, तंजहा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*मू. ( २६८ )* *जोअणसहस्सगाउपयुहुत्त तत्तो अ जोअणपुहुत्तं।*
*दोण्हं तु धनुपुहुत्तं समुच्छिमे होइ उच्चत्तं।*

**वृ.** 'जोअणसहस्स गाउअपुहुत्त तत्तो अ योजणपुहुत्तं। दुण्हं तु धनुपुहुत्तं संमुच्छिम होइ उच्चत्तं।' सम्मूर्च्छजानां जलचरपञ्चेन्द्रियतिरश्चामुत्कृष्टाऽवगाहना योजनसहस्रमेव न परतः, सम्मूर्च्छनजचतुष्पदानां तु गव्यूतपृथक्त्वं, सम्मूर्च्छजोरःपरिसर्पाणां योजनपृथक्त्व, सम्मूर्च्छनजभुजपरिसर्पखचरलक्षणोर्द्वयोः प्रत्येकं धनुःपृथक्त्वमेवेति। तदेव सम्मूर्च्छजविषयः संग्रहः कृतः। अथ गर्भजविषयं तं कुर्वन्नाह-

*मू. ( २६९ )* *जोयणसहस्स छग्गाउआइं तत्तो अ जोयणसहस्सं।*
*गाउअपुहुत्तं भुअगे पक्खीसु भवे धनुपुहुत्तं॥*

**वृ.** "जोयणसहस्स छग्गाउआइं तत्तो य जोयणसहस्सं। गाउयपुहुत्त भुयगे पक्खीसु भवे धुनुपुहुत्तं।' गर्भजानां जलचरपञ्चेन्द्रियतिरश्चामुत्कृष्टाऽवगाहना योजनसहस्रमेव, गर्भजतुष्पदानां षडेव गव्यूतानि, गर्भजोरःपरिसर्पाणां योजनसहस्रं, गर्भजभुजगानां गव्यूतपृथक्त्वं, गर्भजपक्षिणां धनुःपृथक्त्वमिति। इदं गाथाद्वयं क्वचिदेव वाचनाविशेषे दृश्यते, सोपयोगत्वात्तु लिखितम्। अथ मनुष्याणामवगाहना प्रोच्यते-

*मू. ( २७० ) मनुस्साणं भंते! के महालिआ सरीरोगाहणा पं० ?, गो! जह० अंगुलअ० उक्को० तिन्नि गाउआइं संमुच्छिमनुस्साणं पुच्छा, गो! जह० अंगुलअ० असंखे० उक्को० अंगु० असं, अपज्जत्तगगब्भवक्कंतियमनुस्साणं पुच्छा, गो! जह० अंगुलअ० असंखे० उक्कोसेनवि अंगु० असं, पज्जत्तगगब्भवक्कंतियमनुस्साणं पुच्छा, गो! जह० अंगुलअ० सं० उक्को० तिन्नि गाउआइं।*

**वृ.** तत्रौधिकपदे देवकुर्वादिमनुष्याणामृत्कृष्टा त्रीणि गव्यूतानि १ वातपित्तशुक्रशोणितादिषु सम्मूर्च्छितमनुष्याणामुत्कर्षतोऽप्यंगुलासङ्ख्येभाग एव, तो ह्येतावदवगाहनायामेव वर्तमाना अपर्याप्ता एव म्रियन्ते, अत एव पर्याप्ता नां च भावना कार्या, तदेवं पञ्चसु स्थानेषु मनुष्याणामवगाहना प्रोक्ता।

*मू. ( २७० ) वाणमंतराणं भवधारणिज्जा य उत्तरवेउव्विआ य जहा असुरकुमाराणं तहा भाणियव्वा, जहा वाणमंतराणं तहा जोइसियाणवि। सोहम्मे कप्पे देवाणं भंते! के महालिआ० पं० ?, गो०! दुविहा पन्नत्ता, तंजहा- भवधारणिज्जा य उत्तरवेउविआ य, तत्थ नं जा सा भव० सा जह० अंगुलस्स अ० उक्को० सत्त रयणीओ, तत्थ नं जा सा उत्तर० सा जह० अं० संखे उक्कोसेणं जोयणसयसहस्स,*

*एवं ईसानकप्पेऽपि भाणिअव्वं, जहा सोहम्मकप्पाणं देवाणं पुच्छा तहा सेसकप्पदेवाणं पुच्छा भाणिअव्वा जाव अच्चुअकप्पो। सणंकुमारे० भव० जह० अंगु० असं० उक्कोसेणं छ रयणीओ, उत्तर० जहा सोहम्मे० भ०, जहा सणंकुमारे तहा माहिंदेवि भाणियव्वा, बंभलंतगेसं भवधारिणज्जा जह० अं० उक्को० पंच रयणीओ, उत्तर० जहा सोहम्मे, महासुक्कासहस्सारेसु भवधारणिज्जा जह० अंगुलस्स असं० उक्को० चत्तारि रयणीओ, उत्तर० जहा सोहम्मे, आणतपाणतआरणअच्चुएसु चउसुवि भवधारणिज्जा जह० अंगु० असंखे० उक्कोसेणं तिन्नि*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*रयणीओ, उत्तरवेउव्विआ जहा सोहम्मे,*

*गेवेज्जगदेवाणं भंते! के महालिआसरीरोगाहणा पं० ?, गो० ! एगे भवधारणिज्जे सरीरगे पं०, से जह० अंगुलस्स असं० उक्कोसेणं दुन्नि रयणीओ, अनुत्तरोववाइअदेवाणं भंते! के म० पं० ?, गो० ! एगे भव० से जह० अंगु० अंसे० उक्को० एगा रयणी उ।*

*से समासओ तिविहे पन्नत्ते, तंजहा-सूइअंगुले पयरंगुले घणंगुले एगंगुलायया एगपएसिआ सेढी सूईअंगुले, सूई सूईए गुणिआ पयरंगुले, पयरं सूईए गुणियं घनंगुले, एएसि णं सूईअंगुल-पयरंगुलघणंगुलाणं कयरे कयरेहिंतो अप्पे वा बहुए वा तुल्ले वा विसेसाहिए वा ?, सव्वथोवे सूईअंगुले, पयरंगुले असंखेज्जगुणे, घनंगुले असंखेज्जगुणे, से तं उस्सेहंगुले।*

**वृ.** व्यन्तरज्योतिष्काणामसुरकुमारवद्भावनीया, वैमानिकानामपि तथैव, नवरं सौधर्मशानयोरुत्कृष्टा भवधारणीयशरीरावगाहना सप्तहस्ता, सनत्कुमारमाहेन्द्रयोः षट्, ब्रह्म-लोककलान्तकयोः पञ्च, महाशुक्रसहस्रारयोश्चत्वारः, आनतप्राणतारणाच्युतेषु त्रयः, ग्रैवेयकेषु द्वौ, ग्रैवेयकेषु उत्तरवैक्रिया तु ना वाच्या, ग्रैवेयकेषूत्तरवैक्रियशरीरनिर्वर्तनस्याभावाद्, एवमुत्त-रत्रापि, अनुत्तरविमानेषु त्वेको हस्तः, तदेवमेषामवगाहना सर्वाऽप्युत्सेधांगेलेन मीयते, एतच्च सूचीप्रतरघनभेदात् त्रिविधमात्मांगुलवद्भावनीयम्।

उक्तमुत्सेधांगुलम्, अथ प्रमाणांगुलं विवक्षुराह-

*मू. ( २७० ) से किं तं पमाणंगुले ?, पमाणंगुले एगमेगस्स रन्नो चाउरंतचक्कवट्टिस्स अट्ठसोवन्निए कागणीरयणे छत्तले दुवालसंसिए अट्ठकन्निए अहिगरणसंठाणसंठिए पं०, तस्स णं एगमेगा कोडी उस्सेहंगुलविक्खंभा तं समणस्स भगवओ महावीरस्स अद्धंगुलं, तं सहस्सगुणं पमाणंगुलं, भवइ, एएणं अंगुलपमानेनं छ अंगुलाइं पादो दुवालसंगुलाइं विहत्थी दो विहत्थीओ रयणी दो रयणीओ कुच्छी दो कुच्छीओ धनू दो धनुसहस्साइं गाउअं चत्तारि गाउआइं जोयणं। एएणं पमाणंगुलेणं किं पओअणं ?, एएणं पमाणगुलेणं पुढवीणं कंडाणं, पातालाणं भवनाणं, भवणपत्थडाणं निरयाणं निरयावलीणं निरयपत्थडाणं कप्पाणं विमानानं विमाणावलीणं विमाणपत्थडाणं टंकाणं कूडाणं सेलाणं सिहरीणं पब्भारणं विजयाणं वक्खाराणं वासाणं वासहराणं वासहरपव्वयाणं वेलाणं वेइयाणं दाराणं तोरनानं दीवाणं समुद्दाणं आयामविक्खं-भोच्चत्तोव्वेहहपरिक्खेवा मविज्जंति।*

**वृ.** सहस्रगणितादुत्सेधांगुलप्रमाणाज्ञातं प्रमाणांगुलम्, अथवा परमप्रकर्षरूपं प्रमाणं प्राप्त-मंगुलं प्रमाणांगुलं, नातः परं बृहत्तरमंगुलमस्तीति भावः, यदिवा-समस्तलोकव्यवहारराज्या-दिस्थितिप्रथमप्रणेतृत्वेन प्रमाणभूतोऽस्मिन्नवसर्पिणीकाले तावद्युगादिदेवो भरतो वा तस्यांगुलं, प्रमाणांगुलम्, एतच्च काकणीरत्नस्वरूपपरिज्ञानेन शिष्यव्युत्पत्तिलक्षणं गुणाधिक्य पश्यँस्त-द्द्वारेण निरूपयितुमाह-

'एगमेगस्स णं रण्णो' इत्यादि, एकैकस्य राज्ञः चतुरन्तचक्रवर्तिनोऽष्टसौवर्णिकं काकणीरत्नं षट्तलादिधर्मोपेतं प्रज्ञप्तं, तस्यैकैका कोटिरूत्सेधांगुलिविष्कम्भा, तच्छ्रमणस्य भगवतो महावीरस्यार्द्धांगुलं, तत्सहस्रगुणं प्रमाणांगुल भवतीति समुदायार्थः, तत्रान्यान्यकालोत्पन्ना-नामपि चक्रिणां काकणीरत्नतुल्यताप्रतिपादनार्थमेकैकग्रहणं निरुपचरितराजशब्द-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विषयज्ञानपनार्थं राजग्रहणं दिक्त्रयभेदभिन्नसमुद्रयहिमवत्पर्वतपर्यन्तसीमाचतुष्टयलक्षणा ये चत्वारोऽन्तास्ताँश्चतुरोऽपि चक्रेण वर्तयति-पालयतीति चतुरन्तचक्रवर्ती तस्य-परिपूर्ण-षट्खण्डभरतभोक्तुरित्यर्थः, चत्वारिमधुरतृणफलान्येकः श्वेतसर्षपः, षोडश सर्षपा एकं धान्य-माषफलं, द्वे धान्यमाषफले एक गुञ्जा, पञ्च गुञ्जा एकः कर्ममाषकः, षोडश कर्ममाषक एकः सुवर्णः, एतैरष्टभिः काकणीरत्नं निष्पद्यते, एतानि च मधुरतृणफलादीनि भरतचक्रवर्तिकाल-सम्भवीन्येव गृह्यन्ते, अन्यथा कालभेदेन तद्वैषम्यसम्भवे काकिणीरत्नं सर्वचक्रिणां तुल्यं न स्यात्, तुल्यं चेष्यते तदिति, चत्वारि चतसृष्वपि दिक्षु द्वे ऊर्ध्वाध इत्येवं षट् तलानि यत्र तत् षट्तलम्, अध उपरि पार्श्वतश्च प्रत्येकं चतसृणामस्त्रीणां भावात् द्वादश अस्त्रयः-कोट्य यत्र तद्द्वादशास्त्रिकां, कर्णिकाः-कोणास्तेषां चाध उपरि च प्रत्येकं चतुर्णां सद्भावदष्टकर्णिकम्, अधिकरणिः-सुवर्णकारोपकरणं तत्संस्थानेन संस्थितं-तत्सदृशाकारं समचतुरस्रमिति यावत् प्रज्ञप्तं-प्ररूपितं, तस्य काकिणीरत्नस्यैकैका कोटिरुत्सेधांगुलप्रमाणविष्कम्भा द्वादशाप्यस्त्रय एकैकस्य उत्सेधांगुलप्रमाण भवंतीत्यर्थः, अस्य समचतुरस्रत्वादायामो विष्कम्भश्च प्रत्येक-मुत्सेधांगुलप्रमाण इत्युक्तं भवति, यैव च कोटिरुर्ध्वीकृत्य आयामं प्रतिपद्यते सैव तिर्यक् व्यवस्थापिता विष्कम्भभागो भवतीत्यायामविष्कम्भयोरेकतरनिर्णयेऽप्यपरनिश्चयः स्यादेवेति सूत्रे विष्कम्भस्यैव ग्रहणं, तद्ग्रहणे चायामोऽपि गृहीत एव, समचतुरस्रत्वात्तस्येति । तदेवं सर्वत उत्सेधांगुलप्रमाणमिदं सिद्धं, यच्चान्यत्र-'चउरंगुलप्पमाणा सुवण्णवरकारणी नेये'ति श्रूयते, तन्मतान्तरु संभाव्यते, निश्चयं तु सर्ववेदिनो विदन्तीति ।

तदेकैककोटिगतमुत्सेधांगुलं श्रमणस्य भगवतो महावीरस्यार्द्धांगुलं, कथमिदम् ?, उच्यते, श्रीमहावीरस्य सप्तहस्तप्रमाणत्वादेकैकस्य च हस्तस्य चतुर्विंशत्युत्सेधांगुलमानत्वादष्टषष्ट-यधिकशतांगुलमानो भगवानुत्सेधांगुलेन सिद्धो भवति, स एव चात्मांगुलेन मतान्तरमाश्रित्य स्वहस्तेन सार्द्धहस्तत्रयमानत्वाच्चतुरशीत्यंगुलमानो गीयते, अतः सामर्थ्यादेकमुत्सेधांगुलं श्रीमन्महावीरात्मांगुलापेक्षया अर्द्धाअंगुलमेव भवति, येषां तं मतेन भगवानात्मांगुलेनाष्टोत्तर-शतांगुलमानः स्वहस्तेन सार्द्धहस्तचतुष्टमानत्वात् तन्मतेन भगवत एकस्मिन्नात्मांगुले एकमुत्से-धांगुलं तस्य च पञ्च नवमभागा भवन्ति, अष्टषष्टयधिकशतस्याष्टोत्तरशतेन भागापहारे एतावत एव भावात्, यन्मतेन तु भगवनान्विंशत्यधिकमंगुलशतं स्वहस्तेन पञ्चहस्तमानत्वात्, तन्मतेन भगवत एकस्मिन्नात्मांगुले एकमुत्सेधांगुलं तस्य च द्वौ पञ्चभागौ भवतः, अष्टषष्टयधिकशतस्य विंशत्यधिकशतेन भागो हृते इयत एव लाभात्, तदेवमिहाद्य-मतमपेक्ष्यैकमुत्सेधांगुलं भगवदात्मांगुलस्यार्द्धरूपतया प्रोक्तमित्यवसेयमिति ।

तदुच्छ्रयांगुलं सहस्रगुणितं प्रमाणांगुलं भवति, कथमिदमवसीयते ?, उच्यते, भरतश्चक्रवर्ती प्रमाणाङ्गुलेनात्माङ्गुलेन च किल विंशतिशतमङ्गुलानां भवति, भरतात्माङ्गुलस्य प्रमाणा-ङ्गुलस्य चैकरूपत्वात्, उत्सेधाङ्गुलेन तु पञ्चधनुःशतमानत्वात् प्रतिधनुश्च षण्णवत्यङ्गुल-सद्भावाद् अष्टचत्वारिंशत् सहस्राण्यङ्गुलानां संपद्यते, अतः सामार्थ्यादेकस्मिन् प्रमाणाङ्गुले चत्वारि शतान्युत्सेधाङ्गुलानां भवन्ति, विंशत्यधिकशतेन अष्टचत्वारिंशत्सहस्राणां भागापहारे एतावतो लाभात्, यद्येवमुत्सेधाङ्गुलात्प्रमाणाङ्गुलं चतुःशतगुणमेव स्यात् कथं सहस्रगुण-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मुक्तं ?, सत्यं, किन्तु प्रमाणाङ्गुलस्यार्द्धतृतीयोत्सेधाङ्गुलरूपं बाहल्यमस्ति, ततो यदा स्वकीयबाहल्येन शतचतुष्टयलक्षणं दैर्घ्यं गुण्यते तदा अङ्गुलविष्कम्भा सहस्राङ्गुलदीर्घा प्रमाणाङ्गुलविषया सूचिर्जायते, इदमुक्तं भवति-

अर्द्धतृतीयाङ्गुलविष्कम्भे प्रमाणाङ्गुले तिस्रः श्रेणयः कल्प्यन्ते, एका अङ्गुलविष्कम्भा शतचतुष्टदीर्घा, द्वितीयाऽपि तावन्मानैव, तृतीयाऽपि दैर्ध्येण चतुःशतमानैव विष्कम्भे त्वर्द्धा-ङ्गुलं, ततोऽस्यापि दैर्ध्याच्छतद्वयं गृहीत्वा विष्कम्भोऽङ्गुलप्रमाणः संपद्यते, तथा च सत्य-ङ्गुलशतद्वयदीर्घा अङ्गुलविष्कम्भा इयमपि सिद्धा, ततस्तिसृणामप्येतासामुपर्युपरि व्यवस्थापने उत्सेधाङ्गुलतोऽङ्गुलसहस्रदीर्घा अङ्गुलविष्कम्भा प्रमाणाङ्गुलस्य सूचिः सिद्धा भवति, तत इमां सूचिमधिकृत्योत्सेधाङ्गुलात्तत्सहस्रगुणमुक्तं, वस्तुतस्तु चतुःशतगुणमेव, अत एव पृथ्वीपर्वतविमानादिमानान्यनेनैव चतुःशतगुणेन अर्द्धतृतीयाङ्गुललक्षणस्व-विष्कम्भान्वितेनानीयन्ते न तु सहस्रगुणया अङ्गुलविष्कम्भया सूच्येति, शेषं भावितार्थं, यावत् 'पुढवीणं'ति रत्नप्रमादीनां 'कंडाणं'ति रत्नकाण्डादीनां 'पातालाणं'ति पातालकलशानां 'भवनाणं'ति भवनपत्यावासादीनां 'भवणपत्थडाणं'ति भवनप्रस्तटा नरकप्रस्तटान्तरे तेषां 'निरयाणं'ति नरकावासानां 'निरयावलियाणं'ति नरकावासपङ्क्तीनां 'निरयपत्थडाणं'ति 'तेरेक्का-रस नव सत्त पंच तिन्नि य तहेव एक्को ये'त्यादिना प्रतिपादितानां नरकप्रस्तटानां, शेषं प्रतीतं, नवरं 'टंकाणं'ति छिन्नटङ्कानां 'कूडाणं'ति रत्नकूटादीनां 'सेलाणं'ति मुण्डपर्वतानां 'सिहरीणं'ति पर्वतानामेव शिखरवतां 'पब्भाराणं'ति तेषामेवेषपन्नतानां 'वेलाणं'ति जलधिवेलाविषय-भूमीनामूर्ध्वाधोल(मुद्वेधो)भूमिमध्येऽवगाहः, तदेवम् 'अंङ्गुलविहत्थिरयणि'त्यादी गाथोपन्यस्तान्यङ्गुलादीनि योजनावसानानि पदानि व्याख्यातानि।

साम्प्रतं शेषाणि श्रेण्यादीनि व्याचिख्यासुराह-

*मू. (२७० वर्तते) से समासओ तिविहे पन्नत्ते, तंजहा-सेढीअंगुले पयरंगुले घनंगुले, असंखेज्जाओ जोयणकोडाकोडीओ सेढी, सेढी सेढीए गुणिया पयरं, पयरं सेढीए गुणियं लोगो, संखेज्जएणं लोगो गुणिओ संखेज्जा लोगा असंखेज्जएणं लोगो गुणिओ असंखेज्जालोगा अनंतेणं लोगो गुणिओ अनंता लोगा।*

*एएसि णं सेढीअंगुलपयरंगुलघणंगुलाणं कयरे कयरेहिंतो अप्पे वा बहुए वा तुल्ले वा विसेसाहिए वा?, सव्वथोये सेढी अंगुले, पयरंगुले असंखेज्जगुणे, घनंगुले असंखिज्जगुणे, से तं पमाणंगुले। से तं विभागनिप्फन्ने। से तं खेत्तप्पमाणे।*

वृ. 'अस्संखेज्जाउ जोयणकोडाकोडीओ सेढि'त्ति अनन्तरनिर्णीतप्रमाणाङ्गुलेन यद्योजनं तेन योजनेनासंख्येया योजनकोटीकोटयः संवर्तितसमचतुस्त्रीकृतलोकस्यैका श्रेणिर्भवति, कथं पुनर्लोकः, संवर्त्य समचतुरस्त्रीक्रियते?, उच्यते, इह स्वरूपतो लोकस्तावच्चतुर्दशरज्जूच्छ्रितः, अधस्ताद्देशोनसप्तरज्जुविस्तरः, तिर्यग्लोकमध्ये एकरज्जुविस्तृतः, ब्रह्मलोकमध्ये पञ्चर-ज्जुविस्तीर्णः, उपि तु लोकान्ते एकरज्जुविष्कम्भः, शेषस्थानेषु क्वचित्कोऽप्यनियतो विस्तरः, रज्जुप्रमाणं तु स्वयम्भूरमणसमुद्रस्य पौरस्त्यपाश्चात्यवदिकान्तं यावद्दक्षिणोत्तरवेदिकान्तं वा यावदवसेयम्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवं स्थितोऽसौ लोको बुद्धिपरिकल्पनया संवर्त्य घनीक्रियते, तथाहि-रज्जुविस्तीर्णा-यास्त्रसनाडिकाया दक्षिणदिग्वर्त्यधोलोकखण्डमधस्ताद्देशोनरज्जुत्रयविस्तीर्णं क्रमेण हीयमानविस्तरं तदेवोपरिष्टाद्रज्जवसंख्येयभागविष्कम्भं सातिरेकसप्तरज्जूच्छ्रितं गृहीत्वा त्रसनाडिकाया एवोत्तरपार्श्वे विपरीतं सङ्घात्यते, अधस्तनं भागमुपरि कृत्वा उपरितनं चाधः समानीय संयोज्यत इत्यर्थः, एवं च कृते अधोवर्तिलोकस्यार्द्धं देशोनरज्जुचतुष्टविस्तीर्णं सातिरेकसप्तरज्जूच्छ्रितं बाहल्यतोऽपि अधः क्वचिद्देशोनसप्तरज्जुमानमन्यत्र त्वनियतबाहल्यं जायते, इदानीमुपरितलोकार्द्धं संवर्त्यते-तत्रापि रज्जुविस्तरायास्त्रसानाडिकाया दक्षिणदिग्वर्तिनी ब्रह्मलोकमध्यादधस्तनमुपरितनं च द्वे अपि खण्डे ब्रहलोकमध्ये प्रत्येकं द्विरज्जुविस्तीर्णे उपर्यलोकसमीपे अधस्तु रत्नप्रभाक्षुल्लकप्रतरसमीपे अङ्गुलसहस्रभागविस्तरवती देशोनसार्द्धर-ज्जुत्रयोच्छ्रिते बुद्धया गृहीत्वा तस्या एवोत्तरपार्श्वे पूर्वोक्तस्वरूपेण वैपरीत्येन सङ्घात्येते,

एवं च कृते उपरितनं लोकस्यार्द्धं द्वाभ्यामङ्गुलसहस्रभागाभ्यामधिकं रज्जुत्रयविष्कम्भम्, इह चतुर्णां खण्डानां पर्यन्तेषु चत्वारोऽङ्गुलसहस्रभागा भवन्ति, केवलमेकस्यां दिशि यौ ताभ्यां द्वाभ्यामप्येक एवाङ्गुलसहस्रभागः, एकदिग्वर्तित्वादेव, अपराभ्यामपिअ द्वाभ्यामित्थ-मेवेत्यतस्तद्द्वयधिकत्वमुक्तं देशोनसप्तरज्जूच्छ्रितं, बाहल्यतस्तु ब्रह्मलोकमध्ये पञ्चरज्जु-बाहल्यमन्यत्र त्वनियतं जायते, इदं च सर्वं गृहीत्वा आधस्त्यसंवर्तितलोकार्द्धस्योत्तरपार्श्वे संघात्यते, एवं च योजिते आधस्त्यखण्डस्योच्छ्रये यदितरोच्छ्रयादधिकं तद् खण्डित्वा उपरितन-सङ्घातितखण्डस्य बाहल्ये ऊर्ध्वायतं संघात्यते, एवं च सातिरेकाः पञ्च रज्जवः क्वचिद्बाहल्यं सिद्धयति, तथा आधस्त्यखण्डमधस्ताद्यथासम्भवं देशोनसप्तरज्जुबाहल्यं प्रागुक्तम्, अत उपरितनखण्डबाहल्यादेशोनरज्जुद्वयमत्रातिरिच्यत इत्यस्मादतिरिच्यमानवबाहल्यादर्द्धं गृहीत्वा उपरितनखण्डबाहल्ये संयोज्यते, एवं च कृते बाहल्यतस्तावत्सर्वमप्येतच्चतुरस्रीकृतनभः-खण्डं कियत्यपि प्रदेशे रज्ज्वंख्येयभागाधिकाः षट् रज्जवो भवन्ति, व्यावहारतस्तु सर्वं सप्तर-ज्जुबाहल्यमिदमुच्यते, व्यवहारनयो हि किञ्चिन्न्यूनसप्तहस्तादिप्रमाणमपि पटादिवस्तु परि-पूर्णसप्तहस्तादिमानं व्यपदिशति देशतोऽपि च दृष्टं बाहल्यादिधर्मं परिपूर्णेऽपि वस्तुन्यध्यवस्यति, स्थूलदृष्टित्वादिति भावः,

अत एव तन्मतेनैवात्र सप्तरज्जुबाहल्यता सर्वगता दृष्टव्या, आयमविष्कम्भाभ्यां तु प्रत्येकं देशोनसप्तरज्जुप्रमाणभिदं जातं, व्यवहारतस्त्वत्रापि प्रत्येकं सप्तरज्जप्रमाणता दृश्यते, तदेवं व्यवहारनयमतेनायाभविष्कम्भबाहल्यैः प्रत्येकैं सप्तरज्जुप्रमाणो घनो जातः, एतच्च वैशाखस्थानस्थितपुरुषाकारं सर्वत्र वृत्तस्वरूपं च लोकं संस्थाप्य सर्वं भावनीयं, सिद्धान्ते च यत्र क्वचिदविशेषितायाः श्रेण्याः सामान्येन ग्रहणं तत्र सर्वत्रास्य घनीकृतलोकस्य सम्बन्धिनी सप्तरज्जुप्रमाणा सा ग्राह्या, तथा प्रतरोऽप्येतावत्प्रमाण एव बोद्धव्यः, तदियं सप्तरज्जवायामत्वात् प्रमाणाङ्गुलतोऽसङ्ख्येययोजनकोटिकोट्ययता एकप्रादेशिकी श्रेणिः, सा च तयैव गुणिता प्रतरः, सोऽपि यथोक्तश्रेण्या गुणितो लोकः, अयमपि सङ्ख्येयेन राशिना गुणिताः सङ्ख्येया लोकाः असङ्ख्येयेन तु राशिना समाहतोऽसङ्ख्येया लोका अनन्तैश्च लोकैरलोकः, नन्वङ्गुलादिभिर्जीवा-जीवादिवस्तूनि प्रमीयन्त इति तेषां प्रमाणता युक्ता, अलोकेन तु न किञ्चित्प्रमीयते इत् कथं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्य प्रमाणता ?, उच्यते, यद्यपि बाह्यं वस्त्वनेन न प्रमीयते तथापि स्वस्वरूपं तेन प्रमीयत एव, तदभावे तद्विषयबुद्ध्यभावप्रसङ्गात्, तदेवम् 'अंगुलविहत्थियरणी'त्यादि गाथा व्याख्याता।

समासं च क्षेत्रप्रमाणमिति ॥ अथ कालप्रमाणमुच्यते-

*मू. ( २७१ ) से किं तं कालप्पमाणे ?, २ दुविहे पन्नत्ते, तंजहा- पएसनिप्फन्ने अ विभाग-निप्फन्ने अ ॥*

*मू. ( २७२ ) से किं तं पएसनिप्फन्ने ? २ एगसमयट्ठिईए दुसमयट्ठिईए तसमयट्ठिईए जाव दससमयट्टिईए असंखिज्जमयट्ठिईए, से तं पएसनिप्फन्ने ॥*

*मू. ( २७३ ) से किं तं विभागनिप्फन्ने ?,*

*मू. ( २७४ ) समयावलिअमुहुत्ता-दिवसअहोरत्तपक्खमासा य।*
*संवच्छरजुगपलिआ सागरओसप्पिपरिअट्टा ॥*

**वृ.** गतार्थमेव, नवरमिह प्रदेशाः-कालस्य निर्विभागा भागाः, तैर्निष्पन्नं प्रदेशनिष्पन्नं, तत्रैकसमयस्थितिकः परमाणुः स्कन्धो वा एकेन कालप्रदेशेन निष्पन्नो, द्विसमयस्थितिकस्तु द्वाभ्याम्, एवं यावदसङ्ख्येयसमयस्थितिकोऽसङ्ख्येयैः कालप्रदेशैर्निर्वृत्तः, परतस्त्वेकेन रूपेण पुद्गलानां स्थितिरेव नास्ति, प्रमाणता चेह प्रदेशनिष्पन्नद्रव्यप्रमाणवद्भावनीया, विभागनिष्पन्नं तु समयादि, तथा चाह- 'समयावलिय'गाहा, एतां च गाथां स्वयमेव विवरीषुः सर्वेषामपि कालभेदानां समयादित्वात् तन्निर्णयार्थं तावदाह-

*मू. ( २७५ ) से किं तं समए ?, समयस्स णं परूवणं करिस्सामि, से जहानामए तुण्णागदारह सिआ तरुणे बलवं जुगवं जुवाणे अप्पातंके थिरग्गहत्थे दढपानिपायपासपिट्ठंतरोरुपरिणते तलजमलजुयलपरिघाणिभबाहू चम्मेट्ठगदुहणमुट्ठिअसमाहतनिचितगत्तकाए उरस्सबल-समन्नागए लंघणपवणजइणवायामसमत्थे छेए दक्खे पत्तट्ठे कुसले मेहावी निउणे निउणसिप्पोवगए एगं महतीं पडसाडियं (वा) पट्टसाडियं वा गहाय सयराहं हत्थमेत्तं ओसारेज्जा, तत्थ चोअए पन्नवयं एवं वयासी-जेणं कालेणं तेनं तुण्णागदारएणं तीसे पडसाडिआए वा पट्टसाडिआए वा सयराहं हत्थमेत्ते ओसारिए से समए भवइ ?, नो इणट्ठे समट्ठे, कम्हा ?, जम्हा संखेज्जाणं तंतूणं समुदयसमितिसमागमेणं एगा पडसाडिआ निप्फज्जइ, अवरिल्लंमि तंतुमि अच्छिन्ने हिट्ठिल्ले तंतू न छिज्जइ, अन्नंमि काले उवरिल्ले तंतू छिज्जइ अन्नंमि काले हिट्ठिल्ले तंतू छिज्जइ, तम्हा से समए न भवइ।*

*एवं वयंतं पन्नवयं चोयए एवं वयासी-जेणं कालेणं तेनं तुन्नागदारएणं तीसे पडसाडिआए वा पडसाडियाए वा उवरिल्लं तंतू छिन्ने से समए भवइ ?, न भवइ, कम्हा ?, जम्हा संखेज्जाणं पम्हाणं समुदयसमितिसमागमेणं एगे तंतू निप्फज्जइ, उवरिल्ले पम्हे अछिण्णे हेट्ठिल्ले पम्हे न छिज्जइ, अण्णंमि काले उवरिल्ले पम्हे छिज्जइ अन्नंणि काले हेट्ठिल्ले पम्हे छिज्जइ, तम्हा से समए न भवइ। एवं वयंतं पन्नवयं चोअए एवं वयासी- जेणं कालेणं तेनं तुण्णागदारएणं तस्स तंतुस्स उपलिल् पम्हे छिन्ने से समए भवइ ?, न भवइ, कम्हा ? जम्हा अनंताणं संघायणं समुदयसमितिसमागमेणं एगे पम्हे निप्फज्जइ, उवरिल्ले संघाए अविसंघाइए हेट्ठिले संघाए न विसंघाइज्जइ, अन्नंमि काले उवरिले संघाए विसंघाइज्जइ अन्नंमि काले हिट्ठिले संघाए*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*विसंघाइज्जइ, तम्हा से समए न भवइ।*

*एत्तोऽवि अ नं सुहुमतराए समए पन्नत्ते समणाउसो !!*

**वृ.** अथ कोऽयं समय इति पृष्टे सत्याह-समयस्य प्ररूपणां-विस्तरवर्ती व्याख्यां करिष्यामि, सूक्ष्मत्वात् संक्षेपतः कथितोऽपि नासौ सम्यक् प्रतीतिपंथमवतरतीति भावः, तदेवाह-'से जहानामए' इत्यादि, स कश्चित् यथानामको-यत्प्रकारनामा देवदत्तादिनामेत्यर्थः, 'तुण्णाहगारए' सूचिक इत्यर्थः, 'स्यात्' भवेत्, यः किमित्याह-तरुणादिविशेषणाविशिष्टः पटसाटिकां पट्टसाटिकां वा गृहीत्वा 'सयराहं' झटिति कृत्वा हस्तमात्रमपसारयेत्-पाटयेदिति सण्टङ्कः, अथवा 'स' इति पूर्ववत् 'यथे'त्युपदर्शने नामेति सम्भावनायाम् 'ए' इति वाक्यालङ्कारे, ततश्च स कश्चिदेव तावत्संभाव्यते तुण्णागदारको यस्तरुमादिविशेषणः 'स्यात्' कदाचित् पटसाटिकां पट्टसाटिकां वा गृहीत्वा झटिति हस्तमात्रमपसारयेत्-पाटयेदिति तथैव सम्बन्धः, तत्र तरुणः-प्रवर्द्धमानवयाः, आह-दारकः प्रवर्द्धमानवया एव भवति, किं विशेषणेन ?, नैवम्,

आसन्नमृत्योः प्रवर्द्धमानवयस्त्वाभावात्, तस्य चासन्नमृत्युत्वेन विशिष्टसामर्थ्यानुपपत्तेः, विशष्टामर्थप्रतिपादनार्थश्चायमारम्भः, सोऽदुष्टो-निरुपद्रवो विशिष्टबलहेतुर्यस्यास्त्यसौ युगवान्, कालोपद्रवोऽपि सामर्थ्यविघ्नहेतुरितीत्थं विशेषणं, 'जुवाणो'त्ति युवा-यौवनस्थः प्राप्तवया एष इत्येवम् अनति-व्यपदिशति लोको यमसौ निरुक्तिवशात् युवानः, बाल्यादिकालेऽपि दारकोऽभिधीयते अतो विशिष्टवंयोऽवस्थापरिग्रहार्थमेतद्विशेषणम्, अल्पशब्दोऽग्रहस्तो-हस्ताग्रं यस्य स तथा, दृढं पाणिपादं यस्य पार्श्वौ पृष्ठ्यन्तरे च ऊरू च परिणते-परिनिष्ठिततां गते यस्य स तथा, सर्वावयवैरुत्तमसंहनन इत्यर्थः, 'तलयमलजुयलपरिघणिभबाहू' तलौ-तालवृक्षौ तयोर्यमलं-समश्रेणीकं यद् युगलं-द्वयं परिघश्च-अर्गला तन्निभौ-तत्सदृशौ दीर्घसरलपीनत्वादिना बाहू यस्य स तथा, आगन्तुकोपकरणजं सामर्थ्यमाह-'चर्मेष्ट्टकाद्रुघणमुष्टिकसमाहतनिचितगात्रकायः' चर्मेष्टकया गुघणेन मुष्टिकेन च समाहतानि प्रतिदिनमभ्यासप्रवृत्तस्य निचितानि-निबिडीकृतानि गात्राणि-स्कन्धोरुपृष्ठादीनि यत्र स तथाविधः कायो-देहो यस्य स तथा, चर्मेष्टकादयश्च लोकप्रतीता एव, 'औरस्यबलसमन्वागत' आन्तरोत्साहवीर्ययुक्तः, व्यायामवत्तां दर्शयति-

'लङ्घनप्लवनव्यायामसमर्थः' जवनशब्दः शीघ्रवचनः, छेकः-प्रयोगज्ञः दक्षः-शीघ्रकारी प्राप्तार्थः-अधिकृते कर्मणि निष्ठां गतः, प्राज्ञ इत्यन्ये, कुशलः-आलोचितकारी मेधावीसकृच्छ्रुतदृष्टकर्मज्ञः निपुण-उपायारम्भकः निपुणशिल्पोपगतः-सूक्ष्मशिल्पसमन्वितः, एवंविधो ह्यल्पेनैव कालेन साटिकां पाटयतीति बहुविशेषणोपादानं, स इत्थम्भूत एकां महतीं पटसाटिकां पट्टसाटिकां वा पटसाटिकाया इयं श्लक्ष्णतरेति भेदेनोपादानं, गृहीत्वा 'सयराह'मिति सकृत् झटिति कृत्वेत्यर्थः, हस्तमात्रमपसारयेत्-पाटयेदित्यर्थः, तत्रैवं स्थिते प्रेरकः-शिष्यः प्रज्ञापयतीति प्रज्ञापको-गुरुस्तमेवमवादीत्, किम ?-येन कालेन तेन तुण्णागदारकेण तस्याः पटसाटिकायाः पट्टसाटिकाया वा सकृद्धस्तमात्रमपसारितं-पाटितमसौ समयो भवति ?, प्रज्ञापक आह-नायमर्थः समर्थः-नैतदेवमित्युक्तं भवति, कस्मादिति पृष्ट उपपत्तिमाह-यस्माात् सङ्ख्येयानां तन्तूनां समुदयसमितिसमागमेनेति पूर्ववद्, एकार्था वा सर्वेऽप्यमी समुदायवाचकाः, पटसाटिकां

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निष्पद्यते,

तत्र च 'उवरिल्ले' त्ति उपरितने तन्तौ अच्छिन्ने-अविदारिते 'हेट्ठिल्ले' त्ति आधस्त्यतन्तुर्न छिद्यते, अतोऽन्यस्मिन् काले उपरितनस्तन्तुः छिद्यते अन्यस्मिन् काले आधस्त्यः, तस्मादसौ समयो न भवति, एवं वदन्तं प्रज्ञापकं प्रेरक एवमवादीत्-येन कालेन तेन तुन्नागदारकेन तस्याः-पटसाटिकाया उपरितनस्तन्तुश्छिन्नः स समयः ?, किं भवतीति शेषः, अत्र प्रज्ञापक आह-न भवतीति, कस्मात् ?, यस्मात्सङ्ख्येयानां 'पक्ष्मणां' लोके प्रतीतस्वरूपाणां समुदायेत्यादि सर्वं तथैव यावत्तस्मादसौ समयो न भवति, एवं वदन्तं प्रज्ञापकमित्याद्युपरितनपक्ष्मसूत्रमपि तथैव व्याख्येयं, नवरमनन्तानां परमाणूनां विशिष्टैकपरिणामापत्तिः सङ्घातः तेषामनन्तानां यः समुदयः-संयोगस्तेषां समुदयानां या अन्योऽन्यानुगतिरसौ समितिः तासां समागमेनएकवस्तु-निर्वर्तनाय मीलनेन उपरिनपक्ष्मोत्पद्यते, समुदायवाचकत्वेनैकार्था वा समुदयादयः, तस्माद-सावुपरित-नैकपक्ष्मच्छेदनकालः समयो न भवति, कस्तर्हि समय इत्याह-

'एत्तोऽवि अ ण' मित्यादि, एतस्माद् उपरितैनकपक्ष्मच्छेदनकाल् सूक्ष्मतरः समयः प्रज्ञप्तो हे ! श्रमणायुष्मन्निति, अत्राह-ननु यद्यन्तैः परमाणुसंङ्घातैः पक्ष्म निष्पद्यते ते च सङ्घाताः क्रमेण छिद्यन्ते, तर्ह्येकस्मिन्नपि पक्ष्मणि विदार्यमाणे अनन्ताः समया लगेयुः, एतच्चागमेन सह विरु-ध्यते, तत्रासङ्ख्येयास्वप्युत्सर्पिण्यवसर्पिणीषु समयासङ्ख्येयकस्यैव प्रतिपादनात्, यत उक्तं-"असंखेज्जासु णं भंते ! उस्सप्पिणिअवसप्पिणीसु केवइया समया पन्नत्ता ?, गोयमा !, असंखेज्जा, अनंतासु णं भंते ? उस्सप्पिणिअवसप्पिणीसु केव इया समया पन्नत्ता ? अनंता" तदेतत्कथम्, अत्रोच्यते, अस्त्येतत्, किन्तु पाटनप्रवृत्तपुरुषप्रयत्नस्याचिन्त्यशक्तित्वात् प्रति-समयमनन्तानां सङ्घातानां छेदः संपद्यते, एवं च सत्येकस्मिन् समये यावन्तः सङ्घाताश्छिद्यन्ते तैरनन्तैरपि स्थूलतर एक एव सङ्घातो विवक्ष्यते, एवम्भूताः स्थूलतरसङ्घाता एकस्मिन्पक्ष्मणि असङ्ख्येया एव भवन्ति, तेषां च क्रमेण छेदने असङ्ख्येयैः समयैः पक्ष्म छिद्यते, अतो न कश्चि-द्विरोधः,

इत्थं च विशेषतः सूत्रे अनुक्तमप्यवश्यं प्रतिपत्तव्यम्, अन्यथा ग्रन्थान्तरैः सह विरोधप्रसङ्गात् सूत्राणां च सूचामात्रत्वादिति, ततोऽसङ्ख्येयैरेव समयैर्यथोक्तपक्ष्मणो विदार्यमाणत्वाच्छद्म-स्थानुभवविषयस्य च समयप्रसाधकस्य विशिष्टक्रियाविशेषस्य कस्यचिद्दर्शयितुमशक्य-त्वाद् 'एत्तोऽवि नं सुहुमतराए समए' इति सामान्येनैवोक्तवानिति, एकस्मादुपरितनपक्ष्मच्छेदन-कालादसङ्ख्याततमोऽंशः समय इति स्थितं, युगपदनन्तसङ्घातविदारणहेतुपूर्वोक्तप्रयत्नविशेष-सिद्धश्च नगरादिप्रस्थितानवरतप्रवृत्तततपुरुषादेः प्रयत्नविशेषात् प्रतिक्षणं बहून्नभः प्रदेशान विल-ङ्घ्याचिरेणैवेष्टदेशप्राप्तिर्भावनीया, यदि पुनरसौ क्रमेणैकैकं व्योमप्रदेशं लङ्घयेत् तदा असङ्ख्ये-योत्सर्पिणीअवसर्पिणीभिरेवेष्टदेशं प्राप्नुयाद् 'अंगुलसेढीमित्ते उस्स्सप्पिणीउ असंखेज्जा' इत्यादिवचनादिति भावः, न चातीन्द्रियेष्वर्थेषु एकान्तेन युक्तिनिष्ठैर्भाव्यं, सर्वज्ञवचना-प्रामाण्याद्, उक्तं च -

"आगमश्चोपपत्तिश्च, सम्पूर्णं विद्धि (दृष्टि) लक्षणम् ।
अतीन्द्रियाणामर्थानां, सद्भावप्रतिपत्तये ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*मू. ( २७५ ) असंखिज्जाणं समयाणं समुदयसमितिसमागमेणं सा एगा आवलिअत्ति वुच्चइ, संखेज्जाओ आवलिओ ऊसासो, संखिज्जा आवलिआओ नीसासो ।*

*मू. ( २७६ ) हट्ठस्स अनवगल्लस्स, निरुवकिट्ठिस्स जंतुणो ।*
*एगे ईसासनीसासे, एस पाणुत्ति वुच्चइ ॥*

*मू. ( २७७ ) सत्त पाणूणि से थोवे, सत्त थोवाणि से लवे ।*
*लवाणं सत्तहत्तरीए, एस मुहुत्ते विआहिए ॥*

*मू. ( २७८ ) तिन्नि सहस्सा सत्त य सयाइं तेहुत्तरिं च ऊसासा ।*
*एस मुहुत्तो भणिओ सव्वेहिं अनंतनाणीहिं ॥*

*मू. ( २७९ ) एएणं मुहुत्तपमाणेणं तीसं मुहुत्ता अहोरत्तं, पन्नरस अहोरत्ता पक्खो, दो पक्खा मासो, दो मासा ऊऊ, तिन्नि ऊउ अयणं, दो अयणाइं संवच्छरे, पंच संवच्छराइं जुगे, वीसं जूगाइं वाससयं, दस वाससयाइं वाससहस्सं, सयं वाससहस्साणं वाससयसहस्सं, चोरासीइं वाससयसहस्साइं से एगे पुव्वंगे, चउरासीइ पुव्वंगससयसहस्साइं से एगे पुव्वे, चइरासीइं पुव्वसयसहस्साइं से एगे तुडिअंगे, चउरासीइं तुडिअंगसयसहस्साइं से एगे तुडिए, चउरासीइं तुडिअसयसहस्साइं से एगे अडडंगे, चोरासीइं अडडंगसयसहस्साइं से एगे अडडे, एवं अववंगे अववेहुहुअंगे हुहुए उप्पलंगे उप्पले पउमंगे पउमे नलिणंगे नलिणे अच्छनिऊरंगे अच्छनिउरे अउअंगे अउए पउअंगे पउए नउअंगे नउए चूलिअंगे चूलिया सीसपहेलियंगे चउरासीइं सीस-पहेलियंगसयसहस्साइं सा एगा सीसपहेलिया ।*

*एयावया चेव गणिए, एयावया चेव गणिअस्स विसए, एत्तोऽवरं ओवमिए पवत्तइ ।*

**वृ.** शेषं गतार्थं, यावत् 'हट्ठस्स' गाहा, हृष्टस्य-तुष्टस्य अनवकल्पस्य-जरसा अपीडितस्य निरुपक्लिष्टिस्य-व्याधिना प्राक्साम्परतं चानभिभूतस्य जन्तोः-मनुष्यादेरेक उच्छ्वासयुक्तो निःश्वासः एष प्राण उच्यते, शोकजरादिभिरस्वस्थस्य जन्तोरुच्छ्वासनिःश्वास त्वरितादिस्वरूपतया स्वभावस्थो न भवत्यतो हृष्टादिविशेषणोपादानं ।

'सत्त पाणूनी'त्यादि श्लोकः सप्त प्राणायथोक्तस्वरूपाः स एकः स्तोकः सप्त स्तोकाः स एको लवः लवानां सप्तसप्तत्या यो निष्पद्यते एव मुहूर्त्तो व्याख्यातः । साम्प्रतं सप्तसप्ततिलव-मानतया सामान्येय निरूपितं मुहूर्तमेवोच्छ्वाससङ्ख्यया विशेषतो निरूपयितुमाह-

'तिन्नि सहस्सा' गाहा, अस्या भावार्थः-सप्तभिरुच्छ्वासैरेकः स्तोको निर्दिष्टः, एवंभूताश्च स्तोका एकस्मिंल्लवे सप्त प्रोक्ताः, ततः सप्त सप्तभिरेव गुणिता इत्येकस्मिंल्लवे एकोनपञ्चा-शदुच्छ्वासाः सिद्धाः, एकस्मिंश्च मुहूर्ते लवाः सप्तसप्ततिर्निर्णीताः, अत एकोनपञ्चाशत्सप्तसप्तत्या गुण्यते ततो यथोक्तमुच्छ्वासनिःश्वासमानं भवति, उच्छ्वासशब्दस्योपलक्षणत्वात्,

अहोरात्रादयः शीर्षप्रहेलिकापर्यन्तास्तु कालप्रमाणविशेषाः प्राक्कालानुपूर्व्यामेव निर्णी-तार्थाः, 'एयावया चेव गणिए'इत्यादि, एतावत्-शीर्षप्रहलिकापर्यन्तमेवतावद्गणितं, एतावता-मेव शीर्ष-प्रहेलिकापर्यन्तानां चतुर्णवत्यधिकशतलक्षणानामेवाङ्कस्थानानां दर्शनादेतावदेव गणितं भवति न परति इति भावः, एतावानेव च-शीर्षप्रहेलिकाप्रमितराशिपर्यन्तो गणितस्य



Jain Education International For Private & Personal Use Only www.jainelibrary.org

विषयो, गमितस्थ प्रमेयमित्यर्थः, अतः परं सर्वमौपमिकम् ॥ तदेव निरूपयितुमाह-

*मू. ( २८० ) से किं तं ओवमिए ?, २ दुविहे पन्नत्ते, तंजहा- पलिओवमे य सागरोवमे य, से किं तं पलिओवमे ?, २ तिविहे पन्नत्ते, तंजहा- उद्धारपलिओवमे खेत्तपलिओवमे अ, से किं तं उद्धारपलिओवमे ?, २ दुविहे पन्नत्ते, तंजहा-सुहुमे अ वावहारिए अ, तत्थ णं जे से सुहुमे से ठप्पे, तत्थ नं जे से ववहारिए से जहानामए पल्लेसिआ जोयणं आयामविक्खभेणं जोअणं उड्ढं उच्चत्तेनं तं तुगुणं सविसेसं परिक्खेवेणं, से नं पल्ले एगाहिअबेआहिअतेआहिअ जाव उक्कोसेणं सत्तरत्तरूढाणं संसट्ठे संनिचित्ते भरिए वालग्गकोडीणं, ते णं वालग्गा नो अग्गी डहेज्जा नो वाऊ हरेज्जा नो कुहेज्जा नो पलिविद्धसिज्जा नो पूइत्ताए हव्वभागच्छेज्जा, तओ नं समए २ एगमेगं वालग्गं अवहाय जावइएणं कालेणं से पल्ले खीणे नीरए निल्लेवे निट्ठिए भवइ से तं ववहारिए उद्धारपलिओवमे ।*

*मू. ( २८१ ) एएसिं पल्लाणं कोडाकोडी हवेज्ज दसगुणिआ ।*
*तं ववहारअस्स उद्धारसागरोवमस्स एगस्स भवे परिमाणं ॥*

*मू. ( २८२ ) एएहिं वावहारिअउद्धारपलिओवमसागरोवमेहिं किं पओअणं ?, एएहिं वावहारिअउद्धारपलिओवमसागरोवमेहिं नत्थि किंचिप्पओअणं, केवलं पन्नवणा पन्नविज्जइ, से तं वावहारिए उद्धारपलिओवमे ।*

*से किं तं सुहुमे उद्धारपलिओवमे ?, २ से जहानामए पल्लेसिआ जोअणं आयामंविक्खंभेणं जोअणं उव्वेहेणं तं तिगुणं सविसेसं परिक्खेवेणं, से णं पल्ल एगाहिअबेआहिअतेआहिअ उक्कोसेणं सत्तरत्तपरूढाणं संसट्ठे संनिचिते भरिए वालग्गकोडीणं, तत्थ णं एगमेगे वालग्गे असंखिज्जाइं खंडाइं कज्जइ, ते णं वालग्गा दिट्ठीओगाहणाओ असंखेज्जइभागमेत्ता सुहुमस्स पणगजीवस्स सरीरोगाहणाउ असंखेज्जगुणा, ते णं वालग्गा नो अग्गी डहेज्जा नो वाऊ हरेज्जा नो कुहेज्जा नो पलिविद्धंसिजा नो पूइत्ताए हव्वमागच्छेज्जा, तओ णं समए २ एगमेगं वालग्गं अवहाय जावइएण कालेणं से पल्ले खीणे नीरए निल्लवे निट्ठिए भवइ, से तं सुहुमे उद्धारपलिओवमे ।*

*मू. ( २८३ ) एएसिं पल्लाणं कोडाकोडी हवेज्ज दसगुणिआ ।*
*तं सुहुमस्स उद्धारसागरोवमस्स एगस्स भवे परिमाणं ॥*

**वृ.** उपमया निर्वृत्तमौपमिकम्, उपमानमन्तरेण यत्कालप्रमाणमनतिशयिना ग्रहीतुं न शक्यते तदौपमिकमिति भावः, तच्च द्विधा-पल्योपमं सागरोपमं च, तत्र धान्यपल्यवत् पल्यो वक्ष्यमाणस्वरूपः तेनोपमा यस्मिन् तत्पल्योपमं, तथा महत्त्वसाम्यात् सागरेणोपमा यत्र तत्सागरोपमं, तत्र पल्योपमं त्रिधा, तद्यथा-

'उद्धारपलिओवमे' इत्यादि, तत्र वक्ष्यमाणस्वरूपवालाग्राणां तत्खण्डानां वा तद्वारेण द्वीपसमुद्राणां वा प्रतिसमयमुद्धरणम्-अपोद्धरणमपहरणमुद्धारः तद्विषयं तत्प्रधानं वा पल्योपममुद्धारपल्योपमं, तथा अद्धेति-कालः, स चेह प्रस्तावाद्वक्ष्यमाणवालाग्राणां तत्खण्डानां वा प्रत्येकं वर्षशतलक्षण उद्धारकालो गृह्यते, अथवा यो नारकाद्यायुःकालः प्रकृतपल्योपममेयत्वेन वक्ष्यते स एवोपादीयते, ततस्तत्प्रधानं पल्योपममद्धापल्योपमं तथा क्षेत्रम्-आकाशं तदुद्धारप्रधानं पल्योपमम् क्षेत्रपल्योपमम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्राद्यं निरूपयितुमाह-'से किं तं उद्धारपलिओवमे' इत्यादि, उद्धारपल्योपमं द्विविधं प्रज्ञप्तं, तद्यथा-वालाग्राणां सूक्ष्मखण्डकरणात् सूक्ष्मं च तेषामेव सांव्यवहारिकप्रत्यक्षव्यवहारिभिर्गृह्यमाणानामखण्डानां यथावस्थितानां ग्रहणात् प्ररूपणामात्रव्यवहारोपयोगित्वाद्व्यावहारिकं चेति, तत्र यत् सूक्ष्मं तत् स्थाप्यं-तिष्ठतु तावद्, व्यावहारिकप्ररूपणापूर्वकत्वादेतत्प्ररूपणायाः, पश्चात् प्ररूपयिष्यते इति भावः। तत्र यत्तद्व्यावहारिकमुद्धारपल्योपमं तदिदमिति शेषः, तदेव विवक्षुराह-

'से जहानामए' इत्यादि, तद्यथानाम धान्यपल्य इव पल्यः स्यात्, स च वृत्तत्वादायामविष्कम्भाभ्यां-दैर्घ्यविस्तराभ्यां प्रत्येकमुत्सेधाङ्गुलक्रमनिष्पन्नं योजनं ऊर्ध्वमुच्चत्वेनापि तद्योजनं त्रिगुणं सविशेषं 'परिक्खेवेणं' भ्रमितिमङ्गीकृत्येति, सर्वस्यापि वृत्तपरिधेः किञ्चिन्न्यूनषड्भागाधिकत्रिगुणत्वादस्यापि पल्यस्य किञ्चिबहुवचनलोपादेकाहिकद्व्याहिकत्र्याहिकाणामुत्कर्षतः सप्तरात्रप्ररूढानां भृतो बालग्रकोटीनामिति सम्बन्धः, तत्र मुण्डिते शिरस्येकेनाह्ना यावत्प्रमाणा बालाग्रकोठ्य उत्तिष्ठन्ति ता एकाहिक्यः द्वाभ्यां तु या उत्तिष्ठन्ति ता द्व्याहिक्तः त्रिभिस्तु त्र्याहिक्यः, कथंभूत इत्याह-'संमृष्ट' आकर्णं पूरितः 'सन्निचितः' प्रचयविशेषान्निबिडीकृतः।

किं बहुना?, एवंभूतोऽसौ भृतो येन तानि बालाग्राणि नाग्निर्दहेत् न वायुरपहरेत्, अतीव निचितत्वादग्निपवनावपि न तत्र क्रमेते इत्यर्थः, 'नो कुहेज्ज' त्ति नो कुथ्येयुः प्रचयविशेषादेव शुषिराभावात् वायोरसम्भवाच्च नासारतां गच्छेयुः, अत एव च 'नो परिविद्धंसेज्ज' त्ति कतिपयपरिशाटनमप्यङ्गीकृत्य न परिविध्वंसेरन्नित्यर्थः, अत एव च 'नो पूइत्ताए हव्वमागच्छेज्ज' त्ति न पूतित्वेन कदाचिद यागच्छेयुः-न कदाचिद्दुर्गन्धितां ग्राप्नुयुरित्यर्थः, 'तओ णं' ति तेभ्यो बालाग्रेभ्यः समये समये एकैकं वालाग्रमपहृत्य कालो मीयते इति शेषः, ततश्च 'जावइएण' मित्यादि, यावता कालेन स पल्यः 'क्षीणो' बालाग्रकर्षणात् क्षयसुपागतः आकृष्टधान्यकोष्ठागारवत्, तथा 'नीरए' त्ति निर्गतरजः कल्पसूक्ष्मवालाग्रोऽपकृष्टधान्यरजःकोष्ठागारवत्, तथा 'निल्लेवि' त्ति अत्यन्तसंश्लेपात् तन्मयतागतवालाग्रलेपापहारान्निर्लेपः अपनीतभित्त्यादिगतधान्यलेपकोष्ठागारवद्, एभिस्त्रिभिः प्रकारैर्निष्ठितो-विशुद्ध इत्यर्थः, एकार्थिका वा एते शब्दाः अत्यन्तविशुद्धिप्रतिपादनपराः, वाचनान्तरदृश्यमानं च अन्यदपि पदमुक्तानुसारेण व्याख्येयम्, एतावत्कालस्वरूपं बादरमुद्धारपल्योपमं भवति, एतच्च पल्यान्तर्गतवालाग्राणां सङ्ख्येयत्वात् सङ्ख्येयैः समॉस्तदपहारसम्भवात् सङ्ख्येयसमयमानं द्रष्टव्यम्। 'से त' मित्यादि निगमनम।

व्यावहारिकं पल्योपमं निरूप्याथ सागरोपममाह-'एएसिं पल्लाण' गाहा, 'एतेषाम्' अनन्तरोक्तपल्योपमानां दशभिः कोटाकोटिभिरेकं व्यावहारिकं सागरोपमंभवतीति तात्पर्य, शिष्यः पृच्छति-एतैर्व्यावहारिकपल्योपमसागरोपमैः किं प्रयोजनं?-कोऽर्थं साध्यते?, तत्रोत्तरं-नास्ति किञ्चित्प्रयोजनं, निरर्थकस्तर्हि तदुपन्यास इत्याशङ्क्याह-केवलं प्रज्ञापना प्रज्ञाप्यते-प्ररूपणामात्रं क्रियत इत्यर्थः, ननु निरर्थकस्य प्ररूपणयाऽपि किं कर्तव्यम्?, अतो यत्किञ्चिदेतत्, नैवम्, अभिप्रायापरिज्ञानाद्, एवं हि मन्यते-बादरे प्ररूपिते सूक्ष्मं सुखावसेयं स्याद् अतो बादरप्ररूपणा सूक्ष्मोपयोगित्वान्नैकान्ततो नैरर्थक्यमनुभवति, तर्हि नास्ति किञ्चित्प्रयोजन-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मित्युक्तमसत्यं प्राप्नोतीति चेत्, नैवम्, एतावतः प्रयोजनस्याल्पत्वेनाविवक्षितत्वाद्, एवं बादराद्धापल्योपमादावपि वाच्यम्।

'से किं तं सुहुमे' इत्यादि, गतार्थमेव, 'जाव तत्थ णं एगमेगे वालग्गे असंखेज्जाइ' मित्यादि पूर्वं बालाग्राणि सहजान्येव गृहीतानि, अत्र त्वेकैकमसङ्ख्येयखण्डीकृतं गृह्यत इति भावः, एवं सत्येकैकखण्डस्य यन्मानं भवति तन्निरूपयितुमाह-'तेणं वालग्गा दिट्ठीओगाहणाओ' इत्यादि, 'तानि' खण्डीकृतवालाग्राणि प्रत्येकं दृष्ट्यवगाहनातः किम्?-असङ्ख्येयभागमात्राणि, दृष्टि-चक्षुर्दर्शनोत्पन्नदर्शनरूपा साऽवगाहते-परिच्छेदद्वारेण प्रवर्तते यत्र वस्तुनि तदेव वस्तु दृष्ट्यवगाहना प्रोच्यते, ततोऽसङ्ख्येयभागवर्तीनि प्रत्येकं बालाग्रखण्डानि मन्तव्यानि, इदमुक्तं भवति-यत् पुद्गलद्रव्यं विशुद्धचक्षुर्दर्शनी छद्मस्थः पश्यति तदसङ्ख्येयभागमात्राण्येकैक-शस्तानि भवन्ति, द्रव्यतो निरूप्याथ क्षेत्रतस्तन्मानमाह-

*मू. ( २८४ ) एएहिं सुहुमउद्धारपलिओवमसागरोवमेहिं किं पओअणं ?, एएहिं सुहुमउ-द्धारपलिओवमसागरोवमेहिं दीवसमुद्दाणं उद्धारो घेप्पइ। केवइआ णं भंते! दीवसमुद्दा उद्धारेणं पं० ?, गो० ! जावइआणं अड्डाइज्जाणं उद्धारसा० उद्धारसमया एवइया णं दीवसमुद्दा उद्धारेणं पन्नत्ता, से तं सुहुमे उद्धारपलिओवमे । से तं उद्धा० ।*

**वृ.** 'सुहुमस्से' त्यादि, अयमत्र भावार्थः-सूक्ष्मपनकजीवशरीरं यावति क्षेत्रऽवगाहते ततोऽसङ्ख्येयगुणानि प्रत्येकं तानि भवन्ति, बादरपृथिवीकायिकपर्याप्तशरीरतुल्यानीति वृद्धवादः, एषा च बालाग्रखण्डानामसङ्ख्येयत्वात् प्रतिसमयमुद्धारे किल सङ्ख्येया वर्षकोट्योऽतिक्रामन्ति, अतः सङ्ख्येयवर्षकोटिमानमिदमवसेयं, शेषं तूक्तार्थप्रायं यावत् 'जावइया अड्डाइज्जाणं उद्धारसागरोवमाण' मित्यादि, यावन्तोऽर्द्धतृतीयसागरोपमेषु 'उद्धारसमया' बालाग्रोद्धारोपलक्षिताः समया उद्धारसमयाः एतावन्तो द्विगुणद्विगुणविष्कम्भा द्वीसमुद्रा यथोक्तेनोद्धारेण प्रज्ञप्ताः, असङ्ख्येया इत्यर्थः।

उक्तमुद्धारपल्योपमम्, अथाद्धापल्योपमं निरूपयितुमाह-

*मू. ( २८४ वर्तते ) से किं तं अद्धा० ?, २ दुविहे पन्नत्ते, तंजहा-सुहुमे अ वावहारिए अ, तत्थ णं जे से सुहुमे से ठप्पे, तत्थ णं जे से वाव० से जहा० पल्ले० जोअणं आया० जोअणं उ० तं तिगुणं सवि० परि०, से नं पल्ले एगाहिअबेआहिअतेआहिअ जाव भरिए बालग्गकोडीणं, ते णं वालग्गो नो अग्गी डहेज्जा जाव नो पलिविद्धंसिज्जा नो पइत्ताए हव्वमागच्छेज्जा, तओ णं वाससए २ एगमेगं वालग्गं अवहाय जावइएणं कालेणं से पल्ले खीणे नीरए निल्लेवे निट्ठिए भवइ, से तं वावहारिए अद्धापलिओवमे।*

*मू. ( २८५ ) एएसिं पल्लाणं कोडाकोडी भविज्ज दसगुणिया।*
*तं ववहारिअस्स अद्धासा० एगस्स भवे परिमाणं॥*

*मू. ( २८६ ) एएहिं ववहारिएहिं अद्धा० प० सागरो० किं प० ? एएहिं व० अद्धाप० साग० नित्थि किंचिप्पओअणं, केवलं-पन्नव०, से तं ववहारिए अद्धाप० ।*

*से किं तं सुहुमे अद्धाप० ?, पल्ले सिआ जोअणं आया० जोअणं उड्ढं० तं तिगुणं सविसे० परि०, से णं पल्ले एगाहिअबेआ० तेआ० जाव भरिए वालग्गकोडीणं, तत्थ णं एगमेगे बालग्गे*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*असंखेज्जाइं खंडाइं कज्जइ, ते नं वालग्गा दिट्ठीओगाहणाओ असंखेज्जइभोगमेत्ता सुहुमस्स फणग० सरीरोगाहणाओ असंखेज्जगुणा, ते णं वालग्गा नो अग्गी० जाव नो पलिविद्धंसिज्जा नो पूइत्ताए हव्वमा०, तओ णं वाससए २ एगमेगं वालग्गं अवहाय जावइएणं कालेणं से प० खी० नी० निल्लेवे निट्ठिए भवइ, से तं सुहुमे अद्धा० ।*

**मू. ( २८७ )** *एएसिं पल्लाणं कोडाकोडी भवेज्ज दसगुणिया ।*
*तं सुहुमस्स अद्धासा० एगस्स भवे परिमाणं ॥*

**मू. ( २८८ )** *एएहिं सुहुमेहिं अद्धाप० सागरोवमेहिं किं पओअणं ?, एएहिं सुहुमेहिं अद्धाप० साग० नेरइअतिरिक्खजोणिअमनुस्सदेवाणं आउअं मविज्जइ ।*

**वृ.** इदमप्युद्धारपल्योपमवत्सर्वं भावनीयं, नवरमुद्धारकालस्येह वर्षशतमानत्वाद् व्यावहारिकपल्योपमे सङ्ख्येया वर्षाकोट्योऽवसेयाः, सूक्ष्मपल्योपमे त्वसङ्ख्येया इति ॥

**मू. ( २८९ )** *नेरइयाणं भंते ! केवइयं कालं ठिई पं ?, गो० ! जहन्नेणं दस वाससहस्साइं उक्कोसेणं तेत्तीसं सागरोवमाइं, रयणप्पहापुढविणेरइयाणं भंते ! केवइयं कालं ठिई पं० ?, गो० ! जहन्नेणं दस वा० उक्कोसेणं एगं सागरोवमं, अपज्जत्तगरयणप्पहापुढविनेरइयाणं भंते ! केवइयं० पं० ?, गो० ! जहन्नेणवि अंतोमुहुत्तं उक्कोसेणवि अंतोमुहुत्तं, पज्जत्तगरयणप्प० नेरइयाणं भंते ! केवइ० पं० ?, गो० ! जहन्नेण दसवा० अंतोमुहुत्तूणाइं उक्कोसेणं एगं सागरोवमं अतोमुहुत्तोणं, सक्करप्पंहारपुढविनेरइआणं भंते ! केवइ० पं० ?, गो० ! जहन्नेणं एगं सागरोवम उक्कोसेणं तिन्नि सागरोवमाइं, एवं सेसपुढवीसु पुच्छा भाणियव्वा,*

*वालुअप्पहापुढविनेरइआणं जह० तिन्नि सागरोवमाइं उक्को० सत्त सागरोवमाइं, पंकप्पहापु० जह० सत्त० उक्को० दस सा०, धूमप्पहापु० जह० दस सा० उक्को० सत्तरस सागरोवमाइं, तमप्पहापु० जह० सत्तरस० उक्कोसेणं बावीस०, तमतमापुढविनेरइयाणं भंते ! के० ?, गो० ! जह० बावीसं सा० उक्कोसेणं तेत्तीसं सागरोवमाइ ।*

**वृ.** यदि नारकादीनामायूष्येतैर्मीयन्ते तर्हि नारकाणां भदन्त ! कियन्तं कालं स्थितिः प्रज्ञप्ता ? स्थीयते नारकादिभवेष्वनयेति स्थितिः-आयुःकर्मानुभवपरिणतिः, इह यद्यपि कर्मपुद्गलानां बन्धकालादारभ्य निर्जरणकालं यावत्सामान्येनावस्तितिः कर्मशास्त्रेषु स्थितिः प्रतीता तथाऽप्यायुःकर्मपुद्गलानुभवनमेव जीवितं रूढं, शास्त्रकारस्यापि च दशवर्षसहस्रादिकां स्थितिं प्रतिपादयतस्तदेवाभिधातुभिप्रेतम्, अन्यथा बद्धेनायुषा प्राग्भवे यावन्तं कालमवतिष्ठते जन्तुस्तेन समधिकैव दशवर्षसहस्रादिकां स्थितिरुक्ता स्यात्, न चैवं, तस्मान्नारकादिभवप्राप्तानां प्रथमसमयादारभ्यायुषोऽनुभवकाल एवावस्थितः, सा च नारकाणामौधिकपदे जघन्यतो दशवर्षसहस्राणि, उत्कृष्टतस्तु त्रयस्त्रिशंत्सागरोपमानि, रत्नप्रभायां जघन्या तथैव उत्कृष्टा तु सागरोपमम, अपर्याप्तपदे जघन्यत उत्कृष्टतश्चान्तर्मुहूर्तमेव, ततः परमवश्यमेषां पर्याप्तत्व-सम्भवाद्, पर्याप्तपदे चापर्याप्तकालेन हीना औधिक्येव सस्थितिर्द्रष्टव्या, एवमन्यास्वपि पृथिवीषु वाच्यं, नवरमुत्कृष्टा स्थितिः सर्वासु इत्थमवसेया -

सागरमेगं तिय सत्त दस य सत्तरस तह य बावीसा ।
तेत्तीसं जाव ठिई सत्तसुवि कमेण पुढवीसु ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्ति, जघन्या तु-'जा पढमाए जेट्ठा सा बीयाए कणिट्ठिया भणिया' इत्यादिक्रमाद्भावनीया, अपर्याप्तकालस्तु सर्वत्रान्तर्मुहूर्तमेव, अपर्याप्तकाले चौधिकस्थितिर्विशोधिते सर्वत्र शेषा पर्याप्तस्थितिः, अपर्याप्ताश्च नारका देवा असङ्ख्येयवर्षायुष्कतिर्यङ्मनुष्याश्च करणत एव द्रष्टव्याः, लब्धितस्तु पर्याप्ता एव, शेषास्तु लब्धव्या पर्याप्ता अपर्याप्ताश्च सम्भवन्ति । तदेवं पूर्वाभिहितं चतुर्विंशतिदण्डकमनुसृत्य नारकाणामायुःस्थितिर्निरूपिता, अथासुकुमाराणां निरूपयितुमाह-

*मू. ( २८९ वर्तते ) असुरकुमाराणं भंते ! केवइयं कालं ठिई पं ?, गो० ! जहन्नेणं दस वाससहस्साइं उक्कोसेणं सातिरेगं सागरोवमं, असुरकुमारदेवीणं भंते ! केवइयं पं ?, गो० ! जहन्नेणं दस वा०उक्को० अद्धपंचमाइं पलिओवमाइं, नागकुमाराणं भंते ! केवइयं पं ?, गो० ! जहन्नेणं दस वास०उक्कोसेणे देसूनाइं दुन्नि पलिओवमाइं, नागकुमारीणं भंते ! केवइयं पं ?, गो० ! जहन्नेणं दस वा० उक्को०देसूणं* पलिओवमं, एवं जहा नाग० देवाणं देवीण य तहा जाव थणियकुमाराणं देवाणं देवीण य भाणियव्वं ।

*पुढवीकाइयाणं भंते ! के० ?, गो० ! जह० अंतोमु० उक्को० बावीसं वाससहस्साइं, सुहुम-पुढवीकाइयाणं ओहियाणं अपज्जत्तयाणं पज्जत्तयाण य तिन्निवि पुच्छा, गो० ! जह० अंतोमुहुत्तं उक्कोसेणवि अंतोमुहुत्तं, बादरपुढविकाइयाणं पुच्छा, गो० ! जह० अंतोमुहुत्तं उक्कोसेणं बावीसं वाससहस्साइं, अपज्जत्तगबादरपु० पुच्छा, गो० ! जहन्नेणवि अं०उक्कोसेणेवि अं० पज्जत्त-गबादरपु० पुच्छा, गो० ! जह० अंतोमुहुत्तं उक्को० बावीसं वा अंतोमुहुत्तूणाइं, एवं सेसकाइयाणपि पुच्छावयणं भाणियव्वं, आउकाइयाणं जह० अंतो० उक्कोसे० सत्त वा०, सुहुमआउकाइ० ओहिआणं अपज्जत्तगाणं पज्जत्तगाणं तिण्हवि जहण्णणवि अंतो उक्कोसेणवि अं०, बादर-आउका० जहा ओहिआणं, अपज्जत्तगबादरआ० जहन्नेणवि अंतो० उक्कोसेणवि अं०, पज्जत्तग-बादरआ० जह० अंतोमुहुत्तं उक्को० सत्त वाससह० अंतोमुहुत्तूनाइं ।*

*तेउकाइआणं जह० अं० उक्को० तिन्नि राइंदिआइं, सुहुमते० ओहिआणं अपज्जत्तगाणं पज्जत्तगाणं तिण्हवि जहन्नेणवि अंतो० उक्कोसेणवि अं०, बादरतेउकाइयाणं ज० अंतो० उक्को-सेणं तिन्न राइ०, अपजत्तबा० ते जहन्नेणवि अन्तो उक्को० अन्तो०, पज्जत्तग बाद० जह० अंतोमु० उक्को० तिन्नि रा० अंतोमु० ।*

*वाउका० जहन्नेणं अंतोमुहुत्तं उक्को० तिन्नि वाससहस्साइं, सुहुमवाउ० ओहिआणं अपज्जत्तगाणं पज्जत्तगाण य तिण्हवि जहन्नेऽवि अंतो० उक्कोसे० अं०, बादरवा० ज० अन्तो० उक्को० तिन्नि वा० सह०, अपज्जत्तगबादरवाउकाइ० जह० अं० उक्कोसेणवि अं०, पज्जत्तगबादरवाउ० जह० अंतोमुहुत्तं उक्को० तिन्नि वा० अंतोमु० ।*

*वणस्सइकाइआणं जहन्नेणं अं० उक्को० दस वाससहस्साइं, सुहुमवणस्सइका० ओहिआणं अपज्जत्तगाणं पज्जत्तगाण य तिण्हवि जहन्नेवि अंतोमु० उक्कोसे० अं०, बादरवणस्सइकाइआणं जह० अंतो० उक्को० दस वा०, अपज्जत्तगबा० जह० अं० उक्कोसे० अंतो०, पज्जत्तगबादरवण० जहन्नेणं अं० उक्कोसेणं दस वास० सह० अंतोमुहुत्तूणाइं ।*

*बेइंदिआणं भंते ! केव० पं० ?, गो० ! जहन्नेणं अंतोमुहुत्तं उक्को० बारस संवच्छराणि,*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अपज्जगबेइंदिआणं पुच्छा, गो! जहन्नेणवि अंतोमुहुत्तं उक्कोसेणवि अं०, पज्जत्तगबेइं० जह० अं० उक्को० बारस सं० अंतोमुहुत्तूणाइं।

तेइंदिआणं पुच्छा, गो०! जह० अं० उक्को० एगुणपन्नासं राइंदिआणं, अपज्जत्तगतेइंदिआणं पुच्छा, गो०! जहन्नेणवि अंतो० उक्कोसे० अं०, पज्जत्तगतेइं० पुच्छा, गो०! जह० अंतोमुहुत्तं उक्को० एगुगपन्नासं राइंदिआइं अंतोमुहुत्तूणाइं।

चउरिंदिआणं भंते! केवइ० पं० ?, गो०! जह० अंतो० उक्को० छम्मासा, अपज्जत्तगचउरिंदिआणं पुच्छा, गो०! जहन्नेणवि अंतो० इक्कोसेणवि अंतो०, पज्जत्तगचउरिंदिआणं पुच्छा, गो०! जहन्नेणं अं० उक्को० छम्मासा अंतो०।

पंचिंदियतिरिक्खजोणिआणं भंते! केवइ० पं० ?, गो०! जह० अंतोमुहुत्तं उक्को० तिन्नि पलिओवमाइं, जलयरपंचिंदियतिरिक्खजोनिआणं ंते! केवइयं कालं ठिई पं० ?, गो०! जहन्नेणं अंतो० उक्को० पुव्वकोडी, अपज्जत्तयसंमुच्छिमजलयरपंचिंदियपुच्छा, गो०! जहन्नेणवि अंतो० उक्कोसेणवि अंतो०, पज्जत्तयसंमुच्छिमजलयरपंचिंदियपुच्छा, गो०! जह० अंतो० उक्को० पुव्वकोडी अंतोमुहुत्तूणा, गब्भवक्कं तियजलयरपंचिंदियपुच्छा गो०! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं पुव्वकोडी, अपज्जत्तगगब्भवक्कंतियजलयरपंचिंदियपुच्छा गो०! जहन्नेणं अंतो० उक्कोसेणेवि अंतो०, पज्जत्तगगब्भवक्कं तियजलयरपंचिंदियपुच्छा, गो०! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं पुव्वकोडी अंतोमुहुत्तूणां, चउप्पयथलयरपंचिंदियपुच्छा, गो०! जह० अंतो० उक्को० तिन्नि पलिओवमा, संमुच्छिमचउप्पयथलयरपंचिंदिय जाव गो०! जह० अंतो० उक्को० चउरासीइं वाससहस्साइं, अपज्जत्तयसंमुच्छिमचउप्पयथलयरपंचिंदिय जाव गो०! जहन्नेणवि अंतो० उक्कोसेणवि० अंतो, पज्जत्तयसंमुच्छिमचउप्पयथलयरपंचिंदिय जाव गो०! जह० अंतो० चउरासीइं वाससहस्साइं अंतोमुहुत्तूणाइं, गब्भवक्कंतियचउप्पयथलयरपंचिंदिय जाव गो०! जह० अंतो० उक्को० तिन्नि पलिओवमाइं, अपज्जत्तगगब्भवक्कंतियचउप्पयथलयरपंचिंदिय जाव गो०! जहन्नेणवि अंतो० उक्कोसेणवि अंतो०, पज्जत्तगगब्भवक्कंतियचउप्पयथलयरपंचिंदिय जाव गो०! जह० अंतो० उक्को० तिन्नि पलिओवमाइं अंतोमुहुत्तूणाइं, उरपरिसप्पथलयरपंचिंदियपुच्छा, गो०! जह० अंतो० उक्को० पुव्वकोडी, संमुच्छमरउरपरिसप्पथलयरपंचिंदियपुच्छा, गो०! जह० अंतो० उक्को० तेवन्नं वाससहस्साइं, अपज्जत्तयसंच्छिमउरपरिसप्पथलयरपंचिंदिय जाव गो०! जहन्नेणवि अंतो० उक्कोसेणवि अंतो०, पज्जत्तयसंमुच्छिमउरपरिसप्पथलयरपंचिंदियजाव गो०! जह० अंतो० उक्को० तेवन्नं वाससहस्साइं, अंतोमुहुत्तूणाइं, गब्भवक्कंतियउरपरिसप्पथलयरपंचिंदिय जाव गो०! जह० अंतो० उक्को० पुव्वकोडी, अपज्जत्तगगब्भवक्कंतियउरपरिसप्पथलयरपंचिंदिय जाव गो०! जहन्नेणवि अंतो० उक्कोसेणवि अंतो०, पज्जत्तगगब्भवक्कंतियउरपरिसप्पथलयरपंचिंदिय जाव गो०! जह० अंतो० उक्को० पुव्वकोडी अंतोमुहुत्तूणा, भुअपरिसप्पथलयरपंचिंदिय जाव गो०! जहन्नेन अंतो उक्कोसेणं पुव्वकोडी, संमुच्छिमभुयपरिसप्पथल० गो०! जह० अतो० उक्को० बायालीसं वाससहस्साइं, अपज्जत्तयसंमुच्छिमभुअपरिसप्पथलयरपंचिंदिय जाव गो०! जह० अंतो० उक्को०,

पज्जत्तयसंमुच्छिमभुअपरिसप्पथलयरपंचिंदिय जाव गो०! जह० अंतो० उक्को०, बायालीसं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वाससहस्साइं अंतो० गब्भवक्कंतियउरपरिसप्पथलयरपंचिंदिय जाव गो० ! जह० अंतो० उक्को० पुव्वकोडी, अपज्जत्तयगब्भवक्कंतियउरपरिसप्पथलयरपंचिंदिय जाव गो० ! जहन्नेणवि अंतो० उक्कोसेणवि अंतो०, पज्जत्तयगगब्भवक्कंतियभूअपरिसप्पथलयरपंचिंदिय जाव गो० ! जह० अंतो० उक्को० पुव्वकोडी अंतोमुहुत्तूणा, खहयरपंचिंदिय जाव गो० ! जह० अंतो० उक्को० पलिओवमस्स असंखेज्जइभागो, संमुच्छिमखहयरपंचिंदिय जाव गो० ! जह० अंतो० उक्को० बावत्तरिं वाससहस्साइं, अपज्जत्तगसंमुच्छिमखहयरपंचिंदियपुच्छा, गो० ! जह० अंतो० उक्को० अंतो० पज्जत्तगसंमुच्छिमखहयरपंचिंदियपुच्छा, गो० ! जहन्नेणं अंतो० उक्को० बावत्तरिं वाससहस्साइं अंतोमुहुत्तूणाइं, गब्भवक्कंतियखहयर० जाव गो० ! जह० अंतो० उक्को० पलिओवमस्स असंखेज्जइभागो, अपज्जत्तगगब्भवक्कंतियखहयर० जाव गो० ! जहन्नेणवि अतो० उक्को० अंतो०, पज्जत्तगखहयरपंचिंदियतिरिक्खजोणिआणं भंते ! केवइयं कालं ठिई पन्नत्ता, गो० ! जह० अतो० उक्को० पलिओवमस्स असंखेज्जइभागो अंतोमुहुत्तूणो । एत्थ एएसि णं संगहणिगाहाओ भवंति, तंजहा-

मू. ( २१० ) संमुच्छिमपुव्वकोडी चउरासीइं भवे सहस्साइं ।
तेवन्ना बायाला बावत्तरिमेव पक्खीणं ॥

मू. ( २११ ) गब्भंमि पुव्वकोडी तिन्नि य पलिओवमाइं परमाऊ ।
उरगभुअपुव्वकोडी पलिओवमासंखभागो अ ॥

मू. ( २१२ ) मनुस्साणं भंते ! केवइयं० पन्नत्ता, गो० ! जह० अतो० उक्को० तिन्नि पलिओवमाइं, संमुच्छिममनिस्साणं जाव गो० ! जहन्नेणवि अतो० उक्कोसे० अंतो०, गब्भवक्कंतियमनुस्साणं जाव गो० ! जह० अतो० उक्को० तिन्नि पलिओवमाइं, अपज्जत्तगगब्भ० मनुस्साणं भंते ! केवइयं० पन्नत्ता ?, गो० ! जह० अतो० उक्को० अंतो०, पज्जत्तगगब्भ० मनुस्साणं भंते ! केवइ०, गो० ! जह० अतो० उक्को० तिन्नि पलि० अंतोमुहुत्तूणाइं ।

वाणमंतराणं देवाणं केवइ० पन्नत्ता ?, गो० ! जह० दस वाससहस्साइं उक्को० पलिओवमं, वाणमंतरीणं देवीणं भंते ! केव० पन्नत्ता ?, गो० ! जह० दस वाससहस्साइं उक्को० अद्धपलिओवमं ।

जोइसियाणं भंते ! देवाणं केवइ० ?, गो० ! जह० सातिरेगं अट्ठभागपलिओवमं उक्को० पलिओवमं वाससयसहस्समब्भहियं, जोइसियदेवीणं भंते ! केवइ० ?, गो० ! जहन्नेणं अट्ठभागपलिओवमं उक्कोसेणं अद्धपलिओवमं पन्नासाए वाससहस्सेहिं अब्भहिअं, चंदविमाणाणं भंते ! देवाणं केव० ?, गो० ! जह० चउभागपलिओवमं उक्को० पलिओवमं वाससयसहस्समब्भहिअं चंदविमाणाणं भंते ! देवीणं केव० ?, गो० ! जह० चउभागपलिओवमं उक्को० अद्धपलिओवमं पन्नासाए वाससहस्सेहिं अब्भहिअं, सूरविमानाणं भंते ! देवाणं गो० ! जह० चउभागपलिओवमं उक्को० पलिओवमं वाससहस्सब्भहिअं, सूरविमानाणं देवीणं, गो० ! जह० चउभागपलिओवमं उक्को० अद्धपलिओवमं, पंचहिं वाससएहिं अब्भहिअं, गहविमानाणं देवाणं गो० ! जह० चउभागपलिओवमं उक्को० पलिओवमं, गहविमानाणं भंते ! देवीणं गो० ! जह० चउभागपलिओवमं उक्को० अद्धपलिओवमं नक्खत्तविमानाणं भंते ! देवाणं गो० ! जह०

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चउभागपलिओवमं उक्को० अद्धपलिओवमं नक्खत्तविमानाणं भंते ! देवीणं गो० ! जह० चउभागपलिओवमं उक्को० सातिरेगं चउभागपलिओवमं, ताराविमानाणं भंते ! गो० ! जह० साइरेगं अट्ठभागपलिओवमं उक्को० चउभागपलिओवमं, ताराविमाणाणं देवीणं भंते ! केवइअं० पन्नत्ता ?, गो० ! जह० अट्ठभागपलिओवमं उक्को० साइरेगं अट्ठभागपलिओवमं।

वेमाणिआणं भंते ! देवाणं केव० पन्नत्ता ?, गो० ! जह० पलिओवमं उक्को० तेत्तीसं सागरोवमाइं, वेमाणिआणं भंते ! देवीणं केवइ० पन्नत्ता ?, गो० ! जह० पलिओवमं उक्को० पनपन्नं पलिओवमाइं, सोहम्मे नं भंते ! कप्पे देवाणं, गो० ! जह० पलिओवमं उक्को० दो सागरोवमाइं,

सोहम्मे णं भंते ! कप्पे परिग्गहिआदेवीणं, गो० ! जह० पलिओवमं उक्को० सत्त पलिओवमाइं, सोहम्मे णं भंते ! कप्पे अपरिग्गहिआदेवीणं ! के० ?, गो० ! जह० पलिओवमं उक्को० पन्नासं पलिओवमं,

ईसाने णं भंते ! कप्पे देवाणं, गो० ! जह० साइरेगं पलिओवमं उक्को० साइरेगाइं दो सागरोवमाइं, ईसाने णं भंते ! कप्पे परिग्गहिआदेवीणं, गो० ! जह० साइरेगं पलिओवमं उक्को० नव पलिओवमाइं, अपरिग्गहिआदेवीणं, भंते ! के० ?, गो० ! जह० साइ० पलिओवमं उक्को० पणपन्नं पलिओवमाइं,

सणंकुमारे णं भंते ! कप्पे देवाणं, गो० ! जह० दो सागरोवमाइं उक्कोसेणं सत्त सागरोवमाइं, माहिंदे णं भंते ! कप्पे देवाणं, गो० ! जह० साइरेगाइं दो सागरोवमाइं, उक्को० साइरेगाइं सत्त सागरोवमाइं, बंभलोए णं भंते ! कप्पे देवाणं, गो० ! जह० सत्त सागरोवमाइं उक्को० दस सागरोवमाइं, कप्पे कप्पे केवइ० पं० ?, गो० ! एवं भाणियव्वं-लंतए जह० दस सागरोवमाइं उक्को० चउद्दस सागरोवमाइं, महासुक्के जह० चउद्दस सागरोवमाइं उक्को० सत्तरस सागरोवमाइं, सहस्सारे जह० सत्तरस सागरोवमाइं उक्को० अट्ठारस सागरोवमाइं, आणए जह० अट्ठारस सागरोवमाइं उक्को० एगूणवीसं सागरोवमाइं, पाणए जह० एगूणवीसं साग० उक्को० वीसं सागरोवमाइं, आरणे जह० वीसं सागरोवमाइं उक्को० एक्कवीसं सागरोवमाइं, अच्चुए जह० एक्कवीसं सागरोवमाइं उक्को० बावीसं सागरोवमाइं,

हेट्ठिमहेट्ठिमगेविज्जविमाणेसु नं भंते ! देवाणं केवइ० पं० ?, गो० ! जह० बावीसं सागरोवमाइं उक्को० तेवीसं सागरोवमाइं, हेट्ठिममज्झिमगेवेज्जविमानेसु णं भंते ! देवाणं, गो० ! जह० चउवीसं साग० उक्को० पंचवीसं साग०, मज्झिमगेवेज्जविमानेसु केव० जह० पणवीसं सागरोवमाइं उक्को० छव्वीसं सागरोवमाइं, मज्झिमगेवेज्जविमानेसु णं भंते ! गो० ! जह० छव्वीसं सागरोवमाइं उक्को० सत्तावीसं, सागरोवमाइं, मज्झिमउवरिमगेवे०, गो० ! जह० सत्तावीसं सा० उक्को० एगूणतीसं सागरोवमाइं, उवरिममज्झिमगेवेज्जविमानेसु णं भंते ! देवाणं, गो० ! जह० एगूणतीसं उक्को० तीसं सागरोवमाइं उवरिमउवरिमगेवेज्जविमाणेसु णं भंते ! देवाणं, गो० ! जह० तीसं सागरोवमाइं, उक्को० एक्कतीसं सागरोवमाइं,

विजयवेजयंतजयंतअपराजितविमानेसु णं भंते ! देवाणं केवइ० पन्नत्ता ?, गो० ! जहन्नेणं एक्कतीसं सागरोवमाइं उक्को० तेत्तीसं सागरोवमाइं, सव्वट्ठसिद्धे णं भंते ! महाविमाणे देवाणं, केवइ० पन्नत्ता ?, गो० ! अजहन्नमनुक्कोसेणं तेत्तीसं सागरोवमाइं। से तं सुहुमे अद्धापलि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*ओवमे। से तं अद्धापलिओवमे।*

**वृ.** सूत्रसिद्धमेव यावन्मनुष्यसूत्रं, नवरं पृथिव्यादीनामपर्याप्तानां जघन्यत उत्कृष्टतश्चान्तर्मुहूर्त्तमेव स्थितिः, ततः परमवश्यं पर्याप्तत्वसम्भवात् मरणाद्वेति भावनीयम्। व्यन्तरादिसूत्राण्यपि वैमानिकसूत्रपर्यन्तानि पाठसिद्धान्येव, नवरमेतेषां पर्याप्तानां जघन्यत उत्कृष्टतश्चान्तर्मुहूर्त्तमेव स्थितिः, ततः परमवश्यं पर्याप्तत्वसंभवादेव भवनीयं, ग्रैवेयकसूत्रे चाधस्तनास्त्रयोऽधस्तनग्रैवेयकशब्देनोच्यन्ते, मध्यमास्तु त्रयो मध्यमग्रैवेकशब्देन, उपरितनास्तु त्रय उपरितनग्रैवेयकशब्देन, पुनरप्यधस्तनेषु त्रिषु प्रस्तेटेषु मध्येऽधस्तनः प्रस्तटोधस्तनाधस्तनग्रैवेयकशब्देन व्यपदिश्यते, मध्यमस्त्वधस्तनमध्यमशब्देन, उपरितनस्त्वधस्तनोपरिमशब्देन उपरितनस्तु मध्यमोपरितशब्देन, एवमुपरितनेष्वपि त्रिषु प्रस्तटेषु क्रमेणोपरिमाधस्तनोपरिममध्यमउपरिमोपरिमशब्दवाच्यता भावनीयेति॥

*मू. ( २१३ ) से किं तं खेत्तपलिओवमे ?, २ दुविहे पन्नत्ते, तंजहा-सुहुमे अ, वावहारिए अ, तत्थ णं जे से सुहुमे से ठप्प, तत्थ णं जे से ववहारिए से जहानामए पल्ले सिआ जोअणं आयामविक्खंभेणं जोअणं उव्वेहेणं ते तिगुणं सविसेसं परिक्खेवेणं, से णं पल्ले एगाहिअबेआहिअतेआहिअ जाव भरिए वालग्गकोडीणं, ते णं वालग्गा नो अग्गी डहेज्जा जाव नो पूइत्ताइ हव्वमागच्छेज्जा, जे णं तस्स पल्लस्स आगासपएसा तेहिं वालग्गेहिं अप्फुन्ना तओ णं समए २ एगमेगं आगासपएसं अवहाय जावइएणं कालेणं से पल्ले खीणे जाव निट्ठिए भवइ से तं ववहारिए खेत्तपलिओवमे।*

*मू. ( २१४ )* *एएसिं पल्लाणं कोडाकोडी भवेज्ज दसगुणिया।*
*तं ववहारिअस्स खेत्तसागरोवमस्स एगस्स भवे परीमाणं॥*

*मू. ( २१५ ) एएहिं ववहारिएहिं खेत्तपलिओवमसागरोवमेहिं किं पओअणं ?, एएहिं व० नत्थि किंचिप्पओअणं, केवलं पन्नवणा पन्नविज्जइ, से तं वव०।*

*से किं तं सुहुमे खेत्तपलिओवमे ?, २ से जहानामए पल्ले सिआ जोअणं आयाम० जाव परिक्खेवेणं, से नं पल्ले एगाहिअबेआहिअतेआहिअ जाव भरिए वालग्गकोडीणं तत्थ णं एगमेगे वालग्गे असंखिज्जाइं खंडाइ कज्जइ, ते णं वालग्गा दिट्ठिओगाहणा, ते णं वालग्गा नो अग्गी डहेज्जा जाव नो पूइत्ताए हव्वमागच्छेज्जा, जे णं तस्स पल्लस्स आगासपएसा तेहिं वालग्गेहिं अप्फुन्ना वा अनाफुन्ना वा तओ नं समएओ २ एगमेगं आगासपएसं अव हाय जावइएणं कालेणं से पल्ले खीणे जाव निट्ठिए भवइ, से तं सुहुमे खेत्तपलिओवमे।*

*तत्थ णं चोअए पन्नवगं एवं वयासी-अत्थि णं तस्स पल्लस्स आगासपएसा जे णं तेहिं वालग्गेहिं अनाफुन्ना ?, हंता अत्थि, जहा को दिट्ठंतो ?, से जहानामए कोट्ठए सिआ कोहंडाणं भरिए तत्थ णं माउलिंगा पक्खित्ता तेवि माया, तत्थ णं बिल्ला पक्खित्ता तेवि माया, तत्थ णं आमलगा पक्खित्ता तेवि माया, तत्थ णं बायरा प० तेऽवि माया, तत्थ णं चणगा पक्खित्ता तेऽवि माया, तत्थ णं मुग्गा पक्खि०, तत्थ णं सरिसवा प०, तत्थ णं गंगावालुआ पक्खित्ता सावि माया, एवमेव एएणं दिट्ठंते णं अत्थि णं तस्स पल्लस्स आगासपएसा जे णं तेहिं वालग्गेहिं अनाफुन्ना।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*मू. ( २९६ ) एएसिं पल्लाणं कोडाकोडी भवेज्ज दसगुणिया।*
*तं सुहुमस्स खेत्तसागरोवमस्स एगस्स भवे परीमाणं॥*

*मू. ( २९७ ) एएहिं सुहुमेहिं खेत्तप० सागरोवमेहिं किं पओअणं ?, एएहिं सुहुमपलि० साग० दिट्ठिवाए दव्वा मविज्जंति।*

**वृ.** उक्तं सप्रयोजनमद्धापल्योपमं, क्षेत्रपल्योपममप्युक्तानुसारत एव भावनीयं, नवरं व्यावहारिकपल्योपमे 'जे णं तस्स पल्लस्से'त्यादि, तस्य पल्यस्यान्तर्गता नभःप्रदेशास्तैर्वालाग्रैर्ये 'अप्फुन्न'त्ति आस्पृष्टा-व्याप्ता आक्रान्ता इतियावत्, तेषां सूक्ष्मत्वात् प्रतिसमयमेकैकापहारे असङ्ख्येया उत्सर्पिण्यवसर्पिण्योऽविक्रामन्त्यतोऽसङ्ख्येयोत्सर्पिण्यवसर्पिणीमानं प्रस्तुत-पल्योपमं ज्ञातव्यं, सुक्ष्मक्षेत्रपल्योपमे तु सूक्ष्मैर्वालाग्रैः स्पृष्टा अस्पृष्टाश्च नभःप्रदेशा गृह्यन्ते, अतस्तद्व्यावहारिकादसङ्ख्येयगुणकालमानं द्रष्टव्यम्। आह-यति स्पृष्टा अस्पृष्टाश्च नभःप्रदेशा गृह्यन्ते तर्हि वालाग्रैः किं प्रयोजनं ?, यथोक्तपल्यान्तर्गतनभःप्रदेशापहारमात्रतः सामान्येनैव वक्तुमुचितं स्यात्, सत्यं, किन्तु प्रस्तुतपल्योपमेन दृष्टिवादे द्रव्याणि मीयन्ते, तानि च कानिचिद् यथोक्तवालाग्रस्पृष्टैरेव नभः प्रदेशैर्मीयन्ते कानिचिदस्पृष्टैरित्यतो दृष्टिवादोक्तद्रव्यमानोपयोगि-त्वाद्वालाग्रप्ररूपणाऽत्र प्रयोजनवतीति।

'तत्थ णं चोयए पन्नवग'मित्यादि, तत्र नभःप्रदेशानां स्पृष्टास्पृष्टत्वप्ररूपणे सति जातसन्देहः प्रेरकः प्रज्ञापकम्-आचार्यमेवमवादीत्-भदन्त! किमस्त्येतद् यदुत तस्य पल्यस्यान्तर्गतास्ते केचिदप्याकाशप्रदेशा विद्यन्ते ये तैर्वालाग्रैरस्पृष्टाः ?, पूर्वोक्तप्रकारेण वालाग्राणां तत्र निविडत-याऽवस्थापनाच्छिद्रस्य क्वचिदप्यसम्भवाद् दुरुपपादिमिदं यत्तत्रास्पृष्टा नभःप्रदेशाः सन्तीति प्रच्छकाभिप्रायः, तत्रोत्तरं-हन्तास्त्येतत्, नात्र सन्देहः कर्तव्यः, इदं च दृष्टान्तमन्तरेण वाङ्मात्रतः प्रतिपत्तुमशक्तः पुर्विनेयः पृच्छति-यथा कोऽत्र दृष्टान्तः ?, प्रज्ञापक आह-

'से जहानामए'इत्यादि, अयमत्र भावार्थः-कूष्माण्डानां-पुस्फलानां भृते कोष्ठके स्थूलदृष्टीनां तावद् भृतोऽयमिति प्रतीतिर्भवति, अथ कूष्माण्डानां बादरत्वात् परस्परं तानि छिद्राणि संभाव्यन्ते येष्वद्यापि मातुलिङ्गानि-बीजपूरकाणि मान्ति, तत्प्रक्षेपे च पुनर्भृतोऽयमिति प्रतीतावपि मातु-लिङ्गच्छिद्रेषु विल्वानि प्रतिप्तानि, तान्यपि मान्तीत्येवं तावद् यावत्सर्षपच्छिद्रेषु गुङ्गावालुका प्रक्षिप्ता साऽपि माता, एवमर्वाग्दृष्टयो यद्यपि यथोक्तपल्ये शुषिराभावतोऽस्पृष्टनभःप्रदेशान्न संभावयन्ति तथापि वालाग्राणां बादरत्वादाकाशप्रदेशानां तु सूक्ष्मत्वात् सन्त्येवासङ्ख्याता अस्पृष्टा नभःप्रदेशाः, दृश्यते च निविडतया सम्भाव्यमानेऽपि स्तम्भादौ आस्फालितायः-कीलकानां बहूनां तदन्तः प्रवेशः, न चासौ शुषिरमन्तरेण संभवति, एवमिहापि भावनीयम्॥

*मू. ( २९८ ) कइविहा णं भंते! दव्वा पन्नत्ता ?, गो० ! दुविहा पन्नत्ता, तंजहा-जीवदव्वा य अजीवदव्वा य। अजीवदव्वा णं भंते! कइविहा पन्नत्ता ?, गो० ! दुविहा प०, तंजहारूवी-अजीवदव्वा य अरू वीअजीवदव्वा य। अरूवीअजीवदव्वा णं भंते! कइविहा पन्नत्ता ?, गो० ! दुविहा पन्नत्ता, तंजहा-धम्मत्थिकाए धम्मत्थिकायस्स देसा धम्मित्थिकायस्स पएसा अधम्मत्थिकायस्स देसा अधम्मत्थिकायस्स पएसा आगासत्थिकाए आगासत्थिकायस्स देसा आगास० पएसा, अद्धासमए। रूवीअजीवदव्वा णं भंते! कइविहा प० ?, गो० ! चउव्विहा*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*पन्नत्ता, तंजहा- खंधा खंधदेसा खंधप्पएसा परमानुपोग्गला, ते णं भंते! किं संखेज्जा असंखेज्जा अनंता? गो०! नो संखेज्जा नो असंखेज्जा अनंता, से केणट्ठेण भंते! एवं वुच्चइ- नो संखेज्जा नो असंखेज्जा अनंता?, गो०! अनंता परमाणुपोग्गला अनंता दुपएसिआ खंधा जाव अनंता अनंतपएसिआ खंधा, से एएणऽट्ठेणं गो०! एवं वुच्चइ- नो संखेज्जा नो अ० अनंता।*

*जीवदव्वा नं भंते! किं संखिज्जा असंखिज्जा अनंता?, गो०! नो संखिज्जा नो असंखिज्जा अनंता, से केणट्ठेणं भंते! एवं वुच्चइ- नो संखिज्जा नो असंखिज्जा अनंता?, गो०! असंखेज्जा नेरइया असंखेज्जा असुरकुमारा जाव असंखेज्जा थनियकुमारा असंखिज्जा पुढवीकाइया जाव असंखिज्जा वाउकाइआ अनंता वनस्सइकाइआ असंखेज्जा वेइंदिआ जाव असंखिज्जा चउरिंदिया असंखिज्जा पंचिंदियतिरिक्खजोनिआ असंखिज्जा मनुस्सा असंखिज्जा वानमंतरा असंखिज्जा जोइसिआ असंखेज्जा वेमानिआ अनंता सिद्धा, से एएणऽट्ठेणं गो०! एवं वुच्चइ- नो संखिज्जा नो असंखिज्जा अनंता।*

**वृ.** यद्येतैर्दृष्टिवादे द्रव्याणि मीयन्ते तर्हि कतिविधानि भदन्त! कावद् द्रव्याणि प्रज्ञप्तानि?, गौतम! द्विविधानि प्रज्ञप्तानि, तदेवाह-'जीवदव्वा य अजीवदव्वा य'। तत्राल्पवक्तव्यत्वात् पश्चान्निर्दिष्टान्यप्यजीवद्रव्याणि व्याचिख्यासुराह-'अजीवदव्वा णं भंते! कइविहे'त्यादि सुगमं यावद् 'धम्मत्थिकाय'इत्यादि, एकोऽपि धर्मास्तिकायो नयमतभेदात्रिधा भिद्यते, तच्च(त्र)- सङ्ग्रहनयाभिप्रायादेक एव धर्मास्तिकायः-पूर्वोक्तपदार्थः, व्यवहारनयाभिप्रायात्तु बुद्धिपरिकल्पितो द्विभागत्रिभागादिकस्तस्यैव देशः, यथा सम्पूर्णो धर्मास्तिकायो जीवादिगत्युपष्टम्भकं द्रव्यमिष्यते एवं तद्देशा अपि तदुपष्टम्भकानि पृथगेव द्रव्याणीति भावः, ऋजुसूत्राभिप्रायतस्तु स्वकीयस्वकीयसामर्थ्येन जीवादिगत्युपष्टम्भे व्याप्रियमानास्तस्य प्रदेशा बुद्धिपरिकल्पिता निर्विभागाः भागाः पृथगेव द्रव्याणि, एवं अधर्माकाशास्तिकाययोरपि प्रत्येकं त्रयस्त्रयो भेदा वाच्याः, 'अद्धासमय' इत्यत्रैकवचनं वर्तमानकालसमयस्यैव एकस्य सत्त्वादतीतानागतयोस्तु निश्चयनयमतेन विनष्टत्वानुत्पन्नत्वाभ्यामसत्त्वाद्, अत एवेह देशप्रदेशचिन्ता न कृता, एकस्मिन् समये निरंशत्वेन तदसम्भवात्, तदेवं दशविधान्यरूप्यजीवद्रव्याणि।

रूप्यजीवद्रव्याणि तु स्कन्धादिभेदाच्चतुर्द्धा, तत्र स्कन्धा-द्व्यनुकादयोऽनन्तानुकावसानाः, देशास्तु तद्विभागत्रिभागदिरूपा अवयवाः, प्रदेशाः पुनस्तदवयवभूता एव निरंशा भागाः परमाणुपुद्गलाः स्कन्धभावमनापन्नां एकाकिनः परमाणवः, तानि च रूपिद्रव्याण्यन्तानि, कथमित्याह- 'अनंता परमानुपोग्गला' इत्यादि, एते च स्कन्धादयः प्रत्येकमनन्ताः। अथ जीवद्रव्याणि विचारयितुमाह-'जीवदव्वा नं भंते! किं संखेज्जा'इत्यादि, यस्मान्नारकादिराशयः प्रत्येकमसङ्ख्याताः वनस्पतयः सिद्धाश्चानन्ता-'जीवद्रव्याण्यानन्तान्येवेत्यर्थः॥

तत्र नारकादयोऽसङ्खयेयादिस्वरूपतः सामान्येन प्रोक्ता विशिषतस्तु तदसङ्ख्येयकं कियत्प्रमाणमिति न ज्ञायते, औदारिकादिशरीरविचारे च तत्परिज्ञानं सिद्ध्यति औदारिकादिशरीरस्वरूपबोधश्च विनेयानां संपद्यते इति चेतसि निधाय जीवाजीवद्रव्यविचारप्रस्तावाच्छरीराणां तदुभयरूपत्वात्तानि विचारयुतुमुपक्रमते-

**मू. (२११)** *कइविहा णं भंते! सरीरा पं०?, गो०! पंच सरीरा पन्नत्ता, तंजहा-ओरालिए*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*वेउव्विए आहारए तेअए कम्मए, नेरइआणं भंते ! कइ सरीरा पं० ?, गो० ! तओ सरीरा पं० तं० वेउव्विए तेअए कम्मए, असुरकुमाराणं भंते ! कई सरीरा पं० ?, गो० ! तेओ सरीरा पन्नत्ता, तंजहा-वेउ० तेअ० कम्मए, एवं तिन्नि २, एए चेव सरीरा जाव थनियकुमाराणं भाणिअव्वा।*

*पुढवीकाइआणं भंते ! कइ सरीरा पन्नत्ता ?, गो० ! तओ सरीरा पंन्नत्ता, तंजहा-ओरालिए तेअए कम्मए, एवं आउतेउवनस्सइकाइयाणऽवि एए चेव तिन्नि सरीरा भानियव्वा, वाउकाइयाणं जाव गो० ! चत्तारि सरीरा प० तं०-उरालिए वेउव्विए तेयए कम्मए।*

*बेइंदियतेइंदियचउरिंदियाणं जहा पुढवीकाइयाणं, पंचिंदिअतिरिक्खजोनिआणं जहा वाउकाइयाणं मनुस्साणं जाव गो० ! पंच सरीरा पं०, तं०-ओरालए वेउव्विए आहारए तेयए कम्मए। वाणमंतराणं जोइसिआणं वेमानिआणं जहा नेरइयाणं।*

*केवइया णं भंते ! उरालिअसरीरा पन्नत्ता ?, गो० ! दुविहा पन्नत्ता, तंजहा-बद्धेल्लगा य मुक्केल्लगा य, तत्थ नं जे ते बद्धल्लगा ते नं असंखिज्जा असंखिज्जाहिं उस्सप्पिणीओसप्पिणीहिं अवहीरंति कालओ खेत्तओ असंखेज्जा लोगा, तत्थ नं जे ते मुक्केल्लगा ते नं अनंता अनंताहिं उस्सप्पिणीओसप्पिणीहिं अवहीरंति कालओ खेत्तओ अनंता लोगो दव्वओ अभवसिद्धिएहिं अनंतगुणा सिद्धाणं अनंतभागो।*

वृ. 'ओरालिए'त्ति उदारं-तीर्थकरगणधरशरीरापेक्षया शेषशरीरेभ्यः प्रधानं उदारमेवौदारिकम्, अथवा उदारं-सातिरेकंयोजनसहस्रमानत्वाच्छेषशरीरेभ्यो महाप्रमाणं तदेवौदारिकं, वैक्रियं तूत्तरवैक्रियावस्थायामेव लक्षयोजनमानं भवति, सहजं तु पञ्चधनुःशतप्रमाणमेव, ततः सहजशरीरापेक्षया इदमेव महाप्रमाणं, 'वेउव्विए'त्ति विविधा विशिष्टा वा क्रिया विक्रिया तस्या भवं वक्रियं, विशिष्टं कुर्वन्ति तदिति वा वैकुर्विकम्, 'आहारए'त्ति तथाविधप्रयोजने चतुर्दशपूर्वविदाआह्रियते-गृह्यत इत्याहारकम्, अथवा आह्रियन्ते-गृह्यते केवलिनः समीपे सूक्ष्मजीवादयः पदार्था अनेनेत्याहारकं, 'तेयए'त्ति रसाद्याहारपाकजननं तेजोनिसर्गलब्धिनिबन्धनं च तेजसो विकारस्तैजसं, 'कम्मए' त्ति अष्टविधकर्मसमुदायनिष्पन्नमौदारिकादिशरीरनिबन्धनं च भवान्तरानुयायि कर्मणो विकारः कर्मैव वा कार्मणम्, अत्र स्वल्पपुद्गलनिष्पन्नत्वाद्बादरपिणामत्वाच्च प्रथममौदारिकस्योपन्यासः, ततो बहुबहुतरबहुतमपुद्गलनिर्वृत्तत्वात् सूक्ष्मसूक्ष्मतमत्वाच्च क्रमेण शेषशरीरनामिति।

तदेवं सामान्येन शरीराणि निरूप्य चतुर्विंशतिदण्डके तानि चिन्तयितुमाह-'नेरइयाणं भंते ! कइसरीरा'इत्यादि पाठसिद्धमेव, यावत् 'केवइया नं भंते ! उरालियसरीरा' इत्यादि, कियन्तिकियत्सङ्ख्यान्यौदारिकशरीराणि सर्वाण्यपि भवन्ति, अत्रोत्तरं-'गोयमा दुविहे'त्यादि औदारिकशरीरसङ्ख्यायां पृष्टायां बद्धमुक्तत्वलक्षणं तद्वैविध्यकथनमप्रस्तुतमिति चेत्, नैवं, बद्धमुक्तयोर्भेदेन सङ्ख्याकथनार्थत्वात्तस्य, इदं च बद्धमुक्तौदारिकादिप्रमाणं क्वचिद्द्रव्येण-अभव्यादिना वक्ष्यति क्वचित्तु क्षेत्रेण-श्रेणिप्रतरादिना क्वचित्तु कालेन-समयाबलिकादिना, भावेन तु न वक्ष्यति, तस्येह द्रव्यान्तर्गतत्वेन विवक्षितत्वात्, तत्र बद्धानामौदारिकशरीराणां कालतः क्षेत्रतश्च मानं निरूपयितुमाह-

'तत्थ णं जे ते बद्धेल्लया'इत्यादि, इह नारकदेवानामौदारिकशरीराणि बद्धानि तावन्न सम्भ-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वन्त्येव, वैक्रियशरीरत्वात्तेषाम्, अतः पारिशेष्यात् तिर्यङ्मनुष्यैस्तथाविधकर्म्मोदयाद् यानि बद्धानि-गृहीतानीत्यर्थः, पृच्छासमये तैः सह यानि सम्बद्धानि तिष्ठन्तीति यावत्, तानि सामान्यतः सर्वाण्यसङ्ख्येयानि, न ज्ञायते तदसङ्ख्येयं कियदपीत्यतो विशिनष्टि-'असंखेज्जाहि'-मित्यादि, प्रतिसमयं यद्येकैकं शरीरमपह्रियते तदा असङ्ख्येयोत्सर्पिण्यवसर्पिणीभिः सर्वाण्यपह्रियन्ते, असङ्ख्येयोत्सर्पिण्यवसर्पिणीषु यावन्तः समयास्तावन्ति तानि बद्धानि प्राप्यन्त इति परमार्थः, तदेतत्कालतो मानमुक्तम्, अथ क्षेत्रतस्तदाह-

'खत्तेओ असंखेज्जा लोग'त्ति, इदमुक्तं भवति-प्रत्येकमसङ्ख्येयप्रदेशात्मिकायां स्वकीयस्वकीयावगाहनायां यद्येकं शरीरं व्यवस्थाप्यते तदाऽसङ्ख्येया लोकास्तैर्भ्रियन्ते, एकैकस्मिन्नपि नभःप्रदेशे प्रत्येकं तैर्व्यवस्थाप्यमानैरसङ्ख्येया लोका भ्रियन्ते एव, केवलं शरीरस्य जघन्यतोऽप्यङ्ख्येयप्रदेशावगाहित्वादेकस्मिन् प्रदेशेऽवगाहः सिद्धान्ते निषिद्ध इति नेत्थमुच्यते, असत्यकल्पनया उच्यतामेवमपि को दोष इति चेत्, को निवारयिता ?, केवलं सिद्धान्तसंवादिप्रकारेण प्ररूपणेऽदुष्टे लभ्यमाने स एव स्वीकर्तुं श्रेयानिति, आह-भवत्वेयं, किंत्वौदारिकशरीरिणां मनुष्यतिरश्चामनन्तत्वात् कथमनन्तानि शरीराणि न भवन्ति येनासङ्ख्येयान्येवोक्तानि ?, उच्यते, प्रत्येकशरीरिणस्तावदसङ्ख्याता एवातस्तेषां शरीराण्यप्यसङ्ख्यातान्येव, साधारणशरीरिणस्तु विद्यन्ते अनन्तां किन्तु तेषां नैकैकजीवस्यैकैकं शरीरं किन्त्वनन्तानामनन्तानामेकैकं वपुरित्यत औदारिकशरीरिणामानन्त्येऽपि शरीराण्यसङ्ख्येयान्येवेति।

'तत्थ णं जे ते मुक्केल्लये'त्यादि, भवान्तरसङ्क्रान्तौ मोक्षगमनकाले वा जीवैर्यान्यौदारिकाणि मुक्तानि-त्यक्तानि समुज्झितानि तान्यनन्तानि प्राप्यन्ते, अनन्तकस्यानन्तकत्वान्न ज्ञायते कियदप्यनन्तकमिदं, ततः कालेन विशेषयति-प्रतिसमयमेकैकापहारे अनन्ताभिरुत्सर्पिण्यवसर्पिणीभिरपह्रियन्ते, तत्समयराशितुल्यानि भवन्तीत्यर्थः, अथ क्षेत्रतो विशिनष्टि-'खेत्तओ अनंता लोग'त्ति, क्षेत्रतः-क्षेत्रमाश्रित्यानन्तानां लोकप्रमाणखण्डानां यः प्रदेशराशिस्तत्तुल्यानि भवन्तीति भावः, द्रव्यतो नियमयति-'अभवसिद्धिएहिं'मित्यादि, अभव्यजीवद्रव्यसङ्ख्यातोऽनन्तगुणानि सिद्धजीवद्रव्यसङ्ख्यायास्त्वनन्तभागवर्तीनि।

आह-यद्येवं यैः सम्यक्त्वं लब्ध्वा पुनर्मिथ्यात्वे गमनात् तत्त्यक्तं ते प्रतिपतितसम्यग्दृष्टयोऽप्यभव्येभ्योऽनन्तगुणाः सिद्धानामनन्तभागे प्रज्ञापनामहादण्डके पठ्यन्ते, तत्किमेतानि तत्तुल्यानि भवन्ति ?, नैतदेवं, यदि तत्समसङ्ख्यानि भवेयुस्तदा तथैवेह सूत्रे तानि निर्दिष्टानि स्युः, न चैवं ततः प्रतिपतितसम्यग्दृष्टिराशेः कदाचिद्धीनानि कदाचित्तुल्यानि कदाचित्त्वधिकानि इति प्रतिपत्तव्यमिति। पुनरप्याह-ननु जीवैः परित्यक्तशरीराणामानन्त्यमेव तावन्नावगच्छामः, तथाहि-किमेतानि श्मशानादिगतान्यक्षतान्येव यानि तिष्ठन्ति तानि गृह्यन्ते उत खण्डीभूय परमाण्वादिभावेन परिणामान्तरापन्नानि ?, यद्याद्यः पक्षस्तर्हि तेषामनन्तकालावस्थानाभावात् स्तोकत्वादानन्त्यं नास्त्येव, अथ चापरः पक्षस्तर्हि स कश्चिद् पुद्गलोऽपि नास्ति योऽतीताद्धायामेकैकजीवेनौदारिकशरीररूपतया अनन्तशः परिणमय्य न मुक्तः, ततः सर्वस्यापि पुद्गलास्तिकायस्य ग्रहणमापन्नम्, एवं च सत्यभव्येभ्योऽनन्तगुणानि सिद्धानामनन्तभागे इत्येतद्विरुध्यते, सर्वपुद्गलास्तिकायगतपुद्गलानां सर्वजीवेभ्योऽप्यनन्तानन्तगुणत्वाद्, अत्रोच्यते, नैष दोषो,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भवदुपन्यस्तपक्षद्वयस्याप्यनङ्गीकरणात्, किन्तु जीवविप्रमुक्ते एकैकस्मिन्नौदारिकशरीरे यान्यनन्तखण्डानि जायन्ते तानि च यावदद्यापि तं जीवप्रयोगनिर्वर्तितमौदारिकशरीरपरिणामं परित्यज्य परिणामान्तरं नासादयन्ति तावदौदारिकशरीरावयवत्वादेशकदेशदाहेऽपि ग्रामो दग्धः पटो दग्ध इत्यादिवदवयत्रे समुदायोपचारादिह प्रत्येकमौदारिकशरीराणि भण्यन्ते, ततश्चैकैकस्य जीवविप्रमुक्तौदारिकशरीरस्यानन्तभेदभिन्नत्वात् तेषां च भेदानां प्रत्येकं तदवयवत्वेन प्रस्तुतशरीरोपचाराद् एतेषां च भेदानां प्रकृतशरीरपरिणामत्यागे अन्येषां तत्परिणामवतामुत्पत्तिसम्भवाद् यथोक्तानन्तकसङ्ख्यान्यौदारिकशरीराणि लोके न कदाचिद्व्यवच्छिद्यन्त इति स्थितं, तदेवमोघत उक्ता औदारिकशरीरसङ्ख्या, विभागतस्तूपरिष्टात् क्रमप्राप्तामिमां वक्षयति १।

अथौघत एव वैक्रियसङ्ख्यामाह-

*मू. ( २९९वर्तते ) केवइआ णं भंते ! वेउव्विअसरीरा पं० ? गो० ! दुविहा पं०, तं०- बद्धेलया य मुक्केल्लया य, तत्थ णं जे ते बद्धेलया ते णं असंखिज्जा असंखेज्जाहिं उस्सप्पिणिओसप्पिणीहिं अवहीरंति कालओ खेत्तओ असंखिज्जाओ सेढीओ पयरस्स असंखेज्जइ- भागो, तत्थ णं जे ते मुक्केल्लया ते णं अनंता अनंताहि उस्सप्पिणीओसप्पिणीहिं अवहीरंति कालओ एसं जहा ओरालिअस्स मुक्केल्लया तहा एएवि भाणिअव्वा।*

*केवइ० आहारगस० ? गो० ! दुविहा० बद्धे० मुक्के० तत्थ णं जे ते बद्धेलया ते णं सिअ अत्थि सिअ नत्थि, जइ अत्थि जहन्नेणं एगो वा दो वा तिन्नि वा उक्कोसेणं सहस्सपुहुत्तं, मुक्केल्लया जहा ओरा० तहा भाणिअव्वा।*

*केवइया णं भंते ! तेअगसरीरा पं० ?, गो० ! दुविहा पं० तं०- बद्धल्लया य मुक्केल्लया य, तत्थ णं जे ते बद्धेलया ते णं अनंता अनंताहिं उस्सप्पिणीओसप्पिणीहिं अवहीरंति कालओ खेत्तओ अनंता लोगा दव्वओ सिद्धेहिं अनंतगुणा सव्वजीवाणं अनंतभागूना, तत्थ णं जे ते मुक्केल्लया ते णं अनंता अनंताहिं अस्सप्पिणीओसप्पिणीहिं अवहीरंति कालओ खेत्तओ अनंता लोगा दव्वओ सव्वजीवेहिं अनंतगुणा सव्वजीववग्गस्स अनंतभागो।*

*केवइ० कम्मगसरीरा पं० ?, गो ०? दुविहा पन्नत्ता, तंजहा- बद्धे० मुक्के० जहा तेअगसरीरा तहा कम्पगसरीराविं भाणिअव्वा।*

**वृ.** तत्र नारकदेवानामेतानि सर्वदैव बद्धानि संभवन्ति, मनुष्यतिरश्चां तु वैक्रियलब्धि- मतामुत्तरवैक्रियकरणकाले ततः सामान्येन चतुर्गतिकानामपि जीवानाममूनि बद्धान्यसङ्ख्ययानि लभ्यते, तानि च कालतोऽसङ्ख्येयोत्सर्पिणीसमयराशितुल्यानि क्षेत्रतस्तु पूर्वोक्तप्रतरासङ्ख्येय- भागवर्त्यसङ्ख्येयश्रेणीनां यः प्रदेशराशिस्तत्सङ्ख्यानि संभवन्ति, मुक्तानि, यथौदारिकाणि तथैव २। अथौघत एवाहारकाण्याह-'केवइया नं भंते ! आहारगे'त्यादि एतानि बद्धानि चतुर्दशपूर्वविदो विहाय नापरस्य संभवन्ति, अन्तरं चैषां शास्त्रान्तरे जघन्यतः समयं उत्कृष्टस्तु षण्मासान्यावद- भिहितम्, अत उक्तं-बद्धानि कदाचित् सन्ति कदाचिन्न सन्ति, यदि भवन्ति तदा जघन्यत एकं द्वे त्रीणि वा, उत्कृष्टस्तु सहस्रपृथक्त्वं, द्विप्रभृत्या नवभ्यः समयप्रसिद्धया पृथक्त्वमुच्यते, मुक्तानि यथौदारिकाणि तथैव, नवरमनन्तकस्यानन्तभेदात्तदेवेह लघुतरं द्रष्टव्यम् ३।

तथैव तैजसान्याह-'केवइया णं भंते ! तेयगे'त्यादि, एतानि बद्धान्यनन्तानि भवन्ति, काल-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तोऽनन्तोत्सर्पिण्यवसर्पिणीसमयराशिसङ्ख्यानि क्षेत्रतोऽनन्तलोकप्रदेशराशिमानानि द्रव्यतः सिद्धेभ्योऽनन्तगुणानि अनन्तभागन्यूनसर्वजीवसङ्ख्याप्रमाणानि, तत्स्वामिनामनन्तत्वात्, नन्वौदारिकस्यापि स्वामिनो विद्यन्तेऽनन्ता च तान्येतावत्सङ्ख्यान्युक्तानि, अत्रोच्यते, औदारिकं मनुष्यतिरश्चामेव भवति, तत्रापि साधारणशरीरिणामनन्तानामेकैकमेव, इदं चतुर्गतिकानामप्यस्ति, साधारणशरीरिणां च प्रतिजीवमेकैकं प्राप्यते, ततस्तैजसानि सर्वसंसारिजीवसङ्ख्यानि भवन्ति, संसारिणश्च जीवाः सिद्धेभ्योऽनन्तगुणाः, अत एतान्यपि सिद्धेभ्योऽनन्तगुणान्युक्तानि, सर्वजीवसङ्ख्यां तु न प्राप्नुवन्ति, सिद्धजीवानां तदसम्भवात्, सिद्धाश्च शेषजीवानामनन्तभागे वर्तन्ते, अतः सिद्धजीवलक्षणेनानन्तभागेन हीना ये सर्वजीवास्तत्सङ्ख्यान्यभिहितानि, मुक्तान्यपि अनन्तानि, कालतोऽनन्तोत्सर्पिण्यवर्पिणीसमयराशितुल्यानि, क्षेत्रतोऽनन्तलोकानां ये प्रदेशास्तत्तुल्यानि, द्रव्यतः सर्वजीवेभ्योऽनन्तगुणानि, तर्हि जीवराशिनैव जीवाशिर्गुणितो जीववर्गो भण्यते, एतावत्सङ्ख्यानि तानि भवन्ति ?, नेत्याह-

'जीववग्गस्स अनंतभागो'त्ति, सर्वजीवाः सद्भावतोऽनन्ता अपि कल्पनया किल दश सहस्राणि तानि च तैरेव गुणितानि ततोऽसत्कल्पनया दशकोटि सङ्ख्या सद्भावतस्त्वनन्तानन्तसङ्ख्यो जीववर्गो भवति, तस्यानन्तगुणकल्पनया शततमे भागे एतानि वर्तन्ते, अतः सद्भावतोऽनन्तान्यपि किल जशलक्षसङ्ख्यानि तानि सिद्धानि, किं कारणं जीववर्गसङ्ख्यान्येव न भवन्ति ?, उच्यते, यानि यानि तैजसानि मुक्तान्यनन्तभेदैर्भिद्यन्ते तानि तान्यसङ्ख्येयकालादूर्ध्वं तं परिणामं परित्यज्य नियमात् परिणामान्तरमासादयन्ति, अतः प्रतिनियतकालावस्थायित्वादुष्कृष्टतोऽपि यथोक्तङ्ख्यान्येवैतानि समुदितानि प्राप्यन्ते नाधिकानीत्यलमतिविस्तरेण।

'केवइया णं कम्मए'इत्यादि, तैजसकार्मणयोः समानस्वामिकत्वात्सर्वदैव सहचरितत्वाच्च समानैव वक्तव्यतेति। तदेवमोघतः पञ्चापि शरीराण्युक्तानि, साम्प्रतं तान्येव नारकादिचतुर्विंशतिदण्डके विशेषतो विचारयितुमाह-

*मू.( २११ वर्तते )नेरइयाणं भंते! केवइया ओरालिअसरीरा पं० ?, गो०! दुविहा पन्नत्ता, तंजहा-बद्धल्लया य मुक्केल्लया य, तत्थ नं जे ते बद्धेलया ते नं नत्थि, तत्थ नं जे ते मुक्केल्लया ते जहा ओहिआ ओरालिअसरीरा तहा भाणिअव्वा,*

*नेरइयाणं भंते ! केवइया वेउव्विसरीरा पं० ?, गो० ! दुविहा पन्नत्ता, तंजहा-बद्धेलया य मुक्केल्लया य, तत्थ णं जे ते बद्धेलगा ते नं असंखिज्जा असंखिज्जाहिं अस्सप्पिणीओसप्पिणीहिं अवहीरंति कालओ खेत्तओ असंखेज्जाओ सेढीओ पयरस्स असंखिज्जइभागो तासि णं सेढीणं विक्खंभसूईअंगुलपढमवग्गमूलं बिइअवग्गमूलपडुप्पन्नं अहव नं अंगुलबिइअवग्गमूलघणपमाणमेत्ताओ सेढीओ, तत्थ णं जे ते मुक्केल्लया ते णं जहा ओहिआ ओरालिअसरीरा तहा भाणिअव्वा,*

*नेरइयाणं भंते ! केवइया आहारगसरीरा पन्नत्ता ?, गो० ! दुविहा पन्नत्ता, तंजहा-बद्धे० मुक्के०, तत्थ णं जे ते बद्धेल्लया ते णं नत्थि, तत्थ णं जे ते मुक्केल्लया ते जहा ओहिआ ओरालिआ तहा भाणिअव्वा, तेयगकम्मगसरीरा जहा एएसिं चेव वेउव्विअसरीरा तहा भाणिअव्वा।*

*असुरकुमाराणं भंते! केवइआ ओरालियसरीरा पं० ? गो० ! जहा नेरइयाणं ओरालि० तहा*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*भा०, असुरकुमाराणं भंते! के० वेउव्विअसरीरा पं० ?, गो०! दुविहा पन्नत्ता, तंजहा-बद्धेल्लया य मुक्केल्लया य, तत्थ णं जे ते बद्धेल्लया ते नं असंखिज्जा असंखिज्जाहिं उस्सप्पिणीओसप्पिणीहिं अवहीरंति कालओ खेत्तओ असंखेज्जाओ सेढीओ पयरस्स असंखिज्जइभागो, तासि णं सेढीणं विक्खंभसूईअंगुलपढमवग्गमूलस्स असंखिज्जइभागो, मुक्केल्लया जहा ओहिया ओरालिअसरीरा,*

*असुरकु० केवइआ आहारगसरीरा पं० ?, गो० ! दुविहा पन्नत्ता, तंजहा-बद्धे० मुक्के०, जहा एएसिं चेव ओरा० तहा भा०, तेअगकम्म० तहा एए० वेउ० तहा भाणिअव्वा, जहा असुर-कुमाराणं तहा जाव थणिअ० ताव भाणिअव्वं।*

वृ. द्विविधानि प्रज्ञप्तानीति यदुच्यते तत्र बद्धानामसद्रुपेणैव नारकेषु सत्त्वमवसेयं, न सद्रुपेण, अत एवोक्तं-तत्र यानि बद्धानि तानि न सन्ति, तेषां वैक्रियशरीरत्वेनौदारिकबन्धाभावात्, मुक्तानि तु प्राक् तिर्यगादिनानाभवेषु संभवन्ति, तानि चौधिकमुक्तौदारिकवद्वाच्यानि, यानि वैक्रियशरीराणि तानि तु बद्धान्येषामसङ्ख्येयानि, प्रतिनारकमेकैकवैक्रियसद्भावात्, नारकाणां चासङ्ख्येयत्वात्, तानि च कालतोऽसङ्ख्येयोत्सर्पिण्यवसर्पिणीसमयराशितुल्यानि, क्षेत्रतस्तु प्रतरासङ्ख्ययभागवर्त्यसङ्ख्येयश्रेणीनां ये प्रदेशास्तत्सङ्ख्यानि भवन्ति, ननु प्रतरासङ्ख्येय-भागे असङ्ख्येया योजनकोट्योऽपि भवन्ति, तत्किमेतावत्यपि क्षेत्रे या नभःश्रेण्यो भवन्ति ता इह गृह्यन्ते ?, नेत्याह-

'तासि णं सेढीणं विक्खंभसूई'त्यादि, तासां श्रेणीनां विष्कम्भसूचिः-विस्तरश्रेणिर्ज्ञयेति शेषः, कियतीत्याह-'अंगुली'त्यादि, अङ्गुलप्रमाणे प्रतरक्षेत्र यः श्रेणीः-राशिस्तत्र विकाल-सङ्ख्येयानि विर्गमूलानि तिष्ठन्त्यतः प्रथमवर्गमूलं द्वितीयवर्गमूलेन प्रत्युत्पन्नं-गुणितं तथा च सति यावत्योऽत्र श्रेण्यो लब्धा एतावत्प्रमाणा श्रेणीनां विष्कम्भसूचिर्भवति, एतावत्यः श्रेण्योऽत्र गृह्यन्त इत्यर्थः, इदमुक्तं भवति-अङ्गुलप्रमाणे प्रतरक्षेत्रे किलासत्कल्पनया षट्पञ्चाशदधिके द्वे शते श्रेणीनां भवतस्तद्यथा २५६, अत्र प्रथमवर्गमूलं षोडश द्वितीयं चत्वारः चतुर्भिः षोडश गुनिता जाताश्चतुःषष्टिः, एषा चतुःषष्टिरपि सद्भावतोऽसङ्ख्येयाः श्रेण्यो मन्तव्यां, एतावत्सङ्ख्या श्रेणीनां विस्तरसूचिरिह ग्राह्या।

'अहव ण'मित्यादि, नमिति वाक्यालङ्कारे, अथवा-अन्येन प्रकारेण प्रस्तुतोऽर्थ उच्यते इत्यर्थः, 'अहव अ'त्ति क्वचित्पाठः, स चैवं व्याख्यायते-अथवा नैष पूर्वोक्तः प्रकारोऽपि तु प्रकारान्तरेण प्रस्तुतोऽर्थोऽभिधीयते इति भावः, समुदितो वाऽयंशब्दोऽथवाशब्दस्यार्थे वर्तते, तदेव प्रकारान्तरमाह-'अंगुलवीयवग्गमूलघने' त्यादि, अङ्गुलप्रमाणप्रतरक्षेत्रवर्तिश्रेणिराशेर्यद्-द्वितीयवर्गमूलमनन्तरं चतुष्टयरूपं दर्शितं तस्य यो घनः-चतुःषष्टिलक्षणस्तत्प्रमाणाः-तत्सङ्ख्याः श्रेण्योऽत्र गृह्यन्त इति, प्ररूपणैव भिद्यते अर्थस्तु स एवेति, तदेवं कल्पनया चतुः-षष्टिरूपाणां सद्भावतोऽसङ्ख्येयानां श्रेणीनां य प्रदेशराशिरेतावत्सङ्ख्यानि नारकाण बद्धवैक्रिया-णि प्राप्यन्त इति, प्रत्येकशरीरित्वान्नारका अप्येतावन्त एव, एवं च सति पूर्व नारकाः सामान्येनैवा-सङ्ख्येया उक्ताः, अत्र तु शरीरविचारप्रस्तावात्तदप्यसङ्ख्येयकं प्रतिनियतस्वरूपं सिद्धं भवति, एवमन्यत्रापि प्रत्येकशरीरिणः सर्वे स्वकीयस्वकीयबद्धशरीरसङ्ख्यातुल्या द्रष्टव्यां, मुक्तवैक्रि-



Jain Education International For Private & Personal Use Only www.jainelibrary.org

याणि मुक्तौदारिकवद्वाच्यानि, आहारकाणि बद्धान्येषां न सम्भवन्ति, चतुर्दशपुर्वधरसम्भ-वित्वात्तद्बन्धस्य, मुक्तानि तु मुक्तौदारिकवद्वाच्यानि, मनुष्यभवे कृतोज्झिताहारकशरीराणां प्रतिपतितचतुर्दशपूर्वविदां नारकेषूत्पत्तिसम्भवादौदारिकोक्तन्यायेनानन्तानां तेषां सम्भव इति भावः, तैजसकार्मणानि तु बद्धानि मुक्तानि च यथैषामेव वैक्रियाणि तथा वक्तव्यानि। उक्तानि पञ्चापि शरीराणि नारकेषु, अथासुरकुमारेषु तानि वक्तुमाह-

'असुरकुमाराणं भंते!'इत्यादि, औदारिकाण्यत्रापि नारकवद्वाच्यानि, वैक्रियाण्यपि तथैव, नवरमसुरकुमाराणां नारकेभ्यः स्तोकत्वात् प्रस्तुतशरीराण्यपि स्तोकान्यतो विष्कम्भसूच्यां विशेषः, सा चेयं-'तासि णं सेढीणं विक्खंभसूई'त्यादि, तासाम्-अनन्तरोक्तश्रेणीनां विष्कम्भ-सूचिः-विस्तरणश्रेणिरङ्गुलप्रथमवर्गमूलस्यासङ्ख्येयभागाः, इदमुक्तं भवति-प्रतरस्याङ्गुल-प्रमाणे क्षेत्रे यावत्यः श्रेणयो भवन्ति तासां यत्प्रथमवर्गमूलं तस्याप्यसङ्ख्येयभागे याः श्रेणयो भवन्ति तत्प्रमाणैव विस्तरसूचिरिह ग्राह्या, सा च नारकोक्तसूचेरसङ्ख्याततमे भागे सिद्धा भवति, ततो नारकाणामसुरकुमारा असङ्ख्येयभागे वर्तन्ते इति प्रतिपादितं भवति, इत्थमेव चैतत्, यतः प्रज्ञापनामहादण्डके केवलरत्नप्रभानारकाणामपि समस्ता अपि भवनपतयोऽसङ्ख्याततम-भागवर्तित्वेनोक्ताः किं पुनः समस्तनारकाणां केवला (अ) सुरकुमारा इति, आहारकाणि नारक-देव, तैजसकार्मणान्यत्रैवोक्तवैक्रियवदिति। एवं समानैव वक्तव्यता यावत्स्तनितकुमाराः।

*मू. (२११ वर्तते) पुढविकाइयाणं भंते! केवइया ओरालिअसरीरा पं० ?, गो० ! दुविहा पन्नत्ता, तंजहा- बद्धेलया य मुक्केलया य, एवं जहा ओहिआ ओरालिअसरीरा तहा भा०, पुढविका० केवइया वेउव्विअसरीरा पं० ?, गो० ! दुविहा पन्नत्ता, तंजहा-बद्धेलया य मुक्केलया य, तत्थ नं जे ते बद्धेल्लया ते नं नत्थि, मुक्केलया जहा ओहिआणं ओरालिअसरीरा तहा भा०, आहारग-सरीरावि एवं चेव भाणियव्वा, तेअगकम्मसरीरा जहा जहा एएसिं चेव ओरालिअसरीरा तहा भाणिअव्वा, जहा पुढविकाइयाणं एवं आउकाइयाणं तेउकाइयाण य सव्वसरीरा भाणियव्वा।*

*वाउकाइयाणं भंते! केवइया ओरालिअसरीरा पं० ?, गो० ! दुविहा पन्नत्ता, तंजहा-बद्धेलया य मुक्केलया य, जहा पुढविकाइयाणं ओरालिअसरीरा तहा भाणिअव्वा, वाउकाइयाणं भंते! केवइया वेउव्विअसरीरा पं० ?, गो० ! दुविहा पन्नत्ता, तंजहा-बद्धेलया य मुक्केलया य, तत्थ नं जे ते बद्धेलया ते नं असंखिज्जा समए २ अवहीरमाणा २ खेत्तपलिओवमस्स असंखिज्ज-इभागमेत्तेणं कालेणं अवहीरंति नो चेव नं अवहिआ सिआ, मुक्केलया वेउव्विअसरीरा य जहा पुढविकाइयाणं तहा भाणिअव्वा, तेअगकम्मसरीरा जहा पुढविकाइयाणं तहा भाणिअव्वा,*

*वणस्सइकायाणं भंते! केवइया तेअगसरीरा पं० ?, गो० ! दुविहा पन्नत्ता, जहा ओहिआ तेअगकम्मसरीरा तहा वणस्सइकाइयाणवि तेअगकम्मसरीरा भाणिअव्वा।*

**वृ.**औदारिकाणि बद्धानि मुक्तानि चात्रौधिकौदारिकवद्वाच्यानि, केवलं यदोघिकबद्धानाम-सङ्ख्येयप्रमाणत्वमुक्तं तदिह लघुतरासङ्ख्येयकेन द्रष्टव्यं, तत्राप्कायादिशरीरैः सह सामान्येन चिन्तितत्वाद्, अत्र तु केवलपृथ्वीकायमात्रप्रस्तावादिति भावः, वैक्रियाहारकाणि बद्धानि अमीषां न सन्ति, मुक्तानि तु प्राग्वदेव मनुष्यादिभवेषु संभवन्ति, तानि तु मुक्तौधिकौदारिक-वदभिधानीयानि, तैजसकार्मणान्यत्रैवोक्तौदारिकवद्दृश्यानि, एवमपूकायिकतेजःकायि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

केष्वपि सर्वं वाच्यं, वायुषु तु वैक्रियकृतो विशेषः समस्ति, तदभिधानार्थमाह–

'वाउकाइयाणं भंते!'इत्यादि, इहापि सर्वं पृथिवीकायिकवद्वाच्यं, नवरं वैक्रियाणि बद्धान्यमीषामसङ्ख्येयानि लभ्यन्ते, तानि च प्रतिसमयमपहियमाणानि क्षेत्रपल्योपमस्यासङ्ख्येयभागे यावन्तो नभःप्रदेशा भवन्ति तत्ससङ्ख्यैः समयैरपहियन्ते, क्षेत्रपल्योपमासङ्ख्ययभागवर्तिप्रदेशराशितुल्यानि भवन्तीत्यर्थः 'नो चेव नं अवहिया सिय'त्ति परप्रत्यायनार्थं प्ररूपणैवत्थं क्रियते, न तु तानि कदाचित्केनचिदित्थमपहियन्त इति भावः, ननु वायवः सर्वेऽप्यसङ्ख्येलोकाकाशप्रदेशप्रमाणा उक्ताः, तद्वैक्रियशरीरिणः किमित्थं स्तोका एव पठ्यन्ते?, उच्यते, चतुर्विधा वायवः–सूक्ष्मा अपर्याप्ताः पर्याप्ताश्च बादरा अपर्याप्ताः पर्याप्ताश्च, तत्राद्यराशित्रये प्रत्येकं ते असङ्ख्येयलोकाकाशप्रदेशप्रमाणा वैक्रियलब्धिशून्याश्च, बादरपर्याप्तास्तु सर्वेऽपि प्रतरासङ्ख्येयभागवर्तिप्रदेशराशिसङ्ख्या एव, तत्रापि वैक्रियलब्धिमन्तस्तदसङ्ख्येयभागवर्तिन एव न शेषाः, येषामपि च वैक्रियलब्धिस्तेष्वपि मध्येऽसङ्ख्यातभागवर्तिन एव बद्धवैक्रियशरीराः पृच्छासमये प्राप्यन्ते नापरे, अतो यथोक्तप्रमाणान्येवैां बद्धवैक्रियशरीराणि भवन्ति नाधिकानीति, अत्र केचिन्मन्यन्ते–ये केचन वान्ति वायवस्ते सर्वेऽपि वैक्रियशरीरे वर्तन्ते, तदन्तरेण तेषां चेष्टाया एवाभावात्, तच्च न घटते, यतः सर्वस्मिन्नपि लोके यत्र क्वचित् शुषिरं तत्र सर्वत्र चला वायवो नियमात् सन्त्येव, यदि च ते सर्वेऽपि वैक्रियशरीरिणः स्युस्तदा बद्धवैक्रियशरीराणि प्रभूतानि प्राप्नुवन्ति, न तु यथोक्तमानान्येवेति, तस्मादवैक्रियशरीरिणोऽपि वान्ति वायवः,

अत्थि णं भंते! ईसिं पुरेवाया पच्छावाया मंदावाया महावाया वायंति?, हंता अत्थि, कया णं भंते! जाव वायंति?, गोयमा! जया नं वाउयाए अहारियं रीयइ, जया णं जाव वाउयाए उत्तर-किरियं सीयइ, जया णं वाउकुमारा वाउकुमारीओ वा अप्पणो वा परस्स वा तदुभयस्स वा अट्ठाए वाउयायं उदीरंति तया णं ईसिं जाव वायंति" आहारियं रीयइ'त्ति रीतं रीतिः स्वभाव इत्यर्थः, तस्यानतिक्रमेण यथारीतं रीयते–गच्छति, यदा स्वाबाविकौदारिकशरीरगत्यागच्छतीत्यर्थः, उत्तरकिरियंति–उत्तरा–उत्तरवैक्रियशरीराश्रया गतिलक्षणाक्रिया यत्र गमने तदुत्तरक्रियं तद्यथा भवतीत्येवं यदा रीयते। तदेवमत्र वातानां वाने प्रकारत्रयं प्रतिपादयता स्वाभाविकमपि गमनमुक्तम्, अतो वैक्रियशरीरिण एव ते वान्तीति न नियम इत्यलं विस्तरेण।

वनस्पतिसूत्रेऽपि सर्वं पृथ्वीकायिकवद्वक्तव्यं, नवरं पृथिवीकायिकानां प्रत्येकशरीरित्वात् स्वस्थानबद्धौदारिकसङ्ख्यातुल्यानि तैजसकार्मणान्युक्तानि, अत्र तु वनस्पतीनां बहूनां साधारणशरीरत्वाच्छरीरिणामानन्त्येऽप्यौदारिकशरीराण्यसङ्ख्यातान्येव, तैजसकार्मणानि तु प्रतिजीवं पृथग्भावादनन्तानि, ततो न स्वस्थानबद्धौदारिककायतुल्यानि वक्तव्यानि, किन्तु यथौधिकतैजसकार्मणान्यभिहितानि तथैवात्रापि भावनीयानि।

*मू. ( २९९ वर्तते ) बेइंदियाणं भंते! केवइया ओरालियसरीरा पं० ?, गो० ! दुविहा पन्नत्ता, तंजहा– बद्धेल्लया य मुक्केल्लया य, तत्थ णं जे ते बद्धेलया ते नं असंखिज्जा असंखिज्जाहिं उस्सप्पिणीओसप्पिणीहिं अवहीरंति कालओ खेत्तओ असंखेज्जाओ सेढीओ पयरस्सअसंखिज्जइभागो तासि नं सेढीणं विक्खंभसूई असंखेज्जाओ जोअणकोडाकोडीओ असंखिज्जाइ सेढिवग्गमूलाइं बेइंदियाणं ओरालियबद्धेल्लएहिं पयरं अवहीरइ असंखिज्जाहिं उस्सप्पिणी–*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*ओसप्पिणीहिं कालओ खेत्तओ अंगुलपयरस्स आवलिआए असंखिज्जइभागपडिभागेणं, मुक्केल्लया जहा ओहिआ ओरालिअसरीरा तहा भाणिअव्वा, वेउव्विअआहारगसरीरा बद्धेल्लया नत्थि मुक्केल्लया जहा ओहिआ ओरालिअसरीरा तहा भाणिअव्वा, तेअगकम्मगसरीरा जहा एएसिं चेव ओरालिअसरीरा तहा भाणिअव्वा, जहा बेइंदिआणं तहा तेइंदियचउरिंदियाणवि भाणिअव्वा।*

*पंचिंदियतिरिक्खजोणियाणवि ओरालिअसरीरा एवं चेव भाणिअव्वा, पंचिंदिअतिरिक्ख-जोणिआणं भंते ! केवइया वेउव्विअसरीरा पन्नत्ता ?, गो० ! दुविहा पन्नत्ता, तंजहा- बद्धल्लेया य मुक्केलेया य, तत्थ णं जे ते बद्धलेया ते नं असंखिज्जा असंखिज्जाहिं उस्सप्पिणीओसप्पिणीहिं अवहीरंति कालओ खेत्तओ असंखिज्जाओ सेढीओ पयरस्स असंखिज्जइभागो तासि णं सेढीणं विक्खंभसूई अंगुलपढमवग्गमूलस्स असंखिज्जइभागो, मुक्केल्लया जहा ओहिआ ओरालिआ तहा भा०, आहारयसरीरा जहा बेइंदिआणं तेअगकम्मसरीरा जहा ओरालिया।*

वृ.अत्र बद्धौदारिकाण्यसङ्ख्येयानि कालतोऽसङ्ख्येयोत्सर्पिण्यवसर्पिणीसमयराशितुल्यानि, क्षेत्रतस्तु प्रतरासङ्ख्येयभागवर्त्यसङ्ख्येयश्रेणीनां यः प्रदेशराशिः तत्तुल्यानि, तासां च प्रतरासङ्ख्येयभागवर्तिश्रेणीनां विष्कम्भसूचिरसङ्ख्येययोजनकोटिकोटीप्रमाणाऽत्र ग्राह्या। एतदेव विशेषतरमाह-'असंखेज्जाइं सेढिवग्गमूलइ'ति, एकस्या नभःश्रेणेर्यः प्रदेशराशिः स सद्भावतोऽसङ्ख्यातप्रदेशात्मकोऽपि कल्पनया पञ्चषष्टिसहस्राणि पञ्च शतानि षट्त्रिंशदधिकानि ६५५३६, अस्य प्रथमं वर्गमूलं २५६, द्वितीयं १६, तृतीयं ८, चतुर्थं २, एतानि कल्पनया चत्वार्यपि सद्भावतोऽसङ्ख्येयानि वर्गमूलानि, एतेषां च मीलने कल्पनया अष्टसप्तत्यधिके द्वे शते सद्भावतस्त्वसङ्ख्येयाः प्रदेशा जायन्ते, तत एतावत्प्रदेशा प्रस्तुतविष्कम्भसूचिर्भवति, ईदानीं प्रस्तुतशरीरमानमेव प्रकारान्तरेणाह-

'बेइंदियाणं ओरालियसरीरेहिं बद्धेल्लएहि'मित्यादि, द्वीन्द्रियाणां यानि बद्धान्यौदारि-कशरीराणि तैः प्रतरः सर्वोऽप्यपह्रियते, कियता कालेनत्याह-असङ्ख्येयोत्सर्पिण्यवसर्पिणीभिः, केन पुनः क्षेत्रप्रविभागेन् कालप्रविभागेन च ?, एतावता कालेनायमपह्रियत इत्याह- अङ्गुल-प्रतरलक्षणस्य क्षेत्रस्य आवलिकालक्षणस्य च कालस्य योऽसङ्ख्येयभागरूपः प्रविभागः-अंशस्तेन, इदमुक्तं भवति-यद्येकैकेन द्वीन्द्रियशरीरेण प्रतरस्यैकैकोऽङ्गुलासङ्ख्येयभाग एकै-कनावलिकाऽसङ्ख्येयभागे एकैकेनावलिकाऽसङ्ख्येयभागेन प्रत्येकं क्रमेण स्थाप्यमानानि द्वीन्द्रियशरीराण्यसङ्ख्येयोत्सर्पिण्यवसर्पिणीभिः सर्वं प्रतरं पूरयन्तीत्यपि द्रष्टव्यं, वस्तुत एकार्थ-त्वादिति, मुक्तौदारिकवैक्रियाहारकाणि पृथ्वीकायिकवद्वाच्यानि, तैजसकार्मणानि तु यथैषामेवौदारिकाणि। त्रीन्द्रियचतुरिन्द्रियाणामप्येवमेव वाच्यम्।

पञ्चेन्द्रियतिरश्चामपीत्थमेव, नवरमेतेषु केषाञ्चिद्वैक्रियलब्धिसम्भवतो बद्धान्यपि वैक्रिय-शरीराणि लभ्यन्ते, अतस्तत्सङ्ख्यानिरूपणार्थमाह-'पंचिंदियतिरिक्खजोणिआणं भंते! केवइया वेउव्वियसरीरा?'इत्यादि, इह च सामान्येनासङ्ख्येयतामात्राव्यभिचारतस्त्रिन्द्रियादीनामतिदेशो मन्तव्यो, न पुनः सर्वथा परस्परं सङ्ख्यासाम्यमेतेषां, यत उक्तम्-

एएसि णं भंते ! एगिंदियबेइंदियतेइंदियचउरिंदियपंचिंदियाणं कयरे कयरेहिंतो अप्पा वा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वेथोवा पंचिंदिया चउरिंदिया विसेसाहिया तेइंदिया विसेसाहिआ बेइंदिया विसेसाहिया एगिंदिया अनंतगुणा' तदेवमिह सूत्रे द्वन्द्रियादीनां कियतोऽपि जीवसङ्ख्यावैचित्र्यस्योक्तत्वात्तच्छरीराणामपि तदिह द्रष्टव्यं, प्रत्येकेशरीराणां जीवसङ्ख्याः शरीरसङ्ख्यायाः तुल्यत्वादित्यलं प्रसङ्गेन, प्रकृतमुच्यते-तत्र पञ्चेन्द्रियतिरश्चां बद्धानि वैक्रियशरीराण्यसङ्ख्येयानि सर्वदैव लभ्यन्ते, तानि च कालतोऽसङ्ख्येयोत्सर्पिण्य-वसर्पिणीसमयराशितुल्यानि, क्षेत्रतस्तुप्रतरासङ्ख्येयभागवर्त्यसङ्ख्येयश्रेणीनां यः प्रदेशराशिः तुतुल्यानि, तासां च श्रेणीनां विष्कम्भसूचिरङ्गुलप्रथमवर्गमूलस्यासङ्ख्येयभागः शेषभावना असुरकुमारवत्कार्या।

*मू. ( २११ वर्तते ) मनुस्साणं भंते! केवइया ओरालियसरीरा पं० ?, गो० ! दुविहा पन्नत्ता, तंजहा-बद्धेल्लया य मुक्केल्लया य, तत्थ णं जे ते बद्धेलया नं ते सिअ संखिज्जा सिअ असंखिज्जा जहन्नपए संखेज्जा, संखिज्जाओ कोडाकोडीओ एगुणतीसं ठाणाइं तिजमलपयस्स उवरिं चउजमलपयस्स हेट्ठो, अहव णं छट्ठो वग्गो पंचमवग्गपडुप्पन्नो, अहव णं छण्णउइछेअण-गदायिरासी उक्कोसपए असंखिज्जा, असंखिज्जाहिं उस्सप्पिणीओसप्पिणीहिं अवहीरंति कालओ खेत्तओ उक्कोसपए रूवपक्खित्तेहिं मनूस्सेहिं सेढी अवहीरइ कालओ असंखिज्जाहिं उस्सप्पिणीओसप्पिणीहिं खेत्तओ अंगुलपढमवग्गमूलं तइयवग्गमूलपडूप्पन्नं, मुक्केल्लया जहा ओहिआ ओरालिया तहा भाणिअव्वा,*

*मनुस्साणं भंते! केवइया वेउव्विसरीरा पं० ?, गो० ! दुविहा पं०, तं०-बद्धेल्लया य मुक्केल्लया य, तत्थ णं जे ते बद्धेलया ते णं संखिज्जा समए २ अवहीरमाणा २ संखेज्जेणं कालेणं अवहीरंति, नो चेव णं अवहिआ सिआ, मुक्केल्लया जहा ओहिआ ओरालिआणं मुक्केल्लया तहा भा०,*

*मनुस्साणं भंते ! केवइया आहारगसरीरा पं० ?, गो० ! दुविहा पन्नत्ता, तंजहा-बद्धेल्लया य मुक्केल्लया य, तत्थ णं जे ते बद्धेलया ते णं सिअ अत्थि सिअ नत्थि, जइ अत्थि जहन्नेणं एक्को वा दो वा तिन्नि वा उक्कोसेणं सहस्सपुहत्तं, मुक्केल्लया जहा ओहिआ, तेअगमकम्मगसरीरा जहा एएसिं चेव ओरालिआ तहा भाणिअव्वा।*

**वृ.** इह मनुष्या द्विविधाः-वान्तपित्तादिजन्मानः सम्मूर्च्छजाः स्त्रीगर्भोत्पन्ना गर्भजाश्च, तत्राद्याः कदाचिन्न भवन्त्येव, जघन्यतः समयस्योत्कृष्टतस्तु चतुर्विंशतिमुहूर्तानां तदन्तरकालस्य प्रतिपादितत्वाद्, उत्पन्नानां तु जघन्यत उत्कृष्टतश्चान्तर्मुहूर्तस्थितिकत्वेन परतः सर्वेषां निर्लेपत्वसम्भवात्, यदा तु भवन्ति तदा जघन्यत एको द्वौ त्रयो वा उत्कृष्टतस्त्वसङ्ख्याताः, इतरे तु सर्वदैव सङ्ख्येया भवन्ति, नासङ्ख्येयाः, तत्र सम्मूर्च्छजा यदा न भवन्ति तदैव जघन्यपदिनो गर्भजा एव गृह्यते, अन्यथा जघन्यपदवर्तित्वमेव न स्यात्, ते च स्वभावात् सङ्ख्येया एव, अतस्तच्छरीराण्यपि बद्धानि सङ्ख्येयान्येव, अत उक्तं-

'जहन्नपए संखेज्ज' त्ति, ससङ्ख्येयकस्य ससङ्ख्यातभेदत्वान्न ज्ञायते कियदपि सङ्ख्येकमित्याह-सङ्ख्येयाः कोटीकोट्यः पुनर्विशेषितं तमाह-'तिजमलपयस्स उवरिं चउजमलपयस्स हेट्ठ' त्ति, इदमुक्तं भवति-अष्टानामष्टानामङ्कस्थानानां यमलपदमिति सामयिकी संज्ञा, ततस्त्रयाणां यमलपदानां समाहारस्त्रियमलपदं चतुर्विंशत्यङ्कस्थानलक्षणम्, अथवा तृतीयं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यमलपदं षोडशानामङ्कस्थानानामुपरितनाङ्काष्टकलक्षणमिति स एवार्थः, तस्य त्रियमलपदस्य उपरिप्रस्तुतमनुष्या भवन्ति, चतुर्विंशत्यध्कस्थानान्यतिक्रम्य जघन्यपदवर्तिनां गर्भजमनुष्याणां सङ्ख्या वर्तत इत्यर्थः, तर्हि चतुरादीन्यपि यमलपदानि भवन्ति ?, नेत्याह-

'चउजमलपयस्स हेट्ठ'त्ति चतुर्णां यमलपदानां समाहारश्चतुर्यमलपदं-द्वात्रिंश-दङ्कस्थानलक्षणम्, अथवा चतुर्थं यमलपदं चतुर्यमलपदं चतुर्विंशतेरङ्कस्थानानामुपरित-नाङ्काष्टकलक्षणमित्येक एवार्थः, तस्य चतुर्यमलपदस्याधस्तादेकोनत्रिंशदङ्कस्थानेष्वनन्तरमेव वक्ष्यमाणस्वरूपेषु प्रकृतमनुष्यसङ्ख्या वर्तत इति भावः, अथवा द्वौ वर्गावनन्तरमेव वक्ष्यमाण-स्वरूपौ यमलपदमिति सामयिक्येव परिभाषा, ततस्त्रयाणां यमलपदानां समाहारस्त्रियमलपदं-वर्गषट्कलक्षणं तस्योपरि चतुर्यमलपदस्य-वर्गाष्टकलक्षणस्याधस्तादेतन्मनुष्यसङ्ख्या लभ्यते, षष्ठवर्गस्योपरि सप्तमवर्गस्य त्वधस्तात्प्रस्तुतमनुष्यसङ्ख्या प्राप्यत इति हृदयम्, अत्राप्येता-न्येवैकोनत्रिंशदङ्कस्थानानि मन्तव्यानि, अथवा किमेतैरस्फुटैः प्रकारैः, स्फुटतरमेव प्रकारमाह-

'अहवण'मित्यस्य शब्दस्य पाठान्तरस्य व्याख्या पूर्ववत्, षष्ठवर्गः पञ्चमवर्गेण यदा प्रत्यु-त्पन्नो-गुणितो भवति तदा प्रस्तुतमनुष्यसङ्ख्या समागच्छतीत्यर्थः, अथ कोऽयं षष्ठो वर्गः ? कश्च पञ्चमवर्ग इति, अत्रोच्यते, विवक्षितः कश्चिद्राशिस्तेनैवराशिना यत्र गुण्यते स तावद्वर्गः, चतुर्णां वर्गः षोडशेति द्वितीयो वर्गः १६, षोडशानां वर्गो द्वे शते षट्पञ्चाशदधिके इति तृतीयो वर्गः २५६, अस्य राशेर्वर्गः पञ्चषष्टिसहस्राणि पञ्च शतानि षट्त्रिंशदधिकानीति चतुर्थो वर्गः ६५५३६, अस्य राशेर्वर्गः सार्द्धगाथया प्रोच्यते-

'चत्तारि य कोडिसया अउणत्तीसं च हुंति कोडीओ।
अउणावन्नं लक्खा सत्तट्ठिं चेव य सहस्सा ॥

दो य सया छण्णउया पंचमवग्गो इमो विनिद्दिट्ठो'त्ति अङ्कतोऽप्येष दर्श्यते ४२९४९६७-२९६, अस्यापि राशेर्गाथात्रयेण वर्गः प्रतिपाद्यते-

लक्खं कोडाकोडी चउरासीयं भवे सहस्साइं।
चत्तारि अ सत्तट्ठा हुंति सया कोडीकोडीणं ॥
चउयालं लक्खाइं कोडीणं सत्त चेव य सहस्सा।
तिन्नि य सया य सत्तरि कोडीणं हुंति नायव्वा ॥२॥
पंचाणं ऊइ लक्खा एगावन्नं भवे सहस्साइं।
छस्सोलसोत्तरसया एसो छट्ठो हवइ वग्गो ॥

अङ्कतोऽपि दर्श्यते १८४४६७४४०७३७०९५५१६१६, तदयं षष्ठो वर्गः पूर्वोक्तेन पञ्चमवर्गेण गुण्यते, तथा च सति या सङ्ख्या भवति तस्यां जघन्यपदिनो गर्भजमनुष्या वर्तन्ते, सा चेयम् ७९२२८१६२५१४२६४३३७५९३५४३९५०३३६ अयं च राशिः कोटीकोट्य-दिप्रकारेण केनाप्यभिधातुं न शक्यते अतः पर्यन्तादारभ्याङ्कमानसङ्ग्रहार्थं गाथाद्वयम्

'छत्तिन्नि तिन्नि सुन्नं पंचेव य नव य तिन्निन्नि चत्तारि।
पंचेव तिन्नि नव पंच सत्त तिन्नेव तिन्नेव ॥
चउ छ दो चउ एक्को पण दो छक्केक्कगो य अट्ठेव।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दो दो नव सत्तेव य अंकट्ठाणा पराहुत्ता ॥

तदेवमेतेष्वेकोनत्रिंशदङ्कस्थानेषु जघन्यपदिनो गर्भजमनुष्या वर्तन्ते इति स्थितम्। अमुमेवार्थं प्रकारान्तरेणाह- 'अहव णं छन्नउईच्छेयणगयाई रासि' त्ति छेदनकं-राशेरर्द्धीकरणं ततः पन्नवतिच्छेदनानि यो राशिर्ददाति पर्यन्ते च परिपूर्णैकरूपपर्यवसितो भवति न तु खण्डितरूप-पर्यवसितः स प्रकृतमनुष्यसङ्ख्यास्वरूपो मन्तव्यः, स चायमेवैकोनत्रिंशदङ्कस्थाननिष्पन्नोऽनन्तरदर्शितो नान्यः, अयं हि पुनः पुनश्छिद्यमानोऽर्द्धीक्रियमाणः पन्नवतिच्छेदान् क्षमते, पर्यन्ते च परिपूर्णैकरूपपर्यवसितो भवतीति षण्णवतिच्छेदनकदायी प्रोच्यते, कथं पुनः पन्नवतिच्छेदनानि भाव्यन्ते ?, उच्यते, प्रथमो वर्गश्चतुष्टयरूपो यो दर्शितस्तत्र द्वे छेदने भवतः, तथाहि-चतुर्णामर्द्धे द्वौ तयोरप्यर्द्धे एक इत्येवमुत्तरेष्वपि वर्गेषु भावनीयं, द्वितीये तु वर्गे चत्वारि छेदनानि संपद्यन्ते, तृतीये अष्टौ, चतुर्थे षोडश, पञ्चमे द्वात्रिंशत्, षष्ठे चतुःषष्टिः, पञ्चमस्तु षष्ठेन गुणित आस्ते, अतः पञ्चमसत्कान्यपि छेदनकानि षष्ठे प्रविष्टानि प्राप्यन्त इत्युभयगतान्यपि मील्यन्ते, ततो जातानि प्रस्तुतराशौ षण्णवतिच्छेदनकानि, स्वयमेव वा पुनः पुनश्छेदं कृत्वा अभियुक्तेन भावनीयानि, तदेवं जघन्यपदमुक्तम्, अथोत्कृष्टपदमभिधित्सुराह-

'उक्कोसपए असंखेज्ज'त्ति, उत्कृष्टपदे मनुष्यबद्धान्यौदारिकशरीराण्यसङ्ख्येयानि कालतोऽङ्ख्येयोत्सर्पिणीसमयराशितुल्यानि, क्षेत्रतस्त्वेकस्मिन् मनुष्यशरीररूपे प्रेक्षिप्ते तैर्मनुष्य-शरीरैरेका नभःप्रदेशश्रेणिरपह्रियते, कियता कालेनेत्याह-असङ्ख्येयोत्सर्पिण्यवसर्पिणीभिः, कियता क्षेत्रखण्डापहारेणेत्याह-

'अंगुलपढमवग्गमूलं तइयवग्गमूलपडुप्पन्न'न्ति श्रेणेरङ्गुल-प्रमाणे क्षेत्रे यः प्रदेशराशिस्तस्य यत्प्रथमं वर्गमूलं तत्तृतीयवर्गमूलप्रदेशराशिना गुण्यते, गुणिते च यः प्रदेशराशिर्भवति तत्प्रमाणं क्षेत्रखण्डमेकैकं मनुष्यशरीरं क्रमेण प्रतिसमयमपहरति, इदमुक्तं भवतिश्रेणेर्मध्याद् यथोक्त-प्रमाणं क्षेत्रखण्डं यद्येकैकं मनुष्यशरीरं क्रमेण प्रतिसमयमपहरति तदाऽसङ्ख्येयोत्सर्पिण्यवसर्पिणीभिः सर्वापि श्रेणिरपह्रियते यद्येकं मनुष्यशरीरं स्यात्, तच्च नास्ति, सर्वोत्कृष्टानामपि समुदितगर्भसंमूर्च्छजमनुष्याणामेतावतामेव भावादिति तदेवं मनुष्याणां बद्धान्यौदारिकशरीराण्युक्तानि, मुक्तानि त्वोधवद्भाव्यानि।

अथ वैक्रियाण्याह-'केवइया वेउव्विअसरीरा' इत्यादि, वैक्रियाण्यमीषां सङ्ख्येयान्येव बद्धानि प्राप्यन्ते गर्भजेषु, तत्रापि वैक्रियलब्धिमत्सु तत्रापि पृच्छासमये कियन्त्वेव तेषु तद्बन्धसम्भवादिति, तानि च प्रतिसमयमेकैकशोऽपह्रियमाणानि असङ्ख्येयेन कालेनापह्रियन्ते, मुक्तान्योधवद्वाच्यानि।

आहारकाणि तु बद्धानि मुक्तानि च यथौधिकानि तथैव, तैजसकार्मणानि तु यथैषा मेवौदारिकाणि।

*मू. ( २९१ वर्तते ) वाणमंतराणं ओरालिअसरीरा जहा नेरइआणं, वाणमंतराणं भंते ! केवइया वेउव्विअसरीरा पं० ?, गो० ! दुविहा पन्नत्ता, तंजहा-बद्धेल्लया य मुक्केल्लया य, तत्थ णं जे ते बद्धेल्लया ते णं असंखेज्जा, असंखेज्जाहिं उस्सप्पिणीओसप्पिणीहिं अवहीरंति कालओ खेत्तओ असंखिज्जाओ सेढीओ पयरस्स असंखिज्जइभागो, तासि णं सेढीणं विक्खंभसूई*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*संखेज्जजोअणसयवग्गपलिभागो पयरस्स, मुक्के० जहा ओहिया ओरालिआ तहा भा०, आहा० दुविहावि जहा असु० तहा भा०, वाण० भंते ! केवइया तेअगस० पं० ?, गो० ! जहा एएसिं चेव वेउव्वि० तहा तेअग० भाणिअव्वा ।*

*जोइसियाणं भंते ! केव० वे० पं० ?, गो० ! दुविहा पन्नत्ता, तंजहा-बद्धे० मुक्के० तत्थ णं जे ते ब० जाव० तासि णं सेढीणं विक्खंभसूई बेछप्पन्नंगुलसयवग्गपलिभागो पयरस्स, मुक्के० जहा ओ० ओरा० तहा भा०, आहारय० जहा नेर० तहा भा०, तेअ० जहा एएसिं चेव वेउ० तहा० । वेमानियाणं भंते ! केव० ओरा० पं० ?, गो० ! जहा ने० तहा०,*

*वेमाणि० केव० वेउ० पं० ?, गो० ! दुविहा पन्नत्ता, तंजहा-बद्धे० मुक्के० तत्थ णं जे ते ब० ते णं असंखिज्जा असंखेज्जाहिं उस्स० अवहीरंति कालओ खेत्तओ असं० सेढीओ पयरस्स असंखे० तासि णं सेढीणं विक्खभसूई अंगुलबीयवग्गमूल तइगवग्गमूलपडुप्पन्नं अहव णं अंगुलतइयवग्गमूलघणप्पमानमेत्ताओ सेढीओ, मुक्केल्लया जहा ओहिआ ओरालियाणं तहा भा०, आहा० जहा नेरइयाणं, तेअग० जहा एएसिं चेव वेउव्विअसरीरा तहा भाणिअव्वा,*

*से तं सुहुमे खेत्तपलिओवमे, से तं खेत्तपलिओवमे, से तं पलिओवमे, से तं विभागणिप्फन्ने, से तं कालप्पमाणे ।*

**वृ.** व्यन्तराणां सर्वं नारकवद्वाच्यं, नवरं नारकेभ्यो व्यन्तराणामसङ्ख्ययगुणत्वेन महादण्डके पठितत्वाद्विष्कम्भसूच्यां विशेष इत्याह- 'तासि नं सेढीणं' मित्यादि, तासामसङ्ख्येयानां श्रेणीनां विष्कम्भसूचिः पूर्वोक्तस्य प्रज्ञापनामहादण्डकोक्तस्य चानुसारेण स्वयमेव दृश्येति वाक्यशेषः सा च पूर्वोक्तायाः पञ्चेन्द्रियतिर्यग्विष्कम्भसूचेरसङ्ख्ययेयगुणहीना दृष्टव्या, पञ्चेन्द्रियतिर्यग्भ्यो व्यन्तराणामसङ्ख्ययेयगुणहीनत्वेन महादण्डके पठितत्वात्, कियता पुनः प्रतिभागेन व्यन्तराः सर्वं प्रतरमपहरन्तीत्याह- 'संखिज्जजोयणे' त्यादि, सङ्ख्येययोजनशतानां यो वर्गस्तद्रूपो यः प्रतिभागः-अंशः, कस्येत्याह-प्रतरस्य, इदमुक्तं भवति-सङ्ख्येययोजनशतवर्गमूलं प्रतरस्य भागं यद्येकैको व्यन्तरोऽपहरति तदा सर्वोऽपि प्रतरोऽपह्रियते, यदि वा तावति भागे एकैकस्मिन् व्यन्तरेऽवस्थाप्यमाने सर्वोऽपि प्रतरः पूर्यते ।

ज्योतिष्कसूत्रेऽपि 'तासि णं सेढीणं विक्खभसूई' स्वयमेव दृश्येति वाक्यशेषोऽवसेयः, सा च व्यन्तरविष्कम्भसूचेः सङ्ख्येयगुणा द्रष्टव्या, व्यन्तरेभ्यो ज्योतिष्काणां सङ्ख्येयगुणत्वेन महादण्डके पठितत्वाद् इहापि च प्रतरापहारक्षेत्रस्य तत्क्षेत्रादभीषां सङ्ख्येयगुणहीनस्याभिधानात्, तदाह- 'बेछप्पन्नंगुलसयवग्गपलिभागो' त्ति षट्पञ्चाशदधिकाङ्गुलशतद्वयवर्गरूपं प्रतिभागं-प्रतरस्यांशं यद्येकैको ज्योतिष्कोऽपहरति तदा सर्वं प्रतरमपहरन्ति, प्रत्येकं स्थाप्यमाना वा तावति प्रतिभागे पर्वं प्रतरं पूरयन्ति, व्यनतरेभ्य एते सङ्ख्येयगुणत्वाद्बहवः, ततो व्यन्तरोक्तप्रतरप्रतिभागेक्षेत्रखण्डाद्यथोक्तरूपतया सङ्ख्येयगुणहीनेन स्वल्पेनापि क्षेत्रखण्डेन प्रतरमेतेऽपहरन्ति पूरयन्ति वा इति भावः ।

वैमानिकसूत्रऽपीत्थमेव, नवरं वैमानिकाः प्रज्ञापनायां भवनपतिनारकव्यन्तरज्योतिष्केभ्यः प्रत्येकं सर्वेभ्योऽप्यसङ्ख्येयगुणहीनाः पठ्यन्ते, अतो विष्कम्भसूच्यां विशेषः, तामाह- 'तासि णं सेढीणं' मित्यादि, तासां श्रेणीनां विष्कम्भसूचिरङ्गुलस्य द्वितीयवर्गमूलं तृतीयवर्गमूलेन

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गुणितम्, इदमुक्तं भवति-अङ्गुलप्रमाणे प्रतरक्षेत्र सद्भावतोऽसङ्ख्येया अपिकल्पनया द्वे शते षट्पञ्चाशदधिके श्रेणीनां भवतः २५६, अत्र प्रथमवर्गमूलं १६ द्वितीयं ४ तृतीयं २, तत्र द्वितीयं वर्गमूलं चतुष्टयलक्षणं तृतीयेन द्विकलक्षणेन गुणितं, जाता अष्टौ, एवमेताः सद्भूततयाऽसङ्ख्येयाः कल्पनया त्वष्टौ श्रेणयो विस्तरसूचिरिह गृह्यते, 'अहन न'मित्यादि, अथवा अङ्गुल-तृतीयवर्गमूलस्य द्विकलक्षणस्य यो घनः अष्टौ, एतावत्यः श्रेणयोऽत्र विष्कम्भसूच्यां गृह्यन्ते इति स एवार्थः, तदेवं भुवनपत्यादिसूचिरेषाऽससङ्ख्येयगुणहीना मन्तव्या, शेषं सुखोन्नेयं यावत् 'से तं खेत्तपलिओवमे'त्ति। तदेवं 'समयावलियमुहुत्ते'त्यादिगाथानिर्दिष्टास्तदुपलक्षिताश्चान्येऽप्युच्छ्वासादयो व्याख्याताः कालविभागाः, अत आह-'से तं विभागनिप्फन्ने'त्ति, एवं च समर्थितं कालप्रमाणमित्याह-'से तं कालप्पमाने'त्ति। अथ भावप्रमाणमभिधित्सराह-

*मू. ( ३०० ) से किं तं भावप्पमाणे ?, २ तिविहे पन्नते, तंजहा-गुणप्पमाणे नयप्पमाणे संखप्पमाणे।*

**वृ.** भवनं भावो-वस्तुनः परिणामो ज्ञानादिर्वर्णादिश्च, प्रमितिः प्रमीयते अनेन प्रमीयते स इति वा प्रमाणं, भाव एव प्रमाणं भावप्रमाणं, भावसाधनपक्षे प्रमितिः-वस्तुपरिच्छेदस्तद्धेतुत्वाद्भावस्य प्रमाणताऽवसेया, तच्च भावप्रमाणं, त्रिविधं प्रज्ञप्तं, तद्यथा।

*मू. ( ३०१ )से किं तं गुणप्पमाणे ?, २ दुविहे पन्नते, तंजहा-अजीवगुणप्पमाणे अ। से किं तं अजीवगुणप्पमाणे ?, २ पंचविहे पन्नते, तंजहा-वन्नगुणप्पमाणे गंधगुणप्पमाणे रसगुणप्पमाणे फासगुणप्पमाणे संठाणगुणप्पमाणे, से किं तं वन्नगुणप्पमाणे ?, २ पंचविहे पन्नते, तंजहा-कालवन्नगुणप्पमाणे जाव सुक्किल्लवन्नगुणप्पमाणे, से तं वन्नगुणप्पमाणे ।*

*से किं तं गंधगुणप्पमाणे ?, २ दुविहे पन्नत्ते, तंजहा-सुरभिगंधगुणप्पमाणे दुरभिगंधगुणप्पमाणे, से तं गंधगुणप्पमाणे। से किं तं रसगुणप्पमाणे ?, २ पंचविहे पन्नत्ते, तंजहा-तित्तरसगुणप्पमाणे जाव महुररसगुणप्पमाणे, से तं रसगुणप्पमाणे।*

*से किं तं फासगुणप्पमाणे ?, २ अट्ठविहे पन्नत्ते, तंजहा-कक्खडफासगुणप्पमाणे जाव लुक्खफासगुणप्पमाणे, से तं फासगुणप्पमाणे। से किं तं संठाणगुणप्पमाणे ?, २ पंचविहे पन्नत्ते तंजहा-परिमंडलसंठाणगुणप्पमाणे वट्टसं० तंस० चउरंस० आययसंठाणगुणप्पमाणे, से तं संठाणगुणप्पमाणे, से तं अजीवगुणप्पमाणे।*

**वृ.** 'गुणप्रमाण'मित्यादि, गुणो-ज्ञानादिः स एव प्रमाणं गुणप्रमाणं, प्रमीयते च गुणैर्द्रव्यं, गुणाश्च गुणरूपता प्रमीयन्तेऽतः प्रमाणता, तथा नीतयो नयाः-अनन्तधर्मात्मकस्य वस्तुन एकांशपरिच्छित्तयः त एव प्रमाणं नयप्रमाणं, सङ्ख्यानं सङ्ख्या सैव प्रमाणं सङ्ख्याप्रमाणं, नयसङ्ख्ये अपि गुणत्वं न व्यभिचरतः, केवलं गुणप्रमाणात् पृथगभिधाने कारणमुपरिष्टाद्वक्ष्यते, तत्र गुणप्रमाणं द्विधा जीवगुणप्रमाणं च अजीवगुणप्रमाणं च, तत्राल्पवक्तव्यत्वाद जीवगुणप्रमाणमेव तावदाह-'से किं तं अजीवगुणप्पमाणे'इत्यादि, एतत्सर्वमपि पाठसिद्धं, नवरं परिमण्डलसंस्थानं वलयादिवत्, वृत्तमयोगोलकवत्, त्र्यस्रंत्रिकोणं शृङ्गाटकफलवत् चतुरस्रं समचतुष्कोणम्, आयतं-दीर्घमिति।

*मू. ( ३०१ वर्तते ) से किं तं जीवगुणप्पमाणे ?, २ तिविहे पन्नते, तंजहा-नाणगुणप्पमाणे*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*दंसणगुणप्पमाणे चरित्तगुणप्पमाणे। से किं तं नाणगुणप्पमाणे ?, २ चउव्विहे पन्नत्ते, तंजहा-पच्चक्खे अनुमाने ओवम्मे आगमे। से किं तं पच्चक्खे ? दुविहे पन्नते, तंजहा इंदिअपच्चक्खे अ नोइंदिअपच्चक्खे अ। से किं तं इंदिअपच्चक्खे ?, २ पंचविहे पन्नत्ते, तंजहा-सोइंदिअ-पच्चक्खे चक्खुरिंदियपच्चक्खे घाणिंदिअपच्चक्खे जिब्भिंदिअपच्चक्खे फासिंदिअपच्चक्खे, से तं इंदियपच्चक्खे। से किं तं नोइंदियपच्चक्खे ?, २ तिविहे पन्नत्ते, तंजहा-ओहिनाणपच्चक्खे मनपज्जवनाणपच्चक्खे केवलनाणपच्चक्खे, से तं नोइंदियपच्चक्खे, से तं पच्चक्खे।*

**वृ.** जीवस्य गुणा-ज्ञानदयस्तद्रुपं प्रमाणं जीवगुणप्रमाणं, तच्च ज्ञानदर्शनचारित्रगुणभेदित्रिधा, तत्र ज्ञानरूपो यो गुणस्तद्रुपं प्रमाणं चतुर्निधं, तद्यथा-प्रत्यक्षमनुमानमुपमानमागमः, तत्र 'अशू व्याप्ता'वित्यस्य धातोश्नुते-ज्ञानात्मना अर्थान् व्योप्नोतीति अक्षो-जीवः 'अश भोजने' इत्यस्य वा अश्नानि-भुङ्क्ते पालयति वा सर्वार्थानित्यक्षो-जीव एव प्रतिगतम्-आश्रितमक्षं प्रत्यक्षमिति, अत्यादयः क्रान्ताद्यर्थे द्वितीययेति समासः, जीवस्यार्थासाक्षात्कारित्वेन यद् ज्ञानं वर्तते वत्प्रत्यक्षमित्यर्थः, अन्ये त्वक्षमक्षं प्रति वर्तत इत्यव्ययीभावसमासं विदधति, तच्च न युज्यते, अव्ययीभावस्य नपुंसकलिङ्गत्वात् प्रत्यक्षशब्दस्य त्रिलिङ्गता न स्यात्, दृश्यते चेयं, प्रत्यक्षा बुद्धिः प्रत्यक्षो बोधः प्रत्यक्षं ज्ञानमिति दर्शनात्, ततो यथादर्शितस्तत्पुरुष एवायं, तच्च प्रत्यक्षं द्विविधम्-इन्द्रियप्रत्यक्षं नोइन्द्रियप्रत्यक्षं च, अत्रेन्द्रियं-श्रोतादि तन्निमि'त्तं- सहकारिकारणं यस्तोत्पित्सोस्तदलिङ्गिकं शब्दरूपरसगन्धस्पर्शविषयज्ञानमिन्द्रियप्रत्यक्षम्, इदं चेन्द्रलक्षण-जीवात् परं व्यतिरिक्तनिमित्तमाश्रित्योत्पद्यते इति धूमादग्निज्ञानमिव वस्तुतोऽर्थसाक्षात्का-रित्वाभावात्, परोक्षमेव, केवलं लोकेऽस्य प्रत्यक्षतया रूढत्वात् संव्यवहारतोऽत्रापि तथोच्यत इत्यलं विस्तरेण, तदाकाङ्क्षिणा तु नन्द्यध्ययनमन्वेषणीयम्। इन्द्रियप्रत्यक्षं तु यत्र भवति तत्रोइन्द्रियप्रत्यक्षं, नोशब्दस्य सर्वनिषेधपरत्वात् यत्रेन्द्रियं सर्वथैव न प्रवर्तते किन्तु जीव एव साक्षादर्थं पश्यति तत्रोइन्द्रियप्रत्यक्षम्-अवधिमनःपर्यायकेवलाख्यमिति भावार्थः।

**मू. ( ३०१ वर्तते )** *से किं तं अनुमाने ?, २ तिविहे पन्नत्ते, तंजहा-पुव्ववं सेसवं दिट्ठसा-हम्मवं। से किं तं पुव्ववं ?, पुव्ववं-*

**मू. ( ३०२ )**
*माया पुत्तं जहा नट्ठं, जुवाणं पुनरागयं।*
*काई पच्चभिजाणेज्जा, पुव्वलिंगेण केणई॥*

**मू. ( ३०३ )** *तंजहा-खत्तेण वा वन्नेण वा लंछनेण वा मसेण वा तिलएण वा, से तं पुव्वं। से किं तें सेसवं ?, २ पंचविहं पन्नत्ते, तंजहा-कज्जेणं कारणेणं अवयवेणं आसएणं। से किं तं कज्जेणं ?, २ संखं सद्देणं भेरिं ताडिएणं वसभं ढक्किएणं मोरं किंकाइएणं हयं हेसिएणं गयं गुलगुलाइएणं रहं घनघनाइएणं, से तं कज्जेणं।*

*से किं तं कारणेणं ?, २ तंतवो पडस्स कारणं न पडो तंतुकारणं वीरणा कडस्स कारणं न कडो वीरनाकारणं मिप्पिंडो घडस्स कारणं न घडो मिप्पिंडकारणं, से तं कारणेणं।*

*से किं तं गुणेणं ?, २ सुवन्नं निकसेणं पुप्फं गंधेणं लवणं रसेणं मइरं आसायएणं वत्थं फासेणं, से तं गुणेणं। से किं तं अवयवेणं ?, २ महिसं सिंगेणं कुक्कुडं सिहाएणं हत्थिं विसाणेणं वराहं दाढाए मोरं पिच्छेणं आसं खुरेणं वग्घं नहेणं चमरिं वालग्गेणं वाणरं लंगुलेणं दुपयंणं*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*मनुस्सादि चउपयं गवमादि बहुपयं गोमिआदि सीहं केसरेणं वसहं कुक्कुहेणं महिलं वलय-बाहाए, गाहा-*

*मू. ( ३०४ ) परिअरबंधेण भडंजाणिज्जा महिलिअं निवसनेनं।*
*सित्थेण दोणगागं कविं च एक्काए गाहाए॥*

**वृ.** अनु-लिङ्गग्रहणसम्बन्धस्मरणस्य पश्चान्मीयते परिच्छिद्यते वस्त्वनेनेति अनुमानं, तच्च त्रिविधं-पूर्ववत् शेषवत् दृष्टसाधर्म्यवच्चेति। 'से किं तं पुव्व'मित्यादि, विशिष्टं पूर्वोपलब्धं चिह्नमिह पूर्वमुच्यते, तदेव निमित्तरूपतया यस्यानुमानस्यास्ति तत्पूर्ववत्, तद्वारेण गमकमनुमानं पूर्ववदिति भावः।

तथा चाह-'माता पुत्र'मित्यादि श्लोकः, यथा माता स्वकीयं पुत्र बाल्यावस्थायां नष्टं युवानं सन्तं कालान्तरेण पुनः कथमप्यागतं काचित्तथाविधस्मृतिपाटववती, न सर्वाः, पूर्वदृष्टेनलिङ्गेन केनचित् क्षतादिना प्रत्यभिजानीयात्-मत्पुत्रोऽयमिति अनुमिनुयादित्यर्थः, केन पुनर्लिङ्गेने-त्याह-'क्षतेन वे'त्यादि, स्वदेहोद्भवमेव क्षतं, आगन्तुकस्तु श्वदंष्ट्रादिकृतो व्रणः, लाञ्छन-मषतिलकास्तु प्रतीताः, तजयमत्र प्रयोगो-मत्पुत्रोऽयम्, अनन्यसाधारणक्षतादिलक्षण-विशिष्टलिङ्गोपलब्धेरिति साधर्म्यदृष्टान्तयोः सत्त्वेतराभावादयमहेतुरिति चेत्, नैवं, हेतोः परमार्थेनैकलक्षणत्वात्, तद्बलेनैव गमकत्वोपलब्धेः, उक्तं च न्यायवादिना पुरुषचन्द्रेण-

"अन्यथाऽनुपपन्नत्वमात्रं हेतोः स्वलक्षणम्।
सत्त्वासत्त्वे ति तद्धर्मौ, दृष्टान्तद्वयलक्षणे॥

तद्धर्माविति-अन्यथानुपपन्नत्वधर्मौ, कथम्भूते सत्त्वासत्त्वे इत्याह-साधर्म्यवैधर्म्यरूपे दृष्टान्तद्वये लक्ष्यते-निश्चीयते [अथ यदि]दृष्टान्तद्वयलक्षणेन च धर्मिसत्तायां धर्माः सर्वेऽपि सर्वदा भवन्त्येव, पटादेः शुक्लत्वादिधर्मैर्व्य(रव्य)भिचारात्, ततो दृष्टान्तयोः सत्त्वासत्त्वधर्मौ यद्यपि क्वचिद्धेतौ न दृश्येते तथापि धर्मिस्वरूपमन्यथानुपपन्नत्वं भविष्यतीति न कश्चिद्विरोध इति भावः।

यत्रापि धूमादौ दृष्टान्तयोः सत्त्वासत्त्वे हेतोर्दृश्येते तत्रापि साध्यान्यथानुपपन्नत्वस्यैव प्राधान्यात्तस्यैवैकस्य हेतुलक्षणताऽवसेया, तथा चाह-

"धूमादेर्यद्यपि स्यातां, सत्त्वासत्त्वे स्वलक्षणे।
अन्यथानुपपन्नत्वप्राधान्याल्लक्षणैकता॥"

किंच-यदि दृष्टान्ते सत्त्वासत्त्वेदर्शनाद्धेतुर्गमक इष्यते तदा लोहलेख्यं वज्रं पार्थिवत्वात् काष्ठादिवदित्यादेरपि गमकत्वं स्याद्, अभ्यधायि च -

"दृष्टान्ते सदसत्त्वाभ्यां, हेतुः सम्यग् यदिष्यते।
लोहलेख्यं भवेद्वज्रं, पार्थिवत्वाद् द्रुमादिवद्॥" इति

यदि च-पक्षधर्मत्वसपक्षसत्त्वविपक्षासत्त्वलक्षणं हेतोस्त्रैरूप्यमभ्युपगम्यापि यथोक्त-दोषभयात साध्येन सहान्यथानुपपन्नत्वमन्वेषीणं तर्हि तदेवैकं लक्षणतया वक्तमुचितं, किं रूपत्रयेणेति, आह च-

"अन्यथानुपपन्नत्वं, यत्र तत्र त्रयेण किम्?।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नान्यथानुपपन्नत्वं, यत्र तत्र त्रयेण किम् ? ॥"

इत्यादि, अत्र बहु वक्तव्यं तत्तु नोच्यते, ग्रन्थगहनातपङ्गात्, अन्यत्र यत्नेनोक्तत्वाच्चेति। आह-प्रत्यक्षविषयत्वादेवात्रानुमानप्रवृत्तियुक्ता, नैवं पुरुषपिण्डमात्रप्रत्यक्षायामपि मत्पुत्रो न वेति सन्देहाद्युक्त एवानुमानोपन्यास इति कृतं प्रसङ्गेन।

'से किं तं सेसव' मित्यादि, पुरुषार्थोपयोगिनः परिजिज्ञासितात्तुरगादेरर्थादन्यो हेषितादिरर्थः शेष इहोच्यते, स गमकत्वेन यस्मास्ति तच्छेषवदनुमानं, तच्च पञ्चविधं, तद्यथा-कार्येणेत्यादि, तत्र कार्येण कारणानुमानं यथा-हयम्-अश्वं हेषितेन अनुमिनुते इत्यध्याहारः हेषितस्य तत्कार्यत्वात्, तदाकर्ण्य हयोऽत्रेति या प्रतीतिरुत्पद्यते तदिह कार्येण-कार्यद्वारेणोत्पन्नं शेपवदनुमामुच्यत, इति भावः, क्वचित् प्रथमतः शङ्खं शब्देनेत्यादि दृश्यते, तत्रोक्तानुसरतः, सर्वोदाहरणेषु भावना कार्या।

'से किं तं कारणेण' -मित्यादि, इह कारणेन कार्यमनुमीयते, यथा विशिष्टमेघोन्नतिदर्शनामत् कश्चित् वृष्ट्यनुमानं करोति, यदाह-

"रोलम्बगवलव्यालतमालमलिनत्विषः।
वृष्टिं व्यभिचरन्तीह, नैवंप्रायाः पयोमुचः ॥" इति,

एवं चन्द्रोदयाञ्जलधेर्वृद्धिरनुमीयते कुमुदविकाशश्च, मित्रोदयाञ्जलरुहप्रबोधो घूकमदमोक्षश्च, तथाविधवर्षणात्सस्यनिष्पत्तिः कृषीबलमनःप्रमोदेश्चेत्यादि, तदेवं कारणमेवेहानुमापकं साध्यस्य नाकारणं, तत्र कार्यकारणभाव एक केषाञ्चिद्विप्रतिपत्ति पश्यँस्तमेव तावन्नियतं दशर्यन्नाहतन्तवः पटस्य कारणं न तु पटस्तन्तूनां कारणं, पूर्वमनुपलब्धस्य तस्यैव तद्भावे उपलम्भाद्, इतरेषां तु पटाभावेऽप्युपलम्भाद्, अत्राह-

ननु यदा कश्चिन्निपुणः पटभावेन संयुक्तानि तन्तून् क्रमेण वियोजयति तदा पटोऽपि तन्तूनां कारणं भवत्येव, नैवं, सत्त्वेनोपयोगाभावात्, यदेव हि लब्धसत्ताकं सत् स्वस्थितिभावेन कार्यमुपकुरुते तदेव तस्य कारणत्वेनोपदिश्यते, यथा मृत्पिण्डो घटस्य, ये तु तन्तुवियोगतोऽभावीभवता पटेन तन्तवः समुत्पद्यन्ते तेषां कथं पटः कारणं निर्दिश्यते, न हि ज्वराभावेन भवत आरोगितासुखस्य ज्वरः कारणमिति शक्यते वक्तुं, यद्येवं पटेऽप्युत्पद्यमाने तन्तवोऽभावीभवन्तीति तेऽपि तत्कारणं न स्युरिति चेत्, नैवं, तन्तुपरिणामरूप एव हि पटो, यदि च तन्तवः सर्वथाऽभावीभवेयुस्तदा मृदभावे घटस्येव पटस्य सर्वथैवोपलब्धिर्न स्यात्, तस्मात् पटकालेऽपि तन्तवः सन्तीति सत्त्वेनोपयोगात्ते पटस्य कारणमुच्यते, पटवियोजनकाले त्वेकैकतन्त्ववस्थायां पटो नोपलभ्यते अतस्तत्र सत्त्वेनोपयोगाभावान्नासौ तेषां कारणम्, एवं वीरणकटादिष्वपि भावना कार्या, तदेवं यद्यस्य कार्यस्य कारणत्वेन निश्चित्तं तत्तस्य यथासम्भवं गमकत्वेन वक्तव्यमिति। 'से किं तं गुणेण' -मित्यादि, निकषः-कषणपट्टगता कषितसुवर्णरेखा तेन सुवर्णमनुमीयते, यथा पञ्चदशादिर्ण-कोपेतमिदं सुवर्णं, तथाविधनिकषोपलम्भात्, पूर्वोपलब्धोभयसम्मतसुवर्णवत्, एवं शतपत्रि-कादिपुष्पमत्र, तथाविधगन्धोपलम्भात्, पूर्वोलब्धवस्तुवत्, एवं लवणमदिरावस्त्रादयोऽनेक-भेदसम्भवतोऽनियतस्वरूपा अपि प्रतिनियततथाविधरसास्वादस्पर्शादिगणोपलब्धेः, प्रतिनियतस्वरूपाः साधयितव्याः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*मू. ( ३०५ ) से तं अवयवेणं। से किं तं आसएणं ?, २ अग्गिं धूमेणं सलिलं बलागेणं वुट्टिं अब्भविकारेणं कुलपुत्तं सीलसमायारेणं -[इङ्गिताकारितैर्ज्ञेयैः, क्रियाभिर्भाषितेन च। नेत्रवक्त्राविकारैश्च, गृह्यतेऽन्तर्गतं मनः।] सं तं आसएणं। से तं सेसवं !*

वृ. 'से किं तं अवयवेण'मित्यादि, अवयवदर्शनेनायवी अनुमीयते, यथा महिषः, अत्र तदविनाभूतशृङ्गोपब्धेः, पूर्वोपलब्धोभयसम्मतप्रदेशवत्, अयं च प्रयोगो वृत्तिवरण्डकाद्यन्तरितत्वादप्रत्यक्ष एवावयविनि दृष्टव्यः, तत्प्रत्यक्षतायामध्यक्षत एव तत्सिद्धेरनुमानवैयर्थ्यप्रसङ्गादिति। एवं शेषोदाहारणान्यपि भावनीयानि, नवरं द्विपदं मनुष्यादीत्यादि, मनुष्योऽपं तदविनाभूतपदद्वयोपलम्भात्, पूर्वदृष्टमनुष्यवद्, एवं चतुष्पदबहुपदेष्वपि, 'गोम्ही'-कर्ण्णशृगाली, 'परियरबंधेणभड'मित्यादि गाथा पूर्वं व्याख्यातैव, तदनुसारेण भावार्थोऽप्यूह्य इति। 'से किं तं आसएण'मित्यादि, आश्रयतीत्याश्रयो-धूमबलाकादिः, तत्र धूमादग्न्यनुमानं बलाकादेस्तु जलाद्यनुमानं प्रतीतमेव, आकारेङ्गितादिभिश्च पूर्वं व्याख्यातस्वरूपैर्देवदत्ताद्याश्रितैस्तदन्तर्गतमनोऽनुमानं सुप्रसिद्धमेव, अत्राह-ननु धूमस्याग्निकार्यत्वात् पूर्वोक्तकार्यानुमान एव गतत्वात् किमिहोपन्यासः ?, सत्यं, किन्त्वग्न्याश्रयत्वेनापि लोके तस्य रूढत्वादत्राप्युपन्यासः कृत इत्यदोषः, तदेतत् शेषवदनुमान्।

*मू. ( ३०५ ) से किं तं दिट्ठसाहम्मवं ?, २ दुविहं पन्नत्तं, तंजहा-सामन्नदिट्ठं च विसेसदिट्ठं च। से किं तं समान्नदिट्ठं ?, २ जहा एगो पुरिसो तहा बहवे पुरिसा जहा बहवे पुरिसा तहा एगो पुरिसो जहा एगो करिसावणो तहा बहवे करिसावणा जहा बहवे करिसावणा तहा एगो करिसावणो, से तं सामन्नदिट्ठं।*

*से किं तं विसेसदिट्ठं ?, २ से जहानामएअ केई पुरिसे कंचि पुरिसं बहूणं पुरिसाणं मज्झे पुव्वदिट्ठं पच्चभिजाणेज्जा-अयं से पुरिसे, बहूणं करिसावनानं मज्झे पुव्वदिट्ठं करिसावणं पच्चभिज्जाणिज्जा, अयं से करिसावणे।*

*तस्स समासओ तिविहं गहणं भवइ, तंजहा-अतीयकालगहणं पडुप्पन्नकालगहणं अनागयकालगहणं। से किं तं अतीयकालगहणं ?, २ उत्तनानि वनानि निप्फन्नसस्सं वा मेइणि पुन्नाणि अ कुंडसरणईदीहिआतडागाइं पासित्ता तेनं साहिज्जइ जहा-सुवुट्ठी आसी, से तं अतीयकालगहणं।*

*से किं तं पडुप्पन्नकालगहणं ?, २ साहुं गोअरग्गगयं विच्छड्डिअपउरभत्तपाणं पासित्ता तेनं साहिज्जइ जहा सुभिक्खे वट्टई, से तं पडुप्पन्नकालगहणं। से किं तं अनागयकालगहणं ?, २*

*मू. ( ३०६ ) अब्भस्स निम्मलत्तं कसिणा य गिरी सविज्जुआ मेहा।*
*थनियं वा उब्भामो संझा रत्ता पनिट्ठा (द्धा) य॥*

*मू. ( ३०७ ) वारुणं वा महिंदं वा अन्नयरं वा पसत्थं उप्पायं पासित्ता तेनं साहिज्जह जहा-सुवुट्ठी भविस्सइ, से तं अनागयकालगहणं। एएसिं चेव विवज्जासे तिविहं गहणं भवइ, तंजहा-अतीगकालगहणं पडुप्पन्नकालगहणं अनागयकालगहणं।*

*से किं तं अतीयकालगहणं ?, नित्तिनाइं वनाइं अनिप्फन्नसस्सं वा मेइणीं सुक्काणि अ कुंडसरणईदीहिअतडागाइं पासित्ता तेनं साहिज्जइ जहा-कुवुट्ठी आसी, से तं अतीयकाल-*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*गहणं। से किं तं पडुप्पन्नकालगहणं ?, २ साहुं गोअरग्गगयं भिक्खं अलभमानं पासित्ता तेनं साहिज्जइ जहा-दुब्भिक्खे वट्टइ, से तं पडुप्पन्नकालगहणं। से किं तं अनागयकालगहणं ?, २*

*मू. ( ३०८ ) धूमायंति दिसाओ सं (?) विअमेइणी अपडिबद्धा।*
*वाया नेरइया खलु कुवुट्ठीमेवं निवेयंति ॥*

**वृ.** दृष्टेन पूर्वोपलब्धेनार्थेन सह साधर्म्यं दृष्टसाधर्म्यं, तद्गमकत्वेन विद्यते यत्र तद् दृष्टसाधर्म्यवत्, पूर्वदृष्टश्चार्थः, कश्चित् सामान्यतः कश्चित्तु विशेषतो दृष्टः स्याद्, अतस्तद्भेदादिदं द्विविधं, सामान्यतो दृष्टार्थयोगात्सामान्यदृष्टं, विशेषतो दृष्टार्थयोगाद्विशेषदृष्टं, तत्र सामान्यदृष्टं यथा एकः पुरुषस्तथा बहवः पुरुषा इत्यादि, इदमुक्तं भवति-नालिकेरद्वीपादायातः कश्चित् तत्प्रथमतया सामान्यत एकं कञ्चन पुरुषं दृष्टवा अनुमानं करोति यथा अयमेकः परिदृश्यमानः पुरुष एतदाकारविशिष्टस्तथा बहवोऽत्रापरिदृश्यमाना अपि पुरुषा एतदाकारसम्पन्ना एव, पुरुषत्वाविशेषाद्, अन्याकारत्वे पुरुषत्वहानिपसङ्गाद्, गवादिवत्, बहुषु तु पुरुषेषु तत्प्रथमतो वीक्षितेष्वेवमनुमिनोति यथाऽमी परिदृश्यमानाः पुरुषा एतदाकारवन्तः तथाऽपरोऽप्येकः कश्चित्पुरुषः एतदाकारनेव, पुरुषत्वाद्, अपराकारत्वे तद्धानिपङ्गाद्, अश्वादिवदिति, एवं कार्षापणादिष्वपि वाच्यं, विशेषतो दृष्टमाह-

'से जहानामए'इत्यादि, अत्र पुरुषाः सामान्येन प्रतीता एव, केवलं यदा कश्चित् क्वचित् कञ्चित्पुरुषविशेषं दृष्टवा तद्दर्शनाहितसंस्कारोऽसञ्जाततत्प्रमोषः समयान्तरे बहुपुरुषसमाजमध्ये तमेव पुरुषविशेषमासीनमुपलभ्यानुमानयति-यः पूर्वं मयोपलब्धः स एवाय पुरुषः, तथैव प्रत्यभिज्ञायमानत्वाद्, उभयाभिमतपुरुषवदिति, एतत्तदाविशेषदृष्टमनुमानमुच्यते, पुरुषविशेषविषयत्वाद्, एवं कार्षापणादिष्वपि वाच्यं। तदेवमनुमानस्य त्रैविध्यमुपदर्श्य साम्प्रतं तस्यैव कालत्रयविषयतां दर्शयन्नाह-

'तस्स समासओ तिविहं गहण'मित्यादि, तस्येति-सामान्येनानुवर्तमानमनुमानमात्रं संबध्यते, तस्यानुमानस्य त्रिविधं ग्रहणं भवति, तद्यथा-अतीतकालविषयं ग्रहणं-ग्राहस्य वस्तुनः परिच्छेदोऽतीतकालग्रहणं, प्रत्युत्पन्नो-वर्तमानः कालस्तद्विषयं ग्रहणं प्रत्युत्पन्नकालग्रहणम्, अनागतो-भविष्यत्कालस्तद्विषयं ग्रहणमनागतकालग्रहणं, कालत्रयवर्तिनोऽपि विषयस्यानुमानात्परिच्छेदो भवतीत्यर्थः, तत्र 'उत्तिणाइं'ति उद्गतानि तृणानि येषु वनेषु तानि तथा अयमत्र प्रयोगः-सुवृष्टिरिहासीद् उत्तृणवननिष्पन्नसस्यपृथ्वीतलजलपरिपूर्णकुण्डादिजलाशयप्रभृतितत्कार्यदर्शनाद्, अभिमतदेशवदित्यतीतस्य वृष्टिलक्षणविषयस्य परिच्छेदः, साधु च 'गोचराग्रगतं' भिक्षाप्रविष्टं विशेषेण छर्दितानि-गृहस्थैर्दत्तानि प्रचुरभक्तपानानि यस्य स तथा तं तादृशं दृष्टवा कश्चित्साधयति-सुभिक्षमिह वर्तते, साधूनां तद्धेतकप्रचुरभक्तपानलाभदर्शनात्, पूर्वदृष्टप्रदेशवदिति।

'अब्भस्स निम्मलत्तं' गाहा सुगमा, नवरं स्तनितं-मेघगर्जितं 'वाउब्भामो'त्ति तथाविधो वृष्ट्यव्यभिचारी प्रदक्षिणं दिक्षु भ्रमन् प्रशस्तो वातः 'वारुणं'ति आर्द्रामूलादिनक्षत्रप्रभवं माहेन्द्ररोहिणीज्येष्ठादिनक्षत्रसम्भवं अन्यतरमुत्पातम्-उल्कापातदिग्दाहादिकं प्रशस्तं वृष्ट्यव्यभिचारिणं दृष्टवऽनुमीयते, यथा-सुवृष्टिरत्र भविष्यति, तदव्यभिचारिणामभ्रनिर्मलत्वादीनां

Jain Education International For Private & Personal Use Only www.jainelibrary.org

समुदितानामन्यतरस्य वा दर्शनात्, यथाऽन्यदेति, विशिष्टा ह्यभ्रनिर्मलत्वादयो वृष्टिं न व्यभिचरन्त्यतः प्रतिपत्त्रैव तत्र निपुणेन भाव्यमिति ।

'एएसिं चेव विवज्जासे'इत्यादि, एतेषामेवोतृणवनादीनामतीतवृष्ट्यादिसाधकत्वेनोपन्यस्तानां हेतूनां–व्यत्यये साध्यस्यापि व्यत्ययः साधयितव्यो, यथा–

*मू. ( ३०९ )अग्गेयं वा वायव्वं वा अन्नयरं वा अप्पसत्थं उप्पायं पासित्ता तेनं साहिज्जइ जहा-कुवुट्ठी भाविस्सइ, से तं अनागयकालगहणं, से तं विसेसदिट्ठं, से तं दिट्ठसाहम्मवं, से तं अनुमाने ।*

वृ कुवृष्टिरिहासीन्निस्तृणवनादिदर्शनादित्यादिर्व्यत्ययः सूत्रसिद्धो नन्तरमनागतकालग्रहणे माहेन्द्रवारुणपरिहारेणाग्नेयवायव्योत्पाता उपन्यस्ताः, तेषां वृष्टिविघातकत्वादितरेषां सुवृष्टि-हेतुत्वादिति । 'से तं विसेसदिट्ठं, से तं दिट्ठसाहम्भव' मित्येतन्निगमनद्वयं दृष्टसाधर्म्यलक्षणा-नुमानगतभेदत्र(द्व)यस्य समर्थनानन्तरं युज्यते, यदि तु सर्ववाचनास्वत्रैव स्थाने दृश्यते, तदा दृष्टसाधर्म्यवतोऽपि सभेदस्यानुमानविशेषत्वात् कालत्रयविषयता योजनीयैवातस्तामप्यभिधाय ततो निगमनद्वयमिदमकारीति प्रतिपत्तव्यं, तदेतदनुमानमिति । अथोपमानमभिधित्सुराह–

*मू. ( ३०९ )से किं तं ओवम्मे ?, २ दुविहे, पन्नत्ते, तंजहा साम्मोवणीए अ वेहम्मोवणीए अ। से किं तं साम्मोवणीए ?, २ तिविहे पन्नत्ते, तंजहा किंचिसाहम्मोवणीए पायसाहम्मोवणीए सव्वसाहम्मोवणीए।*

*से किं तं किंचिसाहम्मोवणीए ?, २ जहा मंदरो तहा सरिसवो जहा सरिसवो तहा मंदरो जहा समुद्दो तहा गोप्पयं जहा गोप्पयं तहा समुद्दो जहा आइच्चो जहा खज्जोतो जहा खज्जोतो तहा आइच्चो जहा चंदो तहा कुमुदो जहा कुमुदो तहा चुदो, से तं किंचिसाहम्मोवणीए ।*

*से किं तं पायसाहम्मो० ।से किं तं सव्वसाहम्मोवणीए ?, २ सव्वसाहम्मे ओवम्मे नत्थि, तहावि तेनेव तस्स ओवम्मं कीरइ जहा–अरिहंतेहिं अरिहंतसरिसं कयं, चक्कवट्टिणा चक्कवट्टिसरिसं कयं, बलदेवेन बलदेवसरिसं कयं, वासुदेवेन वासुदेवसरिसं कयं साहुणा साहुसरिसं कयं, से तं सव्वसाहम्मे, से तं साहम्मोवणीए ।*

*से किं तं वेहम्मोवणीए ?, २ तिविहे पन्नत्ते, तंजहा किंचिवेहम्मे पायवेहम्मे सव्ववेहम्मे । से किं तं किंचिवेहम्मे ?, २ जहासामलेरो न तहा बाहुलेरो जहा बाहुलेरो न तहा सामलेरो, से तं किंचिवेहम्मे । से किं तं पायवेहम्मे ?, २ जहा वायसो न तहा पायसो, जहा पायसो न तहा वायसो, से तं पायवेहम्मे ।*

*से किं तं सव्ववेहम्मे ?, सव्ववेहम्मे ओवम्मे नत्थि, तहावि तेनव तस्स ओवम्मं कीरइ, जहा नीएणं नीअसरिसं कयं दासेणं दाससरिसं कयं, काकेण कासरिसं कयं, साणेन साणसरिसं कयं, पानेन पानसरिसं कयं, से तं सव्ववेहम्मे । से तं वेहम्मोवणीए। से तं ओवम्मे ।*

वृ. उपमीयते–सदृशतया वस्तु गृह्यते अनयेत्युपमा सैवौपम्यं, तच्च द्विविधं–साधर्म्येणो-पनीतम्–उपनयो यत्र तत्साधर्म्योपनीतं, वैधर्म्योपनीतं–उपनयो यत्र दधर्म्योपनीतं, तत्र साधर्म्यो-पनीतं त्रिविधं–किञ्चित्साधर्म्यादिभेदात्, किञ्चित्साधर्म्यं च मन्दरसर्षपादीनां, तत्र मन्दरसर्ष-पयोर्द्वयोरपि मूर्तव्यं साद्दश्यं, समुद्रगोष्पदयोः सोदकत्वमात्रम्, आदित्यखद्योतयोराकाश–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गमनोद्योतकत्वरूपं, चन्द्रकुमुदयोः कुशलत्वमिति। 'से किं तं पायसाहम्मे' इत्यादि, सुरक-कुदविषाणलांगुदेर्द्वयोरपि समानत्वात्, नवरं सकम्बलो गौर्वृत्तकण्ठस्तु गवय इति प्रायः-साधर्म्यता। सर्वसाधर्म्यं तु क्षेत्रकालादिभिर्भेदान्न कस्यापि केनचित्साद्धं संभवति, सम्भवे त्वेकताप्रसङ्गः, तर्ह्युपमानस्य तृतीयभेदोपन्यासोऽनर्थक एवेत्याशङ्क्याह-तथापि तस्य-विवक्षितस्यार्हदादेस्तेनैव-अर्हदादिना औपम्यं क्रियते, तद्यथा-'अर्हता अर्हत्सदृशं कृतं' तत्किमपि सर्वोत्तमं तीर्थप्रवर्तनादि कार्यमर्हता कृतं यदर्हन्नेव करोति नापरः कश्चिदिति भावः, एवं च स एव तेनोपमीयते, लोकेऽपि हि केनचिदत्यद्भुते कार्ये कृते वक्तारो दृश्यन्ते-तत्किमपीदं भवद्भिः कृतं यद्भवन्त एव कुर्वन्ति नान्यः कश्चिदिति, एवं चक्रवर्तिवासुदेवा-दिष्वपि वाच्यम्। 'से किं तं वेहम्मोवणीए' इत्यादि, यथेति-यादृशः शबलाया गोरपत्यं शाबलेयो न तादृशो बहुलाया अपत्यं बाहुलेयो, यथा चायं न तथेतरः, अत्र च शेषधर्मैस्तुल्यत्वादिभन्न-निमित्तजन्मादिमात्रतस्तु वैलक्षण्यात् किञ्चिद्वैधर्म्यं भावनीयम्।

'से किं तं पायवेहम्मे' इत्यादि, अत्र वायसपायसयोः सचेतनत्वाचेतनत्वादिभिर्बहु-भिर्धर्मैर्विसंवादात् अभिधानगतवर्णद्वयेन सत्त्वादिमात्रतश्च साम्यात्प्रायोवैधर्म्यता भावनीया, सर्ववैधर्म्यं तु न कस्यचित्केनापि संभवति, सत्त्वप्रमेयत्वादिभिः सर्वभावानां समानत्वात्, तैरप्यसमानत्वेऽसत्त्वप्रसङ्गात्, तथापि तृतीयभेदोपन्यासवैयर्थ्यमाशङ्क्याह-तथापि तस्य तेनैवौपम्यं क्रियते यथा नीचेन नीचसदृशं कृतं गुरुघातादीत्यादि, आह-नीचेन नीचसदृशं कृतमित्यादि ब्रुवता साधर्म्यमेवोक्तं स्यान्न वैधर्म्यं, सत्यं, किन्तु नीचोऽपि प्रायो नैवंविधं महापापमाचरति किं पुनरनीचः ?, ततः सकलजगद्विलक्षणप्रवृत्तत्वविवक्षया वैधर्म्यमिह भावनीयम्, एवं दासाद्युदाहरणेष्वपि वाच्यम्।

'से तं सव्ववेहम्मे'इत्यादि निगमनत्रयम्।

**मू.** *( ३०१ वर्तते ) से किं तं आगमे ?, २ दुविहे पन्नत्ते, तंजहा लोइए उ लोउत्तरिए अ। से किं तं लोइए ?, २ जन्नं इमं अन्नाणिएहिं मिच्छादिट्ठीएहिं सच्छंदबुद्धिमइविगप्पियं, तं जहा-भारहं रामायणं जाव चत्तारि वेआ संगोवंगा, से तं लोइए आगमे। से किं लोउत्तरिए ?, २ जन्नं इमं अरिहंतेहिं भगवंतेहिं उप्पन्ननाणदंसणधरेहिं तीयपच्चुप्पन्नमनागयजाणएहिं तिलुक्कवहि-अमहिअपूइएहिं सव्वन्नूहिं सव्वदरसीहिं पणीअं दुवालसंगं गणिपिडगं, तंजहा-आयारो जाव दिट्ठिवाओ।*

*अहवा आगमे तिविहे पन्नत्ते, तंजहा-सुत्तागमे अत्थागमे तदुभयागमे। अहवा-आगमे तिविहे पन्नत्ते, तंजहा-अत्तागमे अनंतरागमे परंपरागमे, तित्थगराणं अत्थस्स अत्तागमे गणहराणं सुत्तस्स अत्तागमे अत्थस्स अनंतरागमे गणहरसीसाणं सुत्तस्स अनंतरागमे अत्थस्स परंपरागमे, तेन परं सुत्तस्सवि अत्थस्सवि नो अत्तागमो नो अनंतरागमे परंपरागमे, से तं लोगुत्तरिए से तं आगमे, से तं नाणगुणप्पमाणे।*

**वृ.** गुरुपारम्पर्येणागच्छतीत्यागमः, आ-समन्ताद्गम्यन्ते-ज्ञायन्ते जीवादयः पदार्था अनेनेति वा आगमः, अयं च द्विधा प्रज्ञप्तः, तद्यथा-'लोइए'त्यादि, इदं चेहैव पूर्वं भावश्रुतं विचारयता व्याख्यातं, यावत् से तं लोइए, से किं तं लोगुत्तरिए आगमेत्ति, 'अहवा आगमे तिविहे'इत्यादि,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्र सूत्रमेव सूत्रागमः, तदभिधेयश्चार्थ एवार्थागमः, सूत्रार्थोभयरूपस्तु तदुभयागमः, अथवा अन्येन प्रकारेणागमस्त्रिविधः प्रज्ञप्तः, तद्यथा- आत्मागम इत्यादि, तत्र गुरूपदेशमन्तरेणात्मन एव आगम आत्मागमो, यथा तीर्थङ्कराणामर्थस्यात्मागमः, स्वयमेव केवलो(लेनो)पलब्धेः, गणधराणां तु सूत्रास्यात्मागमः, स्वयमेव ग्रथितत्वाद्, अर्थस्यानन्तरागमः, अनन्तरेव तीर्थकरादागतत्वाद्, उक्तं च-

"अत्थं भासइ अरहा सुत्तं गंथंति गणहरानिउण"मित्यादि, गणधरशिष्याणां जम्बूस्वामिप्रभृतीनां सूत्रस्यानन्तरागमः-अव्यवधानेन गणधरादेव श्रुतेः, अर्थस्य परम्परागमः-गणधरेणैव व्यवधानात्, ततः ऊर्ध्वं प्रभावादीनां सूत्रस्यार्थस्य च नात्मागमो नानन्तरागमः, तल्लक्षणायोगाद्, अपि तु परम्परागम एव, अनेन चागमस्य तीर्थकरादिप्रभवत्वभणनेनैकान्तापौरुषेयत्वं निवारयति, पौरुषताल्वादिव्यापारमन्तरेण नभसीव विशिष्टशब्दानुपलब्धेः, ताल्वादिभिरभिव्यज्यत एव शब्दो न तु क्रियते इति चेत्, ननु यद्येवं तर्हि सर्ववचसामपौरुषेयत्वप्रसङ्गः, तेषां भाषापुद्गलनिष्पन्नत्वाद्, भाषापुद्गलानां च लोके सर्वदैवावस्थानतोऽपूर्वक्रियमाणताऽयोगेन ताल्वादिभिरभिव्यक्तिमात्रस्यैव निर्वर्तनात्, न च वक्तव्यं-वचनस्य पौद्गलिकत्वमसिद्धं, महाध्वनिपटलपूरितश्रवणबाधिर्यकुड्यस्खलनाद्यन्यथानुपपत्तेः तस्मानैकान्तेनापौरुषेयमागमवचः, ताल्वादिव्यापाराभिव्यांग्यत्वाद् देवदत्तादिवाक्यवत्, इत्याद्यत्र बहु वक्तव्यं तत्तु नोच्यते स्थानान्तरनिर्णीतत्वादिति।

'से तं लोगुत्तरिए'इत्यादि निगमनत्रयम्॥ उक्तं ज्ञानगुणप्रमाणमथ दर्शनगुणप्रमाणमाह-

*मू.( ३०९ वर्तते ) से किं तं दंसणगुणप्पमाणे ?, २ चउव्विहे पन्नत्ते, तंजहा-चक्खुदंसणगुणप्पमाणे अचक्खुदंसणगुणप्पमाणे ओहिदंसणगुणप्पमाणे केवलदंसणगुणप्पमाणे । चक्खुदंसणं चक्खुदंसणिस्स घडपडकडरहाइएसु दव्वेसु अचक्खुदंसणं अचक्खुदंसणिस्स आयभावे ओहिदंसणं ओहिदंसणिस्स सव्वरूविदव्वेसु न पुन सव्वपज्जवेसु केवलदंसणं केवलदंस-णिदस्स सव्वदव्वेसु अ सव्वपज्जवेसु अ, से तं दंसणगुणप्पमाणे।*

वृ. दर्शनावरणकर्मक्षयोपशमादिजं सामान्यमात्रग्रहणं दर्शनमिति, उक्तं च-

"जं सामान्नग्गहणं भावाणं नेय कट्टुमागारं।
अविसेसिऊण अत्थे दंसणमिइ वुच्चए समए॥"

तदेवात्मनो गुणः स एव प्रमाणं दर्शनगुणप्रमाणम्, इदं च चक्षुर्दर्शनादिभेदाच्चतुर्विधं, तत्र भावचक्षुरिन्द्रियावरणक्षयोपशमाद् द्रव्येन्द्रियानुपघाताच्च चक्षुर्दर्शनिनः-चक्षुर्दर्शनलब्धिमतो जीवस्य घटादिषु द्रव्येषु चक्षुषो दर्शनं चक्षुर्दर्शनं, भवतीति क्रियाध्याहारः, सामान्यविषयत्वेऽपि चास्य यद् घटादिविशेषाभिधानं तत्सामान्यविशेषोः कथञ्चिदभेदादेकान्तेन विशेषभ्यो व्यतिरिक्तस्य सामान्यस्याग्रहणख्यापनार्थम्, उक्तं च-"निर्विशेषं विशेषाणां, ग्रहो दर्शनमुच्यते"इत्यादि,

चक्षुर्वर्जशेषेन्द्रियचतुष्टयं मनश्चाचक्षुरुच्यते, तस्य दर्शनमचक्षुर्दर्शनं, तदपि भावाचक्षुरिन्द्रियावरणक्षयोपशमाद् द्रव्येन्द्रियानुपघाताच्च अचक्षुर्दर्शनिनः-अचक्षुर्दर्शनलब्धिमतो



Jain Education International For Private & Personal Use Only www.jainelibrary.org

जीवस्यात्मभावे भवति, आत्मनिजीवे भावः-संश्लिष्टतया सम्बन्धो, विषयस्य घटादेरिति गम्यते, तस्मिन् सति इदं प्रादुर्भवतीत्यर्थः, इदमुक्तं भवति-चक्षुरप्राप्यकारि ततो दूरस्थमपि स्वविषयं परिच्छिनत्तीत्यस्यार्थस्य ख्यापनार्थं घटादिषु चक्षुर्दर्शनं भवतीति पूर्वं विषयस्य भेदेनाभिधेनं कृतं, श्रोतादीनि तु प्राप्यकारीणि ततो द्रव्येन्द्रियसंश्लेषद्वारेण जीवेन सह सम्बद्धमेव विषयं परिच्छिन्दन्तीत्येतद्दर्शनार्थमात्माभावे भवतीत्येवमिह विषय-स्याभेदेन प्रतिपादनम-कारीति, उक्तं च-"पुट्ठं सुणेइ सद्दं रूवं पुण पासई अपुट्ठं तु"इत्यादि।

अवधेर्दर्शनमवधिदर्शनम्, अवधिदर्शनः-अवधिदर्शनावरणक्षयोपशमसमुद्भूतावधि-दर्शनलब्धिमतो जीवस्य सर्वेष्वपि रूपिद्रव्येषु भवति, न पुनः सर्वपर्यायेषु, यतोऽवधेरु-त्कृष्टतोऽप्येकवस्तुगताः सङ्ख्येया असङ्ख्येया वा पर्याया विषयत्वेनोक्ताः, जघन्यतस्तु द्वौ पर्यायौ द्विगुणितौ, रूपगन्धस्पर्शलक्षणाश्चत्वारः पर्याया इत्यर्थः, उक्तं च-

"दव्वाओ असंखेज्जे संखेज्जे आवि पज्जवे लहइ।
दो पज्जवे दुगुणिए लहइ य एगाउ दव्वाओ ॥"

अत्राह-ननु पर्याया विशेषा उच्यन्ते, न च दर्शनं विशेषविषयं भवतिमर्हति, ज्ञानस्यैव तद्विषयत्वात्, कथमिहावधिदर्शनविषयत्वेन पर्याया निर्दिष्टाः, साधूक्तं केवलं पर्यायैरपि घटशरावोदञ्चनादिभिर्मृदादि सामान्यमेव तथा तथा विशिष्यते न पुनस्ते तत एकान्तेन व्यतिरि-च्यन्ते, अतो मुख्यतः समान्यं गुणीभूतास्तु विशेषा अप्यस्य विषयीभवन्तीति ख्यापनार्थोऽत्र तदुपन्यासः, केवलं-सकलदृश्यविषयत्वेन परिपूर्णं दर्शनं केवलदर्शनिनः-तदावरणक्ष-याविर्भूततल्लब्धिमतो जीवस्य सर्वद्रव्येषु मूर्तामूर्तेषु सर्वपर्यायेषु भ भवतीति। मनःपर्यायज्ञानं तु तथाविधक्षयोपशमपाटवात् सर्वदा विशेषानेव गृह्णदुत्पद्यते न सामान्यम्, अतस्तदर्शनं नोक्तमिति, तदेतद्दर्शनगुणप्रमाणम्।

*मू. ( ३०१ वर्तते ) से किं तं चरित्तगुणप्पमाणे ?, २ पंचविहे पन्नत्ते, तंजहा-सामाइअचरित्त-गुणप्पमाणे छेओवट्ठावणचरित्तगुणप्पमाणे परिहारविसुद्धिअचरित्तगुणप्पमाणे सुहुमसंपरा-यचरित्तगुणप्पमाणे अहक्खायचरित्तगुणप्पमाणे।*

*सामाइअचरितगुणप्पमाणे दुविहे पन्नत्ते, तंजहा-इत्तरिए अ आवकहिए अ। छेओवट्ठ-वणचरित्तगुणप्पमाणे दुविहे पन्नत्ते, तंजहा-साइआरे अ निरइआरे। परिहारविसुद्धिअचरित्त-गुणप्पमाणे दुविहे पन्नत्ते, तंजहा-निव्विसमाणए अ निव्विट्ठकाइए अ।*

*सुहुमसुपरायचरित्तगुणप्पमाणे दुविहे पन्नत्ते, तंजहा-( संकिलिस्समाणए य विसुज्झमाणए य, अहक्खायचरित्तगुणप्पमाणे दुविहे पन्नत्ते, तंजहा-) पडिवाई अ अपडिवाई अ। (अहवा) अहक्खायचरित्तगुणप्पमाणे दुविहे पन्नत्ते, तंजहा-छउमत्थिए अ केवलिए य। से तं चरित्तगुण-प्पमाणे, से तं जीवगुणप्पमाणे, से तं गुणप्पमाणे।*

**वृ.** चरन्त्यनिन्दितमनेनेति चरित्रं, तदेव चारित्रं, चारित्रमेव गुणः २ स एव प्रमाणं २-सावद्ययोगविरतिरूपं, तच्च पञ्चविधं सामायिकादि, पञ्चविधमप्येतदविशेषतः सामायिकमेव, छेदादिविशेषैस्तु विशेष्यमाणं पञ्चधा भिद्यते, तत्राद्यं विशेषाभावात् सामान्यसंज्ञायामेवाव-तिष्ठते सामायिकमिति, सामायिकं पूर्वोक्तशब्दार्थं, तच्चेत्वरं यावत्कथिकं च, तत्रेत्वरं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भाविव्यपदेशान्तरत्वात् स्वल्पकालं, तच्चाद्यचरमतीर्थकरकालयोरेव यावदद्यापि महाव्रतानि नारोप्यन्ते तावच्छिष्यस्य संभवति, आत्मनः कथां यावदास्ते तद् यावत्कथं-यावज्जीवमित्यर्थः, यावत्कथमेव यावत्कथिकम्, एतच्च भरतैरावतेष्वाद्यचरमवर्जमध्यमतीर्थकरसाधूनां महाविदेहतीर्थकरयतीनां च संभवति, पूर्वपर्यायस्य छेदेनोपस्थापनं महाव्रतेषु यत्र तच्छेदोपस्थानं भरतैरावतप्रथमपश्चिमतीर्थकरतीर्थ एव, नान्यत्र, तच्च सातिचारं निरतिचारं च, तत्रेत्वरसामायिकस्य शैक्षकस्य यदारोप्यते तीर्थान्तरं वा संक्रामतः साधोर्यथा पार्श्वनाथतीर्थान्महावीतीर्थं सङ्क्रामतस्तन्निरतिचारं मूलगुणघातिनस्तु यत् पुनर्व्रतारोपणं तत्सातिचारं।

परिहारः-तपोविशेषस्तेन विशुद्धं, अथवा परिहारः-अनेषणीयादेः परित्यागो विशेषेण शुद्धो यत्र तत्परिहारविशुद्धं तदेव परिहारविशुद्धकं, तदपि द्विविधं-निर्विश्यमानकं निर्विष्टकायिकं च, तत्र निर्विश्यमानम्,-आसेव्यमानम्, अथवा तदनुष्ठातारः साधवो निर्विश्यमानकाः, तत्सहयोगात्तदपि निर्विश्यमानकं, निर्विष्ट-आसेवितः प्रस्तुततपोविशेषः कायो येषां ते निर्विष्टकायिकाः, त एव निर्विष्टकायिकाः साधवः, तदाश्रयत्वाद् प्रस्तुतचारित्रमपि निर्विष्टकायिकम्, इदमत्र हृदयम्-तीर्थकरचरणमूले येन तीर्थकरसमीपे अदः प्रतिपन्नपूर्वं तदन्तिके वा नवको गणः परिहारविशुद्धिचारित्रं प्रतिपद्यते, नानस्य समीते, तत्रैकः कल्पस्थितो यदन्तिके सर्वा सामाचारी क्रियते, चत्वारस्तु साधवो वक्ष्यमाणं तपः कुर्वन्ति, ते च परिहारिका इत्युच्यन्ते, अन्ये तु चत्वारो वैयावृत्त्यकर्तृव्यं प्रतिपद्यन्ते, ते चानुपरिहारिका इति व्यपदिश्यन्ते, तत्र परिहारकाणां तपः प्रोच्यते-ग्रीष्मे जघन्यतश्चतुर्थं मध्यमपदे षष्ठं उत्कृष्टतस्त्वष्टमं, शिशिरे जघन्यमध्यमोत्कृष्टपदेषु यथासङ्ख्यं षष्ठमष्टमं दशमं च, वर्षासु जघन्यादिपदत्रयेऽपि यथाक्रममष्टमं दशमं द्वादशं च, शेषास्तु कल्पस्थितानुपरिहारिकाः पञ्चापि प्रायो नित्यभक्ता नोपवासं कुर्वन्ति, भक्तं च पञ्चानामप्याचामाम्लमेव, नान्यत्,

ततः परिहारिकाः षण्मासान्यावद्यथोक्तं तपः कृत्वा अनुपरिहारिकतां प्रतिपद्यन्ते, अनुपरिहारिकस्तु परिहारिकतां, तैरपि षण्मासामान्यद्यदा तपः कृतं भवति तदा कृततपसामष्टानां मध्यादेकः कल्पस्थितो व्यवस्थाप्यते, अग्रतेनश्चासौ षड् मासान्यावद्यथोक्तं तपः करोति, शेषास्तु सप्तानुचरतामाश्रयन्ति, एवं चाष्टादशभिर्मासैरयं कल्पः समाप्यते, तत्समाप्तौ च भूयस्तमेव कल्पं जिनकल्पं वा प्रतिपद्येरन् गच्छं वा प्रत्यागच्छेयुरिति त्रयी गतिः, अपरं चैतच्चारित्रं छेदोपस्थानचरणवतामेव भवति, नान्येषामित्यलमतिप्रसङ्गेन, तदेवमिह यो यस्तपः कृत्वा अनुपरिहारिकतां कल्पस्थिततां वाऽङ्गीकरोती तत्सम्बन्धि परिहारविशुद्धिकं निर्विष्टकायिकमुच्यते, ये तु तपः कुर्वन्ति तत्सम्बन्धि निर्विश्यमानकमिति स्थितम्।

संपरैति-पर्यटति संसारमनेनेति सम्पायः-क्रोधादिकषायः, लोभांशमात्रावशेषतया सूक्ष्मः सम्परायो यत्र तत्सूक्ष्मसम्परायम्, इदमपि संक्लिश्यमान विशुद्ध्यमानकभेदाद्द्विधैव, तत्र श्रेणिमारोहतो विशुद्ध्यमानकमुच्यते, ततः प्रशच्यवमानकस्य संक्लिश्यमानकमिति।

'अहक्खायं'ति अथशब्दोऽत्र याथातथ्ये आहडभिविधौ आ-समन्ताद्याथातथ्येन ख्यातमथाख्यातं कषायोदयाभावतो निरतिचारत्वात् पारमार्थिकरूपेण ख्यातमथाख्यातमित्यर्थः, एतदपि प्रतिपात्यप्रतिपातिभेदात् द्वेधा, तत्रोपशान्तमोहस्य प्रतिपाति क्षीणमोहस्य त्वप्रति-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पाति, अथवा केवलिनश्छद्मस्थस्य चोपशान्तमोहक्षीणमोहस्य तद्भवत्यतः स्वामिभेदाद् द्वैविध्यमिति।

तदेतच्चारित्रगुणप्रमाणं, तदेतज्जीवगुणप्रमाणं, तदेतद्गुणप्रमाणमिति॥ तदेवं जीवाजीव-भेदभिन्नं गुणप्रमाणं प्रतिपाद्य क्रमप्राप्तं नयप्रमाणं प्रतिपादयन्नाह–

*मू.(३१०) से किं तं नयप्पमाणे?, २ तिविहे पन्नत्ते, तंजहा-पत्थगदिट्ठंतेणं वसहिदिट्ठंतेणं पएसदिट्ठंतेणं।*

*से किं तं पत्थगदिट्ठंतेणं?, २ से जहानामए केई पुरिसे परसुं गहाय अडवीसमहुत्तो गच्छेज्जा, तं पासित्ता केइ वएज्जा-कहिं भवं गच्छसि?, अविसुद्धो नेगमो भणइ-पत्थगस्स गच्छामि, तं च केई छिंदमाणं पासित्ता वएज्जा-किं भवं छिंदसि?, विसुद्धो नेगमो भणइ-पत्थयं छिंदामि, तं च केई तच्छमाणं पासित्ता वएज्जा-किं भवं तच्छसि?, विसुद्धतराओ नेगमो भणइ-पत्थयं तच्छामि, तं च केइ उक्कीरमाणं पासित्ता वएज्जा-किं भवं उक्कीरसि?, विसुद्धतराओ नेगमो भणइ-पत्थयं उक्कीरामि, तं च केइ (वि) लिहमाणं पासित्ता वएज्जा-किं भवं(वि)लिहसि?, विसुद्धतराओ नेगमो भणइ-पत्थयं(वि)लिहामि, एवं विसुद्धतरस्स नेगमस्स नामाउडिओ पत्थओ, एवमेव ववहारस्सवि, संगहस्स चियमियमेज्जसमारूढो पत्थओ, उज्जुसुयस्स पत्थ-ओवि पत्थओ मेज्जंपि पत्थओ, तिण्हं सद्दनयाणं पत्थयस्स अत्थाहिगारजाणओ, जस्स वा वसेणं पत्थओ निप्फज्जइ, से तं पत्थयदिट्ठंतेणं।*

**वृ.** अनन्तधर्मणो वस्तुन एकांशेन नयनं नयः स एव प्रमाणं नयप्रमाणं, त्रिविधं प्रज्ञप्तमिति, यद्यपि नैगमसंग्रहादिभेदतो बहवो नयास्तथापि प्रस्थकादिदृष्टान्तत्रयेण सर्वेषामिह निरूपयितु-मिष्टत्वात्त्रैविध्यमुच्यते, तथा चाह-तद्यथा-प्रस्थकदृष्टान्तेनेत्यादि, प्रस्थकादिदृष्टान्तत्रयेण हेतुभूतेन त्रिविधं नयप्रमाणं भवतीत्यर्थः, तत्र प्रस्थकदृष्टान्तं दर्शयति-तद्यथानामकः कश्चित्पुरुषः परशुं-कुठारं गृहीत्वा अटवीमुखो गच्छेदित्यादि, इदमुक्तं भवति-प्रस्थको-मागधदेशप्रसिद्धो धान्यमानविशेषस्तद्धेतुभूतकाष्ठकर्तनाय कुठारव्यग्रहस्तं तक्षादिपुरुषमटवीं गच्छन्तं दृष्ट्वा कश्चिदन्यो वदेत्-क्व भवान् गच्छति?,

तत्राविशुद्धनैगमो भणति-अविशुद्धनैगमनयमतानुसारी सन्नसौ प्रत्युत्तरयतीत्यर्थः, किमि-त्याह-प्रस्थकाय गच्छामि, इदमुक्तं भवतिनैके गमा-वस्तुपरिच्छेदा यस्य अपि तु बहवः स निरुक्तवशात् ककारलोपतो नैगम उच्यते, अतो यद्यप्यत्र प्रस्थककारणभूतकाष्ठनिमित्तमेव गमनं, न तु प्रस्थकनिमित्तं, तथाऽप्यनेकप्रकारवस्त्वभ्युपगमपरत्वात्कारणे कार्योपचारात् तथा-व्यावहारदर्शनादेवमप्यभिधत्तेऽसौ-प्रस्थकस्य गच्छामीति, तं च कश्चित् छिन्दन्तं, वृक्षमिति गम्यते, पश्येद्, दृष्ट्वा च वदेत्-किं भवाँच्छिनत्ति?, ततः प्राक्तनात् किञ्चिद्विशुद्धनैगमनय-मतानुसारी सन्नसौ भणति-प्रस्थकं छिनद्मि, अत्रापि कारणे कार्योपचारात्तथाव्यवहृतिदर्शनादेव काष्ठेऽपि छिद्यमाने प्रस्थकं छिनद्मीत्युत्तरं, केवलं काष्ठस्य प्रस्थकं प्रति कारणताभावस्यात्र किञ्चिदासन्नत्वाद्विशुद्धत्वं, प्राक् पुनरतिव्यवहितत्वात् मलीमसत्वम्, एवं पूर्वपूर्वापेक्षया यथोत्तरस्य विशुद्धता भावनीया, नवरं तक्ष्णुवन्तं-तनूकुर्वन्तम् उत्किरन्तं-वेधनकेन मध्या-द्विकिरन्तं विलिखन्तं-लेखन्या मृष्टं कुर्वाणम्, एवमनेन प्रकारेण तावन्नेयं यावद्विशुद्धतरनैगमस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'नामाउडिउ'त्ति आकुट्टितनामा प्रस्थकोऽयमित्येवं नामाङ्कितो निष्पन्नः प्रस्थक इति।

एवमेव व्यवहारस्यापीति, लोकव्यवहारप्राधान्येनामयं व्यवहारनयः, लोके च पूर्वोक्तावस्थासु सर्वत्र प्रस्थकव्यवहारो दृश्यतेऽतो व्यवहारनयोऽप्येवमेव प्रतिपद्यते इति भावः।

'संगहस्से'त्यादि, सामान्यरूपतया सर्वं वस्तु संगृह्णाति-क्रोडीकरोतीति संग्रहस्तस्य मतेन चितादिविशेषणैर्विशिष्ट एव प्रस्थो भवति, नान्यः, तत्र चित्तो-धान्येन व्याप्तउ, स च देशतोऽपि भवत्यत आह-'मितः' पूरितः, अनेनैव प्रकारेण मेयं समारूढं यत्र स आहितदेशकृतिगणत्वान्मेयसमारूढः, अयमत्र भावार्थः-प्राक्तननयद्वस्याविशुद्धत्वात् प्रस्थककारणमपि प्रस्थक उक्तः अनिष्पन्नः प्रस्थकोऽपि स्वकार्याकरणकालेऽपि प्रस्थक इष्टः, अस्य तु ततो विशुद्धत्वाद्धान्यमानलक्षणं स्वार्थं कुर्वन्नेव प्रस्थकः, तस्य तदर्थत्वात्, तदभावे च प्रस्थकव्यपदेशेऽतिप्रसङ्गादिति यथोक्त एव प्रस्थकः, सोऽपि प्रस्थकसामान्यव्यतिरेकात् व्यतिरेके चाप्रस्थकत्वप्रसङ्गात् सर्व एक एव प्रस्थक इति प्रस्तुतनयो मन्यते, सामान्यवादित्वादिति।

'उज्जुसुयस्से'त्यादि, ऋजुसूत्रः-पूर्वोक्तशब्दार्थः तस्य निष्पन्नस्वरूपोऽर्थक्रियाहेतुः प्रस्थकोऽपि प्रस्थकः, तत्परिच्छिन्नं धान्यादिकमपि वस्तु प्रस्थकः, उभयत्र प्रस्थकोऽयमिति व्यवहारदर्शनात्, तथाप्रतीतेः, अपरं चासौ पूर्वस्याद्विशुद्धत्वाद्वर्तमाने एव मानमेये प्रस्थकत्वेन प्रतिपद्यते, नातीतानागतकाले, तयोर्विनष्टानुत्पन्नत्वेनासत्त्वादिति।

'तिण्हं सद्दनयाण'मित्यादि, शब्दप्रधाना नयाः शब्दनयाः-शब्दसमभिरूढैवंभूताः, शब्देऽन्यथा स्थितेऽर्थमन्यथा नेच्छन्त्यमी, किन्तु ?, यथैव शब्दो व्यवस्थितस्तथैव शब्देनार्थं गमयन्तीत्यतः शब्दनया उच्यन्ते, आद्यास्तु यथाकथञ्चिच्छब्दाः प्रवर्तन्तामर्था एव प्रधानमित्यभ्युपगमपरत्वादर्थनयाः प्रकीर्त्यन्ते, अत एषां त्रयाणां शब्दनयानां 'प्रस्थकार्थाधिकारज्ञः' प्रस्थकस्वरूपपरिज्ञानोपयुक्तः प्रस्थकः, भावप्रधाना ह्येते नया इत्यतो भावप्रस्थकमेवेच्छन्ति, भावश्च प्रस्थकोपयोगोऽतः स प्रस्थकः, तदुपयोगवानपि च ततोऽव्यतिरेकात् प्रस्थकः, यो हि यत्रोपयुक्तः सोऽमीषां मते स एव भवति, उपयोगलक्षणो जीवः, उपयोगश्चेत् प्रस्थकादिविषयतया परिणतः किमन्यज्जीवस्य रूपान्तरमस्ति ? यत्र व्यपदेशान्तरं स्यादिति भावः,

'जस्स वा वसेणे'त्यादि, यस्य वा प्रस्थककर्तृगतस्योपयोगस्य वशेन प्रस्थको निष्पद्यते तत्रोपयोगे वर्तमानः कर्ता प्रस्थको, न हि प्रस्थकेऽनुपयुक्तः, प्रस्थकं निर्वर्तयितुं कर्ता समर्थः, ततस्तदुपयोगानन्यत्वात् स एव प्रस्थकः, इमां च तेऽत्र युक्तिमभिदधति-सर्वं वस्तु स्वात्मन्येव वर्तते, न त्वात्मव्यतिरिक्ते आधारे, वक्ष्यमाणयुक्त्या एतन्मतेनान्यस्यान्यत्र वृत्त्ययोगात्, प्रस्थकश्च निश्चयात्मकं मानमुच्यते, निश्चयश्च ज्ञानं, तत्कथं जडात्मनि काष्ठभाजने वृत्तिमनुभविष्यति ?, चेतनाचेतनयोः सामानाधिकरण्याभावात्, तस्मात्, प्रस्थकोपयुक्त एव प्रस्थकः। 'से त'मित्यादि निगमन्।

*मू. ( ३१० वर्तते ) से किं तं वसहिदिट्ठंतेणं ?, २ से जहानामए केई कंचि पुरिसं वएज्जा-कहिं भवं वससि ?, तं अविसुद्धो नेगमो भणइ-लोगे वसामि, लोगे तिविहे पन्नत्ते, तंजहा-उड्ढलोए अहोलोए तिरिअलोए, तेसु सव्वेसु भवं वससि ?, विसुद्धो नेगमो भणइ-तिरिअलोए वसामि, तिरिअलोए जंबुद्दीवाइआ संयभूरमणपज्जवसाना असंखिज्जा दीवसमुद्दा पन्नत्ता,*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*तेसु सव्वेसु भवं वससि ?, विसुद्धतराओ नेगमो भणइ-*

*जंबुद्दीवे वसामि, जंबुद्दीवे दस खेत्ता पन्नत्ता, तंजहा- भरहे एरवए हेमवए एरन्नवए हरिवस्से रम्मगवस्से देवकुरू उत्तरकुरू पुव्वविदेहे अवरविदेहे, तेसु सव्वेसु भवं वससि ?, विसुद्धतराओ नेगमो भणइ- भरहे वासे वसामि, भरहे वासे दुविहे पन्नत्तं, तंजहा-*

*दाहिणड्डभरे उत्तरड्डभरहे वसामि दाहिणड्डभरहे अणेगाइं गामागरणगरखेडकब्बमडंबदोण- मुहपट्टणासमसंवाहसन्निवेसाइं, तेसु सव्वेसु भवं वससि ?, विसुद्धतराओ नेगमो भणइ- पाडलिपुत्ते वसामि, पाडलिपुत्ते अनेगाइं गिहाइं, तेसु सव्वेसु भवं वससि ?, विसु० नेग० भणइ- देवदत्तस्स घरे वसामि, देवदत्तस्स घरे अनेगा कोट्ठगा, तेसु सव्वेसु भवं वससि ?, विसु० ने० भणइ-*

*गब्भघरे वसामि, एवं विसुद्धस्स नेगमस्स वसमाणो, एवमेव ववहारस्सवि, संगहस्स संथार- समारूढो वसइ, उज्जुसुअस्स जेसु आगासपएसेसु ओगाढो तेसु वसइ, तिण्हं सद्दनयाणं आयभावे वसइ। से तं वसहिदिट्ठिंतेणं।*

**वृ**.वसतिः-निवासस्तेन दृष्टान्तेन उच्यते, तद्यथानामकः कश्चित्पुरुषः पाटलिपुत्रादौ वसन्तं कश्चित्पुरुषं वदेत्क्व भवान् वसति ?, तत्राविशुद्धनैगमो भणति-अविशुद्धनैगमनगामतानुसारी सन्नसौ प्रत्युत्तरं प्रयच्छति-लोके वसामि, तन्निवासक्षेत्रस्यापि चतुर्दशरज्ज्वात्मक-लोकादन- र्थान्तरस्त्वाद्, इत्थमपि च व्यवहारदर्शनात्, विशुद्धनैगमस्त्वतिव्याप्तिरत्वादिदमसङ्गतं मन्यते, ततस्तिर्यग्लोके वसामीति संक्षिप्योत्तरं ददाति, विशुद्धतरस्त्विदमप्यतिव्याप्तिनिष्ठं मन्यते ततो जम्बूद्वीपे वसामीति संक्षिप्ततरमाह, एवं भरतवर्षदक्षिणार्द्धभरतपाटलिपुत्रदेवदत्तगृहगर्भगृहेष्वपि भावनीयम्, एवं 'विसुद्धस्स नेगमस्स वसमाणो वसइ' एवमुत्तरोत्तरभेदापेक्षया विशुद्धनैगमस्य वसन्नेव वसति, नान्यथा, इदमुक्तं भवति-यत्र गृहादौ सर्वदा निवासित्वेनासौ विवक्षितः तत्र तिष्ठन्नेव एष तत वसतीति व्यपदिश्यते, यदि पुनः कारणवशतोऽन्यत्र रथ्यादौ वर्तते तदा तत्र विवक्षिते गृहादौ वसतीति न प्रोच्यते, अतिप्रसङ्गादिति भावः।

'एवमेवे'त्यादि, लोकव्यवहारनिष्ठो हि व्यवहारनयो, लोके च नैगमोक्तप्रकाराः सर्वेऽपि दृश्यन्ते इति भावः, अथ चरमनैगमोक्तप्रकारो लोके नेच्यते, कारणतो ग्रामादौ वर्तमानेऽपि देवदत्ते पाटलिपुत्रे एष वसतीति व्यपदेशदर्शनादिति चेत्, नैतदेवं, प्रोषिते देवदत्ते च इह वसति न वेति केनचित्पृष्टे प्रोषितोऽसौ नेह वसतीत्यस्यापि लोकव्यवहारस्य दर्शनादिति।

'संगहस्से'त्यादि, प्राक्तनात् विशुद्धत्वात् संग्रहनयस्य गृहादौ तिष्ठन्नपि संस्तारकारूढ एव शयनक्रियावान् वसतीत्युच्यते, इदमुक्तं भवति-संस्तारकेऽवस्थाना दन्यत्र निवासार्थ एव न घटते, चलनादिक्रियावत्त्वात्, मार्गादिप्रवृत्तवत्, संस्तारके च वसतो गृहादौ वसतीति व्यपदेशा- योग एव, अतिप्रसङ्गात्, तस्मात् क्वासौ वसतीति निवासजिज्ञासायां संस्तारके-शय्यामात्रस्वरूपे वसतीत्येतदेवास्य मतेनोच्यते, नान्यदीति भावः, स च नानादेशादिगतोऽप्येक एव, संग्रहस्य सामान्यवादित्वादिति।

ऋजुसूत्रस्य तु पूर्वस्मादिशुद्धत्वाद् येष्वाकाशप्रदेशेष्ववगाढस्तेष्वेव वसतीत्युच्यते, न संस्तारके, सर्वस्यापि वस्तुवृत्त्या नभस्येवावगाहाप येषु प्रदेशेषु संस्तारके वर्त्तते-संस्तार-

केर्णैवाक्रान्ता वर्त्तन्ते, ततो येष्वेव प्रदेशषुस्वयमवगाढस्तेष्वेव वसतीत्युच्यते, स च वर्तमानकाल एवास्ति, अतीतानागतयोर्विनष्टानुत्पन्नत्वेनैतन्मतेऽसत्त्वादिति।

त्रयाणां शब्दनयानामात्मभावे-स्वस्वरूपे सर्वोऽपि वसति, अन्यस्यान्यत्र वृत्त्ययोगात्, तथाहि-अन्योऽन्यत्र वर्तमानः किं सर्वात्मना वर्तते देशात्मना वा ?, यद्याद्यः पक्षस्तर्हि तत्रापि देशे अनेन वर्त्तित्वयं, ततः पुनरपि विकल्पद्वयं-किं सर्वात्मना वर्तते देशात्मना देति ?, सर्वात्मपक्षे देशिनो देशरूपताऽऽपत्तिः, देशात्मपक्षे तु पुनस्तत्रापि देशे देशिना वर्तितव्यं, ततः पुनरपि तदेव विकल्पद्वयं, तदेव दूषणमित्यनवस्था, तस्मात्सर्वोऽपि स्वस्वभाव एव निवसति, तत्परित्यागेनान्यत्र निवासे तत्र निःस्वभावताप्रसङ्गादित्यलं बहुभापितया।

'से त'मित्यादि निगमनम्।

*मू. ( ३१० वर्तते ) से किं तं पएसदिट्ठंतेणं ?, २ नेगमो भणइ-छन्नं पएसो, तंजहा-धम्मपएसो अधम्मपएसो आगासपएसो जीवपएसो खंएपएसो देसपएसो, एवं वयंतं नेगमं संगहो भणइ-जं भणसि-छण्हं पएसो तं न भवइ-कम्हा ?, जम्हा जो देसपएसो सो तस्सेव दव्वस्स, जहा को दिट्ठंतो ?, दासेण मे खरो कीओ दासोऽवि मे खरोऽवि मे, तं मा भणाहि-छण्हं पएसो, भणाहि पंचण्हं पएसो, तंजहा-धम्मपएसो अधम्मपएसो आगासपएसो जीवपएसो खंधपएसो,*

*एवं वयंतं संगहं ववहारो भणइ-जं भणसि-पंचण्हं पएसो, तं न भवइ, कम्हा ?, जह जहा पंचण्हं गोट्ठिआणं पुरिसाणं केइ दव्वजाए सामन्ने भवइ, तंजहा-हिरन्ने वा सुवन्ने वा धने वा धन्ने वा, तं न ते जुत्तं वत्तुं जहा पंचण्हं पएसो, तं मा भणिहि-पंचण्हं पएसो, भणाहि-पंचविहो पएसो, तंजहा-धम्मपएसो अधम्मपएसो आगासपएसो जीवपएसो खंधपएसो,*

*एवं वयंतं ववहारं उज्जुसुओ भणइ-जं भणसि-पंचविहो पएसो, तं न भवइ, कम्हा ?, जइ ते पंचविहो पएसो एवं ते एक्केक्को पएसो पंचविहो एवं ते पनवीसतिविहो पएसो भवइ, तं मा भणाहि-पंचविहो पएसो, भणाहि-भइयव्वो पएसो-सिअ धम्मपएसो सिअ अधम्मपएसो सिअ आगासपएसो सिअ जीवपएसो सिअ खंधपएसो,*

*एवं वयंतं उज्जुसुयं संपइ सद्दनओ भणइ-जं भणसि भइयव्वो पएसो, तं न भणइ, कम्हा ?, जइ भइअव्वो पएसो एवं ते धम्मपएसोऽवि सिअ धम्मपएसो सिअ अधम्मपएसो सिअ आगासपएसो सिअ जीवपएसो सिअ खंधपएसो अधम्मपएसोऽसि सिअ धम्मपएसो जाव खंधपएसो, जीवपएसोऽवि सिअ धम्मपएसो जाव सिअ खंधपएसो, खंधपएसोऽसि सिअ धम्मपएसो जाव सिअ खंधपएसो, एवं ते अणवत्था भविस्सइ, तं मा भणाहि-भइयव्वो पएसो, भणाहि-धम्मे पएसे, से पएसे धम्मे, अहम्मे पएसे से पएसे अहम्मे, आगासे पएसे से पएसे आगासे, जीवे पएसे से पएसे नोजीवे, खंधे पएसे से पएसे नोखंधे,*

*एवं वयंतं सद्दनयं समभिरूढो भणइ जं भणसि-धम्मे पएसे से पएसे धम्मे जाव जीवे पएसे से पएसे नोजीवे खंधे पएसे से पएसे नोखंधेअ, तं न भवइ, कम्हा ?, इत्थं खलु दो समासा भवंति, तंजहा-*

*तत्पुरिसे अ कम्मधारए अ, तं न नज्जइ कयरेणं समासेनं भणसि ?, किं तत्पुरिसेनं किं*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*कम्मधारएणं ?, जइ तत्पुरिसेणं भणसि तो मा एवं भणाहि, अह कम्मधारएणं भणसि तो विसेसओ भणाहि, धम्मे अ से पएसे अ से पएसे धम्मे अहम्मे अ से पएसे अ से पएसे अहम्मे आगासे अ से पएसे अ से पएसे आगासे जीवे अ से पएसे अ से पएसे नोजीवे खंधे अ से पएसे अ से पएसे नोखंधे, एवं वयंतं समभिरूढं संपइ एवंभूओ भणइ-जं जं भणसि तं तं सव्वं कसिणं पडिपुन्नं निरवसेसं एगगहणगहियं देसेऽवि मे अवत्थू पएसेऽवि मे अवत्थू। से तं पएसदिट्ठंतेणं। से तं नयप्पमाणे।*

**वृ.** प्रकृष्टो देशः प्रदेशो-निर्विभागो भाग इत्यर्थः, स एव दृष्टान्तस्तेनअ नयमतानि चिन्त्यन्ते-तत्र नैगमो भणति-षण्णां प्रदेशः तद्यथा-'धम्मप्पएसे'इत्यादि, धर्मशब्देन धर्मास्तिकायो गृह्यते, तस्य प्रदेशो धर्मप्रदेशः, एवमधर्माकाशजीवास्तिकायेष्वपि योज्यं, स्कन्धः-पुद्गलद्रव्य-निचयस्तस्य प्रदेशः स्कन्धप्रदेशः, देशः-एषामेव पञ्चानां धर्मास्तिकायाद्रव्याणां प्रदेशद्वयादि-निर्वृत्तोऽवयवस्तस्य प्रदेशो देशप्रदेशः, अयं च प्रदेशसामान्याव्यभिचारात् षण्णां प्रदेश इत्युक्तं, विशेषविवक्षायां तु षट् प्रदेशाः।

एवं वदन्तं नैगमं ततो निपुणतरः संग्रहो भणति-यद्भणसि षण्णां प्रदेश इति, तत्र भवति-तन्न युज्यते, कस्मात् ?, यस्माद् यो देशप्रदेश इति षष्ठे स्थाने भवता प्रतिपादितं, तदसङ्गतमेव, यतो धर्मास्तिकायादिद्रव्यस्य सम्बन्धी यो देशस्तस्य यः प्रदेशः स वस्तुवृत्त्या तस्यैव द्रव्यस्य यत्सम्बन्धी देशो विवक्ष्यते, द्रव्याव्यतिक्तिस्य देशस्य यः प्रदेशः स द्रव्यस्यैव भवति, यथा कोऽत्र दृष्टान्त इत्याह-

'दासेणे'त्यादि, लोकेऽप्येवं व्यवहृतिर्दृश्यते, यथा कश्चिदाह-मदीयदासेन खरः क्रीतः, तत्र दासोऽपि मदीयः खरोऽपि मदीयः, दासस्य मदीयत्वात्, तत्क्रीतः, खरोऽपि मदीय इत्यर्थः, एवमिहापि देशस्य द्रव्यसम्बन्धित्वात्तत्प्रदेशोऽपि द्रव्यसम्बन्ध्येवेति भावः, तस्मान्मा भण-षण्णां प्रदेशः, अपि त्वेवं भणपञ्चानां प्रदेश इति, त्वदुक्तषष्ठप्रदेशस्यैवाघटनादित्यर्थः, तदेव दर्शयति-तद्यथा-धर्मप्रदेश इत्यादि, एतानि च पञ्च द्रव्याणि तत्प्रदेशाश्चेत्येवमप्यविशुद्धसंग्रह एव मन्यते, अवान्तरद्रव्ये सामान्यद्यभ्युपगमात्, विशुद्धस्तु द्रव्यबाहुल्यं प्रदेशकल्पनां च नेच्छत्येव, सर्वस्यैव वस्तुसामान्यक्रोडीकृतत्वेनैकत्वादित्यलं प्रसङ्गेन।

प्रकृतमुच्यते-एवं वदन्तं संग्रहं ततोऽपि निपुणो व्यवहारो भणति-यद्भणसि पञ्चानां प्रदेश इति, तत्र भवति-न युज्यते, कस्माद् ?, यदि यथा पञ्चानां गोष्ठिकानां किञ्चिद् द्रव्यं सामान्यम्-एकं भवति, तद्यथा-हिरण्यं वेत्यादि, एवं यदि प्रदेशोऽपि स्यात्ततो युज्यते वक्तुं-पञ्चानां प्रदेश इति, इदमुक्तं भवति-यथा केषाञ्चित्पञ्चानां पुरुषाणां साधारणं किञ्चिद्धिरण्यादि भवति, एवं पञ्चानामपि धर्मास्तिकायादिद्रव्याणां यद्येकः कश्चित्साधारणः प्रदेशः स्यात्तदेयं वाचोयुक्तिर्घटेत, न चैतदस्ति, प्रतिद्रव्यं प्रदेशभेदात्, तस्मान्माभण पञ्चानां प्रदेशः, अपि तु भण-पञ्चविधः-पञ्चप्रकारः प्रदेशः द्रव्यलक्षणस्याश्रयस्य पञ्चविधत्वादिति भावः, तदेवाह 'धर्मप्रदेश' इत्यादि।

एवं वदन्तं व्यवहारमृजुसूत्रो भणति-यद्भणसि पञ्चविधः प्रदेशः, तन्न भवति, कस्माद् ?, यस्माद्यदि ते पञ्चविधः प्रदेश एवमेकैको धर्मास्तिकायादिप्रदेशः पञ्चविधः प्राप्तः, शब्दादत्र

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वस्तुव्यवस्था, शब्दाच्चैवमेव प्रतीतिर्भवति, एवं च सति पञ्चविंशतिविधः प्रदेशः प्राप्नोति, तस्मान्मा भण-पञ्चविधः प्रदेशः किन्त्वेवं भण-भाज्यः प्रदेशः, स्याद्धर्मस्येत्यादि, इदमुक्तं भवति-भाज्यो-विकल्पनीयो विभजनीयः प्रदेशः, कियद्भिर्विभागैः ?-स्याद्धर्मप्रदेश इत्यादि पञ्चभिः, ततश्च पञ्चभेद एव प्रदेशः सिद्ध्यति, स च यथास्वमात्मीयात्मीय एवास्ति न परकीयः, तस्यार्थक्रियाऽसाधकत्वात्, प्रस्तुतनयमतेनासत्त्वादिति।

एवं भणन्तमृजुसूत्रं साम्प्रतं शब्दनयो भणति-यद्भणसि-भाज्यः प्रदेशः, तन्न भवति, कुतो ?, यतो यदि भाज्यः प्रदेशः, एवं ते धर्मास्तिकायप्रदेशोऽपि कदाचिदधर्मास्तिकायादि-प्रदेशः स्याद्, अधर्मास्तिकायप्रदेशोऽपि कदाचिद्धर्मास्तिकायादिप्रदेशः, स्याद्, इत्थमपि भजनाया अनिवारितत्वाद्, यथा एकोऽपि देवदत्तः कदाचिद्राज्ञो भृत्यः कदाचिदमात्यादेरिति, एवमाकाशास्तिकायादिप्रदेशेऽपि वाच्यं, तदेवं नैयत्वाभावात्तवाप्यनवस्था प्रसज्येतेति, तन्मैवं भण-भाज्यः प्रदेशः, अपि तु इत्थं भण-'धम्मे पएसे (से पएसे धम्मे)'इत्यादि, इदमुक्तं भवति-धर्मः प्रदेश इति-धर्मात्मकः, प्रदेश इत्यर्थः, अत्राह-नन्वयं प्रदेशाः सकलधर्मास्ति-कायायदव्यतिरिक्तः सन् धर्मात्मक इत्युच्यते आहोस्वित्तदेकदेशमाव्यतिरिक्तः सन् यथा सकलजीवास्तिकायैकदेशैकजीवद्रव्याव्यतिरिक्तः सन् तत्प्रदेशो जीवात्मक इति व्यपदिश्यत इत्याह-'से पएसे धम्मेऽति'त्ति स प्रदेशो धर्मः-सकलधर्मास्तिकायाद्व्यतिरिक्त इत्यर्थः, जीवास्तिकाये हि परस्परं भिन्नान्येवानन्तानि जीवद्रव्याणि भवन्ति, अतो य एकजीवद्रव्यस्य प्रदेशः स निःशेषजीवास्तिमायैदेशवृत्तिरेव सन् जीवात्मक इत्युच्यते, अत्र तु धर्मास्तिकाय एकमेव द्रव्यं ततः सकलधर्मास्तिकायाव्यतिरिक्त एव सनत्प्रदेशो धर्मात्मक उच्यत इति भावः।

अधर्माकाशास्तिकाययोरप्येकैकद्रव्यत्वादेवमेव भावनीयं। जीवास्तिकाये तु 'जीव पएसे से नोजीवे'त्ति जीवः प्रदेश इति-जीवास्तिकायात्मकः प्रदेश इत्यर्थः, स च प्रदेशो नोजीवः, नोशब्दस्येह देशवचनत्वात् सकलजीवास्तिकायैकदेशवृत्तिरित्यर्थः, यो ह्येकजीवद्रव्यात्मकः प्रदेशः स कथमनन्तजीवद्रव्यात्मके समस्तजीवास्तिकाये वर्तेत इति भावः, एवं स्कन्धात्मकः प्रदेशो नोस्कन्धः, स्कन्धदव्याणामनन्तत्वादेकदेशवर्तितरित्यर्थः।

एवं वदन्तं शब्दनयं नानार्थसमभिरोहणात् समभिरूढः, स प्राह-यद्भणसि-धर्मः प्रदेशः स प्रदेशो धर्म इत्यादि, तन्न भवति-न युज्यते, कस्मादित्याह-इह खलु द्वौ समासौ भवतः, तद्यथा-तत्पुरुषः कर्मधारयश्च, इदमुक्तं भवति-'धम्मे पएसे से पएसे धम्मे'इत्युक्ते समास-द्वयारम्भकवाक्यद्वयमत्र संभाव्यते, तथाहि-यदि धर्मशब्दात् सप्तमीयं तदा सप्तमीतत्पुरुष-स्यारम्भकमिदं वाक्यं, यथा वने हस्तीत्यादि, अथ प्रथमा तदा कर्मधारयस्य, यथा नील-मुत्पलमित्यादि, ननु यदि वाक्यद्वयमेवात्र संभाव्यते तर्हि कथं द्वौ समासौ भवत इत्युक्तम् ?, उच्यते, समासारम्भकवाक्ययोः समासोपचाराद्, अथवा अलुक्समासविवक्षया समासावप्येतौ भवतो, यथा कण्ठेकाल इत्यादीत्यदोषः, यदि नाम द्वौ समासावत्र भवतस्ततः किमित्याह-तन्न ज्ञायते कतरेण समासेन भणसि ?, किं तत्पुरुषेण कर्मधारयेण वा ?, यदि तत्पुरुषेण भणसि, तन्मैवं भण, दोषसम्भवादिति शेषः, स चायं दोषो धर्मे प्रदेश इति भेदापत्तिः, यथा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कुण्डे बदराणीति, न च प्रदेशदेशिनौ भेदेनोपलभ्येते, अथ अभेदेपि सप्तमी दृश्यते यथा घटे रूपमित्यादि, यद्येवमुभयत्र दर्शनात् संशयलक्षणो दोषः स्यात्, अथ कर्मधारयेण भणसि, ततो विशेषेण भण 'धम्मे अ से पएसे य से'त्ति, धर्मश्च स प्रदेशश्च स इति समानाधिकरणः कर्मधारणः, एवं च सप्तम्याशङ्काभावतो न तत्पुरुषसम्भव इति भावः।

आह-नन्वयं प्रदेशः समस्तादपि धर्मास्तिकायाद्व्यतिरिक्तः सन् समानाधिकरणतया निर्दिश्यते ? उत तदेकदेशवृत्तिः सन् ? यथा जीवास्तिकायैकदेशवृत्तिर्जीवप्रदेश इत्याशंक्याह- 'से पएसे धम्मे'त्ति स च प्रदेशः सकलधर्मास्तिकायदव्यतिरिक्तो न पुनस्तदेशदेकवृत्तिरित्यर्थः, शेषभावना पूर्ववत्, 'से पएसे नोजीवे से पएसे नोखंधे'इत्यत्रापि पूर्ववदेवार्थकथनम्।

एवं वदन्तं समभिरूढं साम्प्रतमेवभूतो भणति-यद्यद्धर्मास्तिकायादिकं वस्तु भणसि तत्तत्सर्वं समस्तं कृत्स्नं देशप्रदेशकल्पनारहितं प्रतिपूर्णम्-आत्मस्वरूपेणाविकलं निरवशेषं-तदेवैकत्वान्निरवयवमेकग्रहणगृहीतम् एकाभिधानाभिधेयं न नानाभिधानभिधेयं, तानि ह्येकस्मिन्नर्थेऽसौ नेच्छति, अभिधानभेदे वस्तुभेदाभ्युपगमात्, तदेवंभूतं तद्धर्मास्तिकायादिकं वस्तु भण, न तु प्रदेशादिरूपतया, यतो देशप्रदेशौ ममावस्तुभूतौ, अखण्डस्यैव वस्तुनः सत्त्वेनोपयोगात्, तथाहि-प्रदेशप्रदेशिनोर्भेदो वा स्यादभेदो वा ?, यदि प्रथमः पक्षस्तर्हि भेदेनोपलब्धिप्रसङ्गो, न च तथोपलब्धिरस्ति, अथाभेदस्तर्हि धर्मप्रदेशशब्दयोः पर्यायतैव प्राप्ता, एकार्थविषयत्वात्, न च पर्यायशब्दयोर्युगपदुच्चारणं युज्यते, एकेनैव तदर्थप्रतिपादने द्वितीयस्य वैयर्थ्यात्, तस्मादेकाभिधानाभिधेयं परिपूर्णमेकमेव वस्त्विति। तदेवमेते निजनिजार्थसत्यताप्रतिपादनपरा विप्रतिपद्यन्ते नयाः, एते च परस्परं निरपेक्षया दुर्नयाः, सौगतादिसमयवत्, परस्परसापेक्षस्तु सुनयाः, तैश्च परस्परसापेक्षैः समुदितैरेव सम्पूर्णं भवति, नैकैकावस्थायाम्, उक्तं च स्तुतिकारेण-

"उदधाविव, सर्वसिन्धवः, समुदीर्णास्त्वयि नाथ ! दृष्टयः।
न च तासु भवान् प्रदृश्यते, पविभक्तासु सरित्स्विवोदधिः॥"

एते च नया ज्ञानरूपास्ततो जीवगुणत्वेन यद्यपि गुणप्रमाणेऽन्तर्भवन्ति तथापि प्रत्यक्षादि-प्रमाणेभ्यो नयरूपतामात्रेण पृथक् प्रसिद्धत्वाद्बहुविचारविषयत्वाज्जिनागमे प्रतिस्थानमुपयोगित्वाच्च जीवगुणप्रमाणात्पृथगुक्ताः। तदेतत्प्रदेशदृष्टान्तेनेति निगमनम्। प्रस्थकादिदृष्टान्तत्रयेण च नयप्रमाणं प्रतिपाद्योपसंहरति-तदेतन्नप्रमाणमिति। अनेन च दृष्टान्तत्रयेण दिग्मात्रदर्शनमेव कृतं, यावता यत्किमपि जीवादि वस्त्वस्ति तत्र सर्वत्र नयविचारः प्रवर्तते इत्यलं बहुजल्पितेनेति।

इतः क्रमप्राप्तं सङ्ख्याप्रमाणं विवरीषुराह-

*मू. ( ३११ ) से किं तं संखप्पमाणे ?, २ अट्ठविहे पन्नत्ते, तंजहा-नामसंखा ठवणसंखा दव्वसंखा ओवम्मसंखा परिमाणसंखा जाननासंखा गणनासंखा भावसंखा। से किं तं नाम-संखा ?, २ जस्स णं जीवस्स वा जाव से तं नामसंखा। से किं तं ठवणसंखा ?, २ जण्णं कट्ठ-कम्मे वा पोत्थकम्मे वा जाव से तं ठवणसंखा। नामठवणाणं को पइविसेसो ?, नाम (पाएणं) आवकहियं ठवणा इत्तरिया वा होज्जा आवकहिया वा होज्जा।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*से किं तं दव्वसंखा ?, २ दुविहा पन्नत्ता, तंजहा-आगमओ य नोआगमओ य, जाव से किं तं जाणयसरीरभविअसरीरवइरित्ता दव्वसंखा ?, २ तिविहा पन्नत्ता, तंजहा-एगभविए बद्धाउए अभिमुहनामगोत्ते अ। एगभविए णं भंते! एगभविएत्ति कालओ केवच्चिरं होइ ?, जहन्नेणं अंतोमुहुत्तं उक्कोसेणं पुव्वकोडी, बद्धाउए णं भंते! बद्धाउएत्ति कालओ केवच्चिरं होइ ?, जहन्नेणं अंतोमुहुत्तं उक्कोसेणं पुव्वकोडीतिभागं, अभिमुहनामगोए णं भंते! अभिमुहनामगोएत्ति कालओ केवच्चिरं होइ ?, जहन्नेणं एक्कं समयं उक्कोसेणं अंतोमुहुत्तं।*

*इदानिं को नओ कं संखं इच्छइ-तत्थ नेगमसंगहववाहार तिविहं संखं इच्छंति, तंजहा-एगभविअं बद्धाउअं अभिमुहनामगोत्तं च, उज्जुसुओ दुविहं संखं इच्छइ, तंजहा-बद्धाउअं च अभिमुहनामगोत्तं च, तिन्नि सद्दनया अभिमुहनामगोत्तं संखं इच्छंति, से तं जाणयसरीर-भविअसरीरवइरित्ता दव्वसंखा। से तं नोआगमओ दव्वसंखा, से तं दव्वसंखा।*

वृ. सङ्ख्यानं सङ्ख्या संख्यायतेऽनयेति वा सङ्ख्या, सैव प्रमाणं संख्याप्रमाणम्, इह च संख्या-शब्देन संख्याशंख्योर्द्वयोरपि ग्रहणं द्रष्टव्यं, प्राकृतमधिकृत्य समानशब्दाभिधेयत्वात्, गोशब्देन पशुभूम्यादिवत्, उक्तं च-

"गोशब्दः पशुभूम्यंशुवाग्दिगर्थप्रयोगवान्।
मन्दप्रयोगे द्रष्टव्यम्बुवज्रस्वर्गाभिधायकः ॥"

एवमिहापि संखा इतियाप्रकृतौक्तौ संख्या शंखाश्च प्रतीयन्ते, ततो द्वयस्यापि ग्रहणम्। एवं च नामस्थापनाद्रव्यादिविचारेऽपि प्रक्रान्ते संख्या शङ्खा वा यत्र घटन्ते तत्तत्र प्रस्तावज्ञेन स्वयमेव योज्यमिति।

'से किं तं नामसंखे'त्यादि, सर्वं पूर्वाभिहितनामावश्यकादिविचारानुसारतः स्वयमेव भावनीयं यावत् 'जाणयसरीरभविअसरीरवइरित्ते दव्वसंखे तिविहेत पन्नत्ते' इत्यादि, इह यो जीवो मृत्वाऽनन्तरभवे शंखेषु उत्पत्स्यते ते तेष्वबद्धायुष्कोऽपि जन्मदिनादारभ्य एकभविकः स शंख उच्यते, यत्र भवे वर्तते स एवैको भवः शंखेषूत्पत्तेरन्तरेऽस्तीतिकृत्वा, एवं शङ्खप्रायोग्यं बद्धमायुष्कं येन स बद्धायुष्कः, शङ्खभवप्राप्तानां जन्तूनां ये अवश्यमुदयमागच्छतस्ते द्वीन्द्रिय-जात्यादिनीचैर्गोत्राख्ये अभिमुखे जघन्यतः समयेनोत्कृष्टतोऽन्तर्मुहूर्तमात्रेणैव व्यवधानात् उदयाभिमुखप्राप्ते नामगोत्रे कर्मणी यस्य सोऽभिमुखनामगोत्रः, तदेष त्रिविधोऽपि भावशङ्खता-कारणत्वात् ज्ञशरीरभव्यशरीरव्यतिरिक्तो द्रव्यशङ्ख उच्यते, यद्येवं द्विभविकत्रिभविकचतुर्भ-विकादिरपि कस्मान्नेत्थं व्यपदिश्यत इति चैत्, नैवं, तस्यातिव्यवहितत्वेन भावकारणतयाऽन-भ्युपगमात्, तत्कारणस्यैव द्रव्यत्वाद्, इदानीं त्रिविधमपि शङ्खं कालतः क्रमेण निरूपयन्नाह-

'एगभविए णं भंते!' इत्यादि, एकभविकः शङ्खो भदन्त! एकभविक इति व्यपदेशेन कालतः कियच्चिरं भवतीति, अत्रोत्तरं-'जहण्णेण' मित्यादि, इदमुक्तं भवति-पृथिव्याद्यन्यर-भवेऽन्तर्मुहूर्तं जीवित्वा योऽनन्तरं शङ्खेषूत्पद्यते सोऽन्तर्मुहूर्तमेकभविकः शङ्खो भवति, यस्तु मत्स्याद्यन्यतमभवे पूर्वकोटीं जीवित्वैतैषूत्पद्यते तस्य पूर्वकोटिरेकभविकत्वे लभ्यते, अत्र चान्तर्मुहूर्तादपि हीनं जन्तूनामायुरेव नास्तीति जघन्यपदेऽन्तर्मुहूर्तग्रहणं, यस्तु पूर्वकोट्य-धिकाय्युकः सोऽसङ्ख्यातवर्षायुष्कत्वाद्देवेष्वेवोत्पद्यते न शङ्खेष्वित्युत्कृष्टपदे पूर्वकोट्युपादानम्,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आयुर्बन्धं च प्राणिनोऽनुभूयमानायुषो जघन्यतोऽप्यन्तर्मुहूर्ते शेष एव कुर्वन्त्युत्कृष्टतस्तु पूर्वकोटित्रिभाग एव न परत इति बद्धायुष्कस्य जघन्यतोऽन्तर्मुहूर्तमुत्कृष्टतः पूर्वकोटीत्रिभाग उक्तः आभिमुख्यं त्वासन्नतायां सत्यामुपपद्यते अतोऽभिमुखनामगोत्रस्य जघन्यतः समय उत्कृष्टतस्त्वन्तर्मुहूर्त काल उक्तः, यथोक्तकालात् परतस्त्रयोऽपि भावशङ्खतां प्रतिपद्यन्त इति भावः।

इदानीं नैगमादिनयानां मध्ये को नयो यथोक्तत्रिविशङ्खस्य मध्ये क शङ्खमिच्छतीति विचार्यते-तत्र नैगमसंग्रहव्यवहाराः स्थूलदृष्टित्वात्रिविधमपि शङ्खमिच्छन्ति, दृश्यते हि स्थूलदृशां कारणे कार्योपचारं कृत्वा इत्थं व्यपदेशवृत्तिः, यथा राज्यार्हकुमारे राजशब्दस्य घृतप्रक्षेपयोग्ये धटे घृतघटशब्दस्येत्यादि, ऋजुसूत्र एभ्यो विशुद्धत्वादाद्यस्यातिव्यवहितत्वेनातिप्रसङ्गभयाद्द्विविधमेवेच्छति, शब्दादयस्तु विशुद्धतरत्वाद् द्वितीयमप्यतिव्यवहितं मन्यन्ते, अतोऽतिप्रसङ्गनिवृत्त्यर्थमेकं चरममेवेच्छन्ति। 'से त'मित्यादि निगमनम्।

*मू. (३११) से किं तं ओवम्मसंखा ?, २ चउव्विहा पन्नत्ता, तंजहा-अत्थि संतयं संतएणं उवमिज्जइ, अत्थि संतयं असंतएणं उवमिज्जइ, अत्थि असंतयं संतएणं उवमिज्जइ, अत्थि असंतयं असंतएणं उवमिज्जइ, तत्थ संतयं संतएणं उवमिज्जइ, जहा संता अरिहंता संतएहिं पुरवरेहिं संतएहिं कवाडेहिं संतएहिं वच्छेहिं उवमिज्जइ, तंजहा-*

*मू. (३१२) पुरवरककवाडवच्छा फलिहभुआ दंदुहित्थणिअघोसा।*
*सिरिवच्छंकिअवच्छा सव्वेऽपि जिनाचउव्वीसं।*

*मू. (३१३) संतयं असंतएणं उवमिज्जइ, जहा संताइं नेरइअतिरिक्खजोणिअमनुस्सदेवाणं आउआइं असंतएहिं पलिओवमसागरोवमेहिं उवमिज्जंति, असंतयं संतएणं उ० तं० -*

*मू. (३१४) परिजूरिअपेरंतं चलंतबिंटं पडंतनिच्छीरं।*
*पत्तं व वसनपत्तं कालप्पत्तं भणइ गाहं॥*

*मू. (३१५) जह तुब्भे तह अम्हे तुम्हेऽवि अ होहिहा जहा अम्हे।*
*अप्पाहेइ पडंतं पंडुअपत्तं किसलयाणं॥*

*मू. (३१६) नवि अत्थि नवी अ होही उल्लावो किसलपंडुपत्ताणं।*
*उवमा खलु एस कया भविअजनविबोहाणट्ठाए।*

*मू. (३१७) असंतयं असतएहिं उवमिज्जइ, जहा खरविसाणं तहा ससविसाणं।*
*से तं ओवम्मसंखा।*

**वृ.** सङ्ख्यानं सङ्ख्या-परिच्छेदो वस्तुनिर्णय इत्यर्थः, औपम्येन उपमाप्रधाना वा सङ्ख्या औपम्यसङ्ख्या इयं चोपमानोपमेययोः इद सत्त्वामसत्त्वाभ्यां चतुर्द्धा, तद्यथा-'संतयं संतएण'मित्यादि, तत्र प्रथमभङ्गे तीर्थकरादेरुपमेयस्य कपाटादिना उपमानेन स्वरूप संख्यायते-निश्चीयते इत्यौपम्यसंख्यात्वं भावनीयं, यस्य तीर्थकराः स्वरूपतो निश्चिता भवन्ति तस्य पुरवरकपाटोपमवक्षसो-नगरपरिघोपमबाहवस्ते भवन्तीत्याद्युपमया तत्स्वरूपनिश्चयस्येहोत्पाद्यनत्वादिति भावः। द्वितीयभङ्गे पल्योपमसागरोपमाणां योजनप्रमापल्यावालाग्रादिकल्पनामात्रेण प्ररूपितत्वादसत्त्वमवसेयम्, उपमानता चैषामेतन्महानारकाद्यायुर्महत्त्वसाधनादिति, तृतीयभङ्गे 'परिजूरियपेरंत' मित्यादि गाथा, तत्र वसन्तसमये परिजीर्णपर्यन्तं स्वपरिपाकत एव प्रचलद्वृन्तं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृक्षात्पतद् भ्रश्यत्पत्रं गाथां भणतीति सम्बन्धः, परिणतत्वादेव निःक्षीरं वृक्षवियोगादित्वलक्षणं व्यसनं प्राप्तं कालप्राप्तं-विनाशकालप्राप्तमिति।

तामेव गाथामाह-'जह तुब्भे' इत्यादि, वृक्षात्पतता केनचिज्जीर्णपत्रेण किशलयानाश्रित्योक्तं, किं तद् ?, उच्यते-शृणुत भो उद्गच्छत्कोमलपत्रविशेषरूपाणि किशलयान्यवहितानि भूत्वा, वृक्षात्पतत् मल्लक्षणं पाण्डुपत्रं युष्माकं 'अप्पाहेइ' इति कथयति, किं तदित्याह- 'जह तुब्भे तह अम्हे'त्ति, यथा पुष्पदभिनवस्निग्धकान्तीनि कमनीयकामिनीकरतलस्पर्शलक्ष्मीकानि सकलजनमनोनेत्रानन्ददायीनि साम्प्रतं भवन्ति दृश्यन्ते तथा वयमपि पूर्वमास्तेमि क्रियाध्याहारः, यथा च परिजीर्णपर्यन्तादिस्वरूपाणि साम्प्रतं वयं वर्तेमहि यूयमपि निश्चितं कालेन तथा भविष्यथ इति न काचित् स्वसमृद्धौ गर्ववुद्धिः परासमृद्धौ तु हेलामतिर्विधेया, अनित्यत्वात्सलकसमृद्धि-सम्बन्धानामिति भावः। नन्वलौकिकमिदं यत्पत्राणि परस्परं जल्पन्ति, सत्यमित्याह-

'नवि अत्थि' गाहा सुगमा, नवरं वृक्षपत्रसमृद्धयसमृद्धिश्रवणतोऽनित्यतावगमेन भव्यानां सांसारीकसमृद्धिषु निर्वेदो यथा स्यादित्यसद्भूतोऽपि पत्राणामिहालाप उक्त इति भावः, तदेवं 'जह तुब्भे तह अम्हे' इत्यत्र किशलयपत्रावस्थया पाण्डुपत्रावस्था उपमीयते, एवं चोपमान-भूतकिशलयपत्रावस्था तत्कालभावित्वात्सती पाण्डुपत्राणां तूपमेयभूता साऽवस्था भूतपूर्वत्वा-दसती, 'तुब्भेविय होहिहा' इत्यादौ तु पाण्डुपत्रावस्था किशलयपत्रावस्था उपमीयते, तत्राप्युप-मानभूता पाण्डुपत्रावस्था तत्कालयोगित्वात्सती किशलयदलानां तूपमेयभूता सा भविष्यत्काल-योगित्वादसती, अतोऽसत्सता उपमीयत तृतीयभङ्गविषयता संगच्छते, सुधिया तु यदि घटते तदाऽन्यथाऽपि सा वाच्येति।

चतुर्थभङ्गे 'असंतयं असंतएणे' त्यादि, यथा खरविषाणमभावरूपं प्रतीतं तथा शशविषाण-मप्यभावरूपं निश्चेतव्यं, यथा वा शशविषामभावरूपं निश्चितमित्थमितरदपि ज्ञातव्यमिति भावः, एवं चोपमानोपमेययोरसत्त्वं स्फुटमेवेति।

***मू.* ( ३१७ वर्तते )** *से किं परिमाणसंखा ?, २ दुविहा पन्नत्ता, तं०-कालिअसुयपरिमाण-संखा दिट्ठिवायसुअपरिमाणसंखा य। से किं तं कालिअसुअपरिमाणसंखा ?, २ अनेगविहा पन्नत्ता, तंजहा- पज्जवसंखा अक्खरसंखा संघायसंखा पयसंखा पायसंखा गाहासंखा सिलोग-संखा वेढसंखा निज्जुत्तिसंखा अनुओगदारसंखा उद्देसगसंखा अज्झयणसंखा सुअखंधसंखा अंगसंखा, से तं कालिअसुअपरिमाणसंखा।*

*से किं तं दिट्ठिवायसुअपरिमाणसंखा ?, २ अनेगवीहा पन्नत्ता, तंजहा- पज्जवसंखा जाव अनुओगदारसंखा पाहुडसंखा पाहुडिआसंखा पाहुडपाहुडिआसंखा वत्थुसंखा, से तं दिट्ठि-वायसुअपरिमाणसंखा से तं जाणणासंखा ?, २ जो जं जाणइ तंजहा-सद्दं सद्दिओ गणियं गणिओ निमित्तं नेमित्तिओ कालं कालनाणी वेज्जयं वेज्जो, से तं जाणणासंखा।*

**वृ.** संख्यायते अनयेति सङ्ख्या, परिमाणं पर्यवादि तद्रूपा संख्या परिमाणसंख्या, सा च कालिकश्रुतदृष्टिवादविषयत्वेन द्विविधा, तत्र कालिकश्रुतपरिमाणसङ्ख्यायां पर्यवसङ्ख्या इत्यादि, पर्यवादिरूपेण-परिणामविशेष कालिकश्रुतं संख्यागत इति भावः, तत्र पर्यवाः पर्याया धर्मा इतियावत् तद्रूपा सङ्ख्या पर्यवसङ्ख्या, सा च कालिकश्रुते अनन्तपर्यायात्मिका दृष्टव्या, एकैक-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्याप्यकाराद्यक्षरस्य तदभिधेयस्य च जीवादिवस्तुनः प्रत्येकमनन्तपर्यायत्वात्, एवमन्यत्रापि भावना कार्या, नवरं सङ्ख्येयान्यकाराद्यक्षराणि, द्वाद्यक्षरसंयोगरूपाः सङ्ख्येयाः सङ्घाताः सुप्तिङन्तानि समयप्रसिद्धानि वा संख्येयानि पदानि, गाथादिचतुर्थांशरूपाः सङ्ख्येयाः पादाः सङ्ख्येया गाथाः, संख्येयाश्च श्लोकाः प्रतीताः, एवं छन्दोविशषरूपाः संख्येया वेष्टकाः, निक्षेपनिर्युक्त्यु-पोद्घातनिर्युक्तिसूत्रस्पर्शकनिर्युक्तिलक्षणा त्रिविधा निर्युक्तिः, व्याख्योपायभूतानि सत्पद-प्ररूपणतादीन्युपक्रमादीनि वा सङ्ख्येयान्यनुयोगद्वाराणि, सङ्ख्येया उद्देशाः, सङ्ख्येयान्य-ध्ययनानि, सङ्ख्येयाः श्रुतस्कन्धाः, सङ्ख्येयान्यङ्गानि, एषा कालिक-श्रुतपरिमाणसङ्ख्या, एवं दृष्टिवादेऽपि भावना कार्या, नवरं प्राभृतादयः पूर्वान्तर्गताः श्रुताधिकार-विशेषाः । 'से त'मित्यादि निगमनद्वयम् ।

'से किं तं जाणणासंखा'इत्यादि, 'जाणणा' ज्ञानं संख्यायते-निश्चीयते वस्त्वनयेति सङ्ख्या, ज्ञानरूपा सङ्ख्या ज्ञानसङ्ख्या, का पुनरियम् ?, उच्यते, यो देवदत्तादिर्यच्छब्दादिकं जानाति स तज्ञानाति, तच्च जानन्नसावभेदोपचाद् ज्ञानसङ्ख्येयत्युपस्कारः, शेषं पाठसिद्धम् ।

*मू. ( ३१७ वर्तते ) से किं तं गणनासंखा ?, २ एक्को गणनं न उवेइ, दुप्पभिइ संखा, तंजहा-संखेज्जए असंखेज्जए अनंतए ।*

*से किं तं संखेज्जए ?, २ तिविहे पन्नत्ते, तंजहा- जहन्नए उक्कोसेए अजहन्नमनुक्कोसए । से किं तं असंखेज्जए ?, २ तिविहे पन्नत्ते, तंजहा- परित्तासंखेज्जए जुत्तासंखेज्जए असंखेज्जा-संखेज्जए । से किं तं परित्तासंखेज्जए ?, २ तिविहे पन्नत्ते, तंजहा- जहन्नए उक्कोसए अजहन्नमनु-क्कोसए । से किं तं जुत्तासंखेज्जइ ?, २ तिविहे पन्नत्ते, तंजहा- जहन्नए उक्कोसए अजहन्नमनुक्को-सए । से किं तं असंखेज्जासंखेज्जए ?, २ तिविहे पन्नत्ते- तंजहा- जहन्नए उक्कोसए अजहन्न-मनुक्कोसए ।*

*से किं तं अनंतए ?, २ तिविहे पन्नत्ते, तंजहा- परित्तानंतए जुत्तानंतए अनंत्तानंतए । से किं तं परित्तानंतए ?, २ ति० प०, तं०- जहन्नए उक्कोसए अजहन्नमनुक्कोसए । से किं तं जुत्तानंतए ?, २ तिविहे पन्नत्ते, तंजहा-जहन्नए उक्कोसए अजन्नम० ।*

*से किं तं अनंतानंतए ?, २ दुविहे पन्नत्ते, तंजहा-जहन्नए अजहन्नमनुक्कोसए । जहन्नयं संखेज्जयं केवइअं होइ ?, दोरूवयं, तेनं परं अजहन्नमनुक्कोसयाइं ठाणाइं जाव उक्कोसेयं संखेज्जयं न पावइ ।*

**वृ.** एतावन्त एते इति संख्यानं गणनसंख्या, तत्र 'एगो गणनं न उवेइ' एकस्तावद्गणनं-सङ्ख्यां नोपैति, यत एकस्मिन् घटादौ दृष्टे घटादि वस्त्विदं तिष्ठतीत्येवमेव प्रायः पतीतिरुत्पद्यते नैकसङ्ख्याविषयत्वेन अथवा आदानसमर्पणादिव्यवहारकाले एकं वस्तु प्रायो न कश्चिद्गण-यत्यतोऽसंव्यवहार्यत्वादल्पत्वाद्वा नैको गणनसङ्ख्यामवतरति, तस्माद्द्विप्रभृतिरेव गणनसङ्ख्या, सा च सङ्ख्येयकादिभेदभिन्ना, तद्यथा-सङ्ख्येयकमसङ्ख्येयकमनन्तकं, तत्र संख्येयकं जघन्या-दिभेदात् त्रिविधम्, असंख्येयकं तं परीतासंख्येयकं युक्तासंख्येयकं, असङ्ख्येयासङ्ख्येयकं, पुनरेकैकं जघन्यादिभेदात्रिविधमिति सर्वमपि नवविधम्, अनन्तकमपि परीतानन्तकं युक्तान-न्तकं अनन्तानन्तकम्, अत्राद्यानन्तभेदद्वये जघन्यादिभेदात् प्रत्येकं त्रैविध्यम्, अनन्तानन्तकं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तु जघन्यमजघन्योत्कृष्टमेव संभवतीति, उत्कृष्टानन्तानन्तकस्य क्वाप्यसम्भवादिति सर्वमपीदमष्ट-विधं, तदेवं संक्षेपतः संख्येयकादिभेदप्ररूपणामात्रं कृत्वा विस्तरतः तत्स्वरूपनिरूपणार्थमाह-'जहन्नयं संखेज्जयं केवाइय'मित्यादि, अत्र जघन्यं संख्येयकं द्वौ, ततः परं त्रिचतुरादिकं सर्वमप्यजघन्योत्कृष्टं यावदुत्कृष्टं न प्राप्नोति।

*मू. ( ३१७ वर्तते ) उक्कोसयं संखेज्जयं केवइअं होइ ?, उक्कोसयस्स संखेज्जयस्स परूवणं करिस्सामि-से जहानामए पल्ले सिआ एगं जोयणसयसहस्सं आयामविक्खंभेणं तिन्नि जोयण-सयसहस्साइं सोलस सहस्साइं दोन्नि अ सत्तावीसे जोयणसए तिन्नि अ कोसे अट्ठावीसं च धनुसयं तेरस ग अंगुलाइं अद्धं अंगुलं च किंचिविसेसाहिअं परिक्खेवेणं पन्नत्तं, से णं पल्ले सिद्धत्थयाणं भरिए, तओ णं तेहिं सिद्धत्थएहिं दीवसमुद्दाणं उद्धारो घेप्पइ, एगो दीवे एगो समुद्दे एवं पक्खिप्पमानेणं २ जावइआ दीवसमुद्दा तेहिं सिद्धत्थएहिं अप्फुन्ना एस णं एवइए खेत्ते पल्ले(आइट्ठा) पढमा सलागा,*

*एवइआणं सलागाणं असंलप्पा लोगा भरिआ तहावि उक्कोसेयं संखेज्जयं न पावइ, जहा को दिट्ठंतो ?, से जहानामए मंचे सिआ आमलगाणं भरिए तत्थ एगे आमलए पक्खित्ते सोऽवि माते अन्नेऽवि पक्खित्ते सेऽवि माते अन्नेऽवि पक्खित्ते सेऽवि माते एवं पक्खिप्पमाणेणं २ होही सेऽवि आमलए जंसि पक्खित्ते से मंचए भरिज्जिहिइ जे तत्थ आमलए न माहिइ।*

वृ. तत्र कियत्पुनरुत्कृष्टं सङ्ख्येयकं भवतीति विनेयेन पृष्टे विस्तरेण तस्य प्ररूपयिष्यमाण-त्वादित्थमाह-उत्कृष्टस्य सङ्ख्येयकस्य प्ररूपणां करिष्यामि, तदेवाह-तद्यथा नाम कश्चित्पल्यः स्यात्, कियन्मान इत्याह-आयामाविष्कम्भाभ्यां योजनशतसहस्रं, परिधिना तु-

"परिही तिलक्ख सोलस सहस्स दो य सय सत्तवीसऽहिया।
कोसतिय अट्ठवीसं, धनुसय तेरंगुलऽद्धहियं ॥"

इति गाथाप्रतिपादितमानो, जम्बूद्वीपप्रमाण इति भावः। अयं चाधस्ताद्योजनसहस्रमवगाढो द्रष्टव्यः, रत्नप्रभापृथिव्या रत्नकाण्डं भित्त्वा वज्रकाण्डे प्रतिष्ठित इत्यर्थः, स चैवंप्रमाणः पल्यो जम्बूद्वीपवेदिकात उपरि सप्रशिखः सिद्धार्थानां-सर्षपानां भ्रियते, 'तओ नं तेहि'मित्यादि, इदमुक्तं भवति-ते सर्षपा असत्कल्पनया देवादिना समुत्क्षिप्य एको द्वीपे एकः समुद्रे इत्येवं सर्वेऽपि प्रक्षिप्यन्ते, यत्र च द्वीपे समुद्रे वा ते इत्थं प्रक्षिप्यमाणा निष्ठां यान्ति तत्पर्यवसानो जम्बूद्वीपादिरनवस्थितपल्यः कल्प्यते, अत एवाह-

'एस णं एवइए खेत्ते पल्ले'त्ति, यावन्तो द्वीपसमुद्रास्तैः सर्षपैः 'अप्फुण्ण'त्ति व्याप्ता इत्यर्थः, एतदेतावत्प्रमाणं क्षेत्रमनवस्थितपल्यः, सर्षपभृतो बुद्धया परिकल्प्यत इत्यर्थः, ततः किमि-त्याह-'पढमा सलाग'त्ति ततः शलाकापल्ये प्रथमशलाका-एकः सर्षपः प्रक्षिप्यत इत्यर्थः, 'एवइयाणं सलागाणं असलप्पा लोगा भरिय'त्ति लोक्यन्ते-केवलिना दृश्यन्त इति लोका-व्याख्यानादि वक्ष्यमाणाः शलाकापल्यरूपा गृह्यन्ते, ते चैकदशशतसहस्रलक्षकोटि-प्रकारेण संलपितुमशक्या असंलपप्ययाः, अतिबहवा इत्यर्थः, यथोक्तशलाकानामसत्कल्पनया भृताः-पूरितास्तथाप्युत्कृष्टु सङ्ख्येयकं न प्राप्नोति, आकण्ठपूरिता अपि हि लोकरूढया भृता उच्यन्ते, न चैतावतैवोत्कृष्टं सङ्ख्येयकं संपद्यते, किन्तु यदा सप्रशिखतया तथा ते भ्रियन्ते यथा नैकोऽपि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सर्षपस्तत्रापरो माति तदा तद्भवतीति भावः, ननु सप्रशिखतया सर्वथा अभृतमपि लोके किं भृतमुच्यते ?, सत्यं, प्रोच्यत एव, तथा चात्रार्थे दृष्टान्तं दिदर्शयिषुराह–

यथा कोऽत्र दृष्टान्तः ?, इति शिष्येण पृष्टे सत्युत्तरमाह–तद्यथा नाम कश्चिन्मञ्चः स्यात्, स चामलकानां भृत इति शिखामन्तरेणापि लोकेन व्यपदिश्यते, अथ च तत्रैकमामलकं प्रक्षिप्तं तन्मातमपरमपि प्रक्षिप्तं तदपि मातमन्यदपि प्रक्षिप्तं तदपि मातमेवमपरापरैः प्रक्षिप्यमाणैः भविष्यति तदामलकं येनासौ मञ्चो भरिष्यति, यच्च तदुत्तरकालं तत्र मञ्चे न मास्यति, इत्थं चात्राप्यपरापरैर्यथोक्तशालकारूपैः प्रक्षिप्तैर्यदा संलिपितुशक्या–अतिबहवः सप्रशिखाः पल्या असत्कल्पनया भृता भवन्ति तदोत्कृष्टं सङ्ख्येयकं भवतीत्यध्याहारो द्रष्टव्य इति तावदक्षरार्थः ।

भावार्थस्त्वयं–पूर्वनिर्दशितस्वरूपादनस्थितपल्यादपरेऽपि जम्बूद्वीपप्रमाणा योजनसहस्रा–वगाढास्त्रयः पल्या बुद्धया कल्प्यन्ते, तत्र प्रथमः शलाकापल्यो द्वितीयः प्रतिशलाकापल्य–स्तृतीयो महाशलाकापल्यः, तत्रानवस्थितपल्यो भृतः शलाकापल्ये च प्रथमा शलाका प्रक्षिप्तेति पूर्वमादर्शितं, तदनन्तरं पुनरप्यनवस्थितपल्यसर्षपाः समुत्क्षिप्यैको द्वीपे एकः समुद्रे इत्येवं प्रक्षिप्यन्ते, तैश्च निष्ठितैः शलाकापल्ये द्वितीया शलाका प्रक्षिप्यते, सर्षपाश्च प्रक्षिप्यमाणा यत्र द्वीपे समुद्रे वा निष्ठितास्तत्पर्यवसानः पूर्वेण सह बृहत्तरोऽनवस्थितपल्यः सर्षपभृतः परिकल्प्यते, अत एवायमनवस्थितपल्य उच्यते, अवस्थितरूपाभावात्, पुनः सोऽप्युत्क्षिप्यैकैकसर्षपक्रमेण द्वीपसमुद्रेषु प्रक्षिप्यते, शलाकापल्ये च तृतीया शलाका प्रक्षिप्यते, ते च सर्षपाः प्रक्षिप्यमाणा यत्र द्वीपे समुद्रे वा निष्ठितास्तत्पर्यवसानः पूर्वेण सह बृहत्तमोऽनवस्थितपल्यः सर्षपभृतः परिकल्प्यते, पुनः सोऽप्युत्क्षिप्य तेनैव क्रमेण द्वीपसमुद्रेषु प्रक्षिप्यते, शलाकापल्ये च चतुर्थी शलाका प्रक्ष्प्यिते,

एवं यथोत्तरं वृद्धस्यानवस्थितपल्य भरणरिक्तीकरणक्रमेण तावद्वाच्यं यावदेकैक–शलाकाप्रक्षेपेण शलाकापल्यो भ्रियते, अपरां शलाकां न प्रतीच्छति, ततोऽनवस्थितपल्यो भृतोऽपि नोत्क्षिप्यते, किन्तु शलाकापल्य एवोद्ध्रियते अयमप्यनवस्थितपल्याक्रान्तक्षेत्रात्परत एकैकसर्षपक्रमेण द्वीपसमुद्रेषु प्रक्षिप्यते, यदा च निष्ठितो भवति तदा प्रतिशलाकापल्यलक्षणे तृतीये पल्ये प्रथम प्रतिशलाका प्रक्षिप्यते, ततोऽनवस्थितपल्यः समुत्क्षिप्य शलाकापल्ये निष्ठास्थानात्परतस्तेनैव क्रमेण निक्षिप्यते निष्ठिते च तस्मिन् शलाकापल्ये शलाका प्रक्षिप्यते, इत्थं पुनरप्यनवस्थितपल्यपूरणरेचनक्रमेण शलाकापल्यः, शलाकानां भ्रियते, ततोऽनवस्थित–पल्ययोर्भृतयोः शलाकापल्य एवोत्क्षिप्य पूर्वोक्तक्रमेणैव निक्षिप्यते, प्रतिशलाकापल्ये च द्वितीया प्रतिशलाका प्रक्षिप्यते, ततोऽनवस्थितपल्यः समुद्धृत्य शलाकापल्यनिष्ठास्थानात्परत–स्तेनैव न्यायेन प्रक्षिप्यते, शलाकापल्ये च शलाका प्रक्षिप्ते, एवमनवस्थितपल्यस्योत्क्षेपप्रक्षेप–क्रमेण शलाकापल्यः शलाकानां भरणीयः, शलाकापल्यस्य तूत्क्षेपप्रक्षेपविधिना प्रतिशलाका–पल्यः प्रतिशलाकानां पूरणीयो, यदा च प्रतिशलाकापल्यः शलाकापल्योऽनवस्थितपल्यश्च त्रयोऽपि भृता भवन्ति तदा प्रतिशलाकापल्य एवोत्क्षिप्य द्वीपसमुद्रेषु तथैव प्रक्षिप्यते, निष्ठिते च तस्मिन् महाशलाकापल्ये प्रथमा शलाका प्रक्षिप्यते, ततः शलाकापल्य उत्क्षिप्य तथैव प्रक्षिप्यते, प्रतिशलाकापल्ये च प्रतिशलाका प्रक्षिप्यते, ततोऽनवस्थितपल्य उत्क्षिप्य तथैव

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रक्षिप्यते, शलाकापल्ये च शलाका प्रक्षिप्यते, एवमनवस्थितपल्योत्क्षेपप्रक्षेपक्रमेण शलाका-पल्यो भरणीयः, शलाकापल्योद्धरणविकिरणविधिना प्रतिशलाकापल्यः पूरणीयः प्रति-शलाकापल्योत्पाटनाप्रक्षेपणाभ्यां महाशलाकापल्यः पूरयितव्यो, यदा तु चत्वारोऽपि परिपूर्णा भवन्ति तदोत्कृष्टं सङ्ख्येयकं रूपाधिकं भवति।

इह यथोक्तेषु चतुर्षु पल्येषु ये सर्षपा ये चानवस्थितपल्यशलाकापल्यप्रतिशलाका-पल्योत्क्षेपप्रक्षेपक्रमेण द्वीपसमुद्रा व्यापता एवावत्सङ्ख्यमुत्कृष्टसङ्ख्येयकमेकेन सर्षपरूपेण समधिकं संपद्यत इति भावः। एतावद्भिश्च सर्षपैरसंलप्या लोकाः-शलाकापल्यलक्षणा भ्रियन्त एवेति सूत्रमविरोधेन भावनीयम्। इदं च तावत्रष्टकं सङ्ख्येयकं, जघन्यं तं द्वौ, जघन्योत्कृष्टयोश्चा-न्तराले यानि सङ्ख्यास्थानानि तत्सर्वमजघन्योत्कृष्टम्, आगमे च यत्र क्वचिदविशेषितं सङ्ख्ये-यकग्रहणं करोति तत्र सर्वत्राजघन्योत्कृष्टं द्रष्टव्यम्, इदं चोत्कृष्टं संख्येयकमित्थमेव प्ररूपयितुं शक्यते, शीर्षप्रहेलिकान्तराशिभ्योऽतिबहूनां समतिक्रान्तत्वात् प्रकारान्तरेणाख्यातुमशक्यत्वा-दिति। उक्तं त्रिविधं सङ्ख्येयकम्, अथ नवविधमसङ्ख्येयकं प्रागुद्दिष्टं निरूपयितुमाह-

*मू. ( ३१७ वर्तते ) एवमेव उक्कोसए संखेज्जए रूवे जहन्नयं परित्तासंखेज्जयं भवइ, तेन परं अजहन्नमनुक्कोसयाइं ठाणाइं जाव उक्कोसयं परित्तासंखेज्जयं न पावइ।*

*उक्कोसयं परित्तासंखेज्जयं केवइअं होइ ?, जहन्नयं परित्तासंखेज्जयं जहन्नयं परित्तासंखेज्जमेत्ताणं रासीणं अन्नमन्नब्भासो रूवूणो उक्कोसं परित्तासंखेज्जयं होइ, अहवा जहन्नयं जुत्तासंखेज्जयं रूवूणं उक्कोसयं परित्तासंखेज्जयं होइ।*

*जहन्नयं जुत्तासंखेज्जयं केवइअं होइ ?, जहन्नयपरित्तासंखेज्जयमेत्तानं रासीणं अन्नमन्नब्भासो पडिपुन्नो जहन्नयं जुत्तासंखेज्जयं होइ, अहवा उक्कोसए परित्तासंखेज्जए रूवं पक्खित्तं जहन्नयं जुत्तासंखेज्जयं होइ, आवलिआवे तत्तिआ चेव, तेन परं अजहन्नमनुक्कोसयाइं ठाणाइं जाव उक्कोसयं जुत्तासंखेज्जयं न पावइ।*

*उक्कोसेयं जुत्तासंखेज्जयं केवइअं होइ ?, जहन्नएनं जुत्तासंखेज्जएणं आवलिआ गुणिआ अन्नमन्नब्भासो रूवूणो उक्कोसयं जुत्तासंखेज्जयं होइ, अहवा जहन्नयं असंखेज्जासंखेज्जयं रूवूणं उक्कोसेयं जुत्तासंखेज्जयं होइ।*

*जहन्नयं असंखेज्जासंखेज्जयं केवइअं होइ ?, जहन्नएणं जुत्तासंखेज्जएणं आवलिआ गुणिआ अन्नमन्नब्भासो पडिपुन्नो जहन्नयं असंखेज्जासंखेज्जयं होइ, अहवा उक्कोसए जुत्तासंखेज्जयं रूवं पक्खित्तं जहन्नयं असंखेज्जासंखेज्जयं होइ, तेन परं अजहन्नमनुक्कोसयाइं ठाणाइं जाव उक्कोसयं असंखेज्जासंखेज्जयं न पावइ।*

*उक्कोसयं असंखेज्जासंखेज्जयं केवइअं होइ ?, जहन्नयं असंखेज्जासंखेज्जयमेत्ताणं रासीणं अन्नमन्नब्भासो रूवूणो उक्कोसयं असंखेज्जासंखेज्जयं होइ, अहवा जहन्नयं परित्तानंतयं रूवूणं उक्कोसयं असंखेज्जासंखेज्जयं होइ।*

**वृ.** असङ्ख्येयकेऽपि निरूप्यमाणे एवमेवानवस्थितपल्यादिनिरूपणा क्रियत इत्यर्थः, तावद् यावदुत्कृष्टं संख्येयकमानीतं, तस्मिँश्च यदेक रूपं पूर्वमाधिकं दर्शितं तद् यदा तत्रैव राशौ



Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रक्षिप्यते तदा जघन्यं परीतासंख्येयकं भवति। 'तेण पर'मित्यादि सूत्रं, ततः परं परीतासंख्येय-कस्यैवाजघन्योत्कृष्टानि स्थानानि भवन्ति, यावदुत्कृष्टं परीतासंख्येयकं न प्राप्नोति, शिष्यः पृच्छति-कियत्पुनरुत्कृष्टं परीतासंख्येयकं भवति ?, अत्रोत्तरं-'जहण्णयं परीतासंख्येज्जयं'-इत्यादि, जघन्यं परीतासंख्येयकं यावत्प्रमाणं भवतीति शेषः, तावत्प्रमाणानां जघन्यपरीता-संख्येयकमात्राणां-जघन्यपरीतासंख्येयकगतरूपसंख्यानामित्यर्थः, राशीनामन्योऽयमभ्यासः-परस्परं गुणनास्वरूप एकेन रूपेणोनमुत्कृष्टं परीतासंख्येयकं भवति, इदमत्र हृदयं-प्रत्येकं जघन्यपरीतासंख्येयक एव यावन्ति रूपाणि भवन्ति तावन्तः पुञ्जा व्यवस्थाप्यन्ते, तैश्च परस्परगुणितैर्यो राशिर्भवति, स एकेन रूपेण हीन उत्कृष्टं परीतासंख्येयकं मन्तव्यम्।

अत्र सुखप्रतित्यर्थमुदाहरणं दर्श्यते-जघन्यपरीतासंख्येयके किलासत्कल्पनया पञ्च रूपाणि संप्रधार्यन्ते, ततः पञ्चैव वाराः पञ्च पञ्च व्यवस्थाप्यन्ते, तथाहि-५५५५५, अत्र पञ्चभिः पञ्च गुणिताः पञ्चविंशतिः, सा च पञ्चभिराहता जातं पञ्चविंश शतमित्यादिक्रमेणामीषां राशीनां परस्पराभ्यासे जातानि पञ्चविंशत्यधिकान्येकत्रिंशच्छतानि, एतत्प्रकल्पनया एतावन्मानः सद्भावतस्त्वसंख्येयरूपो राशिरेकेन रूपेण हीन उत्कृष्टं परीतासंख्येयकं संपद्यते, यदा तु तदप्यधिकं रूपं गण्यते तदा जघन्यं युक्तासंख्येयकं जायते, अत एवाह-

'अहवा जहन्नयं जुत्तासंखेज्जय'मित्यादि, अनन्तरोक्ताद्धि युक्तासंख्येयकादेस्मिन् रूपे समाकर्षित उत्कृष्टं परीतासंख्येयकं निष्पद्यते इति प्रतीयते एवेति। उक्तं जघन्यादिभेदभिन्नं त्रिविधं परीतासंख्येयकम्, अथ तावद्भेदभिन्नस्यैव युक्तासंख्येयकस्य निरूपणार्थमाह-'जहन्नयं जुत्तासंखेज्जयं कित्तिय'मित्यादि, अत्रोत्तरं 'जहन्नयं परित्तासंखेज्जय'मित्यादि, व्याख्या पूर्ववदेव, नवरम्-'अन्नमन्नब्भासो पडिपुन्नो'त्ति अन्योऽन्याभ्यस्तः स परिपूर्ण एव राशिरिह गृह्यते, न तु रूपं पात्यत इति भावः, 'अहवा उक्कोसए परित्तासंखेज्जए'त्यादि, भावितार्थ-मेव, 'आवलिया तत्तिया चेव'त्ति यावन्ति जघन्ययुक्तासंख्येयके सर्षपरूपाणि प्राप्यन्ते आवलिकायामपि तावन्तः समया भवन्तीत्यर्थः, ततः सूत्रे यत्रावलिका गृह्यते तत्र जघन्य-युक्तासंख्येयकतुल्यसमयराशिमाना सा द्रष्टव्या।

'तेन पर'मित्यादि ततो जघन्ययुक्तासंख्येयकात् परतः एकोत्तरया वृद्धया असंख्येयान्यज-एन्योत्कृष्टानि युक्तासंख्येयस्थानानि भवन्ति यावदुत्कृष्टं युक्तासंख्येयकं न प्राप्नोति। अत्र शिष्यः पृच्छति-'उक्कोसयं जुत्तासंखेज्जय'मित्यादि, अत्र प्रतिवचनम्-'जहन्नएण'मित्यादि, जघन्येन युक्तासंख्येयकेनावलिकासयम राशिर्गुण्यते, किमुक्तं भवति ?, अन्योऽन्यमभ्यासः क्रियते, जघन्ययुक्तासंख्येयकराशिस्तेनैव राशिना गुण्यत इति तात्पर्यम्, एवं च कृते यो राशिर्भवति स एव एकेन रूपेणोनः उत्कृष्टं युक्तासंख्येयकं भवति, यदि पुनस्तदपि रूपं गण्यते तदा जघन्यमसंख्येयासंख्येयकं जायते, अत एवाह-'अहवा जहन्नयं असंखिज्जासंखिज्जयं रूवूणं'मित्यादि, गतार्थम्।

उक्तं युक्तासंख्येयकं त्रिविधम्, इदानीमयुक्तासंख्येयासंख्येयकं त्रिविधं बिभणिषुराह-'जहन्नयं असंखिज्जासंखेज्जय'मित्यादि, इदं तु सूत्रं भावितार्थमेव, नवरं पडिपुन्नोत्ति-परिपूर्णो, रूपं न पात्यत इत्यर्थः, अहवेत्याद्यपि गतार्थम्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'तेन'मित्यादि, ततः परमसंख्येयासंख्येयकस्य असंख्येयान्यजघन्योत्कृष्टस्थानानि भवन्ति, यावदुत्कृष्टासंख्येयासंख्येयकं न प्राप्नोति। अत्र विनेयः प्रश्नयति-'उक्कोसु असंखेज्जासंखेज्जकं केत्तिय' मित्यादि, अत्रोत्तरम्-'जहन्नयं असंखेज्जासंखेज्ज'मित्यादि, जघन्यमसंख्येयासंख्येयकं यावद्भवतीति शेषः, तावत्प्रमाणानां जघन्यासंख्येयासंख्येयकमात्राणां जघन्यासंख्येयासंख्येयकरूपसंख्यानामित्यर्थः, राशीनामन्योऽन्यमभ्यासः-परस्परं गुणनास्वरूपः एकेन रूपेणोनः उत्कृष्टमसङ्ख्येयासङ्ख्येयकं भवति, अयमत्र भावार्थः-प्रत्येकं जघन्यासङ्ख्येयासङ्ख्येयकरूपा जघन्यसङ्ख्येयासङ्ख्येयक एव यावन्ति रूपाणि भवन्ति तावन्तो राशयो व्यवस्थाप्यन्ते, तैश्च परस्परगुणितैर्यो राशिर्भवति स एकेन रूपेण हीनः उत्कृष्टमसङ्ख्येयासङ्ख्येयकं प्रतिपत्तव्यम्, उदाहरणं चात्राप्युत्कृष्टपरीतासङ्ख्येयकोक्तानुसारेण वाच्यम्, अत्र च यदेकं रूपं पातितं तदप्यत्र यदि गण्यते तदा जघन्यं परीतानन्तकं संपद्यते, अत एवेत्थं निर्दिशति-'अहवा जहन्नयं परित्तानंतय'मित्यादि, गतार्थमेव, इत्येकीयाचार्यमतं, तावद्दर्शितम्।

अन्ये त्वाचार्या उत्कृष्टमसङ्ख्येयासङ्ख्येयकमन्यथा प्ररूपयन्ति, तथाहि-जघन्यासङ्ख्येयासङ्ख्येयकराशेर्वर्गः क्रियते, तस्यापि वर्गराशेः पुनर्वर्गो विधीयते, तस्यापि वर्गवर्गराशेः पुनरपि वर्गो निष्पद्यते, एवं च वारत्रयं वर्गे कृतेऽन्येऽपि प्रत्येकसङ्ख्येयस्वरूपा दश राशयस्तत्र प्रक्षिप्यन्ते, तद्यथा-

"लोगागासपएसा धम्माधम्मेगजीवदेसा य।
दव्वट्ठिआ निओआ पत्तयो चेव बोद्धव्वा॥१॥
ठिइबंधज्झवसाणा अनुभागा जलगछेअपलिभागा।
दोण्ह य समाण समया असंखपक्खेवया दस उ॥२॥

इदमुक्तं भवति-लोकाकाशस्य यावन्तः प्रदेशास्तथा धर्मास्तिकायस्य अधर्मास्तिकायस्य एकस्य च जीवस्य यावन्तः प्रदेशाः 'दव्वट्ठिया निओय'त्ति सूक्ष्माणां बादराणां चानन्तकायिकवनस्पतिजीवानां शरीरणीत्यर्थः, 'पत्तेया चेव'त्ति अनन्तकायिकान् वर्जयित्वा शेषाः पृथिव्यप्तेजोवायुवनस्पतित्रसाः प्रत्येकशरीरिणः सर्वेऽपि जीवा इत्यर्थः, ते चासङ्ख्येया भवन्ति, 'ठिइबंधज्झवसाण'त्ति स्थितिबन्धस्य कारणभूतानि अध्यवसायस्थानानि तान्यप्यसङ्ख्येयान्येव, तथाहि-ज्ञानावरणस्य जघन्योऽन्तमुहूर्तप्रमाणः स्थितिबन्ध उत्कृष्टस्तु त्रिंशत्सागरोपमकोटीकोटीप्रमाणः, मध्यमपदे त्वेकद्वित्रिचतुरादिसमयाधिकान्मुहूर्तादिकोऽसङ्ख्येयभेदः, एषां च स्थितिबन्धानां निर्वर्तकानि अध्यवसायस्थानानि प्रत्येकं भिन्नान्येव, एवं च सत्येकस्मिन्नपि ज्ञानावरणेऽसङ्ख्येयानि स्थितिबन्धाध्यवसायस्थानानि लभ्यन्ते, एवं दर्शनावरणादिष्वपि वाच्यमिति।

'अनुभाग'त्ति अनुभागाः-ज्ञानावरणादिकर्मणां जघन्यमध्यमादिभेदभिन्ना रसविशेषताः, एतेषां चानुभागविशेषाणां निर्वर्तकान्यसङ्ख्येयलोकाकाशप्रदेशप्रमाणान्यध्यवसायस्थानानि भवन्ति, अतोऽनुभागविशेषा अप्येतावन्त एव द्रष्टव्याः, कारणभेदाश्रितत्वात् कार्यभेदानां, 'जोगच्छेयपलिभाग'त्ति योगो-मनोवाक्कयविषयं वीर्यं तस्य केवलिप्रज्ञाच्छेदेन प्रतिविशिष्टा निर्विभागा भागा योगच्छेदप्रतिभागाः, ते च निगोदादीनां संज्ञिपञ्चेन्द्रियपर्यन्तानां जीवानामाश्रितः जघन्यादिभेदभिन्ना असङ्ख्येया मन्तव्याः 'दुण्ह य समाण समय'त्ति द्वयोश्च समयोः-उत्सर्पिण्य-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वसर्पिणीकालस्वरूपो: समया: असङ्ख्येयस्वरूपा:, एवमेते प्रत्येकसङ्ख्येयस्वरूपा: दश प्रक्षेपा: पूर्वोक्ते वारत्रयवर्गिते राशौ प्रक्षिप्यन्ते, इत्थं च यो राशि: पिण्डित: संपद्यते स पुनरपि पूर्ववद्वारत्रयं वर्ग्यते, ततश्च एकस्मिन् रूपे पातिते उत्कृष्टासङ्ख्येयासङ्ख्येयकंअ भवति।

उक्तं नवविधमप्यसङ्ख्येयकं, साम्प्रतं प्रागुद्दिष्टमष्टविधमनन्तकं निरूपयितुमाह-

**मू. ( ३१७ वर्तते )** *जहन्नयं परित्तानंतयं केवइअं होइ ?, जहन्नयं असंखेज्जासेखंज्जय-मेत्ताणं रासीणं अन्नमन्नब्धभासो पडिपुन्नो जहन्नयं परित्तानंतयं होइ, अहवा उक्कोसए असेखंज्जा-संखेज्जए रूवं पक्खित्तं जहन्नयं परित्तानंतयं होइ, तेन परं अजहन्नमनुक्कोसयाइं ठाणाइं जाव उक्कोसए परित्तानंतयं न पावइ, उक्कोसयं परित्तानंतयं केवइअं होइ ?, जहन्नयपरित्तानंतयमेत्ताणं रासीणं अन्नमन्नब्भासो रूवूणो उक्कोसयं परित्तानंतयं होइ, अहवा जहन्नयं जुत्तानंतयं रूवूणं उक्कोसयं परित्तानंतयं होइ,*

*जहन्नयं जुत्तानंतयं केवइअं होइ ?, जहन्नयपरित्तानंतयमेत्ताणं रासीणं अन्नमन्नब्धभासो पडिपुन्नो जहन्नवं जुत्तानंतयं होइ, अहवा उक्कोसए परित्तानंतयं रूवं पक्खित्तं जहन्नयं जुत्तानंतयं होइ, अभवसिद्धिआवि तत्तिआ होइ, तेन परं अजहन्नमनुक्कोसयाइं ठाणाइं जाव उक्कोसयं जुत्तानंतयं न पावइ।*

*उक्कोसयं जुत्तानंतयं केवइअं होइ ?, जहन्नएणं जुत्तानंतयं होइ, अहवा जहन्नयं अनंतानंतयं रूवूणं उक्कोसयं जुत्तानंतयं होइ।*

*जहन्नयं अनंतानंतयं केवइअं होइ ?, जहन्नयं जुत्तानंतयं अभवसिद्धिआ गुणिआ अन्नमन्न-ब्भासो पडिपुन्नो जहन्नयं अनंतानंतयं होइ, अहवा उक्कोसए जुत्तानंतइ रूवं पक्खित्तं जहन्नयं अनंतानंतयं होइ, तेन परं अजहन्नमनुक्कोसयाइं। से तं गणनासंखा।*

*से किं तं भावसंखा ?, २ जे इमे जीवा संखगइनामगोत्ताइं कम्माइं वेदेइ(न्ति)। से तं भावसंखा, से तं संखापमाणे, से तं भावपमाणे, से तं पमाणे। पमाणेत्ति पयं समत्तं।*

**वृ.** भावितार्थमेव, नवरं परिपूर्ण इति रूपं न पात्यते इत्यर्थ:। 'तेन परं' इत्यादि, गतार्थमेव, 'उक्कोसयं परित्तानंतय'मित्यादि जघन्यपरीतानन्तके यावन्ति रूपाणि भवन्ति तावत्सङ्ख्यानां राशीनां–प्रत्येकं जघन्यपरीतानन्तकप्रमाणानां पूर्ववदन्योऽन्याभ्यासे रूपोनमुत्कृष्टं परीतानन्तकं भवति, 'अहवा जहन्नयं जुत्तानंतय'मित्यादि, स्पष्टं, 'जहन्नयं जुत्तानंतयं केत्तिय'मित्यादि व्याख्यातार्थमेव।

'अहवा उक्कोसए परित्तानंतए'इत्यादि, सुबोधं, जघन्ये च युक्तानन्तके यावन्ति रूपाणि भवनन्तति अभवसिद्धिका अपि जीवा: केवलिना तावन्त एव दृष्टा:, 'तेन पर'मित्यादि, कण्ठ्यम्, 'उक्कोसयं जुत्तानंतयं केत्तिय'मित्यादि, जघन्येन युक्तानन्तकेनाभव्यराशिर्गुणितो रूपोन: सन्नुत्कृष्टं युक्तानन्तकं भवति, तेन तु रूपेण सह जघन्यमनन्तानन्तकं संपद्यते, अत एवाह–'अहवा जहन्नयं अनंतानंतय'मित्यादि, गतार्थं, 'जहन्नयं अनंतानंतयं केत्तिय'–मित्यादि, भावितार्थमेव, अहवा उक्कोसए जुत्तानंतए'इत्यिाद, प्रतीतमेव, 'तेन परं अजहन्नक्कोस–याइं' इत्यादि, जघन्यादनन्तानन्तकात् पर: सर्वाण्यपि अजघन्योत्कृष्टान्येवानन्तकानन्तकस्य स्थानानि भवन्ति, उत्कृष्टं त्वनन्तानन्तकं नास्त्येवेत्यभिप्राय:।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अन्ये त्वाचार्याः प्रतिपादयन्ति-जघन्यमनन्तानन्तकं वारत्रयं पूर्ववत् वर्ग्यते, ततश्चैते षडनन्तकप्रेक्षपाः प्रक्षिप्यन्ते, तद्यथा-

"सिद्धा निगोयजीवा वणस्सई काल पुग्गला चेव।
सव्वमलोगागासं छप्पेतेऽनंतपक्खेवा॥"

अयमर्थः-सर्वे सिद्धाः सर्वे सूक्ष्मबादरनिगोदजीवाः प्रत्येकानन्ताः सर्वे वनस्पतिजन्तवः सर्वोऽप्यतीतानागतवर्तमानकालासमयराशिः सर्वपुद्गलद्रव्यसमूहः सर्वोऽलोककाशप्रदेशराशिः एते च प्रत्येकमनन्तस्वरूपाः षट् प्रक्षेपाः, एतैश्च प्रक्षिप्तैर्यो राशिर्जायते स पुनरपि वारत्रयं पूर्ववद्वर्ग्यते, तथाऽप्युत्कृष्टमनन्तानन्तकं न भवति, ततश्च केवलज्ञानकेवलदर्शनपर्यायाः प्रक्षिप्यन्ते, एवं च सत्युत्कृष्टमनन्तानन्तकं संपद्यते, सर्वस्यैव वस्तुजातस्य संगृहीतत्वात्, अतः परं वस्तुसत्त्वस्यैव सङ्ख्याविषयस्वयाभावादिति भावः, सूत्राभिप्रायस्त्वित्थमप्यनन्तानन्तकमुत्कृष्टं न प्राप्यते, अजघन्योत्कृष्टस्थानानामेवतत्र प्रतिपादितत्वादिति, तत्त्वं तु केवलिनो विदन्तीति भावः।

सूत्रे च यत्र कुत्रापि अनन्तानन्तकं गृह्यते तत्र सर्वत्राजघन्योत्कृष्टं द्रष्टव्यम्। तदेवं प्ररूपितमनन्तानन्तकं तत्परूपणे च समाप्ता गणनसङ्ख्या।

अथ भावसङ्ख्यानिरूपणार्थमाह-'से किं तं भावसंखा'इत्यादि, इह सङ्ख्या(खा)शब्देन प्रागुक्तयुक्त्या शङ्खाः परिगृह्यन्ते, अत एव नामस्थापनादिबहुविचारविषयत्वात् सङ्ख्याप्रमाणात् गुणप्रमाणं पृथगुक्तम्, अन्यथा सङ्ख्याया अपि गुणत्वाद्, गुणप्रमाणे एवान्तर्भावः स्यादिति। तत्र भावशङ्खस्वरूपं दर्शयितुमाह-'जे इमे'इत्यादि, ये इमे-प्रज्ञापकप्रत्यक्षा लोकप्रसिद्धा वा 'जीवाः' आयुः-प्राणादिमन्तः 'शङ्खगतिनामगोत्राणि'इति शङ्खगतिनामगोत्रशब्देनेह शङ्खप्रायोग्यं तिर्यग्गतिनाम गृह्यते, तस्य चोपलक्षणार्थत्वाद् द्वीन्द्रियजात्यौदारिकशरीरङ्गोपाङ्गादीन्यपि गृह्यन्ते, ततश्च शङ्खप्रायोग्यं तिर्यग्गत्यादिनामकर्म नीचैर्गोत्रलक्षणं गोत्रकर्म च विपाकतो वेदयन्ति ये जीवास्त एव भावशंख्याः प्रोच्यन्ते, तदेवं समाप्तं सङ्ख्याप्रमाणम्,

अतो निगमयति-'से तं संखप्पमाणे'त्ति, तत्समाप्तौ चावसितं भावप्रमाणमित्याह-'से तं भावप्पमाणे'त्ति, एतदवसाने च निःशेषितं प्रमाणद्वारमित्युपसंहरति-'से तं पमाणे'त्ति। प्रमाणद्वारं समाप्तम्।

अथ क्रमप्राप्तं वक्तव्यताद्वारं निरूपयितुमाह-

*मू.(३१८) से किं तं वत्तव्वया?, २ तिविहा पन्नत्ता, तंजहा-ससमयवत्तव्वया परसमयवत्तव्वया ससमयवत्तव्वया। से किं तं समयवत्तव्वया?, २ जत्थ णं ससमए आघविज्जइ पन्नविज्जइ परूविज्जइ दंसिज्जइ निदंसिज्जइ उवदंसिज्जइ, से तं ससमयवत्तव्वया।*

*से किं तं परसमयवत्तव्वया?, २ जत्थं णं परसमए आघविज्जइ जाव उवदंसिज्जइ, से तं परसमयवत्तव्वया। से किं तं ससमयपरसमयवत्तव्वया?, २ जत्थ णं ससमए परसमए आघविज्जइ जाव उवदंसिज्जइ, से तं ससमयपरसमयवत्तव्वया।*

*इदानीं को नओ कं वत्तव्वयं इच्छइ?, तत्थ नेगमसंगहववहारा तिविहं वत्तव्वयं इच्छंति, तंजहा-ससमयवत्तव्वयं परसमयवत्तव्वयं ससमयवत्तव्वयं, उज्जुसुओ दुविहं वत्तव्वयं इच्छइ,*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*तंजहा-ससमयवत्तव्वयं परसमयवत्तव्वयं, तत्थ णं जा सा ससमयवत्तव्वया सा ससमयं पविट्ठा जा सा परसमयवत्तव्वया सा परसमयं पविट्ठा, तम्हा दुविहा वत्तव्वया, नत्थि तिविहा वत्तव्वया, तिन्नि सद्दनया एवं(गं) ससमयवत्तव्वयं इच्छंति, नत्थि परसमयवत्तव्वया, कम्हा ?, जम्हा परसमए अणट्ठे अहेऊ असब्भावे अकिरिए उम्मग्गे अनुवएसे मिच्छादंसणमितिकट्टु, तम्हा सव्वा ससमयवत्तव्वया, नत्थि परसमयवत्तव्वया, नत्थि ससमयवत्तव्वया। से तं वत्तव्वया।*

**वृ.** तत्राध्ययनादिषु प्रत्यवयवं यथासम्भवं प्रतिनियतार्थकथनं वक्तव्यता, इयं च त्रिविधा-स्वसमयादिभेदात्, तत्र यस्यां नमिति वाक्यालङ्कारे स्वसमयः स्वसिद्धान्तः आख्यायते यथा-पञ्च अस्तिकायाः, तद्यथा-धर्मास्तिकाय इत्यादि, तथा प्रज्ञाप्यते यथा-गतिलक्षणो धर्मास्तिकाय इत्यादि, तथा प्ररूप्यते यथा-स एवासङ्ख्यातप्रदेशात्मकादिस्वरूपः, तथा दर्श्यते दृष्टान्तद्वारेण यथा मत्स्यानां गत्युपष्टम्भकं जलमित्यादि, तथा निदर्श्यते उपनयद्वारेण यथा-तथैवैषोऽपि जीवपुद्गलानां गत्युप्रटम्भक इत्यादि, तदेवं दिग्मात्रप्रदर्शनेन व्याख्यातिमिदं, सूत्राविरोधतोऽन्यथाऽपि व्याख्येयमिति। सेयं स्वसमयवक्तव्यता, परसमयवक्तव्यता तु यस्यां परसमय आख्यायत इत्यादि, यथा सूत्रकृदङ्गप्रथमाध्ययने-

"संति पञ्च महब्भूया, इहमेगेसि आहिया।
पुढवी आऊ तेऊ(य), वाऊ आगासपंचमा ॥१॥
एए पंच महब्भूया, तेब्भो एगोत्ति आहिया।
अह तेसिं विनासेणं, विनासो होइ देहिणो ॥२॥"

इत्यादि, अस्य च श्लोकद्वयस्य सूत्रकृदवृत्तिकारलिखित एवायं भावार्थः-'एकेषां'नास्तिकानां स्वकीयासेन 'आहितानि' आख्यातानि 'इह' लोके 'सन्ति'विद्यन्ते पञ्च समस्तलोकेव्यापक त्वान्महाभूतानि, तान्येवाह-

'पृथिवी'त्यादि पञ्चभूतव्यतिरिक्तजीवनिषेधार्थमाह-'एए पंचे'त्यादि, 'एतानि' अनन्तरोक्तानि पृथिव्यादीनि यानि पञ्च महाभूतानि 'तेभ्य' इति तेभ्यः-कायाकारपरिणतेभ्यः 'एकः' कश्चिच्चिद्रूपो भूताव्यतिरिक्तः आत्मा भवति, न तु भूतव्यतिरिक्तः परलोकयायीत्येवं ते-'आहिय'त्ति आख्यातवन्तः, अथ तेषां भूतानां विनाशेन देहिनो-जीवस्य विनाशो भवति, तदव्यतिरिक्तत्वादेवेत्येवं लोकायतमतप्रतिपादनपरत्वात् परसमयवक्ततेयमुच्यते, आख्यायते इत्यादिपदानां तु विभागः पूर्वोक्तानुसारेण स्वबुद्धया कार्यः, सेयं परसमयवक्तव्यता। स्वसमय-परसमयवक्तव्यता पुनर्यत्र स्वसमयः परसमयश्च आख्यायते, यथा-

"आगारमावसंता वा, आरण्णा वावि पव्वया।
इमं दरिसणमावन्ना, सव्वदुक्खा विमुच्चई ॥" त्यादि,

व्याख्या-'आगारं' गृहं तत्रावसन्तो गृहस्थ इत्यर्थः 'आरण्या वा' तापसादयः 'पव्वइय'त्ति प्रव्रजिताश्च शाक्यादयः, 'इदम्' अस्मदीयं मतमापन्ना-आश्रिताः सर्वदुःखेभ्यो विमुच्यन्त इत्येवं यदा साङ्ख्यादयः प्रतिपादयन्ति तदेवं(यं) परसमयवक्तव्यता, यदा तु जैनास्तदा स्वसमयवक्तव्यता, ततश्चासौ स्वसमयपरसमयवक्तव्यतोच्यते।

अथ वक्तव्यतामेव नयैर्विचारयन्नाह-'इदानीं को नओ'इत्यादि, अत्र नैगमव्यवहारौ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्रिविधामपि वक्तव्यतामिच्छतः नैगमस्यानेकगमत्वाद्व्यवहार(पर)स्य तु लोकव्यवहारपरत्वात्, लोके च सर्वप्रकाराणां रूढत्वादिति भावः, ऋजुसूत्रस्तु विशुद्धतरत्वादाद्यामेव द्विविधां वक्तव्यतामिच्छति, स्वपरसमयवक्तव्यतानभ्युपगमे युक्तिमाह-'तत्थ णं जा सा'इत्यादि, तृतीयवक्तव्यताभेदे याऽसौ स्वसमयवक्तव्यता गीयते सा स्वसमयं प्रविष्टा, कोऽर्थः ?-प्रथमे वक्तव्यताभेदे अन्तर्भूता, इत्यर्थः या तु परसमयवक्तव्यता सा परसमयं प्रविष्टा, द्वितीये वक्तव्यताभेदे अन्तर्भाविता इत्यर्थः, ततश्चोभयरूपवक्तव्यतायाः प्रस्तुतनयमतेऽसत्त्वात् द्विविधैव वक्तव्यता न त्रिविधेति भावः।

संग्रहस्तु सामान्यवादिनैगमान्तर्गतत्वेन विवक्षितत्वात् सूत्रगतिवैचित्र्याद्वा न पृथगुक्त इति। त्रयः शब्दनयाः-शब्दसमभिरूढैवंभूताः शुद्धतमत्वादेकां स्वसमयवक्तव्यतामिच्छन्ति, नास्ति परसमयवक्तव्यता इति मन्यते, कस्मादित्याह-यस्मात् परसमयोऽनर्थः, इत्यादि, इत्थं चेह योजना कार्या-नास्ति परसमयवक्तव्यता, परसमसयस्यानर्थत्वादित्यादि, अनर्थत्वं परसमयस्य नास्त्येवात्मेत्यनर्थप्रतिपादकत्वाद्, आत्मनो नास्तित्वस्य चानर्थत्वमात्माभावे तत्प्रतिषेधानुपपत्तेः, उक्तं च-

"जो चिंतेइ सरीरे नत्थि अहं स एव होइ जीवोत्ति।
न हु जीवंमि असंते संसयउप्पायओ अन्नो॥"

इत्याद्यन्यप्यभ्यूह्यम्। अहेतुत्वं च परसमयस्य हेत्वाभासबलेन प्रवृत्तेः, यथा नास्त्येवात्मा अत्यन्तानुपलब्धेः, हेत्वाभासश्चायं, ज्ञानादेस्तद्गुणस्योपलब्धेः, उक्तं च-

"नाणाईण गुणाणं अनुभवओ होइ जंतुणो सत्ता।
जह रूवाइगुणाणं उवलंभाओ घडाईण॥"

-मित्यादि प्रागेवोक्तमिति, असद्भावत्वं चैकान्तक्षणभङ्गाद्यसद्भूतार्थाभिधायकत्वाद्, एकान्तक्षणभङ्गादेश्चासद्भूतत्वं युक्तिविरोधात्, तथाहि-

"धम्माधम्मुवएसो कयाकयं परभवाइगमनं च।
सव्वावि हु लोयठिई न घडइ एगंतखणियम्मी॥" त्यादि,

अक्रियात्वं चैकान्तशून्यताप्रतिपादनात्, सर्वशून्यतायां च क्रियावतोऽभावेन क्रियाया असम्भवाद्, उक्तं च-

"सव्वं सुन्नति जयं पडिवन्नं जेहि तेऽपि वत्तव्वा।
सुन्नाभिहाणकिरिया वत्तुरभावेण कह घडई ?॥"

इत्यादि, उन्मार्गत्वं परस्परविरोधस्थाण्वाद्याकुलत्वात्, तथाहि-

न हिंस्यात् सर्वभूतानि, स्थावराणि चराणि च।
आत्मवत्सर्वभूतानि, यः पश्यति स धार्मिकः॥

इत्याद्यभिधाय पुनरपि

षट् सहस्राणि युज्यन्ते, पशूनां मध्यमेऽहनि।
अश्वमेधस्य वचनान्न्यू-नानि पशुभिस्त्रिभिः॥

इत्यादि प्रतिपादयन्तीति, अनुपदेशत्वं चैकान्तक्षणभङ्गादिवादिनामहितेऽपि प्रवर्तकत्वात्,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तदुक्तम्-

"सर्वं क्षणिकमित्येतद्, ज्ञात्वा को न प्रवर्तते ?।
विषयादौ विपाको मे, न भावीति विनिश्चयाद् ॥"

इत्यादि, यतश्चैवं ततो मिथ्यादर्शनं, ततश्च मिथ्यादर्शनमितिकृत्वा नास्ति परसमयवक्तव्यतेति वर्तते, एवं साङ्ख्यादिसमयानामप्यनर्थत्वादियोजना स्वबुद्ध्या कार्येति। तस्मात् सर्वा स्वसमय-वक्तव्यतैव, लोके प्रसिद्धानपि परसमयान् स्यात्पदलाञ्छननिरपेक्षतया दुर्नयत्वादसत्त्वेनैते नयाः प्रतिपद्यन्त इति भावः, स्यात्पदलाञ्छनसापेक्षतायां तु स्वसमयवक्तव्यताऽन्तर्भाव एव, प्रोक्तं च महामतिना-

"नयास्तव स्यात्पदलाञ्छिता इमे, रसोपदिग्धा इव लोहधातवः।
भवन्त्यभिप्रेतगुणा यतस्ततो, भवन्तमार्याः प्रणता हितैषिणः ॥"

इत्यादि, सेयं वक्तव्यतेति निगमनं। वक्तव्यता समाप्ता। साम्प्रतमर्थाधिकारावसरः-

*मू. ( ३१९ ) से किं तं अत्थाहिगारे ?, २ जो अस्स अज्झयणस्स अत्थाहिगारो, तंजहा-*

*मू. ( ३२० ) सावज्जजोगविरई उक्कित्तण गुणवओ य पडिवत्ती।*
*खलियस्स निंदना वणतिगिच्छ गुणधारणा चेव ॥*

*मू. ( ३२१ ) से तं अत्थाहिगारे।*

**वृ.** तत्र यो यस्य सामायिकाद्यध्ययनस्यात्मीयोऽर्थस्तदुत्कीर्तनमर्थाधिकारस्य विषयः, तच्च 'सावज्जजोगविरई'त्यादिगाथावसरे प्रागेव कृतमिति न पुनः प्रतन्यत इति। वक्तव्यतार्थाधिकारयोस्त्वयं भेदः-अर्थाधिकारोऽध्ययने आदिपदादारभ्य सर्वपदेष्वनुवर्तते, पुद्गलास्तिकाये प्रतिपरमाणु मूर्तत्ववत्, वक्तव्यता तु देशादिनियतेति।

अथ समवतारं निरूपयितुमाह-

*मू. ( ३२२ ) से किं तं समोआरे ?, २ छव्विहे पन्नत्ते, तंजहा-नामसमोआरे ठवणासमोआरे दव्वसमोआरे खेत्तसमोआरे कालसमोआरे भावसमोआरे। नामठवणाओ पुव्वं वन्निआओ जाव से तं भविअसरीरदव्वसमोआरे।*

*से किं तं जाणयसरीरभविअसरीरवइरित्ते दव्वसमोआरे ?, २ तिविहे पन्नत्ते, तंजहा-आयसमोआरे परसमोआरे तदुभयसमोआरे, सव्वदव्वावि णं आयसमोआरेणं आयभावे समोअरंति, परसमोआरेणं जहा कुंडे बदराणि, तदुभयसमोआरेणं जहा घरे खंभो आयभावे अ, जहा घडे गीवा आयभावे अ, जहा घडे गीवा आयभावे अ, अहवा जाणयसरीरभविय-सरीरवइरित्ते दव्वसमोआरे दुविहे पन्नत्ते, तंजहा-आयसमोआरे अ तदुभयसमोआरे अ।*

*चउसट्ठिआ आयसमोआरेणं आयभावे समोयरइ, तदुभयसमोआरेणं बत्तीसिआए समोअरइ आयभावे अ, बत्तीसिआ आयसमोआरेणं आयभावे समोयरइ तदुभयसमोयारेणं सोलसियाए समोयरइ आयभावे अ, सोलसिआ आयसमोआरेणं आयभावे, समोयरइ, तदुभयसमोआरेणं अट्ठभाइआए समोयरइ आयभावे अ, अट्ठभाइआ आयसमोआरेणं आयभावे समोयरइ तदुभयसमोआरेणं चउभाइआए समोयरइ आयभावे अ, चउभाइया आयसमोआरेणं आयभावे समोयरइ, तदुभयसमोआरेणं अद्धमाणीए समोयरइ आयभावे अ, अद्धमाणी आयसमोआरेणं*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*आयभावे समोयरइ, तदुभयसमोआरेणं माणीए समोअरइ आयभावे अ, से तं जाणयसरीरभविअसरीरवइरित्ते दव्वसमोआरे।*

*से तं नोआगमओ दव्वसमोआरे। से तं दव्वसमोआरे।*

वृ. समवतरणं-वस्तूनां स्वपरोभयेष्वन्तर्भावचिन्तनं समवतारः, स च नामादिभेदात् षोढा, तत्र नामस्थापने सुचर्चिते, एवं द्रव्यसमावतारोऽपि द्रव्यावश्यकादिवदभ्यूह्य वक्तव्यः, यावद् ज्ञशरीरभव्यहरीरव्यतिरिक्तो द्रव्यसमवतारस्त्रिविधः प्रज्ञप्तः-तद्यथा-आत्मसवतार इत्यादि, तत्र सर्वद्रव्याण्यप्यात्मसमवतारेण चिन्त्यमानान्यात्मभावे-स्वकीयस्वरूपे समवतरन्ति-वर्तन्ते तदव्यतिरिक्तत्वातेषां, व्यवहारतस्तु परसमवतारेण परभावे समवतरन्ति, यथा कुण्डे वदराणि, निश्चयतः सर्वाण्यपि वस्तूनि प्रागुक्तयुक्त्वा स्वात्मन्येव वर्तन्ते, व्यवहारतस्तु स्वात्मनि आधारे च कुण्डादिके वर्तन्त इति भावः, तदुभयसमवतारेण तदुभये वस्तूनि वर्तन्ते, यथा कडकुड्यदेहलीपट्टादिसमुदायात्मके गृहे स्तम्भो वर्तते आत्मभावे च, तथैव दर्शनादिति, एवु बुध्नोदरकपालात्मके घटे ग्रीवा वर्तते आत्मभावे चेति, आह-यद्येवमशुद्धं (यद्येवं शुद्धः) तदा परसमवतारो नास्त्येव, कुण्डादौ वृत्तानामपि बदरादीनां स्वात्मनि वृत्तेर्विद्यमानत्वात्, सत्यं, किन्तु तत्र स्वात्मनि वृत्तिविवक्षामकृत्वैव तथोपन्यासः कृतो, वस्तुवृत्त्या तु द्विविध एव समवतारः, अत एवाह-अथवा ज्ञशरीरभव्यशरीरव्यतिरिक्तो द्रव्यसमवतारो द्विविधः प्रज्ञप्तः, तद्यथा-आत्मसमवतारस्तदुभयसमवतारश्च, अंशुद्धस्य(शुद्धस्य)परसमवतारस्य क्वाप्यसम्भवात्, न हि स्वात्मन्यवर्तमानस्य बान्ध्येयस्येव परस्मिन् समवतारो युज्यत इति भावः, पूर्वं चात्मवृत्तिविवक्षामात्रेणैव त्रैविध्यमुक्तमित्यभिहितं।

'चउसट्ठिआ आयसमोआरेणं'मित्यादि सुबोधमेव, नवरं चतुःषष्टिका चतुष्पलमाना पूर्वं निर्णीता, ततश्चैषा लघुप्रमाणत्वादष्टपलमानत्वेन बृहत्प्रमाणायां द्वात्रिंशतिकायां समवतरतीति प्रतीतमेव, एवं द्वात्रिंशतिकाऽपि षोडशपलमानायां षोडशिकायां षोडशिकाऽपि द्वात्रिंशत्पलमानायामष्टभागिकायाम् अष्टभागिकाऽपि चतुःषष्टिपलमानायां चतुर्भागिकायां चतुर्भागाकाऽप्यष्टविंशत्यधिशकतपलमानामर्द्धमाणिकायां एषाऽपि षट्पञ्चाशदधिकपलशतद्वयमानायां माणिकायां समवतरति, आत्मसमावतारस्तु सर्वत्र प्रतीत एव। समाप्तो द्रव्यसमावतारः।

***मू. ( ३२२ वर्तते )*** *से किं तं खेत्तसमोआरे ?, २ दुविहे पं०, तं०-आयसमोआरे अ तदुभयसमोआरे अ, भरहे वासे आयस० आयभावे स०, तदभयसमोआरेणं जंबुद्दीवे समो० आयभावे अ, जंबुद्दीवे आयसमो० आयभावे समोअरइ, तदुभयसमोआरेणं तिरियलोए समोअरइ आयभावे, तिरियलोए आयसमोआरेणं आयभावे समोअरइ, तदुभयसमोआरेणं लोए समोअरइ आयभावे अ, से तं खेत्तसमोआरे।*

*से किं तं कालसमोआरे ?, २ दुविहे पन्नत्ते, तंजहा-आयसमोआरे अ तदुभयसमोआरे अ, समए आयसमोआरेणं आयभावे समोअरइ, तदुभयसमोआरेणं आवलिआए समोयरइ आयभावे अ एवमानापानू थोवे लेवे मुहुत्ते अहोरत्ते पक्खे मासे ऊऊ अयने संवच्छरे जुगे वाससए वाससहस्से वाससयसहस्से पुव्वंगे पुव्वे तुडिअंगे तुडिए अडडंगे अडडे अववंगे अववे हूहूअंगे हूहूए उप्पलंगे उप्पले पउमंगे पउमे नलिअंगे नलिने अच्छनिउरंगे अच्छनिउरे अउअंगे अउए*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*नउअंगे नउए पउअंगे पउए चूलिअंगे चूलिआ सीसपहेलिअंगे सीसपहेलिआ पलिओवमे सागरोवमे आयसमोआरेणं आयभावे स० तदुभयसमोआरेणं ओसप्पिनीउस्सप्पिनीसु समोयरइ आयभावे अ, ओसप्पिनीउस्सप्पिनीओ आयसमोआरेणं आयभावे०, तदुभयस० पोग्गलपरिअट्ट समो० आयभावे अ, पोग्गलपरिअट्ट आयसमोआरेणं आयभावे समोअरइ तदुभयस० तीतद्धा-अनागतद्धासु समोयरइ आय०, तीतद्धाअनागतद्धाउ आयस० आयभावे० तदुभयसमोआरेणं सव्वद्धाए समोयरइ आवभावे अ। से तं कालसमोआरे।*

*से किं तं भावसमोआरे?, २ दुविहे पन्नत्ते, तं०-आय० तदुभयस०, कोहे आय० आयभावे स०, तदु० माने समो० आयभावे अ, एवं माने माया लोभे रागे मोहनिज्जे, अट्ठ कम्मपयडीओ आयसमोआरेणं आयभावे समोअरइ तदुभयसमोआरेणं छव्विहे भावे समोअरइ आयभावे अ, एवं छव्विहे भावे, जीवे जीवत्थिकाए आयसमोआरेणं आयभावे समोयरइ तदुभयसमोआरेणं सव्वदव्वेसु समोअरइ आयभावे अ। एत्थ संगहणीगाहा-*

*मू. ( ३२३ )* *कोहे माने माया लोभे रागे य मोहनिज्जे अ।*
*पगडी भावे जीवे जीवत्थिकाय दव्वा य।*

*मू. ( ३२४ ) से तं भावसमोआरे। से तं समोआरे। से तं उवक्कमे। उवक्कम इति पढमं दारं।*

वृ. अथ क्षेत्रसमवतारं बिभणिपुराह-'से किं तं खेत्तसमोआरे'इत्यादि, इह भरतादीनां लोकपर्यन्तानां क्षेत्रविभागानां यथापूर्वं लघुप्रमाणस्य यथोत्तरं बृहत्क्षेत्रे समवतारो भावनीयः। एवं कालसमवतारेऽपि समयादेः कालविभागस्य लघुत्वादावलिकादौ बृहति कालविभागे समवतारः सुबोध एव, आत्मसमवतारस्तु सर्वत्र स्पष्ट एव। अथ भावसमवतारं विवक्षुराह-

'से किं तं भावसमोआरे'त्यादि, इहौदयिकभावरूपत्वात् क्रोधादयो भावसमवतारेऽधिकृताः, तत्राहङ्कारमन्तरेण कोपासम्भवान्मानवानेव किल कुप्यतीति कोपस्य माने समवतार उक्तः, क्षपणकाले च मानदलिकं मायाणां प्रक्षिप्य क्षपयतीति मानस्य मायायां समवतारः मायादलिकमपि क्षपणकाले लोभे प्रक्षिप्य क्षपयतीति मायाया लोभे समवतारः एवमन्यदपि कारणं परस्परान्तर्भावेऽभ्यूह्य सुधिया वाच्यं, लोभात्मकत्वात्तु रागस्य लोभो रागे समवतरति, रागोऽपि मोहभेदत्वान्मोहे, मोहोऽपि कर्मप्रकारत्वादष्टसु कर्मप्रकृतिषु, कर्मप्रकृतयोऽप्यौदयिकौपशमिकादिभाववृत्तित्वात्, षट्सु भावेषु, भावा अपि जीवाश्रितत्वाज्जीवे, जीवोऽपि जीवास्तिकायभेदत्वात् जीवास्तिकाये, जीवास्तिकायोऽपि द्रव्यभेदत्वात्समस्तद्रव्यसमुदाये समवतरतीति, तदेष भावसमवातरो निरूपितः।

अत्र च प्रस्तुते आवश्यके विचार्यमाणे सामायिकह्यध्ययनमपि क्षायोपशमिकभावरूपत्वात् पूर्वोक्तेष्वानुपूर्व्यादिभेदेषु क्व समवतरतीति निरूपणीयमेव, शास्त्रकारप्रवृत्तेरन्यत्र तथैव दर्शनात्, तच्च सुखावसेयत्वादिकारणात् सूत्रे न निरूपितं, सोपयोगत्वात् स्थानाशून्यत्वार्थं किञ्चिद्वयमेव निरूपयामः- तत्र सामायिकं चतुर्विंशतिस्तव इत्याद्युत्कीर्तनविषयत्वात्सामायिकाध्ययनमुत्कीर्तनानुपूर्व्यां समवतरति, तथा गणनानुपूर्व्यां च, तथाहि-पूर्व्यानुपूर्व्या गण्यमानमिदं प्रथमं, पश्चानुपूर्व्या तु षष्ठम्, अनानुपूर्व्या तु द्व्यादिस्थानवृत्तित्वादनियतमिति प्रागेवोक्तं, नाम्नि च औदयिकादिभावभेदात्षण्णामपि प्रागुक्तम्, तत्र सामायिकाध्ययनं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रुतज्ञानरूपत्वेन क्षायोपशमिकभाववृत्तित्वात्, क्षायोपशमिकभावनाम्नि समवतरति,

आह च भाष्यकारः-

"छव्विहनामे भावे खओवसमिए सुयं समोयरइ।
जं सुयनाणावरणक्खओवसमयं तयं सव्वं ॥"

प्रमाणे च द्रव्यादिभेदैः प्राग्निर्णीते जीवभावरूपत्वाद् भावप्रमाणे इदं समवतरतीति,

"दव्वाइचउब्भेयं पमीयए जेण तं पमाणंति।
इणमज्झयणं भावोत्ति भाव(प)माणे समोयरइ ॥"

भावप्रमाणं च गुणनयसङ्ख्याभेदतस्त्रिधा प्रोक्तं, तत्रास्य गुणसङ्ख्याप्रमाणयोरेवावतारो, नयप्रमाणे तु यद्यपि-'आसज्ज उ सोयारं नए नयविसारओ बूया'इत्यादिवचनात् क्वचिन्नयमसव-तार उक्तः, तथापि साम्प्रतं तथाविधनयविचाराभावद्वस्तुवृत्त्याऽनवतार एव, यत इदमुप्युक्तम्-"मूढनइयं सुयं कालियं तु न नया समोयरंति इह" मित्यादि, महामतिनाऽप्युक्तम्-

"मूढनयं तु न संपई नयप्पमाणावआरो से"त्ति, गुणप्रमाणमपि जीवाजीवगुणभेदतो द्विधा प्रोक्तं, तत्रास्य जीवोपयोगरूपत्वाज्जीवगुणप्रमाणे समवतारः, तस्मिन्नपि ज्ञानदर्शनचारित्र-भेदतस्त्र्यात्मके अस्य ज्ञानरूपतया ज्ञानप्रमाणेऽवतारः, तत्रापि प्रत्यक्षानुमानोपमानागमभेदा-च्चतुर्विधे प्रकृताध्ययनस्याप्तोपदेशरूपतया आगमेऽन्तर्भावः, तस्मिन्नपि लौकिकलोकोत्तर-भेदभिन्ने परमगुरुप्रणीतत्वेन लोकोत्तरिके तत्रापि आत्मागमानन्तरागमपरम्परागमभेदतस्त्रि-विधेऽप्यस्य समवतारः, सङ्ख्याप्रमाणेऽपि नामादिभेदभिन्ने प्रागुक्ते परिमाणसङ्ख्यायामस्या-वतारः, वक्तव्यतायामपि स्वसमयवक्तव्यतायामिदमवतरति, यत्रापि परोभयसमयवर्णनं क्रियते तत्रापि निश्चयतः स्वसमयवक्तव्यतैव, परोभयसमययोरपि सम्यग्दृष्टिपरिगृहीतत्वेन स्वसमय-त्वात्, सम्यग्दृष्टिर्हि परसमयमपि विषयविभागेन योजयति नत्वेकान्तपक्षनिक्षेपेणेत्यतः सर्वोऽपि तत्परिगृहीतः स्वसमय एव, अत एव परमार्थतः सर्वाध्ययनानामपि स्वसमयवक्तव्यताया-मेवावतारः, तदुक्तम्-

"परसमओ उभयं वा सम्मद्दिट्ठिस्स ससमओ जेणं।
तो सव्वज्झयणाइं ससमयवत्तव्वनिययाइं ॥"

एवं चतुर्विंशतिस्तवादिष्वपि वाच्यमित्यलमतिविस्तरेणेति समाप्तः समवतारः, तत्समर्थने च समाप्तं प्रथममुपक्रमद्वारम् ॥ अथ निक्षेपद्वारं निरपयितुमाह-

***मू. ( ३२५ )*** *से किं तं निक्खेवे ?, २ तिविहे पन्नत्ते, तंजहा-ओहनिप्फन्ने नामनिप्फन्ने सुत्तालावगनिप्फन्ने। से किं तं ओहनिप्फन्ने ?, २ पन्नत्ते, तंजहा-अज्झयणे अज्झीणे आए खवणा। से किं तं अज्झयणे ?, २ चउव्विहे पन्नत्ते, तंजहा-नामज्झयणे ठवणज्झयणे दव्वज्झयणे भावज्झयणे, नामठवणाओ पुव्वं वन्निआओ, से किं तं दव्वज्झयणे ?, २ दुविहे पन्नत्ते, तंजहा-आगमओ अ नोआगमओ अ।*

*से किं तं आगमओ दव्वज्झयणे ?, २ जस्स णं अज्झयनत्ति पयं सिक्खियं ठियं जियं मियं परिजियं जाव एव जावइआ अनुवउत्ता आगमओ तावइआइं दव्वज्झयनाइं, एवमेव ववहार-स्सवि, संगहस्स णं एगो वा अनेगो वा जाव, से तं आगमओ दव्वज्झयणे। से किं तं नोआगमओ*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*दव्वज्झयणे ?, २ तिविहे पन्नत्ते, तंजहा-जाणयसरीरदव्वज्झयणे भविअसरीरदव्वज्झयणे जाणयसरीरभविअसरीरइरित्तें द० ।*

*से किं तं जाणग० ?, २ अज्झयणपयत्थाहिगारजाणयस्स जं सरीरं ववगयचुअचाविअचत्तदेहं जीवविप्पजढं जाव अहो नं इमेणं सरीरसमुस्सएणं जिनादिट्ठेणं भावेणं अज्झयणेत्तिपयं आघवियं जाव उवदंसियं, जहा को दिट्ठंतो ?-अयं घयकुंभे आसी अयं मुहुकुंभे आसी, से तं जाणय-सरीरदव्वज्झयणे ।*

*से किं तं भविअसरीरदव्वयणज्झे ?, २ जे जीवे जोणिजम्मणनिक्खंते इमेणं चेव आदत्तएणं सरीरसमुस्सएणं जिणदिट्ठेणं भावेणं अज्झयणेत्तिपयं सेअकाले सिक्खिस्सइ न ताव सिक्खइ, जहा को दिट्ठंतो ?-अयं महुकुंभे भविस्सइ अयं घयकुंभे भविस्सइ, से तं भविअसरीरदव्वज्झ-यणे । से किं तं जाणयसरीरभविअसरीरवइरित्ते दव्वज्झयणे ?, २ पत्तयपोत्थयलिहियं, से तं जाणयसरीरभविअसरीरवइरित्ते दव्वज्झयणे । से तं नोआगमतो दव्वज्झयणे । से तं दव्वज्झयणे ।*

*से किं तं भावज्झयणे ?, दुविहे पन्नत्ते तंजहा-आगमओ अ नोआगमओ अ । से किं तं आगमओ भावज्झयणे ?, २ जाणए उवउत्ते, से तं आगमओ भावज्झयणे । से किं तं नोआगमओ भावज्झयणे ?, २*

***मू. ( ३२६ )*** *अज्झप्पस्सानयनं कम्माणं अवचओ उवचिआणं ।*
*अनुवचनो अ नवाणं तम्हा अज्झयणमिच्छंति ॥*

**वृ.** निक्षेपः-पूर्वोक्तशब्दार्थस्त्रिविधः प्रज्ञप्तः, तद्यथा-ओघनिष्पन्न इत्यादि, तत्रौघः-सामान्यमध्ययनादिकं श्रुताभिधानं तेन निष्पन्नः, ओघनिष्पन्नः, नाम-श्रुतस्यैव सामायिकादि-विशेषाभिधानं तेन निष्पन्नो नामनिष्पन्नः, सूत्रालापकाः-'करेमि भंते ! सामाइअ'मित्यादि-कास्तैर्निष्पन्नः सूत्रालापकनिष्पन्नः । एतदेव भेदत्रयं विवरीषुराह-'से किं तं ओहनिप्फन्ने'-इत्यादि, ओघनिष्पन्नश्चतुर्विधः प्रज्ञप्तः, तद्यथा-अध्ययनम् अक्षीणम् आयः क्षपणा, एतानि चत्वार्यपि सामायिकचतुर्विंशतिस्तवादिश्रुतविशेषाणां सामान्यनामानि, यथा(यदेव) हि सामायिकमध्ययनमुच्यते तदेवाक्षीणं निगद्यते इदमेवाऽऽयः प्रतिपाद्यते एतदेव क्षपणाऽभि-धीयते, एवं चतुर्विंशतिस्तवादिष्वप्यभिधानीयं ।

साम्प्रतमेतेषां चतुर्णामपि निक्षेपं प्रत्येकमभिधित्सुराह-

'से किं तं अज्झयणे'इत्यादि, नामस्थापनाद्रव्यभावभेदाच्चतुर्विधोऽध्ययनशब्दस्य निक्षेपः, तत्र नामादिविचारः सर्वोऽपि पूर्वोक्तद्रव्यावश्यकानुसारेण वाच्यो यावन्नोआगमतो भावाध्ययने 'अज्झप्पस्साणयण'मित्यादि गाथाव्याख्या,

'अज्झप्पस्स आणायणं' इह निरुक्तविधिना प्राकृतस्वाभाव्याच्च पकारस्सकार-आकारणकारलक्षणमध्यगतवर्णचतुष्टलोपे अज्झयणमिति भवति, अध्यात्मं-चेतस्तस्यान-यनमध्ययनमुच्यते इति भावः, आनीयते च सामायिकाद्यध्ययने शोभनं चेतः, अस्मिन् सत्य-शुभकर्मप्रबन्धविघटनात् अत एवाह-कर्मणामुपचितानां-प्रागुपनिबद्धानां यतोऽपचयो-ह्रासोऽस्मिन् सति संपद्यते, नवानां चानुपचयः-अबन्धो यतस्तस्मादिदं यथोक्तशब्दार्थप्रतिपत्तेः अज्झयणं प्राकृतभाषायामिच्छन्ति सूरयः, संस्कृते त्विदमध्ययनमुच्यत इति, सामायिकादिकं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चाध्ययनं ज्ञानक्रियासमुदायात्मकं, ततश्चागमस्यैकदेशवृत्तित्वान्नोशब्दस्य च देशवचनत्वात् नोआगमतो अध्ययमिदमुक्तमिति गाथार्थः ।

*मू. ( ३२७ ) से तं नोआगमओ भावज्झयणे । से तं भावज्झयणे, से तं अज्झयणे ।*

**वृ.** 'से त'मित्यादि निगमनत्रयम् । उक्तमध्ययनम्, अथाक्षीणनिक्षेपं विवक्षुराह–

*मू. ( ३२७ वर्तते ) से किं तं अज्झीणे ?, २ चउव्विहे पन्नत्ते, तंजहा– नामज्झीणे दव्वज्झीणे भावज्झीणे । नामठवणाओ पुव्वं वन्निआओ, से किं तं दव्वज्झीणे ?, २ दुविहे पन्नत्ते, तंजहा– आगमओ अ नोआगमओ अ ।*

*से किं तं आगमओ दव्वज्झीणे ?, २ जस्स अज्झीणेत्तिपयं सिक्खियं जियं मियं परिजियं जाव से तं आगमओ दव्वज्झीणे । से किं त नोआगमओ दव्वज्झीणे ?, २ तिविहे पन्नत्ते, तंजहा– जाणयसरीरदव्वज्झीणे भविअसरीरदव्वज्झीणे जाणयसरीरभविअसरीरवइरित्ते दव्वज्झीणे । से किं तं जाणयसरीरदव्वज्झीणे ?, २ अज्झीणपयत्थाहिगारजाणयस्स जं सरीरयं ववगयचुयचाविअचत्तदेह जहा दव्वज्झयणे तहा भाविअव्वं, जाव से तं जाणयसरीरदव्वज्झीणे ।*

*से किं तं भविअसरीरदव्वज्झीणे ?, २ जे जीवो जोणिजम्मननिक्खंते जहा दव्वज्झयणे, जाव से तं भविअसरीरदव्वज्झीणे । से किं तं जाणयसरीरभविअसरीरवइरित्ते दव्वज्झीणे ?, २ सव्वागाससेढी, से त जाणयसरीरभविअसरीरवइरित्ते दव्वज्झीणे ।*

*से तं नोआगमओ दव्वज्झीणे, से तं दव्वज्झीणे । से किं तं भावज्झीणे ?, २ दुविहे पन्नत्ते, तंजहा– आगमओ अ नोआगमओ अ । से किं तं आगमओ भावज्झीणे ?, २ जाणए उवउत्ते, से तं आगमओ भावज्झीणे ।*

*से किं तं नोआगमओ भावज्झीणे ?, २*

**वृ.** अत्रापि तथैव विचारो यावत् 'सव्वागाससेढि'त्ति सर्वाकाशं–लोकालोकनभःस्वरूपं तस्य सम्बन्धिनी श्रेणिः प्रदेशापहारतोऽपहियमाणाऽपि कदाचित् क्षीयते अतो ज्ञशरीर-भव्यशरीरव्यतिरिक्तद्रव्याक्षीणतया प्रोच्यते, द्रव्यता चास्याऽऽकाशद्रव्यान्तर्गतत्वादिति । 'से किं तु आगमओ भावज्झीणे ?, २ जाणए उवउत्ते' अत्र वृद्धा व्याचक्षते–यस्माच्चतुर्दशपूर्वविदः आगमोपयुक्तस्यान्तर्मुहूर्तमात्रोपयोगकाले येऽर्थोपलम्भोपयोगपर्यास्ते प्रतिसमयमेकैका-पहारेणानन्ताभिरप्युत्सर्पिणीभिर्नापह्रियन्ते अतो भावाक्षीणतेहावसेया, नोआगमतस्तु भावा-क्षीणता शिष्येभ्यः सामायिकादिश्रुतप्रदाऽनेपि स्वात्मन्यनाशादिति, एतदेवाह–

*मू. ( ३२८ ) जह दीवा दीवसयं पइप्पए दिप्पए अ सो दीवो ।*
*दीवसमा आयरिया दिप्पंति परं च दीवंति ।*

**वृ.** 'जह दोवा' गाहा, व्याख्या–यथा दीपाद् अवधिभूताद्दीपशतं प्रदीप्यते–प्रवर्तते, स च मूलभूतो दीपः तथापि दीप्यते–तेनैव रूपेण प्रवर्तते, न तु स्वयं क्षयमुपयाति, प्रकृते सम्बन्धय-न्नाह–एवं दीपसमा आचार्या दीप्यन्ते–स्वयं विषक्षितश्रुतयुक्तत्वेन तथैवावतिष्ठन्ते, परं च–शिष्यवर्गं दीपयन्ति–श्रुतसम्पदं लम्भयन्ति–

*मू. ( ३२९ ) से तं नोआगमओ भावज्झीणे । से तं भावज्झीणे, सं तं अज्झीणे ।*

**वृ.** अत्र च नोआगमतो भावाक्षीणता श्रुतदायकाचार्योपयोगस्यागामत्वाद्वाक्काययोग-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

योश्चानागमत्वान्नोशब्दस्य मिश्रवचनत्वाद्भावनीयेति वृद्धा व्याचक्षते इति गाथार्थः।

अथाऽऽयनिक्षेपं कर्तुमाह-

*मू. ( ३२१ वर्तते ) से किं तं आए ?, २ चउव्विहे पं०, तं०-नामाए ठवणाए दव्वाए भावाए, नामठवणाओ पुव्वं भणिआओ, से किं तं दव्वाए ?, २ दुविहे पं०, तं०-आगमओ अ नोआगमओ अ। से किं तं आगमओ दव्वाए ?, २ जस्स नं आयत्तिपयं सिक्खियं ठिय जियं मियं परिजियं जाव कम्हा ?, अनुवओगो दव्वमितिकट्टु, नेगमस्स नं जावइआ अनुवउत्ता आगमओ तावइआ ते दव्वाया, जाव से तं आगमओ दव्वाए।*

*से किं तं नोआगमओ दव्वाए ?, २ तिविहे पं०, तं०-जाणयसरीरदव्वाए भविअसरीरदव्वाए जाणयसरीरभविअसरीरवइरित्ते दव्वाए। से किं तं जाणयसरीरदव्वाए ?, २ आयपयत्थाहिगारजाणयस्स जं सरीरयं ववगयचुअचाविअचत्तदेहं जहा दव्वज्झयणे, जाव से तं जाणयसरीरदव्वाए।*

*से किं तं भविअसरीरदव्वाए ?, २ जे जीवे जोणिजम्मणनिक्खंते जहा दव्वज्झयणे जाव से तं भविअसरीरदव्वाए। से किं तं जाणयसरीरभविअसरीरवइरित्ते दव्वाए ?, २ तिविहे पन्नत्ते, तंजहा-लोइए कुप्पावयनिए लोगुत्तरिए।*

*से किं तं लोइए ?, २ तिविहे पन्नत्ते, तंजहा-सचित्ते अचित्ते मीसए अ। से किं तं सचित्ते ?, २ तिविहे पन्नत्ते, तंजहा-दुपयाणं चउप्पयाणं अपयाणं दुपयाणं दासाणं दासीणं चउप्पयाणं आसाणं हत्थीणं अपयाणं अंबाणं अंबाडगाणं आए, से तं सचित्ते। से किं तं अचित्ते ?, २ सुवन्नरययमनिमोत्तिअसंखसिलप्पवालरत्तरयनाणं (संतसावएज्जस्स) आए, से तं अचित्ते। से किं तं मीसए ?, २ दासाणं दासीणं आसाणं हत्थीणं समाभरिआउज्जालंकियाणं आए, से तं मीसए, से तं लोइए।*

*से किं तं कुप्पावयनिए ?, २ तिविहे पन्नत्ते, तंजहा-सचित्ते अचित्ते मीसए अ, तिन्निवि जहा लोइए, जाव से तं मीसए, से तं कुप्पावयनिए। से किं तं लोगुत्तरिए ?, २ तिविहे पं० तं०-सचित्ते अचित्ते मीसए अ। से किं तं सचित्ते ?, २ सीसाणं सिस्सनिआणं, से तं सचित्ते से किं तं चित्ते ?, २ पडिग्गहाणं वत्थाणं कंबलाणं पायपुंछनाणं आए, से तं अचित्ते। से किं तं मीसए ?, २ सिस्साणं सिस्सनिआणं सभंडोवगरनाणं आए, से तं मीसए, से तं लोगुत्तरिए, से तं जाणयसरीरभविअसरीरवइरित्ते दव्वाए, से तं नोआगमओ दव्वाए, से तं दव्वाए।*

*से किं तं भावाए ?, २ दुविहे पं० तं०-आगमओ अ नोआगमओ अ। से किं तं आगमओ भावाए ?, २ जानए उवउत्ते, से तं आगमओ भावाए। से किं तं नोआगमओ भावाए ?, २ दुविहे पं०, तं०-पसत्थे अ अपसत्थे अ।*

*से किं तं पसत्थे ?, तिविहे पं० तं०-नाणाए दंसनाए चरित्ताए, से तं पपसत्थे। से किं तं अपसत्थे ?, २ चउव्विहे पं० तं०-कोहाए मानाए मायाए लोहाए, से तं अपसत्थे। से तं नोआगमओ भावाए, से तं भावाए, से तं आए।*

**वृ.** आयः प्राप्तिर्लाभ इत्यनर्थान्तरम्, अस्यापि नामादिभेदभिन्नस्य विचारः सूत्रसिद्ध एव, यावत् 'से किं तं अचित्ते ?, २ सुवन्न'त्यादि, लौकिकोऽचित्तस्य सुवर्णादिरायो मन्तव्यः, तत्र

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सुवर्णादीनि प्रतीतानि 'सिल'त्ति शिला मुक्ताशैलराजपट्टादीनां, रक्तरत्नानि-पद्मरागरत्नानि 'संतसावएज्जस्स'त्ति सद्-विद्यमानं स्वापतेयं-द्रव्यं तस्याऽऽयः, 'समाभरियाउज्जालंकियाणं'त्ति आ(समा)भरितानां-सुवर्णसङ्कलिकादिभूषितानां आतोद्यैर्झल्लरीप्रमुखैरलङ्कृतानाम् ॥ अथ क्षपणानिक्षेपं विवक्षुराह-

*मू.( ३२९ वर्तते )से किं तं झवणा ?, २ चउव्विहा पन्नत्ता, तंजहा- नामज्झवणा ठवणज्झवणा दव्वज्झवणा भावज्झवणा। नामठवणाओ पुव्वं भणिआओ।*

*से किं तं दव्वज्झवणा ?, २ दुविहा पन्नत्ता, तंजहा- आगमओ अ नोआगमओ अ।*

*से किं तं आगमओ दव्वज्झवणा ?, २ जस्स नं झवणेतिपयं सिक्खियं ठियं जियं मियं परिजिअं जाव से तं आगमओ दव्वज्झवणा। से किं तं नोआगमओ दव्वज्झवणा ?, २ तिविहा पन्नत्ता, तंजहा- जाणयसरीरदव्वज्झवणा भविअसरीरदव्वज्झवणा जाणयसरीरभविअसरीरवइरित्ता दव्वज्झवणा।*

*से किं तं जाणय० ?, २ झवणापयत्थाहिगारजाणयस्स जं सरीरयं ववगयचुअ० सेसं जहा दव्वज्झवणे, जाव से तं जाणय०। से किं तं भवि० दव्व० ?, २ जे जीवे जोणिजम्मणनिक्खंते सेसं जहा दव्वज्झवणे, जाव से तं भविअसरीरदव्वज्झवणा।*

*से किं तं जाणयसरीरभविअसरीरवइरित्ता दव्वज्झवणा ?, २ जहा जाणयसरीरभविअसरीरवइरित्ते दव्वाए तहा भाणिअव्वा, जाव से तं मीसिआ, से तं लोगुत्तरिआ, से तं जाणयसरीरभविअसरीरवइरित्ता दव्वज्झवणा, से तं नोआगमओ दव्वज्झवणा, से तं दव्वज्झवणा।*

*से किं तं भावज्झवणा ?, २ दुविहा पन्नत्ता, तंजहा-आगमओ अ नोआगमओ अ। से किं तं, आगमओ भावज्झवणा ?, २ जाणए उवउत्ते, से तं आगमओ भावज्झवणा। से किं ते नोआगमओ भावज्झवणा ?, २ दुविहा पन्नत्ता ? तंजहा- नाणज्झवणा दंसणज्झवणा चरित्तज्झवणा ? से तं पसत्था। से किं तं अपससत्था २ चउव्विहा पन्नत्ता ? तंजहा- कोहज्झवणा मानज्झवणा मायज्झवणा लोहज्झवणा ? से तं अपसत्था। से तं, नोआगमओ भावज्झवणा, से तं भावज्झवणा, सं तं झवणा, सं तं ओहनिप्फन्ने।*

**वृ.** क्षपणा अपचयो निर्जरा इत पर्यायाः, शेषं सूत्रसिद्धमेव, यावदोघनिष्पन्नो निक्षेपः। समासः सर्वत्र चेह भावे विचार्येऽध्ययनमेवायोजनीयम् ॥ अथ नामनिष्पन्ननिक्षेपमाह-

*मू. ( ३२९वर्तते ) से किं तं नामनिप्फन्ने ?, २ सामाइए, से समासओ चउव्विहे पं०, तं०-नामसामाइए ठवणासामाइए दव्वसामाइए भावसामाइए। नामठवणाओ पुव्वं भणिआओ। दव्वसामाइएवि तहेव, जाव से तं भविअसरीरदव्वसामाइए ।*

*किं तं जाणयसरीरभविअसरीरवइरित्ते दव्वसामाइए ?, २ पत्तयपोत्थयलिहियं, से तं जाणयसरीरभविअसरीरवइरित्ते दव्वसामाइए, से तं नोआगमओ दव्वसामाइए, से तं दव्वसामाइए।*

*से किं तं भावसामाइए ?, २ दुविहे पं०, तं०-आगमओ अ नोआगमओ अ। से किं तं आगमओ भावसामाइए ?, २ जाणए उवउत्ते, से तं आगमओ भावसामाइए। से किं तं नोआगमओ भावसामाइए ?, २-*

*मू.( ३३० )* *जस्स सामाणिओ अप्पा, संजमे निअमे तवे।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्स सामाइअं होइ, इइ केवलिभासिअं ॥

मू. (३३१) जो समो सव्वभूएसु, तसेसु थावरेसु अ।
तस्स सामाइयं होइ, इइ केवलिभासिअं ॥

मू. (३३२) जह मम न पिअं दुक्खं जानिअ एमेव सव्वजीवाणं।
न हणइ न हणावेइ अ सममणइतेन सो समणो ॥

मू. (३३३) नत्थि य सि कोइ वेसो पिओ स सव्वेसु चेव जीवेसु।
एएण होइ समणो एसो अन्नोऽवि पज्जाओ ॥

मू. (३३४) उवगगिरिजलणसागरनहतलतरुगणसमो अ जो होइ।
भमरमियधरणिजलरुरविपवणसमो अ सो समणो ॥

मू. (३३५) तो समणो जइ सुमणो भावेन य जय न होइ पावमनो।
सयणे अ जने अ समो समो अ मानावमानेसु ॥

**वृ.** इहाध्ययनाक्षीणाद्यपेक्षया सामायिकमिति वैशेषिकं नाम, इदं चोपलक्षणं चतुर्विंशतिस्त-वादीनाम्, अस्यापि पूर्वोक्तशब्दार्थस्य सामायिकस्य नामस्थापनाद्रव्यभावभेदाच्चतुर्विधो निक्षेपः, अत एवाह-'से समासओ चउव्विहे' इत्यादि, सूत्रसिद्धमेव यावत्।

जस्स सामानिओ अप्पा'इत्यादि, यस्य-सत्त्वस्यसामानिकः-सन्निहित आत्मा सर्वकालं व्यापारात्, क्व ?-संयमे-मूलगुणरूपे नियमे-उत्तरगुणसमूहात्मके तपसि-अनशनादौ तस्ये-त्थंभूतस्य सामायिकं भवतीत्येतदत्केवलिभाषितमिति श्लोकार्थः ॥

जो समो'इत्यादि, यः समः-सर्वत्र मैत्रीभावात्तुल्यः 'सर्वभूतेषु' सर्वजीतेषु त्रसेषु स्थावरेषु च तस्य सामायिकं भवतीत्येतदपि केवलिभाषितं, जीवेषु च समत्वं संयमसान्निध्यप्रतिपाद-नात्पूर्वश्लोकेऽपि लभ्यते, किन्तु जीवदयामूलत्वाद्धर्मस्य तत्प्राधान्यख्यापनाय पृथगुपादान-मिति। यत एव हि सर्वभूतेषु समोऽत एव साधुः समणो भण्यते इति भावं दर्शयन्नाह-

'जह मम'गाहा, व्याख्या-यथा 'मम' स्वात्मनि हननादिजनितं दुःखं न प्रियं एवमेव सर्व-जीवानां तन्नाभीष्टमिति 'ज्ञात्वा' चेतसि भावयित्वा समस्तानपी जीवान्न हन्ति स्वयं, नाप्यन्यैर्घात-यति, चशब्दात् घ्नतश्चान्यान्न समनुजानीत इत्यनेन प्रकारेण सममणतित्ति-सर्वजीवेषु तुल्यं, वर्तते यतस्तेनासौ समण इति गाथार्थः ॥ तदेवं सर्वजीवेषु समत्वेन सममणतीति समण इत्येकः प्रयायो दर्शितः एवं समं मनोऽस्येति समना इत्यन्योऽपि पर्यायो भवत्येवेति दर्शयन्नाह-

'नत्थि य से' गाहा, व्याख्या-नास्ति च 'से' तस्य कश्चिद् द्वेष्यः प्रियो वा, सर्वेष्वपि जीवेषु सममनस्त्वाद्, अनेन भवति समं मनोऽस्येति निरुक्तविधिना समना इत्येषोऽन्योऽपि पर्याय इति गाथार्थः ॥ तदेवं पूर्वोक्तप्रकारेण सामायिकवतः साधोः स्वरूपं निरूप्य प्रकारान्तरेणाऽपि तन्निरूपनार्थमाह-

'उरग'गाहा, स श्रमणो भवतीति सर्वत्र संबध्यते, यः कथंभूतो भवतीत्याह-उरगः-सर्पस्त-त्समः परकृताश्रयनिवासादिति, एवं समशब्दोऽपि सर्वत्र योज्यते, तथा गिरिसमः परीषहोप-सर्गनिष्प्रकम्पत्वात्, ज्वलनसमः तपस्तेजोमयत्वात्, तृणादिष्विव सूत्रार्थेष्वतृप्तेः, सागरसमो गम्भीरत्वाद् ज्ञानादिरत्नाकरात् स्वमर्यादानतिक्रमाच्च, नभस्तलसमः सर्वत्र निरालम्बनत्वात्,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तरुगणसमः सुखदुःखयोरदर्शितविकारत्वात्, भ्रमरसमोऽनियतवृत्तित्वात्, मृगसमः संसार-भयो-द्विग्नत्वात्, धरणिसमः सर्वखेदसहिष्णुत्वात् जलरुहसमः कामभोगोद्भवत्वेऽपि पङ्कज-लाभ्या-मिव तदूर्ध्ववृत्तेः, रविसमः धर्मास्तिकायादिलोकमधिकृत्याविशेषेण प्रकाशकत्वात्, पवनसमश्च सर्वत्राप्रतिबद्धत्वात्, स एवंभूतः श्रमणो भवतीति गाथार्थः ॥

यथोक्तगुणविशिष्टश्च श्रमणस्तदा भवति यदा शोभनं मनो भवेदिति दर्शयति-'तो समणो'-गाहा, व्याख्या-ततः श्रमणो यदि द्रव्यमन आश्रित्य सुमना भवेत्, 'भावेन च' भावमनश्चाश्रित्य यदि न भवति पापमनाः, सुमनस्त्वचिन्हान्येव श्रमणगुणत्वेन दर्शयति-स्वजने च पुत्रादिके जने च सामान्ये समो-निर्विशेषः मानापमानयोश्च सम इति गाथार्थः ॥

*मू. ( ३३६ ) से तं नोआगओ भावसामाइए, से तं भावसामाइए, सं तं समाइए, से तं नामनिप्फन्ने।*

**वृ.**इह च ज्ञानक्रियारूपं सामायिकाध्ययनं नोआगमतो भावसामायिकं भवत्येव, ज्ञानक्रिया-समुदाये आगमस्यैकदेशवृत्तित्वात्, नोशब्दस्य च देशवचनत्वाद्, एवं च सति सामायिकवतः साधोरपीह नोआगमतो भावसामायिकत्वेनोपन्यासो न विरुध्यते, सामायिकतद्वतोरभेदोपचारा-दिति भावः ॥ नामनिष्पन्नो निक्षेपः समासः ॥ अथ सूत्रालापकनिष्पन्नं निक्षेपं निर्दिदिक्षुराह-

*मू. ( ३३६ वर्तते ) से किं तं सुत्तालावगनिप्फन्ने ?, २ इदानिं सुत्तालावयनिप्फन्नं निक्खेवं इच्छावेइ, से अ पत्तलक्खणेऽवि न निक्खिप्पइ, कम्हा ?, लाघवत्थं, अत्थि इओ तइए अनुओगदारे अनुगमेत्ति, तत्थ निक्खित्ते इहं निक्खित्ते भवइ, इहं वा निक्खित्ते तत्थ निक्खित्ते भवइ, तम्हा इहं न निक्खिप्पइ तहिं चेव निक्खिपइ, से तं निक्खेवे ॥*

**वृ.** अथ कोऽयं सूत्रालापकनिष्पन्नो निक्षेपः ?, 'करोमि भदन्त ! सामायिकं' इत्यादिनां सूत्रालापकानां नामस्थापनादिभेदभिन्नो यो न्यासः स सूत्रालापकनिष्पन्नो निक्षेप इति शेषः, 'इदानि'मित्यादि, स चेदानीं सूत्रालापकनिष्पन्नो निक्षेप एष इत्यवसरप्राप्तत्वादित्थमात्मानं प्रतिपादयितुं वाञ्छामुत्पादयति, स च प्राप्तलक्षणोऽपि प्राप्ततत्स्वरूपाभिधानसमयोऽपि न निक्षिप्यते-न सूत्रालापकनिक्षेपद्वारेणाभिधीयते, कस्मादित्याह-लाघवार्थं, तदेव लाघवं दर्शयति-अस्ति अतोऽग्रे तृतीयमनुयोगद्वारमनुगम इति, तत्र च निक्षिप्तः सूत्रालापकसमूह इह निक्षिप्तो भवति, इह वा निक्षिप्तस्तत्र निक्षिप्तो भवति, तस्मादिह न निक्षिप्यते, तत्रैव निक्षेप्स्यत इति, आह-यद्येवमत्रैव निक्षिप्यते न पुनस्तत्रेत्यपि कस्मान्नोच्यते ?, नैवं, यतः सूत्रानुगमे एव सूत्रमुच्चारयिष्यते, नात्र, न च सूत्रोच्चारणमन्तरेण तदालापकानां निक्षेपो युक्तः, ततो युक्तमुक्तं-'तस्मादिह न निक्षिप्यते इत्यादि'।

पुनरप्याह-यद्येवं किमर्थं सूत्रालापकनिक्षेपस्य अत्रोपन्यासः, उच्यते, निक्षेपसाम्यमात्रादि-त्यलं विस्तरेण ॥ निक्षेपलक्षणं द्वितीयमनुयोगद्वारं समाप्तम् ॥

अथ तृतीयमनुयोगद्वारं निरूपयितुमाह-

*मू. ( ३३७ ) से किं तं अनुगमे ? २ दुविहे पन्नत्ते, तंजहा-सुत्तानुगमे अ निज्जुत्तिअनुगमे अ। से किं तं निज्जुत्तिअनुगमे ?, २ तिविहे पन्नत्ते, तंजहा-निक्खेवनिज्जुत्तिअनुगमे उवग्घा-*



Jain Education International For Private & Personal Use Only www.jainelibrary.org

*यनिज्जुत्तिअनुगमे सुत्तप्फासिअनिज्जुत्तिअनुगमे। से किं तं निक्खेवनिज्जुत्तिअनुगमे? अनुगए, से तं निक्खेवनिज्जुत्तिअनुगमे। से किं तं उवग्घायनिज्जुत्तिअनुगमे?, २ इमाहिं दोहिं मूलगाहाहिं अनुगंतव्वो, तंजहा-*

***मू. ( ३३८ )*** *उद्देसे १ निद्देसे अ २ निग्गमे ३ खेत्त ४ काल ५ पुरिसे य ६।*
*कारण ७ पच्चय ८ लक्खण ९ नए १० समोआरणानुमए ११॥*

***मू. ( ३३९ )*** *किं १२ कइविहं १३ कस्स १४ कहिं १५*
*केसु १६ कहं १७ किच्चिरं हवइ कालं १८?।*
*कइ १९ संतर २० मविरहियं २१ भवा २२ गरिस २३ फारस २४ निरुत्ती २५॥*
*[से तं उवग्घायनिज्जुत्तिअनुगमे ]*

**वृ.** अनुगमः-पूर्वोक्तशब्दार्थः, स च द्विधा-सूत्रानुगमः-सूत्रव्याख्यानमित्यर्थः, 'निर्युक्त्यनुगमश्च' नितरां युक्ताः-सूत्रेण सह लोलीभावेन सम्बद्धा निर्युक्ता-अर्थास्तेषां युक्तिः-स्फुटरूपतापादनम् एकस्य युक्तशब्दस्य लोपान्निर्युक्तिः-नामस्थापनादिप्रकारैः सूत्रविभजनेत्यर्थः, तद्रुपोऽनुगमस्तस्या वा अनुगमो-व्याख्यानं निर्युक्त्यनुगमः, स च त्रिविदो-निक्षेपोनास्थापनादिभेदभिन्नः तस्य तद्विषया वा निर्युक्तिः-पूर्वोक्तशब्दार्था निक्षेपनिर्युक्तिः तद्रुपस्तस्या वाऽनुगमो निक्षेपनिर्युक्त्यनुगमः।

तथा उपोद्धननं-व्याख्येयस्य सूत्रस्य व्याख्याविधिसमीपीकरणमुपोद्घातस्तस्य तद्विषया वा निर्युक्तिस्तद्रुपस्तस्या वा अनुगमः उपोद्घातनिर्युक्त्यनुगमः, तथा सूत्रं स्पृशतीति सूत्रस्पर्शिका सा चासौ निर्युक्तिश्च सूत्रस्पर्शिकनिर्युक्तिः।

तत्र निक्षेपनिर्युक्तिक्त्यनुगमाऽनुगतो वक्ष्यते च, इदमुक्तं भवति-अत्रैव प्रागावश्यकसामायिकादिपदानां नामस्थापनादिनिक्षेपद्वारेण यद्व्याख्यानं कृतं तेन निक्षेपनिर्युक्त्यनुगमोऽनुगतः प्रोक्तो द्रष्टव्यः, सूत्रालापकानां नामादिनिक्षेपप्रस्तावे पुनर्वक्ष्यते च। उपोद्घातनिर्युक्त्यनुगमस्त्वाभ्यां द्वाभ्यां द्वारगाथाभ्यामनुगन्तव्यः, तद्यथा-

'उद्देसे' गाहा 'किं कइविहं' गाहा, व्याख्या-उद्देशनमुद्देशः-सामान्याभिधानरूपो, यथा अध्ययनमिति, वक्तव्य इति सर्वत्र क्रिया द्रष्टव्या, तथा निर्देशनं निर्देशो-विशेषाभिधानं, यथा सामायिकमिति, अत्राह-ननु सामान्यविशेषाभिधानद्वयं निक्षेपद्वारे प्रोक्तमेव, तत्किमितीह पुनरुच्यते?, नैतदेवं, यतोऽत्र सिद्धस्यैव तत्र तस्य निक्षेपमात्राभिधानं कृतमित्यदोषः। तथा निर्गमनं-निर्गमः, कुतः सामायिकं निर्गतमित्येवंरूपो वक्तव्यः, तथा क्षेत्रकालौ च ययोः सामायिकमुत्पन्नं तौ वक्तव्यौ, यद्वक्ष्यत्यावश्यके-

"वइसाहसुद्धएक्कारसीएँ पुव्वण्हदेसकालंमि।
महसेणवनुज्जाणे अनंतर परंपरं सेस॥" त्ति

तथा कुतः पुरुषात्तन्निर्गमिति वक्तव्यं, तथा केन कारणेन गौतमादयः सामायिकं भगवतः समीपे शृण्वन्तीत्येवंरूपं कारणं वाच्यं, यदभिधास्यति-"गोयमाई सामाइयं तु किं कारणं निसामिंतो' त्यादि, तथा प्रत्यायतीति प्रत्ययः, केन प्रत्ययेन भगवतेदमुपदिष्टं? स केन वा प्रत्ययेन गणधरास्तेनोपदिष्टं तच्छुण्वन्तीत्येतद्वक्तव्यमित्यथः, तथा च वक्ष्यति-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"केवलनाणित्ति अहं अरिहा सामाइयं परिकहेई।
तेसिंपि पच्चओ खलु सव्वन्नू तो निसामिंति ॥" त्ति,

तथा सम्यक्त्वसामायिकस्यतत्त्वश्रद्धानं लक्षणं, श्रुतसामायिकस्य जीवादिपरिज्ञानं, चारित्र-सामायिकस्य सावद्यविरतिः, देशविरतिसामायिकस्यं तु विरत्यविरतिस्वरूपं मिश्रं लक्षणं, निर्देक्ष्यति च-"सद्दहण जानना खलु विरई मीसं च लक्खणं कहए" इत्यादि, एवं नैगमादयो नया वाच्याः, तेषां च नयानां समवतरणं समवतारो यत्र संभवति तत्र दर्शनीयो, यतो निवेदयिष्यति-

"मूढनइयं सुयं कालियं तु न नया समोअरंति इहं।
अपुहुत्ते समोयारो नत्थि पुहुत्ते समोयारो ॥

इत्यादि, तथा कस्य व्यवहारादेः किं सामायिकमनुमतमित्यभिधानीयं, भणिष्यति च-

"तवसंजमो अनुमओ निग्गंथं पवयणं च ववहारो।
सद्दुज्जुसुयाणं पुण निव्वाणं संजमो चेव ॥" त्ति,

किं सामायिकमित्यत्र प्रत्युत्तरयिष्यति-"जीवो गुण पडिवन्नो नयस्स दव्वट्ठियस्स सामइय" मित्यादि, कतिविधं तदत्यत्र निर्वचनयिष्यति-"सोमाइयं च तिविहं संमत्त सुयं तहा चरित्तं चे" त्यादि, कस्य सामायिकमित्यत्राभिधास्यति-जस्स सामाणिओ अप्पा' इत्यादि, क्व सामायिकमित्येतंदपि-"खेतदिसकालगइभवियसन्निउस्सासदिट्ठिमाहारे" इत्यादिना द्वारक-लापेन निरू पयिष्यति, केषु सामायिकमित्यत्रोत्तरं सर्वद्रव्येषु, तथाहि-

"सव्वगयं सम्मत्तं सुए चरित्ते न पज्जवा सव्वे।
देसविरइं पडुच्चा दुण्हवि पडिसेहणं कुज्जा ॥" इति

दर्शयिष्यति, कथं सामायिकमवाप्यत इत्यत्र-"मानुस्स खेत्त जाई कुलरूवारोग आउयं बुद्धि" त्यादि प्रतिपादयिष्यति, कियच्चिरं कालं तद्भवतीतिचिन्तायामभिधास्यति-

"सम्मत्तस्स सुयस्स य छावट्ठि सागरोवमाइ ठिइ।
सेसाण पुव्वकोडी देसूणा होइ उक्कोसा ॥

'केइ' त्ति कियन्तः सामायिकस्य युगपत् प्रतिपद्यमानकाः पूर्वप्रतिपन्ना वा लभ्यन्ते इति वक्तव्यं, भणिष्यति च-"सम्मत्तदेसविरया पलियस्स असंखभागमेत्ता उ" इत्यादि, सहान्तरेण वर्तत इति सान्तरमिति विचारणायां निर्णेष्यति-

"कालमनंतं च सुए अद्धापरियट्टओ य देसूनो।
आसायणबहुलाणं उक्कोसं अंतरं होइ ॥" त्ति,

अविरहितं निरन्तरं कियन्तं कालं सामायिकप्रतिपत्तारो लभ्यन्त इत्यत्रावेदयिष्यति-

"सम्मसूय अगारीणं आवलिय असंखभागमेत्ता उ।
अट्ठ समया चरित्ते सव्वेसु जहन्न दो समआ ॥" इत्यादि,

कियतो भवान उत्कृष्टतस्तदवाप्यत इत्यत्र प्रतिवचनं दास्यति -

"सम्मत्तदेसविरया पलियस्स असंखभागमेत्ता उ।
अट्ठ भवा उ चरित्ते अनंतकालं च सुयसमए ॥"

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आकर्षणमाकर्षः-एकस्मिन्नानाभवेषु वा पुनः पुनः सामायिकस्य ग्रहणानि-प्रतिपत्तय इति वाच्यं, तच्च वक्ष्यति-

"तिण्हं सहसपुहुत्तं सयप्पहुत्तं च होइ विरईए।
एगभवे आगरिसा एवइया होंति नायव्वा॥
तिण्ह सहस्समसंखा सहसपुहुत्तं च होइ विरईए।
नाणाभवे आगरिसा एवइया हुंति नाय-व्वा॥" इति,

फासण'त्ति कियत् क्षेत्रं सामायिकवन्तः स्पृशन्तीत्यभिधानीयं, तच्चैवम्-

"सम्मत्तचरणसहिया सव्वं लोगं फुसे निरवसेसं।
सत्त य चउदसभाए पंच य सुयदेसविरईए॥

इत्यादि, निश्चित्ता उक्तिर्निरुक्तिर्वक्तव्या, तत्र च -

"चम्मद्दिट्ठि अमोहो सोही सब्भावं दंसणं बोही।
अविवज्जओ सुदिट्ठित्ति एवमाइं निरुत्ताइ॥"

-मित्यादि वक्ष्यति, एवं तावद्गाथाद्वयसंक्षेपार्थः, विस्तरार्थस्त्वावश्यकनिर्युक्तिटीका-भ्यामवसेय इति। तदेवमेतद्गाथाद्वयव्याख्याने उपोद्घातनिर्युक्तिः समर्थिता भवति, अस्यां च प्रस्तुताध्ययनस्याशेषविशेषेषु विचारितेषु सत्सु सूत्रं व्याख्यानयोग्यतामानीतं भवति, ततः प्रत्यवयवं सूत्रव्याख्यानरूपायाः सूत्रस्पर्शकनिर्युक्तेरवसरः संपद्यते, सूत्रं च सूत्रानुगमे सत्येव भवति, सोऽप्यवसरप्राप्त एव, ततस्तमभिधित्सुराह-

*मू. ( ३४० ) से किं तं सुत्तप्फासिअनिज्जुत्तिअनुगमे ? २ सुत्तं उच्चारेअव्वं अक्खलिअं अमिलिअं अवच्चामेलिअं पडिपुन्नं पडिपुन्नघोसं कंठोट्ठविप्पमुक्कं गुरुवायणोवगयं, तओ तत्थणज्जिहिति ससमयपयं वा परसमयपयं वा बंधपयं वा मोक्खपयं वा सामाइअपयं वा नोसामाइअपयं वा, तओ तम्मि उच्चारिए समाणे केसिं च नं भगवंताणं केइ अत्थाहिगारा अनहिगया भवंति, ततो तेसिं अनहिगयाणं अहिगमनट्ठाए पयं पएणं वन्नइस्सामि, -*

*मू. ( ३४१ ) संहिया य पदं चेव, पयत्थो पयविग्गहो।*
*चालना य पसिद्धी अ, छव्विहं विद्धि लक्खणं॥*

*मू. ( ३४२ ) से तं सुत्तप्फासियनिज्जुत्तिअनुगमे, से तं निज्जुत्तिअनुगमे, से तं अनुगमे॥*

**वृ.** आह-ननु यथोक्तनीत्या सूत्रानुगमे सत्येव सूत्रस्पर्शिकनिर्युक्त्याः प्रयोजनं तर्हि किमित्यसावुपोद्घातनिर्युक्त्यनन्तरमुपन्यस्ता ?, यावता सूत्रानुगमं निर्दिश्य पश्चात्किमिति नोच्यते ?, सत्यं, किन्तु निर्युक्तिसाम्पात्तत्प्रस्ताव एव निर्दिष्टेत्यदोषः। प्रकृतमुच्यते-तत्रा-स्खलितादिपदानां व्याख्या यथेहैव प्राग्द्रव्यावश्यकविचारे कृता तथैव द्रष्टव्या, अयं च सूत्र दोषपरिहारः शेषसूत्रलक्षणस्योपलक्षणं, तच्चेदम्-

"अप्पग्गंथमहत्थं बत्तीसादोसविरहियं जं च।
लक्खणजुत्तं सुत्तं अट्ठहि य गुणेहि उववेयं॥"

अस्या व्याख्या-अल्पग्रन्थं च तत् महार्थं चेति समाहारद्वन्द्वः 'उत्पादव्ययध्रौव्ययुक्तं सदि'-त्वादिवत्सूत्रमल्पग्रन्थं महार्थं च भवतीत्यर्थः, यच्च द्वात्रिंशद्दोषविरहितं तत्सूत्रं भवति, के

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुनस्ते द्वात्रिंशद्दोषाः ये सूत्रे वर्जनीयाः ? उच्यते,

अलियमुवघायजणयं निरत्थयमवत्थयं छलं दुहिलं।
निस्सारमहियमूणं पुनरुत्तं वाहयमजुत्तं ॥१॥
कमभिन्नवयणभिन्नं विभित्तभिन्नं च लिंगभिन्नं च।
अनभिहियमपयमेव य सहावहीणं ववहियं च ॥२॥
कालजतिच्छविदोसो समयविरुद्धं च वयणमित्तं च।
अत्थावत्तीदोसो नेओ असमासदोसो य ॥३॥
उवमारूवगदोसो निद्देसपयत्थसंधिदोसो य।
एए अ सुत्तदोसो बत्तीसा हुंति नायव्वा ॥४॥

तत्रानृतमभूतोद्भावनं भूतिनिह्नवच्च, यथा ईश्वरकर्तृकं जगदित्याद्यभूतोद्भावनं, नास्त्यात्मेत्यादिकस्तु भूतनिह्नवः १, उपघातः सत्त्वघातादिः तज्जनकं, यथा वेदविहिता हिंसा धर्मायेत्यादि २, निरर्थकं यत्र वर्णानां क्रमनिर्देशमात्रमुपलभ्यते न त्वर्थो, यथा अआइईत्यादि डित्थादिवद्वा ३, असम्बद्धार्थकमपार्थकं, यथा दश दाडिमानि षडपूपाः कुण्डमजाजिनं पललपिण्डस्त्वर कीटिके दिशमुदीचीमित्यादि ४, यत्रानिष्टस्यार्थान्तरस्य सम्भवतो विवक्षितार्थोपघातः कर्तुं शक्यते तच्छलं, यथा-नवकम्बलो देवदत्त इत्यादि ५, जन्तूनामहितोपदेशकत्वेन पापव्यापारपोषक द्रुहिलं, यथा-

एतावानेव लोकोऽयं, यावानिन्द्रियगोचरः।
भद्रे ! वृकपदं पश्य, यद्वदन्त्यबहुश्रुताः ॥१॥
पिब खाद च चारुलोचने !, यदतीतं वरगात्रि ! तन्न ते।
न हि भीरु ! गतं निवर्तते, समुदयमात्रमिदं कलेवरम् ॥२॥

इत्यादि ६ वेदवचनादिवत् तथाविधयुक्तिरहितं परिफल्गु निःसारं ७, अक्षरपदादिभिरतिमात्रमधिकं ८, तैरेव हीनमूनम्, अथवा हेतोर्दृष्टान्तस्य वाऽऽधिक्ये सत्यधिकं, यथा-अनित्यः शब्दः कृतकत्वप्रयत्नानन्तरीयकत्वाभ्यां घटपटवदित्यादि, एकस्मिन् साध्ये एक एव हेतुर्दृष्टान्तश्च वक्तव्यः, अत्र च प्रत्येकं द्वयाभिधानादाधिक्यमिति भावः, हेतुदृष्टान्ताभ्यामेव हीनमूनं, यथा अनित्यः शब्दो घटवदिति, यथा(द्वा)अनित्यः शब्दः कृतकत्वादित्यादि ९, पुनरुक्तं द्विधा-शब्दतोऽर्थतश्च, तथाऽर्थादापन्नस्य पुनर्वचनं पुनरुक्तं, तत्र शब्दतः पुनरुक्तं यथा घटो घट इत्यादि, अर्थतः पुनरुक्तं यथा घटः कुटः कुम्भ इत्यादि, अर्थादापन्नस्य पुनर्वचनं यथा पीनो देवदत्तो दिवा न भुङ्क्ते उत्युक्ते अर्थादापन्नं रात्रौ भुङ्क्त इति, तत्रार्थापन्नमपि य एतत्साक्षाद् ब्रूयात्तस्य पुनरुक्तता १०,

व्याहतं यत्र पूर्वेण परं विहन्यते यथा-'कर्म चास्ति, फलं चास्ति, कर्ता न त्वस्ति कर्मणा'-मित्यादि ११, अयुक्तमनुपपत्तिक्षमं, यथा-तेषां कटकटभ्रष्टैर्गजानां मदबिन्दुभिरित्यादि १२, क्रमभिन्नं यत्र क्रमो नाराध्यते, यथा-स्पर्शनरसनघ्राणचक्षुःश्रोत्राणामर्थाः स्पर्शरसगन्धरूपशब्दा इति वक्तव्ये स्पर्शरूपशब्दगन्धरसा इति ब्रूयात् इत्यादि १३, वचनभिन्नं यत्र वचनव्यत्ययो, यथा वृक्षाः ऋतौ पुष्पितः इत्यादि १४, विभिक्तिभिन्नं यत्र बिभक्तिव्यत्ययो, यथा वृक्षं पश्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति वक्तव्यो, यथा वृक्षं पश्य इति वक्तव्ये वृक्षः पश्य इति ब्रूयादित्यादि १५, लिङ्गभिन्नं यत्र लिङ्गव्यत्यो, यथा अयं स्त्रीत्यादि १६, अनभिहितं-स्वसिद्धान्तानुपदिष्टं, यथा सप्तमः पदार्थो वैशिषिकस्य, प्रकृतिपुरुषाभ्यधिकं साङ्ख्यस्य, दुःखसमुदायमार्गनिरोधलक्षणचतुरार्यसत्यातिरिक्तं वा बौद्धस्येत्यादि १७, यत्रान्यच्छन्दोऽधिकारेऽन्यच्छन्दोऽभिधानं तदपदं, यथा-ऽऽर्यापदेऽभिधातव्ये वैतालीयपदमभिदध्यादित्यादि १८, यत्र वस्तुस्वभावोऽन्यथास्थितोऽन्यथाऽभिधीयते तत्स्वभावहीनं, यथा शीतो वह्निः मूर्तिमदाकाशमित्यादि १९, यत्र प्रकृतं मुक्त्वाऽ-प्रकृतं व्यासतोऽभिधाय पुनः प्रकृतमुच्यते तत्स्वभावहीनं, यथा शीतो वह्निः मूर्ति-मदाकाशमित्यादि १९, यत्र प्रकृतं मुक्त्वाऽप्रकृतं व्यासतोऽभीधाय पुनः प्रकृतमुच्यते तद्व्यवहितं २०,

कालदोषो यत्रातीतादिकालव्यत्ययो यथा रामो वनं प्रविविशेति वक्तव्ये रामो वनं प्रविशतीत्याह २१, यतिदोषोऽस्थानविरतिः सर्वथाऽविरतिर्वा २२, छविः-अलङ्कारविशेषस्तेन शून्यं छविदोषः २३, समयविरुद्धं स्वसिद्धान्तविरुद्धं, यथा साङ्ख्यस्यात् कारणे कार्यं, वैशिषिकस्य वा सदिति २४, वचनमात्रं निर्हेतुकं, यथा कश्चिद्यथेच्छया कञ्चित्प्रदेशं लोकमध्यतया जनेभ्यः प्ररूपयति २५, यत्रार्थापत्त्याऽनिष्टमापतति तत्रार्थापत्तिदोषो, यथा गृहकुक्कुटो न हन्तव्य इत्युक्तेऽर्थापत्त्या शेषघातोऽदुष्ट इत्यापतति २६, यत्र समासविधिप्राप्तौ समासं न करोति व्यत्ययेन वा करोति तत्रासमासदोषः २७, उपमादोषो यत्र हीनोपमा क्रियते, यथा मेरुः सर्वपोपमः, अधिकोपमा वा क्रियते, यथा सर्षपो मेरुसन्निभः, अनुपमा वा यथा मेरुः समुद्रोपम इत्यादि २८, रूपकदोषः स्वरूपभूतानामवयवानां व्यत्ययो, यथा पर्वते निरूपयितव्ये शिखरादीस्तँदवयवान्निरूपयति, अन्यस्य वा समुद्रादेः सम्बन्धिनोऽवयवाँस्तत्र निरूपयतीति २९, निर्देशदोषस्तत्र यत्र निर्दिष्टपदानामेकवाक्यता न क्रियते, यथेह देवदत्तः स्थाल्यामोदनं पचतीत्यमिधातव्ये पचतिशब्दं नाभिधत्ते ३०,

पदार्थदोषो यत्र वस्तुनि पर्यायोऽपि सन् पदार्थान्तरत्वेन कल्प्यते, यथा सतो भावः सत्तेतिकृत्वा वस्तुपर्याय एव सत्ता, सा च वैशेषिकैः षट्सु पदार्थेषु मध्ये पदार्थान्तरत्वेन कल्प्यते, यथा सतो भावः सत्तेतिकृत्वा वस्तुपर्याय एव सत्ता, सा च वैशेषिकैः षट्सु पदार्थेषु मध्ये पदार्थान्तरत्वेन कल्प्यते, तच्चायुक्तं, वस्तूनामनन्तपर्यायत्वेन पदार्थानन्त्यप्रसङ्गादिति ३१, यत्र सन्धिप्राप्तौ तं न करोति दुष्टं वा करोति तत्र सन्धिदोषः ३२, एते द्वात्रिंशत्सूत्रदोषाः, एतैर्विरहितं यत्तल्लक्षणयुक्तं सूत्र। अष्टाभिश्च गुणैरुपपेतं यत्तल्लक्षणयुक्तमिति वर्तते, ते चेमे गुणाः-

"निद्दोसं सारवंतं च, हेउज्जुत्तमलंकियं।
उवनीयं सोवयारं च, मियं महुरमेव य॥"

तत्र निर्दोषं-सर्वदोषविप्रमुक्तं १, सारवद् गोशब्दवद्बहुपर्यायं २, हेतवः अन्वयव्यतिरेकलक्षणास्तैर्युक्तम् ३, उपमोत्प्रेक्षाद्यलङ्कारैरलङ्कृतम् ४, उपनयोपसंहृतमुपनीतं ५, ग्राम्यभणितिरहितं सोपचारं ६, वर्णादिनियतपरिमाणं मितं ७, श्रवणमनोहरं मधुरम् ८। अन्यैश्च कैश्चिद् षड् गुणाः सूत्रस्य पठ्यन्ते, तद्यथा-

"अप्पक्खरमसंदिद्धं, सारवं विस्सओमुहं।
अत्थोभममवज्जं च, सुत्तं सव्वन्नुभासियं॥"

Jain Education International For Private & Personal Use Only www.jainelibrary.org

य(त)त्राल्पाक्षरंमिताक्षरं, यथा सामायिकसूत्रम्, असन्दिग्धं-सैन्धवशब्दवद्यल्लवणवसन-तुरगाद्यनेकार्थसंशयकारि न भवति, सारवत्त्च पूर्ववत्, विश्वतोमुखं प्रतिसूत्रं चरणानुयोगाद्यनुयोगचतुष्टयव्याख्याक्षमं, यथा-'धम्मो मंगलमुक्किट्ठ'मित्यादिश्लोके चत्वारोऽप्यनुयोगो व्याख्यायन्ते, अथवा अनन्तार्थत्वाद् यथो विश्वतोमुखं ततः सारवदित्येवं सारवत्त्वस्यैव हेतु-भावेनेदं योज्यते, अस्मिँश्च व्याख्याने पञ्चैवैते गुणा भवन्ति, स्तोभकाः-चकारवाशब्दादयो निपातास्तैर्वियुक्तमस्तोभकम्, अनवद्यं कामादिपापव्यापाराप्ररूपकं, एवंभूतं सूत्रं सर्वज्ञ-भाषितमिति।

यैस्तु पूर्वे अष्ट सूत्रगुणाः प्रोक्तास्तेऽनन्तरश्लोकोक्तगुणास्तेष्वेवाष्टसु गुणेष्वन्तर्भावयन्ति, ये त्वनन्तरश्लोकोक्तानेव सूत्रगुणानिच्छन्ति ते अमीभिरेव पूर्वोक्तानामष्टानामपि सङ्ग्रहं प्रतिपादयन्ति॥ एवं सूत्रानुगमे समस्तदोषविप्रमुक्ते लक्षणयुक्ते सूत्रे उच्चारिते ततो ज्ञास्यते यदुतैतत्स्वसमयगतजीवाद्यर्थप्रतिपादकं पदं स्वसमयपदं, परसमयगतप्रधानेश्वराद्यर्थप्रतिपा-दकं पदं परसमयपदं, अनयोरेव मध्ये परसमयपदं देहिनां कुवासनाहेतुत्वाद्बन्धपदमितरत्तु सद्बोधकारणत्वान्मोक्षपदमिति तावदेके, अन्ये तु व्याचक्षते-प्रकृतिस्थित्यनुभावप्रदेश-लक्षणभेदभिन्नस्य बन्धस्य प्रतिपादकं पदं बन्धपदम्, [सद्बोधकारणत्वात्] कृत्स्नकर्मक्षय-लक्षणस्य मोक्षस्य प्रतिपादकं पदं मोक्षपदमिति।

अह-नन्वत्र व्याख्याने बन्धमोक्षप्रतिपादकं पदद्वयं स्वसमयपदान्नातिरिच्यते तत्किमिति भेदेनोपन्यासः?, सत्यं, किन्तु स्वसमयपदस्याप्यभिधेयवैचित्र्यदर्शनार्थो भेदेनोपन्यासः, अत एव सामायिकप्रतिपादकं पदं सामायिकपदमित्यादावपि भेदेनोपादानं सार्थकमिति, सामायिकव्यतिरिक्तानां नारकतिर्यगाद्यर्थानां प्रतिपादकं पदं नोसामायिकपदमित्येतश्च सूत्रोच्चारणस्य फलं दर्शितम्, इदमुक्तं भवति-यतः सूत्रे समुच्चारिते स्वसमयपदादिपरिज्ञानं भवति ततस्तदुच्चारणीयमेव, ततस्तस्मिन् सूत्रे उच्चारितमात्र एव सति केषाञ्चिद्भगवतां साधूनां यथोक्तनीत्या केचिदर्थाधिकारा अधिगताः-परिज्ञाता भवन्ति, केचित्तु क्षयोपशमवैचित्र्यादन-धिगता भवन्ति, ततस्तेषामनधिगतानामर्थाधिकाराणामधिगमार्थ पदेन पदं वर्णयिष्यामि, एकैकं पदं व्याख्यास्यामित्यर्थः। तत्र व्याख्यालक्षणमेव तावदाह-

''संहिया ये'त्यादि, तत्रास्खलितपदोच्चारणं संहिता, यथा 'करोमि भयान्त! सामायिक'-मित्यादि, पदं तु करोमीत्येकं पदं भयान्त इति द्वितीयं सामायिकमिति तृतीयम् इत्यादि, पदार्थस्तु करोमीत्यभ्युपगमो भयान्त इति गुर्वामन्त्रणं समस्यायः सामायिकमित्यादिकः, पदविग्रह समासः, स चानकपदानामेकत्वापादनविषयो यथा भयस्यान्तो भयान्त इत्यादि, सूत्रस्यार्थस्य वा अनुपपत्त्युद्भावनं चालना, तस्यैवानेकोपपत्तिभिस्तथैव स्थापनं प्रसिद्धिः, एते च चालना-प्रसिद्धी आवश्येक सामायिक व्याख्यावसरे स्वस्थान एव विस्तरवत्यौ द्रष्टव्ये, एवं षड्विधं 'विद्धि'जानीहि लक्षणं व्याख्याया इति प्रक्रमाद्गम्यते इति श्लोकार्थः।

अत्राह-नन्वस्याः षड्विधव्याख्याया मध्ये कियान् सूत्रानुगमस्य विषयः? को वा सूत्रालापकनिक्षेपस्य? कश्च सूत्रस्पर्शिकनिर्युक्तेः? किं वा नयैर्विषयीक्रियते?, उच्यते, सूत्रं सपदच्छेदं तावदभिधाय सूत्रानुगमः कृतप्रयोजनो भवति, सूत्रानुगमेन च सूत्रे समुच्चारिते

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पदच्छेदे च कृते सूत्रालापकानामेव नामस्थापनादिनिक्षेपमात्रमभिधाय सूत्रालापकनिक्षेपः कृतार्थो भवति, शेषस्तु पदार्थपदविग्रहादिनियोगः सर्वोऽपि सूत्रस्पर्शिनिर्युक्तेः, वक्ष्यमाण-नैगमादिनयानामपि प्रायः स एव पदार्थादिविचारो विषयः ततो वस्तुवृत्त्या सूत्रस्पर्शिकनि-युक्त्यन्तर्भाविन एव नयाः, आह च भाष्यकारः-

"होइ कयत्थो वोत्तुं सपयच्छेयं सुयं सुयाणुगमो।
सुत्तालावगनासो नामाइन्नासविनिओगं॥१॥
सुत्तफासियनिज्जुत्तिविनिओगो सेसओ पयत्थाइ।
पायं सो च्चिय नेगमनयाइमयगोयरो होइ॥२॥

अनेन च विधिना सूत्रे व्याख्यायमाने सूत्रं सूत्रानुगमादयश्च युगपत्समाप्यन्ते, यत आह भाष्यसुधाम्भोनिधिः-

"सुत्तं सुत्तानुगमो सुत्तालावयकओ य निक्खेवो।
सुत्तप्फासियनिज्जुत्ती नया य समगं तु वच्चंति॥"

इत्यलं विस्तरेण। 'से त्तं अनुगमे'त्ति अनुगमः समाप्तः॥ अथ नयद्वारमभिधित्सुराह-

*मू. ( ३४३ ) से किं तं नए ?, सत्त मूलनया पन्नत्ता, तंजहा- नेगमे संगहे ववहारे उज्जुसुए सद्दे समभिरूढे एवंभूए, तत्थ-*

*मू. ( ३४४ ) नेगेहिं मानेहिं मिनइत्ति नेगमस्सं य निरुत्ती।*
*सेसाणंपि नयाणं लक्खनमिनमो सुणह वोच्छं॥*

*मू. ( ३४५ ) संगहिअपिंडिअत्थं संगहवयणं समासओ बिंति।*
*वच्च विनिच्छिअत्थं ववहारो सव्वदव्वेसुं॥*

*मू. ( ३४६ ) पच्चुप्पन्नग्गाी उज्जुसुओ नयविही मुनेअव्वो।*
*इच्छइ विसेसियतरं पच्चुप्पन्नं नओ सद्दो॥*

*मू. ( ३४७ ) वत्थूओ संकमणं होइ अवत्थू नए समभिरूढे।*
*वंजणअत्थतदुभयं एवंभूओ विसेसेइ॥*

**वृ.** अथ कोऽयं पूर्वोक्तशब्दार्थो नयः ?, तत्रोत्तरभेदापेक्षया सप्तैव मूलभूता नया मूलनयाः, तद्यथा-नैगम इत्यादि, तत्र नैगमं व्याचिख्यासुराह-नेगेहिमित्यादि गाथा, व्याख्या-न एकं नैकं प्रभूतानीत्यर्थः, नैकैर्मानैः-महासत्तासामान्यविशेषादिज्ञानैर्मिमीते मिनोति वा वस्तूनि परिच्छिनत्तीति नैगमः इतीयं नैगमस्य निरुक्तिः-व्युत्पत्तिः, अथवा निगामा-लोके वसामि तिर्यग्लोके वसामीत्यादयः पूर्वोक्ता एव बहवः परिच्छेदास्तेषु भवो नैगमः, शेषाणामपि नयानां सङ्ग्रहादीनां लक्षणमिदं शृणुत वक्ष्येऽमिति गाथार्थः॥

यथाप्रतिज्ञातमेवाह-'संगहिअ'गाहा, व्याख्या-सम्यग् गृहीत-उपात्तः सङ्गृहीतः पिण्डित एकजातिमापन्नोऽर्थो विषयो यस्य सङ्ग्रहवचनस्य तत्सङ्गृहीतपिण्डितार्थं सङ्ग्रहस्य वचनं सङ्ग्रहवचनं 'समासतः' संक्षेपतो ब्रुवते तीर्थकरगणधराः, अयं हि सामान्यमेवेच्छति न विशेषान्, ततोऽस्य वचनं सङ्गृहीतसामान्यार्थमेव भवति, अत एव सङ्गृह्णाति-सामान्यरूपतया सर्वं वस्तु क्रोडीकरोतीति सङ्ग्रहोऽमुच्यते, युक्तिश्चात्र लेशतः प्राग्दर्शितैव 'वच्चई'त्यादि,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निराधिक्ये चयनं चयः-पिण्डीभवनं अधिकश्चयो निश्चयः-सामान्यं विगतो निश्चयो विनिश्चयो-सामान्याभावः तदर्थ-तन्निमित्तं व्रजति-प्रवर्तते, सामान्याभावायैव सर्वदा यतते व्यवहारो नय इत्यर्थः क्व ?-'सर्वद्रव्येषु' सर्वद्रव्यविषये, लोके हि घटस्तम्भाम्भोरुहादयो विशेषा एव प्रायो जलाहरणादिक्रियासूपयुज्यमाना दृश्यन्ते न पुनस्तदतिरिक्तं सामान्यम्, अतो लोकव्यवहारानङ्गत्वात्सामान्यमसौ नेच्छतीति भावः, अत एव लोकव्यवहारप्रधानो नयो व्यवहारनयोऽ-साधुच्यते, युक्तिश्चात्रापि लेशतः प्रागुक्तैव, अथवा विशेषेण निश्चयो विनिश्चयः-आगोपालाङ्गना[द्य]वबोधो न कतिपयविद्वत्सम्बद्धः तदर्थं व्रजति व्यवहारनयः सर्वद्रव्येषु, इदमुक्तं भवति-यद्यपि निश्चयेन घटादिवस्तूनि सर्वाण्यपि प्रत्येकं पञ्चवर्णानि द्विगन्धानि पञ्चरसान्यष्टस्पर्शानि तथाऽपि गोपालङ्गनादीनां यत्रैव क्वचिदेकस्मिन् स्थले कालनीलवर्णादौ विनिश्चयो भवति तमेवासौ सत्त्वेन प्रतिपद्यते न शेषान, लोकव्यवहारपरत्वादेवेति गाथार्थः ॥

'पच्चुप्पन्न'गाहा, साम्प्रतमुत्पन्नं प्रत्युत्पन्नमुच्यते वर्तमानकालभावीत्यर्थः, तद् ग्रहीतुं शीलमस्येति प्रत्युत्पन्नग्राही ऋजुसूत्रो नयविधिर्मुणितव्यः, तत्रातीतानागताभ्युपगमकुटिलतापरिहारेण ऋजु-अकुटिलं वर्तमानकालभावि वस्तु सूत्रयतीति ऋजुसूत्रः, अतीतानागतयोर्विनाशानुत्पत्तिभ्यामसत्त्वाद्, असदभ्युपगमश्च कुटिल इति भावः, अथवा ऋजु-अवक्रं श्रुतमस्येति ऋजुश्रुतः, शेषज्ञानैर्मुख्यतया तथाविधपरोपकारासाधनात् श्रुतज्ञानमेवैकमिच्छतीत्यर्थः, उक्तं च-

"सुयनाणे अं निउत्तं, केवले तयनंतरे।
अप्पणो य परेसिं च, जम्हा तं परिभावगं ॥"ति,

अयं च नयो वर्तमानमपीच्छन् स्वकीयमेवेच्छति, परकीयस्य स्वाभिमतकार्यासाधकत्वेन वस्तुतोऽसत्त्वादिति, अपरं च-भिन्नलिङ्गैर्भिन्नवचनैश्च शब्दैरेकमपि वस्त्वभिधीयत इति प्रतिजानीते, यथा तटः तटी तटमित्यादि, तथा गुरुर्गुरव इत्यादि, तथा इन्द्रादेर्नामस्थापनादिभेदान् प्रतिपद्यते, वक्ष्यमाणनयस्त्वतिविशुद्धत्वाल्लिङ्गवचनभेदाद्वस्तुभेदं प्रतिपत्स्यते नामस्थापनाद्रव्याणि च नाभ्युपगमिष्यतीति भावः, इत्युक्त ऋजुसूत्रः, अथ शब्द उच्यते-तत्र शप आक्रोशे' शप्यते-अभिधीयते वस्त्वनेनेति शब्दः, तमेव गुणीभूतार्थं मुख्यतया यो मन्यते स नयोऽप्युपचाराच्छब्दः, अयं च प्रत्युत्पन्नं-वर्तमानं तदपि ऋजुसूत्राभ्युपगमापेक्षया विशेषिततरमिच्छति, तथाहि-तटस्तटी तटमित्यादिशब्दानां भिन्नान्येवाभिधेयानि, भिन्नलिङ्गवृत्तित्वात्, स्त्रीपुरुषनपुंसकशब्दवदित्यसौ प्रतिपद्यते, तथा गुरुर्गुरव इत्यत्राप्यभिधेयभेद एव, भिन्नवचनवृत्तित्वात्पुरुषः पुरुषा इत्यादिवदिति, नामस्थापनाद्रव्यरूपाश्च नेन्द्राः, तत्कार्याकरणात्, खपुष्पवदिति प्राक्तनाद्विशुद्धत्वाद्विशेषिततरोऽस्याभ्युपगमः, समानलिङ्गवचनानां तु बहूनामपि शब्दानामेकमभिधेयमसौ मन्यते, यथेन्द्रः शक्रः पुरन्दर इत्यादि, इति गाथार्थः ॥

'वत्थूओ'इत्यादि, वस्तुनः-इन्द्रादेः सङ्क्रमणमन्यत्र शक्रादाविति दृश्यं, भवति अवस्तु अभवतीत्यर्थः, क्वेत्याह-नये समभिरूढनयमतेनेत्यर्थः, तत्र वाचकभेदेनापरापरान् वाच्यविशेषान् समभिरोहति समभिगच्छति प्रतिपद्यत इति समभिरूढः, अयमत्र भावार्थः-इन्द्रशक्रपुरन्दरादिशब्दान् अनन्तरं शब्दनयेन एकाभिधेयत्वेनेष्टानसौ विशुद्धतरत्वात् प्रत्येकं भिन्नाभिधेयान् प्रतिपद्यते, भिन्नप्रवृत्तिनिमित्तत्वात्, सुरमनुजादिशब्दवत्, तथाहि-इन्दतीति इन्द्रः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शक्नोतीति शक्रः पुरं दारयतीति पुरन्दरः, इह परमैश्वर्यादीनि भिन्नान्येवात्र प्रवृत्तिनिमित्तानि, एवमप्येकार्थत्वे अतिप्रसङ्गो, घटपटादिशब्दानामप्येकार्थताऽऽपत्तेः, एवं च सति यदा इन्द्रशब्दः शक्रशब्देन सहैकार्थ उच्यते तदा वस्तुनः परमैश्वर्यस्य शकनलक्षणे वस्त्वन्तरे सङ्क्रमणं कृतं भवति, तयोरेकत्वमापादितं भवतीत्यर्थः, तच्चासम्भवित्वादवस्तु, न हि य एव परमैश्वर्यपर्यायः स एव शकनपर्यायो भवितुमर्हति, सर्वपर्यायसाङ्कर्यापत्तितोऽतिप्रसङ्गादित्यलं विस्तरेण, उक्तः समभिरूढः ।

'वंजणअत्थे'त्यादि, यत्क्रियाविशिष्टं शब्देनोच्यते तामेव क्रियां कुर्वद्वस्त्वेवंभूतमुच्यते, एवं-यः शब्देनोच्यते चेष्टाक्रियादिकः प्रकारस्तमेवं भूतं-प्राप्तमितिकृत्वा, ततश्चैवंभूतवस्तु-प्रतिपादको नेयोऽप्युपचारादेवंभूतः, अथवा एवं-यः शब्देनोच्यते चेष्टाक्रियादिकः प्रकारस्त-द्विशिष्टस्यैव वस्तुनोऽभ्युपगमात्तमेवं भूतः-प्राप्त एवंभूत इत्युपचारमन्तरेणापि व्याख्यायते, स एवंभूतो नयः किमित्याह-व्यज्यतेऽर्थोऽनेनेति व्यञ्जनं-शब्दः अर्थस्तु-तदभिधेयवस्तुरूपः व्यञ्जनं चार्थश्च व्यञ्जनार्थौ तौ च तौ तदुभयं चेति समासः, व्यञ्जनार्थशब्दयोर्व्यस्तनिर्देशः प्राकृतत्वात्, तद्व्यञ्जनार्थतदुभयं विशेषयति-नैयत्येन स्थापयति, इदमत्र हृदयम्-शब्दमर्थेनार्थं च शब्देन विशेषयति, यथा 'घटचेष्टायां' घटते योषिन्मस्तकाद्यारूढश्चेष्टत इति घट इति, अत्र तदैवासौ घटो यदा योषिन्मस्तकाद्यारूढतया जलाहरणचेष्टावान् नान्यदा, घटध्वनेरपि चेष्टां कुर्वत एव तस्य वाचको नान्यदेत्येवं चेष्टावस्थातोऽन्यत्र घटस्य घटत्वं घटशब्देन निवर्त्यते, घटध्वनेरपि तदवस्थातोऽन्यत्र घटेन स्ववाचकत्वं निवर्त्यत इति भावः, इति गाथार्थः ॥

उक्ता मूलनयाः, एषां चोत्तरोत्तरभेदप्रभेदा आवश्यकादिभ्योऽवसेयाः । एते च सावधारणाः सन्तो दुर्नयाः, अवधारणविरहितास्तु सुनयाः, सर्वैश्च सुनयैर्मीलितैः स्याद्वाद इत्यलं बहुभाषि-तया ॥ अत्राह कश्चित्-ननूक्ता एते नयाः, केवलं प्रस्तुते किमेतैः प्रयोजनमिति नावगच्छामः, उच्यते, उपक्रमेणोपक्रान्तस्य निक्षेपेण च यथासम्भवं निक्षिप्तस्यानुगमेनानुगतस्य च प्रक्रान्त-सामायिकाध्ययनस्य विचारणाऽमीषां प्रयोजनं । पुनरप्याह-नन्वेषा नयैर्विचारणा किं प्रतिसूत्रम-भिप्रेता सर्वाधययनस्य वा ?, यद्याद्यः पक्षः स न युक्तः, प्रतिसूत्रं नयविचारस्य 'न नया समोयरंति इह' मित्यनेन निषिद्धत्वाद्, अथापरः पक्षः साऽपि न युक्तः, समस्ताध्ययनविषयस्य नयविचार-स्य प्रागुपोद्घातनिर्युक्तौ 'नए समोयारनानुमए' इत्यत्रोपन्यस्तत्वात्, न च सूत्रव्यतिरिक्तमध्ययन मस्ति यत्रनयैर्विचार्यते, अत्रोच्यते, यस्तावत्प्रतिसूत्रं नयविचारनिषेधः प्रेर्यते तत्राविप्रतिपत्ति-रेव, किं च -

'आसज्ज उ सोयारं नए नयविसारओ बूया' इत्यनेनापवादिकः सोऽनुज्ञात एव, यदप्युच्यते- 'समस्ताध्ययनविषयस्य नयविचारस्य प्रागुपोद्घाते'त्यादि, तत्समयानभिज्ञस्यैव वचनं, यस्मादिदमेव चतुर्थानुयोगद्वारं नयवक्तव्यताया मूलस्थानम्, अत्र सिद्धानामेव तेषां तत्रोपन्यासः, यदप्युक्तम् 'न च सूत्रव्यतिरिक्तमध्ययन'मित्यादि, तदप्यसारं, समुदायसमुदायिनोः कार्यादिभेदतः कथञ्चिद्भेदसिद्धेः, तथाहि-प्रत्येकावस्थायामनुपलब्धमप्युद्वहनसामर्थ्यलक्षणं कार्यं शिविकावाहकपुरुषसदामुदाये उपलभ्यते, एवं च प्रत्येकसमुदितावस्थयोः कार्यभेदः शिविकावाहनादिषु सामर्थ्यासामर्थ्यलक्षणो विरुद्धधर्माध्यासश्च दृश्यते, यदि चायमपि न

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भेदकस्तर्हि सर्वं विश्वमेकं स्यात्, ततश्च सहोत्पत्त्यादिप्रसङ्गः, तस्मात्कार्यभेदाद्विरुद्धधर्माध्यासाच्च समुदायसमुदायिनोर्भेदः प्रतिपत्तव्यः, एवं सङ्ख्यासंज्ञादिभ्योऽपि तद्भेदो भावनीयः, तस्मात्कश्चित्क्वचित्सूत्रविषयः समस्ताध्ययनविषयश्च नयविचारो न दुष्यति, भवत्वेवं तथाऽप्यध्ययनं नयैर्विचार्यमाणं किं सर्वैरेव विचार्यते ? आहोस्विद कियद्भिरेव ?, यदि सर्वैरिति पक्षः स न युक्तः, तेषामसङ्ख्येयत्वेन तैर्विचारस्य कर्तुमशक्यत्वात्, तथाहि-यावन्तो वचनमार्गास्तावन्त एव नयाः, यथोक्तम्-

"जावइया वयणपहा तावइया चेव होंति नयवाया।
जावइवा नयवाया तावइया चेव परसमया ॥"

न च निजनिजाभिप्रायविरचितानां वचनमार्गाणां सङ्ख्या समस्ति, प्रतिप्राणि प्रायो भिन्नत्वादभिप्रायाणां, नापि कियद्भिरिति वक्तुं शक्यम्, अनवस्थाप्रसङ्गात्, सङ्ख्यातीतेषु हि तेषु यावदेभिर्विचारणा क्रियते तावदेभिरपि किं नेत्यनवस्थाप्रेरणायां न नैयत्यावस्थापकं हेतुमुत्पश्यामः, अथापि स्यादसंख्येयत्वेऽप्येषां सकलनयसङ्ग्राहिभिर्नयैर्विचारो विधीयते, ननु तेषामपि सङ्ग्राहिनयानामनेकविधत्वात् पुनरनवस्थैव, तथाहि-पूर्वविद्भिः सकलनयसङ्ग्राहीणि सप्त नयशतान्युक्तानि, यत्प्रतिपादकं सप्तशतारं नयचक्राध्ययनमासीद्, उक्तं च-

"एक्केक्को य सयविहो सत्त नयसया हवंति एमेवे'त्यादि, सप्तानां च नयशतानां सङ्ग्राहकाः पुनरपि विध्यादयो द्वादश नयाः यत्प्ररूपकमिदानीमपि द्वादशारं नयचक्रमस्ति, एतत्सङ्ग्राहिणोऽपि सप्त नैगमादिनयाः तत्सङ्ग्राहिणौ पुनरपि द्रव्यपर्यायास्तिकौ नयौ ज्ञानक्रियानयौ वा निश्चयव्यवहारौ वा शब्दार्थनयौ वेत्यादि, इति सङ्ग्राहकनयानामप्यनेकविधत्वात्सैवानवस्था, अहो अतिनिपुणमुक्तं, किन्तु प्रक्रान्ताध्ययने सामायिकं विचार्यते, तच्च मुक्तिफलं, ततो यदेवास्य मुक्तिप्राप्तिनिबन्धनं रूपं तदेव विचारणीयं, तच्च ज्ञानक्रियात्मकमेव, ततो ज्ञानक्रियानयाभ्यामेवास्य विचारो युक्ततरो नान्यैः ।

तत्र ज्ञाननयो ज्ञानमेव मुक्तिप्रापकतया प्रतिजानीते, ततस्तन्मताविषकरणार्थमाह-

*मू. ( ३४८ )* *नायंमि गिण्हिअव्वंमि चेव अत्थंमि ।*
*जइअव्वमेव इइ जो उवएसो सो नओ नाम ॥*

*मू. ( ३४९ )* *सव्वेसिंपि नयाणं बहुविहवत्तव्वयं निसामित्ता ।*
*तं सव्वनयविसुद्धं जं चरणगुणट्ठिओ साहू ॥*

*मू. ( ३५० ) से तं नए। सोलस सयाणि चउरुत्तराणि होंति उ इमंमि गाहाणं ।*
*दुसहस्समनुट्ठुभछंदवित्तप्पमानओ भनिओ ॥*
*नयरमहादारा इव उवक्कमदारानुओगवरदारा ।*
*अक्खरबिंदुगमत्ता लिहिया दुक्खक्खयट्ठाए ॥*

**वृ.** 'ज्ञाते'सम्यग् अवगते 'गिण्हियव्वे' ग्रहीतव्ये उपादेय इत्यर्थः, 'अग्रहीतव्ये' अनुपादेये, स च हेय उपेक्षणीयश्च, द्वयोरप्यग्रहणाविशेषात्, चशब्द उक्तसमुच्चये, अथवा अग्रहीतव्यशब्देन हेय एवैको गृह्यते, उपेक्षणीयं त्वनुक्तमप्ययमेव चकारः समुच्चिनोति, एवो गाथालङ्कारमात्रे, 'अत्थंमि'त्ति 'अर्थे' एहिकामुष्मिके, तत्र एहिको ग्रहीतव्य स्रक्चन्दनाङ्गनादिः अग्रहीत-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्योऽहिविषकण्टकादिरुपेक्षणीयस्तृणादिः, आमुष्मिको ग्रहीतव्यः सम्यग्दर्शनचारित्रादिः अग्रहीतव्यो मिथ्यात्वादिरुपेक्षणीयस्तु स्वर्गविभूत्यादिः, एवंभूतेऽर्थे ज्ञात एव तत्प्राप्तिपरिहारोपेक्षार्थिना यतितव्यं, प्रवृत्त्यादिलक्षणः प्रयत्नः कार्य इति, 'इति' एवंभूतः सर्वव्यवहाराणां ज्ञाननिबन्धनत्वप्रतिपादनपरो य उपदेशः स किमित्याह-'नय' इति प्रस्तावाज्ज्ञाननयो 'नामे'त्ति शिष्यामन्त्रणे इत्यक्षरघटना।

भावार्थस्त्वयम्-इह ज्ञाननयो ज्ञानप्राधान्यख्यापनार्थं प्रतिपादयति-नन्वैहिकामुष्मिकफलार्थिना तावत्सम्यग्विज्ञात एवार्थे प्रवर्तितव्यम्, अन्यथाप्रवृत्तौ फलविसंवाददर्शनाद्, आगमेऽपि च प्रोक्तम्-'पढमं नाणं तओ दए'त्यादि, 'जं अन्नाणी कम्मं खवेई'त्यादि, तथा अपरमप्युक्तम्-

"पावाओ विनियत्ती पवत्तणा तह य कुसलपक्खंमि।
विनयस्स य पडिवत्ती तिन्निवि नाणे समप्पंति॥"

तथा अन्यैरप्युक्तम्-

"विज्ञप्तिः फलदा पुंसां, न क्रिया फलदा मंता।
मिथ्याज्ञानात्प्रवृत्तस्य, फलासंवाददर्शनाद्॥" इति,

इतश्च ज्ञानस्यैव प्राधान्यं, यतस्तीर्थंकरगणधरैरगीतार्थानां केवलानां विहारोऽपि निषिद्धः, तथा च तद्वचनम्-

"गीयत्थो य विहारो बीओ गीयत्थमीसिओ भणिओ।
इत्तो तइयविहारो नानुन्नाओ जिनवरेहिं॥"

न यस्मादन्धेनान्धः समा कृष्यमाणः सम्यक् पन्थानं प्रतिपद्यत इति भावः, एवं तावत् क्षायोपशमिकं ज्ञानमधिकृत्योक्तं, क्षायिकमप्यङ्गीकृत्य विशिष्टफलसाधकत्वं तस्यैव विज्ञेयं, यस्मादर्हतोऽपि भवाम्भोधितटस्थस्य दीक्षां प्रतिपन्नस्योत्कृष्टतपश्चरणवतोऽपि न तावदपवर्गप्राप्तिः संजायते यावदखिलजीवादिवस्तुस्तोमसाक्षात्करणदक्षं केवलज्ञानं नोत्पन्नं, तस्माज्ज्ञानमेव पुरुषार्थसिद्धेर्निबन्धनं, प्रयोगश्चात्र-यद् येन विना न भवति तत्तन्निबन्धनमेव, यथा बीजाद्यविनाभावी तन्निबन्धन एवाङ्कुरो, ज्ञानाविनाभाविनी च सकलपुरुषार्थसिद्धिरिति, ततश्चायं नयश्चतुर्विधे सामायिके सम्यक्त्वसामायिकश्रुतसामायिके एवाभ्युपगच्छति, ज्ञानात्मकत्वेन प्रधानमुक्तिकारणत्वात, देशविरतिसर्वविरतिसामायिके तु नेच्छति, ज्ञानकार्यत्वेन गौणत्वात् तयोरिति गाथार्थः॥

विचारितं ज्ञाननयमतेन सामायिकम्, अथ क्रियानयमतेन तद्विचार्यतेतत्रासौ क्रियैव सकलपुरुषार्थसिद्धेः प्रधानं कारणमिति मन्यमानो ज्ञाननयमतव्याख्यातामेव गाथामाह-'नायम्मी'त्यादि, इयं च क्रियानयमतेनेत्थं व्याख्यायते-इह ज्ञाते ग्रहीतव्ये अग्रहीतव्ये चैवार्थे सर्वामिष पुरुषार्थसिद्धिमभिलषता यतितव्यमेव-प्रवृत्यादिलक्षणा क्रियैव कर्तव्येति, एवमत्र व्याख्याने एवकारः स्वस्थान एव योज्यते, एवं च सति ज्ञातेऽप्यर्थे क्रियैव साध्या, ततो ज्ञानं क्रियोपकरणत्वाद्गौणमित्यतः सकलस्यापि पुरुषार्थस्य क्रियैव प्रधानं कारणमित्येवं य उपदेशः स नयः प्रस्तावात् क्रियानयः, शेषं पूर्ववद्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अयमपि स्वपक्षसिद्धये युक्तिरूद्भावयति-ननु क्रियैव प्रधानं पुरुषार्थसिद्धिकारणं, यत आगमेऽपि तीर्थकरगणधरैः क्रियाविकलानां ज्ञानं निष्फलमेव उक्तं,

"सुबहुपि सुयमहीयं किं काही चरकविप्पमुक्कस्स ? ।
अंधस्स जह पलित्ता दीवसयसहस्सकोडीवि ॥१॥
नाणं सविसयनिययं न नाणमित्तेण कज्जनिप्फत्ती ।
मग्गन्नू दिट्ठंतो होइ सचिट्ठोसच्चिट्ठो य ॥२॥
जाणंतोऽविय तरिउं काइयजोगं न जुंजई जो उ ।
सो वुज्झइ सोएणं एवं नाणी चरणहीनो ॥३॥

जहा खरो चंदनभारवाही'त्यादि, तथा अन्यैरप्युक्तम्-

"क्रियैव फलदा पुंसां, न ज्ञानं फलदं मतम् ।
यतः स्त्रीभक्ष्यभोगज्ञो, न ज्ञानात्सुखितो भवेद् ॥"

इति, एवं तावत् क्षायोपशमिकीं चरणक्रियामङ्गीकृत्य प्राधान्यमुक्तम्,

अथ क्षायिकीमप्याश्रित्य तस्या एव प्राधान्यमवसेयं, यस्मादहतोऽपि भगवतः समुत्पन्न-केवलज्ञानस्यापि न तावद् मुक्त्यवाप्तिः संपद्यते यावदिखलकर्मेन्धनानलज्वालाकलापरूपायां शैलेश्यवस्तायां सर्वसंवररूपां चारित्रक्रियां न प्राप्नोति, तस्माद् क्रियैव प्रधाना सर्वपुरुषार्थ-सिद्धिकारणं, प्रयोगश्चात्रयद्यत्समनन्तरभावि तत्तत्कारणं, यथा अन्त्यावस्ताप्राप्तपृथिव्यादि-सामग्रयनन्तरभावी तत्कारणोऽङ्कुरः, क्रियाऽनन्तरभाविनी च सकलपुरुषार्थसिद्धिरिति, ततश्चैष चतुर्विधे सामायिके देशविरतिसर्वविरतिसामायिके एव मन्यते, क्रियारूपत्वेन प्रधानमुक्ति-कारणत्वात्, सम्यक्त्वश्रुतसामायिके तु तदुपकारित्वमात्रतो गौणत्वान्नेच्छतीति गाथार्थः ॥

ननु पक्षद्वयेऽपि युक्तिदर्शनात्किमिह तत्त्वमिति न जानीम इति शिष्यजनसम्मोहमाशङ्क्य ज्ञानक्रियानमतप्रदर्शनानन्तरं स्थितपक्षं दर्शयन्नाह-

'सव्वेसिंपि'गाहा, न केवलमनन्तरोक्तनयद्वयस्य, किं तर्हि ?-'सर्वेषामपि' स्वतन्त्र-सामान्यविशेषवादिनां नामस्थापनादिवादिनां वा नयानां 'वक्तव्यतां' परस्परविरोधिनीं प्रोक्तिं 'निशम्य' श्रुत्वा तदिह 'सर्वनयविशुद्धं' सर्वनयसम्मतं तत्त्वरूपतया ग्राह्यं, यत् किमित्याह-

'यच्चरणगुणस्थितः साधुः 'चरणं-चारित्रक्रिया गुणोऽत्र ज्ञानं तयोस्तिष्ठतीति चरणगुणस्थः, ज्ञानक्रियाभ्यां द्वाभ्यामपि युक्त एव साधुः मुक्तिसाधको न पुनरेकेन केनचिदिति भावः, तथाहियत्तावज्ज्ञानवादिना प्रोक्तं-यद्येन विना न भवति तत्तन्निबन्धनमेवेत्यादि, तत्र तदविना-भावित्वलक्षणो हेतुरसिद्ध एव, ज्ञानमात्राविभाभाविन्याः पुरुषार्थसिद्धेः क्वाप्यदर्शनात्, न हि दाहपाकाद्यर्थिनां दहनपरिज्ञानमात्रादेव तत्सिद्धिर्भवति, किन्तु तदानयनसन्दुक्षणज्वालनादि-क्रियानुष्ठानादपि, न च तीर्थकरोऽपि केवलज्ञानमाक्पान्मुक्तिं साधयति, किन्तु यथाख्यात-चारित्रक्रियातोऽपि, तस्मात्सर्वत्र ज्ञानक्रियाऽविनाभाविन्येव पुरुषार्थसिद्धिः, ततस्तदविना-भवित्वलक्षणो हेतुर्यथा पुरुषार्थसिद्धेर्ज्ञाननिबन्धनत्वं साधयति तथा क्रियानिबन्धनत्वमपि, तामप्यन्तरेण तदसिद्धेरित्यनैकान्तिकोऽप्यसाविति,

एवं क्रियावादिनाऽपि यद्यत्समन्तरभावि तत्तत्कारणमित्यादिप्रयोगे यस्तदनन्तरभावित्व-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लक्षणो हेतुरुक्तः सोऽप्यसिद्धोऽनैकान्तिकश्च, तथाहि-स्त्रीभक्ष्यभोगादिक्रियाकालेऽपि ज्ञानमस्ति, तदन्तरेण तत्र प्रवृत्तेरेवायोगाद्, एवं शैलेश्यवस्थायां सर्वसंवररूपक्रियाकालेऽपि केवलज्ञानमस्ति, तदन्तरेण तस्या एवाप्राप्तेः, तस्मात्केवलक्रियानन्तरभावित्वेन पुरुषार्थस्य क्वाप्यसिद्धेरसिद्धो हेतुः, यथा च तदनन्तर-भावित्वलक्षणो हेतुः क्रियाकारणत्वं मुक्त्यादि-पुरुषार्थस्य साधयति तथा ज्ञानकारणत्वमपि, तदप्यन्तरेण तस्य कदाचिदप्यभावादि-त्यनैकान्तिकताऽप्यस्येति, तस्माद् ज्ञानक्रियोभयसाध्यैव मुक्त्यादिसिद्धिः, उक्तं च-

"हयं नाणं कियाहीनं, हया अन्नाणओ किया।
पासंतो पंगुलो दड्ढो, धावमानो य अंधओ ॥१॥
संयोगसिद्धीअ फलं वयंति, न हु एगचक्केण रहो पयाइ।
अंधो य पंगू य वने समेच्चा, ते संपउत्ता नयरं पविट्ठा ॥२॥

इत्यादि अत्राहनन्वेवं ज्ञानक्रिययोर्मुक्त्यवापिका शक्तिः प्रत्येकमसती समुदायेऽपि कथं स्यात्?, न हि यद्येषु प्रत्येकं नास्ति तत्तेषु समुदितेष्वपि भवति, यथा प्रत्येकमसत्समुदितेष्वपि सिकताकणेषु तैलं, प्रत्येकमसती च ज्ञानक्रिययोर्मुक्त्यवापिका शक्तिः, उक्तं च-

"पत्तेयमभावाओ निव्वाणं समुदियासुवि न जुत्तं।
नाणकिरियासु वोत्तुं सिकतासमुदायतेल्लं व ॥"

उच्यते, स्यादेतद्, यदि सर्वथा प्रत्येकं तयोर्मुक्त्यनुपकारिताऽभिधीयेत, यदा तु तयोः प्रत्येकं देशोपकारिता समुदाये तु सम्पूर्णा हेतुता तदा न कश्चिद्दोषः, आह च-

"वीसुं न सव्वहच्चिय सिकतातेल्लं व साहणाभावो।
देसोवगारिया जा सा समावायंमि संपुन्ना ॥"

अतः स्थितिमिदं-ज्ञानक्रिये समुदिते एव मुक्तिकारणं, न प्रत्येकमिति तत्त्वं, यथा च पूज्याः-

"नाणाहीनं सव्वं नाणनओ भणइ किं च किरियाए?।
किरियाए चरणनओ तदुभयगाहो य सम्मत्तं ॥"

तस्माद्भावसाधुः सर्वैरपि नयैरिष्यत एव, स च ज्ञानक्रियायुक्त एवेत्यतो व्यवस्थितमिदं-तत्सर्वनयविशुद्धं यच्चरणगुणव्यवस्थितः साधिरिति ॥ तदेवं समर्थितं नयद्वारं, तत्समर्थने च समर्थितानि चत्वार्यप्युपक्रमादीनि द्वाराणि, तत्समर्थने चानुयोगद्वारशास्त्र समाप्तम् ॥

प्रायोऽन्यशास्त्रदृष्टः सर्वोऽप्यर्तो मयाऽत्र सङ्कलितः।
न पुनः स्वमनीषिकया तथापि यत्किञ्चिदिह वितथम् ॥१॥
सूत्रमतिलङ्घ्य लिखितं तच्छोध्यं मय्यनुग्रहं कृत्वा।
परकीयदोषगुणयोस्त्यागोपादानविधिकुशलैः ॥२॥
छद्मस्थस्य हि बुद्धिः स्खलति न कस्येह कर्मवशगस्य?।
सद्बुद्धिविरचितानां विशेषतो मद्विधासुमताम् ॥३॥
कृत्वा यद् वृत्तिमिमां पुण्यं समुपार्जितं मया तेन।
मुक्तिमचिरेण लभतां क्षपितरजाः सर्वभव्यजनाः ॥४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रीप्रश्नवाहनकुलाम्बुनिधिप्रसूतः, क्षोणीतलप्रथितकीर्तिरुदीर्णशाखः।
विश्वप्रसाधितविकल्पितवस्तुरुच्चैश्छायाश-(श्रि)तप्रचुरनिर्वृतभव्यजन्तुः ॥५॥
ज्ञानदिकुसुमनिचितः फलितः श्रीमन्मुनीन्द्रफलवन्दैः।
कल्पद्रुम इव गच्छः श्रीहर्षपुरीयनामास्ति ॥६॥ युग्मम्
एतस्मिन् गुणरत्नरोहण गिरिर्गाम्भीर्यपाथोनिधिस्तुङ्ग
त्वानुकृतक्षमाधर पतिः सौम्यत्वतारापति।
सम्यगज्ञान विशुद्ध संयमतपः-स्वाचारचर्यानिधिः,
शान्तिः, श्रीजयसिंहसूरि रभवन्निसङ्ग-चूडामणिः ॥७॥
रत्नाकरादिवैतस्माच्छिष्यरत्नं बभूव तत्।
स वागीशोऽपि नो मन्ये, यद्गुणग्रहणे प्रभुः ॥८॥
श्रीवीरदेवविबुधैः सन्मन्त्राद्यतिशयप्रवरतौयैः।
द्रुम इव यः संसक्तिः कस्तद्गुणवर्णने विबुधः ? ॥९॥
तथाहि-
आज्ञा यस्य नरेश्वरैरपि शिरस्यारोप्यते सादरं,
यं दृष्ट्वाऽपि मुदं व्रजन्ति परमां प्रायोऽतिदुष्टा अपि।
यद्वक्त्राम्बुधिनिर्युदुज्जवलवचःपीयूषापानोद्यतै
गीर्वाणैरिव दुग्धसिन्धुमथने तृप्तिर्न लेभे जनैः ॥१०॥
कृत्वा येन तपः सुदष्करतरं विश्वं प्रबोध्य प्रभो
स्तीर्थं सर्वविदः प्रभावितमिदं तैस्तैः स्वकीयैर्गुणैः।
शुक्लीकुर्वदशेषविश्वकुहरं भव्यैर्निबद्धस्पृहं,
यस्याऽऽशास्वनिवारतं विचरति श्वेतांशुगौरं यशः ॥११॥
यमुनाप्रवाहविमलश्रीमन्मुनिचन्द्रसूरिसम्पर्कात्।
अमरसरितेव सकलं पवित्रितं येन भुवनतलम् ॥१२॥
विस्पूर्जत्कलिकालदुस्तरतमः सन्तानलुप्तस्थितिः,
सूर्येणेव विवेकभूधरशिरस्यासाद्य येनोदयम्।
सम्यग्ज्ञानकरैश्चिरन्तनमुनिक्षुत्रः समुद्योतितो,
मार्गः सोऽभयदेवसूरिरभवत्तेभ्यः प्रसिद्धो भुवि ॥१३॥
तच्छिष्यलवप्रायैरवगीतार्थाऽपि शिष्टजनतुष्टयै।
श्रीहेमचन्द्रसूरिभिरियमनुरचिता प्रकृतवृत्तिः ॥१४॥

**मुनि दीपरत्नसागरेण संशोधिता संम्पादिता अनुयोगद्वार सूत्रे**
**मल्लधारी हेमचन्द्रचार्य विरचिता टीका परि समाप्ता**

| ४५ | द्वितीय चूलिका "अनुयोगद्वार सूत्रं"-समाप्तम् |
|---|---|

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## आगमसुत्ताणि-सटीकं

भागः-१...........३० समाप्ताः

---

१..........४५ आगमाः समाप्ताः

---

३९ आगमाः सटीकं

५ आगमाः संस्कृत छायासह

१ आगमः मूलं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## ભાવભરી વંદના

**જેમના દ્વારા સૂત્રમાં ગુંથાયેલ જિનવાણીનો ભવ્ય વારસો**
**વર્તમાનકાલીન ''આગમસાહિત્ય''માં પ્રાપ્ત થયો**
**એ સર્વે સૂરિવર આદિ આર્ષ પૂજ્યશ્રીઓને-**

| | |
|---|---|
| પંચમ ગણધર શ્રી સુધર્મા સ્વામી | ચૌદ પૂર્વધર શ્રી ભદ્રબાહુ સ્વામી |
| દશ પૂર્વધર શ્રી શય્યંભવસૂરિ | (અનામી) સર્વે શ્રુત સ્થવીર મહર્ષિઓ |
| દેવવાચક ગણિ | શ્રી શ્યામાચાર્ય |
| દેવર્દ્ધિગણિ ક્ષમાશ્રમણ | જિનભદ્ર ગણિ ક્ષમાશ્રમણ |
| સંઘદાસગણિ | સિદ્ધસેન ગણિ |
| જિનદાસ ગણિ મહત્તર | અગત્સ્યસિંહ સૂરિ |
| શીલાંકાચાર્ય | અભયદેવસૂરિ |
| મલયગિરિસૂરિ | ક્ષેમકીર્તિસૂરિ |
| હરિભદ્રસૂરિ | આર્યરક્ષિત સૂરિ (?) |
| દ્રોણાચાર્ય | ચંદ્ર સૂરિ |
| વાદિવેતાલ શાંતિચંદ્ર સૂરિ | મલ્લધારી હેમચંદ્રસૂરિ |
| શાંતિચંદ્ર ઉપાધ્યાય | ધર્મસાગર ઉપાધ્યાય |
| ગુણરત્નસૂરી | વિજય વિમલગણિ |
| વીરભદ્ર ઋષિપાલ | બ્રહ્મમુનિ તિલકસૂરિ |

**સૂત્ર-નિર્યુક્તિ - ભાષ્ય - ચૂર્ણિ - વૃત્તિ - આદિના રચયિતા અન્ય સર્વે પૂજ્યશ્રી**

**વર્તમાન કાલિન આગમ સાહિત્ય વારસાને**
**સંશોધન-સંપાદન-લેખન આદિ દ્વારા મુદ્રીત/અમુદ્રીત સ્વરૂપે રજૂ કર્તા**
**સર્વે શ્રુતાનુરાગી પૂજ્યપુરુષોને**

| | | |
|---|---|---|
| આનંદ સાગરસૂરિજી | ચંદ્રસાગર સૂરિજી | મુનિ માણેક |
| જિન વિજયજી | પુન્યવિજયજી | ચતુરવિજયજી |
| જંબુ વિજયજી | અમરમુનિજી | કનૈયાલાલજી |
| લાભસાગરસુરિજી | આચાર્ય તુલસી | ચંપક સાગરજી |

## સ્મરણાંજલિ

| | | |
|---|---|---|
| બાબુ ધનપતસિંહ | પં૦ બેચરદાસ | પં૦ જીવરાજભાઈ |
| પં૦ ભગવાનદાસ | પં૦ રૂપેન્દ્રકુમાર | પં૦ હીરાલાલ |

**શ્રુત પ્રકાશક સર્વે સંસ્થાઓ**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## ૪૫ આગમ મૂળ તથા વિવરણનું શ્લોક પ્રમાણદર્શક કોષ્ટક

| क्रम | आगमसूत्रनाम | मूल श्लोक प्रमाण | वृत्ति-कर्ता | वृत्ति श्लोकप्रमाण |
|---|---|---|---|---|
| १. | आचार | २५५४ | शीलाङ्काचार्य | १२००० |
| २. | सूत्रकृत | २१०० | शीलाङ्काचार्य | १२८५० |
| ३. | स्थान | ३७०० | अभदेवसूरि | १४२५० |
| ४. | समवाय | १६६७ | अभयदेवसूरि | ३५७५ |
| ५. | भगवती | १५७५१ | अभयदेवसूरि | १८६१६ |
| ६. | ज्ञाताधर्मकथा | ५४५० | अभयदेवसूरि | ३८०० |
| ७. | उपासकदशा | ८१२ | अभयदेवसूरि | ८०० |
| ८. | अन्तकृद्दशा | ९०० | अभयदेवसूरि | ४०० |
| ९. | अनुत्तरोपपातिकदशा | १९२ | अभयदेवसूरि | १०० |
| १०. | प्रश्नव्याकरण | १३०० | अभयदेवसूरि | ५६३० |
| ११. | विपाकश्रुत | १२५० | अभयदेवसूरि | ९०० |
| १२. | औपपातिक | ११६७ | अभयदेवसूरि | ३१२५ |
| १३. | राजप्रश्निय | २१२० | मलयगिरिसूरि | ३७०० |
| १४. | जीवाजीवाभिगम | ४७०० | मलयगिरिसूरि | १४००० |
| १५. | प्रज्ञापना | ७७८७ | मलयगिरिसूरि | १६००० |
| १६. | सूर्यप्रज्ञप्ति | २२९६ | मलयगिरिसूरि | ९००० |
| १७. | चन्द्रप्रज्ञप्ति | २३०० | मलयगिरिसूरि | ९१०० |
| १८. | जम्बूद्वीपप्रज्ञप्ति | ४४५४ | शान्तिचन्द्रउपाध्याय | १८००० |
| १९थी २३. | निरयावलिका (पञ्च उपाङ्ग) | ११०० — | चन्द्रसूरि — | ६०० — |
| २४. | चतुःशरण | ८० | विजयविमलयगणि | (?) २०० |
| २५. | आतुर प्रत्याख्यान | १०० | गुणरत्नसूरि (अवचूरि) | (?) १५० |
| २६. | महाप्रत्याख्यान | १७६ | आनन्दसागरसूरि (संस्कृतछाया) | १७६ |
| २७. | भक्तपरिज्ञा | २१५ | आनन्दसागरसूरि (संस्कृतछाया) | २१५ |
| २८. | तन्दुल वैचारिक | ५०० | विजयविमलगणि | (?) ५०० |
| २९. | संस्तारक | १५५ | गुणरत्न सूरि (अवचूरि) | ११० |
| ३०. | गच्छाचार★ | १७५ | विजयविमलगणि | १५६० |
| ३१. | गणिविद्या | १०५ | आनन्दसागरसूरि (संस्कृतछाया) | १०५ |

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| क्रम | आगमसूत्रनाम | • मूल श्लोक प्रमाण | वृत्ति-कर्ता | • वृत्ति श्लोकप्रमाण |
|---|---|---|---|---|
| ३२. | देवेन्द्रस्तव | ३७५ | आनन्दसागरसूरि (संस्कृत छाया) | ३७५ |
| ३३. | मरणसमाधि ★ | ८३७ | आनन्दसागरसूरि (संस्कृत छाया) | ८३७ |
| ३४. | निशीथ | ८२१ | जिनदासगणि (चूर्णि) | २८००० |
| | | | सङ्घदासगणि (भाष्य) | ७५०० |
| ३५. | बृहत्कल्प | ४७३ | मलयगिरि+क्षेमकीर्ति | ४२६०० |
| | | | सङ्घदासगणि (भाष्य) | ७६०० |
| ३६. | व्यवहार | ३७३ | मलयगिरि | ३४००० |
| | | | सङ्घदासगणि (भाष्य) | ६४०० |
| ३७. | दशाश्रुतस्कन्ध | ८९६ | - ? - (चूर्णि) | २२२५ |
| ३८. | जीतकल्प ★ | १३० | सिद्धसेनगणि (चूर्णि) | १००० |
| ३९. | महानिशीथ | ४५४८ | – | – |
| ४०. | आवश्यक | १३० | हरिभद्रसूरि | २२००० |
| ४१. | ओघनिर्युक्ति | नि.१३५५ | द्रोणाचार्य | (?)७५०० |
| - | पिण्डनिर्युक्ति ★ | नि. ८३५ | मलयगिरिसूरि | ७००० |
| ४२. | दशवैकालिक | ८३५ | हरिभद्रसूरि | ७००० |
| ४३. | उत्तराध्ययन | २००० | शांतिसूरि | १६००० |
| ४४. | नन्दी | ७०० | मलयगिरिसूरि | ७७३२ |
| ४५. | अनुयोगद्वार | २००० | मलधारीहेमचन्द्रसूरि | ५९०० |

## નોંધ :-

(૧) ઉક્ત ૪૫ આગમ સૂત્રોમાં વર્તમાન કાળે પહેલાં ૧ થી ૧૧ अंगसूत्रो, ૧૨ થી ૨૩ उपांगसूत्रो, ૨૪થી૩૩ प्रकीर्णकसूत्रो ૩૪થી ૩૯ छेदसूत्रो, ૪૦ થી ૪૩ मूळसूत्रो, ૪૪-૪૫ चूलिकासूत्रोના નામે હાલ પ્રસિદ્ધ છે.

(૨) ઉક્ત શ્લોક સંખ્યા અમે ઉપલબ્ધ માહિતી અને પૃષ્ઠ સંખ્યા આધારે નોંધેલ છે. જો કે તે સંખ્યા માટે મતાંતર તો જોવા મળે જ છે. જેમકે આચાર સૂત્રમાં ૨૫૦૦, ૨૫૫૪, ૨૫૨૫ એવા ત્રણ શ્લોક પ્રમાણ જાણવા મળેલ છે. આવો મત-ભેદ અન્ય સૂત્રોમાં પણ છે.

(૩) ઉક્ત वृत्ति-આદિ જે નોંધ છે તે અમે કરેલ સંપાદન મુજબની છે. તે સિવાયની પણ वृत्ति-चूर्णि આદિ સાહિત્ય મુદ્રિત કે અમુદ્રિત અવસ્થામાં હાલ ઉપલબ્ધ છે જ.

(૪) गच्छाचार અને मरणसमाधि ના વિકલ્પે चंदावेज्झय અને वीरस्तव प्रकीर्णक આવે છે. જે અમે "आगमसुत्ताणि" માં મૂળ રૂપે અને "આગમદીપ"માં અક્ષરશઃ ગુજરાતી અનુવાદ રૂપે આપેલ છે. તેમજ जीतकल्प જેના વિકલ્પ રૂપે છે એ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पंचकल्पनुं भाष्य अमे ''आगमसुत्ताणि''मां संपादीत कर्युं छे.

(५) ओघ अने पिण्ड ए बंने निर्युक्ति विकल्पे छे. जे हाल मूळसूत्र रूपे प्रसिध्ध छे. जे बंनेनी वृत्ति अमे आपी छे. तेमज तेमां भाष्यनी गाथाओ पण समाविष्ट थई छे.

(६) चार प्रकीर्णक सूत्रो अने महानिशीथ ए पांच आगमनी कोई वृत्ति आदि उपलब्ध थवानो उल्लेख मळतो नथी. प्रकीर्णक नी संस्कृत छाया उपलब्ध छे तेथी मूकी छे. निशीथ-दशा-जितकल्प ए त्रणेनी चूर्णि आपी छे. जेमां दशा अने जीतकल्प ए बंने उपरवृत्ति मळती होवानो उल्लेख छे, पण अमे ते मेळवी शक्या नथी. ज्यारे निशीथ उपर तो मात्र वीसमा उद्देशकःनी ज वृत्ति नो उल्लेख मळे छे.

## ➡ वर्तमान काळे ४५ आगममां उपलब्ध निर्युक्तिः ⬅

| क्रम | निर्युक्ति | श्लोकप्रमाण | क्रम | निर्युक्ति | श्लोकप्रमाण |
|---|---|---|---|---|---|
| १. | आचार-निर्युक्ति | ४५० | ६. | आवश्यक-निर्युक्ति | २५०० |
| २. | सूत्रकृत-निर्युक्ति | २६५ | ७. | ओघनिर्युक्ति | १३५५ |
| ३. | बृहत्कल्प-निर्युक्ति ★ | – | ८. | पिण्डनिर्युक्ति | ८३५ |
| ४. | व्यवहार-निर्युक्ति ★ | – | ९. | दशवैकालिक-निर्युक्ति | ५०० |
| ५. | दशाश्रुत०-निर्युक्ति | १८० | १०. | उत्तराध्ययन-निर्युक्ति | ७०० |

## नोंध :-

(१) अहीं आपेल श्लोक प्रमाण ए गाथा संख्या नथी. ''३२ अक्षरनो एक श्लोक'' ए प्रमाणथी नोंधायेल श्लोक प्रमाण छे.

(२) ★ बृहत्कल्प अने व्यवहार ए बंने सूत्रोनी निर्युक्ति हाल भाष्य मां भळी गई छे. जेनो यथासंभव उल्लेख वृत्तिकार महर्षि ए भाष्य उपरनी वृत्तिमां कर्यो होय तेवुं जोवा मळेल छे.

(३) ओघ अने पिण्डनिर्युक्ति स्वतंत्र मूलआगम स्वरूपे स्थान पामेल छे तेथी तेनुं स्वतंत्र संपादन आगम-४१ रूपे थयेल छे. (तेमज आ संपादनमां पण छे.)

(४) बाकीनी छ निर्युक्तिमांथी दशाश्रुतस्कन्ध निर्युक्ति उपर चूर्णि अने अन्य पांच निर्युक्ति उपरनी वृत्ति अमे अमारा संपादनमां प्रकाशीत करी छे. ज्यां आ छ निर्युक्ति स्पष्ट अलग जोई शकाय छे.

(५) निर्युक्तिकर्ता तरीके भद्रबाहुस्वामी नो उल्लेख ज जोवा मळे छे.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## વર્તમાન કાળે ૪૫ આગમમાં ઉપલબ્ધ ભાષ્યં

| क्रम | भाष्य | श्लोकप्रमाण | क्रम | भाष्य | गाथाप्रमाण |
|---|---|---|---|---|---|
| १. | निशीषभाष्य | ७५०० | ६. | आवश्यकभाष्य ★ | ४८३ |
| २. | बृहत्कल्पभाष्य | ७६०० | ७. | ओघनिर्युक्तिभाष्य ★ | ३२२ |
| ३. | व्यवहारभाष्य | ६४०० | ८. | पिण्डनिर्युक्तिभाष्य ★ | ४६ |
| ४. | पञ्चकल्पभाष्य | ३१८५ | ९. | दशवैकालिकभाष्य ★ | ६३ |
| ५. | जीतकल्पभाष्य | ३१२५ | १०. | उत्तराध्ययनभाष्य (?) | – |

### નોંધ :-

(૧) निशीष, बृहत्कल्प અને व्यवहारभाष्य ના કર્તા सङ्घदासगणि હોવાનું જણાય છે. અમારા સંપાદનમાં निशीष भाष्य તેની चूर्णि સાથે અને बृहत्कल्प તથા व्यवहार भाष्य તેની-તેની वृत्ति સાથે સમાવિષ્ટ થયું છે.

(૨) पञ्चकल्पभाष्य અમારા आगमसुत्ताणि भाग-३८ માં પ્રકાશીત થયું.

(૩) आवश्यकभाष्य માં ગાથા પ્રમાણ ૪૮૩ લખ્યું જેમાં ૧૮૩ ગાથા मूळभाष्य રૂપે છે અને ૩૦૦ ગાથા અન્ય એક ભાષ્યની છે. જેનો સમાવેશ आवश्यक सूत्रं-सटीकं માં કર્યો છે. [જો કે विशेषावश्यक भाष्य ખૂબજ પ્રસિધ્ધ થયું છે પણ તે સમગ્ર आवश्यकसूत्र- ઉપરનું ભાષ્ય નથી અને अध्ययनो અનુસારની અલગ અલગ वृत्ति આદિ પેટા વિવરણો તો आवश्यक અને जीतकल्प એ બંને ઉપર મળે છે. જેનો અત્રે ઉલ્લેખ અમે કરેલ નથી.]

(૪) ओघनिर्युक्ति, पिण्डनिर्युक्ति, दशवैकालिकभाष्य નો સમાવેશ તેની તેની वृत्ति માં થયો જ છે. પણ તેનો કર્તા વિશેનો ઉલ્લેખ અમોને મળેલ નથી. [ओघनिर्युक्ति ઉપર ૩૦૦૦ શ્લોક પ્રમાણ ભાષ્યનો ઉલ્લેખ પણ જોવા મળેલ છે.]

(૫) उत्तराध्ययनभाष्यની ગાથા निर्युक्तिમાં ભળી ગયાનું સંભળાય છે (?)

(૬) આ રીતે अंग - उपांग - प्रकीर्णक - चूलिका એ ૩૫ आगम सूत्रो ઉપરનો કોઈ ભાષ્યનો ઉલ્લેખ અમારી જાણમાં આવેલ નથી. કોઈક સ્થાને સાક્ષી પાઠ-આદિ સ્વરૂપે ભાષ્યગાથા જોવા મળે છે.

(૭) ભાષ્યકર્તા તરીકે મુખ્ય નામ सङ्घदासगणि જોવા મળેલ છે. તેમજ जिनभद्रगणि-क्षमाश्रमण અને सिद्धसेन गणि નો પણ ઉલ્લેખ મળે છે. કેટલાંક ભાષ્યના કર્તા અજ્ઞાત જ છે.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## વર્તમાન કાળે ૪૫ આગમમાં ઉપલબ્ધ चूर्णि:

| क्रम | चूर्णि | श्लोकप्रमाण | क्रम | चूर्णि | श्लोकप्रमाण |
|---|---|---|---|---|---|
| १. | आचार-चूर्णि | ८३०० | ९. | दशाश्रुतस्कन्धचूर्णि | २२२५ |
| २. | सूत्रकृत-चूर्णि | ९९०० | १०. | पञ्चकल्पचूर्णि | ३२७५ |
| ३. | भगवती-चूर्णि | ३११४ | ११. | जीतकल्पचूर्णि | १००० |
| ४. | जीवाभिगम-चूर्णि | १५०० | १२. | आवश्यकचूर्णि | १८५०० |
| ५. | जंबूद्वीपप्रज्ञप्ति-चूर्णि | १८७९ | १३. | दशवैकालिकचूर्णि | ७००० |
| ६. | निशीथचूर्णि | २८००० | १४. | उत्तराध्ययनचूर्णि | ५८५० |
| ७. | बृहत्कल्पचूर्णि | १६००० | १५. | नन्दीचूर्णि | १५०० |
| ८. | व्यवहारचूर्णि | १२०० | १६. | अनुयोगदारचूर्णि | २२६५ |

### નોંધ :-

(૧) ઉક્ત ૧૬ चूर्णिમાંથી निशीथ , दशाश्रुतस्कन्ध, जीतकल्प એ ત્રણ चूर्णि અમારા આ સંપાદનમાં સમાવાઈ ગયેલ છે.

(૨) आचार, सूत्रकृत, आवश्यक, दशवैकालिक, उत्तराध्ययन, नन्दी, अनुयोगद्वार એ સાત चूर्णि પૂજ્યપાદ આગમોદ્ધારક શ્રી એ પ્રકાશીત કરાવી છે.

(૩) दशवैकालिकની બીજી એક चूर्णि જે अगत्स्यसिंहसूरिकृत છે તેનું પ્રકાશન પૂજ્ય શ્રી પુન્યવિજયજીએ કરાવેલ છે.

(૪) जंबूद्वीपप्रज्ञप्तिचूर्णि વિશે હીરાલાલ કાપડીયા પ્રશ્નાર્થચિહ્ન ઉભું કરે છે. भगवती चूर्णि તો મળેજ છે, પણ હજી પ્રકાશીત થઈ નથી. તેમજ बृहत्कल्प , व्यवहार, पञ्चकल्प એ ત્રણ હસ્તપ્રતો અમે જોઈ છે પણ પ્રકાશીત થયાનું જાણમાં નથી.

(૫) चूर्णिकार તરીકે जिनदासगणिमहत्तरનું નામ મુખ્યત્વે સંભળાય છે. કેટલાકના મતે અમુક चूर्णिના કર્તાનો સ્પષ્ટોલ્લેખ મળતો નથી.

### *"આગમ-પંચાંગી" એક ચિન્ત્ય બાબત"*

૧ *વર્તમાન કાળે પ્રાપ્ત આગમ સાહિત્યની વિચારણા પછી ખરેખર આગમના પાંચ અંગોમાં કેટલું અને શું ઉપલબ્ધ છે તે જાણ્યા પછી એક પ્રશ્ન થાય કે આગમ પંચાંગી ની વાતો કેટલી ચિન્ત્ય છે. अंग-उपांग-प्रकीर्णक-चूलिका એ ૩૫ આગમો ઉપર भाष्य નથી. એટલે ૩૫ આગમનું એક અંગ તો અપ્રાપ્ય જ બન્યું. સૂત્ર પરત્વે ઉપલબ્ધ निर्युक्ति ફક્ત છ છે. એટલે ૩૯ આગમોનું એક અંગ અપ્રાપ્ય જ બન્યું. આ રીતે ક્યાંક भाष्य, ક્યાંક निर्युक्ति અને ક્યાંક चूर्णिના અભાવે વર્તમાન કાળે સુવ્યવસ્થિત પંચાંગી એક માત્ર आवश्यक सूत्रની ગણાય.*

૨ *नंदीसूत्रમાં પંચાંગીને બદલે संग्रहणी, प्रतिपत्तिઓ વગેરેના પણ ઉલ્લેખ છે.*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## ➡ ૪૫ આગમ અંતર્ગત વર્તમાન કાળે ઉપલબ્ધ વિભાગો ⬅

[સૂચના :- અમે સંપાદીત કરેલ आगमसुत्ताणि-सटीकं માં બેકી નંબરના પૃષ્ઠો ઉપર જમણી બાજુ आगमसूत्र ના નામ પછી અંકો આપેલ છે. જેમકે ૧/૩/૬/૨/૫૪ વગેરે. આ અંકો તે તે આગમના વિભાગીકરણને જણાવે છે. જેમકે आचारમાં પ્રથમ અંક श्रुतस्कन्धનો છે તેના વિભાગ રૂપે બીજો અંક चूला છે તેના પેટા વિભાગ રૂપે ત્રીજો અંક अध्ययन નો છે. તેના પેટા વિભાગ રૂપે ચોથો અંક उद्देशक નો છે. તેના પેટા વિભાગ રૂપે છેલ્લો અંક मूलનો છે. આ मूल ગદ્ય કે પદ્ય હોઈ શકે. જો ગદ્ય હોય તો ત્યાં પેરેગ્રાફ સ્ટાઈલથી કે છુટુ લખાણ છે અને गाथा/પદ્ય ને પદ્યની સ્ટાઈલથી ॥ - ॥ ગોઠવેલ છે.

પ્રત્યેક આગમ માટે આ રીતે જ ઓબ્લિકમાં (/) પછી ના વિભાગને તેના-તેના પેટા-પેટા વિભાગ સમજવા.

જ્યાં જે-તે પેટા વિભાગ ન હોય ત્યાં (/-) ઓબ્લિક પછી ડેસ મુકીને તે વિભાગ ત્યાં નથી તેમ સુચવેલું છે.]

(१) **आचार** - श्रुतस्कन्धः/चूला/अध्ययनं/उद्देशकः/मूलं
चूला નામક પેટા વિભાગ બીજા श्रुतस्कन्ध માં જ છે.

(२) **सूत्रकृत** - श्रुतस्कन्धः/अध्ययनं/उद्देशकः/मूलं

(३) **स्थान** - स्थानं/अध्ययनं/मूलं

(४) **समवाय** - समवायः/मूलं

(५) **भगवती** - शतकं/वर्ग:-अंतरशतकं/उद्देशकः/मूलं
અહીં शतक ના પેટા વિભાગમાં બે નામો છે. (૧) वर्गः (૨) अंतर्शतक કેમકે शतक २१, २२, २३ માં शतक ના પેટા વિભાગનું નામ वर्गः જ જણાવેલ છે. शतक - ३३,३४,३५,३६,४० ના પેટા વિભાગને अंतरशतक અથવા शतकशतक નામથી ઓળખાવાય છે.

(६) **ज्ञाताधर्मकथा**- श्रुतस्कन्धः/वर्गः/अध्ययनं/मूलं
પહેલા श्रुतस्कन्ध માં अध्ययन જ છે. બીજા श्रुतस्कन्ध નો પેટાવિભાગ वर्ग નામે છે અને તે वर्ग ના પેટા વિભાગમાં अध्ययन છે.

(७) **उपासकदशा**- अध्ययनं/मूलं

(८) **अन्तकृद्दशा**- वर्गः/अध्ययनं/मूलं

(९) **अनुत्तरोपपातिकदशा**- वर्गः/अध्ययनं/मूलं

(१०) **प्रश्नव्याकरण**- द्वारं/अध्ययनं/मूलं
आश्रव અને संवर એવા સ્પષ્ટ બે ભેદ છે જેને आश्रवद्वार અને संवरद्वार કહ્યા છે. (કોઈક द्वार ને બદલે श्रुतस्कन्ध શબ્દ પ્રયોગ પણ કરે છે)

(११) **विपाकश्रुत**- श्रुतस्कन्धः/अध्ययनं/मूलं

(१२) **औपपातिक**- मूलं

(१३) **राजप्रश्नीय**- मूलं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(१४) **जीवाजीवाभिगम-** ★प्रतिपत्तिः/★ उद्देशकः/मूलं
આ આગમમાં ઉકત ત્રણ વિભાગો કર્યા છે તો પણ સમજણ માટે प्रतिपत्तिः પછી એક પેટાવિભાગ નોંધનીય છે. કેમકે प्रतिपत्ति -३-માં नेरइय, तिरिक्खजोणिय, मनुष्य, देव એવા ચાર પેટાવિભાગો પડે છે. તેથી तिपत्ति/(नेरइयआदि)/उद्देशकः/मूलं એ રીતે સ્પષ્ટ અલગ પાડેલા છે, એજ રીતે દશમી प्रतिपत्ति ના उद्देशकः નવ નથી પણ તે પેટાવિભાગ प्रतिपत्तिः નામે જ છે.

(१५) **प्रज्ञापना-** पदं/उद्देशकः/द्वारं/मूलं
પદના પેટા વિભાગમાં ક્યાંક उद्देशकः છે, ક્યાંક द्वारं છે પણ પદ-૨૮ના પેટા વિભાગમાં उद्देशकः અને તેના પેટા વિભાગમાં द्वारं પણ છે.

(१६) **सूर्यप्रज्ञप्ति-** प्राभृतं/प्राभृतप्राभृतं/मूलं

(१७) **चन्द्रप्रज्ञप्ति-** प्राभृतं/प्राभृतप्राभृतं/मूलं
આગમ ૧૬-૧૭માં प्राभृतप्राभृत ના પણ प्रतिपत्तिः નામક પેટા વિભાગ છે. પણ उद्देशकः આદિ મુજબ તેનો વિશેષ વિસ્તાર થાયેલ નથી.

(१८) **जम्बूदीपप्रज्ञप्ति-** वक्षस्कारः/मूलं

(१९) **निरयावलिका** - अध्ययनं/मूलं

(२०) **कल्पवतंसिका** - अध्ययनं/मूलं

(२१) **पुष्पिता** - अध्ययनं/मूलं

(२२) **पुष्पचूलिका** - अध्ययनं/मूलं

(२३) **वण्हिदशा** - अध्ययनं/मूलं
આગમ ૧૯ થી ૨૩ निरयावलिकादि નામથી સાથે જોવા મળે છે કેમકે તેને ઉપાંગના પાંચ વર્ગ તરીકે સૂત્રકારે ઓળખાવેલા છે. જેમાં વર્ગ-૧, निरयावलिका, વર્ગ-૨ कल्पवतंसिका... વગેરે જાણવા

(२४ थी ३३) **चतुःशरण (आदि दशेपयन्ना)** मूलं

(३४) **निशीथ** - उद्देशकः/मूलं

(३५) **बृहत्कल्प** - उद्देशकः/मूलं

(३६) **व्यवहार** - उद्देशकः/मूलं

(३७) **दशाश्रुतस्कन्ध** - दशा/मूलं

(३८) **जीतकल्प** - मूलं

(३९) **महानिशीथ** - अध्ययनं/उद्देशकः/मूलं

(४०) **आवश्यक** - अध्ययनं/मूलं

(४१) **ओघ/पिण्डनिर्युक्ति** - मूलं

(४२) **दशवैकालिक** - अध्ययनं/उद्देशकः/मूलं

(४३) **उत्तराध्ययन** - अध्ययनं//मूलं

(४४- ४५) **नन्दी-अनुयोगद्वार** - मूलं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## અમારા સંપાદીત ૪૫ આગમોમાં આવતા મૂલ નો અંક તથા તેમાં સમાવિષ્ટ ગાથા

| क्रम | आगमसूत्र | मूलं | गाथा | क्रम | आगमसूत्र | मूलं | गाथा |
|---|---|---|---|---|---|---|---|
| १. | आचार | ५५२ | १४७ | २४. | चतुःशरण | ६३ | ६३ |
| २. | सूत्रकृत | ८०६ | ७२३ | २५. | आतुरप्रत्याख्यान | ७१ | ७० |
| ३. | स्थान | १०१० | १६९ | २६. | महाप्रत्याख्यानं | १४२ | १४२ |
| ४. | समवाय | ३८३ | ९३ | २७. | भक्तपरिज्ञा | १७२ | १७२ |
| ५. | भगवती | १०८७ | ११४ | २८. | तंदुलवैचारिक | १६१ | १३९ |
| ६. | ज्ञाताधर्मकथा | २४१ | ५७ | २९. | संस्तारक | १३३ | १३३ |
| ७. | उपासक दशा | ७३ | १३ | ३०. | गच्छाचार | १३७ | १३७ |
| ८. | अन्तकृद्दशा | ६२ | १२ | ३१. | गणिविद्या | ८२ | ८२ |
| ९. | अनुत्तरोपपातिक | १३ | ४ | ३२. | देवेन्द्रस्तव | ३०७ | ३०७ |
| १०. | प्रश्नव्याकरण | ४७ | १४ | ३३. | मरणसमाधि | ६६४ | ६६४ |
| ११. | विपाकश्रुत | ४७ | ३ | ३४. | निशीष | १४२० | – |
| १२. | औपपातिक | ७७ | ३० | ३५. | बृहत्कल्प | २१५ | – |
| १३. | राजप्रश्निय | ८५ | – | ३६. | व्यवहार | २८५ | – |
| १४. | जीवाभिगम | ३९८ | ९३ | ३७. | दशाश्रुतस्कन्ध | ११४ | ५६ |
| १५. | प्रज्ञापना | ६२२ | २३१ | ३८. | जीतकल्प | १०३ | १०३ |
| १६. | सूर्यप्रज्ञप्ति | २१४ | १०३ | ३९. | महानिशीथ | १५२८ | ८ |
| १७. | चन्द्रप्रज्ञप्ति | २१८ | १०७ | ४०. | आवश्यक | ९२ | २१ |
| १८. | जम्बूदीपप्रज्ञप्ति | ३६५ | १३१ | ४१. | ओघनिर्युक्ति | ११६५ | ११६५ |
| १९. | निरयावलिका | २१ | – | ४१. | पिण्डनिर्युक्ति | ७१२ | ७१२ |
| २०. | कल्पवतंसिका | ५ | १ | ४२. | दशवैकालिक | ५४० | ५१५ |
| २१. | पुष्पिता | ११ | २ | ४३. | उत्तराध्ययन | १७३१ | १६४० |
| २२. | पुष्पचूलिका | ३ | १ | ४४. | नन्दी | १६८ | ९३ |
| २३. | वण्हिदशा | ५ | १ | ४५. | अनुयोगद्वार | ३५० | १४१ |

નોંધ :- ઉક્ત गाथा સંખ્યાનો સમાવેશ મૂलं માં થઈ જ જાય છે. તે મૂલ સિવાયની અલગ ગાથા સમજવી નહીં. મૂલ શબ્દ એ અમો સૂત્ર અને गाथा બંને માટે નો આપેલો સંયુક્ત અનુક્રમ છે. गाथा બધાંજ સંપાદનોમાં સામાન્ય અંક ધરાવતી હોવાથી તેનો અલગ અંક આપેલ છે. પણ સૂત્રના વિભાગ દરેક સંપાદકે ભિન્નભિન્ન રીતે કર્યા હોવાથી અમે સૂત્રાંક જુદો પાડતા નથી.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## —: અમારા પ્રકાશનો :—

[૧] अभिनव हेम लघुप्रक्रिया - १ - सप्ताङ्ग विवरणम्
[२] अभिनव हेम लघुप्रक्रिया - २ - सप्ताङ्ग विवरणम्
[३] अभिनव हेम लघुप्रक्रिया - ३ - सप्ताङ्ग विवरणम्
[४] अभिनव हेम लघुप्रक्रिया - ४ - सप्ताङ्ग विवरणम्
[૫] कृदन्तमाला
[૬] चैत्यवन्दन पर्वमाला
[૭] चैत्यवन्दन सङ्ग्रह - तीर्थजिनविशेष
[૮] चैत्यवन्दन चोविशी
[૯] शत्रुञ्जय भक्ति [आवृत्ति-दो]
[૧૦] अभिनव जैन पञ्चाङ्ग - २०४६
[૧૧] અભિનવ ઉપદેશ પ્રાસાદ - ૧- શ્રાવક કર્તવ્ય - ૧ થી ૧૧
[૧૨] અભિનવ ઉપદેશ પ્રાસાદ - ૨- શ્રાવક કર્તવ્ય - ૧૨ થી ૧૫
[૧૩] અભિનવ ઉપદેશ પ્રાસાદ - ૩- શ્રાવક કર્તવ્ય - ૧૬ થી ૩૬
[૧૪] નવપદ - શ્રીપાલ (શાશ્વતી ઓળીના વ્યાખ્યાન રૂપે)
[૧૫] સમાધિ મરણ [વિધિ - સૂત્ર - પદ્ય - આરાધના-મરણભેદ-સંગ્રહ]
[૧૬] ચૈત્યવંદન માળા [૭૭૯ ચૈત્યવનંદનોનો સંગ્રહ]
[૧૭] તત્વાર્થ સૂત્ર પ્રબોધટીકા [અધ્યાય-૧]
[૧૮] તત્વાર્થ સૂત્રના આગમ આધાર સ્થાનો
[૧૯] સિદ્ધાચલનો સાથી [આવૃત્તિ - બે]
[૨૦] ચૈત્ય પરિપાટી
[૨૧] અમદાવાદ જિનમંદિર ઉપાશ્રય આદિ ડિરેક્ટરી
[૨૨] શત્રુંજય ભક્તિ [આવૃત્તિ - બે]
[૨૩] શ્રી નવકારમંત્ર નવલાખ જાપ નોંધપોથી
[૨૪] શ્રી ચારિત્ર પદ એક કરોડ જાપ નોંધપોથી
[૨૫] શ્રી બારવ્રત પુસ્તિકા તથા અન્ય નિયમો - [આવૃત્તિ - ચાર]
[૨૬] અભિનવ જૈન પંચાંગ - ૨૦૪૨ [સર્વપ્રથમ ૧૩ વિભાગોમાં]
[૨૭] શ્રી જ્ઞાનપદ પૂજા
[૨૮] અંતિમ આરાધના તથા સાધુ સાધ્વી કાળધર્મ વિધિ
[૨૯] શ્રાવક અંતિમ આરાધના [આવૃત્તિ ત્રણ]
[૩૦] વીતરાગ સ્તુતિ સંચય [૧૧૫૧ ભાવવાહી સ્તુતિઓ]
[૩૧] (પૂજ્ય આગમોદ્ધારક શ્રી ના સમુદાયના) કાયમી સંપર્ક સ્થળો
[૩૨] તત્વાર્થાધિગમ સૂત્ર અભિનવ ટીકા - અધ્યાય-૧
[૩૩] તત્વાર્થાધિગમ સૂત્ર અભિનવ ટીકા - અધ્યાય-૨
[૩૪] તત્વાર્થાધિગમ સૂત્ર અભિનવ ટીકા - અધ્યાય-૩
[૩૫] તત્વાર્થાધિગમ સૂત્ર અભિનવ ટીકા - અધ્યાય-૪

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[૩૬] તત્વાર્થાધિગમ સૂત્ર અભિનવ ટીકા - અધ્યાય-૫
[૩૭] તત્વાર્થાધિગમ સૂત્ર અભિનવ ટીકા - અધ્યાય-૬
[૩૮] તત્વાર્થાધિગમ સૂત્ર અભિનવ ટીકા - અધ્યાય-૭
[૩૯] તત્વાર્થાધિગમ સૂત્ર અભિનવ ટીકા - અધ્યાય-૮
[૪૦] તત્વાર્થાધિગમ સૂત્ર અભિનવ ટીકા - અધ્યાય-૯
[૪૧] તત્વાર્થાધિગમ સૂત્ર અભિનવ ટીકા - અધ્યાય-૧૦

**પ્રકાશન ૧ થી ૪૧ અભિનવશ્રુત પ્રકાશને પ્રગટ કરેલ છે.**

| | | | |
|---|---|---|---|
| [४२] | आयारो | [आगमसुत्ताणि-१] | पढमं अंगसुत्तं |
| [४३] | सूयगडो | [आगमसुत्ताणि-२] | बीअं अंगसुत्तं |
| [४४] | ठाणं | [आगमसुत्ताणि-३] | तइयं अंगसुत्तं |
| [४५] | समवाओ | [आगमसुत्ताणि-४] | चउत्थं अंगसुत्तं |
| [४६] | विवाहपन्नति | [आगमसुत्ताणि-५] | पंचमं अंगसुत्तं |
| [४७] | नायाधम्मकहाओ | [आगमसुत्ताणि-६] | छट्ठं अंगसुत्तं |
| [४८] | उवासगदसाओ | [आगमसुत्ताणि-७] | सत्तमं अंगसुत्तं |
| [४९] | अंतगडदसाओ | [आगमसुत्ताणि-८] | अट्ठमं अंगसुत्तं |
| [५०] | अनुत्तोववाइयदसाओ | [आगमसुत्ताणि-९] | नवमं अंगसुत्तं |
| [५१] | पण्हावागरणं | [आगमसुत्ताणि-१० ] | दसमं अंगसुत्तं |
| [५२] | विवागसूयं | [आगमसुत्ताणि-११ ] | एक्षरसमं अंगसुत्तं |
| [५३] | उववाइयं | [आगमसुत्ताणि-१२ ] | पढमं उवंगसुत्तं |
| [५४] | रायप्पसेणियं | [आगमसुत्ताणि-१३ ] | बीअं उवंगसुत्तं |
| [५५] | जीवाजीवाभिगमं | [आगमसुत्ताणि-१४ ] | तइयं उवंगसुत्तं |
| [५६] | पन्नवणासुत्तं | [आगमसुत्ताणि-१५ ] | चउत्थं उवंगसुत्तं |
| [५७] | सूरपन्नतिः | [आगमसुत्ताणि-१६ ] | पंचमं उवंगसुत्तं |
| [५८] | चंदपन्नत्तिः | [आगमसुत्ताणि-१७ ] | छट्ठं उवंगसुत्तं |
| [५९] | जंबूद्दीवपन्नति | [आगमसुत्ताणि-१८ ] | सत्तमं उवंगसुत्तं |
| [६०] | निरयावलियाणं | [आगमसुत्ताणि-१९ ] | अट्ठमं उवंगसुत्तं |
| [६१] | कप्पवडिंसियाणं | [आगमसुत्ताणि-२० ] | नवमं उवंगसुत्तं |
| [६२] | पुप्फियाणं | [आगमसुत्ताणि-२१ ] | दसमं उवंगसुत्तं |
| [६३] | पुप्फचूलियाणं | [आगमसुत्ताणि-२२ ] | एक्षरसमं उवंगसुत्तं |
| [६४] | वण्हिदसाणं | [आगमसुत्ताणि-२३ ] | बारसमं उवंगसुत्तं |
| [६५] | चउसरणं | [आगमसुत्ताणि-२४ ] | पढमं पईण्णगं |
| [६६] | आउरपच्चक्खाणं | [आगमसुत्ताणि-२५ ] | बीअं पईण्णगं |
| [६७] | महापच्चक्खाणं | [आगमसुत्ताणि-२६ ] | तीइयं पईण्णगं |
| [६८] | भत्तपरिण्णा | [आगमसुत्ताणि-२७ ] | चउत्थं पईण्णगं |


Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | | | |
|---|---|---|---|
| [६९] | तंदुलवेयालियं | [आगमसुत्ताणि-२८ ] | पंचमं पईण्णगं |
| [७०] | संथारगं | [आगमसुत्ताणि-२९ ] | छट्ठं पईण्णगं |
| [७१] | गच्छायार | [आगमसुत्ताणि-३०/१ ] | सत्तमं पईण्णगं-१ |
| [७२] | चंदावेज्झयं | [आगमसुत्ताणि-३०/२ ] | सत्तमं पईण्णगं-२ |
| [७३] | गणिविज्जा | [आगमसुत्ताणि-३१ ] | अट्ठमं पईण्णगं |
| [७४] | देविंदत्थओ | [आगमसुत्ताणि-३२ ] | नवमं पईण्णगं |
| [७५] | मरणसमाहि | [आगमसुत्ताणि-३३/१ ] | दसमं पईण्णगं-१ |
| [७६] | वीरत्थव | [आगमसुत्ताणि-३३/२ ] | दसमं पईण्णगं-२ |
| [७७] | निसीह | [आगमसुत्ताणि-३४ ] | पढमं छेयसुत्तं |
| [७८] | बुहत्कप्पो | [आगमसुत्ताणि-३५ ] | बीअं छेयसुत्तं |
| [७९] | ववहार | [आगमसुत्ताणि-३६ ] | तइयं छेयसुत्तं |
| [८०] | दसासुयक्खंधं | [आगमसुत्ताणि-३७ ] | चउत्थं छेयसुत्तं |
| [८१] | जीयकप्पो | [आगमसुत्ताणि-३८/१ ] | पंचमं छेयसुत्तं-१ |
| [८२] | पंचकप्पभास | [आगमसुत्ताणि-३८/२ ] | पंचमं छेयसुत्तं-२ |
| [८३] | महानिसीहं | [आगमसुत्ताणि-३९ ] | छट्ठं छेयसुत्तं |
| [८४] | आवसस्सयं | [आगमसुत्ताणि-४० ] | पढमं मूलसुत्तं |
| [८५] | ओहनिज्जुत्ति | [आगमसुत्ताणि-४१/१ ] | बीअं मूलसुत्तं-१ |
| [८६] | पिंडनिज्जुत्ति | [आगमसुत्ताणि-४१/२ ] | बीअं मूलसुत्तं-२ |
| [८७] | दसवेयालियं | [आगमसुत्ताणि-४२ ] | तइयं मुलसुत्तं |
| [८८] | उत्तरज्झयणं | [आगमसुत्ताणि-४३ ] | चउत्थं मूलसुत्तं |
| [८९] | नंदीसूयं | [आगमसुत्ताणि-४४ ] | पढमा चूलिया |
| [९०] | अनुओगदारं | [आगमसुत्ताणि-४५ ] | बितिया चूलिया |

**પ્રકાશન ૪૨ થી ૯૦ આગમશ્રુત પ્રકાશને પ્રગટ કરેલ છે.**

| | | | | |
|---|---|---|---|---|
| [૯૧] | આયાર - | ગુજરાતી અનુવાદ | [આગમદીપ-૧] | પહેલું અંગસૂત્ર |
| [૯૨] | સૂયગડ - | ગુજરાતી અનુવાદ | [આગમદીપ-૧] | બીજું અંગસૂત્ર |
| [૯૩] | ઠાણ - | ગુજરાતી અનુવાદ | [આગમદીપ-૧] | ત્રીજું અંગસૂત્ર |
| [૯૪] | સમવાય - | ગુજરાતી અનુવાદ | [આગમદીપ-૧] | ચોથું અંગસૂત્ર |
| [૯૫] | વિવાહપન્નત્તિ - | ગુજરાતી અનુવાદ | [આગમદીપ-૨] | પાંચમું અંગસૂત્ર |
| [૯૬] | નાયાધમ્મકહા - | ગુજરાતી અનુવાદ | [આગમદીપ-૩]. | છઠ્ઠું અંગસૂત્ર |
| [૯૭] | ઉવાસગદસા - | ગુજરાતી અનુવાદ | [આગમદીપ-૩] | સાતમું અંગસૂત્ર |
| [૯૮] | અંતગડદસા - | ગુજરાતી અનુવાદ | [આગમદીપ-૩] | આઠમું અંગસૂત્ર |
| [૯૯] | અનુત્તરોપપાતિકદસા- | ગુજરાતી અનુવાદ | [આગમદીપ-૩] | નવમું અંગસૂત્ર |
| [૧૦૦] | પણ્હાવાગરણ- | ગુજરાતી અનુવાદ | [આગમદીપ-૩] | દશમું અંગસૂત્ર |

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | | | | |
|---|---|---|---|---|
| [૧૦૧] | વિવાગસૂય - | ગુજરાતી અનુવાદ | [આગમદીપ-૩] | અગિયારમું અંગસૂત્ર |
| [૧૦૨] | ઉવવાઇય | ગુજરાતી અનુવાદ | [આગમદીપ-૪] | પહેલું ઉપાંગસૂત્ર |
| [૧૦૩] | રાયપ્પસેણિય - | ગુજરાતી અનુવાદ | [આગમદીપ-૪] | બીજું ઉપાંગસૂત્ર |
| [૧૦૪] | જીવાજીવાભિગમ - | ગુજરાતી અનુવાદ | [આગમદીપ-૪] | ત્રીજું ઉપાંગસૂત્ર |
| [૧૦૫] | પન્નવણાસુત્ત | ગુજરાતી અનુવાદ | [આગમદીપ-૪] | ચોથું ઉપાંગસૂત્ર |
| [૧૦૬] | સૂરપન્નત્તિ - | ગુજરાતી અનુવાદ | [આગમદીપ-૫] | પાચમું ઉપાંગસૂત્ર |
| [૧૦૭] | ચંદપન્નતિ - | ગુજરાતી અનુવાદ | [આગમદીપ-૫] | છઠ્ઠું ઉપાંગસૂત્ર |
| [૧૦૮] | જંબુદ્દીવપન્નતિ - | ગુજરાતી અનુવાદ | [આગમદીપ-૫] | સાતમું ઉપાંગસૂત્ર |
| [૧૦૯] | નિરયાવલિયા - | ગુજરાતી અનુવાદ | [આગમદીપ-૫] | આઠમું ઉપાંગસૂત્ર |
| [૧૧૦] | કપ્પવડિંસિયા - | ગુજરાતી અનુવાદ | [આગમદીપ-૫] | નવમું ઉપાંગસૂત્ર |
| [૧૧૧] | પુપ્ફિયા - | ગુજરાતી અનુવાદ | [આગમદીપ-૫] | દશમું ઉપાંગસૂત્ર |
| [૧૧૨] | પુપ્ફચૂલિયા - | ગુજરાતી અનુવાદ | [આગમદીપ-૫] | અગિયારમું ઉપાંગસૂત્ર |
| [૧૧૩] | વણ્હિદસા - | ગુજરાતી અનુવાદ | [આગમદીપ-૫] | બારમું ઉપાંગસૂત્ર |
| [૧૧૪] | ચઉસરણ - | ગુજરાતી અનુવાદ | [આગમદીપ-૬] | પહેલો પયન્નો |
| [૧૧૫] | આઉરપ્પચ્ચક્ખાણ - | ગુજરાતી અનુવાદ | [આગમદીપ-૬] | બીજો પયન્નો |
| [૧૧૬] | મહાપચ્ચક્ખાણ - | ગુજરાતી અનુવાદ | [આગમદીપ-૬] | ત્રીજો પયન્નો |
| [૧૧૭] | ભત્તપરિણ્ણા - | ગુજરાતી અનુવાદ | [આગમદીપ-૬] | ચોથો પયન્નો |
| [૧૧૮] | તંદુલવેયાલિય - | ગુજરાતી અનુવાદ | [આગમદીપ-૬] | પાંચમો પયન્નો |
| [૧૧૯] | સંથારગ - | ગુજરાતી અનુવાદ | [આગમદીપ-૬] | છઠ્ઠો પયન્નો |
| [૧૨૦] | ગચ્છાચાર - | ગુજરાતી અનુવાદ | [આગમદીપ-૬] | સાતમો પયન્નો-૧ |
| [૧૨૧] | ચંદાવેજ્ઝય - | ગુજરાતી અનુવાદ | [આગમદીપ-૬] | સાતમો પયન્નો-૨ |
| [૧૨૨] | ગણિવિજ્જા - | ગુજરાતી અનુવાદ | [આગમદીપ-૬] | આઠમો પયન્નો |
| [૧૨૩] | દેવિંદત્થઓ - | ગુજરાતી અનુવાદ | [આગમદીપ-૬] | નવમો પયન્નો |
| [૧૨૪] | વીરત્થવ - | ગુજરાતી અનુવાદ | [આગમદીપ-૬] | દશમો પયન્નો |
| [૧૨૫] | નિસીહ - | ગુજરાતી અનુવાદ | [આગમદીપ-૬] | પહેલું છેદસૂત્ર |
| [૧૨૬] | બુહતકપ્પ - | ગુજરાતી અનુવાદ | [આગમદીપ-૬] | બીજું છેદસૂત્ર |
| [૧૨૭] | વવહાર - | ગુજરાતી અનુવાદ | [આગમદીપ-૬] | ત્રીજું છેદસૂત્ર |
| [૧૨૮] | દસાસુયક્ખંધ - | ગુજરાતી અનુવાદ | [આગમદીપ-૬] | ચોથું છેદસૂત્ર |
| [૧૨૯] | જીયકપ્પો - | ગુજરાતી અનુવાદ | [આગમદીપ-૬] | પાંચમું છેદસૂત્ર |
| [૧૩૦] | મહાનિસીહ - | ગુજરાતી અનુવાદ | [આગમદીપ-૬] | છઠ્ઠું છેદસૂત્ર |
| [૧૩૧] | આવસ્સય - | ગુજરાતી અનુવાદ | [આગમદીપ-૭] | પહેલું મૂલસુત્ર |
| [૧૩૨] | ઓહનિજ્જુત્તિ - | ગુજરાતી અનુવાદ | [આગમદીપ-૭] | બીજું મૂલસુત્ર-૧ |
| [૧૩૩] | પિંડનિજ્જુત્તિ - | ગુજરાતી અનુવાદ | [આગમદીપ-૭] | બીજું મૂલસુત્ર-૨ |
| [૧૩૪] | દસવેયાલિય - | ગુજરાતી અનુવાદ | [આગમદીપ-૭] | ત્રીજું મુલસૂત્ર |

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | | | | |
|---|---|---|---|---|
| [૧૩૫] | ઉત્તરજ્ઝયણ - | ગુજરાતી અનુવાદ | [આગમદીપ-૭] | ચોથું મૂલસુત્ર |
| [૧૩૬] | નંદીસુત્તં - | ગુજરાતી અનુવાદ | [આગમદીપ-૭] | પહેલી ચૂલિકા |
| [૧૩૭] | અનુયોગદ્વાર - | ગુજરાતી અનુવાદ | [આગમદીપ-૭] | બીજી ચૂલિકા |

**પ્રકાશન ૯૧ થી ૧૩૭ આગમદીપ પ્રકાશને પ્રગટ કરેલ છે.**

[૧૩૮] દીક્ષા યોગાદિ વિધિ

[૧૩૯] ૪૫ આગમ મહાપૂજન વિધિ

| | | |
|---|---|---|
| [१४०] | आचाराङ्गसूत्रं सटीकं | आगमसुत्ताणि सटीकं-१ |
| [१४१] | सूत्रकृताङ्गसूत्रं सटीकं | आगमसुत्ताणि सटीकं-२ |
| [१४२] | स्थानाङ्गसूत्रं सटीकं | आगमसुत्ताणि सटीकं-३ |
| [१४३] | समवायाङ्गसूत्रं सटीकं | आगमसुत्ताणि सटीकं-४ |
| [१४४] | भगवतीअङ्गसूत्रं सटीकं | आगमसुत्ताणि सटीकं-५/६ |
| [१४५] | ज्ञाताधर्मकथाङ्गसूत्रं सटीकं | आगमसुत्ताणि सटीकं-७ |
| [१४६] | उपासकदशाङ्गसूत्रं सटीकं | आगमसुत्ताणि सटीकं-७ |
| [१४७] | अन्तकृद्दशाङ्गसूत्रं सटीकं | आगमसुत्ताणि सटीकं-७ |
| [१४८] | अनुत्तरोपपातिकदशाङ्गसूत्रं सटीकं | आगमसुत्ताणि सटीकं-७ |
| [१४९] | प्रश्नव्याकरणाङ्गसूत्रं सटीकं | आगमसुत्ताणि सटीकं-७ |
| [१५०] | विपाकश्रुताङ्गसूत्रं सटीकं | आगमसुत्ताणि सटीकं-८ |
| [१५१] | औपपातिकउपाङ्गसूत्रं सटीकं | आगमसुत्ताणि सटीकं-८ |
| [१५२] | राजप्रश्नियउपाङ्गसूत्रं सटीकं | आगमसुत्ताणि सटीकं-८ |
| [१५३] | जीवाजीवाभिगमउपाङ्गसूत्रं सटीकं | आगमसुत्ताणि सटीकं-९ |
| [१५४] | प्रज्ञापनाउपाङ्गसूत्रं सटीकं | आगमसुत्ताणि सटीकं-१०/११ |
| [१५५] | सूर्यप्रज्ञप्तिउपाङ्गसूत्रं सटीकं | आगमसुत्ताणि सटीकं-१२ |
| [१५६] | चन्द्रप्रज्ञप्तिउपाङ्गसूत्रं सटीकं | आगमसुत्ताणि सटीकं-१२ |
| [१५७] | जम्बूद्वीवप्रज्ञप्तिउपाङ्गसूत्रं सटीकं | आगमसुत्ताणि सटीकं-१३ |
| [१५८] | निरयावलिकाउपाङ्गसूत्रं सटीकं | आगमसुत्ताणि सटीकं-१४ |
| [१५९] | कल्पवतंसिकाउपाङ्गसूत्रं सटीकं | आगमसुत्ताणि सटीकं-१४ |
| [१६०] | पुष्पिताउपाङ्गसूत्रं सटीकं | आगमसुत्ताणि सटीकं-१४ |
| [१६१] | पुष्पचूलिकाउपाङ्गसूत्रं सटीकं | आगमसुत्ताणि सटीकं-१४ |
| [१६२] | वण्हिदसाउपाङ्गसूत्रं सटीकं | आगमसुत्ताणि सटीकं-१४ |
| [१६३] | चतुःशरणप्रकीर्णकसूत्र सटीकं | आगमसुत्ताणि सटीकं-१४ |
| [१६४] | आतुरप्रत्याव्यानप्रकीर्णकसूत्रं सटीकं | आगमसुत्ताणि सटीकं-१४ |
| [१६५] | महाप्रत्याख्यानप्रकीर्णकसूत्रं सच्छायं | आगमसुत्ताणि सटीकं-१४ |
| [१६६] | भक्तपरिज्ञाप्रकीर्णकसूत्रं सच्छायं | आगमसुत्ताणि सटीकं-१४ |

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | | |
|---|---|---|
| [१६७] | तंदुलवैचारिकप्रकीर्णकसूत्रं सटीकं | आगमसुत्ताणि सटीकं-१४ |
| [१६८] | संस्तारकप्रकीर्णकसूत्रं सच्छायं | आगमसुत्ताणि सटीकं-१४ |
| [१६९] | गच्छाचारप्रकीर्णकसूत्रं सटीकं | आगमसुत्ताणि सटीकं-१४ |
| [१७०] | गणिविद्याप्रकीर्णकसूत्रं सच्छायं | आगमसुत्ताणि सटीकं-१४ |
| [१७१] | देवेन्द्रस्तवप्रकीर्णकसूत्रं सच्छायं | आगमसुत्ताणि सटीकं-१४ |
| [१७२] | मरणसमाधिप्रकीर्णकसूत्रं सच्छायं | आगमसुत्ताणि सटीकं-१४ |
| [१७३] | निशीथछेदसूत्रं सटीकं | आगमसुत्ताणि सटीकं-१५-१६-१७ |
| [१७४] | बृहत्कल्पछेदसूत्रं सटीकं | आगमसुत्ताणि सटीकं-१८-१९-२० |
| [१७५] | व्यवहारछेदसूत्रं सटीकं | आगगम सुत्ताणि सटीकं-२१-२२ |
| [१७६] | दशाश्रुतस्कन्धछेदसूत्रं सटीकं | आगमसुत्ताणि सटीकं-२३ |
| [१७७] | जीतकल्पछेदसूत्रं सटीकं | आगमसुत्ताणि सटीकं-२३ |
| [१७८] | महानिशीथसूत्रं (मूलं) | आगमसुत्ताणि सटीकं-२३ |
| [१७९] | आवश्यकमूलसूत्रं सटीकं | आगमसुत्ताणि सटीकं-२४-२५ |
| [१८०] | ओघनिर्युक्तिमूलसूत्रं सटीकं | आगम सुत्तामि सटीकं-२६ |
| [१८१] | पिण्डनिर्युक्तिमूलसूत्रं सटीकं | आगमसुत्ताणि सटीकं-२६ |
| [१८२] | दशवैकालिकमूलसूत्रं सटीकं | आगमसुत्ताणि सटीकं-२७ |
| [१८३] | उत्तराध्ययनमूलसूत्रं सटीकं | आगमसुत्ताणि सटीकं-२८-२९ |
| [१८४] | नन्दी-चूलिकासूत्रं सटीकं | आगमसुत्ताणि सटीकं-३० |
| [१८५] | अनुयोगद्वारचूलिकासूत्रं सटीकं | आगमसुत्ताणि सटीकं-३० |

**પ્રકાશન ૧૩૯ થી ૧૮૫ આગમશ્રુત પ્રકાશને પ્રગટ કરેલ છે.**

—: સંપર્ક સ્થળ :—

'આગમ આરાધના કેન્દ્ર'

શીતલનાથ સોસાયટી-વિભાગ-૧, ફ્લેટ નં-૧૩, ૪થે માળે

શ્રી નમિનાથ જૈન દેરાસરજી પાછળ, બ્હાઈ સેન્ટર, ખાનપુર

અમદાવાદ-૧

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# "आगमसुत्ताणि-सटीकं" ભાગ ૧ થી ૩૦ નું વિવરણ

| आगमसुत्ताणि | समाविष्टाआगमाः |
|---|---|
| भाग-१ | आयार |
| भाग-२ | सूत्रकृत |
| भाग-३ | स्थान |
| भाग-४ | समवाय |
| भाग-५-६ | भगवती (अपरनाम व्याख्याप्रज्ञप्ति) |
| भाग-७ | ज्ञाताधर्मकथा, उपासकदशा, अन्तकृद्दशा, अनुत्तरोपपातिकदशा, प्रश्नव्याकरण |
| भाग-८ | विपाकश्रुत, औपपातिक, राजप्रश्निय |
| भाग-९ | जीवाजीवाभिगम |
| भाग-१०-११ | प्रज्ञापना |
| भाग-१२ | सूर्यप्रज्ञप्ति, चन्द्रप्रज्ञप्ति |
| भाग-१३ | जम्बूद्वीपप्रज्ञप्ति |
| भाग-१४ | निरयावलिका, कल्पवतंसिका, पुष्पिका, पुष्पचूलिका वण्हिदशा, चतुःशरण, आतुरप्रत्याख्यान, महाप्रत्याख्यान, भक्तपरिज्ञा, तन्दुलवैचारिक, संस्तारक, गच्छाचार, गणिविद्या, देवेन्द्रस्तव, मरणसमाधि |
| भाग-१५-१६-१७ | नीशीथ |
| भाग-१८-१९-२० | बृहत्कल्प |
| भाग-२१-२२ | व्यवहार |
| भाग-२३ | दशाश्रुतस्कन्ध, जीतकल्प, महनिशीथ |
| भाग-२४-२५ | आवश्यक |
| भाग-२६ | ओघनिर्युक्ति, पिण्डनिर्युक्ति |
| भाग-२७ | दशवैकालिक |
| भाग-२८-२९ | उत्तराध्ययन |
| भाग-३० | नन्दी, अनुयोगद्वार |

Jain Education International For Private & Personal Use Only www.jainelibrary.org




Jain Education International For Private & Personal Use Only www.jainelibrary.org